CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भट्टि काव्यम्

१२ - २२ सर्गपर्यन्तम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हरिदास संस्कृत ग्रन्थमाला १३६

॥ श्रीः ॥

भट्टिकाव्यम्

चन्द्रकला’ ‘विद्योतिनी’ व्याख्योपेतम्

(परीक्षोपयोगि १२-२२ सर्गपर्यन्तम्)

चौखम्बा संस्कृत सीरीज़ आफिस, वाराणसी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

758

BVB Sri Sankaracharya Sanskrit Mahavidyalaya
567

MEHARCHAND LACHHMANDAS
DARYA GANJ
NEW DELHI
110002
BOOKSELLERS & PUBLISHERS

MCLD

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला

१३६

महाकवि-श्रीमद्भट्टिविरचितं

भट्टिकाव्यम्

'चन्द्रकला' 'विद्योतिनी' संस्कृत-हिन्दीव्याख्योपेतम्

(उत्तरार्द्ध १२-२२ सर्गपर्यन्तम्)

व्याख्याता

साहित्यसुधाकर-काव्यतीर्थ

आचार्यः श्रीशेषराजशर्मा शास्त्री

Bhawan's Sri Sankaracharya Sans...
567
Bharatiya Vidya ... vidyalaya

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

१९७९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : चौखम्बा प्रेस, वाराणसी
संस्करण : चतुर्थ, वि० सं० २०३३
मूल्य : १०-००

© चौखम्बा संस्कृत सीरीज आफिस
के० ३७/९९, गोपाल मन्दिर लेन
पो० बा० ८, वाराणसी-२२१००१ (भारत)
फोन : ६३१४५

Bhawan's Sri Sankaracharya ... Sanskrit Maha... Vidya Bhavan
667

अपरं च प्राप्तिस्थानम्
चौखम्बा अमरभारती प्रकाशन
के० ३७/११८, गोपाल मन्दिर लेन
पो० बा० १३८, वाराणसी-२२१००१
(भारत)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

THE
HARIDAS SANSKRIT SERIES
136

BHATTIKĀVYAM

OF

MAHAKAVI BHATTI

Edited with the
Chandrakala-Vidyotini Sanskrit-Hindi Commentaries

BY

Pt. SHESARAJ SHARMA SHASTRI
Prof. Nepali Department, B. H. U.

THE
Chowkhamba Sanskrit Series Office
VARANASI-1 (India)
1976

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

© The Chowkhamba Sanskrit Series Office
K. 37/99, Gopal Mandir Lane
Post Box 8, Varanasi–221001 (India)
1976
Phone : 63145

Fourth Edition
1976
Price Rs. 10-00

Also can be had of
Chaukhamba Amarabharati Prakashan
Oriental Publishers & Book – Sellers
Post Box No. 138
K. 37/118, Gopal Mandir Lane, Varanasi-221001
(INDIA)

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपोद्घातः

वैयाकरणशिरोमणेर्महाकवेर्भट्टेर्विषयेऽस्माभिः स्वकीयचन्द्रकलाऽभिख्यव्याख्याविलसितस्य भट्टिकाव्यस्य सर्गषट्कसमन्विते प्रथमभागे कतिपयानि वाक्यानि प्रकाशितानि । साम्प्रतं च तस्यैव महाकाव्यस्यैकादशसर्गोपेते तृतीयभागे तस्य महाकवेस्तत्काव्यस्य च विषये प्रबन्धावसाननिबन्धनं किमपि वक्तव्यं तत्रभवतां महानुभावानां पुरतः समुपस्थाप्यते ।

रावणवधाऽपरपर्यायस्य लोकसंस्तुतस्य प्रस्तुतस्य भट्टिकाव्यस्य कर्तुर्नाम्नि वर्तते महती विप्रतिपत्तिः कृतिजनेषु । शब्दकमलविकासनरविर्महाकविरयं "भट्टिर्भट्टो भट्टपादो भट्टस्वामी स्वामिभट्टो भर्तृहरिश्चे"ति बहुभिर्नामधेयैर्विपश्चिद्भिर्व्यवह्रियते । तत्र पुरातनेषु कोविदेषु विद्वल्ललामेन जयमङ्गलेन स्वकीयायां जयमङ्गलाऽभिख्यायां तथा महोपाध्यायेन कोलाऽचलमल्लिनाथसूरिणा तदीयायां सर्वंपथीनाऽऽख्यायां टीकायामस्य महाकवेर्भट्टिरिति नामोदलेखि । अर्वाचीनेषु विचक्षणेषु विद्याविनोदनारायणभट्टो निजनिर्मितायां भट्टिबोधिनीटीकायां, विद्वच्चक्रवर्ती कन्दर्पचक्रवर्ती वैजयन्त्यभिधानायामात्मटीकायां, सुधीमतल्लिका भरतमल्लिको मुग्धबोधिनीटीकायां, पञ्चपाद्युणादिवृत्तिकारः श्वेतवनवासी चैते सर्वेऽपि महानुभावा महाकवेरस्य "भर्तृहरि"रिति नामोररीचक्रुः ।

पूर्वोक्तेष्वभिधानेषु "भट्टिर्भर्तृहरि"श्चेति द्वयोर्नामधेययोरेव विदुषां विसंवादः । तदतिरिक्तनामान्तराणां प्रसिद्धिविरहात्तत्सत्तायां तदभावे वा नो काऽपि नो हानिः । परं भट्टेर्भर्तृहरेश्चैकभूयत्वे महती विचिकित्सा । तत्र च भर्तृहरिरिति नाम्ना द्वौ विपश्चितौ परां ख्यातिमुपगतौ । तत्रैको भूपालकुलचूडामणेर्विक्रमादित्यस्य भ्राता, यो भर्तृहरिशतकत्रयकर्तृत्वेन लोकोत्तरां विश्रुतिं यातो यश्च सहस्रद्वयात्पूर्वं संभूतः । अमुष्य प्रस्तुतमहाकविना भट्टिना समं विद्यते सुतरां भेद इत्यधस्तनेन वाक्येन स्फुटीभविष्यति । अपरो भर्तृहरिः सुरभारतीपरिचरणपरेषु सूरिनिकरेषु लोकोत्तरवैयाकरणधुरन्धरत्वेन विख्यातः । येन महाभाष्यस्य महाभाष्यदीपिकाऽऽख्या व्याख्या, पाणिनीयसूत्राणां भागवृत्तिरिति वृत्तिर्भाष्यतात्पर्यमवलम्ब्य वाक्यपदीयाऽभिधानो भुवनविश्रुतो व्याकरणदर्शनप्रबन्धश्च व्यरचि । यश्चाऽनुपमविक्रमस्य विक्रमभूपालस्य सप्तोत्तरात्सप्तमशतकात्पूर्वं संभूत इति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्नतत्त्वविदां कोविदानां परामर्शः। अयमेव भर्तृहरिर्भट्टयपरपर्यायो भट्टिकाव्यस्य कर्ता चेति भरतमल्लिकादीनां धीमतामभिमतम्। "नामैकदेशग्रहणेन नामग्रहणम्" इति नयेन भर्तृहरिपदस्यैकदेशो भर्तृपदं प्राकृतभाषायां भट्टिरूपे परिणमतीत्याकारकं स्वकीयराद्धान्तप्रकाशकं हेतुं च पण्डितमण्डलाऽऽखण्डलायमानास्ते न्यदर्शयन्। परं भट्टेर्भर्तृहरेश्चेत्युभयोरपि विदुषोर्वैयाकरणप्रकाण्डत्वेनाऽकाण्ड एव तदेकभूयत्वे विपश्चितां भ्रमस्योद्गमः समजनीति वयं ब्रूमः।

भट्टिकाव्यस्य द्वाविंशसर्गस्थस्य निम्नलिखितस्य—

'काव्यमिदं विहितं मया वलभ्यां श्रीधरसेननरेन्द्रपालितायाम्।
कीर्तिरतो भवतान्नृपस्य तस्य प्रेमकरः क्षितिपो यतः प्रजानाम्॥'

चरमस्याऽस्य श्लोकस्योल्लेखात्स्फुटतरमेतत्प्रतीयते यदयं महाकविर्गुर्जरस्थवलभीभूपालस्य श्रीधरसेनस्याश्रित आसीदिति। वलभीपुर्यां श्रीधरसेनाऽभिधानाश्चत्वारो नरेन्द्रा अभूवन्। तत्र च द्वितीयस्य श्रीधरसेनस्याऽयं महाकविरनुजीवीति वृत्तं तस्माद् भूपालाद्भट्टिकवये प्रतिपादितस्य भूमिदानस्य शिलालेखात्स्फुटतरमवसीयते। तस्य च भूदानस्य कालो विक्रमस्य सप्तषष्ट्युत्तरा षट्शतीति ज्ञायते। वाक्यपदीयकर्ता भर्तृहरिश्चैतस्य पश्चाद्वर्ती बभूव। अत एव "आङो यमहन (१।३।२८)" इति सूत्रस्य व्याख्याप्रसङ्गे वैयाकरणकेसरिणा भर्तृहरिणा "आहध्वं मा रघूत्तमम्" इति महाकवेर्भट्टेः प्रयोगः "प्रमाद एवाऽयम्" इति भागवृत्तौ खण्डितः। भर्तृहरिर्भट्टिरभविष्यच्चेत्तर्हि स्वोक्तेरेव स्वयं खण्डनं कथमकरिष्यत्? एतेन दृढतरप्रमाणेन भट्टिर्भर्तृहरेः पूर्ववर्ती तद्भिन्नश्चेति निश्चप्रचमधिगम्यते। केचित्तु मन्दसूर (मैसूर) उपलब्धस्य शिलालेखस्य रचयिता वत्सभट्टिरेव भट्टिकाव्यस्य कर्ता भट्टिरिति मन्यन्ते, परं तस्य शिलालेखस्य च्युतसंस्कृतिदोषाक्रान्तत्वान्मतमेतदयुक्तमिति प्रतिभाति। साम्प्रतमस्य महाकाव्यस्त विषये किमपि वैशिष्ट्यं समुद्भास्यते। प्रबन्धोऽयं द्वाविंशतिसर्गनिबद्धः। अत्रत्यपद्यसंख्या च चतुर्विंशत्यधिका षोडशशती। छन्दांसि चाऽत्र प्रायेणाऽनुष्टुभः। तदनन्तरमुपजात्यार्यागीतिपुष्पिताग्राप्रहर्षिणीमालिन्यौपच्छन्दसिकमन्दाक्रान्ताशार्दूलविक्रीडितस्रग्धरादीनि वर्तन्ते।

अत्र प्रकीर्णकाण्डोऽधिकारकाण्डः प्रसन्नकाण्डस्तिङन्तकाण्डश्चेति काण्डचतुष्टयं वर्तते।

तत्र सर्गपञ्चकाऽन्विते प्रकीर्णकाण्डे व्यामिश्ररूपाणि सामान्यविशेषकार्यप्रदराणि तिङन्तरूपाणि प्रदर्शितानि।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्गचतुष्टययुतेऽधिकारकाण्डे पाणिनीयाऽष्टकस्याऽधिकारसूत्राऽनुसारेण बहुप्रकाराणि लक्ष्यरूपाणि लोचनगोचरीकृतानि।

सर्गचतुष्टयाऽलङ्कृते प्रसन्नकाण्डे समीचीनया विधया गुणाऽलङ्कारप्रदर्शनं विहितम्।

एवं सर्गनवकविलसिते तिङन्तकाण्डे चतुर्थे लडादीनां नवानामपि लकाराणां विशिष्टरूपाणि प्रकृष्टमतिवैभवेन निदर्शितानि।

अस्य महाकाव्यस्य द्वादश टीकाः श्रूयन्ते। तत्र जयमङ्गलीया जयमङ्गलाऽऽख्या मल्लिनाथकृता सर्वपथीनाऽभिख्या च व्याख्या प्राचीना सुप्रसिद्धा च। एवं च व्याकरणलक्षणप्रतिपादितलक्ष्यरूपप्रदर्शनपरेऽप्यत्र ग्रन्थे रामचरितकथाभागस्याऽपि सर्वथाऽनवद्यरूपेण प्रकाशनं प्रतिपादितम्।

श्लेषाद्यलङ्कारप्रदर्शनपरे पद्यादौ कुत्रचिन्निरर्थकदोषाऽऽपादके पदे सत्यपि यथा दोषाऽङ्कुशरूपेण दोषोऽसद्भावस्तथैवाऽत्राऽपि कुत्रचिच्छ्रुतिकट्वादिदोषाणामाभासमानत्वेऽपि महाकवेर्लक्ष्यरूपनिदर्शनेऽप्यभिनिविष्टमानसत्त्वाद्दोषस्य प्रमोषः सम्भाव्यत इति विदाङ्कुर्वन्तु गुणगणग्रहणपरा दूषणवाचंयमा विचक्षणा इति सर्वं समञ्जसम्। अतोऽस्य महाकाव्यस्य रसास्वादने संख्यायां च व्याकरणश्रमरहितानां संख्यावतां नाऽधिकार इति प्रबन्धस्योपान्त्यरूपेण निबद्धाभ्यां द्वाभ्यां पद्याभ्यां निःशङ्कमवसीयते। ते च पद्ये यथा—

'दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।
हस्ताऽमर्ष इवान्धानां भवेद्व्याकरणादृते॥
व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम्।
हता दुर्मेधसश्चाऽस्मिन्विद्वत्प्रियतया मया॥' इति।

मर्यादापुरुषोत्तमस्याऽनुपमशमदमाऽऽदिविलसितस्य रघुकुलचन्द्रस्य भगवतः रामचन्द्रस्य जन्मतः प्रभृति रावणवधं यावदनुष्ठीयमानस्य लोकोत्तरचरितस्याऽत्र निबध्यमानत्वादस्य महाकाव्यस्याऽऽदौ "रावणवधम्" इत्येवाऽभिधानं स्यादिति संभाव्यते। पश्चाद्विद्वल्लोकललामस्य महाकवेरसाधारणप्रसिद्धेस्तस्यैव नाम्ना 'भट्टिकाव्यम्" इत्यस्या एवाऽभिख्यायाः साहित्यजगति परा ख्यातिः सञ्जातेत्यवगम्यते। भवति चाऽत्राऽपरमपि निदर्शनं महाकवेर्माघस्य कृतेः शिशुपालवधं माघकाव्यं चेति नामद्वयेन व्यपदेशः। अत्र महाकाव्ये यत्र तत्राऽप्यनल्पकविकल्पना समुपलभ्यत इति जल्पनमिह कृतश्रमाणां साहित्यरसाऽनुभूतिविद-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ग्धमानसानां महानुभावानां पुरतः पौनरुक्त्य इवाऽनवीकृतदोषाऽऽविर्भाव इति स्फुटतरं भवति । तत्रापि प्रसन्नकाण्डाऽभिधाने तृतीये प्रकरणे भामहप्रतिपादितसरण्या गुणाऽलङ्काराणामुपनिबन्धनेन महाकविना कृतिना भट्टिना कमनीयकल्पनाकौशलविलासः प्रकाशतामानीतः ।

काश्मीरीयमहाकविना भट्टभौमकेन स्वप्रणीते रावणाऽर्जुनीयाख्ये महाकाव्ये तथा जैनाचार्येण हेमचन्द्रेण द्व्याश्रयमहाकाव्ये महाकवेर्भट्टेरनुकरणं व्यधायि । एवं च विद्वद्वरहलायुधेन स्वनिर्मिते कविरहस्ये तथा वासुदेवकविना वासुदेवविजये काव्ये भट्टिकाव्यमन्वकारि । परं हलायुधवासुदेवाभ्यां तिङन्तभाग एव प्रायेणाऽऽत्मकौशलं प्रदर्शितम् । इत्थं च संस्कृतसाहित्यसंसारे किमपि काव्यान्तरं भट्टिकाव्यकोटिं नाऽऽटीकत इत्ययमर्थः काव्याऽपाराऽकूपारपारीणानां विलक्षणधीविभवानां विचक्षणानामतिरोहितः ।

वैयाकरणप्रवरेण भट्टिना शरद्वर्णनप्रसङ्गे स्वस्य लोकाऽतिशायिनी कवित्वपरिपूर्णा शेमुषी प्रदर्शिता । तत्रापि—

"न तज्जलं, यन्न सुचारुपङ्कजं, न पङ्कजं तद्यदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं, न गुञ्जितं तन्न जहार यन्मनः ॥'

पद्यस्यैतस्येक्षणेन श्रवणेन वा कस्य सहृदयस्य हर्षप्रकर्षपरवशत्वान्मानसतामरसं सविकासं न स्यात् । अत एव बहुभिरालंकारिकैः सूरिवरैः पूर्वोक्तः श्लोक एकावल्युदाहरणत्वेन स्वस्वग्रन्थेषु संग्रथितः ।

अमुना महाकविना छद्मना वर्णिवेशधारिणो राक्षसराजस्य रावणस्याऽनितरसाधारणं यादृशमालेख्यं लिखितं तेन तस्याऽतिविलक्षणं कविकर्मनिर्वहणवैचक्षण्यं प्रतीयते । अधस्तने पद्ये कविधुरीणेन कीदृशेनासाधारणकौशलेन सहृदयहृदयावर्जकं चक्रवालयमकं प्रदर्शितम्—

"अवसितं हसितं प्रसितं मुदा विलसितं हसितं स्मरभासितम् ।
न समदाः प्रमदा हतसंमदाः पुरहितं विहितं न समीहितम् ॥" इति ।

महाकविना त्रयोदशे सर्गे भाषावैचित्र्यस्याऽपि चित्रं श्लाघनीयकल्पनया प्रदर्शितम् । सुरभारतीसाहित्ये तादृशभाषावैचित्र्ये भाषाश्लेषाऽभिधानोऽलंकारो भवति । तत्र च तेन प्राकृतभाषायामपि स्वस्याऽसामान्यं विद्वन्निवहमान्यं पाण्डित्यं ख्यापितम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य महाकाव्यस्य बहूनि वैलक्षण्योपेतानि वैशिष्ट्यानि विद्यन्ते, परं तेषां विस्तरवर्णने समुचिताऽवकाशाऽभावात्साम्प्रतं परिमितेनैवैतेन दिग्दर्शनेन विरम्यते ।

धर्माऽऽग्रहग्रहिलताविवशेन येन राज्यं तथा स्वपितरौ च समं प्रमुक्ता; ।
लोकाऽद्वितीयरघुवंशनरेन्द्रचन्द्रं श्रीरामचन्द्रमनिशं प्रणमामि भक्त्या ॥ १ ॥
येषां कृपाऽतिशयजन्यकृतिप्रयुक्तो मन्दो जनोऽयमधुनाऽस्ति मनाक्प्रबुद्धः ।
तत्ताहृशोपकृतिसत्कृतिभारभुग्नस्ताताादिकान्गुरुजनान्प्रणमामि तांस्तान् ॥ २ ॥
धीमन्दता–प्रसिततविरह–त्वराश्च स्युर्मे कृतौ विविधदूषणबीजरूपाः ।
क्षाम्यन्तु सद्गुणगणग्रहणप्रवीणा आर्या निवेदयति भूसुरशेषराजः ॥ ३ ॥

पांशुपतक्षेत्रम्
(नक्साल–नेपालः)
संवत् २००९ मिथुनसंक्रान्तिः

विद्वदाश्रवः
शेषराजशर्मा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नायकादिपरिचयः

अत्र रघुकुलचन्द्रः श्रीरामचन्द्रो धीरोदात्तो नायकः, नायिका च स्वकीया मुग्धा सतीशिरोमणिः सीता । धीरोद्धतः पापकारी परदारव्यसनी दशाननः प्रतिनायकः । विजेतव्या रावणादय आलम्बनविभावाः ।

विजेतव्यादीनां रावणादीनां चेष्टाद्या उद्दीपनविभावाः, सहायाऽन्वेषणादयोऽनुभावाः, धृतिमतिगर्वस्मृतितर्करोमाञ्चाः सञ्चारिभावाः । उत्साहः स्थायिभावः ।

वीररसोऽङ्गी । रसान्तराण्यङ्गानि, रीतिः प्रायेण वैदर्भी । कुत्रचित्स्थलविशेषेषु गौड्यादयोऽपि रीतयः ।

गुणः प्रायेण प्रसादः । कुत्रचिदोजो माधुर्यं च ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संस्कृतकथासारः

अथ द्वादशः सर्गः

ततोऽनुष्ठितदेवपूजनं विभीषणं तन्मातोवाच—"हे पुत्र ! त्वं सुराऽऽनन्दप्रदः सन् रावणकृतदुर्नयस्य प्रतीकारं कुरुष्व यावत्प्रधने रामतो रावणस्य हननं न भवेत् तावदेव तादृग्व्यतिकरपरिहरणाऽर्थं यत्नमाचर। जनस्थानवासिनो रक्षोजनाः साकल्येन हताः; लङ्कापुरी च जितभट्टोत्खातद्रुमा विहिता सभाभवनानि च दग्धानिः, एतादृशे सङ्कटसमये रावणत्राणार्थं यतस्वे"ति।

इत्थं पूर्वमेव स्वविधित्सितकृत्ये मातुरनुज्ञां समवाप्य विभीणस्तत्सम्पादनाऽर्थं रावणनिकेतनं जगाम। दौवारिकैः सबहुमानं राक्षसराजाऽन्तिकमानीतो विभीषणोऽनुपमविक्रमसमन्वितं भीषणसंहननं रावणं ददर्श, प्रणामोत्तरं तत्सिहासनसविधे निशाचरैः समुपस्थापितमासनमध्यतिष्ठत्।

ततो लङ्काऽधिराजो रावणः प्रकृतकृत्यनिर्धारणाऽर्थं सभास्थितान्निशाचरान् प्रक्रमे तत्प्रशंसनक्रमपुरःसरं बभाषे—"हे निशाचराः ! खरवालिप्रभृतयो वीरा व्यापादिताः, सपत्नाऽऽक्रमणशङ्कारहिता लङ्का दग्धा, सभृत्योऽक्षकुमारो निषूदितो विपक्षसैन्ये च सागरमुत्तितीर्षौ सत्यस्माकं यत्कार्यं तद् ब्रूते"ति। अनन्तरमसमानाभिमानयुक्ताः प्रहस्तप्रभृतयो वीरम्मन्याः सचिवाः, भुजाद्यङ्गानि कार्मुकादीनि शस्त्राऽस्त्राणि च परामृश्य प्रोचुः—"हे महाराज ! आखण्डलमानखण्डनपटुर्भवान् स्वमक्ष्यनराऽभियोगं किं गुरुत्वं नयते ? आज्ञया वयं सूर्यचन्द्रनिग्रहमपि करवाम, अस्माकं प्रातराशेऽप्यपर्याप्तेभ्यः सराघवेभ्यो वानरेभ्यः किं नाम भयम् ?" इति। अथ विभीषणो भाषणमारभत—"हे प्रहस्तप्रभृतयो राक्षसाः ! राज्ञो युद्धाऽधिकृतैर्भवद्भिः स्वयोग्यतासदृशमेवाऽभिहितं, परं कार्यविचारे प्रज्ञाऽधिकृता शौर्यं तु नाऽधिकृतम्"। इत्थं विभीषणेन नीतिविरहितं शौर्योद्योतनविलसितं प्रहस्तयुक्तिजालं स्वयुक्तिबलेन विध्वस्तं प्रकाशितश्च राजनीत्युद्भासितो वचननिचयः। एवं रावणाऽनुजो रिपो रामस्योत्कर्षं रावणस्य चाऽपकर्षं युक्तिप्रकर्षेणाऽनेकशः प्रतिपाद्य वालिनिहन्त्रा सुग्रीवमित्रेण रामेण सन्धौ निखिलनिशाचरकुलस्य संरक्षणं सुहृद उपार्जनेनाऽऽत्मबलसंवर्द्धनं च बहुधा प्रत्यपादयत्। विभीषणसभाषणं निशम्य मातामहः परमधीमान् माल्यवानपि तत्समर्थनप्रयतनं चकाराऽनुपमानं मानवाऽधिपराममहिमानं चाविश्चकार। इत्थं प्रयुक्तवाक्यकलापेन संलापेन प्रबुद्धः कुम्भकर्णोऽपि नीतिसरणिमेव प्रादर्शयत्; अभ्यधाद्रावणाऽर्थं प्राणत्यागेऽपि कातर्याऽभाव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वचनाऽवसाने भूयोऽपि स्वापमेवाऽङ्गीचकार। तदनु नयनिपुणो विचक्षणो विभीषणो नैकप्रकारमुत्पातसङ्घातमभिहितवान् रावणायोपादिशच्च भव्यकर्तव्यम्।

नितान्तदृप्तः क्रूरचित्तो दशाननः नयवचननिशमनाऽसहनः सन्नुक्तिविच्छित्त्या स्वविक्रमं प्राशंसन्निर्भर्त्सनसमनन्तरं स्वाऽनुजं विभीषणं पार्ष्णिप्रहारेणाऽवाजानाच्च।

विभीषणश्च सहिष्णुतया कोपं निगृह्य सचिवचतुष्टयेन सममासनादुदस्थाद् द्वित्राणि वाक्यान्यभिधाय रावणाय रामचरणप्रणतिमत्या सभाभवनममुञ्चच्च। अथ स्थिरचित्तो रामो हनूमद्वचनेन सच्चरित्रं ज्ञात्वा विभीषणं लङ्काऽऽधिपत्येऽभिषिक्तवान् सन्तोषितवांश्च।

अथ त्रयोदशः सर्गः

अथ मन्दप्रभञ्जनमनोहरे वेलामूले शशधरकरविलसिता रजनी मदनोद्दीपकत्वेन राममूर्च्छां जनयित्वा याता। प्रार्थनामनाद्रियमाणं रत्नाकरं रामः प्रभातेऽभिचुक्रोध। कोपाकुले गृहीतकार्मुके तस्मिन् समहीधरा सहविषधरा च समस्ता धरा संशयमारूढा। एवमेव जलनिधिजलं च संशुष्कम्। ततः कपिनिकरक्षुब्धग्रहोरत्नाकरो मूर्तिमान् सभयं जलतीरमारूढो गङ्गाऽवलम्बिबाहुः सन् रामं प्रणम्याऽऽयतिहितसहितं वचनं जगाद—"हे राम! संसारहेतुभूता महती त्वदीया माया। हे नाथ! कोपं नियच्छ, प्रलयाऽनलसदृशं बाणं संहर त्रिभुवनमनो रमस्व संहननाऽऽधारं वारिराशिं च संभज। भवदाज्ञया कपिनिकराः प्रस्तरस्तोममयि सेतुं रचयन्तु तदनु विनायासं पारं च प्राप्नुवन्तु" इति। ततो रामाऽभिप्रायं बुद्ध्वा कपिपृतनाः सेतुनिर्माणायाऽऽहार्याऽऽहरणतत्परा अभूवन्। इत्थं गिरिनिकरमुत्पाट्य तं महार्णवे प्रवेश्य नीलादयः कपयः सेतुं निर्ममुः। ततः पारावारसन्तरणोपकरणं सेतुं दृष्ट्वा रामलक्ष्मणौ कपयश्चात्यर्थं मुमुदिरे। प्रबलं रामबलमतिवेलहर्षयुक्तं यत् सुवेलाऽभिधानं पर्वतमारुरोह, रावणसैन्येन समं रणोत्सुकं च प्रववृते। रावणपृतनाऽपि तथैव समरोत्कण्ठिता समजायत। ततो रावणबलाऽवगमायाऽनुपमबलविलसिताः कपयोऽट्टप्रभृतिषु स्थानेषु समारूढाः।

अथ चतुर्दशः सर्गः

ततः स्मरपरिपीडितो रावणः चारसञ्चाराऽवगतरिपुशक्तिः सन् मायामयरामस्तकेन सीतां विमोह्य योद्धुं सैन्यं प्रजिघाय। रावणसैनिका रणोपकरणं सम्पाद्य युद्धाय सन्नद्धा बभूवुः। दशवदनादेशेन प्रहस्तः प्राच्यं महापार्श्वमहोदरौ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

याम्यं मेघनादः पश्चिमं देवेन्द्रवारणो रावणश्च स्वयमुत्तरं प्रतीहारमियाय। भीषणाक्षो विरूपाक्षः पुरमध्यं समध्यासितुमिष्टवान्। रामस्तत्सर्वं श्रुत्वा सोपकरणं रणाभिलाषेण प्रस्थितश्च। प्लवङ्गाश्च समराऽनुरागेण शुशुभिरे कूर्दनादिनोत्साहं च प्रदर्शयाञ्चक्रिरे। एतस्मिन्नन्तरे नैकविधान्यपशकुनानि पुरत आविर्बभूवुः। रावणश्च प्रधनेच्छया समुपस्थितानरातीन्निशम्य राक्षसोत्साहसवर्द्धनं कृतवान्। तदनन्तरं वानरनिशाचराणां दारुणः समरः समजनि। राक्षसानामेकैकं पुरद्वारं कोटिसंख्यकैर्मर्कटै रुद्धम्। षट्त्रिंशत्कोटिमितैः कपिभिः सुग्रीवः संरक्षितः। ततो वानराऽनीकपानां यातुधानसेनापतिभिः समं समुद्धतं द्वन्द्वयुद्धं संजातम्। पुरुभिर्वानाराऽधिपैरनेके कौणपपृतनापतयोऽहन्यन्त। ततोऽङ्गदमेघनादयोर्विकटो विग्रहः समजनि, प्रादर्शयच्च तस्मिन्नवसरे वालिजः स्वीयां रणनिपुणताम्। राघवधुरन्धरो वीरवरो रामचन्द्रश्च निर्दयतया यातुधानकदनमकरोत्। ईदृशं व्यतिकरं लक्ष्यीकृत्येन्द्रजिच्चुकोप सर्पाऽस्त्रं चाऽऽजुहाव। ततश्च स तैः सर्पाऽस्त्रैः सकलवलीमुखैः समं रामलक्ष्मणावप्याच्छादयत्। पाशबद्धौ तावुभावपि रामलक्ष्मणौ मुमुहतुर्वसुधायां च पेततुः। अत्राऽन्तरे राघवयोस्तादृश्या दशया कपिकुलं भृशं शोकविकलमभूत्। बहवश्च कपयो मेघनादमार्गमपि नो विविदुः। ततः सुग्रीवस्य मन्त्रपूताभिरद्भिर्धौतचक्षुर्विभीषणस्तथैव सुग्रीवोऽपि व्योम्न्यवस्थित शत्रुं विदाञ्चक्रतुः। कपीनामधिपतिः सुग्रीव इन्द्रजितं हन्तुं शैलमुत्क्षिप्तवान्; स च युद्धं विहाय पितरमुपागमत् सर्वमुदन्तं चाऽऽचचक्षे। शत्रुपराभवश्रवणसमनन्तर रावणश्च यातुधानैः सममत्यर्थं प्रीतोऽभूत्। सलक्ष्मणं रामं तादृशलक्ष्मणाऽन्वितं विवशं दृष्ट्वा मैथिली मदनकूला स्यादित्याशयवतो दुरात्मनो रावणस्यादेशेन यातुधाना अशोकवनिकान्तः पुष्पकमारोप्य सीतां रामं दर्शयाञ्चक्रिरे। तथाविधौ राघवौ दृष्ट्वा जानकी निमीलितलोचना सती पुष्पकोदरे मोहेन लुठिता, शोकाऽऽवेगेन भृशमवशात्मा प्रबुध्याऽश्रूणि मुमोच परिदेवितवती च। तादृशीमुत्कटकष्टां सीतां रावणभगिनी त्रिजटाऽऽश्वासयाञ्चकाराऽशोकवनिकां च निनाय। अत्रान्तरे सविभीषणाः कपय आलोचनां चक्रुः। ततो रामः संज्ञां लब्ध्वा तच्छरबन्धदुःख विवेद शोकपरवशो भूत्वा—"वत्स ! जीवसी"ति लक्ष्मणमाजुहाव, सुग्रीवमापप्रच्छ किष्किन्धागमनार्थं तं वचसा प्रेरितवांश्च। सुग्रीवश्च राघवौ किष्किन्धां नेतुमङ्गदमादिदेश रक्षोवधं च प्रतिजज्ञे। तदनु "नागाऽस्त्रमेतन्न धरा, एतद्विपक्षनागान्तकध्यानं" विभीषणादिति निशा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

म्य रामो नागाऽरातिं निदध्यौ। ध्यानाऽनन्तरं लोकाऽतिशायिना वेगेन गरुत्मानागतः। तदागमेन नागपाशा विशिश्लिषुर्योधा अक्षतवद् भ्रेजिरे, लक्ष्मणः संज्ञां लेभे विभीषणः "सम्पन्ना मे मनोरथा" इति मेने। गरुडस्पर्शमात्रेण रामलक्ष्मणौ संवृत्तौ व्यथारहितौ, स च यथाऽऽगतं तथा गतः। अनन्तरं वानरनिकराः परमं प्रसादमासाद्य युद्धार्थं लङ्कां जग्मुः। रावणश्च राघवादीन् नागपाशोन्मुक्तान् बुबोध। तदनु रावणसम्मता निशाचरा अपि युद्धार्थं सन्नाहं कृतवन्तः। वानररात्रिञ्चरयोस्तुमुलः कलहश्च समजनि। महाबलोऽनिलकुमारो रणे धूम्राऽक्षाऽभिधानं राक्षसं जघान। दशाननाऽऽदेशेनाऽकम्पनो हनूमता सार्धं युयोध विक्रमाऽतिशयं च प्रदर्शयाञ्चकार। वेगवता हनूमता तालवृक्षप्रहारेणाऽकम्पनाभिधानो निशाचरः शमनसदनाऽतिथिरकारि। प्रकम्पननिषूदनेन दशाऽऽननः सातिशयं शोककोपाऽभिभूतः सञ्जातः। ततो रावणाज्ञप्तो महाशक्तिसम्पन्नः प्रहस्तो युद्धार्थमुद्योगं चकार, प्रारम्भे च ब्राह्मणपूजनादिकं मङ्गलाचरणं च विदधे। महासङ्कटकालेऽप्यविहस्तो राक्षससत्तमः प्रहस्तो वानरनिकरसंहाररूपमद्भुतक्रमं विक्रमं प्रदर्शितवान्। संग्रामशोलो वानरपृतनापतिर्महाबलो नीलः कियन्तचित्कालं प्रहस्तेन सत्रा संयुद्धय शिलाप्रहारेण तं जघान। ततस्तुष्टा वानरा लङ्कां भेजू राक्षसाश्च रावणं "प्रहस्तो हत" इति सूचितवन्तः।

अथ पञ्चदशः सर्गः

ततो रावणः प्रहस्तमारणमाकर्ण्यं भीतोऽभत्, स कुम्भकर्णप्रबोधनाय राक्षसान्प्रातिष्ठिपत्। ते च यातुधाना आकारणदण्डप्रहरणाद्यनेकव्यापारैरतिभीषणवर्णं कुम्भकर्णं प्रबोधितवन्तः। स च कुम्भकर्णः प्रबुध्य प्रबोधकारणमप्राक्षीत् ज्ञात्वा चाऽग्रजादेशं स्नानभोजनपानादिकं कृत्वा रावणाऽन्तिकमगात्। रावणश्च तमायान्तं विलोक्याऽऽसनादीषदुदस्थादासन्नस्थं काञ्चनं पीठं निरदिक्षच्च। कुम्भकर्णं आसनमुपविश्याऽऽकारणमपृच्छत्। रावणश्च सक्रमं समुद्रतरणोपक्रमं सकलमपि रामपराक्रममवर्णयद् द्वेषेण निषूदनार्थं च तमनुरुद्धवान्। ततः कुम्भकर्णः "मन्त्रणवेलायां यदहमुक्तवांस्त्वद्भवता न श्रुतं, तस्येदं फलामागतम्।" एतादृशानि परिणामहितकराणि वाक्यान्यब्रवीत्। कालचोदितो दशाननस्तादृशानि वाक्यानि श्रुत्वा कोपाक्रान्तस्वान्तोऽभवत्। ततः कुम्भकर्णो दशवदनवचनाऽनुरोधार्थं गर्जितवान् युद्धसामग्रीमुपादाय निशाचरनिकरैः परिवृतो महताऽवष्टम्भेन लंकापुर्या निर्गतः। कुम्भकर्णभरेणाऽनन्ता चाऽवनतास्तरवो निपतिताः भयाऽति-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शर्यात्सिहाः कान्दिशीकत्वं भेजुः कुलाऽचलाश्च संचलितः। तस्मिन्नवसरे परितो बहुविधा उत्पाताः प्रादुरभूवन्। कुम्भकर्णो दर्पात्तानवज्ञाय गर्जितवान् शत्रूंश्चाहवे आह्वास्त च। ततः स आहवेऽपरिमितानां वलीमुखानां मांसं रुधिरं चाऽभक्षयदपिबच्च। कुम्भकर्णतो वानराणां पलायनादिरूपां दुर्दशां ज्ञात्वाऽङ्गदोऽलज्जिष्ट पराक्रमं च प्रतिपन्नवान्। अङ्गदपराक्रमक्रमेणोत्साहितेन प्लवङ्गकदम्बकेन सार्धं कुम्भकर्णस्य तुमुलं युद्धं समजायत। तस्मिन्प्रसङ्गे विभीषणो रामलक्ष्मणाभ्यां कुम्भकर्णस्य भीषणपराक्रममवर्णयत्। वनौकसः संहत्य कुम्भकर्णमपीपिडन्, स च तान् घ्नन् नाऽश्रमत्। अथ रामेच्छया सुग्रीवो रणाऽर्थं कुम्भकर्णेन संगतो महता द्रुमेण तं प्राहरच्च। कुम्भकर्णस्तं प्रासहिष्ट सुग्रीवे रौद्रां शक्तिं प्राहरत्तां च मारुतिर्वियद्गतामाप्तवान्, खण्डितवांश्च। कुम्भकर्णो महता गिरिणा प्रहृत्य सुग्रीवं मूर्च्छितं कृतवान् तमादाय पलायिष्ट च। तदनु प्राप्तसंज्ञः सुग्रीवः कुम्भकर्णस्य कर्णनासिकं कृत्तवान्। कोपाक्रान्ताज्जिघांसतः कुम्भकर्णात्कपीन्द्र आत्मानं मोचयामास। तदनु वानरैः समं कुम्भकर्णस्य रोमहर्षणो रणः समभवत्। तत्र च विवशानां वानराणां दुर्दशां दृष्ट्वा लक्ष्मणः कुम्भकर्णस्य मुकुटं कवचं च छिन्नवान् शरैर्देहमपि भिन्नवान्। ततः स्वेन योद्धुं स्पर्धमानस्य कुम्भकर्णस्योपरि रामो यैः खरो वाली मारीचस्तथा दूषणोऽघानि ताञ्छरान्प्राक्षिपत्। राघवो वायव्याऽस्त्रेण सहाऽऽयुधं कुम्भकर्णपाणिमच्छैत्सीत्, स इत्थमेव तस्य सवृक्षं करं छित्त्वा जङ्घे च गमनाऽसमर्थं कृतवान्। तदनु राम ऐन्द्रेण शरेण कुम्भकर्णहृदये विद्धवान्, स च पतन्देहेन कपीनां सहस्रद्वितयं चूर्णितवान्। ततः सुरा रामस्तवमकार्षुः, निशाचरा भयद्रुताः संजाताः। रावणो भ्रातुर्वधमाकर्ण्य भृशं शोकपरवशोऽभवत् तद्गुणांश्चाऽपप्रथत्। अथ देवान्तकादयो रावणतनूजाश्चत्वारो रणाऽङ्गणं गताः। अङ्गदेन समं नरान्तकस्य जन्यमजनि। महाबलिना वालिसूनुना मुष्टिना नरान्तकप्राणा अहारिषत। तथैव मारुतात्मजो देवान्तकस्याऽन्तमकरोत्। एवं राजकुमाररक्षाऽर्थं प्रेरितो युद्धोन्मत्तोऽपि युद्धशीलेन नीलेन व्यापादितः। त्रिशिराश्च हनूमता शिरसि ताडितः सन् प्राणानौज्झीत्। ततो विभीषणोऽतिकायाऽभिधानस्य रावणकुमारस्य विक्रमं रामायाऽऽख्यातवान्। सौमित्रिणा सत्राऽतिकायस्याऽतिविचित्रं जन्यं समभूत्। लक्ष्मणः कियत्कालाऽनन्तरं ब्रह्मास्त्रेणाऽतिकायस्य कायं निर्जीवमकरोत्। ततो रावणः स्वनन्दननिषूदनमाकर्ण्याऽऽक्रन्दनं चकार, तमिन्द्रजिदाश्वासितवान्। इन्द्रजिच्च

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जगद्विधातारं विधातारं पूजयित्वा हवनेन हव्यवाहनं संतोष्याऽस्त्रमण्डलं च पूजितवान्। तदनु स ब्रह्मणो जयावहं शस्त्रं स्यन्दनं चाऽलब्ध। रावणिस्तमभ्यास्य छन्नरूपः सन् यातुधानद्वेषणानां प्राणानपाहरत्। स सप्तषष्टिकोटिपरिमितान् कपीन् व्यापादितवान् राघवौ च व्यमूमुहत्। इन्द्रजिल्लङ्कां गत्वा रावणं च स्वपराक्रमदर्शनाऽर्थं रणाङ्गण प्रति प्रेषितवान्। ततो विभीषणो रामलक्ष्मणौ जीवितौ बुद्धवान् बहून् हतान्कपींश्चाऽवाबुद्ध। तदनु जाम्बवांश्च प्रबुद्धः। तौ च जाम्बवद्विभीषणौ हनूमन्तं मृतजीविनीं सन्धानकरणीं विशल्यकरणीं चौषधीमानेतुं प्रहितवन्तौ। हनूमांञ्च यदौषधभेदं नो निश्चितवांस्तदा सहौषधिं शैलमानिनाय। औषधप्राप्त्याऽऽहृताः सर्वेऽपि वानरा भटा जीवनमापुर्युद्धाऽर्थं पूर्ववत्प्रवृत्ताः। ततो निकुम्भकुम्भनामानौ कुम्भकर्णसुतौ लङ्कां लङ्कालयान्राक्षसांश्चाऽगोपिष्टां वानरकदनं च समारप्सातान्। अङ्गदेन समं राक्षसानामतिभयङ्करः संग्रामः संजातः। रामाऽभिप्रायेण सुग्रीवो भ्रातृव्यं शत्रुसङ्कटाद् द्रुतमत्रास्त, मुष्टिना कुम्भकर्णपुत्रकुम्भं च हतवान्। कुम्भभ्रातरं निकुम्भं च भ्रातृवधप्रतिकारोद्यतं हनूमान्भग्नवान्। ततः प्रधानशत्रुभटहननेन सुग्रीवोऽवश्यंभाविनीं सिद्धिं तर्कितवान्, रामबुद्धिः संपन्नेच्छेवाऽरंस्त मेघनादप्रभृतीनां यातुधानपृतनापतीनां चाविच्छिन्नः शोकोऽवर्द्धत।

अथ षोडशः सर्गः

ततो हतबान्धवो राक्षसराजो रावणः स्वतनयानतिकायादीन् भृत्यान्मत्तयुद्धोन्मत्तादींश्च मुहुर्मुहुः संस्मृत्य परिदेवयामास। एवमेव सौऽसंभाव्यव्यापादनान्कुम्भकर्णादीन्स्मृत्वाऽनेकप्रकारैरात्मपराभूतिं वर्णितवान्। विफलाऽभिलाषः स सविनयं विभीषणप्रतिपादितं नयनिचयं चाऽस्मरत्। एवं बहुधा विलप्य जाताऽमर्षो रजनीचरः स नरवानरनिकरनिषूदनपरो भूत्वा समुत्साहाऽवलम्बनं चकार। अरातिवारणप्रवणो लोकरावणो रावणः "प्राक् लङ्काऽभियोक्तॄन्संनिपात्य तदनुसहाऽमरं पुरन्दरं जेतुं गत्वा भूयो लङ्कामेष्यामो"ति व्यचिन्तयत्। अत्राऽन्तर इन्द्रजित्तदन्तिकमाययौ, प्राक् समनुष्ठितं हरिहयपरिभवादिरूपं स्वविक्रमं वर्णयित्वाऽ"भिघातिघातनं करिष्यामो"ति स्वोत्साहं प्रादर्शयत्।

अथ सप्तदशः सर्गः

इन्द्रजिद्योधा उपद्रवपरिहाराय शान्तिमभीष्टवन्तः, तदर्थं मङ्गलाचरणं कृतवन्तः। ते यथेष्टमभ्यवहृत्य युद्धाऽर्थं तत्परा बभूवुः। इन्द्रजिच्च चतुर्वक्त्रं विप्राश्च समर्च्य कवचमामुच्य शस्त्राऽस्त्रादिकं प्रधनोपकरणगणं परिगृह्य यानं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

समारुह्य युद्धार्थं प्रचलित: । तस्मिन्नवसरे योद्धारो युद्धवाद्यानि वादितवन्त: । अत्रान्तरेऽनेकाऽपशकुनानि पुरत आविर्बभूवु: । परं यातुधानास्तान्युपेक्ष्य महतोत्साहेन युद्धं चक्रु: । इत्थं च प्लवङ्गमकदम्बकेन समं रक्षोवीराणां लोमहर्षणो रणो बभूव । इन्द्रजिच्च जवाऽतिशयेन शरासने शरसन्धानमकरोत् । तस्य हस्तलाघव चाऽसामान्यं समजनि । एवं च तेन बहवो वानरा हता आहताश्च । किं बहुना ततोऽनिष्टाऽतिशयमाशङ्क्य सौमित्रिर्ब्रह्मास्त्रमाह्वातुमैच्छत् । परं विभीषणस्य निरपराधानामन्येषां च रक्षसां नाशमाशङ्क्य रामचन्द्रो न्यवारयत् । तत इन्द्रजिद्वियद्गतो मायामयीं सीतां करवालेन घ्नन्नदृश्यत । तस्या वध प्रतिहर्तुमिच्छुरञ्जनाऽऽनन्दजननो मेघनादं 'हे पाप ! पतिविरहनिपीडितामिमां मा वधीरि''त्युक्तवान् । इन्द्रजिच्च पश्यतस्तस्य मायामय्या: सीताया मूर्धानमच्छिनत् । हनूमान् तादृशं शोकजनकं वृत्तान्तं रामलक्ष्मणाभ्यामब्रवीत् । ततस्तौ शोकाकुलौ सन्तौ भृशं परिदेवितवन्तौ । विभीषण आगत्य ताभ्यां प्रकृतमुदन्तमाख्यत् —"सोऽस्मान्मोहयित्वा निकुम्भिलाऽभिधानमग्निगृहमगात् । तत्र हवनकार्ये समापिते ब्रह्मशिरोऽभिधानमस्त्रं स्यन्दन च स प्राप्स्यति । तत्र कर्मण्यसमाप्त एव ब्रह्मा तस्य वध धारितवान्"इति । तदनु राघवादेशेनेन्द्रजितो हवनेऽन्तरायापादनाऽर्थं बहवो वानरा निकुम्भिलां प्रति प्रचलिता: । तत्र च रक्षकैर्बहुभी रक्षोभिस्ते न्यरुध्यन्त । इत्थं च तत्र राघवरावणयो: पृतनानां भयङ्करं युद्धमारब्धम् । ततस्तानि निकुम्भिलारक्षणपरायणानि रक्षांसि निर्जित्य लक्ष्मणविभीषणौ द्रुतमन्तरं जग्मतु: । गत्वा च तौ कृशानौ हव्यं प्रक्षिपन्तमेकाग्रमानसं मन्त्रं चोच्चारयन्तमिन्द्रजितं दृष्टवन्तौ । ततस्तत्र सौमित्रिस्तमाह्वयताऽगर्जच्च । तत्राऽऽह्वाने प्रकुपितो मूलेन्द्रजित्स्वपितृव्यं कुलदूषकत्वेन बहुधा निरभर्त्सयत् । सत्पक्षावलम्बनशील: सुशीलो विभीषणश्च तदुदाहृतानि दूषणानि युक्तियुक्तैर्वचोभिर्निराकृतवान्, प्रत्यपीपदच्च रावणस्यैव प्रमादजातम् । इन्द्रजिज्जनकस्य दोषप्रकाशनेन भृशं प्रकुप्य शरनिकरै: पितृव्यं लक्ष्मणं चाऽताडयत् । राक्षसगणकदनप्रवणो लक्ष्मणो मेघनादसारथिमलुनात् स्यन्दनमभनक् । तदनु लक्ष्मणेन्द्रजितोर्भीत्यतिशयोत्पादकं युद्धं प्रवृत्तम् । क्षणाऽनन्तरं लक्ष्मणेनेन्द्रजिदघानि । तत: सवानरा: सर्वे सुरा: समतुष्यन् रामचन्द्रश्च लक्ष्मणमालिङ्गितवान् मूर्ध्न्यजिघ्रच्च । राक्षसाऽनीकं रावणेन सहाऽरोदीत् । दुरात्मा रावण आतुरतया मैथिलीं हन्तुं प्राक्रमत । ततस्तदाप्ता "अयुक्तमेतत्कर्मे"ति कथ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यित्वा तं न्यवारयन्, बहुभिरुपदेशदेशनैस्तं समाश्वासयंश्च । ततो रावणो महान्तं युद्धोपक्रमं चकार । राक्षसाश्च वैश्वानरपरिचरण शङ्करनमस्करण च विधाय शान्त्यै द्विजांश्चाऽप्रीणयन् । ततस्ते यातुधाना वारबाणमामुच्य युद्धसामग्र्या विभूषिता गजादिकं यानं चाऽऽरुह्य युद्धार्थं प्रातिष्ठन्त । राक्षसानां वानरैः समं लोकविश्रुतं युद्धं समारब्धम् । तस्मिन्नवसरे पार्थिवं रजः प्रावर्धत, दश दिशो व्याश्नुत, येन कपिरक्षसां स्वपरविवेकोऽप्यगतः । गम्भीराः शोणितसरितः प्रावहन् । ततो विपदां विरामो रामः लोकाऽतिशायिनं विचित्रं क्रममवलम्ब्य यातुधानकदनाऽर्थं महान्तं पराक्रमं प्रादर्शयत् । किं बहुना स शैलैरिव बृहद्भी राक्षसैर्हतैर्भूमिनाचिनोत् । देवगन्धर्वा राममस्तुवन् प्लवङ्गमा व्यस्मयन्त राक्षस्यश्चोच्चैः प्रारुदन् रावणं च प्राजुगुप्सन्त । ततो रावणोऽतिभयंकरं स्यन्दनमास्थाय संग्रामाऽर्थमागमत् । तस्मिन्नवसरेऽशुभसूचकान्यशकुनान्यभूवन् । उभयोः पक्षयोः परमदारुणो रणः क्षणमलभत । तत्र सुग्रीवो विस्मयाऽतिशयद्योतिकां संग्रामकुशलतामाविरकरोत् । परमकोपनो निशाचरवरो रावणोऽपरिमितानां बलीमुखानां प्राणानपाहरत्, राक्षसानरक्षद्रामलक्ष्मणौ च मार्गणगणैरपीडयत् । रामश्च तत्प्रहितं शरवर्षं भल्लैरपनीतवान् । ततश्च रामरावणयोरतिभीषणोऽतिप्रख्यातश्च दारुणो रणः प्रावर्तत । दशाननो विविधायुधप्रक्षेपणैर्भृशं परिपीडयन्तं रामाऽनुजमष्टघण्टाविलसितया महाशक्त्या व्यसुमकरोत् । ततो रामो हनूमदानीताभिरोषधीभिः स्वमनुजमुदजीवयत् । ततो नितान्तमेव कोपाक्रान्तस्वान्तो बन्धुनाशेन भृशमशान्तो रावणो रामेण सह योद्धुं प्रसितोऽभूत् । रथारूढेन रावणेन समं भूमिष्ठस्य रामस्य संग्रामोऽयुक्त इति मत्वा पुरन्दरेण सस्यन्दनो मातली रामसदेशं प्रेषितः । रामश्च पुरन्दरप्रहितं रथमारुह्य दशाऽऽस्येन सार्धंयोद्धुं प्रसितः । संप्रवृत्तश्च महावीरयोरुभयोर्नरकर्बुरयोराधारणः संप्रहारः । ततो रावणवधाय प्रजापतियदस्त्रं कल्पितवान्, तद्रामस्य धीशालिना मातलिना स्मारितम् । रामाऽस्तं तदस्त्रं रावणस्य प्राणानपाहरत् । दशवदनभूपतनसमनन्तरं कपिगणो हर्षप्रकर्षपरवशोऽभवत्, सुरनिकरो जिताऽरिं रामं प्राशंसत्; विभीषणश्च हतभ्रातृकत्वेन शोकाऽऽकुलः संवृत्तः ।

अथाऽष्टादशः सर्गः

ततो दशाननप्राणापहरणेन शोकपरायणो विभीषणो भृशं परिदेवयामास । परिदेवनाऽवसरे दशवदनाऽवरजो नयाऽभावेनैवाऽग्रजस्येदृशी दशा समभूदिति प्रतिपादयामास, रावणप्रतापं मुहुर्मुहुः संस्मृत्य दैवमनूद्य भृशमुपालभत च ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभीषण आत्माग्रजाऽभावे भाविनं शक्रादीनां देवानामभ्युदयं लंकालयानां विपत्तिं रावणगुणगणं च कृतवेदितया बहुशोऽवर्णयत् । अत्रान्तरे विदितवृत्तान्ता अन्तःपुरललनाः पौराश्च भृशदुःखित्वेन व्यलपन् । ततो रामो दशाऽऽस्यस्य शोच्यत्वाऽभावं प्रतिपाद्याऽनन्तरकर्तव्यमुपदिश्य रावणाऽनुजं विभीषणं समसान्त्वयत् ॥

अथोनविंशः सर्गः

ततो राघवसमाश्वासितो विभीषणो विलेपनलेपनाऽलङ्कारपरिधानपुरःसरं रावणदाहनाऽर्थं लंकायां राक्षसान् समादिशत् । ते च तदादिष्टं सर्वं सम्पाद्य तं शोकविमोकाऽर्थं समसान्त्वयन्, लंकापालनाऽर्थं तदुत्साहवर्द्धनं चाऽकुर्वन् । ततश्च विभीषणः स्वाग्रकस्य दशाननस्याऽग्निजलक्रियामकार्षीत् । रामश्च रुक्मकुम्भेन विभीषणस्य मूर्ध्नि जलानि सिञ्चन् राज्यशासनप्रकारानवर्णयत्तत्समृद्धौ स्वीयामिच्छां चाऽसूचयत् ।

अथ विंशः सर्गः

अनन्तरं पवनतनयो जनकनन्दिनीं समुपेत्य रावणाऽऽदिरक्षोवधमवर्णयत् तद्रक्षणपरायणानां राक्षसीनां निग्रहे च प्रस्तावमुपास्थापयत् । दयापरिपूर्णाशया सती सीता च प्रेष्यवधे स्वकीयामननुमतिं प्रतिपादितवती, "सीता भवद्दर्शनाऽभिलाषिणीत्यविलम्बितमेव रामः सूच्यताम्" इति चाऽभिहितवती । पवमाननन्दनेन जनकतनयाऽभिलाषे प्रकाशिते रघुकुलचन्द्रो रामचन्द्रोऽङ्गुष्ठेन पृथिवीं लिखित्वा विनिःश्वस्य च "विभूषितां सीतामानये" ति विभीषणं भाषितवान् । अपगतदूषणो गुणगणभूषणो विभीषणश्चाऽशोकवनिकां गत्वा मैथिलीं प्रणम्य "हे देवि ! स्नानाऽनुलेपनाऽलंकरणपरिधानाऽनन्तरं हैमीं शिबिकामारुह्य राजाऽन्तिकं यातु भवती"ति निवेद्योत्तरकर्तव्यं च प्रतिपादयामास । चन्द्रानना जनकतनया स्नानादिकमनुष्ठाय पट्टांशुकवृतानना सती यानं समारूढवती, पत्युरन्तिकमुपेत्य रुदितवती च । भूपालकुलललामभूतो मर्यादापरिपालको रामः सीतायाश्चारित्र्ये सन्दिह्य तद्ग्रहणेऽनिच्छां संसूच्य यथेष्टगमनार्थं तामादिष्टवान् । सतीशिरोमणिर्जनकनन्दिनी चौजस्विन्या वाण्या स्वचारित्र्यविशुद्धिं प्रतिपादितवती, स्वविशुद्धिद्योतनार्थं चितायां विरचयितुं सौमित्रिमादिदेश । ततो रामाऽनुज्ञातेन राममनुजातेन रचितायां चितायां जनकदुहिता–"हे वह्ने ! यद्यहं दुष्टा, तर्हि मां दह यद्यहं चारित्र्यविशुद्धिमती सती, तर्हि मां संरक्ष"ति कथयित्वा तत्र प्रविष्टवती ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथैकविंशतितमः सर्गः

ततो वह्निर्मैथिलीं समुत्क्षिप्य तस्या लोकोत्तरां चारित्र्यविशुद्धिं रामोपकण्ठमकथयत्, "स्त्रीसामान्येनेयं नो द्रष्टव्ये"ति प्रत्यपादयच्च। तस्मिन्नेवाऽवसरे भगवान् वृषभवाहनः कमलासनो विमानस्थो दशरथो नृपश्च समाययौ। ततो रामस्तान् प्रणतः। ते च सीताया लोकाऽतिशायि प्रयतवृत्तं वर्णितवन्तः। तत्राऽवसरे सुरवरः पुरन्दरोऽपि समाजगाम। रामेणाऽभिवन्दितस्य तस्य वरेण तदानन्दसम्पादनाऽर्थमाहवे मुक्तप्राणाः शाखामृगाः प्राणन्तः सञ्जाता यत्र तत्र तरुशाखासु समारूढाश्च।

अथ द्वाविंशतितमः सर्गः

ततो निहतदशवदनो दशरथनन्दनो रामो हृष्टचित्तं वातात्मजं मातॄणां भरतस्यामात्यपौराणां च समाश्वासनार्थमयोध्याप्रयाणाय समादिदेश। तत्र तत्र मार्गे सम्प्राप्यमाणानां देशविशेषाणां जनानां गङ्गादिसरितां च वर्णनं सविस्तरं चकार। कपिसार्थाध्यक्षे पवनतनये गृहीताऽर्थे याते सति राघवकुलधुरन्धरो रामः सुग्रीवविभीषणावपि श्वस्तने दिवसे "मया समं युवयोर्द्वयोरप्ययोध्याप्राप्तिरभिमता नो वे"त्यपृच्छत्। तौ च रामाभिरुचौ स्वाभिमतिं प्रादर्शयताम्। तदनन्तरमेतादृशैरालापै रात्रिं यापयित्वा रामादयः सैन्यैः समं पुष्पकमारुह्याऽयोध्यां यातुं सम्प्रस्थिताः। तत्र तत्र मार्गे आपततः सेतुं महेन्द्रं मलयं विन्ध्यं माल्यवन्तमृष्यमूकं दण्डकारण्यं पम्पां चेत्यादिकान्प्रदेशान् बहुविधवर्णनपुरःसरं सीतायै कथयन्रामोऽयोध्याऽभिमुखं जगाम। ततो हनूमत्सकाशात्समुपलब्धरामवृत्तान्तः सानन्दाश्रुविलोचनः परमशान्तो भरतोऽमात्यादिभिर्मातृभिरन्तःपुरेण च समं, रामसविधं सम्प्राप्तः। ससम्भ्रमपौरजनावृतो रामोऽनुजैः समं महतोत्सवेनाऽयोध्यां पुरीं प्राविशत्। ततश्च स्वस्य राज्याभिषेके भरतस्य च यौवराज्याऽभिषेके संवृत्ते रामोऽश्वमेधेन यष्टुं प्रववृते। महाकाव्यसंज्ञकोऽयं प्रबन्धो वैयाकरणानां (शब्दलक्षणचक्षुषाम्) कृते दीपतुल्योऽनधीतव्याकरणानां कृते त्वन्धानां हस्तादर्श इव भवेत्। काव्यमिदं श्रीधरसूनुना नरेन्द्रनाम्ना नृपेण पालितायां वलभीनामपुर्यां मया (भट्टिकविना) कृतम्। अत एव काव्यविधानाय या कीर्तिः सा तस्यैव राज्ञो भवतात्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हिन्दी कथासार

द्वादश सर्ग

तब देवपूजन किये हुए विभीषणको उनकी माताने कहा—"हे पुत्र ! तुम देवताओंको आनन्द देते हुए रावणसे की गई दुर्नीतिका प्रतीकार करो। संग्राममें रामसे रावणकी हत्या होनेके पहले ऐसे व्यवहारका परिहार करनेके लिए यत्नका आचरण करो। जनस्थानके रहनेवाले राक्षस सबके सब मारे गये, लङ्का पुरीके योद्धा जीते गये और वहाँ के पेड़ उखाड़े गये, सभाभवन भी जलाये गये। ऐसे सङ्कटके समय रावणकी रक्षा करनेके लिए कोशिश करो"। इस तरह पहले ही अपने अभीष्ट कार्यमें माताकी आज्ञा पाकर विभीषण उसके सम्पादनके लिए रावणके भवनको चले गये। द्वारपालोंसे बहुत सम्मान के साथ राक्षसराजके समीप लाये गये विभीषणने अनुपम पराक्रमसे युक्त और भयंकर शरीरवाले रावणको देखा और वे उसके सिंहासनके समीपमें राक्षसोंसे उपस्थापित आसन पर बैठ गये। तदनन्तर लंकाऽधिराज रावणने प्रस्तुत कार्यके निश्चयके लिए सभासद् राक्षसोंको आरम्भसे उनकी प्रशंसा कर कहा—"हे राक्षसो ! खर और वाली आदि वीर मारे गये, शत्रुके आक्रमणकी शंकासे रहित लंका जलाई गयी, भृत्योंके साथ अक्षकुमार मारा गया और शत्रुओंकी सेना समुद्रसन्तरणकी इच्छा कर रही है। इस स्थिति में हम लोगोंको जो करना चाहिए उसे कहो"। अनन्तर बेजोड़ अभिमानसे युक्त प्रहस्त आदि अपनेको वीर माननेवाले मन्त्रियोंने बाहु आदि अंगोंका और धनु आदि शस्त्राऽस्त्रोंका भी परामर्श कर कहा – "हे महाराज ! इन्द्रके अभिमानका खण्डन करनेमें कुशल होकर आप अपने भक्ष्य मनुष्यके अभियोग को क्यों गौरवविशिष्ट बना रहे हैं ? आपकी आज्ञासे हम लोग सूर्य और चन्द्रको भी दण्ड दें, हमारे प्रातराश—(जलपान) के लिए भी अपर्याप्त (नाकाफी) राघवोंसे युक्त बन्दरोंसे क्या डर है ?" तब विभीषणने भाषणका आरम्भ किया। "हे प्रहस्त आदि राक्षसो ! राजाके युद्धमें अधिकृत आप लोगोंने अपनी योग्यताके सदृश ही कहा, परन्तु कार्यके विचारमें बुद्धिका अधिकार है शौर्यका नहीं।" इस प्रकार विभीषणने नीतिसे रहित और शौर्यके प्रकाशनसे भूषित प्रहस्तके युक्तिसमूहको अपने युक्ति-बलसे विध्वस्त किया और राजनीतिसे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद्भासित वचनसमुदायको प्रकाशित किया। इस तरह रावणके भाई विभीषणने शत्रु रामके उत्कर्षको और रावणके अपकर्षको युक्ति-प्रकर्षसे अनेक बार प्रतिपादन कर वालीको मारनेवाले सुग्रीवमित्र रामके साथ सन्धि करनेसे संपूर्ण राक्षस-कुलके संरक्षणका और मित्रके उपार्जनसे अपने बलकी वृद्धिका भी बहुधा प्रतिपादन किया। विभीषणके संभाषणको सुनकर परम बुद्धिमान् मातामह (नाना) माल्यवान्ने भी उसका समर्थन करने का प्रयत्न किया और राजा रामकी असाधारण महिमाका प्रकाशन भी किया। ऐसे प्रयोग किये गये वाक्यसमूहवाले परस्पर भाषणसे जगे हुए कुम्भकर्णने भी नीतिमार्गका ही प्रदर्शन कराया; रावणके लिए प्राणत्यागमें भी कातरताका अभाव कहा और वाक्यके अवसानमें फिर भी शयनका ही अङ्गीकार किया। उसके अनन्तर नीतिमें निपुण विचक्षण विभीषणने अनेक प्रकारके उत्पातसमूहको कहा और रावणके लिए भव्य कर्तव्यका उपदेश भी दिया। नितान्तदर्पयुक्त क्रूरचित्त रावणने नीति-वचनके श्रवणमें असहनशील होते हुए उक्ति-वैचित्र्यसे अपने पराक्रमकी प्रशंसा की और निर्भर्त्सन करनेके अनन्तर अपने भाई विभीषणको पार्ष्णि (पैर के पिछले भाग) से प्रहार कर अवज्ञा की। विभीषणने भी सहनशील होनेके कारण क्रोधको वशमें कर चार मन्त्रियोंके साथ आसनसे उठकर रावणको दो-तीन वाक्य कहकर रामचन्द्रजीके चरणोंको प्रणाम करनेको बुद्धिसे सभाभवनको छोड़ा। अनन्तर स्थिरचित्तवाले रामने हनूमान्के वचनसे सच्चरित्र जानकर विभीषणको लङ्काके आधिपत्यमें अभिषिक्त और सन्तुष्ट भी किया।

त्रयोदश सर्ग

अनन्तर मन्द वायुसे मनको हरण करनेवाले वेला (समुद्र की तीर भूमि) के मूलमें चन्द्रकिरणसे शोभित रात्रि कामकी उद्दीपक होनेसे रामचन्द्रजीको मूर्च्छित कर के बीत गई। प्रार्थनाका अनादर करने वाले समुद्रसे रामचन्द्रजी प्रातःकालमें कुपित हुए। कोपसे आकुल होकर रामचन्द्रजीके धनुर्ग्रहण करने पर पर्वत और सर्पोंके साथ समस्त पृथिवी संशयको प्राप्त हुई। इसी तरह समुद्रका जल भी सूख गया। तब वानर-समूहसे क्षुब्ध गुफाओंसे युक्त समुद्रने मूर्ति धारण कर भयके साथ जलके तीरमें आरूढ होकर बाहुसे गङ्गाजीका अवलम्बन कर रामचन्द्रजीको प्रणाम कर उत्तर कालमें हितयुक्त वचन कहा—"हे राम! संसारका कारणभूत आपकी महती माया है। हे नाथ! आप कोप

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

छोड़े, प्रलय कालके अग्निके सदृश बाणका आप उपशमन करें । आप तीन लोकमें सुन्दर अपने शरीरके आधार जलराशिका आश्रय लें। आपकी आज्ञासे वानरसमूह पत्थरोंसे मेरे ऊपर सेतु (पुल) की रचना करें, उसके अनन्तर बिना आयासके पारको प्राप्त हों।" तब रामचन्द्रजीका अभिप्राय जानकर वानरोंकी सेनाएँ सेतुनिर्माणके लिए पर्वतोंको लानेके लिए तत्पर हुईं। इस प्रकारसे पर्वतसमूहका उत्पादन कर उसको महासागरमें प्रविष्ट करा कर नील आदि वानरोंने सेतुनिर्माण किया। तब समुद्रसन्तरणका साधन सेतु देखकर राम, लक्ष्मण और वानरगण अतिशय प्रसन्न हो गये । रामचन्द्रजीकी प्रबल सेनाने अतिशय हर्षसे युक्त हो कर सुवेल नामक पर्वत पर आरोहण किया और वह रावणकी सेनाके साथ युद्ध करनेके लिए उत्सुक भी हो गई । इसी तरह रावणकी सेना भी युद्धके निमित्त उत्कंठित हो गई । तब रावण के बलको जाननेके लिए अनुपम बलसे शोभित बन्दर अट्ट (अटारी) आदि स्थानोंके ऊपर चढ़ गये ।।

चतुर्दश सर्ग

अनन्तर कामपीडित रावण ने गुप्तचरों की गति से शत्रु की शक्ति जान कर माया से बने हुए राममस्तक से सीताजो को मोहित कर लड़ने के लिए सेना भेजी। रावण के सैनिक युद्ध-सामग्री का सम्पादन कर युद्ध के लिए सन्नद्ध हो गये। रावण की आज्ञा से प्रहस्त पूर्वद्वार, महापार्श्व और महोदर दक्षिण-द्वार, मेघनाद पश्चिम द्वार और देवेन्द्र को निवारण करने वाला रावण स्वयम् उत्तर द्वार को चला। भीषण नेत्रों वाले विरूपाक्षने शहरके बीचमें रहने की इच्छा को। रामचन्द्रजीने यह सब सुन कर रणके अभिलाषसे सामग्रीके साथ प्रस्थान किया। बन्दर भी युद्धके अनुरागसे शोभित हुए और कूद-फाँद इत्यादिसे उत्साह का भी प्रदर्शन करने लगे। इस बीचमें अनेक प्रकारके अपशकुन सामने प्रकट हुए। रावणने "युद्ध की इच्छासे शत्रु लोग उपस्थित हुए हैं" ऐसा सुन कर राक्षसों के उत्साह का संवर्द्धन किया। तदनन्तर वानरों और राक्षसों का दारुण संग्राम हुआ। राक्षसों का एक एक पुरद्वार कोटि (करोड़) संख्या-वाले बन्दरों ने रोका। छत्तीस करोड़ बन्दरों से सुग्रीव संरक्षित हुए। तब वानर-सेनापतियों का राक्षस-सेनापतियों के साथ समुद्धत द्वन्द्व युद्ध हो गया। प्रचुर वानरसेनापतियोंसे अनेक राक्षस-सेनापति मारे गये । अनन्तर अङ्गद

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

और मेघनाद का विकट संग्राम हुआ, उस अवसरमें बालिपुत्र अङ्गदने अपनी युद्ध-निपुणता दिखाई। राघव-धुरन्धर वीरवर रामचन्द्रजीने भी निर्दयतासे राक्षसों का संहार किया। ऐसी विपत्ति देख कर इन्द्रजित् कुपित हुआ और उसने सर्पास्त्र का आह्वान किया। तब उसने उन सर्पास्त्रों से समस्त वानरोंके साथ राम और लक्ष्मणको भी आच्छादित कर दिया। पाशबद्ध वे दोनों राम और लक्ष्मण मूच्छित हो गये और जमीनपर गिर पड़े। इस बीचमें राम और लक्ष्मण की वैसी अवस्थासे वानर-समूह अतिशय शोक-विकल हुआ। बहुतेरे बन्दरोंने मेघनादके मार्ग को भी नहीं जाना। तब सुग्रीवके मन्त्रसे पवित्र जलसे नेत्रोंको धोकर विभीषण और सुग्रीवने भी आकाशमें अवस्थित शत्रु (मेघनाद) को जान लिया। वानरोंके अधिपति सुग्रीवने इन्द्रजित् को मारनेके लिए पर्वत उठाया, इन्द्रजित् ने युद्धको छोड़कर पिता (रावण) के पास जाकर सब वृत्तान्त कहा। शत्रुओंके पराजय को सुननेके अनन्तर रावण राक्षसों के साथ बहुत प्रसन्न हुआ।

लक्ष्मणके साथ रामको ऐसे लक्षणसे युक्त विवश देखकर सीता मेरी अनुकूल होगी ऐसे अभिप्राय वाले दुरात्मा रावणकी आज्ञासे राक्षसोंने अशोक-वनिकासे पुष्पकमें चढ़ाकर सीताको रामका दर्शन कराया। वैसे (नागपाश बद्ध) राम और लक्ष्मणको देखकर सीता नेत्रोंको मूँदती हुई पुष्पक विमानके बीचमें मूर्च्छासे गिर पड़ीं। शोकके आवेगसे अतिशय विवश होकर सीताजी जागकर आँसुओं को गिराने तथा विलाप करने लगीं। ऐसी उत्कट कष्टवाली सीताजी को रावण की बहन त्रिजटाने आश्वस्त किया और अशोकवनिकामें पहुँचाया। इस बीचमें विभीषणके साथ वानरोंने विचार किया। तब रामने होशमें आकर उस शरबन्धके दुःखको जाना और शोकके अधीन होकर "वत्स ! जीवित हो ?" ऐसा कहकर लक्ष्मणको बुलाया, सुग्रीवको पूछा, किष्किन्धा जानेके लिए उनको वचनसे प्रेरणा भी की। सुग्रीवने राम और लक्ष्मणको किष्किन्धा पहुँचानेके लिए अङ्गदको आज्ञा दी और राक्षस-वधकी भी प्रतिज्ञा की। तदनन्तर "यह नागाऽस्त्र है, बाण नहीं, इसका प्रतिकार गरुड़जी का ध्यान है।" विभीषणसे ऐसा वचन सुनकर रामने नागशत्रु (गरुड़) का ध्यान किया। ध्यानके अनन्तर लोकाऽतिशायी वेगसे गरुड़जी आ पड़े। उनके आगमनसे नागपाश विश्लिष्ट हो गये, योद्धा लोग अक्षतके सदृश शोभित हुए, लक्ष्मणजी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

होशमें आ गये और विभीषणने "मेरे अभिलाष सम्पन्न हो गये" ऐसा विचार किया। गरुड़के स्पर्श मात्रसे राम और लक्ष्मण दुःख रहित हो गये, वे भी जैसे आये थे वैसे ही चले गये। अनन्तर वानरों के समूह अतिशय प्रसन्न होकर युद्ध करनेके लिए लङ्काको चले गये। रावणने भी राम आदिको नागपाशसे उन्मुक्त जाना। उसके बाद रावणके समस्त राक्षसोंने भी युद्धके लिए कवच धारण कर लिया। वानरों और राक्षसों का तुमुल युद्ध हुआ। महाबल वाले वायु-पुत्र हनूमान् जीने रणमें धूम्राक्ष नामके राक्षसको मारा। रावणकी आज्ञासे अकम्पन नामक राक्षसने हनूमान् जीके साथ युद्ध किया और अतिशय पराक्रम का भी प्रदर्शन किया। उसे वेगवान् हनूमान् जीने तालवृक्षके प्रहारसे यमभवन का अतिथि बना डाला। प्रकम्पनके वधसे रावण शोक और क्रोधसे अतिशय अभिभूत हो गया। तब रावणसे आज्ञा पाकर महाशक्तिसे सम्पन्न प्रहस्तने युद्धके लिए उद्योग किया और प्रारम्भमें ब्राह्मणपूजनादिक मङ्गलका भी आच-रण किया। महासङ्कटके समयमें भी व्याकुल न होने वाले राक्षसश्रेष्ठ प्रहस्तने वानर समूहके संहार रूप अद्भुत क्रमवाले विक्रम का प्रदर्शन किया। संग्राम-शील वानर सेनापति महाबल नीलने भी कुछ समय तक प्रहस्तके साथ युद्ध करके शिलाके प्रहारसे उसे मार डाला। अनन्तर सन्तुष्ट वानरोंने लङ्काका आश्रय किया और राक्षसोंने रावणको प्रहस्तके मारे जानेकी सूचना दी।

पञ्चदश सर्ग

तब रावण प्रहस्तके वधको सुनकर भीत हुआ, उसने कुम्भकर्णको जगानेके लिए राक्षसोंको भेजा। उन राक्षसोंने बुलानेसे और दण्डसे प्रहार करने आदि अनेक व्यापारों से भीषण वर्ण वाले कुम्भकर्ण को जगाया। कुम्भकर्णने जाग कर जगाने का कारण पूछा, वह जगाने का कारण जान कर स्नान, भोजन और पान आदि कर रावणके समीप गया। रावणने आते हुए उसे देखकर आसनसे कुछ उठ कर निकटवर्ती सौवर्ण सिंहासन का निर्देश किया। कुम्भकर्णने उस आसनपर बैठ कर बुलाने का कारण पूछा। रावणने भी क्रमके साथ समुद्र-तरणसे आरम्भ कर सम्पूर्ण रामपराक्रम का वर्णन किया और शत्रुनाश करनेके लिए उससे अनुरोध किया। तब कुम्भकर्णने "सलाहके समयमें मैंने जो कहा था वह आपने नहीं सुना, उसका यह फल आ गया है।" ऐसे परिणाममें हित-कर वाक्यों कहा। कालसे प्रेरित रावण ऐसे वाक्यों को सुनकर क्रोधसे आक्रा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्त चित्तवाला हो गया । तब कुम्भकर्ण रावणवचनका अनुसरण करनेके लिए गर्जन कर युद्धसामग्री साथ लेकर राक्षससमूहोंसे घिरा जाकर बड़े अवष्टम्भसे लङ्कापुरीसे बाहर निकल पड़ा । कुंभकर्णके भारसे पृथ्वी अवनत हुई, पेड़ गिर पड़े, अतिशय भय से सिंह भागने लगे और महेन्द्र आदि कुल पर्वत भी सञ्चलित हो गये । उस अवसरमें चारों ओर बहुतेरे उत्पात प्रकट हुए । कुम्भकर्ण दर्पसे उनकी अवज्ञा कर गर्जन करने तथा संग्राममें शत्रुओंको ललकारने भी लगा । तब उसने युद्धमें अपरिमित वानरोंका मांस खाया और रुधिर का पान किया । कुम्भकर्णसे वानरोंकी पलायन (भागना) आदि रूप दुर्दशा जानकर अङ्गद लज्जित हुए और उन्होंने पराक्रम करने का विचार किया । अङ्गदके पराक्रमसे उत्साहित वानर-समूहके साथ कुम्भकर्ण का तुमुल युद्ध हुआ । उस प्रसङ्गमें विभीषणने राम और लक्ष्मणको कुम्भकर्णके भीषण पराक्रमका वर्णन किया । वानर इकट्ठे होकर कुम्भकर्ण को पीड़ित करने लगे, वह भी उन लोगों को मारता हुआ परिश्रान्त नहीं हुआ । तब रामचन्द्रजी की इच्छासे सुग्रीव युद्ध के लिए कुम्भकर्णसे संगत हुए और उन्होंने बड़े पेड़ से उसके ऊपर प्रहार भी किया । कुम्भकर्णने उस (पेड़) को सह लिया और सुग्रीवमें भयंकर शक्ति का प्रहार किया । आकाशमें प्राप्त उस (शक्ति) को हनूमान्‌जीने पाकर खण्डित किया । कुम्भकर्णने बड़े पेड़ से प्रहार कर सुग्रीव को मूर्च्छित किया उन्हें लेकर वह भागा भी । तदनन्तर होशमें आकर सुग्रीवने कुम्भकर्णके कान और नाक को काट डाला । कोपसे आक्रान्त तथा मारने को इच्छा करने वाले कुम्भकर्णसे कपीन्द्र सुग्रीवने अपने को छुड़ाया । तदनन्तर वानरोंके साथ कुम्भ-कर्ण का लोमहर्षण (रोमाञ्च उत्पन्न करने वाला) रण हुआ । उसमें विवश वानरों की दुर्दशा देखकर लक्ष्मणजी ने कुम्भकर्ण के मुकुट और कवच को भी काटा और बाणोंसे उसके शरीर को भी विदीर्ण कर डाला । तब अपने साथ युद्ध की स्पर्धा करने वाले कुम्भकर्णके ऊपर रामचन्द्रजीने जिन बाणोंसे खर, वाली, मारीच और दूषण मारे गये थे उन्हीं बाणों को छोड़ा । रामचन्द्रजीने वायव्य अस्त्रसे आयुधके साथ कुम्भकर्णके हाथको काट डाला । उन्होंने इसी तरह उसके वृक्षयुक्त हाथको काटकर जङ्घाओंको भी चलनेमें असमर्थ बना डाला । तदनन्तर रामचन्द्रजीने ऐन्द्र बाणसे कुम्भकर्णके हृदयमें वेधन किया, गिरते हुए उसने अपने शरीरसे दो हजार बन्दरोंको चूर चूर कर डाला । तब

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवताओंने रामचन्द्रजी की स्तुति की, राक्षस भयसे भागने लगे। रावण अपने भाई (कुम्भकर्ण) के वधको सुनकर अत्यन्त शोकवश होकर उसके गुणोंको फैलाने लगा। तब देवान्तक आदि रावणके चार पुत्र रणाङ्गणको गये। अङ्गदजीके साथ नरान्तक का युद्ध हुआ। महाबली वालिपुत्र (अङ्गद) ने मुष्टिप्रहारसे नरान्तकके प्राणों का हरण किया। उसी तरह वायुपुत्र हनूमान्‌जीने देवान्तक नामक रावणके आत्मजका अन्त कर डाला। इसी प्रकारसे राजकुमारों की रक्षाके लिए भेजे गये युद्धोन्मत्त नामके राक्षसको भी युद्धशील नीलने मारा। हनूमान्‌जीसे शिरमें ताडित त्रिशिराने भी प्राणोंको छोड़ा। तदनन्तर विभीषणने रामचन्द्रजी को अतिकायनामक रावणकुमारके पराक्रम का वर्णन किया। लक्ष्मणजीके साथ अतिकाय का अति विचित्र युद्ध हुआ। लक्ष्मणजीने कुछ ही समयके अनन्तर ब्रह्मास्त्रसे अतिकायके काय (शरीर) को निर्जीब कर दिया। तब रावण अपने पुत्र का वध सुनकर रोने लगा, उसे इन्द्रजित्‌ने आश्वासन दिया। इन्द्रजित् ने जगत्‌के विधाता (रचना करने वाले) विधाता (ब्रह्माजी) की पूजा कर हवनसे अग्निको सन्तुष्ट कर अस्त्रमण्डल की भी पूजा की। तदनन्तर उसने ब्रह्माजीसे जय देने वाले अस्त्र और रथ को भी पाया। इन्द्रजित् उस (रथ) पर चढ़ कर अदृश्यरूप वाला होता हुआ राक्षसके शत्रुओंके प्राणों का हरण करने लगा। उसने सड़सठ करोड़ बन्दरों को मार डाला और राम-लक्ष्मण को मूर्च्छित किया। इन्द्रजित्‌ने लङ्कामें जाकर रावण को अपना पराक्रम दिखाने के लिए रणाङ्गणमें भेजा। तब विभीषणने राम और लक्ष्मण को जीवित तथा बहुतेरे बानरों को मारे गये जान लिया। तदनन्तर जाम्बवान् भी होशमें आये। जाम्बवान् और विभीषणने हनूमान्‌जीको मृतजीवनी (मरे हुए को जीवित करने वाली), सन्धानकरणी (क्षतका सन्धान करने वाली), और विशल्यकरणी (गड़े हुए वाण को निकालने वाली) इन औषधियोंको लानेके लिए भेजा। जब हनूमानजी औषधोंके भेदका निश्चय नहीं कर सके तब वे औषधोंके साथ पर्वत को ले आये। औषधप्राप्तिसे आहत सब योद्धा वानरगणों ने जीवन पाया और युद्धके लिए वे पहले की तरह प्रवृत्त हुए। तब निकुम्भ और कुम्भ नाम वाले कुम्भकर्णके पुत्रोंने लङ्का और वहाँ रहने वाले राक्षसों की रक्षा की और वे वानरों का वध भी करने लगें। अङ्गदके साथ राक्षसोंका अति भयंकर संग्राम हुआ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामचन्द्रजीके अभिप्रायसे सुग्रीवने भ्रातृपुत्र (अङ्गद) की शत्रुसङ्कटसे शीघ्र रक्षा की और मुष्टिप्रहारसे कुंभकर्णके पुत्र कुंभ को मार डाला भाई (कुम्भ) के बधके प्रतीकार (बदला) के लिए उद्यत कुम्भभ्राता निकुंभको हनूमानजी ने मार दिया। अनन्तर प्रधान शत्रुभटोंके वधसे सुग्रीवने अवश्यम्भाविनी सिद्धिकी तर्कणा की, रामचन्द्रजीकी बुद्धि सम्पन्न इच्छासे युक्तकी तरह प्रसन्न हुई और मेघनाद आदि राक्षस सेनापतियोंका अविच्छिन्न शोक बढ़ गया।

षोडश सर्ग

अनन्तर बान्धवोंके मारे जानेसे राक्षसराज रावण अतिकाय आदि अपने पुत्रों को और मत्त और युद्धोन्मत्त आदि अपने भृत्योंको भी बारंबार स्मरण (याद) कर विलाप करने लगा। इसी प्रकारसे उसने जिनके मारे जानेकी सम्भावना भी नहीं की जा सकती है ऐसे कुम्भकर्ण आदियोंका भी स्मरण कर अनेक प्रकारोंसे अपने पराजयका वर्णन किया। निष्फल अभिलाष वाले उसने नम्रतापूर्वक विभीषणसे कहे गये नीति-समूहका भी स्मरण किया। इस तरह अनेक प्रकारसे विलाप कर उस राक्षसराजने कोप उत्पन्न होनेसे नरों और वानरोंके समूहके वधमें तत्पर होकर उत्साहका अवलम्बन किया। शत्रुनिवारणमें आसक्त तथा लोकके रुलाने वाले रावणने "पहले लङ्कामें आक्रमण करने वालों को मारकर तदनन्तर देवताओं के साथ इन्द्रको जीतनेके लिए जाकर फिर लङ्कामें आऊँगा" ऐसा विचार किया। इस बीचमें इन्द्रजितने रावणके समीपमें आकर, पहले किये गये इन्द्रके तिरस्काररूप अपने पराक्रमका वर्णन करके "शत्रुवध करूँगा" कह कर अपने उत्साहका प्रदर्शन किया।

सप्तदश सर्ग

अनन्तर इंद्रजित्के योद्धाओंने उपद्रवपरिहारके लिए शांतिकी इच्छा की, और उसके लिए मङ्गलका आचरण किया। वे यथेष्ट भोजन कर युद्धके निमित्त तत्पर हो गये। इन्द्रजित् भी ब्रह्माजीकी और ब्राह्मणोंकी भी पूजा कर कवच पहनकर शस्त्र-अस्त्र आदि युद्धके सामग्री-समूहको लेकर सवारी पर चढ़कर युद्धके लिये चला। उस अवसरमें योद्धाओंने युद्धके वाद्योंको बजाया। इस बीचमें अनेक अपशकुन सामने प्रकाशित हुए। परन्तु राक्षसोंने उनकी उपेक्षा कर बड़े उत्साहके साथ युद्ध किया। इस प्रकारसे वानरसमूहके साथ राक्षस वीरोंका लोमहर्षण रण हुआ। इन्द्रजित्ने अतिशय वेगसे धनुमें बाणसन्धान

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किया। हस्तलाघव असाधारण हुआ। इस प्रकारसे उसने बहुतेरे वानरोंको हत और आहत किया। अधिक क्या उससे अतिशय अनिष्ट की आशङ्का कर लक्ष्मणजीने ब्रह्मास्त्रका आह्वान करने की इच्छा की। परन्तु विभीषणके और निरपराध दूसरे राक्षसोंके भी नाशकी आशङ्काकर रामचन्द्रजीने उनको रोका। तब इन्द्रजित् आकाशमें जाकर मायामयी सीताको तलवारसे काटता हुआ दिखाई पड़ा। सीताजीके वध का प्रतिकार करनेके इच्छुक अञ्जनीनन्दन हनूमान्ने "हे पाप! पति विरहसे निपीडित इनको मत मारो" ऐसा कहा। उनके देखते-देखते इन्द्रजित्ने मायामयी सीताके शिरको काट डाला। हनूमान्ने ऐसा शोकजनक वृत्तान्त राम और लक्ष्मणको कहा। तब वे दोनों शोकसे आकुल होते हुए अतिशय विलाप करने लगे। विभीषणजीने आकर उन दोनों को प्रकृत वृत्तान्त बतलाया—"वह हम लोगोंको मोहित कर निकुम्भिला नामक अग्निशालाको चला गया है। वह वहाँ पर हवनकार्य समाप्त होनेपर ब्रह्मशिर नामक अस्त्र और रथ भी प्राप्त करेगा। उस कर्मके समाप्त न होनेपर ही ब्रह्माजीने उसके वधका निर्धारण किया है।" तब रामचन्द्रजीकी आज्ञासे इन्द्रजित्के हवनमें विघ्न उपस्थित करनेके लिए बहुतसे वानर निकुम्भिलामें चले। वहाँ पर उन लोगोंको बहुतेरे रक्षक राक्षसोंने रोका। इस प्रकारसे वहाँ राम और रावणकी सेनाओं का भयङ्कर युद्ध हुआ। तदनन्तर निकुम्भिलाके रक्षणके लिए तत्पर उन राक्षसोंको जीतकर लक्ष्मण और विभीषण शीघ्र भीतर घुस गये। जाकर उन दोनोंने अग्नि में हव्य (चरु पुरोडाश आदि पदार्थ) का प्रक्षेप करते हुए एकाग्रचित होकर मन्त्रोच्चारण करते हुए इन्द्रजित्को देख लिया। तब वहाँ पर लक्ष्मणजीने उसे ललकारा और गर्जन भी किया। उस ललकारमें कुपित होकर इन्द्रजित् अपने पितृव्य (चाचा) विभीषणकी कुलदूषक होनेसे अनेक प्रकारसे भर्त्सना की। सत्पक्षका अवलम्बन करने वाले सुशील विभीषण ने भी उससे कहे गये दूषणों को युक्ति-सम्पन्न वचनों से निराकृत किया और रावण के ही प्रमाद-समूह का प्रतिपादन किया। तब इन्द्रजित् ने अपने पिता (रावण) के दोष का प्रकाशन करने से अतिशय क्रुद्ध होकर बाण-समूहोंसे विभीषण और लक्ष्मण को ताडित किया। राक्षसगणके संहारमें आसक्त लक्ष्मणजी नें मेघनाथ के सारथि को काट डाला और रथ भी तोड़ दिया। तदनन्तर लक्ष्मण और इन्द्रजित् का अत्यन्त

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भय का उत्पादक युद्ध प्रवृत्त हुआ। कुछ क्षणके बाद लक्ष्मणजी ने इन्द्रजित् को मार डाला। तब वानरोंके साथ समस्त देवगण सन्तुष्ट हुए, रामचन्द्रजीने लक्ष्मणको आलिङ्गन किया और उनके शिरमें सूँघा भी। राक्षससेना रावणके साथ रोने लगी। दुरात्मा रावण आतुरतासे सीताज़ी को मारनेके लिए उपक्रम करने लगा। तब उसके आप्तोंने "यह कर्म अनुचित है" ऐसा कहकर उसे रोका और बहुतेरे उपदेशोंसे उसे समाश्वस्त भी किया। तब रावण युद्धका भारी आरम्भ करने लगा। राक्षसोंने अग्निकी परिचर्या और शंकरजीको नमस्कार कर शान्तिके लिए ब्राह्मणोंको भी प्रसन्न किया। तब उन राक्षसोंने कवच पहनकर युद्धसामग्रीसे विभूषित होकर हाथी आदि सवारी पर चढ़कर युद्धके निमित्त प्रस्थान किया। राक्षसोंका वानरोंके साथ लोक-प्रख्यात युद्धका आरम्भ हुआ। उस अवसरमें पृथिवीकी धूलि बढ़ गई और उसने दशों दिशाओं को व्याप्त कर लिया; जिससे वानर और राक्षसोंका अपना और पराया का विवेक भी चला गया। लोहूकी गम्भीर नदियाँ बहने लगीं। तब विपत्तियोंका अवसान करने वाले रामचन्द्रजीने लोकातिशायी विचित्र क्रमका अवलम्बन कर राक्षसों का संहार करनेके लिए महान् पराक्रम दिखलाया। अधिकसे क्या, उन्होंने पहाड़ोंके सदृश बड़े-बड़े मारे गये राक्षसोंसे पृथ्वीको व्याप्त कर दिया। देवता और गन्धर्व रामकी स्तुति करने लगे, वानर विस्मित हुए और राक्षसियाँ ऊँचे स्वरसे रोने लगीं और रावणकी निन्दा करने लगीं। तब रावण अति भयङ्कर रथपर चढ़कर युद्धके लिए आया। उस अवसरमें अशुभसूचक अपशकुन नेत्रमार्गमें प्राप्त हुए। दोनों पक्षोंमें परम दारुण रणने क्षण (अवसर) पाया। वहाँ सुग्रीवने अतिशय आश्चर्य का द्योतन करने वाली संग्राम-कुशलता का आविर्भाव किया। अतिशय कोपशील राक्षसश्रेष्ठ रावणने अपरिमित वानरों के प्राणों को हर लिया, राक्षसों की रक्षा की और राम और लक्ष्मणको बाणसमूहोंसे पीड़ित किया। रामचन्द्रजीने उससे प्रेरित बाण-वृष्टिको भालोंसे अपनीत किया। तदनन्तर रामचन्द्र और रावणका अतिभीषण और अतिप्रख्यात दारुण रण प्रवृत्त हुआ। रावणने अनेक आयुधोंके प्रहारोंसे अतिशय पीड़ित करनेवाले लक्ष्मणजीको आठ घण्टाओंसे शोभित महाशक्तिसे प्रहार कर निष्प्राण कर डाला। तब रामचन्द्रजीने हनूमान्से लाये गये औषधोंसे अपने भाई (लक्ष्मण) को उज्जीवित किया। तदनन्तर नितान्त ही कोपसे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

567

आक्रान्त चित्त वाला और बन्धुनाशसे अतिशय अशान्त रावण रामचन्द्रजीके साथ लड़नेके लिए तत्पर हुआ। "रथमें आरूढ रावणके साथ पृथिवी में रहे हुए रामचन्द्रजी का संग्राम अनुचित है" ऐसा जानकर इन्द्रजीने रथके साथ अपने सारथि मातलिको रामचन्द्रजीके पास भेजा। रामचन्द्रजी भी इन्द्रसे भेजे गये रथपर चढ़कर रावणके साथ लड़नेको तत्पर हुए। महावीर नर और राक्षस राम और रावण दोनों का असाधारण संग्राम प्रवृत्त हुआ। तदनन्तर रावणके वध के लिए ब्रह्माजीने जिस अस्त्रकी रचना की थी बुद्धिशाली मातलिने रामचन्द्रजीको उस अस्त्रका स्मरण कराया। रामचन्द्रजीसे प्रेरित उस अस्त्रने रावणके प्राणोंका अपहरण कर डाला। रावणके पृथिवीमें गिरनेके अनन्तर वानरसमूह अतिशय हर्ष का परवश हुआ देवसमुदायने शत्रुओं को जीतने वाले रामचन्द्रजी की प्रशंसा की और विभीषण भाईके मारे जानेसे शोकसे आकुल हो गये ॥

अष्टादश सर्ग

तदनन्तर रावणके प्राणापहरणसे शोकपरायण विभीषणने अतिशय विलाप किया। विलापके अवसरमें रावणके भाई विभीषणने "नीतिके अभावसे ही बड़े भाई की ऐसी दशा हुई" ऐसा प्रतिपादन किया, रावणके प्रतापका बारंबार स्मरण कर भाग्यको उद्देश्य कर बहुत उपालम्भ (उलहना) भी दिया। विभीषणने रावणके अभावमें इन्द्र आदि देवताओंके भावी अभ्युदय और लङ्कामें रहने वाले राक्षसोंकी विपत्तिका और कृतज्ञ होनेसे रावणके गुणसमूहका भी अनेक प्रकारसे वर्णन किया। इस बीचमें वृत्तान्त जानकर अन्तःपुरकी स्त्रियाँ और पुरवासी भी अत्यन्त दुःखित होनेसे विलाप करने लगे। तब रामचन्द्रजीने "रावण शोक करने के योग्य नहीं है" ऐसा प्रतिपादन कर अनन्तर कर्त्तव्य का उपदेश कर रावणके भाई विभीषणको सान्त्वना दी।

ऊनविंश सर्ग

तब रामचन्द्रजीसे समाश्वासित विभीषणने विलेपन (चंदन आदि) से लेपन और अलङ्कार पहनाकर रावणको जलानेके लिए लङ्कामें अनेक उपकरणों को इकट्ठा करनेके लिए राक्षसोंको आज्ञा दी। उन लोगोंने भी विभीषणके आज्ञानुसार सब वस्तुओं का सम्पादन कर शोक हटानेके लिए विभीषणको सान्त्वना दी और लङ्काको पालन करनेके लिए उनके उत्साह का संवर्द्धन भी

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किया । तब विभीषणने अपने बड़े भाई रावण का अग्नि संस्कार और जलदान आदि क्रिया की । रामचन्द्रजीने भी विभीषणके शिरमें सुवर्ण-कलशसे जलको सींचते हुए नीतिके अनुकूल राज्य शासनके प्रकारों का वर्णन किया और विभीषण की समृद्धिमें अपनी इच्छा की सूचना की ।

त्रिंश सर्ग

अनन्तर हनूमान् जीने सीताजीके पास जाकर रावण आदि राक्षसोंके वधका वर्णन किया और सीताजीके रक्षणमें तत्पर राक्षसियोंके दण्डित करनेके प्रस्तावको उपस्थित किया । दयासे परिपूर्ण अभिप्राय वाली सती सीताने प्रेष्यों (अनुचरों) के वधमें अपनी अनिच्छा का प्रतिपादन किया और "सीता आपके दर्शन का अभिलाष करती है, इस बातकी बिना विलम्बके रामचन्द्रजी को सूचना दो" ऐसा भी कहा । रामचन्द्रजीके समीपमें हनूमान् जीके सीताजी का अभिलाष प्रकाशित करने पर रघुकुलके चन्द्रस्वरूप रामचन्द्रजीने अङ्गुष्ठ (अंगूठे) से पृथिवी को लिखकर निःश्वास लेकर "अलंकृत सीताको ले आओ" विभीषणको ऐसी आज्ञा दी । दूषणसे रहित और गुण गण रूप भूषणवाले विभीषणने अशोक वनिकामें जाकर सीताजी को प्रणाम कर "हे देवि ! स्नान और अनुलेपन कर अलंकार पहनकर सुवर्णमयी पालकी पर चढ़कर आप रामचन्द्रजीके समीप पधारें" ऐसा निवेदन कर उत्तर कर्त्तव्य का भी प्रतिपादन किया । चन्द्र सदृश मुखवाली सीताजी स्नानादि कर्म का अनुष्ठान कर रेशमी वस्त्रसे घूंघट डालकर सवारीमें आरूढ़ हुई और पतिके समीप पहुँचकर रोने भी लगीं । राजकुलके भूषणभूत मर्यादापरिपालक रामचन्द्रजीने सीताके चरित्रमें सन्देह कर उनके ग्रहणमें अनिच्छाकी सूचना कर यथेष्ट गमनके लिए उन्हें आज्ञा दी । सतीशिरोमणि जनकनन्दिनीने ओजस्विनी वाणीसे अपने चरित्रकी पवित्रता का प्रतिपादन किया और अपनी पवित्रताको प्रकाशित करनेके लिए चिताकी रचनाके निमित्त लक्ष्मणको आज्ञा दी । तब रामचन्द्रजीसे अनुज्ञात लक्ष्मणजीके चिताकी रचना करने पर सीता—"हे अग्निदेव ! मैं दुष्ट हूँ तो मुझे जला डालो, इसके विपरीत यदि मैं चरित्रकी पवित्रतासे संपन्न हूँ तो मुझे संरक्षित करो" ऐसा कहकर उसमें प्रवेश किया ।

एकविंश सर्ग

तब अग्निने सीताजी को उठाकर रामचन्द्रजीके समीपमें उनके लोकोत्तर चरित्रकी पवित्रताको कहा और "सामान्य स्त्रीके समान इन्हें नहीं देखना

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चाहिए।" ऐसा भी प्रतिपादन किया। उसी अवसर में भगवान् वृषभवाहन (महादेव), कमलासन (ब्रह्मा) और बिमानमें स्थित महाराज दशरथ भी आ गये। तब रामने उन्हें प्रणाम किया। उन लोगोंने भी सीताजीके लोकोत्तर पवित्र चरित्र का वर्णन किया। उस अवसरमें सुरश्रेष्ठ इन्द्रजी भी आये। रामचन्द्रजीसे अभिवन्दित उनके बरसे उनके आनन्द सम्पादनके लिए युद्धमें प्राण छोड़नेवाले वानर जीवित हुए और यत्र तत्र पेड़ों की डालों में चढ़ने भी लगे।

द्वाविंश सर्ग

तब रावणको मारनेवाले, दशरथके पुत्र रामचन्द्रजीने प्रसन्नचित्त हनूमानजी को माताओं, भरत, नौकरों, मन्त्रियों और पुरवासियोंको आश्वस्त करनेके निमित्त, अयोध्या जानेके लिये कहा। और जाते समय रास्तेमें जगह-जगह पर प्राप्त होनेवाले देशविशेषों मनुष्यों और गङ्गा आदि नदियोंका सविस्तर वर्णन किया। रामचन्द्रजीकी आज्ञा मानकर वानरोंके अध्यक्ष हनूमान्जीके प्रस्थान करनेपर रामजीने सुग्रीव और विभीषणको—"कल आप दोनों भी मेरे साथ अयोध्या जाना पसन्द करते हैं या नहीं" इस तरहसे पूछा। उन दोनोंने भी रामचन्द्रजीकी अभिरुचि देखकर अपनी इच्छा प्रकट की। बादमें इस तरहकी बातचीत करते हुए रामचन्द्रजी प्रभृतियोंने रात बिताकर सैनिकोंके साथ पुष्पकविमानपर चढ़कर अयोध्या जाने के लिये प्रस्थान किया। रास्तेमें स्थान-स्थानपर प्राप्त होनेवाले—सेतु, महेन्द्र, मलय, विन्ध्य, माल्यवान्, ऋष्यमूक, दण्डकारण्य, पम्पा आदि प्रदेशोंका अनेकों प्रकार वर्णनपूर्वक सीताजीको कहते हुए रामचन्द्रजी अयोध्याके सामने पहुँचे। तदनन्तर हनूमान्जीके द्वारा रामजीके वृत्तान्तको प्राप्तकर आनन्दसे अश्रुयुक्तनयनवाले शान्तचित्त भरतजी, मन्त्रियों, माताओं और अन्तःपुरवासियोंके साथ श्रीरामचन्द्रजीके पास पहुँचे। अत्यन्त चहलपहलके साथ पुरवासियोंसे घिरे हुए भगवान् रामचन्द्रजीने अपने छोटे भाइयोंके सहित, बड़े उत्सवके साथ अयोध्यापुरीमें प्रवेश किया। उसके बाद अपना राज्याभिषेक और भरतजीका यौवराज्याभिषेक कार्य सम्पन्न होनेपर रामचन्द्रजीने अश्वमेघयज्ञ करना आरम्भ किया।

इति कथासार समाप्त।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विषयसूची

सर्ग	विषयः			पृष्ठम्
१२	रामं प्रति विभीषणागमनम्	....	....	१
१३	सेतुबन्धनम्	....	....	५५
१४	शरबन्धः	....	....	८३
१५	कुम्भकर्ण-वधः	....	....	१३९
१६	रावण-विलापः	....	....	२०६
१७	रावण-वधः	....	....	२३०
१८	विभीषण प्रलापः	....	...	२९१
१९	विभीषणाऽभिषेकः	....	....	३१६
२०	सीताप्रत्याख्यानम्	....	....	३३३
२१	सीताया अग्निपरीक्षणम्	....	....	३५३
२२	अयोध्यां प्रत्यागमनम	....	....	३६७

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

॥ श्रीः ॥

भट्टिकाव्यम्

चन्द्रकला-विद्योतिनी-टीकाद्वयोपेतम्

(उत्तरार्द्धम्)

अथ द्वादशः सर्गः

आविकत्वं नामाऽलङ्कारः प्रबन्धविषय उक्तस्तल्लक्षणमुक्तं भामहेन—

आविकत्वमिति प्राहुः प्रबन्धविषयं गुणम् ।
प्रत्यक्षा इव दृश्यन्ते तत्राऽर्था भूतभाविनः ॥
चित्रोदात्ताद्भुताऽर्थत्वं कथायाः स्वभिनीतता ।
शब्दाऽनाकुलता चेति तस्य हेतुं प्रचक्षते ॥ इति ।

तत्सर्वं मन्त्रनिर्णयप्रबन्धे द्रष्टव्यमिति दर्शयन्नाह—

ततो विनिद्रं कृतदेवताऽर्चं दृष्ट्यैव चित्तप्रशमं किरन्तम् ।
आविष्कृताऽङ्गप्रतिकर्मरम्यं विभीषणं वाचमुवाच माता ॥ १ ॥

अन्वयः—ततो माता विनिद्रं कृतदेवताऽर्चं दृष्ट्या एव चित्तप्रशमं किरन्तम् आविष्कृताऽङ्गप्रतिकर्मरम्यं विभीषणं वाचम् उवाच ॥

व्याख्या—ततः = प्रभातकालाऽनन्तरं, माता = जननी, रावणादिजननी नैकषीति भावः । विनिद्रं = प्रबुद्धं, कृतदेवताऽर्चं = विहितेष्टदेवपूजं, दृष्ट्या एव = दर्शनेन एव, स्निग्धेनेति शेषः । चित्तप्रशमं = चेतःशान्तिं, किरन्तं = प्रकाशयन्तम्, आविष्कृताङ्गप्रतिकर्मरम्यं = प्रकाशितशरीरप्रसाधनसुन्दरं, विभीषणं = तन्नामकं स्वकनिष्ठपुत्रं, वाचं = वक्ष्यमाणप्रकारां वाणीम् , उवाच = कथितवती ॥

व्युत्पत्तिः—विनिद्रं = विगता निद्रा यस्य, तम् । कृतदेवताऽर्चं = कृता देवताया अर्चा येन स कृतदेवताऽर्चस्तम् । 'पूजा नमस्याऽपचितिः सपर्याऽर्चाऽर्हणाः समाः ।' इत्यमरः । दृष्ट्या = दर्शनं दृष्टिस्तया, 'स्त्रियां क्तिन्' इति भावे क्तिन् । आविष्कृताऽङ्गप्रतिकर्मरम्यम् = आविष्कृतं यत् अङ्गस्य प्रतिकर्म, तेन रम्यस्तम् । 'प्रतिकर्म प्रसाध-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नम्' इत्यमरः। उवाच=ब्रूधातोर्लिट्, ब्रूधातोर्द्विकर्मकत्वात् 'विभीषणं, वाचम्' इति कर्मद्वयम्। अस्मिन्सर्गेऽपि प्रायेण उपजातिवृत्तम्।

भाषाऽर्थः—तब (प्रातःकाल होने के अनन्तर) माता नकषी जगे हुए, इष्ट देवता की पूजा किये हुए, स्निग्ध दर्शनमात्रसे चित्तकी शान्तिको प्रकाशित करने वाले तथा प्रकाशित शरीरके प्रसाधनसे सुन्दर विभीषणको ऐसी वाणी बोली ॥ १॥

प्रबाधमानस्य जगन्ति धीमन्! त्वं सोदरस्याऽतिमदोद्धतस्य।
आनन्दनो नाकसदां प्रशान्तिं तूर्णं विषस्याऽमृतवत् कुरुष्व ॥ २ ॥

अन्वयः—'हे' धीमन्! नाकसदाम् आनन्दनः त्वं जगन्ति प्रबाधमानस्य अतिमदोद्धतस्य सोदरस्य विषस्य अमृतवत् तूर्णं प्रशान्तिं कुरुष्व ॥

व्याख्या—हे धीमन्=हे प्रशस्तबुद्धिसम्पन्न, नाकसदां=देवानाम्, आनन्दनः=प्रमोदयिता, त्वं, जगन्ति=लोकान्, प्रबाधमानस्य=प्रपीडयतः, अतिमदोद्धतस्य=अतिगर्वाऽविनीतस्य, सोदरस्य=भ्रातुः दशाननस्येत्यर्थः। विषस्य=कालकूटस्य, अमृतवत्=सुधया तुल्यं, तूर्णं=सत्वरं, प्रशान्तिं=प्रशमनं, कुरुष्व=विधेहि। यथाऽमृतं जगत्पीडकस्य स्वाऽऽश्रयसमुद्रोत्पन्नस्य कालकूटविषस्य प्रशमनेन देवप्रमोदकमभवत् तथैव त्वमपि लोकपीडकस्य अतिगर्वोद्धतस्य सहोदरभ्रातृ रावणस्योपदेशनेन प्रशान्तिं, कुरु इति भावः॥

व्युत्पत्तिः—नाकसदां=नाके सीदन्तीति नाकसदस्तेषां, 'सत्सूद्विषे'त्यादिना क्विप्प्रत्ययः। ल्युप्रत्ययान्तस्य 'आनन्दन' इति कृदन्तपदस्य योगे 'कर्तृकर्मणोः कृति इति कर्मणि षष्ठी। जगन्ति='प्रबाधमानस्य' इति शानजन्तस्य कृदन्तपदस्य योगे प्राप्तायाः कर्मणि षष्ठ्या 'न लोकाऽव्ययनिष्ठाखलर्थतृनाम्' इति निषेधाद् द्वितीया। सोदरस्य=उदरेण (समानेन) सह वर्तत इति सोदरस्तस्य 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः 'वोपसर्जनस्य' इति सहस्य वैकल्पिकः सभावः, सहभावपक्षे 'सहोदर' इत्यपि। उपमाऽलङ्कारः॥

भाषाऽर्थः—हे प्रशस्तबुद्धियुक्त! देवताओं को आनन्दित करने वाले तुम (विभीषण) लोगोंको पीडित करने वाले, अतिशय गर्वसे अविनीत, अपने भाई विषरूप रावण को तुम अमृतके सदृश बनकर शीघ्र शान्त करो ॥ २ ॥

कुर्यास्तथा, येन जहाति सीतां विषादनीहारपरीतमूर्तिम्।
स्थितां क्षितौ शान्तशिखाप्रतानां तारामिव त्रासकरीं जनस्य ॥ ३ ॥

अन्वयः—तथा कुर्याः, येन विषादनीहारपरीतमूर्तिं क्षितौ स्थितां शान्तशिखाप्रतानां जनस्य त्रासकरीं ताराम् इव सीतां जहाति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—तथा = तेन प्रकारेण, कुर्याः = विदधीथाः कर्मेति शेषः । येन = प्रकारेण, विषादनीहारपरीतमूर्तिं=खेदावश्यायपरिगतदेहां, क्षितौ=पृथिव्यां, स्थितां= निमग्नां, शान्तशिखाप्रतानाम् , तारापक्षे—निर्वाणज्वालासमूहां, सीतापक्षे—अनुज्ज्वलवेणीबन्धाम् , एवं च—जनस्य = तारापक्षे लोकस्य, सीतापक्षे—लङ्कावासिजनस्य, त्रासकरीं = भयहेतुभूतां, ताराम् इव = तारकाम् इव, सीतां = मैथिलीं, जहाति = त्यजति । अवश्यायपरिगता भूपतिता निर्वाणकिरिणा तारका यथा लोकोत्पातसूचनेन त्रासकरी भवति तथैव विषादग्रस्ता भूमितलोपविष्टा अनुज्ज्वलवेणीबन्धा इयं सीताऽपि लङ्कावासिजनानां भीत्युत्पादिकाऽस्ति अत एनां रावणो यथा त्यजेत्तथैनमुपदिशेति भावः ।

व्युत्पत्तिः—कुर्याः=विध्यर्थे लिङ् । विषादनीहारपरीतमूर्तिं = तारापक्षे—विषाद इव नीहारः, सीतापक्षे–विषादो नीहार इव, तेन परीता मूर्तिर्यस्याः, ताम् । शान्तशिखाप्रतानां = शान्ताः शिखाप्रताना यस्याः, ताम् । त्रासकरीं = त्रासं करोतीति तद्धेतुस्त्रासकरी, ताम् । 'कृञो हेतुताच्छील्याऽऽनुलोम्येषु' इति हेतौ टः । टित्वात् 'टिड्ढाणञ्' त्यादिना ङीप् उपमाऽलङ्कारः ॥

भाषाऽर्थः—हे विभीषण ! हिमसे व्याप्त मूर्ति, पृथ्वी में पड़ी हुई, शान्त ज्वालासमूहसे युक्त, लोगको त्रस्त करने वाली ताराके सदृश खेदसे व्याप्तमूर्ति भूमिमें बैठी हुई अनुज्ज्वल वेणीबन्धसे युक्त और लङ्कावासी जनको त्रास देनेवाली सीताको जिस प्रकार रावण छोड़ दे, वैसा करो ॥ ३ ॥

यावन्न संत्रासितदेवसंघः पिण्डो विषस्येव हरेण भीष्मः ।
संग्रस्यतेऽसौ पुरुषाऽधिपेन, द्रुतं कुलाऽऽनन्द ! यतस्व तावत् ॥४॥

अन्वयः—संत्रासितदेवसङ्घो भीष्मो विषस्य पिण्डो हरेण इव यावत् असौ पुरुषाऽधिपेन न संग्रस्यते तावत् हे कुलाऽऽनन्द ! द्रुतं यतस्व ॥

व्याख्या—संत्रासितदेवसङ्घः=समुद्वेजितसुरसमूहः, भीष्मः = भयङ्करः, विषस्य= गरलस्य, कालकूटस्येति भावः । पिण्डः = कवलं, हरेण इव = शम्भुना इव, यावत् = यत्कलं यावत् , असौ रावणः, पुरुषाऽधिपेन = रामेण, न संग्रस्यते = न विनाश्यते, तावत् = तत्कालं यावत् , हे कुलाऽऽनन्द = हे वंशहर्षजनक, द्रुतं= शीघ्रं, यतस्व = यत्नं कुरु, सीतात्यागाऽर्थं रावणं प्रबोधयेति भावः ॥

व्युत्पत्तिः—संत्रासितदेवसङ्घः = संत्रासितो देवसङ्घो येन सः, 'सङ्घसार्थौ तु जन्तुभिः' इत्यमरः । कुलाऽऽनन्द = कुलानि आनन्दयतीति कुलाऽनन्दस्तत्सम्बुद्धौ, 'कर्मण्यण्' इत्यण् । उपमाऽलङ्कारः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—देवसमुदायको संत्रस्त करने वाले भयङ्कर विषपिण्डको जैसे महादेवने पान किया था उसी तरह जब तक रावणको रामचन्द्रजी नष्ट नहीं करते हैं तब तक हे कुलानन्द ! शीघ्र यत्न करो ॥ ४ ॥

हता जनस्थानसदो निकायाः, कृता जितोत्खातभटद्रुमा पूः ।
सदांसि दग्धानि विधेयमस्मिन् यद् बन्धुना, तद् घटयस्व तस्मिन् ॥५॥

अन्वयः—जनस्थानसदो निकाया हताः, पूः जितोत्खातभटद्रुमा कृता, सदांसि दग्धानि । अस्मिन् बन्धुना यत् विधेयं, तत् तस्मिन् घटयस्व ॥

व्याख्या—जनस्थानसदः = दण्डकारण्यवासिनः, निकायाः = खरदूषणादीनां समूहाः, हताः=मारिताः, पूः = नागरी, लङ्केत्यर्थः । जितोत्खातभटद्रुमा= जितयोधा उन्मूलितवृक्षा च, कृता = विहिता, सदांसि = गृहाणि, दग्धानि = भस्मीकृतानि, अतः अस्मिन् = विषये, बन्धुना = ज्ञातिना, यत् = कार्यम्, विधेयं = कर्तव्यं, तत्= कार्यं, तस्मिन् विषये = रावणविषये वा, घटयस्व = यतस्व ॥

व्युत्पत्तिः—जनस्थानसदः=जनस्थाने सीदन्तीति, क्विप्प्रत्ययः । निकायाः= 'संघे चानौत्तराधर्ये' इति चिनोतेर्घञ् ककारश्चाऽन्तादेशः । जितोत्खातभटद्रुमः= जितोत्खाता भटद्रुमा यस्यां सा, यथासंख्योऽलङ्कारः । सदांसि=सदःशब्दस्य सभा-वाचकत्वेऽपि लक्षणया यौगिकत्वाऽनुसरणेन वा गृहवाचकत्वमवसेयम् ॥

भाषाऽर्थः—दण्डकारण्यमें रहने वाले खर-दूषण आदियोंके समूह मारे गये, लङ्काके लड़ाके जीते गये और वृक्ष उन्मूलित किये गये एवम् घर जलाये गये । इस विषयमें बन्धुको जो करना उचित है वह रावणके विषयमें कर लो ॥ ५ ॥

चिकीर्षिते पूर्वतरं स तस्मिन् क्षेमंकरेऽर्थे मुहुरीर्यमाणः ।
मात्राऽतिमात्रं शुभयैव बुद्ध्या चिरं सुधीरभ्यधिकं समाधात् ॥ ६ ॥

अन्वयः—पूर्वतरं चिकीर्षिते क्षेमङ्करे तस्मिन् अर्थे मात्रा शुभया बुद्ध्या एव अतिमात्रं मुहुः ईर्यमाणः सुधीः सः चिरम् अभ्यधिकं समाधात् ॥

व्याख्या—पूर्वतरं = पूर्वमेव, चिकीर्षिते = कर्तुमिष्टे, क्षेमङ्करे = कल्याणकारके, तस्मिन् = सीताप्रत्यर्पणलक्षणे, अर्थे =प्रयोजने, मात्रा जनन्या नैकष्येत्यर्थः । शुभया = कल्याण्या, बुद्ध्या एव = मत्या एव, अतिमात्रम् = अत्यर्थं, मुहुः = पुनः पुनः, ईर्यमाणः=प्रेर्यमाणः, सुधीः = विद्वान् , सः = विभीषणः, चिरं = बहुकालं यावत् , अभ्यधिकं=साऽतिशयं, समाधात्=चिन्तितवान् , इदमतिन्याय्यमिति शेषः ॥

व्युत्पत्तिः—क्षेमङ्करे = क्षेमं करोतीति क्षेमङ्करस्तस्मिन् , 'क्षेमप्रियमद्रेऽण् च'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति चात्खच्। खित्वान्मुम्। समाधात्=संपूर्वकात् 'डुधाञ् धारणपोषणयोः' इति धातोर्लुङ् 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक् 'अवधानं समाधानं प्रणिधानं तथैव च' इत्यमरः।

भाषाऽर्थः—पहले ही करने को अभीष्ट, कल्याण कारक उस विषय (सीताजीको लौटाने) में शुभ बुद्धिसे बराबर माताके प्रेरणा करने पर विद्वान् विभीषणजीने बहुत समय तक अतिशय विचार किया ॥ ६ ॥

इयता प्रबन्धेनोदात्ताऽर्थत्वमुक्तम्। इत उत्तरं रावणविभीषणादीनां कविनिबद्धवक्तॄणां वचनप्रबन्धेषु चित्राद्भुताऽर्थत्वं द्रष्टव्यम्। अतिशीलता शब्दानां कुशलता चेत्येतदुभयं मन्त्रनिर्णयाख्यायां द्रष्टव्यम्।

दौवारिकाऽभ्याहतशक्रदूतं सोपायनोपस्थितलोकपालम्।
साऽऽशङ्कभीष्माऽऽप्रविशन्निशाटं द्वारं ययौ रावणमन्दिरस्य ॥ ७ ॥

अन्वयः—स दौवारिकाऽभ्याहतशक्रदूतं सोपायनोपस्थितलोकपालं साऽऽशङ्कभीष्माऽऽप्रविशन्निशाटं रावणमन्दिरस्य द्वारं ययौ

व्याख्या—(सः=विभीषणः) दौवारिकाऽभ्याहतशक्रदूतं = द्वारपालताडितेन्द्रसन्देशहरं, सोपायनोपस्थितलोकपालं=सोपहारोपगतलोकपालं, साऽऽशङ्कभीष्माऽऽप्रविशन्निशाटं=सभयभीषणप्रत्ययितप्रविशद्राक्षसं, रावणमन्दिरस्य = रावणप्रासादस्य, द्वारं = प्रतीहारं, ययौ = जगाम ॥

व्युत्पत्तिः—दौवारिकाऽभ्याहतशक्रदूतं=द्वारे नियुक्ता दौवारिकाः, 'तत्र नियुक्त' इति ठक् 'द्वारादीनां च' इत्यैच्। दौवारिकैः अभ्याहताः शक्रदूता यस्मिंस्तत्। सोपायनोपस्थितलोकपालं=उपायनैः सहितः सोपायनाः, 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः। सोपायना उपस्थिता लोकपाला यस्मिंस्तत्। साऽऽशङ्कभीष्माऽऽप्रविशन्निशाटं = साऽऽशङ्का भीष्मा आप्ता विशन्तो निशाटा यस्मिंस्तत्। इन्द्रवज्रा वृत्तम् ॥

भाषाऽर्थः—विभीषणजी जहांपर द्वारपालोंने इन्द्रदूतोंको ताडित किया है, उपहारों (सौगातों) के साथ उपस्थित लोकपालोंसे युक्त आशङ्कावाले भयङ्कर, विश्वस्त प्रवेश करने वाले राक्षसोंसे युक्त रावणप्रासादके द्वारपर गये ॥ ७ ॥

विशेषकम् ८–१०।

दूरात् प्रतीहारनतः स वार्तां पृच्छन्ननावेदितसंप्रविष्टः।
सगौरवं दत्तपथो निशाटैरैक्षिष्ट शैलाऽग्रमिवेन्द्रशत्रुम् ॥ ८ ॥

अन्वयः—दूरात् प्रतीहारनतो वार्तां पृच्छन् अनावेदितसंप्रविष्टः निशाटैः सगौरवं दत्तपथः स शैलाऽग्रम् इव इन्द्रशत्रुम् ऐक्षिष्ट ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—दूरात्=विप्रकृष्टदेशात्, प्रतीहारनतः, द्वारपालनमस्कृतः, वार्ता = प्रवृत्ति, पृच्छन् = अनुयुञ्जन्, 'कुशली महाराजः ?' इत्यादिवार्ता पृच्छन्नित्यर्थः। अनावेदितसंप्रविष्टः = आवेदनं विना कृतप्रवेशः, निशाटैः = राक्षसैः, सगौरवं = सबहुमानं, दत्तपथः = वितीर्णमार्गः, सः = विभीषणः, शैलाऽग्रम् इव = पर्वतशिखरम् इव, उच्चसिंहासनाऽधिष्ठितत्वादिति भावः। एतादृशम् इन्द्रशत्रुं=रावणं स्वाऽग्रजम्, ऐक्षिष्ट= दृष्टवान् ॥

व्युत्पत्तिः—प्रतीहारनतः = प्रतिह्रियतेऽनेनेति प्रतीहारः, 'अकर्तरि च कारके संज्ञायाम्' इति घञ् 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घत्वम्। 'द्वारि द्वाःस्थे प्रतीहारः' इत्यमरः। प्रतीहारेण नतः। अनावेदितसंप्रविष्टः = अनावेदित एव संप्रविष्टः। दत्तपथः = दत्तः पन्था यस्य सः, 'ऋक्पूरब्धूः पथामानक्षे' इति अप्रत्ययः। ऐक्षिष्ट ईक्षधातोर्लुङ् उपमाऽलङ्कारः ॥

भाषाऽर्थः—दूरसे द्वारपालसे नमस्कृत, वार्ता (खबर) पूछते हुए, विन आवेदनके ही प्रविष्ट कराये गये और राक्षसों से मार्ग दिये गये विभीषणजीने पर्वत के शिखरके सदृश रावणको देखा ॥ ८ ॥

कृशानुवर्ष्मण्यधिरूढमुच्चैः सिंहासने संक्षयमेघभीमम्।
निसर्गतीक्ष्णं नयनस्फुलिङ्गं युगान्तवह्नेरिव धूमराशिम् ॥ ९ ॥

अन्वयः—कृशानुवर्ष्मणि उच्चैः सिंहासने अधिरूढं संक्षयमेघभीमं निसर्गतीक्ष्णं नयनस्फुलिङ्गं युगान्तवह्नेः धूमराशिम् इव (इन्द्रशत्रुम् ऐक्षिष्ट)॥

व्याख्या—कृशानुवर्ष्मणि = अग्न्याकारे, उच्चैः = उन्नते, सिंहासः = सिंहाकारसौवर्णासने, अधिरूढम् = उपविष्टं, संक्षयमेवभीमं = प्रलयकालभवघ भयङ्करं, निसर्गतीक्ष्णं=स्वभावरौद्रं, नयनस्फुलिङ्गं = नेत्राग्निकणम्, अत एव—युगाऽन्तवह्नेः = प्रलयकालाऽग्नेः, धूमराशिम् इव = धूमपुञ्जम् इव, इन्द्रशत्रुम् ऐक्षिष्टेति पूर्वश्लोकस्थपदाभ्यां सम्बन्धः।

व्युत्पत्तिः—कृशानुवर्ष्मणि = कृशानोरिव वर्ष्म यस्य तत् कृशानुवर्ष्म तस्मिन्। 'वर्ष्म देहे प्रमाणे च सुन्दराऽऽकारयोरपि।' इति विश्वः। संक्षयमेघभीमं=संक्षयमेघ इव भीमः संक्षयमेघभीमस्तम्। नयनस्फुलिङ्गं=नयनानि स्फुलिङ्गा इव यस्य स नयनस्फुलिङ्गस्तम्। अत्र वह्निसिंहासनयोर्धूमराशिरावणयोश्च उपमानोपमेयभावादुपमाऽलङ्कारः ॥

भाषाऽर्थः—विभीषणजीने अग्नितुल्य उज्ज्वल सिंहासनमें आरूढ, प्रलय कालके मेघके सदृश भयङ्कर, स्वभावसे तीक्ष्ण, अग्निकणोंके सदृश नेत्रों से युक्त अत एव प्रलयकालके अग्नि की धूमराशिके तुल्य रावणको देखा ॥ ९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रीत्याऽपि दत्तेक्षणसन्निपातं भयं भुजङ्गाऽधिपवद् दधानम् ।
तमःसमूहाऽऽकृतिमप्यशेषानूर्जा जयन्तं प्रथितप्रकाशान् ॥ १० ॥

अन्वयः—प्रीत्या दत्तेक्षणसन्निपातम् अपि भुजङ्गाऽधिपवत् भयं दधानं तमः-समूहाऽऽकृतिम् अपि ऊर्जा अशेषान् प्रथितप्रकाशान् जयन्तम् (इन्द्रशत्रुम् ऐक्षिष्ट)।

व्याख्याः—(सः) प्रीत्या = स्नेहेन दत्तेक्षणसन्निपातम् अपि = समर्पितनेत्र-समूहम् अपि, भुजङ्गाऽधिपवत् = शेषवत् , भयं = भीतिं = दधानं कुर्वन्तं, तमः-समूहाऽऽकृतिम् अपि = तिमिरनिवहाकारम् अपि, ऊर्जा = बलेन, अशेषान् = समस्तान् , प्रथितप्रकाशान्=विस्तारिततेजसः, सूर्यादीनिति भावः । जयन्तम्=अभिभवन्तम् , इन्द्रशत्रुमैक्षिष्ट ॥

व्युत्पत्तिः—दत्तेक्षणसन्निपात = दत्त ईक्षणानां सन्निपातो येन सः, तम् । भुजङ्गाधिपवत् = भुजङ्गाधिपेन तुल्यं, वतिप्रत्ययः । तमःसमूहाऽऽकृतिं = तमःसमूहस्येवाऽऽकृतिर्यस्य, तम् । ऊर्जा = 'ऊर्ज बलप्राणनयोः' इति धातोः 'भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्' इति क्विप् । अत्रोपमाद्वयस्य विरोधाभासस्य च मिथोऽनपेक्षया स्थितेः संसृष्टिः ॥

भाषाऽर्थः—स्नेहपूर्वक नेत्रसमूहोंसे देखने पर भी शेषनागकी तरह भयको उत्पन्न करने वाले, अन्धकारसमूहके सदृश आकारवाले होकर भी बलसे समस्त प्रख्यात प्रकाशवाले सूर्य आदियों को जीतने वाले रावणको विभीषणजीने देखा ॥

तं रत्नदायं जितमृत्युलोका रात्रिंचराः कान्तिभृतोऽन्वसर्पन् ।
प्रमुक्तमुक्ताफलमम्बुवाहं संजाततृष्णा इव देवमुख्याः ॥ ११ ॥

अन्वयः—जितमृत्युलोकाः, कान्तिभृतः, सञ्जाततृष्णाः, रात्रिञ्चराः, रत्नदायं तम् अन्वसर्पन् , देवमुख्याः, प्रमुक्तमुक्ताफलम् अम्बुवाहमिव ।

व्याख्या—जितमृत्युलोकाः=जितो मृत्युलोको यैस्ते, वशीकृतयमलोका इत्यर्थः । कान्तिभृतः = दीप्तिमन्तः, सञ्जाततृष्णाः = सञ्जाता तृष्णा येषान्ते, तृष्णाकुला इत्यर्थः । रात्रिञ्चराः = राक्षसाः रत्नदायं = रत्नं दास्यतीति रत्नदायं, 'कर्मणि च' इत्यण् , 'आतो युक' इति युक् । रत्नदातारमिति यावत् । तम् = विभीषणम् , अन्वसर्पन् =अन्वगच्छन् , देवमुख्याः = देवप्रधानाः, प्रमुक्तमुक्ताफलम् = प्रमुक्तानि मुक्ताफलानि येन तम्, त्यक्तमौक्तिकनामकमणिविशेषम् । अम्बुवाहमिव=यथा देवाः तृष्णाकुलाः मेघमुपगच्छन्ति, तथैव ते राक्षसाः विभीषणमुपासर्पन्निति भावः ।

भाषाऽर्थः—जैसे अमरताके कारण मृत्युलोकको जीतने वाले तेजस्वी देवगण तृष्णासे मोती बर्षाने वाले बादलके पास जाते हैं, उसी तरह यमलोकको वशमें

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

किये हुए राक्षस-गण भी तृष्णाकुल होकर रत्नों को देने वाले विभीषण के पास गये ॥ ११ ॥

स किङ्करैः कल्पितमिङ्गितज्ञैः सम्बाधकं पूर्वसमागतानाम् ।
सिंहासनोपाश्रितचारुबाहुरध्यास्त पीठं विहितप्रणामः ॥ १२ ॥

अन्वयः—विहितप्रणामः सः इङ्गितज्ञैः किङ्करैः कल्पितं पूर्वसमागतानां सम्बाधकं पीठं सिंहासनोपाश्रितचारुबाहुः (सन्) अध्यास्त ॥

व्याख्या—विहितप्रणामः = कृतनमस्कारः, सः = विभीषणः, इङ्गितज्ञैः = रावणाऽभिप्रायवेदिभिः, किङ्करैः = भृत्यैः, कल्पितम् = उपनीतं, पूर्वसमागतानां = प्रथमसमायातानां जनानां, सम्बाधकं = सङ्कोचकारकं, पीठम् = आसनं, सिंहाऽऽसनो-पाश्रितचारुबाहुः = रावणसिंहासनस्थितसुन्दरभुजः सन् , अध्यास्त = अधिरूढः ॥

व्युत्पत्तिः—इङ्गितज्ञैः = इङ्गितं जानन्तीति इङ्गितज्ञास्तैः 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । सम्बाधकं = सम्बाधत इति, 'ण्वुल्तृचौ' इति ण्वुल् । पीठम् = 'अधिशीङ्स्थाऽऽसां कर्म' इति कर्मत्वम् । सिंहाऽऽसनोपाश्रितचारुबाहुः = सिंहाऽऽसन उपाश्रितः चारुः बाहुः यस्य सः । अध्यास्त = अधिपूर्वकात् 'आस उपवेशने' इति धातोर्लङ् ॥

भाषाऽर्थः—रावणको नमस्कार करने वाले विभीषणजी रावण के अभिप्राय को जानने वाले नौकरों से लाये गये और पहले आये हुए जनों को सङ्कोच करने वाले सिंहासन पर सुन्दर बाहुको रखते हुए आसन पर बैठ गये ॥ १२ ॥

ततो दशाऽऽस्यः क्षुभिताऽहिकल्पं दीप्राऽङ्गुलीयोपलमूढरत्नम् ।
अनेकचञ्चन्नखकान्तिजिह्मं प्रसार्य पाणिं समितिं बभाषे ॥१३॥

अन्वयः—ततो दशाऽऽस्यः क्षुभिताऽहिकल्पं दीप्राऽङ्गुलीयोपलम् ऊढरत्नम् अनेकचञ्चन्नखकान्तिजिह्मं पाणिं प्रसार्य समितिं बभाषे ॥

व्याख्या—ततः = विभीषणोपवेशनाऽनन्तरं, दशाऽऽस्यः = रावणः, क्षुभिताऽहि-कल्पं = क्षुब्धसर्पसदृशं, क्रुद्धविस्तृतफणसर्पतुल्यमित्यर्थः । दीप्राऽङ्गुलीयोपलम् = दीपनशीलानामिकारत्नम् , अत एव—ऊढरत्नम् = धृतमणिम् , अनेन सर्पसादृश्यं द्योतितम् । अनेकचञ्चन्नखकान्तिजिह्मम् = बहुचलन्नखरच्छविरसनं, पाणिं = करं, प्रसार्य = प्रसारितं कृत्वा, समितिं = सभां, लक्षणया—सभास्थान् जनान्, बभाषे = उवाच ॥

व्युत्पत्तिः—क्षुभिताऽहिकल्पम् = ईषदसमाप्तः क्षुभिताऽहिः = क्षुभिताऽहिकल्प-स्तम्, 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति कल्पप्प्रत्ययः । दीप्राऽङ्गुलीयोपलं=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दीपनशीलो दीप्रः, 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' इति रप्रत्ययः। अङ्गुलौ भवमङ्गुलीयं, 'जिह्वामूलाऽङ्गुलेश्छः' इति छप्रत्ययः। अङ्गुलीयस्योपलः अङ्गुलीयोपलः दीप्रः स यस्मिन्, तम्। अनेकचञ्चन्नखकान्तिजिह्मम्=नखकान्तयो जिह्वा इव इति नखकान्तिजिह्वाः, अनेकाः चञ्चन्त्यो नखकान्तिजिह्वा यस्य स, तम्।

भाषाऽर्थः—विभीषण के बैठने के अनन्तर रावणने क्रुद्ध अत एव फण विस्तृत करने वाले सर्पके सदृश दीपनशील अंगूठीके रत्न वाले, धारण किये गये रत्नोंसे युक्त, अनेक चमकने वाली नखकान्तिरूप जिह्वासे सम्पन्न (सर्प सदृश) हाथको फैलाकर सभास्थ पुरुषोंको कहा ॥ १३ ॥

शक्तैः सुहृद्भिः परिदृष्टकार्यैराम्नातिभिर्नीतिषु बुद्धिमद्भिः।
युष्मद्विधैः सार्धमुपायविद्भिः सिध्यन्ति कार्याणि सुमन्त्रितानि ॥ १४ ॥

अन्वयः—'शक्तैः सुहृद्भिः परिदृष्टकार्यैः नीतिषु आम्नातिभिः बुद्धिमद्भिः उपायविद्भिः युष्मद्विधैः सार्धं सुमन्त्रितानि कार्याणि सिध्यन्ति ॥

व्याख्या—शक्तैः = समर्थैः, न मन्त्रमात्रकुशलैरिति भावः। सुहृद्भिः = मित्रैः, परिदृष्टकार्यैः = अवलोकितकृत्यैः, यतः अपरिदृष्टकार्या विद्वांसोऽपि मुह्यन्ति इति तात्पर्यम्। नीतिषु = नयेषु, आम्नातिभिः = अभ्यस्तैः, न केवलं दृष्टव्यवहारैः, अभ्यस्तनीतिशास्त्रैरपीत्यभिप्रायः। बुद्धिमद्भिः=ज्ञानवद्भिः, न केवलं शुकादिवदधीतिभिः, बुद्धिबलैरूहापोहकुशलैरित्याकूतम्। उपायविद्भिः=सामाद्युपायवेदिभिः, युष्मद्विधैः= युष्मत्सदृशैः, सार्धं = सह, सुमन्त्रितानि=कृतसुमन्त्राणि, कार्याणि=कृत्यानि, सिध्यन्ति = सिद्धिं प्राप्नुवन्ति ॥

व्युत्पत्तिः—परिदृष्टकार्यैः = परिदृष्टं कार्यं यैस्तैः। नीतिषु = 'आम्नातिभिः' इति पदेन योगे 'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति कर्मणि सप्तमी। आम्नातिभिः = आम्नातमेभिरिति आम्नातिनस्तैः 'इष्टादिभ्यश्च' इतीनिप्रत्ययः। युष्मद्विधैः = युष्माकमिव विधा येषां ते युष्मद्विधास्तैः, व्यधिकरणबहुव्रीहिः। 'सार्धं' पदेन योगे 'सह युक्तेऽप्रधाने' इति तृतीया। अत्र परिपकराऽलङ्कारः, सोदाहरणं तल्लक्षणं यथा—'अलङ्कारः परिकरः साऽभिप्राये विशेषणे। सुधांऽशुकलितोत्तंसस्तापं हरतु वः शिवः॥' इति। इन्द्रवज्रा वृत्तम् ॥

भाषाऽर्थः—समर्थ, मित्र, कार्यों को देखने वाले, नीतियों में अभ्यस्त, बुद्धिमान्, साम, दान आदि उपायोंको जानने वाले तुम्हारे ऐसे लोगोंके साथ सुमन्त्रित वाले कार्य सफल होते हैं ॥ १४ ॥

उपेक्षिते वालिखराऽऽदिनाशे, दग्धे पुरे, ऽक्षे निहते स-भृत्ये,।
सैन्ये द्विषां सागरमुत्तितीर्षावनन्तरं ब्रूत, यदत्र युक्तम् ॥ १५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—वालिखरादिनाशे उपेक्षिते, पुरे दग्धे, सभृत्ये अक्षे निहते द्विषां सैन्ये सागरम् उत्तितीर्षौ अत्र यत् उक्तम् अनन्तरं ब्रूत ॥

व्याख्या—वालिखरादिनाशे = वालिखरादिवधे, उपेक्षिते = कृतोपेक्षे सति, पुरे = लङ्कानगरे, दग्धे = भस्मीकृते, सभृत्ये = साऽनुचरे, अक्षे = अक्षकुमारे, निहते = निषूदिते, एवं च—द्विषां = शत्रूणां, सैन्ये = सैनिके, सागरं = समुद्रम् , उत्तितीर्षौ = उत्तरीतुम् इच्छौ सति, अत्र=अस्मिन् विषये, यत् , युक्तम्=उचितम् , अनन्तरम् = अनन्तरकृत्यं ब्रूत = कथयत ।

व्युत्पत्तिः—सभृत्ये = भृत्यैः सहितः सभृत्यस्तस्मिन् । सैन्ये = सेना एव सैन्यं, तस्मिन् । 'चतुर्वर्णादीनां स्वार्थ उपसंख्यानम्' इति स्वाऽर्थे ष्यञ् । उत्तितीर्षौ = उत्पूर्वकात् 'तॄ प्लवनसन्तरणयोः' इति सन्नन्ताद्धातोः 'सनाशंसभिक्ष उः' इति उप्रत्ययः । 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' इति पुंवद्भावात्पक्षे 'इकोऽचि विभक्तौ' इति नुम् न ।

भाषाऽर्थः—वाली, खर आदियों का नाश उपेक्षित होने पर, शहरके जलाये जाने पर, नौकरोंके साथ अक्षयकुमारके मारे जाने पर और शत्रु सेनाके समुद्रपार जाने की इच्छा करने पर इस विषय में जो उचित है अनन्तर कार्य को बतलाओ ॥ १५ ॥

भुजांऽसवक्षःस्थलकार्मुकासीन् गदाश्च शूलानि च यातुधानाः ।
परामृशन्तः प्रथिताऽभिमानाः प्रोचुः प्रहस्तप्रमुखा दशाऽऽस्यम् ॥ १६ ॥

अन्वयः—भुजांऽसवक्षःस्थलकार्मुकाऽसीन् गदाः शूलानि च परामृशन्तः प्रथिताऽभिमानाः प्रहस्तप्रमुखा यातुधाना दशाऽऽस्यं प्रोचुः ।

व्याख्या—भुजांऽसवक्षःस्थलकार्मुकाऽसीन् = बाहुस्कन्धोरःस्थलचापखड्गान् , गदाः = आयुधविशेषान् , शूलानि च = आयुधविशेषांश्च, परामृशन्तः = स्पृशन्तः, प्रथिताऽभिमानाः = प्रख्याताऽहङ्काराः, प्रहस्तप्रमुखाः = प्रहस्तप्रधानाः, यातुधानाः = राक्षसाः, दशाऽऽस्यं = रावणं, प्रोचुः = प्रोक्तवन्तः ॥

व्युत्पत्तिः—भुजांऽसवक्षःस्थलकार्मुकाऽसीन् = भुजश्च अंसश्च वक्षःस्थलं च कार्मुकं च असिश्चेति भुजांऽसवक्षःस्थलकार्मुकासयस्तान् । प्रथिताऽभिमानाः = प्रथितोऽभिमानो येषां ते । प्रहस्तप्रमुखाः=प्रहस्तः तन्नामा मन्त्री प्रमुखो येषां ते ॥

भाषाऽर्थः—बाहु, स्कन्ध, छाती, धनु, खड्ग, गदा और शूलों का स्पर्श करते हुए प्रख्यात अभिमान वाले प्रहस्त आदि राक्षसोंने रावणको कहा ॥ १६ ॥

अखण्ड्यमानं परिखण्ड्य शक्रं त्वं पण्डितंमन्यमुदीर्णदण्डः ।
नराऽऽभियोगं नृभुजां प्रधान ! मन्त्रोन्मुखः किं नयसे गुरुत्वम् ॥ १७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—'हे नृभुजां प्रधान ! उदीर्णदण्डः त्वम् अखण्ड्यमानं पण्डितम्मन्यं शक्रं परिखण्ड्य मन्त्रोन्मुखः (सन्) नराभियोगं गुरुत्वं किं नयसे ॥

व्याख्या—हे नृभुजां प्रधान = हे राक्षसश्रेष्ठ !, उदीर्णदण्डः=उद्रिक्तबलः, त्वम्, अखण्ड्यमानम्=अखण्डनीयाऽहङ्कारं, पण्डितंमन्यं=पण्डितमात्मानं मन्यमानं, शक्रम्=इन्द्रं, परिखण्ड्य = जित्वा, मन्त्रोन्मुखः = मन्त्रप्रवणः सन्, 'सिध्यन्ति कार्याणि सुमन्त्रितानि ' इत्युक्त्येति भावः । नराभियोगं = मनुष्ययुद्धं, गुरुत्वं = गौरवं, किं=किमर्थं, नयसे=प्रापयसि ॥

व्युत्पत्तिः—नृभुजां = नॄन् भुञ्जन्तीति नृभुजस्तेषाम् । उदीर्णदण्डः=उदीर्णो दण्डो यस्य सः, अखण्ड्यमानम् = अखण्ड्यो मानो यस्य सः । पण्डितम्मन्यं = 'आत्ममाने खश्च' इति खश् खित्वात् 'अरुर्द्विषदजन्तस्य मुम्' इति मुम् । नयसे = क्रियाफलस्य कर्त्रभिप्रायत्वादात्मनेपदम् ॥

भाषाऽर्थः—हे राक्षसश्रेष्ठ ! बढ़े हुए बलवाले आप, अखण्डनीय अभिमानसे युक्त अपने को पण्डित मानने वाले इन्द्रको भी जीत कर (अभी) मन्त्रमें तत्पर होते हुए मनुष्यके साथ होने वाले युद्धको गुरुत्वमें क्यों पहुँचाते हैं ? ॥ १७ ॥

निर्यत्स्फुलिङ्गाऽऽकुलधूमराशिं किं ब्रूहि भूमौ पिनषाम भानुम् ।
आदन्तनिष्पीडितपीतमिन्दुं ष्ठीवाम शुष्केक्षुलताऽस्थिकल्पम् ॥ १८ ॥

अन्वयः—निर्यत्स्फुलिङ्गाऽऽकुलधूमराशिं भानुं किं भूमौ पिनषाम, आदन्तनिष्पीडितपीतं शुष्केक्षुलताऽस्थिकल्पम् इन्दुं किं ष्ठीवाम, ब्रूहि ॥

व्याख्या—निर्यत्स्फुलिङ्गाऽऽकुलधूमराशिं = निर्गच्छदग्निकणाऽऽकुलधूमसमूहं, भानुं=सूर्यं, किं, भूमौ = पृथिव्यां, पिनषाम=चूर्णयाम, आः = कोपद्योतकमव्ययमेतत्, दन्तनिष्पीडितपीतं = दशनबाधितम्, अत एव शुष्केक्षुलताऽस्थिकल्पं= नीरसरसालव्रततिदृढभागसदृशम् इन्दुं = चन्द्रमसं, किं, ष्ठीवाम=निरस्याम, ब्रूहि= कथय, वाक्याऽर्थः कर्म ॥

व्युत्पत्तिः—निर्यत्स्फुलिङ्गाऽऽकुलधूमराशिं=निर्यन् यः स्फुलिङ्गस्तेन आकुलो धूमराशिर्यस्य, तम् । पिनषाम='पिष्लृ संचूर्णने' इति धातोः 'लोट् च' इति प्रश्ने लोट् । 'रुधादिभ्यः श्नम्' इति श्नम् । आः 'आस्तु स्यात्कोपपीडयोः' इत्यमरः । दन्तनिष्पीडितपीतं=प्राक् दन्तनिष्पीडितः पश्चात्पीतो दन्तनिष्पीडितपीतस्तम् । 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाऽधिकरणेन' इति पूर्वकालसमासः । शुष्केक्षुलताऽस्थिजल्पं = शुष्का चाऽसौ इक्षुलता, 'रसाल इक्षुः' इत्यमरः । शुष्केक्षुलताया अस्थि शुष्केक्षुलताऽस्थि, ईषदसमाप्तं तत् । कल्पप्प्रत्ययः । ष्ठीवाम=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'ष्ठिवु निरसने' इति धातोर्लोट् 'ष्ठिवुक्लमुचमां शिति' इति दीर्घत्वम् । अत्रोपमाऽलङ्कारः । इन्द्रवज्रा वृत्तम् ।

भाषाऽर्थः—निकलते हुए अग्निकणों से आकुल रश्मिराशि से युक्त सूर्यको क्या पृथ्वीमें पीस दें ? ओः ! पहले दांतों से पीडित पीछे पीये गये अत एव सूखी हुई इक्षुलताके अस्थिके सदृश चन्द्रको क्या थूक दें बतलाइए ॥ १८ ॥

सराघवैः किं बत वानरैस्तैर्यैः प्रातराशोऽपि न कस्यचिन्नः ।
सस्थाणुकैलासधराऽभिधत्स्व, किं द्यौरधोऽस्तु क्षितिरन्तरिक्षे ॥ १९ ॥

अन्वयः—हे सस्थाणुकैलासधर ! तैः सराघवैः वानरैः किं ? बत ! यैः नः कस्यचित् प्रातराशोऽपि न । किं द्यौः अधः अस्तु ? क्षितिः किम् अन्तरिक्षे अस्तु ? अभिधत्स्व ॥

व्याख्या—हे सस्थाणुकैलासधर = हे रुद्रसहितकैलासधारक ! तैः = पूर्वोक्तैः, सराघवैः=राघवसहितैः वानरैः = कपिभिः, किं प्रयोजनं, बत=खेदोऽस्ति । यैः= सराघवैर्वानरैः, नः = अस्माकं, कस्यचित्=एकस्य, प्रातराशोऽपि = प्रभातभोजनमपि, न=न भवति, किं, द्यौः=आकाशम्, अधः=निम्नस्थाने, अस्तु=भवतु, क्षितिः= पृथिवी, अन्तरिक्षे = उपरिष्टात्, अस्तु=भवतु, अभिधत्स्व=ब्रूहि, रामादिवधरूपे तुच्छकार्ये वयं न प्रेरणीया इति भावः ॥

व्युत्पत्तिः—सस्थाणुकैलासधर=स्थाणुना सहितः सस्थाणुः, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः, 'वोपसर्जनस्य' इति सहस्य सभावः । धारयतीति धरः, पचाद्यच् । सस्थाणुश्चाऽसौ कैलासस्तस्य धरः, तत्सम्बुद्धौ । कर्मणः शेषत्वविवक्षा । अभिधत्स्व = अभिपूर्वकात् 'डुधाञ् धारणपोषणयोः' इति धातोर्लोट् । 'ब्रूतेऽभिधत्ते गदति व्याहरत्यपि जल्पति ।' इति आख्यातचन्द्रिका ॥

भाषाऽर्थः—महादेवके साथ कैलास पर्वतको धारण करने वाले हे महाराज ! राम और लक्ष्मणके साथ उन वानरोंसे क्या प्रयोजन है ? जिनसे किसी एक राक्षसका भी प्रातर्भोजन (जलपान) भी सम्पन्न नहीं होता है । क्या आकाश नीचे और पृथ्वी ऊपर हो जाय ? बतलाइए ॥ १९ ॥

युष्मत्प्रमादेनैव पुरदाहोऽपि, न शत्रुसामर्थ्येनेति सूचयति—

चापल्ययुक्तस्य हरेः कृशानुः समेधितो बालधिभाक् त्वदीयैः ।
शस्त्रेण वध्यस्य गलन्नधाक्षीद् राजन् ! प्रमादेन निजेन लङ्काम् ॥ २० ॥

अन्वयः—हे राजन् ! निजेन प्रमादेन शस्त्रेण वध्यस्य चापल्ययुक्तस्य हरेः बालधिभाक् कृशानुः त्वदीयैः समेधितः गलन् लङ्काम् अधाक्षीत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे राजन्=हे भूपाल !, निजेन=स्वकीयेन, प्रमादेन=अनवधानत्वेन, शस्त्रेण = आयुधेन, वध्यस्य = वधार्हस्य, चापलययुक्तस्य = चाञ्चल्योपेतस्य, हरेः = वानरस्य, हनूमत इत्यर्थः । बालधिभाक् = पुच्छाऽग्रसमाश्रितः, कृशानुः=अग्निः, त्वदीयैः,=भवदीयैः, भृत्यैरिति शेषः । समेधितः=संवर्द्धितः, घृततैलादिभिरिति शेषः । गलन्=पुच्छाग्रात्पतन्, गृहाद्गृहान्तरगमनेनेति शेषः । लंकां=लंकानगरीम्, अधाक्षीत्=दग्धवान् । वधाऽर्हस्य शत्रुदूतस्य वधाऽनाचरणे नैवेदृशो व्यतिकरः संवृत्त इति भावः ॥

व्युत्पत्तिः—वध्यस्य=वधमर्हतीति वध्यस्तस्य, 'दण्डादिभ्य' इति यः । 'वध्यः शीर्षच्छेद्य इमौ समौ' इत्यमरः । चापलययुक्तस्य=चपलस्य भावः कर्म वा चापल्यं, 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । पक्षे 'हायनाऽन्तयुवादिभ्योऽण्' इत्यणि 'चापलम्' इत्यपि । चापल्येन युक्तस्य । बालधिभाक्=बालधिं भजतीति, 'भजो ण्विः' इति ण्विप्रत्ययः । अधाक्षीत्='दह भस्मीकरणे' इति धातोर्लुङ् । 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावेन धत्वम् । 'वदव्रजहलन्तस्याऽचः' इति वृद्धिः । 'दादेर्धातोर्घः' इति हस्य घत्वम् ॥

भाषाऽर्थः—हे महाराज ! अपने प्रमादसे शस्त्रसे मारनेके लायक, चाञ्चल्ययुक्त बानरके पुच्छाग्रमें आश्रित आपके भृत्योंसे घृत, तैल, आदि पदार्थोंसे बढ़ाया जाकर पूंछके अग्र भागसे गिरते हुए अग्नि ने लङ्काको जला दिया ॥ २० ॥

अथाऽञ्चितोरस्कमुदीर्णदृष्टिः कृत्वा विवक्षाप्रवणं शरीरम् ।
विवृत्तपाणिर्विहितोत्तराऽर्थं विभीषणोऽभाषत यातुधानान् ॥ २१ ॥

अन्वयः—अथ अञ्चितोरस्कं शरीरं विवक्षाप्रवणं कृत्वा उदीर्णदृष्टिः विवृत्तपाणिः विभीषणः यातुधानान् विहितोत्तराऽर्थम् अभाषत ॥

व्याख्या—अथ = प्रहस्तवचनाऽनन्तरम्, अञ्चितोरस्कं=पूजितवक्षःस्थलं, हाराऽलङ्कृतत्वादिति शेषः । शरीरं=देहं, विवक्षाप्रवणं=वचनेच्छाऽभिमुखं, कृत्वा=विधाय, उदीर्णदृष्टिः=प्रहस्ताऽभिमुखनयनः, विवृत्तपाणिः=प्रहस्ताऽभिमुखदक्षिणहस्तः, विभीषणः=रावणाऽनुजः, यातुधानान्=राक्षसान्, विहितोत्तराऽर्थं=प्रतिपादितश्रेष्ठाऽभिधेयं यथा स्यात्तथा, अभाषत=भाषितवान् ॥

व्युत्पत्तिः—अञ्चितोरस्कम्=अञ्चितम् उरो यस्मिंस्तत्, 'उरःप्रभृतिभ्यः कप्' इति समासाऽन्तः कप्प्रत्ययः । अत्र अन्चुधातोः पूजाऽर्थत्वात् 'अञ्चेः पूजायाम्' इतीट् 'नाऽञ्चेः पूजायाम्' इति नलोपप्रतिषेधः । विवक्षाप्रवणं=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वक्तुमिच्छा विवक्षा, सम्नन्तात् 'वच परिभाषणे' इति धातोः 'अ प्रत्ययात्' इति अप्रत्ययः, टाप् । विवक्षायां प्रवणम् । विवृत्तपाणिः = विवृत्तः पाणिर्येन सः । विहितोत्तराऽर्थं = विहितः उत्तरः अर्थो यस्मिन्कर्मणि तद्यथा स्यात् तथा । 'उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्यात्' इति 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु ।' इत्यमरः ॥

भाषाऽर्थः—प्रहस्त के भाषणके अनन्तर हारसे पूजित वक्षःस्थलवाले शरीर को बोलनेकी इच्छासे सम्मुख कर नेत्रोंको और दक्षिण हस्तको प्रहस्तके सम्मुख रख कर विभीषणजी ने राक्षसोंको जिस प्रकारसे श्रेष्ठ प्रतिपादन होता है उस प्रकार से कहा ॥ २१ ॥

युद्धाय राज्ञा सुभृतैर्भवद्भिः संभावनायाः सदृशं यदुक्तम् ।
तत् प्राणपण्यैर्वचनीयमेव प्रज्ञा तु मन्त्रेऽधिकृता न शौर्यम् ॥ २२ ॥

अन्वयः—'राज्ञा युद्धाय सुभृतैः भवद्भिः संभावनायाः सदृशं यत् उक्तं, तत् प्राणपण्यैः वचनीयम् एव, तु मन्त्रे प्रज्ञाधिकृता, शौर्यं न ॥

व्याख्या—राज्ञा = भूपालेन, रावणेनेत्यर्थः, युद्धाय = समराय, सुभृतैः = संवर्द्धितैः, भवद्भिः = युष्माभिः, प्रहस्तप्रभृतिभिरिति भावः । संभावनायाः=प्रतिष्ठायाः, सदृशं=तुल्यं, यत्, 'भानुं पिनषाम' इत्यादिकमिति भावः । उक्तं= भाषितं, तत्=भाषणं, प्राणपण्यैः = असुव्यवहार्यैः, राजभृतत्वात्तद्रक्षणाऽर्थमिति शेषः । भवाद्दशैरिति भावः । वचनीयम् एव=परिभाषणीयम् एव, उक्तमर्थं सपरिसंख्यमाक्षिपति-प्रज्ञेति । तु = परन्तु, मन्त्रे=राजकीये कर्तव्याऽर्थनिर्णायके गुह्यवादे, प्रज्ञा = बुद्धिः, अधिकृता=प्रधानत्वेन विहिता, शौर्यं = शूरता, न = न अधिकृतम् , यदि मन्त्रेऽपि शौर्यस्यैव प्राधान्यं, तदा बुद्धिर्निरवकाशा स्यादिति भावः ॥

व्युत्पत्तिः—संभावनायाः = तुल्यार्थकेन सदृशपदेन योगे 'तुल्याऽर्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' इति षष्ठी, पक्षे तृतीया च । प्राणपण्यैः = प्राणा एव पण्या येषां, तैः । वचनीयं=वक्तुं योग्यं, 'तव्यत्तव्याऽनीयरः' इति अनीयर् । मन्त्रे='वेदभेदे गुह्यवादे मन्त्रः' इत्यमरः । अत्र तृतीयचरणे प्रयुक्तस्य 'वचनीयम् एव' इत्यर्थस्य 'प्रज्ञा तु मन्त्रेऽधिकृता' इत्यनेन प्रतिषेधाऽर्थस्य द्योतनात् आक्षेपाऽलङ्कारः, सोदाहरणं तल्लक्षणं यथा—

'आक्षेपस्तु प्रयुक्तस्य प्रतिषेधो विचारणात् ।
चन्द्र ! सन्दर्शयाऽऽत्मानमथवाऽस्ति प्रियामुखम् ॥' इति ।

एवं च मन्त्रे शौर्यस्याधिकरणं निषिध्य प्रज्ञाया नियमनात्परिसंख्याऽलङ्कारस्तल्लक्षणमपि सोदाहरणं यथा—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'परिसंख्या निषिध्यैकमन्यस्मिन्वस्तुयन्त्रणम् ।
स्नेहक्षयः प्रदीपेषु, स्वान्तेषु न नतभ्रुवाम् ॥' इति ।

तथा च द्वयर्मिथोऽनपेक्षया स्थितेः संसृष्टिः । इन्द्रवज्रा वृत्तम् ॥

भावार्थः—महाराजसे युद्धके लिए संवर्द्धित आपलोगोंने अपनी प्रतिष्ठाके अनुरूप जो कहा, वह प्राणोंका व्यवहार करने वाले वीरपुरुषोंको कहना ही चाहिए परन्तु मन्त्रमें बुद्धि प्रधान है, शौर्य नहीं ॥ २२ ॥

अथ 'नराऽभियोगं किं गुरुत्वं नयसे ?' इत्यस्योत्तरं प्रतिपादयति—

यत्रापि यत्नाऽऽहतमन्त्रवृत्तिर्गुरुत्वमायाति नराऽभियोगः ।
वशीकृतेन्द्रस्य कृतोत्तरोऽस्मिन् विध्वंसिताऽशेषपुरो हनूमान् ॥ २३ ॥

अन्वयः—वशीकृतेन्द्रस्य यत्नाऽऽहतमन्त्रवृत्तिः नराऽभियोगः गुरुत्वम् आयाति (इति) यत्र उक्तम्, अस्मिन् विध्वंसिताऽशेषपुरो हनूमान् कृतोत्तरः ॥

व्याख्या—वशीकृतेन्द्रस्य = निर्जितशक्रस्य, यत्नाऽऽहतमन्त्रवृत्तिः = उद्योगसत्कृतमन्त्रवृत्तिः, नराऽभियोगः = मनुष्येण युद्धं, गुरुत्वं = गौरवम्, आयाति=आगच्छति, (इति=एवम्) यत्र, उक्तम्=अभिहितम्, अस्मिन्=अत्राऽर्थे, विध्वंसिताऽशेषपुरः = विनाशितसमस्तनगरीकः, हनूमान्=रामदूतः, कृतोत्तरः = दत्तप्रतिवाक्यः, अस्तीति शेषः । यस्य दूत एतादृशो विक्रान्तः स स्वामी कीदृशः स्यादिति विचारणीयोऽयं विषयं इति भावः ।

व्युत्पत्तिः—वशीकृतेन्द्रस्य = वशीकृत इन्द्रो येन, तस्य । यत्नाऽऽहतमन्त्रवृत्तिः = यत्नेनाऽऽहता मन्त्रवृत्तिर्यस्मिन् सः । विध्वंसिताऽशेषपुरः = विध्वंसिता अशेषा पूर्येन सः, 'ऋक्पूरब्धूःपथामानक्षे' इति समासाऽन्तः अप्रत्ययः । कृतोत्तरः = कृतमुत्तरं येन सः । 'प्रतिवाक्योत्तरे समे' इत्यमरः ॥

भावार्थः—इन्द्रको जीतनेवाले रावणका जिसमें मन्त्रवृत्तिका यत्नसे आदर किया गया है ऐसा मनुष्य युद्ध गौरवको प्राप्त होता है ऐसा जो कहा गया है, इस अर्थमें समस्त लङ्कापुरीको विध्वस्त करनेवाले हनूमानने उत्तर दे दिया है ॥ २३ ॥

अग्निः प्रमादेन लङ्कामधाक्षीदित्यत्रोत्तरमाह—

अग्निः प्रमादेन ददाह लङ्कां वध्यस्य देहे स्वयमेधितश्चेत् ।
विमृश्य तद् देवधियाऽभिधत्त महाऽखबन्धोऽपि यदि प्रमादः ॥ २४ ॥

अन्वयः—वध्यस्य देहे स्वयम् एधितः अग्निः प्रमादेन लङ्कां ददाह (इति) यदि चेत्, महाऽखबन्धोऽपि (तर्हि) प्रमादः, तद् देवधिया विमृश्य अभिधत्त ॥

व्याख्या—वध्यस्य = वधार्हस्य, हनूमत इत्यर्थः, देहे = शरीरे, कक्षया शरीरे-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कदेशे पुच्छाग्रे, स्वयम् = आत्मना, एधितः = दीपितः, अग्निः = अनलः, प्रमादेन = अनवधानत्वेन, लङ्कां = लङ्कापुरीं, ददाह = दग्धवान्, (इति=एवम्) यदि चेत्, ब्रह्मास्त्रबन्धोऽपि = ब्रह्माऽऽयुधबन्धोऽपि, तर्हि, प्रमादः = अनवधानत्वम्, तत् देवधिया=प्रकाशमानबुद्ध्या, सात्त्विकबुद्ध्या इत्यर्थः। विमृश्य=विचार्य, अभिधत्त= ब्रूत, येन हनूमता तादृशं ब्रह्मास्त्रबन्धनं खण्डितं, तस्य किमशक्यं कुतो वा तद्वध इति भावः॥

व्युत्पत्तिः—एधितः = णिजन्तात् 'ञिइन्धी दीप्तौ' इति धातोर्निष्ठायां क्तप्रत्ययः। देवधिया = दीव्यतीति देवी, पचाद्यच्। देवट् इति टित्वात् 'टिड्ढाणञ्'- इत्यादिना ङीप्। देवी चाऽसौ धीर्देवधीस्तया, 'पुंवत्कर्मधारयजातीयदेशीयेषु' इति ईकारस्य भष्, धातोश्च खरि चर्त्वम्॥

भाषाऽर्थः—वधके योग्य हनूमानके शरीरमें सुलगाये हुए अग्निने प्रमादसे लङ्का जला दी है, उसी तरह ब्रह्माऽस्त्रसे बन्धन भी प्रमाद है, सो इसे सात्त्विक बुद्धिसे विचार कर कहो॥ २४॥

पराऽभियोगस्य निरूपणीयत्वं दर्शयति—

जगन्त्यमेयाऽद्भुतभावभाञ्जि जिताऽभिमानाश्च जना विचित्राः।
कार्ये तु यत्नं कुरुत प्रकृष्टं मा नीतिगर्भान् सुधियोऽवमन्ध्वम्॥ २५॥

अन्वयः—जगन्ति अमेयाद्भुतभावभाञ्जि, जनाश्च [illegible]मानाः विचित्राः। कार्ये तु प्रकृष्टं यत्नं कुरुत। नीतिगर्भान् सुधियो मा अवमन्ध्वम्।

व्याख्या—जगन्ति = भुवनानि, अमेयाद्भुतभावभाञ्जि = असंख्यविचित्राऽभिप्राययुक्तानि, जनाः=तत्रत्या लोकाश्च, जिताऽभिमानाः=जिताऽहङ्काराः, विचित्रा= अनेकप्रकाराः, शक्तिदेशकालवशादिति शेषः। कार्ये तु = कर्मणि तु, प्रकृष्टम्= उत्तमं, यत्नम् = उद्योगं, कुरुत=विधत्त, नीतिगर्भान्=नयाऽभिज्ञानित्यर्थः, सुधियः= विदुषः, मा अवमन्ध्वं = नो तिरस्कुरुत, नीत्यैव कार्यं सिध्यत्यतो नीतिज्ञान्मा परिभूतेति भावः॥

व्युत्पत्तिः—अमेयाऽद्भुतभावभाञ्जि = मातुं योग्या मेयाः, 'माङ् माने' इति धातोः 'अचो यत्' इति यत्, 'ईद्यति' इत्यात ईत्वम्, 'सार्वधातुकाऽऽर्धधातुकयोः' इति गुणः। न मेया अमेयाः, एतादृशा ये अद्भुतभावास्तान् भजन्तीति, 'भजो ण्विः' इति ण्विः। जिताऽभिमानाः = जितः (अन्यैरिति शेषः) अभिमानो येषां ते, 'तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघवः।' इति न्यायादिति भावः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेनात्मन्यभिमानो न कर्तव्य इत्युक्तं भवतीति तात्पर्यम् । नीतिगर्भान् = नीतिः (षाड्गुण्यादिज्ञानम्) गर्भे येषां, तान् । मा अवमन्ध्वं = 'माङि लुङ्' इति लुङ् । 'धि च' इति सिचो लोपः ॥

भावार्थः—जगत् असंख्य आश्चर्य पूर्ण भावसे युक्त है, वहाँ रहनेवाले जन भी जीते गये अभिमानवाले और विचित्र हैं। कार्यमें उत्तम यत्न करो और नीति-सम्पन्न विद्वानोंका अपमान मत करो ॥ २५ ॥

विजिगीषोर्वर्तनप्रकारमुपदिशति—

वृद्धिक्षयस्थानगतामजस्रं वृत्तिं जिगीषुः प्रसमीक्षमाणः।
घटेत सन्ध्यादिषु यो गुणेषु, लक्ष्मीर्न तं मुञ्चति चञ्चलाऽपि ॥ २६ ॥

अन्वयः—यो जिगीषुः वृद्धिक्षयस्थानगतां वृत्तिम् अजस्रं प्रसमीक्षमाणः (सन्) सन्ध्यादिषु गुणेषु घटेत, तं लक्ष्मीः चञ्चला अपि न मुञ्चति ॥

व्याख्या—यः, जिगीषुः = जयाऽभिलाषी राजा, वृद्धिक्षयस्थानगतां = वृद्धिक्षयस्थानरूपफलप्राप्तां, वृत्तिं = वर्तनं, स्वस्य परस्य चेति शेषः। अजस्रं = सततं, प्रसमीक्षमाणः = विचारयन् , सन्ध्यादिषु = सन्धिप्रभृतिषु, सन्धिविग्रहयानाऽऽसनसंश्रयद्वैधीभावेषु इति भावः । गुणेषु, घटेत = चेष्टेत, तं = तादृशं जिगीषुं, लक्ष्मीः = राज्यश्रीः, चञ्चलाऽपि = चपलाऽपि, न मुञ्चति = न त्यजति, गुणश्रृङ्खलाबद्धत्वादिति भावः ॥

व्युत्पत्तिः—वृद्धिक्षयस्थानगतां = वृद्धिश्च क्षयश्च स्थानं च वृद्धिक्षयस्थानानि, एतानि त्रीणि छत्रिन्यायेन उदयपक्षाच्चर्यानि । वृद्धिक्षयस्थानानि गता वृद्धिक्षयस्थानगता, ताम् । 'द्वितीया श्रिताऽतीतपतितगताऽत्यस्तप्राप्ताऽऽपन्नैः' इति द्वितीयातत्पुरुषः । घटेत = 'घट चेष्टायाम्' इति धातोर्लिङ् । अत्र लक्ष्म्या मोचनरूपस्य कार्यस्य चञ्चलत्वरूपे कारणे सत्यपि अनुत्पत्तेर्विशेषोक्तिरलङ्कारः, तदुदाहरणं लक्षणं यथा—

'विशेषोक्तिरनुत्पत्तिः कार्यस्य सति कारणे ।
नमन्तमपि धीमन्तं न लङ्घयति कश्चन ॥' इति ॥

भावार्थः—जो जयाऽभिलाषी राजा वृद्धि, क्षय और स्थान इनमें प्राप्त अपनी और शत्रुकी वृत्तिको निरन्तर विचार करता हुआ सन्धि आदि गुणोंमें चेष्टा करेगा, उसको लक्ष्मी चञ्चल होती हुई भी नहीं छोड़ती है ॥ २६ ॥

क्वचिद्विजिगीषोरपि परवृद्धयुपेक्षणीयत्वं दर्शयति—

उपेक्षणीयैव परस्य वृद्धिः प्रनष्ट-नीतेरजितेन्द्रियस्य ।
मदाऽदियुक्तस्य विरागहेतुः, समूलघातं विनिहन्ति याऽन्ते ॥ २७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—प्रनष्टनीतेः अजितेन्द्रियस्य मदाऽऽदियुक्तस्य परस्य वृद्धिः उपेक्षणीया एव, या विरागहेतुः (सती) अन्ते समूलघातं विनिहन्ति ॥

व्याख्या—प्रनष्टनीतेः = अपगतनयस्य, अत एव अजितेन्द्रियस्य = अवशीकृतहृषीकस्य, तत एव मदादियुक्तस्य = मदाऽऽदिवैरिषट्कोपेतस्य, कामक्रोधलोभमोहमदमात्सर्यसंयुतस्येति भावः। एतादृशस्य परस्य = शत्रोः, वृद्धिः = उपचयः, उपेक्षणीया एव = उपेक्षितुं योग्या एव, या = तादृशशत्रोः वृद्धिः, विरागहेतुः = अप्रीतिकारणभूता सती, लोकस्येति शेषः। अन्ते = अवसाने, परिणाम इति भावः। समूलघातं विनिहन्ति = मूलघातपुरःसरं नाशयति।

व्युत्पत्तिः—प्रनष्टनीतेः = प्रनष्टा नीतिर्यस्य, तस्य। प्रनष्टेत्यत्र 'नशेः षान्तस्य' इति णत्वनिषेधः। अजितेन्द्रियस्य=अजितानि इन्द्रियाणि येन, तस्य। मदाऽऽदियुक्तस्य=मद आदिर्येषां ते मदादयः, तैर्युक्तस्य। विरागहेतुः=विरागस्य (अप्रीततायाः) हेतुः। समूलघातं='समूलाऽकृतजीवेषु हन्कृञ्ग्रहः' इति णमुल्। 'कषादिषु यथा विध्यनुप्रयोगः' इति 'विनिहन्ती' त्येतस्य अनुप्रयोगः। उपेन्द्रवज्रा वृत्तम् ॥

भाषाऽर्थः—नीतिभ्रष्ट अत एव इन्द्रियों को नहीं जीतने वाला इसी कारणसे मद आदि छः अन्तःशत्रुओंसे युक्त शत्रुकी वृद्धिकी उपेक्षा करनी चाहिए, जो वृद्धि अप्रीति का कारण होती हुई परिणाममें मूलके साथ सबका नाश कर डालती है ॥ २७ ॥

कञ्चिद्विजिगीषोरपि आत्मनश्चोपेक्षणीयत्वं तथैव प्रतिपादयति—

जनाऽनुरागेण युतोऽवसादः फलाऽनुबन्धः सुधियाऽऽत्मनोऽपि ।
उपेक्षणीयोऽभ्युपगम्य संधिं कामाऽऽदिषड्वर्गजिताऽधिपेन ॥ २८ ॥

अन्वयः—जनाऽनुरागेण युतः फलाऽनुबन्धः आत्मनः अवसादोऽपि कामाऽऽदिषड्वर्गजिता सुधिया अधिपेन सन्धिम् अभ्युपगम्य उपेक्षणीयः।

व्याख्या—जनाऽनुरागेण = प्रजाप्रणयेन, युतः = सम्बद्धः, अत एव—फलाऽनुबन्धः = फलाऽनुसारी, आत्मनः = स्वस्य, अवसादोऽपि = क्षयोऽपि, कामाऽऽदिषड्वर्गजिता=कामाऽऽदिवैरिषट्काऽभिभाविना, सुधिया = विदुषा, अधिपेन = जिगीषुणा राज्ञा, सन्धिं=पणबन्धम्, अभ्युपगम्य = स्वीकृत्य, उपेक्षणीयः=उपेक्षितुं योग्यः। सन्धिं विना स्वक्षये उपेक्षिते तु पराक्रमशङ्का स्यादतः पणबन्धाऽभ्युपगमपूर्वकं कञ्चित्कालं यावत् स्वाऽपचयः समुपेक्ष्य इति भावः ॥

व्युत्पत्तिः—फलाऽनुबन्धः = फलमनुबध्नातीति, 'कर्मण्यण्' इत्यण्। कामाऽऽदिषड्वर्गजिता = काम आदिर्यस्य स कामादिः। षण्णां वर्गः षड्वर्गः। कामादि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षाऽसौ षड्वर्गः, तं जयतीति कामाऽऽद्विषड्वर्गजित्, तेन । क्विप्प्रत्ययः । अभ्युपगम्य = 'अङ्गीकाराऽभ्युपगमप्रतिश्रवसमाधयः ।' इत्यमरः ॥

भावार्थः—प्रजाओंके अनुराग (प्रेम) से युक्त अत एव फलका अनुसरण करने वाले अपने क्षयकी भी कामक्रोध आदि छ शत्रुओंके समूहको जीतने वाले विद्वान् जिगीषु राजाको सन्धि स्वीकार करके उपेक्षा करनी चाहिए ॥ २८ ॥

सन्धिविग्रहाभ्यां फलादर्शने स्ववृद्ध्यर्थं विजिगीषोरासनमुपदिशति—

यदा विगृह्णन् न च सन्दधानो वृद्धिं क्षयं चाऽनुगुणं प्रपश्येत् ।
आसीत राजाऽवसरप्रतीक्षस्तदा प्रयासं वितथं न कुर्यात् ॥ २९ ॥

अन्वयः—राजा यदा विगृह्णन् सन्दधानश्च (अनुगुणाम्) वृद्धिम् अनुगुणं क्षयं च न प्रपश्येत् तदा अवसरप्रतीक्षः (सन्) आसीत, प्रयासं वितथं न कुर्यात् ॥

व्याख्या—राजा = विजिगीषुर्भूपालः, यदा = यस्मिन्काले, विगृह्णन् = विग्रहं कुर्वन्, सन्दधानश्च = सन्धिं कुर्वाणश्च, (अनुगुणाम् = अनुकूलाम्) वृद्धिं = समृद्धिम्, आत्मन इति शेषः । तथच-अनुगुणम् = अनुकूलं, क्षयं च = अपचयं च, परस्येति शेषः । न प्रपश्येत् = न प्रेक्षेत, तदा = तस्मिन्काले, अवसरप्रतीक्षः = अनुकूलकालाऽपेक्षो सन्, आसीत = आसनं कुर्यात्, स्ववृद्ध्यर्थं परक्षयाऽर्थं चेति शेषः । प्रयासं = आत्मनः सन्धिविग्रहोद्यमं, वितथं = निष्फलं, न कुर्यात् = नो विदधीत ॥

व्युत्पत्तिः—विगृह्णन् = विगृह्णातीति, विपूर्वकात् 'ग्रह उपादाने' इति धातोर्लटः शत्रादेशः 'ग्रहिज्या' इत्यादिना सम्प्रसारणम् । सन्दधानः = सन्धत्त इति, संपूर्वकात् 'डुधाञ् धारणपोषणयोः' इति धातोर्लटः शानच् । अवसरप्रतीक्षः = अवसरं प्रतीक्षत इति 'कर्मण्यण्' इत्यण् ॥

भावार्थः—राजा जब विग्रह करता हुआ और सन्धि करता हुआ भी अनुकूल अपनी वृद्धि और अनुकूल शत्रुका क्षय नहीं देखे तो कालकी प्रतीक्षा करता हुआ आसनका अवलम्बन करे, अपने उद्यमको निष्फल नहीं करे ॥ २९ ॥

सन्धौ स्थितो वा जनयेत् स्ववृद्धिं हन्यात् परं वोपनिषत्प्रयोगैः ।
आश्रावयेदस्य जनं परैर्वा विग्राह्य कुर्यादवहीनसंधिम् ॥ ३० ॥

अन्वयः—सन्धौ स्थितः स्ववृद्धिं जनयेत् वा उपनिषत्-प्रयोगैः परं हन्यात् । अस्य जनम् आश्रावयेत् वा परैः विग्राह्य अवहीनसन्धिं कुर्यात् ॥

व्याख्या—सन्धौ = पणबन्धे, स्थितः = वर्तमानः स्ववृद्धिम् = आत्मोन्नतिं, जनयेत् = उत्पादयेत्, वा = अथवा उपनिषत्प्रयोगैः = रहःप्रयोज्यैः विषादिदानैरिति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावः। परं = शत्रुं, हन्यात् = नाशयेत्, सन्धिना विश्वस्तत्वादिति भावः। अस्य= परस्य, जनं = कुलजनम्, आश्रावयेत् = आकर्षयेत्, देशाऽऽदिदानेनेति शेषः। वा = अथवा परैः=तदीयशत्रुभिः, विग्राह्य = विग्रहं (कलहम्) कारयित्वा अवहीनसन्धि = त्यक्तसन्धि, कुर्यात्=विदधीत, प्राक् येन समं सन्धिरासीत् पश्चात्तेन सह सन्धिभङ्गं कुर्यादिति भावः॥

व्युत्पत्तिः—उपनिषत्प्रयोगैः = उपनिषदः प्रयोगैः, 'भवेदुपनिषद्धर्मे वेदाऽन्ते च रहस्यपि।' इति विश्वः॥

भाषाऽर्थः—सन्धिमें विद्यमान जिगीषु अपनी वृद्धिको सम्पन्न करे अथवा एकान्तमें प्रयोज्य विषाऽऽदिदानोंसे शत्रुको मारे। शत्रुके कुलजनको देशादिके दान से आकृष्ट करे अथवा उसके शत्रुओंके साथ उसका कलह कराकर सन्धिको भङ्ग कर दे॥ ३०॥

मण्डलभेदे सन्धिमुपदिशति—

संदर्शितस्नेहगुणः स्वशत्रून् विद्वेषयन् मण्डलमस्य भिन्द्यात्।
इत्येवमादि प्रविधाय संधिर्वृद्धेर्विधेयोऽधिगमाऽभ्युपायः॥ ३१॥

अन्वयः—सन्दर्शितस्नेहगुणः स्वशत्रून् विद्वेषयन् अस्य मण्डलं भिन्द्यात् इत्येवमादि प्रविधाय वृद्धेः अधिगमाऽभ्युपायः सन्धिः विधेयः॥

व्याख्या—सन्दर्शितस्नेहगुणः = प्रकाशिताऽनुरागगुणः, स्वशत्रून् = आत्मरिपून्, विद्वेषयन् = विमुखान् सम्पादयन्, अस्मच्छत्रवोऽनेन सन्धिं न कुर्युरिति भावः। अस्य=शत्रोः, मण्डलम् = अमात्यादिप्रकृतिं, भिन्द्यात् = भिन्नं कुर्यात्, इत्येवमादि=उक्तप्रकारादि, प्रविधाय=कृत्वा, वृद्धेः=समृद्धेः, अधिगमाऽभ्युपायः= प्राप्तिहेतुः, सन्धिः = पणबन्धः, विधेयः = अनुष्ठेयः॥

व्युत्पत्तिः—सन्दर्शितस्नेहगुणः=सन्दर्शिताः स्नेहगुणा येन सः। इत्येवमादि= इत्येवम् आदिर्यस्मिंस्तत्, कार्यमिति शेषः। इन्द्रवज्रा वृत्तम्॥

भाषाऽर्थः—स्नेहगुणोंको प्रकाशित कर अपने शत्रुओं को परस्परमें विमुख बनाकर शत्रुमण्डलको भिन्न करे, इत्यादि कार्य कर वृद्धिकी प्राप्तिके हेतुभूत सन्धि करनी चाहिए॥ ३१॥

विग्रहस्य वृद्धिहेतुत्वं प्रतिपादयति—

मत्वा सहिष्णूनपरोपजप्यान् स्वकानधिष्ठाय जलाऽन्तदुर्गान्।
द्रुमाऽद्रिदुर्लङ्घ्यजलाप्रधृष्यान् वर्धेत राजा रिपुविग्रहेण॥ ३२॥

अन्वयः—राजा स्वकान् सहिष्णून् अपरोपजप्यान् मत्वा द्रुमाऽद्रिदुर्लङ्घ्यजलाऽप्रधृष्यान् अधिष्ठाय रिपुविग्रहेण वर्द्धेत॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—राजा = जिगीषुर्भूपः, स्वकान्=आत्मीयान् , अनुजीविन इति भावः, सहिष्णून् = समर्थान् , अपरोपजप्यान् = परैः अभेद्यान् , मत्वा = ज्ञात्वा, द्रुमाऽद्रिदुर्लङ्घ्यजलाऽप्रधृष्यान् = वृक्षपर्वतदुरतिक्रम्यतोयगम्यान् , जलाऽन्तदुर्गान्=तोयाऽन्तदुर्गमप्रदेशान् , अधिष्ठाय = अध्यास्य, जलाऽन्तदुर्गेषु स्थापयित्वेति भावः। रिपुनिग्रहेण = शत्रुकलहेन, वर्द्धेत = वृद्धिं प्राप्नुयात् ॥

व्युत्पत्तिः—अपरोपजप्यान् = उपजपितुमर्हा उपजप्याः, 'पोरदुपधात्' इति यत्। परैरुपजप्याः परोपजप्याः। न परोपजप्या अपरोपजप्यास्तान्। उपजापो भेदः। द्रुमाऽद्रिदुर्लङ्घ्यजलाऽप्रधृष्यान् = द्रुमाश्च अद्रयश्च दुर्लङ्घ्यजलानि च द्रुमाऽद्रिदुर्लङ्घ्यजलानि, तैरप्रधृष्यान्। जलाऽन्तदुर्गान्=दुःखेन गच्छन्ति एषु इति दुर्गाः, 'सुदुरोरधिकरणे' इति डः। जलाऽन्ते दुर्गास्तान् , अधिपूर्वकस्थाधातोर्योगे 'अधिशीङ्स्थाऽऽसां कर्म' इत्याधारस्य कर्मत्वम्। रिपुविग्रहेण = रिपुणा सह विग्रहो रिपुविग्रहस्तेन ॥

भावाऽर्थः—राजा अपने अनुजीवियों को समर्थ और शत्रुओं से अभेद्य जान कर वृक्ष, पर्वत और अलङ्घनीय जलों से अगम्य जलके समीपस्थ दुर्गम प्रदेशोंमें रख कर शत्रुके साथ विग्रह करके वृद्धि को प्राप्त करे ॥ ३२ ॥

आसनसमयं प्रतिपादयति—

शक्नोति यो न द्विषतोऽभिहन्तुं, विहन्यते नाऽप्यबलैर्द्विषद्भिः।
स श्वावराहं कलहं विदध्यादासीत दुर्गाऽऽदि विवर्धयंश्च ॥ ३३ ॥

अन्वयः—यो द्विषतो निहन्तुं न शक्नोति, अबलैः द्विषद्भिः न विहन्यते अपि, स श्वावराहं कलहं विदध्यात् , दुर्गादि विवर्धयन् आसीत च ॥

व्याख्या—यः = विजिगीषुः, द्विषतः = शत्रून् , निहन्तुं = विनाशयितुं , न शक्नोति = न समर्थो भवति, अबलैः = शक्तिरहितैः, द्विषद्भिः = शत्रुभिः, न विहन्यते अपि = न विनाश्यते अपि, सः = विजिगीषू राजा, श्वावराहं = कुक्कुरशूकरसम्बन्धिनं, कलहं = विग्रहं, विदध्यात् = कुर्वीत, कुक्कुरशूकरसदृशोर्मिथोविरोधिनोर्द्वयोर्वैरिणोः कलहमुत्पादयेदिति भावः। स्वयं च दुर्गादि=दुर्गाऽऽद्यष्टवर्गं, विवर्धयन् = समेधयन् , आसीत च = आसनं चाऽवलम्बेत् ॥ यथा चण्डाला वराहं हन्तुमसमर्थाः सन्तः श्वानं विमुच्य योधयन्ति, तयोर्द्वयोरपि तेषां अन्यतरस्मादेकतरस्य मरणे मिथः प्रहारेण द्वयोर्मरणेऽपि वा सर्वथा तेषां कार्यसिद्धिः, तद्वद्विजिगीषू राजा विद्विषतोर्द्वयोः कलहमुत्पादयेत् स्वयं च दुर्गादिवर्धनपुरःसरमासीतेत्यभिप्रायः ॥

व्युत्पत्तिः—श्वावराहं-श्वा च वराहश्च श्ववराहं, 'येषां च विरोधः शाश्वतिकः'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति समाहारद्वन्द्वः । शबराहस्यायं शाबराहस्तम्, 'तस्येदम्' इत्यण् । 'तद्धिते ष्वचामादेः' इत्यादिवृद्धिश्च । दुर्गादि = दुर्गमादिर्यस्य तत्, दुर्गाद्यष्टवर्गो यथा—

'कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
खन्याकरधनाऽऽदानं शून्यानां च निवेशनम् ॥' इति ॥

भाषाऽर्थः—जो जयाऽभिलाषी राजा शत्रुओंको मारनेमें असमर्थ है, और स्वयम् भी दुर्बल शत्रुओंसे नहीं मारा जाता है। वह शत्रुओंमें परस्पर कुत्ते और सूअरों के जैसे कलह को उत्पन्न कर दे और स्वयम् दुर्ग आदियोंको बढ़ाता हुआ आसनका अवलम्बन करे ॥ २३ ॥

यानसमाश्रययोः कालं प्रतिपादयति—

प्रयाणमात्रेण परे प्रसाध्ये वर्तेत यानेन कृताऽभिरक्षः ।
अशक्नुवन् कर्तुमरेर्विघातं स्वकर्मरक्षां च परं श्रयेत ॥ २४ ॥

अन्वयः—परे प्रयाणमात्रेण प्रसाध्ये कृताभिरक्षः (सन्) यानेन वर्तेत । अरेः विघातं स्वकर्मरक्षां च कर्तुम् अशक्नुवन् (सन्) परं श्रयेत ॥

व्याख्या—परे = शत्रौ, प्रयाणमात्रेण = केवलेन यानेन, प्रसाध्ये = अभिभव-नीये सति, कृताऽभिरक्षः = आत्मदेशस्य विहितपरिरक्षः सन्, यानेन = प्रयाणेन, वर्तेत = वर्तनं कुर्यात, स्वदेशरक्षाऽनपेक्षया प्रयाणे कृते सति स्वदेशे कस्यचिद-न्यस्य शत्रोराक्रमणं संभवेत् अत इयमुक्तिः । अरेः = शत्रोः, विघातं = विनाशं, स्वकर्मरक्षां च = शत्रोराक्रमणादात्मदुर्गरक्षणं च कर्तुं = विधातुम्, अशक्नुवन् = असमर्थो भवन् सन्, आत्मरक्षार्थं परम् = अन्यं कञ्चिद् बलवत्तरं राजानं, श्रयेत = रक्षकत्वेन आश्रयेत, यतो वृद्धिमाप्नुयादिति भावः ।

व्युत्पत्तिः—प्रयाणमात्रेण = प्रयाणम् एव प्रयाणमात्रं, तेन, 'मयूरव्यंसकाद-यश्चे'ति समासः ॥

भाषाऽर्थः—शत्रु प्रयाणमात्रसे जीता जानेवाला हो तो अपने देश की सर्वत्र भावेन रक्षाकर प्रयाण का आचरण करे । शत्रु का नाश और शत्रुसे अपने दुर्ग आदि की रक्षा करने को असमर्थ हो तो बलवान् दूसरे राजाका समाश्रय करे ॥ २४ ॥

अथ द्वैधीभावप्रकार सूचयति—

एकेन संधिः, कलहोऽपरेण कार्योऽभितो वा प्रसमीक्ष्य वृद्धिम् ।
एवं प्रयुञ्जीत जिगीषुरेता नीतीर्विजानन्नहिताऽऽत्मसारम् ॥२५॥

अन्वयः—वा अभितो वृद्धिं प्रसमीक्ष्य एकेन सन्धिः अपरेण कलहः कार्यः । जिगीषुः एवम् अहिताऽऽत्मसारं विजानन् एता नीतीः प्रयुञ्जीत ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—वा = अथवा, अभितः = उभयपार्श्वयोः वृद्धिं = समृद्धिं, सन्धिना विग्रहेण वेति शेषः। प्रसमीक्ष्य = विमृश्य एकेन = शत्रुणा सन्धिः = पणबन्धः, अपरेण = सहायाऽभियुक्तेन, कलहः = विग्रहः, कार्यः = कर्त्तव्यः । जिगीषुः = जयाऽभिलाषी, पृथक् = इत्थम्, अहितात्मसारं = शत्रोरात्मनश्च बलाऽबलं, विजानन् = विदन्, एताः = इमाः, नीतीः = नयान्, षाड्गुण्यलक्षणानिति भावः। प्रयुञ्जीत = अनुतिष्ठेत् ॥

व्युत्पत्तिः—अहितात्मसारम् = अहितश्च आत्मा च अहिताऽऽत्मानौ तयोः सारस्तम्। इन्द्रवज्रा वृत्तम् ॥

भाषाऽर्थः—अथवा दोनों ओर सन्धिसे वा विग्रहसे अपनी वृद्धिका विचार कर एक शत्रुके साथ सन्धि और उसके सहाय अभियुक्तके साथ विग्रह करना चाहिए। जयाऽभिलाषी इस प्रकारसे शत्रु का और अपना बलाऽबल जानता हुआ सन्धि-विग्रह आदि छः नीतियों का प्रयोग करे ॥ ३५ ॥

साम्प्रतं रावणमुपाक्रमते—

त्वया तु लोके जनितो विरागः, प्रकोपितं मण्डलमिन्द्रमुख्यम्,
रामे तु राजन्, विपरीतमेतत् पश्यामि, तेनाऽभ्यधिकं विपक्षम् ॥

अन्वयः—हे राजन् ! त्वया तु लोके विरागो जनितः, इन्द्रमुख्यं मण्डलं प्रकोपितम्। रामे तु एतत् विपरीतं (तेन) विपक्षम् अभ्यधिकं पश्यामि ॥

व्याख्या—हे राजन् = हे राक्षसराज !, त्वया तु = भवता तु, लोके = जने, विरागः = अप्रीतता, जनितः = उत्पादितः । अत एव—इन्द्रमुख्यम् = शक्रप्रधानं, मण्डलं = राजसमूहः, प्रकोपितं = संजातकोपं कृतम्, अतो भवद्वृद्धिर्न शुभोदर्केति भावः। रामे तु = रामचन्द्रे तु, एतत् = पूर्वोक्तं, विपरीतं = प्रतिकूलं, तेन लोकाऽनुरागस्य जनितत्वात् राजमण्डलस्य च सन्तोषितत्वादिति भावः। (तेन = कारणेन) विपक्षं = शत्रुं, राममित्यर्थः, अभ्यधिकं = भवद्विशिष्टं, पश्यामि = विलोकयामि, अतः स्वकीयन्यूनता परिहर्तव्येति भावः ॥

व्युत्पत्तिः—इन्द्रमुख्यम् = इन्द्रो मुख्यो यस्मिंस्तत् । 'मुख्यवर्यवरेण्याश्च प्रबर्होऽनवरार्ध्यवत्।' इत्यमरः ॥

भाषाऽर्थः—हे महाराज ! आपने तो लोकमें अप्रीति पैदा कर दी, और इन्द्र प्रधान राजमण्डलको प्रकुपित बनाया। राममें तो यह बात उलटी ही है, इसलिए शत्रुको आपसे अधिक देख रहा हूँ ॥ ३६ ॥

प्रागेव भवत्कार्यं विनष्टमिति दर्शयति—

एकेन वाली निहतः शरेण सुहृत्तमस्ते, रचितश्च राजा।
यदैव सुग्रीवकपिः परेण, तदैव कार्यं भवतो विनष्टम् ॥ ३७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—यदा एव परेण एकेन शरेण ते सुहृत्तमो वाली निहतः सुग्रीवकपिश्च राजा रचितः, तदा एव भवतः कार्यं विनष्टम् ।

व्याख्या—यदा एव = यस्मिन्काले एव, परेण = शत्रुणा, रामेणेति भावः । एकेन = एककेन, शरेण = बाणेन, ते = तव, सुहृत्तमः = श्रेष्ठः सखा, वाली = तन्नामको वानरराजः, निहतः = मारितः, तदा एव = तस्मिन्काल एव, भवतः = तव, कार्यं = कृत्यं, विनष्ट = प्रभ्रष्टम् । येन भवज्जेता वाल्यप्येकेन शरेण हतः, भवज्जयस्याऽपि सुकरत्वादिति भावः ॥

व्युत्पत्तिः—सुहृत्तमः = शोभनं हृदयं यस्य स सुहृत्, 'सुहृद्दुर्हृदौ मित्राऽमित्रयोः' इति हृदयस्य हृद्भावो निपात्यते। अतिशयेन सुहृत्, सुहृत्तमः, 'अतिशायने तमबिष्ठनौ' इति तमप्प्रत्ययः । सुग्रीवकपिः = सुग्रीवश्चासौ कपिः ॥

भावार्थः—जब शत्रुने एक बाण से आपके श्रेष्ठ मित्र वाली को मारा और वानर सुग्रीवको राजा बनाया उस समय में ही आपका कार्य विनष्ट हो गया ॥३७॥

कथं नाम मम कार्यविनाशः, मत्प्रतापादेव शत्रुनाश इति चेत् तदपि खंडयति—

प्राकारमात्राऽऽवरणः प्रभावः खराऽऽदिभिर्यो निहतैस्तवाऽभूत् ।
लङ्काप्रदाहाऽक्षवधद्रुभङ्गैः क्लाम्यत्यसावप्यधुनाऽतिमात्रम् ॥ ३८ ॥

अन्वयः—तव यः प्रभावः निहतैः खराऽऽदिभिः प्राकारमात्राऽऽवरणः अभूत्, असौ अपि अधुना लङ्काप्रदाहाऽक्षवधद्रुभङ्गैः अतिमात्रं क्लाम्यति ॥

व्याख्या—तव = भवतः, यः = त्रैलोक्यप्रमाथी, प्रभावः = प्रतापः, निहतैः = मारितैः, खराऽऽदिभिः = खरप्रभृतिभी राक्षसैः, प्राकारमात्राऽऽवरणः = वरणमात्रावरोधनः, अभूत् = जातः, लङ्कायामेव समर्थत्वादिति भावः । असौ अपि = प्राकारमात्रावरणः प्रभावोऽपि, अधुना = सम्प्रति लङ्काप्रदाहाऽक्षवधद्रुभङ्गैः = लङ्काप्रदाहेन अक्षकुमारहननेन अशोकवनिकाभङ्गेन च, अतिमात्रम् = अत्यर्थं, क्लाम्यति = ग्लानिमुपगच्छति, प्रागिव न साम्प्रतं ते लोकाऽतिशायी प्रभाव इति भावः ॥

व्युत्पत्तिः—प्राकारमात्राऽऽवरणः प्राकार एव प्राकारमात्रं, तत् आवरणं यस्य सः । लङ्काप्रदाहाऽक्षवधद्रुभङ्गैः = लङ्काप्रदाहश्च अक्षवधश्च द्रुभङ्गश्च लङ्काप्रदाहाऽक्षवधद्रुभङ्गास्तैः । क्लाम्यति = 'क्लमु ग्लानौ' इति दैवादिकधातोर्लट्, 'शमामष्टानां दीर्घः श्यनि' दीर्घत्वम् ॥

भावार्थः—आप का जो प्रताप मारे गये खर आदियों से प्राचीन मात्र आवरण वाला हुआ था, वह भी अभी लङ्कादाह अक्षकुमारका वध और अशोकवनिका के भङ्ग से अतिशय ग्लानिको प्राप्त कर रहा है ॥ ३८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रावणस्य रामेण युद्धाऽनौचित्यं दर्शयति—षड्वर्गवश्य इति ।

षड्वर्गवश्यः परिमूढबन्धुरुच्छिन्नमित्रो विगणैरुपेतः ।
मा पादयुद्धं द्विरदेन कार्षीर्नम क्षितीन्द्रं प्रणतोपभोग्यम् ॥ ३६ ॥

अन्वयः—(हे राजन् !) षड्वर्गवश्यः परिमूढबन्धुः उच्छिन्नमित्रो विगुणैः उपेतः (त्वम्) द्विरदेन पादयुद्धम् (इव रामेण युद्धम्) मा कार्षीः, प्रणतोपभोग्यं क्षितीन्द्रं नम ॥

व्याख्या—(हे राजन्) षड्वर्गवश्यः=निद्रादिशत्रुषट्कायत्तः, परिमूढबन्धुः= मूर्खाऽमात्याऽदिपरिवारः । उच्छिन्नमित्रः = नष्टवाक्यादिसुहृत् , एवं च विगुणैः= विगीतगुणैः, क्वचित् 'अरिगणैः' इति पाठस्तस्य शत्रुसमूहैरित्यर्थः । उपेतः = युक्तः, त्वमिति शेषः । रामश्च सर्वथाऽपि त्वद्दुर्गुणरहित इति भावः । अतः द्विरदेन= हस्तिना, पादयुद्धम् = चरणरणम् , इवेति शेषः । मा कार्षीः=नाऽऽचर, रामेण सह युद्धमिति शेषः । प्रत्युत—प्रणतोपभोग्यं = नम्रजनोपभोगविषयं, क्षितीन्द्रं = राजानं, राममित्यर्थः । नम = प्रणम, येन सर्वतोभावेन ते भीतिर्विनङ्क्ष्यतीति भावः । अनेन हीनसन्धिमाह, तथा चोक्तं—'प्रवृत्तं मन्त्रिणाऽऽक्रान्तो राजा बलवताऽबलः । सन्धिनोपनमेत्तूर्णं दण्डकोशाऽऽत्मभूमिभिः ॥' इति ॥

व्युत्पत्तिः—षड्वर्गवश्यः = षण्णां वर्गः षड्वर्गः । वशं गतो वश्यः, 'वशं गत' इति यत् । षड्वर्गस्य वश्यः षड्वर्गवश्यः । परिमूढबन्धुः = परिमूढा बन्धवो यस्य सः । उच्छिन्नमित्रः = उच्छिन्नानि मित्राणि यस्य सः । मा कार्षीः = 'माङि लुङ्' इति लुङ्, 'न माङ्योगे' इत्यडागमप्रतिषेधः । प्रणतोपभोग्यं = प्रणतैरुपभोग्यस्तम् । नम = 'णम प्रह्वत्वे शब्दे च' इति धातोर्लोट् ॥

भावार्थः—हे राजन् ! काम-क्रोध आदि षड्वर्ग के अधीन, मूर्ख परिवारोंसे युक्त, जिसके मित्र नष्ट हो चुके हैं ऐसे और निन्दित गुणवाले जनों से युक्त आप हाथी के साथ पादयुद्ध के सदृश रामचन्द्र के साथ युद्ध मत करें । नम्र जनों से उपभोग्य राजा राम को नमस्कार कीजिए ॥ ३९ ॥

युवयोः सन्धानकारणमस्त्येवेति दर्शयति—

रामोऽपि दाराऽऽहरणेन तप्तो, वयं हतैर्बन्धुभिरात्मतुल्यैः ।
तप्तस्य तप्तेन यथाऽऽयसो नः संधिः परेणाऽस्तु, विमुञ्च सीताम् ॥

अन्वयः—रामो दाराऽऽहरणेन तप्तः, वयम् अपि आत्मतुल्यैः हतैः बन्धुभिः (तप्ताः) । तप्तस्य अयसः तप्तेन (अयसा) यथा नः परेण सन्धिः अस्तु, सीतां विमुञ्च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—रामः = रामचन्द्रः, दाराऽऽहरणेन = पत्न्यपहारेण सीताऽपहरणे-नेत्यर्थः । तप्तः = तापयुक्तः, वयम् अपि = राक्षसा अपि, आत्मतुल्यैः = स्वसदृशैः हतैः = मारितैः, बन्धुभिः = बान्धवैः, अक्षकुमारादिभिरिति भावः । तप्ता इति शेषः । अतः तप्तस्य = तापयुक्तस्य, अयसः = लोहस्य, तप्तेन = तापयुक्तेन, अयसा इति शेषः । यथा = इव, नः = अस्माकं, परेण = शत्रुणा, रामेणेति भावः । सन्धिः = पणबन्धः, अस्तु = भवतु, तदर्थं—सीतां = जानकीं, सन्धिनिमित्तभूतामित्यर्थः । विमुञ्च = त्यज, येन पक्षद्वयस्याऽपि सन्तापोऽपगच्छेदिति भावः ।

व्युत्पत्तिः—दाराऽऽहरणेन = दाराणामाहरणं तेन । 'भार्या जायाऽथ पुम्भूम्नि दाराः' इत्यमरः । आत्मतुल्यैः = आत्मना तुल्यैः, 'तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' इति तृतीया षष्ठी च ॥

भाषाऽर्थः—रामचन्द्र पत्नीके हरण से सन्तप्त है, हम भी अपने समान अक्षकुमार आदि बान्धवों के मरण से सन्तप्त हैं । इस लिए सन्तप्त लोहे का सन्तप्त लोह के साथ जैसे सन्धि होती है, उसी तरह हमलोगों की शत्रु के साथ सन्धि हो इसलिए आप सीताजी को छोड़ दें ॥ ४० ॥

सन्धि विनाऽस्माकं जीवनं न स्थास्यतीति दर्शयति—सन्धुक्षितमिति ।

सन्धुक्षितं मण्डलचण्डवातैरमर्षतीक्ष्णं क्षितिपालतेजः ।
सामाऽम्भसा शान्तिमुपैतु राजन् ! प्रसीद, जीवाम सबन्धुभृत्याः ॥ ४१ ॥

अन्वयः—मण्डलचण्डवातैः सन्धुक्षितम् अमर्षतीक्ष्णं क्षितिपालतेजः सामाऽम्भसा शान्तिम् उपैतु । हे राजन् ! प्रसीद सबन्धुभृत्याः (वयम्) जीवाम ॥

व्याख्या—मण्डलचण्डवातैः = इन्द्रादिमण्डलप्रचण्डवायुभिः, सन्धुक्षितं=सन्दीपितम् , अमर्षतीक्ष्णं = सीताहरणकोपेन असह्यं, क्षितिपालतेजः = रामप्रतापाऽनलः, सामाऽम्भसा = सन्धिजलेन, शान्तिं = शमम् , उपैतु=प्राप्नोतु, सपरिवारस्य स्वस्य रक्षणाऽर्थं भवान् सन्धिमवलम्बतामिति भावः ॥

व्युत्पत्तिः—मण्डलचण्डवातैः = मण्डलान्येव चण्डवातास्तैः । सामाऽम्भसा = सामैव अम्भः सामाऽम्भस्तेन । रूपकालङ्कारः ॥

भाषाऽर्थः—इन्द्रादिमण्डलरूप प्रचण्डवायु से सन्दीपित और क्रोध से असह्य रामचन्द्र का तेजोरूप अग्नि सामरूप जल से शान्ति को प्राप्त करे, हे राजन् ! आप प्रसन्न हों, बन्धु और भृत्यों के साथ हम लोग जीवन धारण करे ॥ ४१ ॥

समयोरपि विग्रहो न युक्तः किमुत हीनाऽधिकयोरिति दर्शयति—

अपक्वकुम्भाविव भङ्गभाजौ राजन्नियातां मरणं समानौ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वीर्ये स्थितः किन्तु कृताऽनुरागो रामो भवांश्चोत्तमभूरिवैरी ॥ ४२ ॥

अन्वयः—हे राजन् ! अपक्वकुम्भौ इव भङ्गभाजौ समानौ मरणम् इयाताम् ! किन्तु रामो वीर्ये स्थितः कृताऽनुरागश्च, उत्तमभूरिवैरी ॥

व्याख्या—हे राजन् = हे राक्षसेश्वर, अपक्वकुम्भौ इव = आमघटौ इव भङ्गभाजौ = मिथोऽभिघातेन भङ्गयुक्तौ, समानौ = समबलौ युध्यमानौ, मरणं = मृत्युम्, इयातां = प्राप्नुयाताम् , किन्तु = परन्तु, रामः = रामचन्द्र', वीर्ये=पराक्रमे, स्थितः= विद्यमानः, उत्साहशक्तियुक्त इत्यर्थः। एवं कृताऽनुरागश्च = विहितस्नेहश्च, अस्तीति शेषः, अनुरक्तमण्डलत्वादिति भावः। भवान् = रावणः. उत्तमभूरिवैरी = इन्द्राऽऽदिप्रचुरशत्रुयुक्तः, अतो रामेण सन्धिरेवोचितो न विग्रह इति भावः ॥

व्युत्पत्तिः—भङ्गभाजौ = भङ्गं भजत इति, 'भजो ण्विः' इति ण्विप्रत्ययः। राजन् इयातां = राजन्नियाताम्, 'ङमो ह्रस्वादचि ङमुण्नित्यम्' इति ङमुट्। उत्तमभूरिवैरी = उत्तमा भूरि वैरिणो यस्य सः। उपमाऽलङ्कारः ॥

भावार्थः—हे राजन् ! दो कच्चे घड़ों के सदृश परस्पर अभिघात से भङ्ग होने वाले तुल्यबल लड़ने वाले दोनों शत्रु मृत्यु को प्राप्त हो जाँय, परन्तु राम उत्साह शक्ति से युक्त और मण्डल को अनुरागयुक्त किये हुए हैं, इसके विपरीत आप उत्तम और बहुतेरे शत्रुओं से युक्त हैं ॥ ४२ ॥

वादितोषन्यायेन रामस्य हीनत्वेऽभ्युपगतेऽपि अधिकस्य हीनेन विग्रहो न युज्यत इति प्रतिपादयति।

दण्डेन कोशेन च मन्यसे चेत् प्रकृष्टमात्मानमरेस्तथापि।
रिक्तस्य पूर्णेन वृथा विनाशः पूर्णस्य भङ्गे बहु हीयते तु ॥ ४३ ॥

अन्वयः—(हे राजन् !) दण्डेन कोशेन च आत्मानम् अरेः प्रकृष्टं मन्यसे चेत् ? तथापि रिक्तस्य पूर्णेन विनाशो वृथा, पूर्णस्य भङ्गे तु बहु हीयते ॥

व्याख्या—(हे राजन् !) दण्डेन = चतुरङ्गबलेन, कोशेन च = हेमरूप्यादिना च, आत्मानं = स्वम् , अरेः = शत्रोः, रामादिति भावः। प्रकृष्टं = श्रेयांसं, मन्यसे चेत् = जानासि यदि, तथाऽपि = एवं स्वीकृतेऽपि, रिक्तस्य = दण्डकोशहीनस्य, रामस्य, पूर्णेन = दण्डकोशाऽधिकेन भवता, विनाशः = भङ्गः, वृथा = निष्फलः, एतद्वैपरीत्येन-पूर्णस्य = दण्डकोशाऽधिकस्य भवतः भङ्गे तु = पराजये तु, बहु = अधिकं, हीयते = नश्यति, अतो यस्मिन्नक्षते किमपि फलं नाऽस्ति तादृशेन हीनेनाऽपि सन्धिरुचितः, वृथासङ्कटक्लेशस्याऽनौचित्यादिति भावः ॥

व्युत्पत्तिः—दण्डेन कोशेन = 'हेतौ' इति तृतीया ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—हे राजन् ! यदि आप चतुरङ्ग बल से और खजाने से अपने को शत्रु से अधिक मानते हैं, तो भी होनका पूर्ण से विनाश निष्फल है उसके विपरीत पूर्ण का पराजय होने पर तो बहुत हानि हो जाती है ॥ ४० ॥

रिक्तस्य भङ्गेऽपि विजयफलमस्तीति चेत्तत्राऽऽह—

क्लिष्टाऽऽत्मभृत्यः परिमृग्यसम्पन्-मानी यतेताऽपि ससंशयेऽर्थे ।
सन्देहमारोहति यः कृताऽर्थो, नूनं रतिं तस्य करोति न श्रीः ॥ ४४ ॥

अन्वयः—क्लिष्टाऽऽत्मभृत्यः परिमृग्यसम्पत् मानी ससंशये अर्थे अपि यतेत, यः कृताऽर्थः अपि सन्देहम् आरोहति तस्य श्रीः नूनं रतिं न करोति ।

व्याख्या—क्लिष्टाऽऽत्मभृत्यः = दुःखितशरीराऽनुचरः, परिमृग्यसम्पत् = अन्वेषणीयसम्पत्तिः, मानी = अभिमानी, कश्चिद्राजा, ससंशये = सन्दिग्धे, अर्थे = प्रयोजने, अपि, यतेत = यत्नं कुर्यात् , परं, यः = भवादृशः, कृताऽर्थः = कृतकृत्यः, अपि, सन्देहम् = आत्मसंशयविषयम् , आरोहति = अधितिष्ठति, तस्य = पुरुषस्य, श्रीः = राजलक्ष्मीः, नूनम् = अवश्यं, रतिं = प्रीतिं, न करोति = न विदधाति, दुर्विधो भूपालः संपल्लालसया स्वस्थितिसंशयाऽऽधायकेऽपि कर्मणि कामं प्रवर्तेत पर कृतकृत्यस्य भवादृशो राज्ञ एतादृशि कृत्ये प्रवृत्तिः सर्वथैवाऽनुचितेति भावः ॥

व्युत्पत्तिः—क्लिष्टाऽऽत्मभृत्यः = आत्मा च भृत्यश्च आत्मभृत्यौ, 'आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च' इत्यमरः । क्लिष्टौ आत्मभृत्यौ यस्य सः । परिमृग्यसम्पत् = परिमृग्या सम्पत् यस्य सः ॥

भाषाऽर्थः—जिसका शरीर और भृत्य दुःखित है, वह अन्वेषणीय सम्पत्तिवाला अभिमानी राजा सन्देहजनक प्रयोजन में भी यत्न करे, परन्तु जो कृताऽर्थ होकर भी संशयजनक कर्म का अधिरोहण करता है उसकी लक्ष्मी निश्चय प्रीति नहीं करती है ॥ ४४ ॥

शक्यान्यदोषाणि महाफलानि समारभेतोपनयन् समाप्तिम् ।
कर्माणि राजा विहिताऽनुरागो विपर्यये स्याद् वितथः प्रयासः ॥ ४५ ॥

अन्वयः—विहिताऽनुरागो राजा समाप्तिम् उपनयन् शक्यानि अदोषाणि महाफलानि कर्माणि समारभेत, विपर्यये प्रयासो वितथः स्यात् ॥

व्याख्या—विहिताऽनुराग = कृतप्रणयः, अनुरक्तप्रकृतिमण्डल इत्यर्थः । एतादृशो राजा=भूपालः, समाप्तिं=फलाऽन्तरवम् , उपनयन्=उपगच्छन् , शक्यानि = शक्तिसाध्यानि, अदोषाणि=दोषरहितानि, महाफलानि = बहुप्रयोजनानि, कर्माणि= कार्याणि, समारभेत=उपक्रमेत, विग्रहेणेति भावः । विपर्यये = उक्तवैपरीत्ये, विरक्त-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकृतिमण्डलो राजा यदि समाहितमकुर्वन् अशक्यानि सदोषाणि निष्फलानि कर्माणि समारभेतेति भावः। तदा प्रयासः = तादृश उद्यमः, विग्रहरूप इति भावः। वितथः = निष्फलः, स्यात् = भवेत् ॥

व्युत्पत्तिः—विहिताऽनुरागः=विहितोऽनुरागो येन सः। महाफलानि=महान्ति फलानि येषां तानि ॥

भाषाऽर्थः—प्रकृतिमण्डलको अनुरक्त करने वाला राजा फलके अन्तको प्राप्त करता हुआ शक्तिविषय, निर्दोष और अनेक प्रयोजन वाले कर्मोंका विग्रहसे आरम्भ करे, इसके विपरीत होने पर उसका प्रयास भी निष्फल हो जायगा ॥४५॥

समाऽपि रामविग्रहेण एवं स्यादिति चेत्तत्राह—

जेतुं न शक्यो नृपतिः सुनीतिर्दोषः क्षयाऽऽदिः कलहे ध्रुवश्च।
फलं न किंचिन्न शुभा समाप्तिः कृताऽनुरागं भुवि संत्यजाऽरिम् ॥ ४६ ॥

अन्वयः—सुनीतिः नृपतिः जेतुं न शक्यः, कलहे क्षयाऽऽदिः दोषः ध्रुवश्च। फलं न किञ्चित्, समाप्तिः न शुभा, भुवि कृताऽनुरागम् अरिं संत्यज ॥

व्याख्या—सुनीतिः = शोभननययुक्तः, नृपतिः = राजा राम इत्यर्थः। जेतुम् = अभिभवितुं, न शक्यः = न शक्तिविषयः, विग्रहेणेति शेषः। कलहे = विग्रहे, तेन सहेति शेषः। क्षयादिः = नाशप्रभृतिः, दोषः = दूषणं, ध्रुवश्च = अवश्यम्भावी च। फलं = सत्परिणामः, न किञ्चित् = न किमपि, समाप्तिः = अवसानं, न शुभा = न साध्वी, स्वबन्धुविनाशकारणत्वादिति भावः। अतः भुवि = पृथिव्यां, कृताऽनुरागं = विहितप्रणयम्, अनुरक्तप्रकृतिमण्डलमित्यर्थः। अरिं = शत्रुं, राममित्यर्थः। संत्यज = परिमुञ्च, येन सर्वेषामप्यस्माकं कल्याणं भविष्यतीति भावः ॥

व्युत्पत्तिः—सुनीतिः = शोभना नीतिर्यस्य सः ॥

भाषाऽर्थः—हे राजन्! उत्तम नीतिवाले राजा राम नहीं जीते जा सकते हैं, उनके साथ विग्रह करने में क्षय आदि दोष अवश्यम्भावी है। फल कुछ भी नहीं, समाप्ति शुभ नहीं, अतः पृथिवीमें प्रकृतिमण्डलको अनुरक्त करने वाले शत्रु रामको छोड़ दीजिए ॥ ४६ ॥

रामस्य सुनीतिं दर्शयति—

त्वन्मित्रनाशो निजमित्रलाभः समेतसैन्यः स च मित्रकृच्छ्रे।
भोग्यो वशः पश्य शरेण शत्रोः प्रसाधितो वालिवधे न कोऽर्थः ॥ ४७ ॥

अन्वयः—त्वन्मित्रनाशो, निजमित्रलाभः, मित्रकृच्छ्रे समेतसैन्यः स च भोग्यो वशः। शत्रोः शरेण वालिवधे कः अर्थः न प्रसाधितः? पश्य ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—त्वन्मित्रनाशः = भवन्मित्रस्य (बालिनः) नाशः (वधः)। निजमित्रलाभः=स्वसुहृत्प्राप्तिः, स्वस्य (रामस्य) सुग्रीवरूपमित्रप्राप्तिरिति भावः। मित्रकृच्छ्रे=सुहृत्सङ्कटे, समेतसैन्यः=संयुक्तसेनः, स च=सुग्रीवश्च, भोग्यः=उपजीव्यः, वशः = अनुकूलश्च। अतः शत्रोः=वैरिणः, रामस्येत्यर्थः, शरेण=बाणेन, बालिवधे=बालिविनाशे, कः, अर्थः = प्रयोजनं, न प्रसाधितः =न सम्पादितः, अपि तु सर्वोऽप्यर्थः सम्पादित एवेति भावः। पश्य=विलोकय, वाक्यार्थः कर्म ॥

व्युत्पत्तिः—त्वन्मित्रनाशः=तव मित्रं त्वन्मित्रं, 'प्रत्ययोत्तरपदयोश्चे' ति युष्मच्छब्दस्य उत्तरपदे परे त्वदादेशः। त्वन्मित्रस्य नाशः। समेतसैन्यः=समेतानि सैन्यानि यस्य सः, 'निष्ठे'ति समेतपदस्य पूर्वनिपातः ॥

भाषार्थः—आपके मित्र (बाली) का नाश अपने मित्र (सुग्रीव) का (राज्य) लाभ, मित्र सङ्कटमें सैन्य संयुक्त सुग्रीव उपजीव्य और अनुकूल हैं। शत्रुके बाणने वालीके वधमें किस प्रयोजनका सम्पादन नहीं किया ? देखिए ॥ ४७ ॥

भेदेन सुग्रीवमनुकूलयिष्यामीति चेत्ताह—

लोभाद् भयाद् वाऽभिगतः कपीन्द्रो न राघवं, येन भवेद् विभेद्यः।
स्थितः सतां वर्त्मनि लब्धराज्यः प्रतिप्रियं सोऽभ्यगमच्चिकीर्षुः ॥४८॥

अन्वयः—कपीन्द्रो लोभात् भयात् वा राघवं न अभिगतः, येन विभेद्यो भवेत्। सतां वर्त्मनि स्थितः लब्धराज्यः स प्रतिप्रियं चिकीर्षुः अभ्यगमत् ॥

व्याख्या—कपीन्द्रः=सुग्रीवः, लोभात्=लोलुपत्वात्, भयात् = त्रासात्, वा = अथवा, राघवं=रामं, न अभिगतः=न संगतः, येन=कारणेन, विभेद्यः = भेदार्हः भवेत्=स्यात्, क्रुद्धलुब्धभीतावमानिताश्चत्वारो भृत्याः परस्य भेद्यास्तत्र भेदस्य हेतुद्वितयं निम्ननिर्दिष्टया सरण्या प्रतिषिध्यते। क्रोधावमानयोश्चाऽसम्भवादत्र न चर्चा विहिता। सतां=सज्जनानां, वर्त्मनि=मार्गे, स्थितः=विद्यमानः, लब्धराज्यः=प्राप्तराज्यः, सः = सुग्रीवः, प्रतिप्रियं=प्रत्युपकारं, चिकीर्षुः=कर्तुमिच्छुः सन्, अभ्यगमत्=अभिगतः, राममिति शेषः। लब्धराज्यत्वेन लोभस्य रामाऽभिगतेनेन भयस्य च निरवकाशत्वं द्योत्यते ॥

व्युत्पत्ति—लोभात् भयात् = 'विभाषा गुणेऽस्त्रियाम्' इति हेतौ पञ्चमी। लब्धराज्यः=राज्ञो भावः कर्म वा राज्यं, 'राजाऽसे' इति यक्प्रत्ययः। लब्धं राज्यं येन सः ॥

भाषार्थः—सुग्रीव लोभसे अथवा भयसे रामको प्राप्त नहीं हुआ है, जिससे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

BVBSSMV

कि भेद के योग्य हो। सज्जनों के मार्ग में स्थित होकर राज्य को प्राप्त करने वाला यह प्रत्युपकार करने को इच्छुक होकर राम का अभिगत हुआ है ॥ ४८ ॥

सुग्रीवाऽनुजीविनामपि अभेद्यत्वं दर्शयति—

फलाशिनो निर्झरकुञ्जभाजो दिव्याऽङ्गनाऽनङ्गरसाऽनभिज्ञाः।
न्यग्जातयो रत्नवरैरलभ्या मुख्याः कपीनामपि नोपजप्याः ॥ ४९ ॥

अन्वयः—फलाशिनो निर्झरकुञ्जभाजो दिव्याऽङ्गनाऽनङ्गरसाऽनभिज्ञाः न्यग्जातयो रत्नवरैः अलभ्याः कपीनां मुख्या अपि न उपजप्याः ॥

व्याख्या—फलाऽशिनः = फलभक्षकाः, मिष्टाऽन्ननिरपेक्षा इति भावः। निर्झरकुञ्जभाजः = झरनिकुञ्जाऽश्रयिणः, न रम्यप्रासादाऽभिकाङ्क्षुका इति तात्पर्यम्। दिव्याऽङ्गनाऽनङ्गरसाऽनभिज्ञाः = देवललनासुरतरसज्ञानरहिताः, न्यग्जातयः=तिर्यग्योनयः, अत एव—रत्नवरैः = इन्द्रनीलपद्मरागादिश्रेष्ठमणिभिः, अलभ्याः = लब्धुमशक्याः, कपीनां = वानराणां मुख्या अपि=श्रेष्ठा अपि, हनुमन्नीलकुमुदादयोऽपीति भावः। न उपजप्याः = न उपजपितुं शक्याः, नो भेद्या इत्यर्थः ॥

व्युत्पत्तिः—फलाऽशिनः = फलमश्नन्तीति तच्छीलाः, 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः। निर्झरकुञ्जभाजः = निर्झराश्च कुञ्जाश्च निर्झरकुञ्जाः, तान् भजन्तीति, 'भजो ण्विः' इति ण्विः। दिव्याऽङ्गनाऽनङ्गरसाऽनभिज्ञाः दिवि भवा दिव्याः, 'द्युप्रागपागुदक्प्रतीचो यत्' इति यत्। दिव्याश्च ता अङ्गनाः, दिव्याऽङ्गनाः, तासु योऽनङ्गरसः, तस्मिन् अनभिज्ञाः। न्यग्जातयः = न्यञ्चतीति न्यङ्, निपूर्वकात् 'अञ्चु गतौ' इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' इति क्विन्। नीचैः जातिः (जन्म) येषां ते। अलभ्याः = लब्धुं शक्याः, 'शकि लिङ् च' इति शक्याऽर्थे 'पोरदुपधात्' इति यत्। न लभ्याः अलभ्याः। उपजप्याः = उपजपितुं शक्याः, उपपूर्वकात् 'जप व्यक्तायां वाचि' इति धातोः पूर्ववद्यत्प्रत्ययः। अत्र विशेषणानां साऽभिप्रायत्वात्परिकराऽलङ्कारः, सोदाहरणं तल्लक्षणं यथा—

'अलङ्कारः परिकरः साऽभिप्राये विशेषणे।
सुधांऽशुकलितोत्तंसस्तापं हरतु वः शिवः ॥' इति ॥

भावार्थः—फल खाने वाले, जल-प्रवाह के समीप में और लतागृह में रहने वाले, देवाऽङ्गनाओं के सुरतरस में अनभिज्ञ, तिर्यग्जाति पद्मराग आदि श्रेष्ठ रत्नों से भी प्राप्ति के अविषय हनूमान् और नील आदि श्रेष्ठ वानर भी भेद के पात्र नहीं हैं ॥ ४९ ॥

सचन्मित्रपुत्रोऽङ्गदोऽपि अभेद्य इति दर्शयति—

कृताऽभिषेको युवराजराज्ये सुग्रीवराजेन सुताऽविशेषम्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तारविधेयेन कथं विकारं तारासुतो यास्यति राक्षसार्थम् ॥ ५० ॥

अन्वयः—ताराविधेयेन सुग्रीवराजेन युवराजराज्ये सुताऽविशेषं कृताऽभिषेकः तारासुतो राक्षसार्थं विकारं कथं यास्यति ? ॥

व्याख्या—ताराविधेयेन = तारावचनस्थितेन, तारायाः ज्येष्ठभ्रातृपत्नीत्वादिति भावः। सुग्रीवराजेन = कपिराजेन सुग्रीवेण, युवराजराज्ये = युवराजकर्मणि, सुताऽविशेषं = पुत्रनिर्विशेषं कृताऽभिषेकः = अभिषिक्तः, तारासुतः = अङ्गदः, राक्षसार्थं रक्षोनिमित्तं, विकारं = विकृतिं, भेदमित्यर्थः। कथं = केन प्रकारेण, यास्यति = गमिष्यति, सुग्रीवेण सुतनिर्विशेषं पालितो यौवराज्येऽभिषिक्तश्चाऽङ्गदोऽपि भेदं नो यास्यतीति भावः ॥

व्युत्पत्तिः—ताराविधेयेन = तारायाः विधेयेन, 'विधेयो विनयग्राही वचने स्थित आश्रवः।' इत्यमरः। सुग्रीवराजेन सुग्रीवश्चाऽसौ राजा सुग्रीवराजस्तेन, 'राजाऽहः-सखिभ्यष्टच्' इति समासाऽन्तष्टच्। युवराजराज्ये = युवा चाऽसौ राजा युवराजः पूर्ववत् टच्। युवराजस्य राज्ये। सुताऽविशेषं = सुतोऽविशेषो यस्मिन्कर्मणि तद्यथा तथेति क्रियाविशेषणम्। कृताऽभिषेकः = कृतोऽभिषेको यस्य सः। राक्षसाऽर्थं राक्षसाय अयं राक्षसाऽर्थस्तम्, 'चतुर्थी तदर्थाऽर्थबलिहितसुखरक्षितैः' इति 'अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्' इति चतुर्थीतत्पुरुषः ॥

भाषाऽर्थः—ताराके आज्ञाकारी सुग्रीव से यौवराज्यमें पुत्र के सदृश अभिषिक्त तारापुत्र अङ्गद राक्षस के लिए भेद को कैसे प्राप्त होगा ? ॥ ५० ॥

अन्यसमाश्रयादपि रामाऽभिभवं खण्डयति—

पश्यामि रामादधिकं समं वा नाऽन्यं, विरोधे यमुपाश्रयेम।
दत्त्वा वरं साऽनुशयः स्वयम्भूरिन्द्राऽऽदयः पूर्वतरं विरुद्धाः ॥ ५१ ॥

अन्वयः—(हे राजन् !) रामात् अधिकं समं वा अन्यं न पश्यामि, विरोधे यम् उपाश्रयेम। स्वयम्भूः वरं दत्त्वा साऽनुशयः, इन्द्राऽऽदयः पूर्वतरं विरुद्धाः ॥

व्याख्या—(हे राजन् !) रामात् = रामचन्द्रात्, अधिकं ज्यायांसं, समं वा = रामसदृशं वा, अन्यम् = अपरं, न पश्यामि = नो विलोकयामि, विरोधे = रामेण समं विग्रहे, यं पुरुषम्, उपाश्रयेम आश्रयं गच्छेम, यद्येवं तर्हि देवा आश्रीयन्तामित्यत्राऽऽह—दत्त्वेति। स्वयम्भूः = ब्रह्मा वरं = काङ्क्षितं, दत्त्वा = वितीर्य, साऽनुशयः = पश्चात्तापयुक्तः, किमिदं मयाऽकार्यमनुष्ठितमिति अनुतप्तोऽभूदिति भावः। इन्द्रादयः = इन्द्रप्रभृतयो देवाः। पूर्वतरं = पूर्वकालमेव, विरुद्धाः = विरोधयुक्ताः, वर्तन्त इति शेषः, अतोऽस्मत्सहायोऽत्र विषये न कोऽपीति भावः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—वरं='देवाद् वृते वरः, श्रेष्ठे त्रिषु, क्लीबे मनाक्प्रिये।' इत्यमरः। साऽनुशयः=अनुशयेन सहितः॥

भाषाऽर्थः—हे राजन्! रामसे अधिक वा रामके सदृश किसी दूसरे को नहीं देख रहा हूँ। ब्रह्मा जी वर दे कर पश्चात्तापयुक्त हैं, इन्द्र आदि देवता पहलेसे ही विरुद्ध किये गये हैं॥ ५१॥

दुर्गसमाश्रयस्याऽप्ययुक्ततां प्रतिपादयति—

दुर्गाऽऽश्रितानां बहुनाऽपि राजन्! कालेन पार्ष्णिग्रहणाऽऽदिहेतुः।
दुर्गोपरोधं न च कुर्वतोऽस्ति शत्रोश्चिरेणाऽपि दशास्य! हानिः॥५२॥

अन्वयः—हे राजन्! दुर्गाऽऽश्रितानाम् अपि बहुना कालेन पार्ष्णिग्रहणाऽऽदिहेतुः, हे दशाऽऽस्य! दुर्गोपरोधं कुर्वतः शत्रोश्च चिरेण अपि हानिः न॥

व्याख्या—हे राजन्=हे राक्षसेश्वर! दुर्गाश्रितानाम् अपि कृतदुर्गाश्रयाणाम् अपि, अस्माकमिति शेषः। बहुना=अधिकेन, कालेन=समयेन, पार्ष्णिग्रहणाऽऽदिहेतुः=पृष्ठवर्तिवैर्यादिहानिहेतुः, भविष्यतीति शेषः, अस्माकं जगद्वैरित्वादिति भावः। हे दशाऽऽस्य=हे राक्षसराज, दुर्गोपरोधम्=अस्मद्दुर्गाऽऽवरणं, कुर्वतः=विदधतः, शत्रोश्च=वैरिणश्च, चिरेण अपि=बहु कालेन अपि, हानिः=अपचयः, न=न भविष्यति, अतो दुर्गसमाश्रयणमपि न श्रेयस्करमिति भावः॥

व्युत्पत्तिः—दुर्गाऽऽश्रितानां=दुर्गमाश्रितास्तेषां 'द्वितीया श्रिताऽतीतपतितगताऽत्यस्तप्राप्ताऽऽपन्नैः' इति समासः। दशाऽऽस्य=दश आस्यानि यस्य सः, तत्सम्बुद्धौ। इन्द्रवज्रा वृत्तम्॥

भाषाऽर्थः—हे राजन्! दुर्ग को आश्रय करने वालोंका भी बहुत समय बीतने पर पार्ष्णिग्राह (पृष्ठवर्ती शत्रु) आदि हानिका कारण उत्पन्न होगा। हे दशानन! दुर्गका उपरोध करने वाले शत्रुकी बहुत समय बीतने पर भी हानि नहीं होगी॥५२॥

शस्त्रं तरूर्वीधरमम्बुपानं वृत्तिः फलैर्नो गजवाजिनार्यः।
राष्ट्रं न पश्चान्न जनोऽभिरक्ष्यः, किं दुःस्थमाचक्ष्व भवेत् परेषाम्॥ ५३॥

अन्वयः—तरूर्वीधरं शस्त्रम्, अम्बुपानं, फलैः वृत्तिः गजवाजिनार्यो नो, राष्ट्रं न पश्चात्, अभिरक्ष्यो जनो न, परेषां दुःस्थं किं भवेत्? आचक्ष्व॥

व्याख्या—तरूर्वीधरं=वृक्षपर्वतं, शस्त्रम्=आयुधम्, न शूलखड्गादीति भावः। अम्बु=जलं, पानं=पेयं, न मद्यादीति भावः। फलैः=पनसादिभिः, वृत्तिः जीविका, नौदनादिभिरिति भावः। गजवाजिनार्यः=करितुरङ्गललनाः, नो=न भवन्ति, अतः शरीरमात्रत्वान्निश्चिन्ता इति भावः। राष्ट्रं=देशोऽपि, न पश्चात्=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नाऽनन्तरविमर्शनीयमिति भावः। अत एव तदाभजनः अभिरक्ष्यः=अभिरक्षणीयः, जनः=पुरुषः, न=न वर्तते, एवं च सति विग्रहेणाऽपि परेषां=शत्रूणां, रामादीनामित्यर्थः, दुःस्थं=दुःखं, किं भवेत्=किं स्यात्, एतद्वैपरीत्येनाऽस्माकं तु विग्रहेण निरतिशयं दुःखं स्यादिति भावः। वद=कथय॥

व्युत्पत्तिः—तरूर्वीधरं=धरन्तीति धराः, पचाद्यच् उर्व्या धरा उर्वीधराः। तरवश्च उर्वीधराश्च तरूर्वीधरं, 'जातिरप्राणिनाम्' इति समाहारद्वन्द्वः॥

भाषाऽर्थः—हे राजन्! तिनके पेड़ और पर्वत, शस्त्र, जल पेय पदार्थ, फलोंसे वृत्ति है, और हाथी, घोड़े और स्त्रियां नहीं हैं, इसी तरह देश भी पीछे विमर्श योग्य नहीं है अत एव रक्षा करने योग्य जन भी नहीं इस स्थितिमें युद्ध होने पर भी शत्रुओं को दुःख क्या होगा? कहिए॥ ५३॥

संधानमेवाऽस्तु परेण तस्मान्नाऽन्योऽभ्युपायोऽस्ति निरूप्यमाणः।
नूनं विसन्धौ त्वयि सर्वमेतन्नेष्यन्ति नाशं कपयोऽचिरेण॥ ५४॥

अन्वयः—तस्मात् परेण सन्धानम् एव अस्तु, निरूप्यमाणः अन्यः, अभ्युपायः न अस्ति। त्वयि विसन्धौ कपयः सर्वम् एतत् नूनम् अचिरेण नाशं नेष्यन्ति॥

व्याख्या—तस्मात्=कारणात्, परेण=शत्रुणा रामेणेत्यर्थः। सन्धानम् एव=सन्धिः एव, अस्तु=भवतु। निरूप्यमाणः=चिन्त्यमानः, अन्यः=अपरः, अभ्युपायः साधनं, न अस्ति=नो वर्तते। त्वयि=भवति, विसन्धौ=सन्धिम् अकुर्वाणे सति, कपयः=वानराः, सर्वं=सकलम्, एतत्=इदं, स्वाम्यादिकं, नूनं=निश्चयेन, अचिरेण=अल्पकालेन, नाशं नेष्यन्ति=नाशयिष्यन्ति॥

व्युत्पत्तिः—विसन्धिः=विगतः सन्धिर्यस्मात्तस्मिन्। इन्द्रवज्रा वृत्तम्॥

भाषाऽर्थः—हे राजन्! इस कारण से शत्रु के साथ सन्धि ही हो। विचार करने पर दूसरा उपाय नहीं है। आपके सन्धि न करने पर वानर लोग यह सब निश्चय नष्ट कर डालेंगे॥ ५४॥

विभीषणोक्तं बहु मन्यमानः प्रोन्नम्य देहं परिणामनम्रम्।
स्खलद्वलिर्वार्धककम्प्रमूर्धा मातामहो रावणमित्युवाच॥ ५५॥

अन्वयः—विभीषणोक्तं बहु मन्यमानः परिणामनम्रं देहं प्रोन्नम्य स्खलद्वलिः वार्धककम्प्रमूर्धा मातामहो रावणम् इति उवाच॥

व्याख्या—विभीषणोक्तं विभीषणकथितं वचः, बहु=अधिकं, मन्यमानः=जानन्, श्लाघमान इति भावः। अत एव परिणामनम्रं=वयःपरिपाकाऽऽनमनशीलं,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देहं = शरीरं, प्रोन्नम्य = उत्क्षिप्य, स्खलद्वलिः = संचलज्जराश्लथचर्मा, वार्धककम्प्रमूर्धा = वृद्धभावेन कम्पनशीलमस्तकः, मातामहः = रावणमातृजनकः, माल्यवानित्यर्थः। रावणं = दशाननम् , इति = वक्ष्यमाणप्रकारं वचनम् , उवाच = अब्रवीत् ॥

व्युत्पत्तिः—परिणामनम्रं = नमनशीलो नम्रः, 'नमिकम्पिस्म्यजसकमहिंसदीपो र' इति रप्रत्ययः। परिणामेन नम्रः, तम्। स्खलद्वलिः = स्खलन्ती वलिर्यस्य सः। वार्द्धककम्प्रमूर्धा = वृद्धस्य भावो वार्धकं, 'द्वन्द्वमनोज्ञादिभ्यश्च' इति वुञ्, इति जयमङ्गलः। कम्पनशीलः कम्प्रः, 'नमिकम्पी–'त्यादिना रः। वार्द्धकेन कम्प्रो मूर्धा यस्य सः। मातामहः = मातुः पिता, 'पितृव्यमातुलमातामहपितामहा' इति मातृपितृभ्यां पितरि डामहच्' इति डामहच्प्रत्ययान्तो निपातः॥

भाषाऽर्थः—विभीषणके वचनको अधिक मानकर बुढ़ापेसे नम्र शरीरको ऊँचा कर बुढ़ापेसे चलनेवाले शिथिल चर्मसे और काँपने वाले शिरसे युक्त मातामह माल्यवान् ने रावणको ऐसा कहा॥ ५५॥

एकः पदातिः पुरुषो धनुष्मान् योऽनेकमायानि वियद्गतानि।
रक्षःसहस्राणि चतुर्दशाऽऽर्दीत् का तत्र वो मानुषमात्रशङ्का॥ ५६॥

अन्वयः—एकः पदातिः धनुष्मान् पुरुषो यः अनेकमायानि वियद्गतानि चतुर्दश रक्षःसहस्राणि आर्दीत् तत्र वः का मानुषमात्रशङ्का ?

व्याख्या—एकः एकाकी, असहाय इति भावः, तत्राऽपि पदातिः, न रथारूढः। धनुष्मान् = धनुर्मात्राऽऽयुधः, पुरुषः = मनुष्यः, न देवादिरिति भावः। यः = रामः, अनेकमायानि = बहुमायायुक्तानि, वियद्गतानि = आकाशप्राप्तानि, हन्तुमशक्यानीति भावः। एतादृशानि चतुर्दश रक्षःसहस्राणि = चतुर्दशसहस्रसंख्यानि रक्षांसि, आर्दीत् = हिंसितवान् , तत्र = तादृशे रामे, वः = युष्माकं, का = कीदृशी, मानुषमात्रशङ्का = मानवमात्रसन्देहः, रामो न मानव इति भावः॥

व्युत्पत्तिः—अनेकमायानि = अनेका माया येषां तानि अनेकमायानि, तानि। रक्षःसहस्राणि = रक्षसां सहस्राणि, तानि। आर्दीत् = 'अर्द हिंसायाम्' इति धातोर्लुङ्। मानुषमात्रशङ्का = मानुष एव मानुषमात्रं, 'मयूरव्यंसकादयश्च' इति समासः। मानुषमात्रस्य शङ्का। इन्द्रवज्रा वृत्तम्॥

भाषाऽर्थः—एकमात्र, पैदल, धनुर्धारी और मनुष्य होकर भी जिसने अनेक मायाओंसे युक्त और आकाशगत चौदह हजार राक्षसोंको मार डाला उस रामचन्द्रमें तुम लोगोंको क्या मनुष्यमात्र होनेकी शंका है ?॥ ५६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रामस्य दिव्यत्वं प्रदर्शयति—

ब्रह्मर्षिभिर्नूनमयं सदेवैः संतापितै रात्रिचरक्षयाय।
नराऽऽकृतिर्वानरसैन्यशाली जगत्यजय्यो विहितोऽभ्युपायः ॥ ५७ ॥

अन्वयः—सन्तापितैः सदेवैः ब्रह्मर्षिभिः वानरसैन्यशाली जगति अजय्यः नराऽऽकृतिः अयं नूनं रात्रिचरक्षयाय अभ्युपायो विहितः ॥

व्याख्या—सन्तापितैः = सम्पीडितैः, त्वयेति शेषः। सदेवैः = सुरसहितैः, ब्रह्मर्षिभिः = ऋष्यश्रृङ्गादिभिः, वानरसैन्यशाली=कपिसेनासम्पन्नः, जगति = लोके, अजय्यः = जेतुमशक्यः, नराऽऽकृतिः = मनुष्याऽऽकारः, आकारमात्रेण मनुष्यो वस्तुतस्तु देवविशेष इति भावः। अयं = रामः, नूनं = निश्चयेन, रात्रिचरक्षयाय=राक्षसवनाशाय अभ्युपायः = साधनभूतः, विहितः = कृतः।

व्युत्पत्तिः—वानरसैन्यशाली=वानराणां सैन्यं, तेन शाडते (शालते=शोभते) तच्छीलः, सोपपदात् 'शाड़ृ श्लाघायाम्' इति धातोर्णिनिः। अजय्यः = जेतुं शक्यो जय्यः, 'क्षय्यजय्यौ शक्यार्थे' इति यान्ताऽऽदेशनिपातः। न जय्यः। नराऽऽकृतिः= नरस्येव आकृतिर्यस्य सः। रत्रिचरक्षयाय=रात्रौ चरन्तीति रात्रिचराः, 'चरेष्ट' इति टः 'रात्रिञ्चरो रात्रिचरः कर्बुरो निकषाऽऽत्मजः।' इत्यमरः। 'रात्रेः कृति विभाषा' इति मुम्पक्षे 'रात्रिञ्चर' इत्यपि। रात्रिचराणां क्षयाय, तादर्थ्ये चतुर्थी ॥

भाषाऽर्थः—तुमसे सन्तप्त किये गये देवताओंके साथ ऋष्यश्रृङ्ग आदि ब्रह्मर्षियोंने वानर-सेनासे सम्पन्न जगत्‌में जीतनेको अशक्य मनुष्यके आकारवाले ये राम निश्चय राक्षसोंके क्षयके लिए साधनरूप विहित किये गये हैं ॥ ५७ ॥

एतादृशमाचरणं देवानां मया दृष्टमिति दर्शयति—

वज्राऽभिघातैरविरुग्णमूर्तेः फेनैर्जलानामसुरस्य मूर्ध्नः।
चकार भेदं मृदुभिर्महेन्द्रो यथा तथैतत् किमपीति बोध्यम् ॥ ५८ ॥

अन्वयः—महेन्द्रो वज्राऽभिघातैः अविरुग्णमूर्तेः असुरस्य मूर्ध्नः मृदुभिः जलानां फेनैः यथा भेदं चकार तथा एतत् किमपि इति बोध्यम् ॥

व्याख्या—महेन्द्रः = देवराजः, वज्राभिघातैः = कुलिशताडनैरपि अविरुग्णमूर्तेः = अचूर्णितकायस्य, असुरस्य = दैत्यस्य, नमुचेरित्यर्थः। मूर्ध्नः = शिरसः, मृदुभिः = कोमलैः, जलानाम् = अम्बूनां, फेनैः = डिण्डीरैः, यथा येन प्रकारेण, भेदं = छेदं, चकार = कृतवान् , तथा = तेनैव प्रकारेण एतत् = इदं किमपि = नराऽऽकृति वस्तु, इति = एवं, बोध्यं = ज्ञेयम् , देवकार्यसाधकमिति शेषः ॥

व्युत्पत्तिः—अविरुग्णमूर्तेः = अविरुग्णा मूर्तिर्यस्य, तस्य। 'मूर्तिः काठिन्यका-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यथोः' इत्यमरः। मृदुभिः='कोमलं मृदुलं मृदु' इत्यमरः। फेनैः='डिण्डीरोऽब्धिकफः फेन' इत्यमरः॥

भाषाऽर्थः—इन्द्रने वज्रके प्रहारोंसे भी अचूर्णित शरीरवाले नमुचि नामक दैत्यके शिरका कोमल जलके फेनसे जैसे छेदन किया वैसे ही यह नराकार वस्तु भी देवताओंका कार्यसाधक है यह जानना चाहिए॥ ५८॥

क्व स्त्रीविषह्याः करजाः क्व वक्षो दैत्यस्य शैलेन्द्रशिलाविशालम्।
संपश्यतैतद् द्युसदां सुनीतं बिभेद तैस्तन्नरसिंहमूर्तिः॥ ५९॥

अन्वयः—स्त्रीविषह्याः करजाः क्व? शैलेन्द्रशिलाविशालं दैत्यस्य वक्षः क्व? द्युसदाम् एतत् सुनीतं संपश्यत नरसिंहमूर्तिः तैः तत् बिभेद॥

व्याख्या—स्त्रीविषह्याः=ललनाभिरपि सोढुं शक्याः, करजाः=नखाः, क्व=कुत्र, शैलेन्द्रशिलाविशालं=पर्वतेन्द्रप्रस्तरपृथुलं, दैत्यस्य=हिरण्यकशिपोः, वक्षः=उरःस्थलं, क्व=कुत्र, उभयोर्महदन्तरमिति भावः। तथाऽपि द्युसदां=देवानाम्, एतत=इदं, सुनीतं=सुनयं, संपश्यत=संविलोकयत, यत् नरसिंहमूर्तिः=नृसिंहाकारः, हरिः तैः=तादृशैर्नखैः, स्त्रीविषह्यैरिति भावः। तत् हिरण्यकशिपुवक्षःस्थलं, शैलेन्द्रशिलाविशालमिति तात्पर्यम्। बिभेद=विदारितवान्, तद्वन्मनुष्योऽपि रामो राक्षसान्हनिष्यतीति भावः॥

व्युत्पत्तिः—स्त्रीविषह्याः=विषोढुं शक्या विषह्याः, विपूर्वकात् 'षह मर्षणे' इति धातोः 'शकिसहोश्च' इति यत 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' इति सस्य षः। स्त्रीभिर्विषह्याः, पक्षे 'कृत्यानां कर्तरि वा' इति षष्ठी च। करजाः=करे जाताः, 'सप्तम्यां जनेर्डः' इति डः। शैलेन्द्रशिलाविशालं=शैलेन्द्रशिलेव विशालम्। अत्र अनौचित्यादनेकाऽन्वयकल्पनाद्विषमाऽलङ्कारः।

भाषाऽर्थः—स्त्रियोंसे सहे जा सकने वाले नख कहाँ? और श्रेष्ठ पर्वतके पत्थरके तुल्य हिरण्यकशिपुकी छाती कहाँ? तो भी देवताओं की इस सुनीतिको देखो, नृसिंहकी मूर्तिवाले हरिने वैसे वक्षःस्थल को फाड़ डाला॥ ५९॥

रावणमुपालभते—

प्रमादवांस्त्वं क्षतधर्मवर्त्मा गतो मुनीनामपि शत्रुभावम्।
कुलस्य शान्तिं बहु मन्यसे चेत् कुरुष्व राजेन्द्र! विभीषणोक्तम्॥ ६०॥

अन्वयः—हे राजन्! प्रमादवान् क्षतधर्मवर्त्मा त्वं मुनीनाम् अपि शत्रुभावं गतः। कुलस्य शान्तिं बहु मन्यसे चेत् विभीषणोक्तं कुरुष्व॥

व्याख्या—हे राजन्=हे राक्षसराज!, प्रमादवान्=अनवधानतोपेतः, अत

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एव—हतधर्मवर्त्मा=त्यक्ताचारः, त्वं मुनीनाम् अपि=शमे स्थितानाम् अपि किमुत अन्येषामिति भावः। शत्रुभावं=विरोधं, गतः=प्राप्तः, असीति शेषः। ईदृशोऽपि कुलस्य=वंशस्य, शान्तिं=शमं कल्याणमिति भावः। बहु=अधिकं यथा तथा, मन्यसे चेत्=विमृशसि यदि, तर्हि विभीषणोक्तं= विभीषणकथितं कर्म, कुरुष्व = विधेहि ॥

व्युत्पत्तिः—हतधर्मवर्त्मा = हतं धर्मवर्त्म येन सः। उपेन्द्रवज्रा वृत्तम् ॥

भाषाऽर्थः—हे राजन्! प्रमाद करने वाले आचार का त्याग करने वाले तुम, मुनियोंके भी शत्रुभाव को प्राप्त हो गये हो। कुलकी शान्ति को कल्याण मानते हो तो विभीषण के कहे हुए कर्म को करो ॥ ६० ॥

घोषेण तेन प्रतिलब्धसंज्ञो निद्राऽऽविलाऽक्षः श्रुतकार्यसारः।
स्फुरद्घनः साऽम्बुरिवाऽन्तरीक्षे वाक्यं ततोऽभाषत कुम्भकर्णः ॥ ६१ ॥

अन्वयः—ततः तेन घोषेण प्रतिलब्धसंज्ञः निद्राऽऽविलाऽक्षः श्रुतकार्यसारः कुम्भकर्णः अन्तरीक्षे साऽम्बुः स्फुरद्घन इव वाक्यम् अभाषत ॥

व्याख्या—ततः=माल्यवद्वचनाऽनन्तरं, तेन=प्राक्संजातेन, घोषेण = ध्वनिना, प्रतिलब्धसंज्ञः = प्राप्तचेतनः,विबुद्ध इत्यर्थः। निद्राऽऽविलाऽक्षः=स्वापकलुषलोचनः, श्रुतकार्यसारः=आकर्णितकृत्यसारः, कुम्भकर्णः=रावणमध्यमभ्राता, अन्तरीक्षे = आकाशे, साऽम्बुः=सजलः, स्फुरद्घन इव = शब्दायमानमेघ इव,वाक्यं=वक्ष्यमाण-रकारकं पदसमूहम्, अभाषत=भाषितवान् ॥

व्युत्पत्तिः—प्रतिलब्धसंज्ञः = प्रतिलब्धा संज्ञा येन सः, 'संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चाऽर्थसूचना।' इत्यमरः। निद्राऽऽविलाऽक्षः = निद्रया आविले ईक्षणे यस्य सः, 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्' इति समासाऽन्तः षच। श्रुतकार्य-सारः = श्रुतः कार्यसारो येन सः। उपमाऽलङ्कारः ॥

भाषाऽर्थः—माल्यवान् के वचन के अनन्तर उस ध्वनि से होशमें आकर निद्रासे कलुष नेत्रोंवाला, कार्यसारको सुननेवाला कुम्भकर्ण आकाशमें जलयुक्त और शब्द करने वाले मेघ के सदृश हो वाक्य कहने लगा ॥ ६१ ॥

क्रियासमारम्भगतोऽभ्युपायो नृद्रव्यसम्पत् सहदेशकाला।
विपत्प्रतीकारयुताऽर्थसिद्धिर्मन्त्राङ्गमेतानि वदन्ति पञ्च ॥ ६२ ॥

अन्वयः—(हे राजन्!)। क्रियासमारम्भगतः अभ्युपायः सहदेशकाला नृद्रव्यसम्पत् विपत्प्रतीकारयुता अर्थसिद्धिः एतानि पञ्च मन्त्राऽङ्गं वदन्ति ॥

व्याख्या—(हे राजन्!) क्रियासमारम्भगतः =दुर्गादिकर्मोपक्रमप्राप्तः, अभ्यु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पायः = साधनम् , कर्मणामारम्भोपाय इत्यर्थः। इदमेकमङ्गम् । सहदेशकाला = देशकालसहिता, नृद्रव्यसम्पत् = पुरुषद्रव्यसम्पत्तिः । इदं द्वितीयमङ्गम् , एवं च देशकालविभागः, इदं तृतीयमङ्गम् । अत्र नृद्रव्ययोः सहवचनमन्योन्योपयोगसूचनार्थम् । देशकालयोः सहवचनमपि योगवाहित्वज्ञापनार्थम् । विपत्प्रतीकारयुता = आपत्प्रतीकारोपेता अर्थसिद्धिः = कार्यसिद्धिः । विपत्प्रतीकार इदं चतुर्थमङ्गम् । एवं च अर्थसिद्धिरिदं पञ्चममङ्गम् । एतानि=इमानि, सम्प्रति कथितानि, पञ्च = क्रियारम्भगताऽभ्युपायादीनि, मन्त्राऽङ्गं = मन्त्राऽवयवं, वदन्ति = कथयन्ति, नीतिज्ञा इति शेषः । अत्र मन्त्राङ्गमिति एकवचनेन एतेषामभ्युपायादीनां तृणारणिमणिन्यायेन पार्थक्येन न मन्त्राङ्गत्वमपि तु मिलितत्वेनैवेति सूच्यते ।

व्युत्पत्तिः—क्रियासमारम्भगतः=क्रियाणां समारम्भस्तं गतः । सहदेशकाला = देशकालाभ्यां सहितेति तुल्ययोगबहुव्रीहिः । नृद्रव्यसम्पत्=नृणां द्रव्याणां च सम्पत् । विपत्प्रतीकारयुता = प्रतिकरणं प्रतीकारः, 'भावे' इति घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति उपसर्गस्य दीर्घत्वम् । विपदः प्रतीकारेण युता । मन्त्राऽङ्गं= मन्त्रस्याऽङ्गम् ॥

भावार्थः—'हे राजन् ! दुर्ग आदि कर्मों के आरम्भ को प्राप्त उपाय, देश और काल, मनुष्यद्रव्यसम्पत्ति, आपत्तिप्रतीकार और अर्थसिद्धि इन पाँचों को मन्त्राङ्ग कहते हैं ॥ ६२ ॥

न निश्चिताऽर्थं समयं च देशं क्रियाऽभ्युपायादिषु योऽतियायात्
स प्राप्नुयान्न मन्त्रफलं न मानी काले विपन्ने क्षणदाचरेन्द्र ॥ ६३ ॥

अन्वयः—हे क्षणदाचरेन्द्र ! यः क्रियाऽभ्युपायादिषु निश्चिताऽर्थं समयं देशं च न अतियायात् , स मन्त्रफलं प्राप्नुयात् , मानी काले विपन्ने न ॥

व्याख्या—हे क्षणदाचरेन्द्र = हे राक्षसराज ! यः = जिगीषुः, क्रियाऽभ्युपायादिषु = क्रियाऽभ्युपाये, नृद्रव्यसम्पदि विपत्प्रतीकारे च सति, निश्चिताऽर्थं = निर्णीतकार्यं, समयं = कालं, देशं च = स्थानं च, न अतियायात् = न अतिक्रामेत् , सः = जिगीषुः, मन्त्रफलम् = अर्थसिद्धिं, प्राप्नुयात् = लभेत, एतद्वैपरीत्येन चरन् मानी= अभिमानी, भवादृश इति भावः । काले = समये, विपन्ने = अतिक्रान्ते सति, न = मन्त्रफलं न प्राप्नुयात् , देशकालाऽतिक्रमणादिति भावः । प्राक् सीताहरण एव मन्त्रणा प्राप्तकाला, मानित्वात्सा नाऽनुष्ठिता साम्प्रतं मन्त्रेण किं साध्यमित्याकूतम् ॥

व्युत्पत्तिः—क्षणदाचरेन्द्र = क्षणदायां चरन्तीति क्षणदाचराः, 'चरेष्ट' इति टः तेष्विन्द्रस्तत्सम्बुद्धौ । क्रियाऽभ्युपायादिषु = क्रियाऽभ्युपाय आदिर्येषां, तेषु ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—हे राक्षसराज ! जो जिगीषु (जयाऽभिलाषी) क्रियाके उपाय आदियोंमें निश्चित कार्यवाले काल और देशका अतिक्रमण नहीं करता है, वह कार्य-सिद्धिको प्राप्त करेगा । इसके विपरीत अभिमानी पुरुष कालके अतिक्रान्त होनेपर कार्यसिद्धिको प्राप्त नहीं करेगा ॥ ६३ ॥

औष्ण्यं त्यजेन्मध्यगतोऽपि भानुः शैत्यं निशायामथवा हिमांशुः ।
अनर्थमूलं भुवनाऽवमानी मन्ये न मानं पिशिताशिनाथ ॥ ६४ ॥

अन्वयः—हे पिशिताऽशिनाथ ! भानुः मध्यगतोऽपि औष्ण्यं त्यजेत्, अथ वा हिमांऽशुः निशायां शैत्यं त्यजेत्; भुवनाऽवमानी अनर्थमूलं मानं न त्यजेत्, (इति) मन्ये ॥

व्याख्या—हे पिशिताऽशिनाथ = हे राक्षसराज ! भानुः = सूर्यः, मध्यगतोऽपि = वियन्मध्यप्राप्तोऽपि, मध्याह्नेपीति भावः । औष्ण्यम् = उष्णतां, त्यजेत् = मुञ्चेत्, अथ वा = उताहो, हिमांऽशुः = चन्द्रः, निशायां = रात्रौ, शैत्यं = शीततां त्यजेत् = मुञ्चेत्, भुवनाऽवमानी = जगत्तिरस्करणशीलः, भवादृश इति भावः । अनर्थमूलम् = अनिष्टकारणं, मानम् = अभिमानं, न त्यजेत् = न मुञ्चेत्, (इति = एवम्) मन्ये = जानामि, अहमिति शेष । साम्प्रतं सीतासमर्पणादेव तव रक्षा, तच्च मानिना त्वया न विधास्यत इति तात्पर्यम् ॥

व्युत्पत्तिः—हे पिशिताऽशिनाथ = पिशितमश्नन्तीति तच्छीलाः पिशिताऽशिनः, 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः । पिशिताऽशिनां नाथस्तत्सं-बुद्धौ । औष्ण्यम् = उष्णस्य भावः कर्म वा औष्ण्यं, तत् । 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । एवं शैत्यमित्यत्राऽपि । भुवनाऽवमानी = भुवनमवमन्यते तच्छील इति, णिनिः । त्यजेत् = संभावनायां लिङ् ॥

भाषाऽर्थः—हे राक्षसराज ! सूर्य मध्याह्नमें उष्णताका अथवा चन्द्र रातमें शैत्यको भले ही छोड़ें, परन्तु लोकका तिरस्कार करनेवाला पुरुष अनर्थमूल अभि-मानका त्याग नहीं करेगा मैं ऐसा जानता हूँ ॥ ६४ ॥

तथाऽपि वक्तुं प्रसभं यतन्ते यन्मद्विधाः सिद्धिमभीप्सवस्त्वाम् ।
विलोमचेष्टं विहिताऽवहासाः परैहि तत् स्नेहमयैस्तमोभिः ॥ ६५ ॥

अन्वयः—तथाऽपि सिद्धिम् अभीप्सवो मद्विधाः परैः विहिताऽवहासाः (सन्तः) विलोमचेष्टं त्वां प्रसभं वक्तुं यत् यतन्ते, तत् स्नेहमयैः तमोभिः हि ।

व्याख्या—तथाऽपि = एवमपि, सिद्धिं = कार्यसाफल्यम्, अभीप्सवः = आप्तु-मेषणशीलाः मद्विधाः = मादृशाः विभीषणादय इति शेषः । परैः = अन्यैः, प्रह-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तादिभिरुद्धतैर्जनैः शत्रुभिर्वा । विहिताऽवहासाः = कृतोपहासाः सन्तोपि, विलोम-चेष्टं = प्रतिकूलचेष्टितं, त्वां = भवन्तं, प्रसभं = बलात्, वक्तुं = परिभाषितुं, यतन्ते = प्रयत्नं कुर्वन्ति, तत् = वचनाऽर्थं प्रयतनं, स्नेहमयैः = प्रीतिस्वभावैः, तमोभिः = अज्ञानैः, हि = निश्चयेन । एवं सत्यपि वचनाऽर्थमस्माकं प्रवर्तनं स्नेहमयाऽज्ञानमूल-मिति भावः ॥

व्युत्पत्तिः—मद्विधाः = ममेव विधा (प्रकारः) येषां ते । विहिताऽवहासाः = अवहसनमवहासः, 'भावे' इति घञ् । विहितः अवहासो येषां ते । विलोमचेष्टं = विलोमा चेष्टा यस्य, तम् ॥

भाषाऽर्थः—ऐसा होनेपर भी कार्यसाफल्यको प्राप्त करनेकी इच्छा रखनेवाले मेरे ऐसे पुरुष और पुरुषोंके उपहास करने पर भी प्रतिकूल चेष्टावाले आपसे वलपूर्वक वोलनेके लिए जो यत्न करते हैं, वह प्रचुरस्नेहसे सम्पन्न अज्ञानोंके कारणसे ॥ ६५ ॥

क्रूराः क्रियाः ग्राम्यसुखेषु सङ्गः पुण्यस्य यः संक्षयहेतुरुक्तः ।
निषेवितोऽसौ भवताऽतिमात्रं फलत्यवल्गु ध्रुवमेव राजन् ॥ ६६ ॥

अन्वयः—हे राजन् ! क्रूराः क्रियाः, ग्राम्यसुखेषु सङ्गः यः पुण्यस्य संक्षयहेतुः उक्तः । असौ भवता अतिमात्रं निषेवितः (सन्) अवल्गु ध्रुवम् एव फलति ॥

व्याख्या—हे राजन् = हे भूपाल !, क्रूराः = कठोराः, क्रियाः = कर्माणि, परहिं-सादयः, ग्राम्यसुखेषु = सुरतेषु परदारोपभोगादिषु इति भावः । सङ्गः = आसक्तिः, यः, पुण्यस्य = तपसोपार्जितस्य धर्मस्य, संक्षयहेतुः = विनाशकारणम्, उक्तः = अभिहितः, विद्यावृद्धैरिति शेषः । असौ = पुण्यसंक्षयहेतुः, परहिंसादिः ग्राम्यधर्मश्चेति भावः । भवता = त्वया, अतिमात्रम् = अत्यर्थं, निषेवितः = आचरितः सन्, अवल्गु = अमनोहरं, ध्रुवम् एव = नियतम् एव, फलति = फलं दास्यति, अत आत्मरक्षणाऽ-भिलाषिणा भवता पूर्वोक्तं व्यसनं सर्वथैव परिहर्तव्यमिति भावः ॥

व्युत्पत्तिः—अवल्गु = न वल्गु यथा स्यात्तथेति क्रियाविशेषणम् ॥

भाषाऽर्थः—हे राजन् ! परहिंसा आदि क्रूर क्रियामें और परस्त्रीगमन आदि-योंमें आसक्ति इनको विद्वानोंने पुण्यक्षय का कारण बतलाया है, आपसे अतिशय सेवित होकर ये अमनोहर रूपसे निश्चय दुष्टफल देंगे ॥ ६६ ॥

एवं स्थितेऽपि त्वदर्थं प्राणत्यागेऽपि नाऽहं पश्चात्पद इति प्रतिपादयति—

दत्तं न किं, के विषया न भुक्ताः स्थितोऽस्मि वा कं परिभूय नोच्चैः ।
इत्थं कृताऽर्थस्य मम ध्रुवं स्यान्मृत्युस्त्वदर्थे यदि किं न लब्धम् ॥ ६७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—(हे राजन् !) किं न दत्तं ? के विषया न भुक्ताः ? वा कं परिभूय उच्चैः स्थितो न अस्मि ? इत्थं कृताऽर्थस्य मम त्वदर्थे मृत्युः ध्रुवं स्यात् यदि, किं न लब्धम् ? ॥

व्याख्या—हे राजन् ! किं = वस्तु, न दत्तं = नो वितीर्णम् अर्थिभ्य इति शेषः । के, विषयाः = उपभोग्याः पदार्थाः, स्रक्चन्दनवनिताऽऽदय इति भावः, न भुक्ताः = न अनुभूताः, सर्वं एवाऽनुभूता इति भावः । वा=अथवा, कं = जनं, परिभूय = तिरस्कृत्य, उच्चैः = महति पदे, स्थितः = विद्यमानः, न अस्मि = नो वर्ते, इत्थम् = अनेन प्रकारेण, कृताऽर्थस्य= कृतकृत्यस्य, प्राप्तजन्मफलस्येति भावः । त्वयेति शेषः । एतादृशस्य मम = कुम्भकर्णस्य, त्वदर्थे=भवदर्थे, मृत्युः=मरणं, ध्रुवं=नियतं, स्यात् यदि=भवेत् यदि, तर्हि किं=किं फलं, न लब्धं=न प्राप्तं, इत उत्तरं भवदर्थं प्राणत्यागेन मया सर्वं जन्मफलं लप्स्यत इति भावः ।

व्युत्पत्तिः—विषयाः = 'रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी । गोचरा इन्द्रियाऽर्थाश्च' इत्यमरः । इत्थम् = 'इदमस्थमुः' इति थमुप्रत्ययः ।

भाषाऽर्थः—हे राजन् ! याचकोंको क्या नहीं दिया ? किन विषयोंका अनुभव नहीं किया ? अथवा किसको तिरस्कार करके उन्नतपदमें बैठा नहीं हूँ ? इस प्रकारसे कृतकृत्य मेरी आपके लिए मृत्यु नियत हो तो मैंने क्या नहीं पाया ?॥६७॥

किं दुर्नयैस्त्वय्युदितैर्मृषाऽर्थैर्वीर्येण वक्ताऽस्मि रणे समाधिम् ।
तस्मिन् प्रसुप्ते पुनरित्थमुक्त्वा विभीषणोऽभाषत राक्षसेन्द्रम् ॥ ६८ ॥

अन्वयः—(हे राजन्) त्वयि उदितैः मृषाऽर्थैः दुर्नयैः किं ? रणे वीर्येण समाधिं वक्तास्मि इत्थम् उक्त्वा तस्मिन् प्रसुप्ते विभीषणः राक्षसेन्द्रम् पुनः अभाषत ।

व्याख्या—(हे राजन् !) त्वयि=भवद्विषये, उदितैः = उक्तैः, प्रहस्तादिभिरिति शेषः । मृषाऽर्थैः = मिथ्याऽभिधेयैः 'किं द्यौरधोऽस्तु' इत्यादिरूपैरिति भावः । दुर्नयैः = दुर्नीतिभिः, किं = किं फलं, न किञ्चिदिति भावः । रणे=युद्धे, वीर्येण= पराक्रमेण, रामसम्बन्धिनेति शेषः । समाधिं=प्रतिकारं, तेषां वाक्यानामिति शेषः । वक्तास्मि=वदितास्मि, इत्थम् = एवम्, उक्त्वा=कथयित्वा, तस्मिन् = कुम्भकर्णे, प्रसुप्ते = निद्रिते सति, विभीषणः=रावणकनिष्ठाऽनुजः, राक्षसेन्द्रं=रावणम् , पुनः= भूयः, अभाषत=भाषितवान् ।

व्युत्पत्तिः—मृषाऽर्थैः = मृषेत्यव्ययम् । मृषाऽर्थो येषां, तैः । दुर्नयैः=दुष्टा नया दुर्नयास्तैः, 'कुगतिप्रादय' इति समासः ।

भाषाऽर्थः—हे राजन् ! आपको कहे गये मिथ्या अर्थवाले दुर्नयोंसे क्या फल

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

होगा ? युद्धमें रामके पराक्रमसे उनका प्रतीकार बतलाऊंगा ऐसा कहकर कुम्भकर्णके सोनेपर विभीषणने रावण को फिर कहा ॥ ६८ ॥

साम्प्रतमपशकुनं प्रतिपादयति—

निमित्तशून्यैः स्थगिता रजोभिर्दिशो, मरुद्भिर्विकृतैर्विलोलैः।
स्वभावहीनैर्मृगपक्षिघोषैः क्रन्दन्ति भर्तारमिवाऽभिपन्नम् ॥ ६९ ॥

अन्वयः—निमित्तशून्यैः रजोभिः विकृतैः विलोलैः मरुद्भिः स्थगिता दिशः स्वभावहीनैः मृगपक्षिघोषैः अभिपन्नं भर्तारं क्रन्दन्ति इव ॥

व्याख्या—निमित्तशून्यैः = कारणरहितैः स्वत उत्पन्नैरिति भावः। रजोभिः = धूलिभिः, एवं च—विकृतैः = विकारयुक्तैः कठोरैरित्यर्थः। विलोलैः=चञ्चलैः, अनियतदिग्वर्तिभिरिति भावः, एतादृशैः मरुद्भिः = वायुभिः, स्थगिताः = संछादिताः, दिशः = काष्ठाः, स्वभावहीनैः = निसर्गभ्रष्टैः, मृगपक्षिघोषैः=पशुविहगशब्दैः, अभिपन्नं = मृतं, भर्तारं=पतिं, क्रन्दन्ति इव=आह्वयन्ति इव, इत्थं प्रतीयन्ते इति शेषः।

व्युत्पत्तिः—निमित्तशून्यैः = निमित्तेन शून्यानि, तैः। स्थगिताः = 'स्थग संवरणे' इति धातोः क्तप्रत्यय इति जयमङ्गलः। क्रन्दन्ति = 'क्रदि आह्वाने रोदने च' इति धातोर्लट्। अत्र क्रियोत्प्रेक्षा ॥

भाषाऽर्थः—हे राजन् ! विना कारणके उत्पन्न धूलियोंसे तथा कठोर और चञ्चल वायुओंसे आच्छादित दिशायें अस्वाभाविक मृग और पक्षियोंके शब्दोंसे मृत पतिको बुला रहे जैसे प्रतीत हो रहे हैं ॥ ६९ ॥

उत्पातजं छिद्रमसौ विवस्वान् व्यादाय वक्त्राऽऽकृति लोकभीष्मम्।
अत्तुं जनान् धूसररश्मिराशिः सिंहो यथा कीर्णसटोऽभ्युदेति ॥७०॥

अन्वयः—धूसररश्मिराशिः असौ विवस्वान् कीर्णसटः सिंहो यथा वक्त्राऽऽकृति लोकभीष्मम् उत्पातजं छिद्रं व्यादाय जनान् अत्तुम् अभ्युदेति ॥

व्याख्या—धूसररश्मिराशिः = ईषत्पाण्डुकिरणसमूहः, असौ = विप्रकृष्टदेशवर्ती, विवस्वान् = सूर्यः, कीर्णसटः = प्रसारितकेसरकलापः, सिंहो यथा = केसरी इव, वक्त्राकृति = मुखाकारं, लोकभीष्मं = भुवनभयङ्करम् , उत्पातजम् = औत्पातिकं, छिद्रं = रन्ध्रं, व्यादाय=प्रसार्य, जनान् = लोकान् , अत्तुं = भक्षयितुम् , अभ्युदेति= उद्गच्छति ॥

व्युत्पत्तिः—धूसररश्मिराशिः = धूसरो रश्मिराशिर्यस्य सः। कीर्णसटः = कीर्णा सटा यस्य सः। वक्त्राऽऽकृति=वक्त्रस्येव आकृतिर्यस्य तत्। उत्पातजं=उत्पाताज्जा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं, 'पञ्चम्यामजातौ' इति डप्रत्ययः। व्यादाय=व्याङ्पूर्वात् ददातेः, क्त्वः 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यप्। उपमाऽलङ्कारः। इन्द्रवज्रा वृत्तम्॥

भाषाऽर्थः—धूसर किरणसमूहोंसे युक्त सूर्य फैले हुए केसरोंवाले सिंहके सदृश हो मुख की आकृतिवाले, लोकमें भयको उत्पन्न करने वाले छिद्र को फैलाकर जनोंको खाने के लिये उग रहा है॥ ७०॥

मार्गं गतो गोत्रगुरुर्भृगूणामगस्तिनाऽध्यासितविन्ध्यश्रृङ्गम्।
संदृश्यते शक्रपुरोहिताऽह्नि क्ष्मां कम्पयन्त्यो निपतन्ति चोल्काः॥ ७१॥

अन्वयः—भृगूणां गोत्रगुरुः अगस्तिना अध्यासितविन्ध्यश्रृङ्गं मार्गं गतः। अह्नि शक्रपुरोहितः संदृश्यते। उल्काश्च क्ष्मां कम्पयन्त्यो निपतन्ति॥

व्याख्या—भृगूणां=भृगुवंशस्थानां, गोत्रगुरुः=कुलगुरुः, शुक्र इत्यर्थः। अगस्तिना=अगस्त्यमुनिना, अध्यासितविन्ध्यश्रृङ्गम् = अधिष्ठितविन्ध्यपर्वतशिखरं, तदेव मार्गं = पन्थानं, गतः = प्राप्तः, दक्षिणमार्गचारी शुक्र इत्यर्थः। स च अनिष्टहेतुरिति ज्यौतिषशास्त्रप्रसिद्धिः। एवं च—अह्नि = दिवसे, शक्रपुरोहितः=इन्द्रपुरोधाः, बृहस्पतिरित्यर्थः। संदृश्यते = समवलोक्यते, तथैव—उल्काश्च = निर्गतज्वालाश्च, क्ष्मां = पृथिवीं, कम्पयन्त्यः = वेपयन्त्यः, निपतन्ति = निपतनं कुर्वन्ति सर्वं चैतन्महाऽनिष्टहेतुरिति भावः॥

व्युत्पत्तिः—भृगूणां=भृगूणां गोत्राऽपत्यानि पुमांसो भृगवस्तेषाम्, 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यणः 'अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च' इति लुक् 'निमित्ताऽपाये नैमित्तिकस्याऽप्यपाय' इति न्यायेन आदिवृद्धेर्निवृत्तिश्च। अध्यासितविन्ध्यश्रृङ्गम्=अध्यासितं च तत् विन्ध्यश्रृङ्गं, तत्॥

भाषाऽर्थः—भृगुवंशमें उत्पन्न पुरुषोंके कुलगुरु शुक्र अगस्त्यसे अधिष्ठित विन्ध्यपर्वतके शिखर रूप मार्ग को गये हैं, दिनमें बृहस्पति दिखाई देते हैं और उल्कायें पृथ्वी को कम्पित करतीं हुई गिर रहीं हैं॥ ७१॥

मांसं हतानामिव राक्षसानामाशंसवः क्रूरगिरो रुवन्तः।
क्रव्याऽशिनो दीप्तकृशानुवक्त्रा भ्राम्यन्त्यभीताः परितः पुरं नः॥ ७२॥

अन्वयः—हतानाम् राक्षसानां मांसम् आशंसवः इव क्रूरगिरो रुवन्तो दीप्तकृशानुवक्त्राः क्रव्याऽशिनः अभीताः (सन्तः) नः पुरं परितः भ्राम्यन्ति॥

व्याख्या—हतानाम् = मारितानाम्, राक्षसानां = यातुधानानां, मांसं = क्रव्यम्, आशंसवः इव = आकाङ्क्षन्तः इव, क्रूरगिरः=कठोरस्वनाः, रुवन्तः = नदन्तः, दीप्तकृशानुवक्त्राः = प्रज्वलिताऽग्निमुखाः, क्रव्याऽशिनः = मांसभुजः, श्रृगालादय

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यर्थः। अभीताः=अत्रस्ताः सन्तः, नः अस्माकं, पुरं परितः=लङ्कां सर्वतः, भ्राम्यन्ति=भ्रमणं कुर्वन्ति ॥

व्युत्पत्तिः—आशंसवः=आशंसितुमिच्छवः, 'सनाशंसभिक्ष उः' इति उप्रत्ययः। क्रूरगिरः=क्रूरा गीर्येषां ते। दीप्तकृशानुवक्त्राः=दीप्तकृशानुरिव वक्त्रं येषां ते। क्रव्याऽशिनः=क्रव्यमश्नन्तीति तच्छीलाः, ताच्छील्ये णिनिः। पुरं='परित' इति पदेन योगे 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति द्वितीया। भ्राम्यन्ति='भ्रमु अनवस्थाने' इति धातोर्लट्। 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः' इति श्यन् वा। तदभावे शपि भ्रमन्ति। इन्द्रवज्रावृत्तम् ॥

भाषाऽर्थः—मारे गये राक्षसोंके मांस की इच्छा करते हुएके सदृश, कठोर शब्द वाले, चिल्लाते हुए, प्रदीप्त अग्निके सदृश मुखवाले, मांस-भक्षक शृगाल आदि जन्तु निर्भीक होते हुए हम लोगों की लङ्काके चारों ओर घूम रहे हैं ॥७२॥

पयो घटोध्नीरपि गा दुहन्ति मन्दं विवर्णं विरसं च गोपाः।
हव्येषु कीटोपजनः सकेशो न दीप्यतेऽग्निः सुसमिन्धनोऽपि ॥ ७३ ॥

अन्वयः—गोपा घटोध्नीः अपि गाः मन्दं विवर्णं विरसं च पयो दुहन्ति। हव्येषु सुसमिन्धनोऽपि अग्निः कीटोपजनः सकेशः (सन्) न दीप्यते ॥

व्याख्या—गोपाः=गोपालाः, घटोध्नीः अपि=पीवरस्तनीः अपि, गाः=धेनूः, मन्दम्=अल्पं, विवर्णं=स्वाभाविकवर्णरहितं, विरसं च=अस्वादु च, पयः=दुग्धं, दुहन्ति=प्रपूरयन्ति, हव्येषु=हवनीयपदाऽर्थेषु, घृतादिषु सत्सु इति भावः। सुसमिन्धनोऽपि=अतिशोभनकाष्ठयुक्तोऽपि, अग्निः=अनलः, कीटोपजनः=कीटोत्पत्तियुक्तः, सकेशः=शिरोरुहसहितः सन्, न दीप्यते=नो ज्वलति।

व्युत्पत्तिः—गोपाः=गाः पान्तीति, 'आतोऽनुपसर्गे कः' इति कः। घटोध्नीः=घट इव ऊधो यासान्ता घटोध्न्यः, ताः। 'ऊधसोऽनङ्' इत्यनङादेशः, 'बहुव्रीहेरूधसो ङीष्' इति ङीष्। गाः='अकथितं च' इति कर्मसंज्ञा। विवर्णं=विगतो वर्णो यस्मात्तत्। हव्येषु=हूयन्त इति हव्यानि, तेषु 'अचो यत्' इति यत्। सुसमिन्धनः=समीचीनानि इन्धनानि यस्य सः समिन्धनः, अत्यन्तं समिन्धनः सुसमिन्धनः। कीटोपजनः=उपजननम् उपजनः 'भावे' इति घञ्। 'जनिवध्योश्चे'ति न वृद्धिः। कीटानामुपजनोऽस्येति।

भाषाऽर्थः—ग्वाले पुष्टस्तनोंसे युक्त गायोंसे भी थोड़ा, स्वाभाविक वर्णसे रहित और अस्वादु दूध दूहते हैं। हवनीय घृत आदियोंमें उत्तम काष्ठ-सम्पन्न अग्नि भी कीड़ा और केशसे युक्त होता हुआ नहीं जल रहा है ॥ ७३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मात् कुरु त्वं प्रतिकारमस्मिन् स्नेहान्मया रावण ! भाष्यमाणः ।
वदन्ति दुःखं ह्यनुजीविवृत्ते स्थिताः पदस्थं परिणामपथ्यम् ॥७४॥

अन्वयः—तस्मात् हे रावण ! त्वं मया स्नेहात् भाष्यमाणः (सन्) अस्मिन् प्रतिकारं कुरु । हि अनुजीविवृत्ते स्थिताः पदस्थं दुःखं परिणामपथ्यं वदन्ति ॥

व्याख्या—तस्मात् = ततः, यत एवंविधान्यपशकुनानि दृश्यन्ते तस्मात्कारणादिति भावः, त्वं, मया = अनुजेन, स्नेहात् = प्रणयात् , भाष्यमाणः = कथ्यमानः सन् , अस्मिन् = अत्र विषये, प्रतिकारं = सङ्कटनिवृत्युपायं, सीताप्रत्यर्पणरूपमिति भावः । कुरु = विधेहि । अप्रियत्वेन दुःखजनकमेतादृशं वाक्यं कुतः प्रकाश्यते इति चेद्वदन्तीति—हि = यतः, अनुजीविवृत्ते=सेवककर्मणि, स्थिताः=विद्यमाना जनाः, पदस्थम् = उन्नतपदाधिरूढं स्वामिनं, दुःखं = आदौ क्लेशजनकमपि, परिणामपथ्यम्=उत्तरकाले हितावहं वाक्यं, वदन्ति=भाषन्ते ।

व्युत्पत्तिः—प्रतिकारं = प्रतिकरणं प्रतिकारस्तं, भावे घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इत्यत्र बहुलग्रहणात् पक्षे दीर्घाऽभावः । अनुजीविवृत्ते=अनुजीवन्तीति तच्छीला अनुजीविनः, ताच्छील्ये णिनिः । अनुजीविनां वृत्ते । पदस्थं = पदे तिष्ठतीति पदस्थस्तं, 'सुपि स्थ' इत्यत्र योगविभागात् क प्रत्ययः । वदधातोर्ब्रूञ् धातोः समानाऽर्थकत्वेन 'अर्थनिबन्धनेयं संज्ञा' इत्यतः पदस्थपदस्य 'अकथितं च' ति कर्मसंज्ञा । परिणामपथ्यं = पथोऽनपेतं पथ्यं, 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । परिणामे पथ्यम् ॥

भाषाऽर्थः—इस कारण से हे रावण ! आप मुझसे स्नेहपूर्वक कहे जाते हुए इस विषय में प्रतिकार कीजिए । क्यों कि सेवक के कार्य में अवस्थित पुरुष स्वामी के स्थान में विद्यमान पुरुष को आरम्भ में दुःखजनक प्रतीत होते हुए भी परिणाम में हितकारक वाक्य कहते हैं ॥ ७४ ॥

विरुग्णसंकीर्णविपन्नभिन्नैः प्रक्षुण्णसंह्रीणशिताऽस्त्रवृक्णैः ।
यावन्नराऽशैर्न रिपुः शवाऽशान् सन्तर्पयत्यानम तावदस्मै ॥ ७५ ॥

अन्वयः—यावत् रिपुः विरुग्णसंकीर्णविपन्नभिन्नैः प्रक्षुण्णसंह्रीणशिताऽस्त्रवृक्णैः नराऽशैः शवाऽशान् न सन्तर्पयति, तावत् अस्मै आनम ॥

व्याख्या—यावत् = यं कालं यावत् , रिपुः = शत्रुः, राम इत्यर्थः । विरुग्णसंकीर्णविपन्नभिन्नैः = भग्नाऽङ्गविक्षिप्तमृतविदारितदेहैः, प्रक्षुण्णसंह्रीणशिताऽस्त्रवृक्णैः=संचूर्णितसंलज्जिततीक्ष्णाऽऽयुधच्छिन्नैः, एतादृशैः नराऽशैः=मनुष्यभक्षकैः, राक्षसैरित्यर्थः । शवाऽशान्=मृतशरीरभक्षकान् गृध्रशृगालादीनित्यर्थः । न सन्तर्प-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यति = न प्रीणयति, तावत् = तत्कालपर्यन्तम् , अस्मै = शत्रवे रामायेत्यर्थः । 'अस्ये'ति पाठे सम्बन्धसामान्ये षष्ठी, शत्रोरित्यर्थः । आनम = प्रणम, चरणयोरिति शेषः ॥

व्युत्पत्तिः—विरुग्णसंकीर्णविपन्नभिन्नैः = विपूर्वकात् 'रुजो भङ्गे' इति धातोर्निष्ठायां क्तप्रत्यये, विरुग्णपदसिद्धिः । 'ओदितश्चे'ति निष्ठानत्वम् । अवशिष्टेषु संकीर्णादिषु 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति नत्वम् । विरुग्णाश्च संकीर्णाश्च विपन्नाश्च भिन्नाश्च, तैः । प्रक्षुण्णसंहीणशिताऽस्त्रवृक्णैः = प्रपूर्वकात् 'क्षुदिर् संचूर्णने' इति धातोः क्तप्रत्यये 'रदाभ्यामि'त्यादिना नत्वे च प्रक्षुण्णपदसिद्धिः । वृश्च्यन्ते इति वृक्णाः, 'ओव्रश्चू छेदने' इति धातोः क्तप्रत्यये 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां क्ङिति च' इति सम्प्रसारणं, संयोगादिलोपः, कुत्वमोदित्वात् 'ओदितश्चे'ति नत्वं च । शिताऽस्त्रेण वृक्णाः शिताऽस्त्रवृक्णाः । प्रक्षुण्णाश्च संह्रीणाश्च शिताऽस्त्राश्च वृक्णाश्च, तैः । नराशैः=नरान् अश्नन्तीति नराशास्तैः, 'कर्मण्यण्' इत्यण् । शवाऽशान् = शवमश्नन्तीति शवाशास्तान् , पूर्ववदण् । अस्मै = 'क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्' इति सम्प्रदानत्वेन चतुर्थी ॥

भाषाऽर्थः—जब तक शत्रु भग्न अङ्गों वाले, बिखेरे गये, मरे हुए और फाड़े गये शरीर वाले एवम् चूर्णित, लज्जित और तीक्ष्ण शस्त्रसे काटे गये राक्षसों से मुर्दों को खाने वाले गृध्र और श्रृगाल आदियों को तृप्त नहीं करता है तब तक उसको नमस्कार कीजिए ॥ ७५ ॥

भ्रूभङ्गमाधाय विहाय धैर्यं विभीषणं भीषणरूक्षचक्षुः ।
गिरं जगादोग्रपदामुदग्रः स्वं स्फावयन् शक्ररिपुः प्रभावम् ॥ ७६ ॥

अन्वयः—भीषणरूक्षचक्षुः उदग्रः शक्ररिपुः भ्रूभङ्गम् आधाय धैर्यं विहाय स्वं प्रभावं स्फावयन् विभीषणम् उग्रपदां गिरं जगाद ॥

व्याख्या—भीषणरूक्षचक्षुः = भयानककठोरलोचनः, उदग्रः = उन्नतः, शक्ररिपुः = इन्द्रशत्रुः, रावण इत्यर्थः । भ्रूभङ्गम्=भ्रुकुटिम् , आधाय = आबद्ध्य, धैर्यं= धीरतां, विहाय = त्यक्त्वा, स्वम्=आत्मीयं, प्रभावं=विक्रमम् , स्फावयन्=वर्द्धयन् , विभीषणं = स्वकनिष्ठभ्रातरम् , उग्रपदां = परुषशब्दां, गिरं = वाणीं, वक्ष्यमाणस्वरूपामित्यर्थः । जगाद = अब्रवीत् ॥

व्युत्पत्तिः—भीषणरूक्षचक्षुः = भीषणानि रूक्षाणि चक्षूंषि यस्य सः । स्फावयन्=स्फावयतीति, 'स्फायी वृद्धौ' इति णिजन्तस्य धातोः 'स्फायो व' इति वत्वम् । लटः शतृप्रत्ययः । उग्रपदाम् = उग्राणि पदानि यस्यां ताम् ॥

भाषाऽर्थः—भयङ्कर और कठोर नेत्रोंसे युक्त, उन्नत रावण भ्रुकुटि बाँधकर

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धैर्य छोड़कर अपने पराक्रम को बढ़ाता हुआ विभीषणसे कठोरपदों से युक्त वाणीको कहने लगा ॥ ७६ ॥

शिला तरिष्यत्युदके न पर्णं ध्वान्तं रवेः स्यन्त्स्यति वह्निरिन्दोः ।
जेता परोऽहं युधि जेष्यमाणस्तुल्यानि मन्यस्व पुलस्त्यनप्तः ! ॥ ७७ ॥

अन्वयः—हे पुलस्त्यनप्तः ! उदके शिला तरिष्यति पर्णं न, रवेः ध्वान्तं स्यन्त्स्यति, इन्दोः वह्निः स्यन्त्स्यति परो जेता अहं युधि जेष्यमाणः तुल्यानि मन्यस्व ॥

व्याख्या—हे पुलस्त्यनप्तः = हे पुलस्त्यपौत्र, विभीषण इति भावः । पुलस्त्यनप्तृपदेन विभीषणस्य ब्राह्मणसदृशं भीरुत्वं ध्वन्यते । उदके=जले, शिला=पाषाणः, तरिष्यति=संतरणं करिष्यति, पर्णं=पत्रं, न=न तरिष्यति । रवेः=सूर्यात्, ध्वान्तम्= अन्धकारं, स्यन्त्स्यति=प्रस्रविष्यति, इन्दोः = चन्द्रात्, वह्निः = अग्निः स्यन्त्स्यति= प्रस्रविष्यति, एवं च—परः=उत्कृष्टः, जेता=जयशीलः, अहं=रावणः, युधि=संग्रामे, जेष्यमाणः=अभिभविष्यमाणः भविष्यामीति शेषः । एतानि चत्वारीति शेषः । तुल्यानि=समरूपाणि, मन्यस्व=अवगच्छ । यथोदके शिलासन्तरणं, रवेर्ध्वान्तप्रस्रवणमिन्दोर्वह्निप्रस्रवणं च असम्भवं तथैव जेतुर्मम पराजयोऽपि असम्भाव्य इति भावः ॥

व्युत्पत्तिः—पुलस्त्यनप्तः=पुलस्त्यस्य नप्ता, तत्सम्बुद्धौ । पर्णं न = आर्थी परिसंख्येयम् । ध्वान्तम् 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ।' इत्यमरः । स्यन्त्स्यति = 'स्यन्दू प्रस्रवणे' इति धातोः 'न वृद्भ्यश्चतुर्भ्यः' इतीडभावः 'खरि चे'ति चर्त्वम् । जेता = जयशीलः, 'तृन्' इति ताच्छील्ये तृन् ॥

भाषाऽर्थः—हे पुलस्त्यके पोते ! (विभीषण !) जलमें पत्थर तरे, पत्ता नहीं । सूर्यसे अन्धकार और चन्द्रसे अग्नि प्रस्नुत हो और श्रेष्ठ जयशील मैं भी संग्राम में दूसरेसे जीता जाऊँ तो इन चारोंको तुल्यरूप मान लो ॥ ७७ ॥

अनिर्वृतं भूतिषु गूढवैरं सत्कारकालेऽपि कृताऽभ्यसूयम् ।
विभिन्नकर्माऽऽशयवाक् कुले नो मा ज्ञातिचेलं भुवि कस्यचिद् भूत् ॥७८॥

अन्वयः—भूतिषु अनिर्वृतं गूढवैरं सत्कारकाले अपि कृताऽभ्यसूयं विभिन्नकर्माऽऽशयवाक् ज्ञातिचेलं भुवि नः कुले कस्यचित् मा भूत् ॥

व्याख्या—(हे विभीषण !) भूतिषु = सम्पत्तिषु, ज्ञातिसम्बन्धिनीष्विति शेषः । अनिर्वृतं=सुखरहितं, गूढवैरं=गुप्तविरोधं, काले हनिष्यामीति धियेति शेषः । सत्कारकाले अपि = आदरसमये अपि, कृताऽभ्यसूयं=विहितदोषाऽऽविष्करणं, नाऽहं यथाऽर्हं सत्कृत इति धियेति शेषः । विभिन्नकर्माऽऽशयवाक् = अन्यकृत्याऽभिप्रायवाणीकः, 'मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद् दुरात्मनः ।' इत्यनुसारादिति भावः । एता-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दृशं ज्ञातिचेलं=गर्हितज्ञातिः, भुवि=पृथिव्यां, नः=अस्माकं, कुले=वंशे, कस्यचित्=कस्यापि जनस्य, मा भूत्=न भवेत्, त्वमेतादृशो दुर्वृत्तोऽसीति ध्वनिः।

व्युत्पत्तिः—गूढवैरं=गूढं वैरं यस्य तत्। कृताऽभ्यसूयं=कृताऽभ्यसूया येन तत्। गुणेषु दोषाऽऽविष्करणमसूया। विभिन्नकर्माऽऽशयवाक=कर्म च आशयश्च वाक् च कर्माऽऽशयवाचः। विभिन्नाः कर्माऽऽशयवाचो यस्य तत्। ज्ञातिचेलं ज्ञातिरेव चेलं, यद्यपि 'चेलं वस्त्रेऽधमे त्रिषु' इत्यमराऽनुशासनाच्चेलशब्दोऽधमे विशेष्यनिघ्नस्तथाऽपि 'गर्हितेऽप्यवसाने च चेलमाचक्षते बुधैः' इति कोशाऽन्तराऽनुशासनात्क्लीबत्वं च चेलशब्दस्य बोध्यम्। माभूत्='माङि लुङ्' इति लुङ्। 'न माङ्योगे' इत्यडागमप्रतिषेधः

भाषाऽर्थः—ज्ञातियोंकी सम्पत्तियोंमें सुखरहित, गुप्तरूपसे विरोधी, सत्कारकालमें भी दोषका आविष्कार करने वाला, भिन्नरूपके कर्म, आशय और वचनसे युक्त, अधम ज्ञाति (नातेदार) पृथ्वीमें हमारे कुलमें किसीका न हो॥ ७८॥

इच्छन्त्यभीक्ष्णं क्षयमात्मनोऽपि न ज्ञातयस्तुल्यकुलस्य लक्ष्मीम्।
नमन्ति शत्रून् न च बन्धुवृद्धिं सन्तप्यमानैर्हृदयैः सहन्ते॥ ७९॥

अन्वयः—ज्ञातयः आत्मनोऽपि अभीक्ष्णं क्षयम् इच्छन्ति, तुल्यकुलस्य लक्ष्मीं न इच्छन्ति। (ज्ञातयः) शत्रून् नमन्ति सन्तप्यमानैः हृदयैः बन्धुवृद्धिं च न सहन्ते।

व्याख्या—ज्ञातयः=बान्धवाः, आत्मनोऽपि=स्वस्यापि, अभीक्ष्णं=निरन्तरं क्षयं=विनाशम्, इच्छन्ति=वाञ्छन्ति, परं तुल्यकुलस्य=समानवंशस्य भ्रात्रादेः, लक्ष्मीं=श्रियं, न इच्छन्ति=न वाञ्छन्ति। ज्ञातयः=बान्धवाः, शत्रून्=रिपून्, नमन्ति=प्रणमन्ति, परं सन्तप्यमानैः=ईर्ष्यया दह्यमानैः, हृदयैः=चित्तैः, बन्धुवृद्धिं=ज्ञातिसमृद्धिं, च, न सहन्ते=न मर्षन्ति, त्वमपि तादृश एव बन्धुसमृद्धेरसहिष्णुर्ज्ञातिरिति भावः॥

व्युत्पत्तिः—ज्ञातयः='सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः।' इत्यमरः। तुल्यकुलस्य=तुल्यं कुलं यस्य, तस्य॥

भाषाऽर्थः—बान्धवलोग अपने भी निरन्तर भले ही क्षय की इच्छा करते हैं, परन्तु तुल्य कुलके भाई आदिकी लक्ष्मीको नहीं चाहते हैं। बान्धव भलेही शत्रुओं से झुकते हैं परन्तु ईर्ष्यासे जलने वाले हृदयोंसे अपने बन्धुकी समृद्धिको नहीं सहते हैं॥ ७९॥

त्वयाऽद्य लङ्काऽभिभवेऽतिहर्षाद् दुष्टोऽतिमात्र विवृतोऽन्तरात्मा।
धिक् त्वां मृषा ते मयि दुःस्थबुद्धिर्वदन्निदं तस्य ददौ स पार्ष्णिम्॥८०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—(हे विभीषण !) लङ्काऽभिभवे त्वया अद्य अतिहर्षात् दुष्टः अन्तरात्मा अतिमात्रं विवृतः मयि ते दुःस्थबुद्धिः मृषा, त्वां धिक्। इदं वदन् स तस्य पार्ष्णिं ददौ ॥

व्याख्या—(हे विभीषण !) लङ्काऽभिभवे=लङ्कापरिभवे, दाहादौ विषय इति भावः, त्वया = विभीषणेन, अद्य=अस्मिन् दिने, अतिहर्षात् = अतिशयाऽऽनन्दात्। दुष्टः = दोषयुक्तः, अन्तरात्मा=अन्तःकरणम् , अतिमात्रं=भृशं, विवृतः=प्रकाशितः, एतावन्तं कालं दूषितस्त्वदीयोऽन्तरात्माऽस्फुट आसीत्, कथाप्रसङ्गेनाऽद्य अतिरोहितः सञ्जात इति भावः। मयि = मद्विषये, ते = तव, दुःस्थबुद्धिः=अयं दुःस्थः (शत्रुभिराक्रान्तः) इति मतिः, मृषा = मिथ्या, अतः त्वां = दुष्टाऽन्तरात्मानं, विभीषणं-धिक् , इदम्=एतत् , वदन् = कथयन् , सः=रावणः, तस्य विभीषणस्य, शिरसीति शेषः। पार्ष्णिं=पादपश्चाद्भागं, ददौ=दत्तवान् , विभीषणशिरसि पार्ष्णिना प्रहृतवानिति भावः ॥

व्युत्पत्तिः—दुःस्थबुद्धिः=दुःस्थ इति बुद्धिः । त्वां = धिक्पदेन योगे 'धिगुपर्यादिषु त्रिषु' इति वचनाद् द्वितीया ॥

भाषाऽर्थः—हे विभीषण ! लङ्काके दाह आदि विषयमें तुमने आज अत्यन्त हर्षसे अन्तःकरणका अच्छी तरहसे प्रकाश किया। मेरे विषयमें 'यह शत्रुसे आक्रान्त है' ऐसी तुम्हारी बुद्धि मिथ्याभूत है। तुम्हें धिक्कार है' ऐसा कहते हुए रावणने विभीषणके शिरमें एड़ीसे मारा ॥ ८० ॥

ततः स कोपं क्षमया निगृह्णन् धैर्येण मन्युं विनयेन गर्वम् ।
मोहं धियोत्साहवशादशक्तिं समं चतुर्भिः सचिवैरुदस्थात् ॥ ८१ ॥

अन्वयः—ततः स क्षमया कोपं, धैर्येण मन्युं, विनयेन गर्वं धिया मोहम् उत्साहवशात् अशक्तिं च निगृह्णन् चतुर्भिः सचिवैः समम् उदस्थात् ॥

व्याख्या—ततः = पार्ष्णिप्रहाराऽनन्तरं, सः = विभीषणः, क्षमया = क्षान्त्या, कोपं = क्रोधं पादप्रहारजनितमिति शेषः । एवमनन्तरमपि धैर्येण = धीरतया, मन्युं = शोकं, विनयेन = नम्रतया, गर्वं = दर्पं, धिया=बुद्ध्या, मोहं=वैचित्यम् , उत्साहवशात् = अध्यवसायवशात् , अशक्तिं च = असामर्थ्यं च, निगृह्णन् = वशीकुर्वन् , अपमानेन कोपादीनां सम्भवादिति भावः । चतुर्भिः = चतुःसंख्यकैः, सचिवैः = मन्त्रिभिः, समं = सह, उदस्थात् = उत्थितः, आसनादिति शेषः ॥

व्युत्पत्तिः—ततः = तस्मादिति, 'पञ्चम्यास्तसिल्' इति तसिल् । उत्साहवशात् = उत्साहस्य वशात् , 'उत्साहोऽध्यवसायः स्यात्' इत्यमरः। सचिवैः=सहाऽर्थेन 'समं' पदेन योगेन 'सहयुक्तेऽप्रधाने' इति तृतीया । उदस्थात् = उत्पूर्वकाद

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थाधातोर्लुङ्, 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक्। अत्र ओजो नाम गुणविशेषः, सोदाहरणं तल्लक्षणं यथा—

'ओजः स्यात्प्रौढिरर्थस्य संक्षेपो वाऽतिभूयसः।
रिपुं हत्वा यशः कृत्वा स्वदसिः कोशमाविशत् ॥' इति।

भाषाऽर्थः—रावणके पार्ष्णिप्रहारके अनन्तर विभीषण क्षमासे क्रोधको, धैर्यसे शोकको, नम्रतासे गर्वको, बुद्धिसे मोहको और उत्साहवशसे असामर्थ्यको भी अपने वशमें रखकर चार मन्त्रियोंके साथ आसनसे उठे ॥ ८१ ॥

उवाच चैनं क्षणदाचरेन्द्रं सुखं महाराज विना मयाऽऽस्स्व।
मूर्खातुरः पथ्यकटून्नन्नश्नन् यत्साऽऽमयोऽसौ भिषजां न दोषः ॥ ८२ ॥

अन्वयः—एनं क्षणदाचरेन्द्रम् उवाच च—हे महाराज! मया विना सुखम् आस्स्व। मूर्खाऽऽतुरः पथ्यकटून् अनश्नन् यत् साऽऽमयः, असौ भिषजां न दोषः ॥

व्याख्या—एनं = प्राग्भाषमाणं, क्षणदाचरेन्द्रं = राक्षसराजं, रावणमित्यर्थः। उवाच च = जगाद च। हे महाराज = हे भूपाल!, मया विना = मत् ऋते सुखं = साऽऽनन्दं यथा तथा, आस्स्व=तिष्ठ। स्वीयं दोषाऽभावं सूचयति—मूर्खाऽऽतुर इति। मूर्खाऽऽतुरः = मूढरोगी, पथ्यकटून् = हितकारककटुपदाऽर्थान्, अनश्नन् = अभक्षयन्, यत्, सामयः = रोगयुक्तः असौ = अयं, तस्य रुग्णभाव इति भावः। भिषजां = वैद्यानां, न दोषः = नो दूषणम्, अपि तु तस्यैव मूर्खाऽऽतुरस्य दोष- इति भावः। मदुपदिष्टं हितमनाचरतस्तव या हानिस्तत्र तवैव दोषो न ममेति भावः।

व्युत्पत्तिः—क्षणदाचरेन्द्रं = क्षणम् (अवसरम्) ददातीति क्षणदा, 'आतोऽनुपसर्गे कः' इति कः। क्षणदायां चरन्तीति क्षणदाचराः, 'चरेष्ट' इति टप्रत्ययः। क्षणदाचराणामिन्द्रस्तम्, मया = 'विना' पदेन योगे 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' इति तृतीया, पक्षे द्वितीया पञ्चमी च। आस्स्व = 'आस उपवेशने' इति धातोर्लोट्। पथ्यकटून्=पथोऽनपेताः पथ्याः 'धर्मपथ्यर्थन्यायादनपेते' इति यत्। पथ्याश्च ते कटवस्तान्। साऽऽमयः = आमयेन सहितः, 'स्त्री रुग्रुजा चोपताप-रोगव्याधिगदाऽऽमयाः।' इत्यमरः॥

भाषाऽर्थः—विभीषणने राक्षसराज रावणको कहा भी—'हे महाराज! आप मेरे विना सुखपूर्वक रहें। मूर्ख रोगी पथ्यभूत कटु पदार्थोंको नहीं खाता हुआ जो रोगयुक्त होता है, वह वैद्यों का दोष नहीं है ॥ ८२ ॥

करोति वैरं स्फुटमुच्यमानः प्रतुष्यति श्रोत्रसुखैरपथ्यैः।
विवेकशून्यः प्रभुरात्ममानी महाननर्थः सुहृदां बतायम् ॥ ८३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—विवेकशून्यः आत्ममानी प्रभुः स्फुटम् उच्यमानो वैरं करोति श्रोत्रसुखैः अपथ्यैः प्रतुष्यति । बत अयं सुहृदां महान् अनर्थः ।

व्याख्या—विवेकशून्यः = निर्विवेकः, सदसद्विवेचनारहित इति भावः । आत्ममानी = आत्मश्लाघी, 'नाऽस्ति मत्सदृशो लोके न भूतो न भविष्यती'ति धियेति भावः । एतादृशः प्रभुः = स्वामी, स्फुटं = व्यक्तं, यथार्थमित्यर्थः । उच्यमानः = भाष्यमाणः सन् , वैरं = विरोधं, करोति = विदधाति, न तु स्नेहमिति भावः । एवं च श्रोत्रसुखैः = कर्णद्वारा सुखोत्पादकैः, अपथ्यैः = परिणामेऽहितकारिभिर्वचनैः, प्रतुष्यति = प्रहृष्यति, बत = खेदोऽस्ति, अयम् = एषः, सुहृदां = हितचिन्तकानामाश्रितानां, महान्=साऽतिशयः, अनर्थः = अनर्थहेतुः, अस्तीति शेषः ॥

व्युत्पत्तिः—विवेकशून्यः = विवेकेन शून्यः, 'विवेकः पृथगात्मता ।' इत्यमरः । आत्ममानी = आत्मानं मन्यत इति 'आत्ममाने खश्च' इति चाणिनिः । बत = खेदद्योतकमव्ययमेतत् । उपेन्द्रवज्रा वृत्तम् ॥

भाषाऽर्थः—विवेकरहित, आत्माऽभिमानी स्वामी यथार्थ वचन कहने पर विद्वेष करता है, कर्णके द्वारा सुखके उत्पादक परिणाममें अहितकारक वचनोंसे सन्तुष्ट होता है । खेद है ! यह हितचिन्तक आश्रितोंका महान् अनर्थका हेतु है ॥ ८३ ॥

क्रीडन् भुजङ्गेन गृहाऽनुपातं कश्चिद्यथा जीवति संशयस्थः ।
संसेवमानो नृपतिं प्रमूढं तथैव यज्जीवति सोऽस्य लाभः ॥ ८४ ॥

अन्वयः—यथा कश्चित् गृहाऽनुपातं भुजङ्गेन क्रीडन् संशयस्थो जीवति, तथैव प्रमूढं नृपतिं संसेवमानो यत् जीवति सः अस्य लाभः ॥

व्याख्या—यथा = येन प्रकारेण, कश्चित् = कोऽपि, सर्पग्राहीति भावः । गृहाऽनुपातं = गृहं गृहमनुपत्य, भुजङ्गेन = सर्पेण, क्रीडन् = क्रीडां कुर्वन् , संशयस्थः = आशङ्कमानः, 'किमयं दङ्क्ष्यति नो वे'ति धियेति भावः । जीवति = प्राणधारणं करोति, तथैव = तेनव प्रकारेण, प्रमूढम् = अतिमूर्खं, नृपतिं=राजानं, संसेवमानः = आश्रयन् , सेवक इति शेषः, यत् जीवति = प्राणान् धारयति, सः = प्राणधारणाऽनुकूलव्यापारः, अस्य = सेवकस्य, लाभः = प्राप्तिः, एतेन मूर्खस्य तव सेवनेन यन्मम जीवनं नाऽपगतं स एव लाभो लाभान्तरस्य वार्ता आस्तामिति भावः ॥

व्युत्पत्तिः—गृहाऽनुपातं = 'विशिपतिपदिस्कन्दां व्याप्यमानाऽऽसेव्यमानयोः' इति णमुल्, 'कृन्मेजन्त' इत्यव्ययत्वम् । भुजङ्गेन = 'साधकतमं करणम्' इति करणत्वम् । अत्र निदर्शनाऽलङ्कारः, सोदाहरणं तल्लक्षणं यथा—

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना।
या दातुः सौम्यता, सेयं सुधांऽशोरकलङ्किता ॥'

भाषाऽर्थः—जैसे कोई मदारी घर घरमें जाकर सर्पसे कीडा करता हुआ आशङ्का करता हुआ जीता है, वैसे ही अतिशय मूर्ख राजा की सेवा करता हुआ सेवक जो जीता है वही उसका लाभ है ॥ ८४ ॥

दत्तः स्वदोषैर्भवता प्रहारः पादेन धर्म्ये पथि मे स्थितस्य।
स चिन्तनीयः सह मन्त्रिमुख्यैः कस्याऽवयोर्लाघवमादधातु ॥ ८५ ॥

अन्वयः—भवता स्वदोषैः धर्म्ये पथि स्थितस्य मे (यः) पादेन प्रहारो दत्तः, स आवयोः कस्य लाघवम् आदधातु (इति) मन्त्रिमुख्यैः सह चिन्तनीयः ॥

व्याख्या—(हे राजन्!) भवता = त्वया, स्वदोषैः = आत्मदोषैः, अविवेकित्वादिभिरिति भावः। धर्म्ये = धर्मादनपेते, पथि = मार्गे, स्थितस्य = विद्यमानस्य, मे = मम, (यः) पादेन = चरणेन, प्रहारः = ताडनं, दत्तः = कृतः इति भावः। सः = पादप्रहारः, आवयोः = आवयोर्मध्ये, कस्य = कतरस्य, लाघवं = लघुत्वम्, आदधातु = करोतु, (इति = इत्थम्) मन्त्रिमुख्यैः = सचिवप्रधानैः, एतैरिति भावः। सह = समं, विचिन्तनीयः=विचारणीयः, सुनिरूपणे कृते सति तवैव लाघवं प्रकाशयेतेति भावः ॥

व्युत्पत्तिः—धर्म्ये = 'धर्मपथ्यर्थन्यायादनपेते' इति यत्। मन्त्रिमुख्यैः = मन्त्रिषु मुख्यैः, सहयोगे 'सहयुक्तेऽप्रधाने' इति तृतीया। चिन्तनीयः = चिन्तयितुमर्हः, अनीयर् ॥

भाषाऽर्थः—हे राजन्! आपने अपने दोषोंसे धर्मसे अनपेत मार्गमें विद्यमान मेरे प्रति जो पादप्रहार किया वह हम दोनों के बीचमें किसकी लघुताको प्रकाशित करेगा यह मुख्य मन्त्रियों के साथ विचार करना चाहिए ॥ ८५ ॥

इति वचनमसौ रजनिचरपतिं बहुगुणमसकृत्प्रसभमभिदधत्।
निरगमदभयः पुरुषरिपुपुरान्नरपतिचरणौ नवितुमरिनुतौ ॥ ८६ ॥

अन्वयः—रजनिचरपतिं बहुगुणम् इति वचनम् असकृत् प्रसभम् अभिदधत् अभयः असौ अरिनुतौ नरपतिचरणौ नवितुं पुरुषरिपुपुरात् निरगमत् ॥

व्याख्या—रजनिचरपतिं = राक्षसेश्वरं, रावणमित्यर्थः। बहुगुणम् = औदार्याद्यनेकगुणसम्पन्नम्, इति = उक्तप्रकारं, वचनं = वचः, असकृत् = वारं वारं, प्रसभं=बलात्, अभिदधत् = ब्रुवद्, अभयः = निर्भयः, असौ=विभीषणः, अरि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नुतौ शत्रुभिरपि स्तुतौ, नरपतिचरणौ = रामपादौ, नवितुं, = स्तोतुं, पुरुषरिपुपुरात् = राक्षसनगर्याः, लङ्काया इति भावः, निरगमत्=निष्क्रान्तः ॥

व्युत्पत्तिः—राजनिचरपतिं = रज्यन्ति (अनुरक्ता भवन्ति) कामिनोऽस्यामिति रजनिः, 'क्षिपेः किच्चे'ति उणादिसूत्रे चकारादनिः । 'अनिदितां हल उपधायाः क्ङिति' इति नलोपः । रजनौ चरन्तीति रजनिचराः, 'चरेष्ट' इति टः । रजनिचराणां पतिम् । एवं स्थिते रजनीशब्दस्यैव 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' इति ह्रस्वत्वमिति कष्टकल्पनां समाश्रयन्ती जयमङ्गला उपेक्षणीया । पूर्वोक्तप्रकारेण निष्पन्नस्य रजनिशब्दस्य 'कृदिकारादक्तिन' इति ङीषो वैकल्पिकत्वेन रजनीति इकारान्तं पदं निष्पद्यते । बहुगुणं=बहवो गुणा यस्मिंस्तत् । अभिदधत्=अभिदधातीति, अभिपूर्वकधाधातोर्लटः शत्रादेशः । 'नाऽभ्यस्ताच्छतुः' इति नुम्प्रतिषेधः । अरिनुतौ = अरिभिर्नुतौ । नुताविस्यत्र 'णु स्तुतौ' इति धातोः क्तप्रत्ययः 'श्र्युकः किति' इति इट्प्रतिषेधः । नरपतिचरणौ = नरपतेश्चरणौ । नवितुं = 'णु स्तुतौ' इति णोपदेशात् सेट्कादादादिकाद्धातोस्तुमुन् इडागमश्च । पुरुषरिपुपुरात्=पुरुषरिपोः पूः पुरुषरिपुपुरं, तस्मात् 'ऋक्पूरब्धूःपथामानक्षे' इति समासाऽन्तः अप्रत्ययः । अत्र प्रहरणकलिका वृत्तम् ।

भाषाऽर्थः—रावणको औदार्य आदि अनेक गुणासे सम्पन्न ऐसे वचनको बारंबार बलपूर्वक कहते हुए निर्भीक विभीषणजी शत्रुओंसे भी स्तुत रामचन्द्रजीके चरणोंकी स्तुति करनेके लिए लङ्कासे निकल गये ॥ ८६ ॥

अथ तमुपगतं विदितसुचरितं पवनसुतगिरा गिरिगुरुहृदयः ।
नृपतिरमदयन् मुदितपरिजनं स्वपुरपतिकरैः सलिलसमुदयैः ॥ ८७ ॥

अन्वयः—अथ गिरिगुरुहृदयो नृपतिः उपगतं पवनसुतगिरा विदितसुचरितं मुदितपरिजनं तं स्वपुरपतिकरैः सलिलसमुदयैः अमदयत् ॥

व्याख्या—अथ=विभीषणकर्तृकलङ्कापरित्यागाऽनन्तरं, गिरिगुरुहृदयः=शैलाऽप्रकम्पचेताः, यद्वा शङ्करध्याता, नृपतिः=राजा, रामचन्द्र इत्यर्थः । उपगतं=समीपप्राप्तं, पवनसुतगिरा = हनूमद्वचनेन, विदितसुचरितं=ज्ञातसद्वृत्तं, मुदितपरिजनं=हृष्टाऽनुचरं, स्वस्वाम्यभ्युदयेनेति शेषः । तं = विभीषणं, स्वपुरपतिकरैः = लङ्काऽधिपतिं कुर्वद्भिः, सलिलसमुदयैः = घटस्थितैर्जलसमूहैः, अमदयत् = हर्षितवान्, रामो लङ्काराज्येऽभिषेचनेन विभीषणं समतोषयदिति भावः ॥

व्युत्पत्तिः—गिरिगुरुहृदयः=गुरु हृदयं यस्य स गुरुहृदयः, गिरिरिव गुरुहृदयः । यद्वा गिरिः (हिमालयपर्वतः) गुरुः (पूज्यः, श्वशुरत्वेनेति भावः) यस्य स गिरिगुरुः शङ्कर इत्यर्थः । स हृदये यस्य सः, इष्टदेवत्वेनेति भावः । रामस्य शिवभक्तत्वं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रसिद्धमेव। विदितसुचरितं = विदितं सुचरितं यस्य, तम्। मुदितपरिजनं-मुदिताः परिजनाः (चत्वारः सचिवाः) यस्य तम्। स्वपुरपतिकरैः = स्वपुरपतिं कुर्वन्तीति तद्धेतवः स्वपुरपतिकरास्तैः, 'कृञो हेतुताच्छील्यानुलोम्येषु' इति टः। अमदयत्= 'मदी हर्षे' इति णिजन्ताद्धातोर्लङ्। घटादित्वान्मित्त्वे ह्रस्वत्वम्। प्रहरणकलिकावृत्तम्॥

भाषाऽर्थः—अनन्तर पर्वतके सदृश अप्रकम्प हृदयवाले अथवा शिवजीका ध्यान करने वाले महाराज रामचन्द्रने निकट आये हुए, हनुमान्‌जीके वचनसे जिनका सच्चरित्र जाना गया है, ऐसे और प्रसन्न मन्त्रियोंसे युक्त विभीषणजीको लङ्काके अधिपति बनाने वाले कलशस्थित जलोंसे प्रसन्न किया॥ ८७॥

इति श्रीचन्द्रकलाव्याख्यामण्डिते भट्टिकाव्ये प्रसन्नकाण्डे
भाविकत्वप्रदर्शनस्तृतीयः परिच्छेदः।

अथ त्रयोदशः सर्गः

संस्कृतप्राकृताऽपभ्रंशभेदात् त्रिविधं काव्यम्। तत्र देशीयसंस्कृतभवयोः प्राकृतयरिपभ्रंशस्य च धर्मजनकताऽवच्छेदकत्वाऽभावात् कृतोपक्रमे महाकाव्यात्मके संस्कृतप्रबन्धे समावेशाऽसम्भवात् शब्दसमायाः प्राकृतभाषायाः समावेशो विधीयते। अयं च भाषाश्लेषः। शब्दश्लेषस्य भेदाऽष्टके अन्यतमो भाषाश्लेषः। स च यथा साहित्यदर्पणे—

'वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि।
श्लेषाद्विभक्तिवचनभाषाणामष्टधा च सः॥' इति।

तत्रैकादशे सर्गे कृतोपक्रमस्य प्रभातवर्णनस्य परिशिष्टांऽशस्य समापनं विधाय सेतुबन्धनं वर्ण्यते।

चारुसमीरणरमणे हरिणकलङ्ककिरणावलीसविलासा।
आबद्धराममोहा वेलामूले विभावरी परिहीणा॥ १॥

अन्वयः—चारुसमीरणरमणे वेलामूले हरिणकलङ्ककिरणाऽऽवलीसविलासा आबद्धराममोहा विभावरी परिहीणा।

व्याख्या—चारुसमीरणरमणे = रुचिरवाताऽऽनन्दने, वेलामूले = समुद्रतटसमीपे, हरिणकलङ्ककिरणाऽऽवलीसविलासा = चन्द्रमयूखपङ्क्तिसविभ्रमा, आबद्धराममोहा = जनितराममूर्च्छा, विभावरी = रात्रिः, परिहीणा = क्षीणा।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—चारुसमीरणरमणे = रमयतीति रमणं, णिजन्तात् 'रमु क्रीडायाम्' इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति ल्युः 'युवोरनाकौ' इत्यनादेशः । चारुसमीरणेन रमणे । 'समीरमारुतमरुज्जगत्प्राणसमीरणाः' इत्यमरः । हरिणकलङ्ककिरणाऽऽवलीसविलासा=हरिणः कलङ्को यस्य स हरिणकलङ्कः, 'ग्लौर्मृगाऽङ्कः कलानिधिः' इत्यमरः । हरिणकलङ्कस्य किरणाऽऽवल्या सविलासा । आबद्धराममोहा = आबद्धो राममोहो यया सा । अत्राऽर्यागीतिस्तल्लक्षणं यथा—

'आर्यापूर्वार्धं यदि गुरुणैकेनाऽधिकेन निधने युक्तम् ।
इतरत्तद्वन्निखिलं भवति यदीयमुक्तेयमार्यागीतिः ॥' इति ।

अस्या एव प्राकृतभाषायां स्कन्धक इति नामधेयम् ॥

भाषाऽर्थः—मनोहर वायुसे आनन्दकारक समुद्रतटके समीपमें चन्द्र-किरणों की पङ्क्तिसे विलासयुक्त और रामकी मूर्च्छा को उत्पन्न करनेवाली रात बीती ॥ १ ॥

बद्धो वासरसङ्गे भीमो रामेण लवणसलिलावासे ।
सहसा संरम्भरसो दूरारूढरविमण्डलसमो लोले ॥ २ ॥

अन्वयः—वासरसङ्गे लोले लवणसलिलाऽऽवासे रामेण भीमो दूराऽऽरूढरविमण्डलसमः संरम्भरसः सहसा बद्धः ॥

—व्याख्या—वासरसङ्गे = दिवससम्बन्धे प्रातःकाले इति भावः । लोले = चञ्चले, रामभीत्या प्रभातवायुना संक्षोभ्यमाणत्वाद्वेति भावः । लवणसलिलाऽऽवासे= लवणसमुद्रे, रामेण = रामचन्द्रेण, भीमः = भयङ्करः, दूराऽऽरूढरविमण्डलसमः = मध्याह्नस्थसूर्यमण्डलतुल्यः, संरम्भरसः = कोपरसः, वीराख्य इति शेषः । 'कृतोपवासेऽपि मयि नाऽसौ समुद्र उत्थित' इति धियेति भावः । सहसा=तत्क्षणे, बद्धः = कृतः ॥

व्युत्पत्तिः—वासरसङ्गे=वासरस्य सङ्गो यस्मिंस्तस्मिन् । लवणसलिलावासे = आ समन्तात् वसन्ति अस्मिन् सः आवासः, अधिकरणे घञ् । सलिलानामावासः = सलिलावासः । लवणश्चाऽसौ सलिलाऽऽवासस्तस्मिन् । दूराऽऽरूढरविमण्डलसमः = दूरमारूढो यो रविस्तस्य मण्डलं, तेन समः, अतितीक्ष्णत्वादिति भावः । सहसा = 'अतर्किते तु सहसा' इत्यमरः ॥

भाषाऽर्थ—प्रातःकाल में चञ्चल लवण-समुद्र में रामने भयङ्कर और मध्याह्न में वर्तमान सूर्य के मण्डल तुल्य क्रोधरस को सहसा प्रकाशित किया ॥ २ ॥

गाढगुरुपुङ्खपीडासधूमसलिलाऽरिसंभवमहाबाणे ।
आरूढा संदेहं रामे समहीधरा मही सफणिसभा ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—गाढगुरुपुङ्खपीडासधूमसलिलाऽरिसंभवमहाबाणे रामे समहीधरा सफणिसभा मही सन्देहम् आरूढा ॥

व्याख्या—गाढगुरुपुङ्खपीडासधूमसलिलाऽरिसंभवमहाबाणे = दृढगुरुबाणमूलपीडनेन धूमसहिताऽग्निसम्भवमहाशरे, एतादृशे रामे = रामचन्द्रे, समहीधरा = पर्वतसहिता, सफणिसभा = सर्पसमूहोपेता, मही = पृथ्वी, सन्देहं = संशयम् , आरूढा= प्राप्ता, रामे कोपाऽऽविष्टे पृथिव्याः स्थितावपि संशयः सञ्जात इति भावः ।

व्युत्पत्तिः—गाढगुरुपुङ्खपीडासधूमसलिलाऽरिसंभवमहाबाणे गाढो गुरुर्यः पुङ्खः (बाणमूलम्), तस्य पीडया (अङ्गुष्ठाभ्यामाकर्षणेनेति शेषः) सधूमस्य सलिलाऽरेः (जलशत्रोः, अग्नेरित्यर्थः) संभवः (उत्पत्तिः) यस्मिन् , तादृशो महाबाणो यस्य सः, तस्मिन् । समहीधरा = धरन्तीति धराः पचाद्यच् । मह्या धरा इति महीधराः, तैः सहिता । अत्र पदमुखे वर्तमानस्य धकारस्य हकारो न भवति । प्राकृते पदमध्यान्तयोर्विधीयमानत्वात् । सफणिसभा = फणिसभया सहिता ॥

भाषाऽर्थ—दृढ और गुरु बाणमूलको अंगूठोंसे आकर्षण करने से धूमयुक्त अग्निकी उत्पत्ति करने वाले महाबाणसे युक्त रामचन्द्रमें पर्वतोंसे और सर्पसमूहसे युक्त पृथ्वी सन्देहको प्राप्त हो गई ॥ ३ ॥

घोरजलदन्तिसंकुलमट्टमहापङ्काहलजलावासम् ।
आरीणं लवणजलं समिद्धफलबाणविद्धघोरफणिवरम् ॥ ४ ॥

अन्वयः—घोरजलदन्तिसङ्कुलम् अट्टमहापङ्काहलजलाऽवासं समिद्धफलबाणविद्धघोरफणिवरं लवणजलम् आरीणम् ।

व्याख्या—रामेणाऽऽग्नेये बाणे प्रहिते—घोरजलदन्तिसङ्कुलं = भीषणतोयगजव्याप्तम्, अट्टमहापङ्काहलजलाऽऽवासं=शुष्कमहाकर्दमविह्वलमत्स्यादिकं, समिद्धफलबाणविद्धघोरफणिवरं = दीप्तफलशरताडितभीषणसर्पश्रेष्ठं, लवणजलं=सामुद्रतोयम् , आरीणं = समन्तात् शुष्कम् ॥

व्युत्पत्तिः—घोरजलदन्तिसङ्कुलं = घोरा ये जलदन्तिनः, तैः सङ्कुलम् । अट्टमहापङ्काहलजलाऽऽवासम् = अट्यत इत्यट्टः 'अट्ट अतिक्रमहिंसनयोः' इति धातोः कर्मणि घञ् । 'अट्टं भग्ने शुष्के च क्षौमेऽत्यर्थे गृहान्तरे ।' इति विश्वः । अट्टो यो महापङ्कस्तस्मिन् काहलाः (विह्वलाः) जलावासाः यस्मिंस्तत् । समिद्धफलबाणविद्धघोरफणिवरं = समिद्धं (प्रदीप्तम्) फलम् (अग्रभागः) येषां ते, च ते बाणास्तैर्विद्धा घोरा फणिवरा यस्मिंस्तत् । आरीणम्=आङ्पूर्वकात् 'रीङ् स्रवणे' इति धातोर्निष्ठातकारस्य 'स्वादय ओदित' इति धातोरोदित्वाऽतिदेशात् 'ओदितश्च' इति नत्वम् । 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति णत्वं च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—रामके आग्नेय बाण छोड़ने पर भयङ्कर जलहस्तियोंसे व्याप्त, सूखे महापङ्कमें विह्वल मत्स्य आदि जल-जन्तुओंसे युक्त, प्रदीप्त फल (अग्रभाग) वाले बाणोंसे ताडित और भयङ्कर श्रेष्ठ सर्पों से युक्त समुद्रका जल सूख गया ॥४॥

सभयं परिहरमाणो महाऽहिसंचारभासुरं सलिलगणम् ।
आरूढो लवणजलो जलतीरं हरिबलागमविलोलगुहम् ॥ ५ ॥

अन्वयः—लवणजलो महाऽहिसञ्चारभासुरं सलिलगणं सभयं परिहरमाणो हरिबलाऽऽगमविलोलगुहं जलतीरम् आरूढः ॥

व्याख्या—लवणजलः = समुद्रः, महाहिसञ्चारभासुरं = महासर्पसञ्चलनदीप्यमानं, सलिलगणं = जलसमूहं, सभयं = भीतिपूर्वकं, परिहरमाणः = परित्यजन्, हरिबलाऽऽगमविलोलगुहं = वानरसेनाऽऽगमनव्याकुलकन्दरं जलतीरं=तोयतटम्, आरूढः = संप्राप्तः, मूर्तिमान् भूत्वेति शेषः ॥

व्युत्पत्तिः—लवणजलः = लवणं जलं यस्य सः । महाऽहिसञ्चारभासुरं = महान्तश्च ते अहयो महाहयः, 'आन्महतः समानाऽधिकरणजातीययोः' इत्यात्वम् । महाऽहीनां सञ्चारस्तेन भासुरस्तम् । सभयं = भयेन सहितं यथा तथेति क्रियाविशेषणम् । 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः, 'वोपसर्जनस्य' इति सहस्य सभावः । हरिबलाऽऽगमविलोलगुहं=हरीणां (वानराणाम्) बलस्यागमेन विलोला गुहा यस्मिंस्तत् ॥

भाषाऽर्थः—समुद्र बड़े बड़े सर्पों के सञ्चरणसे दीप्यमान जलसमूहको भय के साथ त्याग करते हुए वानरों की सेनाके आगमनसे व्याकुल गुहासे युक्त जलतट को प्राप्त हुए ॥ ५ ॥

चञ्चलतरुहरिणगणं बहुकुसुमाबन्धबद्धरामावासम् ।
हरिपल्लवतरुजालं तुङ्गोरुसमिद्धतरुवरहिमच्छायम् ॥ ६ ॥

अन्वयः—(लवणजलः) चञ्चलतरुहरिणगणं बहुकुसुमाऽऽबन्धबद्धरामाऽऽवासं हरिपल्लवतरुजालं तुङ्गोरुसमिद्धतरुवरहिमच्छायम् (जलतीरम् आरूढः) ॥

व्याख्या—(लवणजलः = समुद्रः) चञ्चलतरुहरिणगणं = चपलवानरसमूहं, बहुकुसुमाऽऽबन्धबद्धरामाऽऽवासं=बहुलपुष्पमिथःसंश्लेषघटितरामवासस्थानं, हरिपल्लवतरुजालं=पिङ्गलकिसलयवृक्षसमूहं, तुङ्गोरुसमिद्धतरुवरहिमच्छायम् = उन्नतविस्तीर्णमण्डलोज्ज्वलश्रेष्ठवृक्षशीतलच्छायम् । (जलतीरम् आरूढः) ॥

व्युत्पत्तिः—चञ्चलतरुहरिणगणं—चञ्चलः तरुहरिणानां शाखामृगाणां, वानराणामित्यर्थः गणो यस्मिंस्तत् । बहुकुसुमाऽऽबन्धबद्धरामाऽऽवासं = बहूनि कुसु-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मानि येषां तेषाम् (वृक्षाणाम्) आबन्धेन (परस्परसंश्लेषेण) बद्धो रामस्य आवासो यस्मिंस्तत्। हरिपल्लवतरुजालं=हरयः (पिङ्गलाः) पल्लवा यस्मिंस्तत् हरिपल्लवं, तत् तरुजालं यस्मिंस्तत्। 'पल्लवोऽस्त्री किसलयम्' इत्यमरः। तुङ्गोरुसमिद्धतरुवरहिमच्छायं=तुङ्गा उरवः समिद्धा ये तरुवराः, तैर्हिमा छाया यस्मिंस्तत्। 'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुङ्गे' इत्यमरः। जलतीरमित्यस्य विशेषणं चैतत् ॥

भावार्थः—समुद्र चञ्चल वानरसमूहसे युक्त, बहुत फूलोंवाले वृक्षोंके परस्पर संश्लेषसे बने हुए रामचन्द्रजीके वासस्थानसे युक्त, पिङ्गल पल्लवोंवाले वृक्षसमूहसे सम्बद्ध और उन्नत, विस्तीर्ण और उज्ज्वल श्रेष्ठ वृक्षों से ठण्डी छायावाले जलतट को प्राप्त हुए ॥ ६ ॥

वरवारणं सलिलभरेण गिरिमहीमण्डलसंवरवारणम्।
वसुधारयं तुङ्गतरङ्गसङ्गपरिहीणलोलवसुधारयम् ॥ ७ ॥

अन्वयः—(लवणजलः) वरवारणं सलिलभरेण गिरिमहिमण्डलसंवरवारणं वसुधारयं तुङ्गतरङ्गसङ्गपरिहीणलोलवसुधारयम् (जलतीरम् आरूढः) ॥

व्याख्या—(लवणजलः=समुद्रः) वरवारणं=श्रेष्ठहस्तियुक्तं, सलिलभरेण= जलसमूहेन, गिरिमहीमण्डलसंवरवरणं=पर्वतभूमण्डलाऽऽवरणनिषेधकं, वसुधारयं= द्रव्यधारकं, तुङ्गतरङ्गपरिहीणलोलवसुधारयम् = उच्चोर्मिसंश्लेषनष्टचञ्चलभूमिवेगम्, जलतीरम् आरूढः ॥

व्युत्पत्तिः—वरवारणं=वरा वारणा यस्मिंस्तत्, 'मतङ्गजो गजो नागः कुञ्जरो वारणः करी।' इत्यमरः। गिरिमहीमण्डलसंवरवारणं=गिरीणां महीमण्डलस्य च यः संवरस्तस्य वारणम्। वसुधारयं=धारयतीति धारयम्, णिजन्तात् 'धृञ् धारणे' इति धातोः 'अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च' इति शप्रत्ययः। वसूनां धारयम्। तुङ्गतरङ्गपरिहीणलोलवसुधारयं= तुङ्गा ये तरङ्गाः,तेषां सङ्गात् परिहीणो लोलो वसुधायां रयो यस्मिंस्तदिति जलतीरविशेषणम्। एतानि सप्तसङ्कीर्णानि, संस्कृतप्राकृतयोः सामान्यस्वरूपत्वात्। अत्र पद्यस्य द्वयोरर्द्धयोराद्यन्तयोर्यमकम् ॥

भावार्थः—समुद्र श्रेष्ठ हाथियोंसे युक्त, जलसमूहसे पर्वत और भूमण्डलके आवरणको रोकनेवाले, द्रव्यके धारक जहाँ पर उन्नत तरङ्गोंके सम्बन्ध से चञ्चल पृथिवीमें वेग नष्ट हो गया है ऐसे जलतट को प्राप्त हुए ॥ ७ ॥

प्रणिपत्य ततो वचनं जगाद हितमायतौ पतिर्वारीणाम्।
गङ्गाऽवलम्बिबाहू रामं बहलोरुहरितमालच्छायम् ॥ ८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—ततो गङ्गाऽवलम्बिबाहुः वारीणां पतिः बहलरुहहरितमालच्छायं रामं प्रणिपत्य आयतौ हितं वचनं जगाद ॥

व्याख्या—ततः=जलतटप्राप्त्यनन्तरं, गङ्गाऽवलम्बिबाहुः=जाह्नव्यवलम्बनशीलभुजः, वारीणां=जलानां, पतिः=स्वामी, समुद्र इत्यर्थः। बहलोरुहरितमालच्छायं=निबिडमहाहरिततापिच्छकान्ति, रामं, प्रणिपत्य=नमस्कृत्य, आयतौ=आगामिनि काले, हितं=पथ्यं, स्वस्य रामस्य चेति शेषः एतादृशं वचनं=वचः, वक्ष्यमाणरूपमिति भावः। जगाद=उक्तवान् ॥

व्युत्पत्तिः—गङ्गाऽवलम्बिबाहुः=गङ्गामवलम्बेते तच्छीलाविति गङ्गाऽवलम्बिनौ, 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः। गङ्गाऽवलम्बिनौ बाहू यस्य सः गङ्गाऽवलम्बिबाहुः, 'रामम्' इति उत्तरपदे परे संस्कृते 'ढ्रलोपे पूर्वस्य दीर्घोऽण' इति दीर्घत्वम्। प्राकृते तु पुंल्लिङ्गे उकारस्य दीर्घत्वमेव। बहलोरुहरितमालच्छायम्=उरुर्हरिर्यस्तमालस्तस्य छाया उरुहरितमालच्छाया। बहला उरहरितमालच्छाया यस्य, तम्। आयतौ='उत्तरः काल आयतिः' इत्यमरः। अत्र पूर्वार्द्धे प्राकृतस्याऽभावात् निरवद्यम्, उत्तरार्धं तु सङ्कीर्णम्। उपमालङ्कारः ॥

भाषाऽर्थः—जल तटमें पहुँचनेके अनन्तर गङ्गाका अवलम्बन करने वाले बाहुओंसे युक्त जलस्वामी समुद्र महान हरित वर्णवाले तमाल वृक्षके सदृश घनी छायावाले रामचन्द्रजीको नमस्कार कर उत्तरकालमें हितकारक वचन बोले ॥ ८ ॥

तुङ्गा गिरिवरदेहा अगमं सलिलं समीरणो रसहारी।
अहिमो रविकिरणगणो माया संसारकारणं ते परमा ॥ ९ ॥

अन्वयः—गिरिवरदेहाः तुङ्गाः सलिलम् अगमम् समीरणो रसहारी रविकिरणगणः अहिमः संसारकारणं ते परमा माया ॥

व्याख्या—(हे राम !) गिरिवरदेहाः=श्रेष्ठपर्वतकायाः, तुङ्गाः=उन्नताः, सलिलं=जलम्, अगमम्=अगम्यम्। समीरणः=वायुः, रसहारी=जलशोषकः, रविकिरणगणः=सूर्यरश्मिसमूहः, अहिमः=उष्णः, संसारकारणं=लोकहेतुः, ते=तव, परमा=उत्कृष्टा, माया=शाम्बरी ॥

व्युत्पत्तिः—अगमम्=न गम्यत इति, 'ग्रहवृदृनिश्चिगमश्चे'त्यप्। रसहारी=रसं हरतीति तच्छीलः ॥

भाषाऽर्थः—हे राम ! श्रेष्ठ पर्वतोंके शरीर ऊँचे, जल अगम्य, वायु जलशोषक और सूर्यका किरणसमूह उष्ण, संसारका कारण आपकी श्रेष्ठ माया है ॥ ९ ॥

आयाससंभवारुण ! संहर संहारहिमनरसमच्छायम्।
बाणं वारिसमूहं संगच्छ पुराणचारुदेहावासम् ॥ १० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे आयाससम्भवारुण ! संहारहिमहरसमच्छायं बाणं संहर। पुराणचारुगेहाऽऽवासं वारिसमूहं संगच्छ॥

व्याख्या—हे आयाससम्भवाऽरुण=हे कोपोत्पत्तिरक्तवर्ण ! संहारहिमहरसमच्छायं=प्रलयसूर्यतुल्यतेजसं, बाणं=शरं, संहर=उपशमय, पुराणचारुदेहाऽऽवासं=पुरातनसुन्दरशरीराऽवस्थानं, वारिसमूहं=जलसमूहं, संगच्छ=अङ्गीकुरु रक्षेति भावः॥

व्युत्पत्तिः—आयाससंभवाऽरुण=आयासस्य संभवेनाऽरुणस्तत्सम्बुद्धौ। संहारहिमहरसमच्छायं=हिमं हरन्तीति हिमहराः सूर्या अग्नयो वा, 'हरतेरनुद्यमनेऽच्' इत्यच्प्रत्ययः। संहारे हिमहरास्तैः समा छाया यस्य सः, तम्। पुराणचारुदेहाऽऽवासं=पुराणश्चारुर्यो देहस्तस्य आवासस्तम्, 'पुराणे प्रतनप्रत्नपुरातनाचिरन्तनाः।' इत्यमरः। संगच्छ=सकर्मकत्वात् 'समो गम्यृच्छिभ्याञ्च' इत्यात्मनेपदं न भवति॥

भाषाऽर्थः—क्रोधकी उत्पत्तिसे लाल वर्णवाले हे भगवन् ! प्रलयकालके सूर्यके सदृश तेजसे युक्त बाण को शान्त कीजिए। प्राचीन सुन्दर शरीरके अवस्थान रूप जलसमूहकी रक्षा कीजिए॥ १०॥

असुलभहरिसंचारं जलमूलं बहलपङ्करुद्धायामम्।
भण किं जलपरिहीण सुगमं तिमिकम्बुवारिवारणभीमम्॥ ११॥

अन्वयः—जलमूलं जलपरिहीणम् (अपि) बहलपङ्करुद्धाऽऽयामं तिमिकम्बुवारिवारणभीमम् असुलभहरिसंचारं (सत्) किं सुगमं? भण।

व्याख्या—जलमूलं=तोयाऽवस्थानं, जलपरिहीणं=तोयरहितमपि, आग्नेयाऽस्त्रेणेति शेषः। बहलपङ्करुद्धाऽऽयामं=सान्द्रकर्दमनिवारितदैर्घ्यं, तिमिकम्बुवारिवारणभीमं=मत्स्यविशेषशङ्खजलहस्तिभयङ्करम्, अत एव—असुलभहरिसंचारं=दुर्लभवानरपर्यटनं सत्, किं सुगमं=किं सुगमनीयं?, भण=ब्रूहि, नैव सुगमं, प्रत्युत सुतरां दुर्गममिति भावः।

व्युत्पत्तिः—बहलपङ्करुद्धाऽऽयामं=बहलो यः पङ्कस्तेन रुद्ध आयामो यस्मिंस्तत्। तिमिकम्बुवारिवारणभीमं=तिमयश्च कम्बवश्च वारिवारणाश्च तिमिकम्बुवारिवारणास्तैर्भीमम्। 'तिमिर्मीन' इति हलायुधः। 'अस्ति मत्स्यस्तिमिर्नाम दशयोजनविस्तृतः।' इत्यन्ये। असुलभहरिसंचारं=न सुलभोऽसुलभस्तादृशो हरिसंचारो यस्मिंस्तत्। भण=वाक्यार्थः कर्म॥

भाषाऽर्थः—जलाधार आग्नेय अस्त्रसे जलरहित होता हुआ भी गाढ़ कीचड़से रुद्ध दैर्घ्यवाला और बड़े मत्स्य, शङ्ख और जलहस्तियोंसे भयङ्कर अत एव वानरों के पर्यटनका अविषय होता हुआ क्या सुगम है ? कहिये॥ ११॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गन्तुं लङ्कातीरं बद्धमहासलिलसंचरेण सहेलम् ।
तरुहरिणा गिरिजालं वहन्तु गिरिभारसंसहा गुरुदेहम् ॥ १२ ॥

अन्वयः—बद्धमहासलिलसंचरेण सहेलं लङ्कातीरं गन्तुं गिरिभारसंसहाः तरुहरिणाः गुरुदेहं गिरिजालं वहन्तु ॥

व्याख्या—बद्धमहासलिलसंचरेण = घटितमहाजलसेतुना, सहेलं = सकौतुकं, लङ्कातीरं = लङ्कासम्बन्धितटं, गन्तुं = यातुं, गिरिभारसंसहाः=पर्वतभारवहनसमर्थाः, तरुहरिणाः = शाखामृगाः, वानरा इत्यर्थः । गुरुदेहं=महाशरीरं, गिरिजालं = पर्वतसमूहं, वहन्तु = प्रापयन्तु ॥

व्युत्पत्तिः—बद्धमहासलिलसंचरेण = संचरन्त्यनेनेति संचरो मार्गः, 'गोचरसंचरवहव्रजव्यजाषणनिगमाश्च' इति घप्रत्ययान्तो निपातः । अत्र संचरशब्दो लक्षणया सेत्वर्थाऽभिधायकः । बद्धो महासलिले यः संचरस्तेन । सहेलं = हेलया सहितं यथा तथेति क्रियाविशेषणम् । गिरिभारसंसहाः=संसहन्त इति संसहाः, पचाद्यच् । गिरिभारस्य संसहाः । तरुहरिणाः=तरुचारिणो हरिणाः, मध्यमपदलोपी समासः । गुरुदेहं = गुरुर्देहो यस्य तत् ॥

भाषाऽर्थः—हे राम ! जलसमूहमें बनाये गये पुलसे कौतुकपूर्वक लङ्कासम्बन्धी तीरमें जानेके लिये पर्वतका भार ढोनेमें समर्थ वानर महाशरीरवाले पर्वत-समूहको ले जायँ ॥ १२ ॥

हरहासरुद्धविगमं परकण्ठगणं महाहवसमारम्भे ।
छिन्दन्तु रामबाणा गम्भीरे मे जले महागिरिबद्धे ॥ १३ ॥

अन्वयः—गम्भीरे मे जले महागिरिबद्धे (सति) महाऽऽहवसमारम्भे रामबाणाः हरहासरुद्धविगमं परकण्ठगणं छिन्दन्तु ॥

व्याख्या—गम्भीरे = अगाधे, मे = मम, समुद्रस्य, जले = तोये, महागिरिबद्धे = महापर्वतनद्धे सति, महाऽऽहवसमारम्भे = महासमरोपक्रमे, रामबाणाः = रामचन्द्रशराः, हरहासरुद्धविगमं = शिवहास्यनिवारिताऽपायं परकण्ठगणं = शत्रुग्रीवासमूहं, छिन्दन्तु = द्वैधीकुर्वन्तु । रावणो हरप्रीतिसम्पादनाऽर्थं स्वशिरांसि छिन्नवान् तेन प्रीतो हरो जहासेति प्रसिद्धिमनुसृत्य उक्तमिदं वचनम् ॥

व्युत्पत्तिः—महागिरिबद्धे = महागिरिभिः बद्धे । महाऽऽहवसमारम्भे=महाऽऽहवस्य समारम्भे । हरहासरुद्धविगमं=हरतीति हरः, पचाद्यच । हरस्य हासेन रुद्धो विगमो यस्य तम् । परकण्ठगणं=परस्य (शत्रोः, रावणस्येत्यर्थः) कण्ठानां गणम् । छिन्दन्तु='छिदिर् द्वैधीकरणे' इति धातोर्लोट् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—गम्भीर मेरे जलके महापर्वतोंसे बद्ध होनेपर महासमरके आरम्भमें रामचन्द्रजीके बाण महादेवके हास्यसे जिसका विनाश रुक गया है, ऐसा शत्रुका कण्ठ-समूह काट दें ॥ १३ ॥

गच्छन्तु चारुहासा वीररसाबन्धरुद्धभयसंबन्धम् ।
हन्तुं बहुबाहुबलं हरिकरिणो गिरिवरोरुदेहं सहसा ॥ १४ ॥

अन्वयः—चारुहासा हरिकरिणः वीररसाऽऽबन्धरुद्धभयसम्बन्धं गिरिवरोरुदेहं बहुबाहुबलं सहसा हन्तुं गच्छन्तु ॥

व्याख्या—चारुहासाः = सुन्दरहास्ययुक्ताः, हरिकरिणः = कपिकुञ्जराः, वीररसाऽऽबन्धरुद्धभयसम्बन्धं = शौर्यसततप्रवर्तननिवारितत्राससम्पर्कं, गिरिवरोरुदेहं = शैलश्रेष्ठविशालशरीरं, बहुबाहुबलं = प्रचुरभुजसैन्यं, रावणसैन्यमिति भावः । सहसा = अतर्कित एव, हन्तुं = व्यापादयितुं, गच्छन्तु = यान्तु ॥

व्युत्पत्तिः—चारुहासाः = चारुर्हासो येषां ते । हरिकरिणः = हरयः करिण इव, 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति समासः । वीररसाऽऽबन्धरुद्धभयसम्बन्धं = वीररसस्य (शौर्यस्य) य आबन्धः, तेन रुद्धो भयसम्बन्धो यस्य तत् । गिरिवरोरुदेहम् = उरुर्देहो यस्य तत् उरुदेहं गिरिवर इव उरुदेहम् । बहुबाहुबलं = बहवो बाहवो यस्य स बहुबाहुः, रावण इत्यर्थस्तस्य बलम् । एतानि षट् सङ्कीर्णानि संस्कृतप्राकृतयोस्तुल्यत्वात् ।

भाषाऽर्थ—मनोहर हास्य वाले श्रेष्ठ वानर शौर्यकी निरन्तर प्रवृत्तिसे निवारित भयसम्बन्धसे युक्त, श्रेष्ठ पर्वतके सदृश महाशरीरवाले रावण-सैन्यको सहसा मारने के लिए जायं ॥ १४ ॥

जिगमिषया संयुक्ता बभूव कपिवाहिनी मते दाशरथेः ।
बुद्धजलालयचित्ता गिरिहरणारम्भसंभवसमालोला ॥ १५ ॥

अन्वयः—दाशरथेः मते बुद्धजलालयचित्ता गिरिहरणारम्भसम्भवसमालोला कपिवाहिनी जिगमिषया संयुक्ता बभूव ॥

व्याख्या—दाशरथेः = रामस्य, मते = अभिप्राये सति, बुद्धजलालयचित्ता = ज्ञातसमुद्राऽभिप्राया, गिरिहरणाऽऽरम्भसम्भवसमालोला = पर्वताऽऽनयनाऽनुष्ठानचञ्चला, कपिवाहिनी = वानरसेना, जिगमिषया = गमनेच्छया, संयुक्ता = युक्ता, बभूव सञ्जाता ॥

व्युत्पत्तिः—दाशरथेः = दशरथस्याऽपत्यं पुमान् दाशरथिस्तस्य, 'अत इञ्' इति इञ । बुद्धजलाऽऽलयचित्ता = बुद्धं जलाऽऽलयस्य चित्तं यया सा । गिरिहरणाऽऽरम्भसम्भवसमालोला = गिरीणां यत् हरणं तस्य य आरम्भसम्भवः (अनुष्ठानम्),

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेन समालोला। जिगमिषया=गन्तुमिच्छया, सन्नन्तात् गम् धातोः 'अ प्रत्ययात्' इति अ प्रत्ययः। ततष्टाप्। अत्र पूर्वार्द्धे प्राकृताऽभावात् निरवद्यम् ॥

भाषाऽर्थः—रामका अभिप्राय होनेपर समुद्रके अभिप्रायको जाननेवाली, पर्वतोंके लानेके अनुष्ठानसे अतिशय आकुल वानर-सेना जाने की इच्छासे युक्त हो गई ॥ १५ ॥

गुरुगिरिवरहरणसहं संहारहिमारिपिङ्गलं रामबलम्।
आरूढं सहसा खं वरुणालयविमलसलिलगणगम्भीरम् ॥ १६ ॥

अन्वयः—गुरुगिरिवरहरणसहं संहारहिमाऽरिपिङ्गलं रामबलं वरुणाऽऽलयविमलसलिलगणगम्भीरं खम् सहसा आरूढम् ॥

व्याख्या—गुरुगिरिवरहरणसहं=दुर्वहश्रेष्ठपर्वताऽऽनयनसमर्थं, संहारहिमारिपिङ्गलं=प्रलयाऽग्निकपिलं, रामबलं=रामचन्द्रसैन्यं, वरुणाऽऽलयविमलसलिलगणगम्भीरं=समुद्रनिर्मलजलसमूहदुरवगाहं, खम्=आकाशं, मनसा=तत्क्षणम्, आरूढम्=आरुरोह ॥

व्युत्पत्तिः—गुरुगिरिवरहरणसहं=गुरवो ये गिरिवरास्तेषां हरणं सहते इति, कप्रकरणे 'मूलविभुजादिभ्य उपसंख्यानम्' इति कः। यद्वा सहत इति सहं, पचाद्यच्। तस्य सहम्। संहारहिमाऽरिपिङ्गलं-संहारे यो हिमाऽरिः (अग्निः) स इव पिङ्गलम्। वरुणाऽऽलयविमलसलिलगणगम्भीरं=वरुणाऽऽलयस्य (समुद्रस्य) विमलो यः सलिलगणः स इव गम्भीरं, तत्। आरूढं=कर्तरि क्तप्रत्ययः। उपमाऽलङ्कारः ॥

भाषाऽर्थ—दुर्वह श्रेष्ठ पर्वतोंके लानेमें समर्थ, प्रलय कालके अग्निके सदृश पिङ्गल, रामकी सेना समुद्रके निर्मल जल-समूहके सदृश गम्भीर आकाशको उसी क्षण आरूढ हो गई ॥ १६ ॥

कलापकं चतुर्भिः १७–२०

अवगाढं गिरिजालं तुङ्गमहाभित्तिरुद्धसुरसञ्चारम्।
अभयहरिरासभीमं करिपरिमलचारुबहलकन्दरसलिलम् ॥ १७ ॥

अन्वयः—(रामबलेन) तुङ्गमहाभित्तिरुद्धसुरसञ्चारम् अभयहरिरासभीमं करिपरिमलचारुबहलकन्दरसलिलं गिरिजालम् अवगाढम् ॥

व्याख्या—तुङ्गमहाभित्तिरुद्धसुरसञ्चारं = प्रांशुबृहत्कुड्यनिवारितदेवसञ्चारम्, अभयहरिरासभीमं = निर्भयसिंहशब्दभयङ्करं, करिपरिमलचारुबहलकन्दरसलिलं= हस्तिसंमर्दगन्धमनोहरवनगुहाजलं, गिरिजालं=पर्वतसमूहः, अवगाढम्=अवलम्बितम्, खमारुह्य रामबलेनेति शेषः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—तुङ्गमहाभित्तिरुद्धसुरसञ्चारं = तुङ्गा महत्यो या भित्तयः, ताभिः रुद्धः सुरसञ्चारो यस्मिंस्तत्। अभयहरिरावभीमम्=अविद्यमानं भयं येषां ते अभयाः ते च ते हरयः (सिंहाः) तेषां रावः (शब्दः), तेन भीमम्। करिपरिमलचारुबहलकन्दरसलिलं = करिणां यः परिमलः (संमर्दजनितमदगन्धः), तेन चारु बहलं कन्दरसलिलं यस्मिंस्तत्। अवगाढम् अवपूर्वकात् 'गाहू विलोडने' इति धातोः क्तप्रत्ययः॥

भावार्थः—रामचन्द्रकी सेनाने उन्नत महाभित्तिसे जहाँ पर देवताओंका सञ्चार रुद्ध हो गया है, निर्भय सिंहोंके शब्दसे भयङ्कर, हाथियोंके विमर्दनमें उत्पन्न मदगन्धसे मनोहर और घन गुहाजलसे युक्त पर्वत-समूहका अवलम्बन किया॥

अलिगणविलोलकुसुमं सकमलजलमत्तकुररकारण्डवगणम्।
फणिसंकुलभीमगुहं करिदन्तसमूहसरसवसुधाखण्डम्॥ १८॥

अन्वयः—(रामबलेन) अलिगणविलोलकुसुमं सकमलजलमत्तकुररकारण्डवगणं फणिसङ्कुलभीमगुहं करिदन्तसमूढसरसवसुधाखण्डम् (अवगाढम्)।

व्याख्या—अलिगणविलोलकुसुमं = भ्रमरसमूहचञ्चलपुष्पं, सकमलजलमत्तकुररकारण्डवगणं = सपद्मतोयक्षीबोत्क्रोशहंसविशेषसमूहं, फणिसङ्कुलभीमगुहं=सर्पव्याप्तभयङ्करकन्दरं, करिदन्तसमूढसरसवसुधाखण्डं=हस्तिदशनसमुत्क्षिप्ताऽऽर्द्रभूमिखण्डं, गिरिजालं रामबलेन अवगाढमिति अध्याहारः॥

व्युत्पत्तिः—अलिगणविलोलकुसुमम् = अलिगणैर्विलोलानि कुसुमानि यस्मिंस्तत्। सकमलजलमत्तकुररकारण्डवगणं = सकमलानि यानि जलानि, तेषु मत्ताः कुरराणां कारण्डवानां च गणाः यस्मिंस्तत्। फणिसङ्कुलभीमगुहं = फणिभिः सङ्कुला अतो भीमा गुहा यस्मिंस्तत्। करिदन्तसमूढसरसवसुधाखण्डं = करिदन्तैः समूढं सरसं वसुधाखण्डं यस्मिंस्तत्॥

भावार्थः—रामकी सेनाने भ्रमरसमूहसे चञ्चल फूलोंसे युक्त कमलोंसे युक्त जलमें मत्त कुरर और कारण्डव नामके पक्षिगणसे सम्पन्न, सर्पोंसे व्याप्त भयङ्कर गुहाओंवाले और हाथियोंके दाँतोंसे समुन्नत सरस पृथिवीखण्डसे युक्त पर्वतसमूहका अवलम्बन किया॥ १८॥

अरविन्दरेणुपिञ्जरसारसरवहारिविमलबहुचारुजलम्।
रविमणिसंभवहिमहरसमागमाबद्धबहुलसुरतरुधूपम्॥ १९॥

अन्वयः—(रामबलेन) अरविन्दरेणुपिञ्जरसारसरवहारिविमलबहुचारुजलं रविमणिसंभवहिमहरसमागमाऽऽबद्धबहुलसुरतरुधूपम् (गिरिजालम् अवगाढम्)॥

व्याख्या—अरविन्दरेणुपिञ्जरसारसरवहारिविमलबहुचारुजलम्=कमलपरागपि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलसारसशब्दमनोहरनिर्मलप्रचुरसुन्दरतोयं, रविमणिसंभवहिमहरसमागमाऽऽबद्ध-बहुलसुरतरुधूपं=सूर्यकान्तजानलसंगमजनितबहुदेहदारुधूपं, गिरिजालं रामबलेन अवगाढमिति अध्याहारः ॥

व्युत्पत्तिः—अरविन्दरेणुपिञ्जरसारसरवहारिविमलबहुचारुजलम् = अरविन्दानां रेणुभिः पिञ्जरा ये सारसाः (पुष्कराह्वाः, पक्षिविशेषाः) तेषां रवेण (शब्देन) हारिविमलं बहु चारु जलं यस्मिंस्तत् । 'पुष्कराह्वस्तु सारसः' इत्यमरः । रविमणिसंभवहिमहरसमागमाऽऽबद्धबहुलसुरतरुधूपं = रविमणिसंभवः (सूर्यकान्तमण्युत्पन्नः) यो हिमहरः (अग्निः), तेन यः समागमः, तेन आबद्धः (जनितः) बहुलः सुरतरुधूपो यस्मिंस्तत् ॥

भाषाऽर्थः—रामकी सेनाने कमलोंके परागसे पिङ्गल सारसोंके शब्दसे मनोहर निर्मल अधिक सुन्दर जलसे युक्त और सूर्यकान्तमणिसे उत्पन्न अग्निके समागमसे उत्पन्न प्रचुर देवदारुवृक्षोंके धूपसे सम्पन्न पर्वतसमूहका अवलम्बन किया ॥ १९ ॥

हरिरवविलोलवारणगम्भीराबद्धसरसपुरुसंरावम् ।
घोणासंगमपङ्काविलसुबलभरसहोरुवराहम् ॥ २० ॥

अन्वयः—(रामबलेन) हरिरवविलोलवारणगम्भीराबद्धसरसपुरुसंरावं घोणासंगमपङ्काऽऽविलसुबलभरसहोरुवराहम् (गिरिजालम् अवगाढम्) ॥

व्याख्या—हरिरवविलोलवारणगम्भीराऽऽबद्धसरसपुरुसंरावं=सिंहशब्दचञ्चलहस्तिमन्द्रजनितभयानकरसमहाशब्दं, घोणासङ्गमपङ्काऽऽविलसुबलभरसहोरुवराहं=नासिकासम्पर्ककर्दमकलुषमहाशक्तिभरसमर्थविशालसूकरं, (गिरिजालम् अवगाढम् इति अध्याहारः) ॥

व्युत्पत्तिः—हरिरवविलोलवारणगम्भीराऽऽबद्धसरसपुरुसंरावं = हरीणां (सिंहानाम्) यो रवस्तेन विलोला ये वारणास्तैः गम्भीर आबद्धः सरसः पुरुः संरावो यस्मिंस्तत् । घोणासङ्गमपङ्काऽऽविलसुबलभरसहोरुवराहं = घोणायाः सङ्गमात् समुद्धृत इति शेषः, एतादृशो यः पङ्कस्तेन आविलाः सुबलाः भरसहाः उरवो वराहा यस्मिंस्तत् 'घोणा नासा च नासिका' इत्यमरः ॥

भाषाऽर्थः—रामचन्द्रजाकी सेनाने सिंहोंके शब्दसे डरनेवाले हाथियोंके गम्भीर और उत्पन्न भयानक रसवाले महान् शब्दसे युक्त और नासिकाके सम्पर्कसे उद्धृत कीचड़से मैले बलवान और भार सहनेवाले विशाल वराहोंसे युक्त पर्वत समूहका अवलम्बन किया ॥ २० ॥

उच्चखुः परिरब्धान् कपिसङ्घा बाहुभिस्ततो भूमिभृतः
निष्पिष्टशेषमूर्ध्नः शृङ्गविकीर्णोष्णरश्मिनक्षत्रगणान् ॥ २१ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—ततः कपिसङ्घाः बाहुभिः परिरब्धान् निष्पिष्टशेषमूर्ध्नः शृङ्गविकीर्णोष्णरश्मिनक्षत्रगणान् भूमिभृत उच्चख्नुः ॥

व्याख्या—ततः = अवगाहाऽनन्तरं, कपिसङ्घाः=वानरसमूहाः, बाहुभिः = भुजैः, परिरब्धान्=समाश्लिष्टान् , निष्पिष्टशेषमूर्ध्नः=चूर्णिताऽनन्तमस्तकान् , व्याप्तपातालमूलत्वादिति, शेषः। शृङ्गविकीर्णोष्णरश्मिनक्षत्रगणान् = शिखरविक्षिप्तसूर्यतारासमूहान् , भूमिभृतः = पर्वतान् , उच्चख्नुः = उत्खातवन्तः ॥

व्युत्पत्तिः—निष्पिष्टशेषमूर्ध्नः = निष्पिष्टाः शेषस्य मूर्धानो यैस्ते निष्पिष्टशेषमूर्धानस्तान्। 'शेषोऽनन्त' इत्यमरः। शृङ्गविकीर्णोष्णरश्मिनक्षत्रगणान् = शृङ्गैः विकीर्ण उष्णरश्मिः नक्षत्रगणश्च यैस्ते शृङ्गविकीर्णोष्णरश्मिनक्षत्रगणास्तान्। भूमिभृतः = भूमिं बिभ्रति इति भूमिभृतस्तान् , क्विप्रत्ययः। उच्चख्नुः = उत्पूर्वकात् 'खनु अवदारणे' धातोर्लिट्। 'गमहनजनखनघसां लोपः क्ङित्यनङि' इत्युपधालोपः। प्राकृतस्य अडायुक्तत्वादत्र सर्वं निरवद्यम् ॥

भाषाऽर्थः—पर्वतसमूहका अवलम्बन करनेके अनन्तर वानरसमूहोंने भुजोंसे परिगृहीत, शेषनागके मस्तकको चूर्णित करनेवाले, जहांपर शिखरोंसे सूर्य और नक्षत्रगण विक्षिप्त हो गये हैं ऐसे पर्वतोंको खोदा ॥ २१ ॥

तुङ्गमहागिरिसुभरा बाहुसमारुद्धभिदुरटङ्का बहुधा।
लवणजलबन्धकामा आरूढा अम्बरं महापरिणाहम् ॥ २२ ॥

अन्वयः—तुङ्गमहागिरिसुभराः बाहुसमारुद्धभिदुरटङ्काः बहुधा लवणजलबन्धकामाः (कपिसङ्घाः) महापरिणाहम् अम्बरम् आरूढाः ॥

व्याख्या—तुङ्गमहागिरिसुभराः = उन्नतविशालशैलजातभाराः, बाहुसमारुद्धभिदुरटङ्काः = भुजगृहीतविदारशीलोन्नतप्रदेशाः, बहुधा = अनेकप्रकारैः, लवणजलबन्धकामाः = समुद्रबन्धनसाऽभिलाषाः, कपिसङ्घा इति शेषः। महापरिणाहं = बृहद्विशालतोपेतम् , अप्रमेयदिग्विभागमिति भावः। अम्बरम् = आकाशम् , आरूढाः = आरोहन् ॥

व्युत्पत्तिः—तुङ्गमहागिरिसुभराः=तुङ्गा महान्तो ये गिरयः, तैः सुभराः। शोभनो भरो येषां ते सुभराः। बाहुसमारुद्धभिदुरटङ्काः = भेदनशीला भिदुराः, 'विदिभिदिच्छिदेः कुरच्' इति कुरच्प्रत्ययः। बाहुभिः समारुद्धा भिदुराः टङ्का यैस्ते। बहुधा = बहुभिः प्रकारैः, बहुशब्दस्य 'बहुगणवतुडतिसंख्या' इति संख्यासंज्ञत्वात् 'संख्याया विधार्थे धा' इति धाप्रत्ययः। लवणजलबन्धकामाः = लवणजलस्य बन्धं कामयन्त इति, 'शीलिकामिभक्ष्याचरिभ्यो णः' इति अणोऽपवादो णः। महापरिणाहं = महान् परिणाहो यस्य, तत् , 'परिणाहो विशालता' इत्यमरः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—उन्नत विशाल पर्वतोंसे भारवाले, विदारणशील उन्नत प्रदेशोंको बाहुओंसे ग्रहण करनेवाले और अनेक प्रकारोंसे समुद्रको बांधनेकी इच्छा करनेवाले वानरसमूह विशाल परिमाणवाले आकाशमें चढ़ गये ॥ २२ ॥

बहुधवलवारिवाहं विमलायसमहासिदेहच्छायम् ।
बद्धविहङ्गममालं हिमगिरिमिव मत्तकुररवसंबद्धम् ॥ २३ ॥

अन्वयः—(कपिसङ्घाः) बहुधवलवारिवाहं विमलाऽऽयसमहाऽसिदेहच्छायं बद्धविहङ्गममालं मत्तकुररवसम्बद्धं हिमगिरिम् इव (अम्बरम् आरूढाः) ॥

व्याख्या—बहुधवलवारिवाहं = प्रचुरश्वेतमेघयुक्तं, विमलाऽऽयसमहासिदेहच्छायं = निर्मललोहविकारमहाखड्गकायकान्ति, बद्धविहङ्गममालं=विरचितपक्षिपङ्क्ति, मत्तकुररवसम्बद्धं=क्षीबोत्क्रोशशब्दयुक्तं, हिमगिरिम् इव-हिमालयम् इव, (अम्बरं कपिसङ्घा आरूढा इति प्राक्तनस्य पदत्रयस्य परामर्शः) ॥

व्युत्पत्तिः—बहुधवलवारिवाहं = बहवो धवला वारिवाहा यस्मिंस्तत् । विमलाऽऽयसमहाऽसिदेहच्छायं=अयसो विकार आयसः, 'तस्य विकारः' इत्यण् । विमल आयसो महान् योऽसिः, तद्देहस्येव छाया यस्य तदिति व्यधिकरणबहुव्रीहिः । बद्धविहङ्गममालं=बद्धा विहङ्गमानां माला यस्मिंस्तत् । मत्तकुररवसम्बद्धं= मत्ता ये कुरराः, तेषां रवेण सम्बद्धम् , 'उत्क्रोशकुररौ समौ' इत्यमरः ॥

भाषाऽर्थः—वानरसमूह बहुत सफेद मेघोंसे युक्त, निर्मल लोहविकारके खड्गके शरीरके सदृश कान्तिवाले, पक्षियोंकी पङ्क्तिसे सम्बद्ध, मत्त उत्क्रोश पक्षियोंके शब्दसे सम्बद्ध हिमालयके सदृश आकाशमें चढ़ गये ॥ २३ ॥

चारुकलहंससंकुलमचण्डसंचारसारसाबद्धरवम् ।
सकुसुमकणगन्धवहं समयागमवारिसंगनिर्मलायामम् ॥ २४ ॥

अन्वयः—(कपिसंघाः) चारुकलहंससङ्कुलम् अचण्डसञ्चारसारसाऽऽबद्धरवं सकुसुमकणगन्धवहं समयाऽऽगमवारिसङ्गविमलाऽऽयामम् (अम्बरम् आरूढाः) ॥

व्याख्या—चारुकलहंससङ्कुलं = सुन्दरकादम्बव्याप्तम् , अचण्डसञ्चारसारसाऽऽबद्धरवं = शनैः सञ्चारिपुष्कराह्वजनितशब्दं, सकुसुमकणगन्धवहं = परागसहितवातयुक्तं, समयाऽऽगमवारिसङ्गविमलाऽऽयामं=वर्षाऽऽगमनजलसम्पर्कनिर्मलदैर्घ्यम् (अम्बरं कपिसङ्घा आरूढा इति प्राक्तनस्य पदत्रयस्य अध्याहारः) ॥

व्युत्पत्तिः—चारुकलहंससङ्कुलं = चारवो ये कलहंसास्तैः सङ्कुलं, 'कादम्बः कलहंसः स्यात्' इत्यमरः । अचण्डसञ्चारसारसाऽऽबद्धरवम्—अचण्डसञ्चारो येषां ते अचण्डसञ्चाराः, एतादृशा ये सारसाः 'पुष्कराह्वस्तु सारस' इत्यमरः । अचण्डसञ्चा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रसारसैः आबद्धो रवो यस्मिंस्तत्। सकुसुमकणगन्धवहं=कुसुमकणैः सहितः सकुसुमकणः। वहतीति वहः, पचाद्यच्। गन्धस्य वहो गन्धवहः, 'पृषदश्वो गन्धवहो गन्धवाहाऽनिलाऽऽशुगाः।' इत्यमरः। सकुसुमकणो गन्धवहो यस्मिंस्तत्। समयाऽऽगमवारिसङ्गविमलाऽऽयामं=समयस्य (वर्षाकालस्य) आगमेन यो वारिसङ्गस्तेन विमला आयामा यस्मिंस्तत् ॥

भाषाऽर्थः—वानर-समूह सुन्दर कादम्ब हंसोंसे व्याप्त, धीरे-धीरे उड़ने वाले सारसोंके शब्द से युक्त, परागयुक्त वायु वाले, वर्षाके आगमन से जलसम्पर्कसे निर्मल दीर्घतासे युक्त आकाश में चढ़ गये ॥ २४ ॥

सहसा ते तरुहरिणा गिरिसुभरा लवणसलिलबन्धारम्भे ।
तीरे गिरिमारूढा रामागमरुद्धसभयरिपुसंचारम् ॥ २५ ॥

अन्वयः—लवणसलिलबन्धाऽऽरम्भे गिरिसुभराः ते तरुहरिणाः रामाऽऽगमरुद्धसभयरिपुसञ्चारं तीरे गिरिम् सहसा आरूढाः ॥

व्याख्या—लवणसलिलबन्धाऽऽरम्भे = समुद्रबन्धनोपक्रमे, गिरिसुभराः = पर्वतमहाभाराऽन्विताः, ते = पूर्वोक्ताः, तरुहरिणाः = वानराः, रामाऽऽगमरुद्धसभयरिपुसञ्चारं = रामाऽऽगमननिरस्तभीतशत्रुसञ्चरणं, तीरे = तटे स्थितमिति शेषः। गिरिं = पर्वतम् , सहसा = तत्क्षणम् , आरूढाः = आरुरुहुः ॥

व्युत्पत्तिः—लवणसलिलबन्धाऽऽरम्भे = लवणसलिलस्य बन्धस्तस्याऽऽरम्भे। गिरिसुभराः=शोभनो भरो येषां ते सुभराः, गिरिभिः सुभराः। रामाऽऽगमरुद्धसभयरिपुसञ्चारं = रामस्याऽऽगमेन रुद्धः सभयानां रिपूणां सञ्चारो यस्मिंस्तत्। अत्र 'आरूढास्तीरगिरिम्' इति पाठे प्राकृते विसर्गलोपात् सङ्कीर्णत्वं न स्यात्। 'आरूढा तीरगिरिम्' इति पाठे च्युतसंस्कृतिदोषः। 'तीरगिरिमारूढा' इति जयमङ्गलसम्मतपाठेऽपि छन्दोभङ्गदोषोऽतः प्राचीना विद्वांसः 'तीरे गिरिमारूढा' इति पाठं पठन्ति एतानि चत्वारि संकीर्णानि ॥

भाषाऽर्थः—समुद्र-बन्धन के आरम्भमें पर्वतोंसे अधिक भारवाले वे वानर जहां पर रामके आगमनसे भीत शत्रुओंका भ्रमण निरुद्ध हो गया है ऐसे तटपर स्थित पर्वतपर सहसा चढ़ गये ॥ २५ ॥

ततः प्रणीताः कवियूथमुख्यैर्न्यस्ताः कृशानोस्तनयेन सम्यक् ।
अकम्प्रबन्धनाऽग्रनितम्बभागा महार्णवं भूमिभृतोऽवगाढाः ॥२६॥

अन्वयः—ततः कपियूथमुख्यैः प्रणीताः कृशानोः तनयेन सम्यक् न्यस्ताः अकम्प्रबन्धनाऽग्रनितम्बभागा भूमिभृतः महार्णवम् अवगाढाः ॥

व्याख्या—ततः=आरोहणाऽनन्तरं, कपियूथमुख्यैः=वानरसमूहप्रधानैः, नीला-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिभिरिति भावः। प्रणीताः = अर्पिताः, कृशानोः = अग्नेः, तनयेन = पुत्रेण, नलेनेत्यर्थः। सम्यक् = समीचीनं यथा तथा, न्यस्ताः = अर्पिताः, अकम्प्रबध्नाऽग्रनितम्बभागाः = स्थिरमूलशिखरमध्यांऽशाः, भूमिभृतः=पर्वताः, महार्णवं = महासागरम्, अवगाढाः = आच्छादयामासुः ॥

व्युत्पत्तिः—अकम्प्रबध्नाऽग्रनितम्बभागाः = कम्पनशीलाः कम्प्राः, 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' इति रप्रत्ययः। न कम्प्रा अकम्प्राः। बध्नश्च अग्रश्च नितम्बश्च बध्नाऽग्रनितम्बाः, तेषां भागाः बध्नाऽग्रनितम्बभागाः। 'मूलं बध्नोऽङ्घ्रिनामकः' इत्यमरः। अकम्प्रा बध्नाऽग्रनितम्बभागा येषां ते। भूमिभृतः = भूमिं बिभ्रतीति, क्विप्प्रत्ययः। पद्यमिदं तिङन्तपदाऽभावात् निराख्यातं प्राकृताऽभावात् निरवद्यं च; उपजातिवृत्तम् ॥

भाषाऽर्थः—अनन्तर नील आदि वानरसेनापतियों से अर्पित, अग्निपुत्र नल से अच्छी तरह से समर्पित, अकम्पनशील मूल, शिखर और मध्य भाग वाले पर्वतों ने महासागर का आच्छादित किया ॥ २६ ॥

तेनेऽद्रिबन्धो ववृधे पयोधिस्तुतोष रामो मुमुदे कपीन्द्रः।
तत्रास शत्रुर्ददृशे सुवेलः प्रापे जलान्तो, जहृषुः प्लवङ्गाः ॥ २७ ॥

अन्वयः—अद्रिबन्धः तेने पयोधिः ववृधे। रामः तुतोष। कपीन्द्रो मुमुदे। शत्रुः तत्रास। सुवेलो ददृशे। जलाऽन्तः प्रापे। प्लवङ्गाः जहृषुः ॥

व्याख्या—अद्रिबन्धः = पर्वतबन्धः, तेने = विस्तारितः, वानरैरिति शेषः। पयोधिः=समुद्रः, ववृधे=एधाञ्चक्रे, अद्रिभिः पूर्यमाणत्वात्पयोधिस्तीरं प्लावितवानिति भावः। रामः = रामचन्द्रः, तुतोष = तुष्टः। शत्रुवधः सुकर इति धियेति शेषः। कपीन्द्रः = सुग्रीवः, मुमुदे = हृष्टवान्, सुहृत्प्रत्युपकारकालः समायात इति धियेति शेषः। शत्रुः = रिपुः, रावण इत्यर्थः। तत्रास = त्रस्तः, रामः सेतुं बद्ध्वा लङ्कामायास्यति इति धियेति शेषः। सुवेलः=त्रिकूटपर्वतः, ददृशे=दृष्टः। जलाऽन्तः= तोयाऽन्तः, प्रापे = प्राप्तः, एवं च प्लवङ्गाः = वानराः, जहृषुः = हृष्टाः, स्वाम्यादेशः सम्पादित इति धियेति भावः ॥

व्युत्पत्तिः—पयोधिः = पयांसि धीयन्ते अत्रेति, 'कर्मण्यधिकरणे च' इति किप्रत्ययः। तत्रास = 'त्रसी उद्वेगे' इति धातोर्लिट्। सुबन्तपदैर्व्यवधानादेतत्पद्यमेकाऽन्तराख्यातं प्राकृताऽभावान्निरवद्यं च। उपजाति वृत्तम् ॥

भाषाऽर्थः—पर्वतका बन्ध विस्तारको प्राप्त हुआ। समुद्र बढ़ा। रामचन्द्रजी सन्तुष्ट हुए। वानरराज सुग्रीव प्रसन्न हुए। शत्रु रावण त्रस्त हुआ। त्रिकूट पर्वत दिखाई पड़ा। जलका अन्त प्राप्त हुआ। वानर प्रसन्न हो गये ॥ २७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्रेमुर्ववल्गुर्ननृतुर्जजक्षुर्जगुः समुत्पुप्लुविरे निषेदुः।
आस्फोटयांचक्रुरभिप्रणेदू रेजुर्ननन्दुर्वियुयुः समीयुः॥ २८॥

अन्वयः—भ्रेमुः, ववल्गुः, ननृतुः, जजक्षुः, जगुः, समुत्पुप्लुविरे, निषेदुः, आस्फोटयाञ्चक्रुः, अभिप्रणेदुः, रेजुः, ननन्दुः, वियुयुः, समीयुः॥

व्याख्या—भ्रेमुः=भ्रान्ताः, सेतुना पारं प्राप्य उत्सुकाः केचिदिति शेषः, एवं परत्राऽपि। केचित् ववल्गुः=गताः, कञ्चित्प्रदेशमिति शेषः। सातत्येनाऽनियतदेशपर्यटनं भ्रमणं, नियतदेशगमनं वल्गनमिति भेदः। केचित् ननृतुः=नृत्यं कृतवन्तः, अतिहर्षादिति शेषः। केचित् जजक्षुः=भक्षितवन्तः, फलानीति शेषः, अथवा हर्षाऽतिशयाद्धसितवन्तः। केचित् जगुः=गीतवन्तः। केचित् समुत्पुप्लुविरे=समुत्प्लुत्य गताः। केचित् निषेदुः=निषण्णाः, भ्रमणपरिश्रान्त्येति शेषः। केचित् आस्फोटयाञ्चक्रुः=वयं युध्याम इति अहङ्कारं चक्रुः, केचित् अभिप्रणेदुः=लङ्कोपकण्ठे नादं चक्रुः, केचित् रेजुः=दीप्तवन्तः, पुष्पादिनेति शेषः। केचित् ननन्दुः=आनन्दं प्राप्ताः, केचित् वियुयुः=यूथाद्वियुज्य गताः, एवञ्च केचित् समीयुः=एकत्र सम्भूय स्थिताः॥

व्युत्पत्तिः—भ्रेमुः='भ्रमु अनवस्थाने' इति धातोर्लिट्। जजक्षुः='जक्ष भक्षहसनयोः' इति धातोर्लिट्। पुष्पतुल्यानाम् आख्यातानां (तिङन्तपदानाम्) सुबन्तपदव्यवधानादृते गुम्फनादियमाख्यातमाला। उपजातिवृत्तम्॥

भावाऽर्थः—सेतुसे पारको प्राप्तकर उत्सुक होकर कुछ वानरोंने भ्रमण किया। कोई किसी स्थानमें गये। किसीने नृत्य किया। किसीने कुछ खाया वा कोई हँसने लगे। किसीने गाना गाया। कोई कूदने लगे। कोई थककर बैठ गये। कोई 'हम लड़ते हैं' इस प्रकारसे अहङ्कार करने लगे। कोई लङ्काके समीपमें शब्द करने लगे। कोई पुष्प आदिसे शोभित हुए। कोई आनन्दित हो गये और कोई एक स्थानमें मिलकर रहने लगे॥ २८॥

गिरिपङ्कचारुदेहं कक्कोललवङ्गबद्धसुरभिपरिमलम्।
बहुबहलोरुतरङ्गं परिसरमारूढमुद्धरं लवणजलम्॥ २९॥

अन्वयः—गिरिपङ्कचारुदेहं कक्कोललवङ्गबद्धसुरभिपरिमलं बहुबहलोरुतरङ्गम् उद्धरं लवणजलं परिसरम् आरूढम्॥

व्याख्या—गिरिपङ्कचारुदेहं=पर्वतगैरिककर्दमसुन्दरशरीरं, कक्कोललवङ्गबद्धसुरभिपरिमलं=कोलकदेवकुसुमजनितविमर्दगन्धं, बहुबहलोरुतरङ्गं=प्रभूतस्थूलो-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

घतमङ्गम् , उद्धुरम्=उद्धतं, लवणजलं=समुद्रतोयं, परिसरं=पर्यन्तभुव तटम्, आरूढम्=आरुरोह ॥

व्युत्पत्तिः—गिरिपङ्कचारुदेहं=गिरीणां यः पङ्कः (गैरिकादिधातुकर्दमः) तेन चारुर्देहो यस्य तत्। कक्कोललवङ्गबद्धसुरभिपरिमलं=कक्कोलानि च लवङ्गानि च कक्कोललवङ्गानि, तैर्बद्धः सुरभिः परिमलो यस्मिंस्तत्। 'अथ कोलकम्, कक्कोलकं कोशफलम्' इत्यमरः। बहुबहलोरुतरंगं=बहवो बहला उरवस्तरंगा यस्य तत्। उद्धुरं=धरामुत्क्रान्तम् , 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति समासः। परिसरं='पर्यन्तभूः परिसरः' इत्यमरः॥

भाषाऽर्थः—पर्वतोंके गैरिक आदि धातुके कीचड़से सुन्दर देहवाला, कंकोल और लवंगोंसे विमर्दज सुगन्धिसे युक्त, अधिक, स्थूल और उन्नत तरंगोंसे संपन्न पृथ्वीके अतिक्रान्त समुद्रका जल निकटके तटको आरूढ हुआ ॥ २९ ॥

लोलं कूलाभिगमे खे तुङ्गामलनिबद्धपुरुपरिणाहम्।
सुरगंगाभरणसहं गिरिबन्धवरेण लवणसलिलं रुद्धम् ॥ ३० ॥

अन्वयः—कूलाऽभिगमे लोलं खे तुंगाऽमलनिबद्धपुरुपरिणाहं सुरगंगाभरणसह लवणसलिलं गिरिबन्धवरेण रुद्धम् ॥

व्याख्या—कूलाऽभिगमे=तटगमने, लोलं=चञ्चलं, खे=आकाशे, तुङ्गाऽमलनिबद्धपुरुपरिणाहं=प्रांशुनिर्मलसंयुक्तमहाविशालत्वं, सुरगंगाभरणसहं=मन्दाकिनीपूरणसमर्थं, लवणसलिलं=समुद्रजलं,गिरिबन्धवरेण=सेतुना,रुद्धं=प्रतिबद्धम् ।

व्युत्पत्तिः—तुंगाऽमलनिबद्धपुरुपरिणाहं=तुंगं तत् अमलं तुंगाऽमलं, तद्यथा तथा निबद्धः पुरुः परिणाहो यस्य तत्। सुरगंगाभरणसहं=सुरगंगायाः भरणे सहम्॥

भाषाऽर्थः—तटके सम्मुख जानेमें चञ्चल, आकाशमें उन्नत और निर्मलतापूर्वक महती विशालतासे संयुक्त, और मन्दाकिनीको पूर्ण करनेको समर्थ समुद्रका जल सेतुसे रुद्ध किया गया ॥ ३० ॥

कुलकम् ३१-४३

आरूढं च सुवेलं तरुमालाबन्धहारिगिरिवरजालम्।
रावणचित्तभयङ्करमापिङ्गललोलकेसरं रामबलम् ॥ ३१ ॥

अन्वयः—रावणचित्तभयङ्करम् आपिङ्गललोलकेसरं रामबलं तरुमालाबन्धहारिगिरिवरजालं सुवेलम् आरूढम् ॥

व्याख्या—रावणचित्तभयंकरं=दशाऽऽननमानसभयजनकम्, आपिंगललोलकेसरम्=आकपिलचञ्चलकेशं, रामबलं=दाशरथिसैन्यं, तरुमालाऽऽबन्धहारि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गिरिवरजालं = वृक्षपङ्क्तिवेष्टनसुन्दरपर्यन्तपर्वतसमूहं, सुवेलं=त्रिकूटपर्वतम् , आरू-ढम् = आरुरोह ॥

व्युत्पत्तिः—रावणचित्तभयङ्करं = भयं करोतीति भयङ्करं, 'मेघर्तिभयेषु कृञः' इति खच् , खित्वात् 'अरुर्द्विषदजन्तस्य मुम्' इति मुम् । रावणचित्तस्य भयङ्करम् । आपिङ्गललोलकेसरम् = आपिङ्गलानि लोलानि केसराणि यस्य तत् । तरुमाला-ऽऽबन्धहारिगिरिवरजालं = तरुमालाया य आबन्धः, तेन हारि गिरिवराणां जालं यस्य, तम् ॥

भाषाऽर्थः—रावणके चित्तमें भय उत्पन्न करने वाली, पिङ्गल और चञ्चल केशोंसे युक्त रामचन्द्रकी सेना वृक्षपंक्तिके वेष्टनसे सुन्दर, पर्यन्तपर्वतोंके समूहसे सम्पन्न सुवेल (त्रिकूट) पर्वत पर चढ़ गई ॥ ३१ ॥

लङ्कालयतुमुलारवसुभरगभीरोरुकुञ्जकन्दरविवरम् ।
वीणारवरससङ्गमसुरगणसङ्कुलमहातमालच्छायम् ॥ ३२ ॥

अन्वयः—लङ्काऽऽलयतुमुलाऽऽरवसुभरगभीरोरुकुञ्जकन्दरविवरं वीणारवरस-सङ्गमसुरगणसङ्कुलमहातमालच्छायम् (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—लङ्काऽऽलयतुमुलाऽऽरवसुभरगभीरोरुकुञ्जकन्दरविवरं = राक्षसमहा-शब्दपरिपूर्णगम्भीरमहानिकुञ्जदरीच्छिद्रं, वीणारवरससंगमसुरगणसङ्कुलमहातमा-लच्छायं = वल्लकीशब्देच्छासमागमदेवसमूहव्याप्तवृहत्तापिच्छाऽनातपं, सुवेलं राम-बलम् आरूढमिति पूर्वस्थपदानामध्याहारः ॥

व्युत्पत्तिः—लंकाऽऽलयतुमुलाऽऽरवसुभरगभीरोरुकुञ्जकन्दरविवरं=लंका आल-यो येषां ते लंकाऽऽलयाः (राक्षसाः), तेषां तुमुलो य आरवः, तेन सुभराणि गभी-रोरुकुञ्जाः कन्दरविवराणि च गभीरोरुकुञ्जकन्दरविवराणि । लंकाऽऽलयतुमुलाऽऽर-वसुभराणि गभीरोरुकुञ्जकन्दरविवराणि यस्मिन् , तम् । वीणारवरससंगमसुरगण-सङ्कुलमहातमालच्छायं = वीणाया रवे यो रसस्तेन संगमो येषां ते वीणारवरस-सङ्गमाः, एतादृशा ये सुरगणास्तैः सङ्कुला महातमालच्छाया यस्मिंस्तम् ॥

भाषाऽर्थः—राक्षसोंके महाशब्दसे परिपूर्ण गम्भीर महानिकुञ्ज और गुहाके बिलसे युक्त तथा वीणाके शब्द सुननेकी इच्छासे संगत देवसमूहसे व्याप्त महाता-पिच्छ की छायावाले सुवेल पर्वत पर रामचन्द्रजीकी सेना चढ़ गई ॥ ३२ ॥

सरसबहुपल्लवाविलकेसरहिन्तालबद्धबहलच्छायम् ।
ऐरावणमदपरिमलगन्धवहाबद्धदन्तिसंरम्भरसम् ॥ ३३ ॥

अन्वयः—सरसबहुपल्लवाऽऽविलकेसरहिन्तालबद्धबहलच्छायम् ऐरावणमद-परिमलगन्धवहाबद्धदन्तिसंरम्भरसम् (सुवेलं रामबलम् आरूढम्) ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—सरसबहुपल्लवाऽऽविलकेसरहिन्तालबद्धबहलच्छायं = आर्द्राऽधिककिसलयाऽन्धकारितपुन्नागस्थूलतालजनितनिबिडच्छायम् , ऐरावणमदपरिमलगन्धवहाऽऽबद्धदन्तिसंरम्भरसम् = ऐरावतदानसुरभिवायुजनितहस्तिकोपरसम्, एतादृशं सुवेलं रामबलम् आरूढमिति पूर्वपदानामध्याहारः ॥

व्युत्पत्तिः—सरसबहुपल्लवाऽऽविलकेसरहिन्तालबद्धबहलच्छायं = सरसा ये बहवः पल्लवास्तैः आविलाः ये केसरहिन्तालास्तैः बद्धा बहला छाया यस्मिंस्तं, 'पल्लवोऽस्त्री किसलयम्' इत्यमरः । 'हिन्तालः स्थूलतालश्चे'ति राजनिघण्टुः । ऐरावणमदपरिमलगन्धवहाऽऽबद्धदन्तिसंरम्भरसम् = ऐरावणमदस्य परिमलो यस्मिन् एतादृशो यो गन्धवहस्तेन आबद्धो दन्तिनां संरम्भरसो यस्मिंस्तम् ॥

भाषाऽर्थः—स्निग्ध अधिक पल्लवोंसे अन्धकारित केसर और हिन्ताल वृक्षोंके गाढ छायासे युक्त और जहां पर ऐरावत हाथीके मद-जलसे सुरभि वायुसे अन्य हाथियोंका कोपरस उत्पन्न हो गया है ऐसे सुवेल पर्वतपर रामचन्द्रकी सेना चढ़ गई ॥ ३३ ॥

तुङ्गतरुच्छायारुहकोमलहरिहारिलोलपल्लवजालम् ।
हरिणभयङ्करसकुसुमदावसमच्छविविलोलदाडिमकुञ्जम् ॥ ३४ ॥

अन्वयः—तुंगतरुच्छायारुहकोमलहरिहारिलोलपल्लवजालं हरिणभयङ्करसकुसुमदावसमच्छविविलोलदाडिमकुञ्जम् (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—तुंगतरुच्छायारुहकोमलहरिहारिलोलपल्लवजालं = प्रांशुवृक्षच्छायोत्पन्नमृदुहरितसुन्दरचञ्चलकिसलयसमूहं, हरिणभयङ्करसकुसुमदावसमच्छविविलोलदाडिमकुञ्जं = मृगभीतिकरसपुष्पदावाऽनलतुल्यकान्तिचञ्चलकरकनिकुञ्जं, सुवेलं रामबलम् आरूढम् इति पूर्वपदानामध्याहारः ॥

व्युत्पत्तिः—तुंगतरुच्छायारुहकोमलहरिहारिलोलपल्लवजालं = तुंगतरूणां या छाया तस्यां रोहतीति तुङ्गतरुच्छायारुहम् , 'इगुपधज्ञाप्रीकिरः कः' इति क प्रत्ययः । एतादृशं कोमलं हरि (हरितवर्णम्) हारि लोलं पल्लवजालं यस्मिंस्तम् । हरिणभयङ्करसकुसुमदावसमच्छविविलोलदाडिमकुञ्जं = हरिणभयंकराः सकुसुमाः, (अतएव) दावसमच्छवयः (दवाऽनलतुल्यकान्तयः) विलोला दाडिमकुञ्जा यस्मिंस्तम् । उपमाऽलंकारः ॥

भाषाऽर्थः—उन्नत वृक्षोंकी छायामें उत्पन्न, कोमल हरितवर्ण, सुन्दर और चञ्चल पल्लवोंके समूहसे युक्त एवम् मृगोंको भय उत्पन्न करनेवाले, फूलोंसे युक्त (अतएव) दवाग्निकी सदृश कान्तिवाले चञ्चल दाडिम—कुञ्जोंसे सम्पन्न सुवेल पर्वत पर रामचन्द्रकी सेना चढ़ गई ॥ ३४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कलहरिकण्ठविरावं सलिलमहाबन्धसंकुलमहासालम् ।
चलकिसलयसंबद्धं मणिजालं सलिलकणमयं विवहन्तम् ॥ ३५ ॥

अन्वयः—कलहरिकण्ठविरावं सलिलमहाबन्धसङ्कुलमहासालं चलकिसलयसम्बद्धं सलिलकणमयं मणिजालं विवहन्तम् (सुवेलं रामबलम् आरूढम्)

व्याख्या—कलहरिकण्ठविरावं = मनोहरसिंहगलशब्दयुक्तं, सलिलमहाबन्धसङ्कुलमहासालं = जलमहाबन्धनव्याप्तबृहत्सालवृत्तं, चलकिसलयसम्बद्धं = चञ्चलपल्लवसंलग्नं, सलिलकणमयं = जलकणस्वरूपं, मणिजालं = रत्नसमूहं, विवहन्तं = धारयन्तं, सवेलं रामबलम् आरूढम् इति पूर्वपद्यानामध्याहारः ॥

व्युत्पत्तिः—कलहरिकण्ठविरावं = कलो हरीणां (सिंहानाम्) कण्ठविरावो यस्मिंस्तम् । सलिलमहाबन्धसङ्कुलमहासालं = सलिलस्य यो महाबन्धस्तेन सङ्कुला महान्तः सालाः (सालवृक्षाः) यस्मिंस्तम् । चलकिसलयसम्बद्धं = चलन्तीति चलानि, पचाद्यच । चलानि यानि किसलयानि, तेषु सम्बद्धस्तम् । सलिलकणमयं = स्वरूपाऽर्थे मयट ॥

भावाऽर्थः—सिंहोंके सुन्दर कण्ठ-ध्वनिवाले, सेतुबन्धसे जलव्याप्त बड़े साल वृक्षोंसे युक्त चञ्चलपल्लवोंमें संलग्न जलकणरूप मणिसमूहको धारण करते हुए सुवेलपर्वतपर रामचन्द्रजीकी सेना चढ़ गई ॥ ३० ॥

तुङ्गमणिकिरणजालं गिरिजलसंघट्टबद्धगम्भीररवम् ।
चारुगुहाविवरसभं सुरपुरसममरचारणसुसंरावम् ॥ ३६ ॥

अन्वयः—तुङ्गमणिकिरणजालं गिरिजलसंघट्टबद्धगम्भीररवं चारुगुहाविवरसभं अमरचारणसुसंरावं सुरपुरसमम् (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—तुङ्गमणिकिरणजालं = प्रांशुप्रतांऽशुसमूहं, गिरिजलसंघट्टबद्धगम्भीररवं = निर्झरतोयमिथःसंश्लेषजनितगम्भीरशब्दं, चारुगुहाविवरसभं = सुन्दरगह्वरच्छिद्रगोष्ठीजम् , अमरचारणसुसंरावं = गन्धर्वमनोहरगानयुक्तम् , अत एव— सुरपुरसमं = स्वर्गसदृशम् , सुवेलं रामबलम् आरूढमिति पूर्वपद्यानामध्याहारः ॥

व्युत्पत्तिः—तुङ्गं मणिकिरणानां जालं यस्मिंस्तम् । गिरिजलसंघट्टबद्धगम्भीररवं = गिरिजलानां संघट्टेन बद्धो गभीरो रवो यस्मिंस्तम् । चारुगुहाविवरसभं = चारुगुहाविवरमेव सभा यस्मिंस्तम् । अमरचारणसुसंरावम् = अमरचारणानां शोभनः संरावो यस्मिंस्तम् । 'आरवारावसंरावविरावाः' इत्यमरः ॥

भावाऽर्थः—मणिकिरणोंके उन्नत समूहसे सम्पन्न, झरनोंके जलोंके परस्पर सम्बन्धसे उत्पन्न गम्भीर शब्दसे युक्त, सभाके सदृश सुन्दर गुफाके छिद्रवाले,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गन्धर्वोंके सुन्दर गानसे युक्त, अतएव देवनगर स्वर्गके सदृश सुवेल पर्वतपर रामचन्द्रजीकी सेना चढ़ गई ॥ ३६ ॥

विमलमहामणिटङ्कं सिन्दूरकलङ्कपिञ्जरमहाभित्तिम् ।
वीरहरिदन्तिसङ्गमभयरुद्धविभावरीविहारसमीहम् ॥ ३७ ॥

अन्वयः—विमलमहामणिटङ्कं सिन्दूरकलङ्कपिञ्जरमहाभित्तिं वीरहरिदन्तिसङ्गमभयरुद्धविभावरीविहारसमीहम् । (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—विमलमहामणिटङ्कं = निर्मलमहारत्नच्छेदं, सिन्दूरकलङ्कपिञ्जरमहाभित्तिं = नागसंभवलाञ्छनपिञ्जरमहाकुड्यं, वीरहरिदन्तिसङ्गमभयरुद्धविभावरीविहारसमीहं = शूरसिंहगजसमागमभीतिनिवारितरात्रिक्रीडेच्छम् , सुवेलं रामबलम् आरूढमिति पूर्वपद्यानामध्याहारः ॥

व्युत्पत्तिः—विमलमहामणीनां (पद्मरागादीनाम्) टङ्का यस्मिंस्तम् । सिन्दूरकलङ्कपिञ्जरमहाभित्तिं=सिन्दूरकलङ्केन पिञ्जरा महाभित्तयो यस्य, तम् । 'सिन्दूरं नागसंभवम्' इत्यमरः । वीरहरिदन्तिसङ्गमभयरुद्धविभावरीविहारसमीहं = हरयश्च दन्तिनश्च हरिदन्तिनः, 'सिंहो मृगेन्द्रः पञ्चाऽऽस्यो हर्यक्षः केसरी हरिः ।' इत्यमरः । वीरा ये हरिदन्तिनः तेषां यः सङ्गमस्तस्माद्भयं, तेन रुद्धा विभावर्यां विहारसमीहा यस्मिंस्तम् ॥

भावाऽर्थः—निर्मल पद्मराग आदि महारत्नोंके छेदोंसे युक्त, सिन्दूरके चिह्नसे पिञ्जर महाभित्तियोंसे सम्पन्न, वीर सिंहों और हाथियोंके समागमके भयसे जहाँपर रातमें क्रीडाकी इच्छा निवारित हो गई है ऐसे सुवेल पर्वतपर रामजीकी सेना चढ़ गई ॥ ३७ ॥

समहाफणिभीमबिलं भूरिविहङ्गमतुमुलोरुघोरविरावम् ।
वारणवराहहरिवरगोगणसारङ्गसंकुलमहासालम् ॥ ३८ ॥

अन्वयः—समहाफणिभीमबिलं भूरिविहङ्गमतुमुलोरुघोरविरावं वारणवराहहरिवरगोगणसारङ्गसङ्कुलमहासालम् (सुवेलं रामबलम् आरूढम्)।

व्याख्या—समहाफणिभीमबिलं = सबृहत्सर्पभयङ्करविवरं, भूरिविहङ्गमतुमुलोरुघोरविरावं = प्रचुरपक्षनेकप्रकारमहारौद्रशब्दं, वारणवराहहरिवरगोगणसारङ्गसङ्कुलमहासालं=हस्तिसूकरसिंहवरधेनुसमूहमृगव्याप्तबृहत्सालवृत्तं, सुवेलं रामबलम् आरूढमिति पूर्वपदानां परामर्शः ॥

व्युत्पत्तिः—समहाफणिभीमबिलं=महाफणिभिः सहितानि समहाफणीनि अतएव भीमानि बिलानि यस्मिंस्तम् । भूरिविहङ्गमतुमुलोरुघोरविरावं–भूरयो ये विहङ्गमास्तेषां तुमुलः उरुः घोरो विरावो यस्मिंस्तम् । वारणवराहहरिवरगोगणसारङ्ग-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संकुलमहासालं=वारणाश्च वराहाश्च हरिवराश्च गोगणश्चेति सारङ्गाश्च वारणवराहहरिवरगोगणसारङ्गाः, तैः सङ्कुला महासाला यस्मिंस्तम् ॥

भाषाऽर्थः—बड़े सर्पोंसे युक्त अत एव भयङ्कर बिलों वाले, प्रचुर पक्षियोंके अनेक प्रकारके महाभयंकर शब्दोंसे युक्त, हाथी, सूअर, श्रेष्ठ सिंह, गायोंका समूह और मृगोंसे व्याप्त बड़े बड़े साल वृक्षोंसे सम्पन्न सुवेल पर्वत पर रामचन्द्रजी की सेना चढ़ गई ॥ ३८ ॥

चलकिसलयसविलासं चारुमहीकमलरेणुपिञ्जरवसुधम् ।
सकुसुमकेसरवाणं लवंगतरुतरुणवल्लरीवरहासम् ॥ ३९ ॥

अन्वयः—चलकिसलयसविलासं चारुमहीकमलरेणुपिञ्जरवसुधं सकुसुमकेसरवाणं लवङ्गतरुतरुणवल्लरीवरहासम् (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—चलकिसलयसविलासं=चञ्चलपल्लवप्रारब्धनृत्यं, चारुमहीकमलरेणुपिञ्जरवसुधं=सुन्दरस्थलकमलपरागपीतवसुन्धरं, सकुसुमकेसरवाणं=सपुष्पपुन्नागझिण्टीकं, लवङ्गतरुतरुणवल्लरीवरहासं=लवङ्गवृक्षनवमञ्जरीश्रेष्ठहास्यं, सुवेलं रामबलम् आरूढम् ॥

व्युत्पत्तिः—चलकिसलयसविलासं=चलानि यानि किसलयानि, तैः सविलासं, प्रारब्धनृत्यमिति भावः । चारुमहीकमलरेणुपिञ्जरवसुधं=चारूणि यानि महीकमलानि, तेषां रेणुभिः पिञ्जरा वसुधा यस्मिंस्तम् । सकुसुमकेसरवाणं=सकुसुमाः केसरा बाणाश्च यस्मिंस्तम् । लवङ्गतरुतरुणवल्लरीवरहासं=लवंगतरोः तरुण्यो या वल्लर्यस्ता एव वरो हासः (विकासरूपः) यस्मिंस्तम् ॥

भाषाऽर्थः—चञ्चल पल्लवोंसे विलास वाले, सुन्दर स्थलकमलोंके परागोंसे पीली पृथ्वीसे युक्त, फूलोंसे संयुक्त केसर और झिण्टी वृक्षोंसे सम्पन्न लवङ्ग वृक्षके नवीन मञ्जरीरूप उत्तम हास्यसे युक्त सुवेल पर्वत पर रामचन्द्रजीकी सेना चढ़ गई ॥ ३९ ॥

अमलमणिहेमटङ्कं तुङ्गमहाभित्तिरुद्धरुरुपङ्कगमम् ।
अमराऽऽरूढपरिसरमेरुमिवाविलसरसमन्दारतरुम् ॥ ४० ॥

अन्वयः—अमलमणिहेमटङ्कं तुङ्गमहाभित्तिरुद्धरुरुपङ्कगमम् अमराऽऽरूढपरिसरम् अविरलसरसमन्दारतरुं मेरुम् इव (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—अमलमणिहेमटङ्कं=निर्मलरत्नसुवर्णच्छेदं, तुङ्गमहाभित्तिरुद्धरुरुपङ्कगमम्=उन्नतबृहत्कुड्यनिवारितमृगविशेषकर्दमगमनम् , 'पङ्कगमम्' इत्यत्र 'वङ्कगमम्' इति पाठाऽन्तरे कुटिलगमनमित्यर्थः । अमराऽऽरूढपरिसरं=देवाऽऽरूढ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पर्यन्तभवम् , अविरलसरसमन्दारतरुं=घनस्निग्धदेववृक्षं, मेरुम् इव=हेमाऽद्रिम् इव, सुवेलं रामबलम् आरूढमिति पूर्वपद्यस्थपदानामध्याहारः ।

व्युत्पत्तिः—अमलमणिहेमटङ्कम् , मणयश्च हेमानि च मणिहेमानि, अमलानि यानि मणिहेमानि, तेषां टङ्का यस्मिंस्तम् । तुङ्गमहाभित्तिरुद्धरुरुपङ्कगमम् तुंगा महती या भित्तिस्तया रुद्धो रुरूणां (मृग…म्) पङ्कगमः (पङ्के गमः) यस्मिंस्तम् । 'गम' इत्यत्र 'ग्रहवृढनिश्चिगमश्च' इत्यप् । 'वंकगमम्' इति पाठान्तरे वंकते इति वंकः, 'वकि कौटिल्ये' इति धातोः पचाद्यच् । वंको गमो यस्मिंस्तम् । अमराऽऽरूढपरिसरम्=अमरैरारूढा परिसरा यस्मिंस्तम् । अविरलसरसमन्दारतरुम्= अविरलाः सरसा मन्दारतरवो यस्मिंस्तम् । उपमाऽलङ्कारः ॥

भाषाऽर्थः—निर्मल मणि और सुवर्णों के टुकड़ोंसे युक्त, जहाँ पर ऊँची महाभित्तिसे रुरुमृगोंका पङ्कमें गमन रुद्ध हो गया है, देवताओंसे आरूढ पर्यन्त भूमिसे युक्त, घने और स्निग्ध मन्दार वृक्षोंसे सम्पन्न सुमेरु पर्वतके तुल्य सुवेल पर्वतपर रामचन्द्रजीकी सेना चढ़ गई ॥ ४० ॥

फलभरमन्थरतरुवरमविदूरविरूढहारिकुसुमापीडम् ।
हरिणकलङ्कमणिसंभवबहुवारिसुभरगम्भीरगुहम् ॥ ४१ ॥

अन्वयः—फलभरमन्थरतरुवरम् अविदूरविरूढहारिकुसुमाऽऽपीडं हरिणकलङ्कमणिसंभवबहुवारिसुभरगम्भीरगुहम्, (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—फलभरमन्थरतरुवरं=फलभारेणनतवृक्षश्रेष्ठम्, अविदूरविरूढहारिकुसुमाऽऽपीडं=समीपोत्पन्नसुन्दरपुष्पशेखरं, हरिणकलङ्कमणिसंभवबहुवारिसुभरगम्भीरगुहं=चन्द्रकान्तोत्पन्नाऽधिकजलपरिपूर्णगम्भीरगह्वरं, सवेलं रामबलमारूढमिति पूर्वपदानां परामर्शः ॥

व्युत्पत्तिः—फलभरमन्थरतरुवरं=फलानां भरेण मन्थरास्तरुवरा यस्मिंस्तम् । अविदूरविरूढहारिकुसुमाऽऽपीडम्=अविदूरे विरूढा हारिणः कुसुमाऽऽपीडाः (कुसुमान्येव आपीडाः) यस्मिंस्तम् । हरिणकलङ्कमणिसम्भवबहुवारिसुभरगम्भीरगुहं= हरिणः कलंको यस्य स हरिणकलंकः (चन्द्रः) स चाऽसौ मणिः (चन्द्रकान्तमणिः) तस्मात् संभवः (उत्पत्तिः) येषां तानि हरिणकलंकमणिसंभवानि, तादृशानि यानि बहुवारीणि, तैः सुभराः परिपूर्णाः गम्भीरा गुहा यस्मिंस्तम् ॥

भाषाऽर्थः—फलोंके भारस कुछ झुके हुए श्रेष्ठवृक्षोंसे युक्त, समीपमें उत्पन्न सुन्दर पुष्परूप शिरोभूषणोंसे सम्पन्न, चन्द्रकान्तमणिसे उत्पन्न बहुत जलोंसे परिपूर्ण गम्भीर गुहाओंसे युक्त सुवेल पर्वतपर रामचन्द्रजीकी सेना चढ़ गई ॥४१॥

जलकामदन्तिसंकुलसहेमरसचारुधवलकन्दरदेहम् ।
अङ्कुररोहसमच्छत्रिरुरुगणसंतीढतरलहरिमणिकिरणम् ॥ ४२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—जलकामदन्तिसङ्कुलसहेमरसचारुधवलकन्दरदेहम् अङ्कुररोहसमच्छविरुरुगणसंलीढतरलहरिमणिकिरणम् (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—जलकामदन्तिसङ्कुलसहेमरसचारुधवलकन्दरदेहं = तोयार्थिहस्तिव्याप्तससुवर्णरससुन्दरशुक्लगुहासन्निवेशम् , अङ्कुररोहसमच्छविरुरुगणसंलीढतरलहरिमणिकिरणम् = अङ्कुरोत्पन्नसस्यतुल्यकान्तिरुरुसमूहसमास्वादितचञ्चलेन्द्रनीलरश्मि, सुवेलं रामबलमारूढमिति पूर्वपदानां परामर्शः ॥

व्युत्पत्तिः—जलकामदन्तिसङ्कुलसहेमरसचारुधवलकन्दरदेहं = जलं कामयन्त इति जलकामाः, 'शीलिकामिभक्ष्याचरिभ्यो णः' इत्यणोपवादो णः । जलकामाश्च ते दन्तिनः, तैः सङ्कुलाः सहेमरसाः चारवो धवलाः कन्दरदेहा यस्मिंस्तम् । अङ्कुररोहसमच्छविरुरुगणसंलीढतरलहरिमणिकिरणम् = अङ्कुरात् रोहः (उत्पत्तिः) यस्य (सस्यस्य), तेन समा छविर्येषां ते अत एव रुरुगणैः संलीढाः तरला हरिमणिकिरणाः यस्मिंस्तम् ।

भावार्थः—जलकी इच्छा करनेवाले हाथियोंसे व्याप्त सुवर्णरस-युक्त सुन्दर और सफेद गुहारूप शरीरवाले एवम् रुरुमृगोंसे आस्वादित अङ्कुरसे उत्पन्न होने वाले सस्यके सदृश कान्तियुक्त मरकतमणियोंके किरणोंसे सम्पन्न सुवेल पर्वत पर रामचन्द्रजीकी सेना चढ़ गई ॥ ४२ ॥

गाढसमीरणसुसहं भीमरवोत्तुङ्गवारिधरसंघट्टम् ।
धवलजलवाहमालासंबन्धाबद्धहिमधराधरलीलम् ॥ ४३ ॥

अन्वयः—गाढसमीरणसुसहं भीमरवोत्तुङ्गवारिधरसङ्घट्टं धवलजलवाहमालासम्बन्धाऽऽबद्धहिमधराधरलीलम् (सुवेलं रामबलम् आरूढम्) ॥

व्याख्या—गाढसमीरणसुसहं = महावातमर्षकं, भीमरवोत्तुङ्गवारिधरसङ्घट्टं = भयङ्करशब्दोन्नतमेघाऽन्योन्यविमर्दयुक्तं, धवलजलवाहमालासम्बन्धाऽऽबद्धहिमधराधरलीलं शुक्लमेघपंक्तिसम्बन्धकृतहिमालयविभ्रमं, सुवेलं रामबलमारूढमिति पूर्वपदानां परामर्शः ।

व्युत्पत्तिः—गाढसमीरणसुसहं=गाढो यः समीरणस्तं सुसहत इति 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' इति कप्रत्ययः । भीमरवोत्तुङ्गवारिधरसंघट्टं = भीमरवा उत्तुङ्गा ये वारिधराः, तेषां सङ्घट्टो यस्मिंस्तम् । धवलजलवाहमालासम्बन्धाऽऽबद्धहिमधराधरलीलं=जलं वहन्तीति जलवाहाः, 'कर्मण्यण्' इत्यण् । धरतीति धरः, पचाद्यच् । धराया धरो धराधरः, हिमानां धराधरो हिमधराधरः । धवला ये जलवाहास्तेषां मालाया यः सम्बन्धस्तेन आबद्धा हिमधराधरस्य लीला येन, तम् । उपमाऽलंकारः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—महान् वायुको सहनेवाले, भयंकर शब्दवाले उन्नत मेघोंके परस्पर विमर्दसे युक्त सफेद मेघोंकी पंक्तिके सम्बन्धसे हिमालय पर्वतकी लीलाको प्रकट करने वाले सुवेल पर्वतपर रामचन्द्रजी की सेना चढ़ गई ॥ ४३ ॥

लवणजलबन्धसरसं तरुफलसंपत्तिरुद्धदेहायासम् ।
लङ्कातोरणवारणमारूढं समरलालसं रामबलम् ॥ ४४ ॥

अन्वयः—लवणजलबन्धसरसं तरुफलसम्पत्तिरुद्धदेहाऽऽयासं लङ्कातोरणवारणं समरलालसं रामबलं (सुवेलम्) आरूढम् ॥

व्याख्या—लवणजलबन्धसरसं = सेतुबन्धसहर्षं, तरुफलसम्पत्तिरुद्धदेहाऽऽयासं = वृक्षफलसम्पदपनीतबुभुक्षापीडं, लंकातोरणवारणं = लंकाबहिर्द्वारनिषेधकं, समरलालसं=रणतृष्णासहितं, रामबलं = रामसैन्यम् , आरूढम्=आरुरोह, सुवेलमिति शेषः । क्वचित् 'आरूढम्' इत्यत्र 'आलोलम्' इति पाठस्तस्य चञ्चलमित्यर्थः तत्र पूर्ववत् 'आरूढम्' इति पदमध्याहर्तव्यम् ॥

व्युत्पत्तिः—लवणजलबन्धसरसं = लवणं जलं यस्य स लवणजलः समुद्र इत्यर्थः । तस्य बन्धाद्धेतोः सरसम् । तरुफलसम्पत्तिरुद्धदेहाऽऽयासः=तरुफलसम्पत्त्या रुद्धा देहायासो यस्य तत् । लंकातोरणवारणं=लंकातोरणस्य वारणं, 'तोरणोऽस्त्री बहिर्द्वारम्' इत्यमरः ॥

भाषाऽर्थः—समुद्रके बन्धनसे सहर्ष, वृक्षोंकी फलसंपत्तिसे भूखकी पीडाको हटानेवाली, लंकाके बहिर्द्वारको रोकनेवाली एवम् युद्धकी तृष्णासे युक्त रामचन्द्रजी की सेना सुवेल पर्वत पर चढ़ गई ॥ ४४ ॥

विशेषकं त्रिभिः-४५-४७

गुरुपणववेणुगुञ्जाभेरीपेलोरुझल्लरीभीमरवम् ।
ढक्काघण्टातुमुलं सन्नद्धं परबलं रणायाससहम् ॥ ४५ ॥

अन्वयः—गुरुपणववेणुगुञ्जाभेरीपेलोरुझल्लरीभीमरवं ढक्काघण्टातुमुलं रणाऽऽयाससहं परबलं सन्नद्धम् ॥

व्याख्या—गुरुपणववेणुगुञ्जाभेरीपेलोरुझल्लरीभीमरवं = महागायनपटवंशीपटहदुन्दुभिवाद्यविशेषमहाझर्झरभयंकरशब्दं, ढक्काघण्टातुमुलं = यशःपटहघण्टासम्मूर्च्छितशब्दं, रणाऽऽयाससहं = संग्रामक्लेशसमर्थं, परबलं = शत्रुसैन्यं, रावणसैन्यमित्यर्थः । सन्नद्धं = युद्धायोद्यतमिति भावः ॥

व्युत्पत्तिः—गुरुपणवाश्च वेणवश्च गुञ्जाश्च भेर्यश्च पेलाश्च उरुझर्झर्यश्च, तासां भीमो रवो यस्मिंस्तत् । ढक्काघण्टातुमुलं = ढक्काघण्टयोः तुमुलः (शब्दः) यस्मिंस्तत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषार्थः—महापणव, वंशी, पटह, दुन्दुभि, पेला, महाझल्लरी इन वाद्योंके भयङ्कर शब्दसे युक्त, ढक्का और घण्टाके विस्तृत शब्दसे सम्पन्न और युद्धके क्लेशको सहनेवाली शत्रु (रावण) की सेना युद्धके लिए तत्पर हो गई ॥ ४५ ॥

आरूढबाणघोरं विमलायसजालगूढपीवरदेहम् ।
चञ्चलतुरङ्गवारणसंघट्टाबद्धचारुपरिणाहगुणम् ॥ ४६ ॥

अन्वयः—आरूढबाणघोरं विमलाऽऽयसजालगूढपीवरदेहं चञ्चलतुरङ्गवारण-सङ्घट्टाऽऽबद्धचारुपरिणाहगुणम् (परबलं) सन्नद्धम् ॥

व्याख्या—आरूढबाणघोरं=निक्षिप्तबाणधनुर्भयङ्करं, विमलाऽऽयसजालगूढ-पीवरदेहं = निर्मलवर्मच्छन्नस्थूलशरीरं, चञ्चलतुरङ्गवारणसङ्घट्टाऽऽबद्धचारुपरिणाह-गुणं=चपलहयहस्तिसंश्लेषजनितसुन्दरविस्तारगुणं, परबलं सन्नद्धमिति पूर्वपदाभ्यां सम्बन्धः ॥

व्युत्पत्तिः—आरूढबाणघोरम् = आरूढो बाणो यस्मिंस्तत् आरूढबाणं, धनु-रिति भावस्तेन घोरम् । विमलाऽऽयसजालगूढपीवरदेहं = विमलं यत् आयसजालं (वर्म), तेन गूढः पीवरो देहो यस्य तत् । चञ्चलतुरङ्गवारणसंघट्टाबद्धचारुपरिणाह-गुणं = चञ्चला ये तुरङ्गा वारणाश्च, तेषां सङ्घट्टेन आबद्धः चारुः परिणाह एव गुणो यस्य तत् ॥

भाषार्थः—बाण रक्खे गये धनुषसे भयङ्कर निर्मल कवचसे रक्षित स्थूल शरीरवाली, चञ्चल घोड़े और हाथियोंके परस्पर संघट्टसे जहां पर सुन्दर विशालता-रूप गुण उत्पन्न हुआ है ऐसी शत्रुसेना युद्धके लिए तत्पर हो गई ॥ ४६ ॥

असितोमरकुन्तमहापट्टिशभल्लवरबाणगुरुपुरुमुसलम् ।
वीररसाऽलङ्कारं गुरुसंचारहयदन्तिसमहीकम्पम् ॥ ४७ ॥

अन्वयः—असितोमरकुन्तमहापट्टिशभल्लवरबाणगुरुपुरुमुसलं वीररसाऽलङ्कारं गुरुसञ्चारहयदन्तिसमहीकम्पम् (परबलं सन्नद्धम्) ॥

व्याख्या—असितोमरकुन्तमहापट्टिशभल्लवरबाणगुरुपुरुमुसलम् = खड्गशर्वला-प्रासमहापरशुभल्लश्रेष्ठशराऽनभिभवनीयमहामुसलं, वीररसाऽलङ्कारं=वीररसभूषणं, गुरुसञ्चारहयदन्तिसमहीकम्पं = महासञ्चरणतुरङ्गमातङ्गैः भूमिकम्पसहितं, परबलं सन्नद्धमितिपूर्वपदयोरध्याहारः ॥

व्युत्पत्तिः—असयश्च तोमराश्च कुन्ताश्च महापट्टिशाश्च भल्लाश्च वरबाणाश्च, तैः गुरु पुरु मुसलं यस्मिंस्तत् । मुसलशब्दो मूर्धन्यमध्योऽपि । वीररसाऽलङ्कारं = वीररस एवाऽलङ्कारो यस्य तत् । गुरुसञ्चारहयदन्तिसमहीकम्पं = गुरुः सञ्चारो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येषां ते गुरुस्वराः एतादृशा ये हयदन्तिनः, तैः समहीकम्पम् (महीकम्पेन सह वर्तमानम्) ॥

भाषाऽर्थः—तलवार, तोमर, प्रास, महापरशु, भाला और श्रेष्ठ बाण इनसे अभिभवके अविषय महासुसलसे युक्त, वीररसरूप अलङ्कारसे सम्पन्न, पर्याप्त चलनेवाले घोड़े और हाथियोंसे भूमिको कम्पित करनेवाली शत्रुसेना युद्धके लिए तत्पर हो गई ॥ ४७ ॥

ते रामेण सरभसं परितरला हरिगणा रणसमारम्भे ।
रुद्धा लङ्कापरिसरभूधरपरिभङ्गलालसा धीररवम् ॥ ४८ ॥

अन्वयः—रणसमारम्भे सरभसं परितरलाः ते हरिगणाः लङ्कापरिसरभूधरपरिभङ्गलालसाः (सन्तः) रामेण धीररवं रुद्धाः ॥

व्याख्या—रणसमारम्भे = युद्धप्रवर्तननिमित्तं, सरभसं=त्वरापूर्वकं, परितरलाः = अतिचञ्चलाः, स्थातुमशक्नुवन्तः, ते=पूर्वोक्ताः, हरिगणाः=वानरसमूहाः, लङ्कापरिसरभूधरपरिभङ्गलालसाः=लङ्कासमीपस्थवृक्षचूर्णने सतृष्णाः सन्तः, रामेण= रामचन्द्रेण, धीररवं=गम्भीरशब्दं यथा तथा, रुद्धाः=निवारिताः मा आङ्क्षुरिति वाक्येनेति शेषः ॥

व्युत्पत्तिः—लङ्कापरिसरभूधरपरिभङ्गलालसाः=धरन्ति ते धराः, भुवो धरा भूधराः, वृक्षा इत्यर्थः। लङ्कायाः परिसरे ये भूधरास्तेषां परिभङ्गे लालसाः। धीररवं= धीरो रवो यस्मिन् रोधकर्मणि तद्यथा तथेति क्रियाविशेषणम् ॥

भाषाऽर्थः—युद्ध प्रवर्तनके लिए जल्दबाजीके कारण प्रतीक्षा करनेको असमर्थ वे वानरसमूह लङ्काके समीपस्थित वृक्षोंको चूर्ण करनेको चाहते हुए रामचन्द्रजीसे गम्भीरशब्दके उच्चारणके साथ रोके गये ॥ ४८ ॥

जलतीरतुङ्गतरुवरकन्दरगिरिभित्तिकुञ्जविवरावासम् ।
भीमं तरुहरिणबलं सुसमिद्धहिमारिकिरणमालालोलम् ॥ ४९ ॥

अन्वयः—जलतीरतुरङ्गतरुवरकन्दरगिरिभित्तिकुञ्जविवराऽऽवासं सुसमिद्धहिमारिकिरणमालालोलं भीमं तरुहरिणबलम् "अट्टतरुमञ्चमन्दिरतोरणमालासभासु समारूढम्" ॥

व्याख्या—जलतीरतुङ्गतरुवरकन्दरगिरिभित्तिकुञ्जविवराऽऽवासं = तोयतटोन्नतवृक्षश्रेष्ठदरीपर्वतकुडयनिकुञ्जबिलवासि, सुसमिद्धहिमाऽरिकिरणमालालोलं= सुप्रदीप्तसूर्यरश्मिपङ्क्तिचञ्चलं, भीमं = भयङ्करं, तरुहरिणबलं = शाखामृगसैन्यम् , अट्टतरुमञ्चमन्दिरतोरणमालासभासु समारूढमिति वक्ष्यमाणपद्यपदाभ्यां सम्बन्धः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—जलतीरतुङ्गतरुवरकन्दरगिरिभित्तिकुञ्जविवराऽऽवासं = जलतीराणि च तुङ्गतरुवराश्च कुन्दराश्च गिरिभित्तयश्च कुञ्जविवराणि च, तेषु आवासो यस्य तत् । सुसमिद्धहिमारिकिरणमालालोलं = हिमस्याऽरिर्हिमारिः, सूर्योऽग्निर्वा । सुसमिद्धो यो हिमाऽरिः, तस्य किरणमाला इव लोलम् ॥

भाषाऽर्थः—जलतट, ऊंचे श्रेष्ठ वृक्ष, कन्दराएँ, पर्वतोंकी भित्तियां और निकुञ्ज बिल इनमें निवास करनेवाली, प्रदीप्त सूर्यकी किरणमालाके सदृश चञ्चल और भयङ्कर वानरसेना अट्ट आदि स्थानोंपर चढ़ गई ॥ ४९ ॥

रावणबलमवगन्तुं जलभरगुरुसलिलवाहगणसमच्छायम् ।
अट्टतरुमञ्चमन्दिरतोरणमालासभासु समारूढम् ॥ ५० ॥

अन्वयः—जलभरगुरुसलिलवाहगणसमच्छायम् रावणबलम् अवगन्तुम् (तरुहरिणबलम्) अट्टतरुमञ्चमन्दिरतोरणमालासभासु समारूढम् ॥

व्याख्या—जलभरगुरुसलिलवाहगणसमच्छायम् = तोयभारमहामेघसमूहतुल्यकान्ति, रावणबलं = रावणसैन्यम् , अवगन्तुं = ज्ञातुम् , अट्टतरुमञ्चमन्दिरतोरणमालासभासु = क्षौमवृक्षोच्चमण्डपभवनबहिर्द्वारपङ्क्तिगोष्ठीषु, समारूढं = समारुरोह, तरुहरिणबलमिति अध्याहार्यम् ॥

व्युत्पत्तिः—जलभरगुरुसलिलवाहगणसमच्छायं = जलभरेण गुरुर्यः सलिलवाहगणः, तेन समा छाया यस्य तत् । अट्टतरुमञ्चमन्दिरतोरणमालासभासु = अट्टाश्च तरवश्च मञ्चाश्च मन्दिराणि च तोरणमाला च सभाश्च, तासु । "स्यादट्टः क्षौममस्त्रियाम्" इत्यमरः । एतानि द्वाविंशतिः सङ्कीर्णानि ॥

भाषाऽर्थः—जलके भारसे महान् मेघगणकी तुल्य कान्तिसे युक्त रावणकी सेनाको जाननेके लिए वानरोंकी सेना अट्टालिका, वृक्ष, उच्चमण्डप, भवन, बहिर्द्वारपङ्क्ति और सभामें चढ़ गई ॥ ५० ॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये प्रसन्नकाण्डे भाषासमावेशो नाम चतुर्थः परिच्छेदः, काव्यस्य सेतुबन्धनं नाम त्रयोदशः सर्गश्च समाप्तः ॥

अथ चतुर्दशः सर्गः

सुप्तिङ्व्युत्पत्तौ सौष्ठवं काव्यस्याऽङ्गत्वेनाऽभिमतम् । अतः प्रसन्नकाण्डाऽनन्तरं तिङन्तकाण्डमुच्यते । तत्र लस्य स्थाने तिबादयः । लकाराश्च दश, परं लेटश्छन्दोमात्रविषयत्वादत्र नवानां लकाराणां विलसितानि प्रदर्श्यन्ते । विलसितं च नानारूपता । तत्र च भूताऽनद्यतनपरोक्षाऽर्थवन्तं लिटमधिकृत्य तद्विलसितमाह—

ततो दशास्यः स्मरविह्वलात्मा चारप्रकाशीकृतशत्रुशक्तिः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विमोह्य मायामयराममूर्ध्ना सीतामनीकं प्रजिघाय योद्धुम् ॥ १ ॥

अन्वयः—ततो दशाऽऽस्यः स्मरविह्वलाऽऽत्मा (सन्) मायामयराममूर्ध्ना सीतां विमोह्य चारप्रकाशीकृतशत्रुशक्तिः (सन्) योद्धुम् अनीकं प्रजिघाय ॥

व्याख्या—ततः = सेतुबन्धनाऽनन्तरं, दशाऽऽस्यः रावणः, स्मरविह्वलात्मा = कामविक्लवबुद्धिः सन् , मायामयराममूर्ध्ना = मायास्वरूपराममस्तकेन, सीतां = जानकीं, विमोह्य = मोहयित्वा, चारप्रकाशीकृतशत्रुशक्तिः = प्रणिधिज्ञापितरिपुसामर्थ्यः, सन्, योद्धुं = युद्धं कर्तुम् , अनीकं = सैन्यं, प्रजिघाय = प्रहितवान् ॥

व्युत्पत्तिः—स्मरविह्वलाऽऽत्मा = स्मरेण विह्वल आत्मा यस्य सः। "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च।' इत्यमरः। मायामयराममूर्ध्ना=मायामयेन राममूर्ध्ना, स्वरूपाऽर्थे मयट्। चारप्रकाशीकृतशत्रुशक्तिः=चारैः प्रकाशीकृता शत्रुशक्तिर्यस्मै सः। प्रजिघाय=प्रपूर्वकात् "हि गतौ वृद्धौ चे"ति धातोः "परोक्षे लिट्" इति लिट्। एवं परत्राऽपि। "हेरचङि" इति कुत्वम् ॥

भाषाऽर्थः—सेतुबन्धनके अनन्तर रावणने कामदेवसे विह्वल बुद्धि वाला हो कर मायारूप रामचन्द्रजीके मस्तकसे सीताजीको मोहितकर गुप्तचरोंसे शत्रुशक्ति को जानकर लड़नेके लिए सेना भेजी ॥ १ ॥

कम्बूनथ समादध्मुः, कोणैर्भेर्यो निजघ्निरे।
वेणून् पुपूरिरे गुञ्जा जुगुञ्जुः करघट्टिताः ॥ २ ॥

अन्वयः—अथ कम्बून् समादध्मुः। कोणैः भेर्यो निजघ्निरे। वेणून् पुपूरिरे। करघट्टिता गुञ्जा जुगुञ्जुः ॥

व्याख्या—अथ = अनीकप्रेषणाऽनन्तरं, कम्बून्=शङ्खान् , समादध्मुः = शब्दितवन्तः, शाङ्खिका इति शेषः। कोणैः = काष्ठमयैर्वाद्यवादनैः, भेर्यः=आनकाः, निजघ्निरे = ताडिताः भेरीवादकैरिति शेषः। वेणून्=वंशान् , पुपूरिरे=पूरितवन्तः, मुखमरुता, वेणुवादका इति शेषः। करघट्टिताः = हस्ताऽभिहताः, गुञ्जाः = पटहाः, जुगुञ्जुः = अव्यक्तशब्दं चक्रुः ॥

व्युत्पत्तिः—समादध्मुः=समाङ्पूर्वकात् 'ध्मा शब्दाऽग्निसंयोगयोः" इति धातोः कर्तरि लिट्। कोणैः = "कोणो वीणादिवादनम्" इति। भेर्यः="भेर्यामानकदुन्दुभी" इत्यमरः। निजघ्निरे=निपूर्वात् "हन हिंसागत्योः" इति धातोः कर्मणि लिट्। पुपूरिरे = "पूरी आप्यायने" इति दैवादिकधातोर्लिट्। गुञ्जाः= 'गुञ्जा तु काकचिञ्चायां पटहे च कलध्वनौ।" इति मेदिनी। जुगुञ्जुः="गुजि अव्यक्ते शब्दे" इति धातोर्लिट् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—रावणके सेनाओंको लड़नेके लिए भेजनेके अनन्तर शाङ्खिकों ने शङ्खोंको फूँका । भेरीवादकोंने कोणनामक वादन-काष्ठोंसे भेरियां बजाईं । वांशिकोंने वंशियां बजाईं । वादकोंके हाथ से ताडित पटह शब्द करने लगे ॥ २ ॥

वादयाञ्चक्रिरे ढक्काः पणवा दध्वनुर्हताः ।
काहलाः पूरयाञ्चक्रुः पूर्णाः पेराश्च सस्वनुः ॥ ३ ॥

अन्वयः—ढक्काः वादयाञ्चक्रिरे । हताः, पणवा दध्वनुः । काहलाः पूरयाञ्चक्रुः । पूर्णाः पेराश्च सस्वनुः ॥

व्याख्या—ढक्काः—यशःपटहान् , वादयाञ्चक्रिरे = वादितवन्तः, ढक्कावादका इति शेषः । हताः = ताडिताः, पाणविकैरिति शेषः । पणवाः = गायनपटहाः, दध्वनुः = ध्वनिताः । काहलाः=वाद्यभेदान् , पूरयाञ्चक्रुः = पूरितवन्तः, मुखमारुतैरिति शेषः । पूर्णाः = पूरिताः, मुखमरुतेति शेषः । पेराः = खरमुखाऽऽकारा वाद्यविशेषाः, सस्वनुः = शब्दं चक्रुः ॥

व्युत्पत्तिः—ढक्काः = "स्याद्यशःपटहो ढक्का" इत्यमरः । वादयाञ्चक्रिरे = हेतुमण्ण्यन्ताद्वदेरामि "अयामन्ताल्वाय्येत्न्विष्णुषु" इत्ययादेशः । काहलाः="हस्तत्रिनयदीर्घा स्याद्धुस्तूरकुसुमोपमा । शुद्धताम्रमयी मध्यशुषिरा काहला मता ॥" इति नाट्यदर्पण इति भरतः । पूरयाञ्चक्रुः="पूरी आप्यायने" इति चौरादिकाद्धातोर्लिट् । सस्वनुः = "स्वन शब्दे" इति धातोर्लिट् । "फणां च सप्तानाम्" इति लिटि एत्वविधानस्य विकल्पितत्वात् नैत्वम् ॥

भाषाऽर्थः—ढक्का-वादक ढक्काओंको वजाने लगे । पाणविकोंसे ताडित पणव-शब्द करने लगे । कुछ लोगोंने काहला नामक वाद्योंको मुखवायुसे पूर्ण किया । मुखवायुसे पूर्ण पेरा नामक वाद्य शब्द करने लगे ॥ ३ ॥

मृदङ्गा धीरमास्वेनुर्हतैः स्वेने च गोमुखैः ।
घण्टाः शिशिञ्जिरे दीर्घं जह्लादे पटहैर्भृशम् ॥ ४ ॥

अन्वयः—मृदङ्गा धीरम् आस्वेनुः । हतैः गोमुखैः स्वेने । घण्टाः दीर्घं शिशिञ्जिरे । पटहैः भृशं जह्लादे च ।

व्याख्या—मृदङ्गाः = मुरजाः धीरं = गम्भीरं यथा तथा, आस्वेनुः = शब्दं चक्रुः, हतैः = ताडितैः, गोमुखैः = वाद्यविशेषैः, स्वेने = शब्दितं, घण्टाः = कांस्यनिर्मिता वाद्यविशेषाः, दीर्घम्=उच्चैः, शिशिञ्जिरे=शब्दितवत्यः, पटहैश्च=आनकैश्च, भृशम् = अत्यर्थं, जह्लादे = शब्दितम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—मृदङ्गाः=मृदङ्गलक्षणं यथाऽऽह भरतमुनिः—
"चर्मणा नद्धवदनो मध्ये चैव पृथुर्भवेत्।
मृत्तिकानिर्मितश्चैव मृदङ्ग इति कीर्तितः॥" इति।
आस्वेनुः = "फणां च सप्तानाम्" इति एत्वपक्षे रूपम्। स्वेने = भावे लिट्। शिशिञ्जिरे = "शिजि अव्यक्ते शब्दे" इति धातोर्लिट्। पटहैः = "आनकः पटहोऽस्त्री स्यात्" इत्यमरः। जह्रादे = "ह्राद अव्यक्ते शब्दे" इति धातोर्भावे लिट्॥

भाषाऽर्थः—पखावजोंने गम्भीरतापूर्वक शब्द किया। ताडित गोमुखनामक बाद्योंने शब्द किया। घंटाओंने दीर्घतापूर्वक शब्द किया पटहोंने अतिशय शब्द उत्पन्न किया॥ ४॥

हया जिहेषिरे हर्षाद्गम्भीरं जगजुर्गजाः।
संत्रस्ताः करभा रेटुश्चुकुवुः पत्तिपङ्क्तयः॥ ५॥

अन्वयः—हया हर्षात् जिहेषिरे। गजा गम्भीरं जगजुः। करभाः सन्त्रस्ताः (सन्तः) रेटुः। पत्तिपङ्क्तयः चुकुवुः॥

व्याख्या—हयाः = अश्वाः, हर्षात् = प्रमोदात्, जिहेषिरे = हेषितवन्तः। गजाः = करिणः। गम्भीरं = मन्द्रं यथा तथा, जगजुः = गर्जितवन्तः। करभाः = उष्ट्राः, सन्त्रस्ताः = उद्विग्नाः, सन्तः, नानावादित्रश्रवणादिति भावः। रेटुः = शब्दं कृतवन्तः। पत्तिपङ्क्तयः = पदातिसमूहाः, चुकुवुः = शब्दितवत्यः, गच्छत, किं तिष्ठतेति शेषः॥

व्युत्पत्तिः—जिहेषिरे = "हेष अव्यक्ते शब्दे" इति भौवादिकाद्धातोर्लिट्। अभ्यासस्य "ह्रस्व" इति "एच इग्घ्रस्वादेशे" इति नियमेन ह्रस्वत्वे एत इत्वम्। जगजुः= शब्दार्थाद्गजधातोर्लिट्। रेटुः="रट परिभाषणे" इति धातोर्लिट्। चुकुवुः="कुशब्दे" इति धातोर्लिट्॥

भाषाऽर्थः—घोड़े हर्ष से हिनहिनाने लगे। हाथी गम्भीरता पूर्वक चिग्घाड़ शब्द करने लगे। ऊँट सन्त्रस्त होते हुए शब्द करने लगे। पत्तियों की पङ्क्तियां शब्द करने लगीं॥ ५॥

तुरङ्गाः पुस्फुटुर्भीताः पुस्फुरुर्वृषभाः परम्।
नार्यश्चुक्षुभिरे मम्लुर्मुमुहुः शुशुचुः पतीन्॥ ६॥

अन्वयः—तुरङ्गाः भीताः (सन्तः) पुस्फुटुः। वृषभाः परं पुस्फुरुः। नार्यः चुक्षुभिरे, मम्लुः, मुमुहुः पतीन् शुशुचुः॥

व्याख्या—तुरङ्गाः = अश्वाः, भीताः = त्रस्ताः सन्तः, वादित्रश्रवणादिति शेषः। पुस्फुटुः = स्फुटिताः, इतस्ततो गता इत्यर्थः। वृषभाः = बलीवर्दाः, परम् = अत्यर्थं,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुस्फुरुः = सञ्चलिताः । नार्यः = स्त्रियः, चक्षुभिरे काश्चित् = क्षुब्धा बभूवुः, पतिवियोगाऽऽशङ्कया इति भावः । मम्लुः = काश्चित् म्लानाः सञ्जाताः, मुमुहुः = काश्चिन्मोहमुपगताः, काश्चिच्च पतीन् = भर्तॄन्, शुशुचुः = शोचितवत्यः ॥

व्युत्पत्तिः—पुस्फुटुः = "स्फुट विशरणे" इति धातोर्लिट् । "शर्पूर्वाः खय" इति अभ्याससकारलोपः । पुस्फुरुः = "स्फुर सञ्चलने" इति धातोर्लिट् । मम्लुः = "म्लै हर्षक्षये" इति धातोर्लिट् ॥

भाषाऽर्थः—घोड़े डरते हुए इधर उधर जाने लगे। बैल बहुत ही विचलित होने लगे। कुछ स्त्रियाँ क्षुब्ध हुईं, कुछ म्लान हुईं, कुछ मोहित हुईं और कुछ पति को उद्देश्य करके शोक करने लगीं ॥ ६ ॥

जगर्जुर्जहृषुः शूरा रेजुस्तुष्टुविरे परैः ।
बबन्धुरङ्गुलित्राणि सन्नेहुः परिनिर्ययुः ॥ ७ ॥

अन्वयः—शूरा जगर्जुः जहृषुः, रेजुः परैः तुष्टुविरे (च) । (ते) अङ्गुलित्राणि बबन्धुः सन्नेहुः परिनिर्ययुश्च ॥

व्याख्या—शूराः = वीराः, जगर्जुः = गर्जितवन्तः, शत्रूञ्जेष्यामः इति धियेति शेषः । जहृषुः = हृष्टाः, चिरात्प्राप्तः संग्राम इति धियेति शेषः । रेजुः = शुशुभिरे । परैः = अन्यैः तुष्टुविरे = स्तुताश्च । (ते = शूराः) अङ्गुलित्राणि = अङ्गुलिरक्षकाणि वस्तूनि, बबन्धुः = बध्नन्ति स्म । सन्नेहुः = सन्नाहं कृतवन्तः, कवचं परिहितवन्त इति भावः । परिनिर्ययुश्च = निष्क्रान्ताश्च ॥

व्युत्पत्तिः—जहृषुः = "हृष तुष्टौ इति धातोर्लिट् । रेजुः = "राज दीप्तौ" इति धातोर्लिट्, "फणां च सप्तानाम्" इत्येत्वाऽभ्यासलोपौ । तुष्टुविरे = "ष्टुञ् स्तुतौ" इति धातोः कर्मणि लिट् । अङ्गुलित्राणि = अङ्गुलिं त्रायन्त इति अङ्गुलित्राणि, तानि "आतोऽनुपसर्गे कः" इति कप्रत्ययः । बबन्धुः = "बन्ध बन्धने" इति धातोर्लिट् । सन्नेहुः = सम्पूर्वकात् "नह बन्धन" इति धातोर्लिट् ॥

भाषाऽर्थः—शूर लोग गर्जन करने लगे, प्रसन्न हुए शोभित हुए और और लोगोंने उनकी स्तुति भी की। उन लोगों ने अङ्गुलियों (उंगलीकी रक्षा करने वाली वस्तुओं) को बाँधा, कवच धारण किया और वे लोग (लड़ने के लिए) निकले भी ॥

धनूंष्यारोपयाञ्चक्रुरारुरुहू रथादिषु ।
असीनुद्ववृहुर्दीप्तान् गुर्वीरुच्चिक्षिपुर्गदाः ॥ ८ ॥

अन्वयः—(शूराः) धनूंषि आरोपयाञ्चक्रुः, रथाऽऽदिषु आरुरुहुः, दीप्तान् असीन् उद्ववृहुः, गुर्वीः, गदा उच्चिक्षिपुः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—धनूंषि = कार्मुकाणि, आरोपयाञ्चक्रुः = आरोपितगुणानि कृतवन्तः, अथवा-रथे हस्ते वा आरोपितवन्तः। रथाऽऽदिषु = स्यन्दनादिषु यानेषु, आदिपदेन तुरङ्गाऽऽदीनां परामर्शः। आरुरुहुः = आरोहणं कृतवन्तः, दीप्तान् = भास्वरान्, असीन् = खड्गान्, उद्ववृहुः = उद्यतान्कृतवन्तः, कोशादाकृष्येति शेषः। एवं च—गुर्वीः = महतीः, गदाः = लौहमयाऽस्त्रविशेषान्, उच्चिक्षिपुः = उत्क्षिप्तवन्तः॥

व्युत्पत्तिः—आरोपयाञ्चक्रुः = आङुपसर्गपूर्वकात् "रुह बीजजन्मनि प्रादुर्भावे च" ति धातोर्णौ "रुहः पोऽन्यतरस्याम्" इति पाऽऽदेशः। रथाऽऽदिषु=अस्य पदस्य आरोहणक्रियायां कर्मत्वेऽपि कारकस्य विवक्षाऽधीनत्वात् "आधारोऽधिकरणम्" इत्यधिकरणत्वविवक्षया सप्तमी। उद्ववृहुः=उत्पूर्वकात् "वृह उद्यमने" इति धातोर्लिट्॥

भाषाऽर्थः—शूरोंने ने चापोंको मौर्वीयुक्त किया, रथ आदि यानों (सवारियों) पर आरोहण किया, चमकने वाले तलवारोंको मियानसे बाहर निकाला और बड़ी गदाओं को उठाया॥ ८॥

शूलानि भ्रमयाञ्चक्रुर्बाणानाददिरे शुभान्।
भ्रेमुश्चुकुर्दिरे रेसुर्ववल्गुश्च पदातयः॥ ९॥

अन्वयः—(शूराः) शूलानि भ्रमयाञ्चक्रुः शुभान् बाणान् आददिरे। पदातयः भ्रेमुः चुकुर्दिरे, रेसुः ववल्गुश्च॥

व्याख्या—शूलानि = अस्त्रविशेषान्, भ्रमयाञ्चक्रुः = भ्रमितवन्तः, शूरा इति शेषः, एवमुत्तरवाक्येऽपि। शुभान् = शोभमानान्, बाणान् = शरान्, आददिरे = गृहीतवन्तः। पदातयः = पत्तयः, भ्रेमुः, = इतस्ततो याताः, चुकुर्दिरे = क्रीडितवन्तः, रेसुः = शब्दं कृतवन्तः, ववल्गुश्च = धावितवन्तश्च॥

व्युत्पत्तिः—भ्रमयाञ्चक्रुः = णिजन्तात् "भ्रमु अनवस्थाने" इति धातोर्लिट्। मान्तत्वान्मित्त्वे "मितां ह्रस्व" इति ह्रस्वत्वम्। आददिरे="आङो दोऽनास्यविहरणे" इत्यात्मनेपदम्। चुकुर्दिरे = "कुर्द ...... क्रीडायामेवे" ति धातोर्लिट्। रेसुः = "रस-शब्दे" इति धातोर्लिट्॥

भाषाऽर्थः—शूरोंने शूलोंको घुमाया शोभित होनेवाले बाणोंको लिया। पैदल सेनायें घूमने लगीं, क्रीडा करने लगीं, शब्द करने लगीं और दौड़ने लगीं॥ ९॥

समुत्पेतुः कशाघातैरश्म्याकर्षैर्ममङ्गिरे।
अश्वाः प्रदुद्रुवुर्मोचे रक्तं निजगरुः श्रमे॥ १०॥

अन्वयः—अश्वाः कशाऽऽघातैः समुत्पेतुः रश्म्याकर्षैः ममङ्गिरे, मोचे प्रदुद्रुवुः, श्रमे रक्तं निजगरुः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—अश्वाः = हयाः, कशाघातैः=चर्मलताप्रहारैः, समुत्पेतुः=उत्प्लुताः, रश्म्याकर्षैः = प्रग्रहाऽऽकर्षणैः, ममङ्गिरे = शुशुभिरे सङ्कुचितवेगत्वादिति भावः । मोक्षे=रश्मीनां प्रसारण इत्यर्थः । प्रदुद्रुवुः=वेगेन गताः, श्रमे=परिश्रमे सति, रक्तं= रुधिरं, खलीनप्रभवमिति भावः । निजगरुः = पीतवन्तः ॥

व्युत्पत्तिः—कशाघातैः=कशाया आघातैः, "अश्वादेस्ताडनी कशा" इत्यमरः । ममङ्गिरे = "मगि मण्डने" इति धातोर्लिट् । "इदितो नुम् धातोः" इति नुमागमः । निजगरुः=निपूर्वकात् "गॄ निगरणे" इति धातोर्लिट् । "ऋच्छत्यृताम्" इति गुणः ॥

भाषाऽर्थः—घोड़े चाबुकके आघातोंसे उछलने लगे, लगाम खींचनेसे शोभित हुए लगामको छोड़ने पर दौड़ने लगे और परिश्रम होने पर लगामसे निकले हुए रुधिरको पीने लगे ॥ १० ॥

गजाना प्रददुः शारीन् कम्बलान् परितस्तरुः ।
तेनुः कक्ष्यां ध्वजांश्चैव समुच्छिश्रियुरुच्छिखान् ॥ ११ ॥

अन्वयः—गजानां शारीन् प्रददुः, कम्बलान् परितस्तरुः, कक्ष्यां तेनुः, उच्छिखान् ध्वजांश्चैव समुच्छिश्रियुः ॥

व्याख्या—गजानां = हस्तिनां, शारीन्=युद्धोपकरणानि, प्रददुः = पृष्ठ आरोपितवन्त इत्यर्थः, हस्तिपका इति शेषः, एवं परत्राऽपि । कम्बलान् = रल्लकान्, परितस्तरुः = आस्तीर्णवन्तः, कक्ष्याम् = उदराद्यवस्थितां रज्जुं, तेनुः=विस्तारितवन्तः, उच्छिखान् = उद्गतशिखान्, ध्वजांश्चैव = पताकाश्चैव, समुच्छिश्रियुः = उत्क्षिप्तवन्तः ॥

व्युत्पत्तिः—कम्बलान् = "समौ रल्लककम्बलौ" इत्यमरः । परितस्तरुः = परिपूर्वकात् "स्तॄञ् आच्छादने" इति क्र्यादिस्थधातोर्लिट् । कक्ष्यां = "कक्ष्योद्ग्राहाऽरुका काञ्ची प्रकोष्ठगजरज्जुषु ।" इति विश्वः । उच्छिखान् = उद्गता शिखा येषां ते उच्छिखास्तान् । समुच्छिश्रियुः=समुत्पूर्वकात् "श्रिञ् सेवायाम्" इति धातोर्लिट् ॥

भाषाऽर्थः—महावतोंने हाथियोंकी पीठमें युद्धकी सामग्रियां रक्खीं, कम्बलों को बिछाया, उदरमें रक्खी गई रस्सीको फैलाया और उन्नत अग्र भागवाली पताकाओंको फहराया ॥ ११ ॥

विशिश्वासयिषांचक्रुरालिलिङ्गुश्च योषितः ।
आजघ्रुर्मूर्ध्नि बालांश्च चुचुम्बुश्च सुतप्रियाः ॥ १२ ॥

अन्वयः—(योधाः) योषितो विशिश्वासयिषाञ्चक्रुः आलिलिङ्गुश्च । सुतप्रियाः बालान् मूर्ध्नि आजघ्रुः चुचुम्बुश्च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—योषितः = स्त्रीः, विशिश्वासयिषाञ्चक्रुः = विश्वासयितुमिष्टवन्तः, आलिलिङ्गुश्च = आलिङ्गनं च कृतवन्तः, योधा इति शेषः। सुतप्रियाः = आत्मज-वल्लभाः, योधा इति भावः। बालान् = शिशून्, मूर्ध्नि = शिरसि, आजघ्नुः = आघ्रातवन्तः, चुचुम्बुश्च = चुम्बनं च कृतवन्तः, योधाः स्त्रियो बालकांश्च विश्वासोत्पादनादिभिः सान्त्वयित्वा रणाऽङ्गणं जग्मुरिति भावः॥

व्युत्पत्तिः—विशिश्वासयिषाञ्चक्रुः = विपूर्वकात् "श्वस प्राणने" इति ण्यन्ताद्धातोः सनि लिटि रूपम्। आलिलिङ्गुः=गत्यर्थो लिगिधातुराङ् पूर्वश्चेत्परिष्वङ्गे-वर्तते, तस्य लिटि रूपम्। सुतप्रियाः=सुताः प्रिया येषां ते। आजघ्नुः=आङ्पूर्वकात् "घ्रा गन्धोपादाने" इति धातोर्लिट्। चुचुम्बुः='चुबि वक्त्रसंयोगे" इति धातोर्लिट्॥

भाषाऽर्थः—योद्धाओंने स्त्रियोंको विश्वास दिलानेकी इच्छा की, और उन्हें आलिङ्गन किया। लड़कोंको प्यार करने वाले योद्धाओंने लड़कोंके शिरमें सूँघा और उन्हें चुम्बन भी किया॥ १२॥

गम्भीरवेदिनः संज्ञा गजा जगृहुरक्षताः।
ववृधे शुशुभे चैषां मदो हृष्टैश्च पुप्लुवे॥ १३॥

अन्वयः—गम्भीरवेदिनो गजा अक्षताः (सन्तः) संज्ञाः जगृहुः। एषां मदो ववृधे शुशुभे च। हृष्टैः (तैः) पुप्लुवे च॥

व्याख्या—गम्भीरवेदिनः—अङ्कुशदुर्द्धराः,

"त्वग्भेदाच्छोणितस्रावान्मांसस्य क्रथनादपि।
आत्मानं यो न जानाति तस्य गम्भीरवेदिता॥"

इत्याकारकलक्षणलक्षिताः इति भावः। गजाः = हस्तिनः, अक्षताः=तोत्राङ्कुशैरनाहताः सन्तः, संज्ञाः = युद्धोपयुक्ता अर्थसूचनाः, जगृहुः = गृहीतवन्तः। एषां हस्तिनां, मदः=दानवारि, ववृधे=एधाञ्चक्रे। शुशुभे च=शोभते स्म च। हृष्टैः = सन्तुष्टैः, तैरिति शेषः। पुप्लुवे च = प्लुतं च॥

व्युत्पत्तिः—गम्भीरवेदिनः = गम्भीरं विदन्तीति, ताच्छील्ये णिनिः। संज्ञाः= "संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चाऽर्थसूचना।" इत्यमरः। पुप्लुवे="प्लुङ् गतौ" इति धातोर्भावे लिट्॥

भाषाऽर्थः—गम्भीरवेदी हाथियोंने अक्षत होकर युद्धके उपयुक्त संज्ञा (इशारे) का ग्रहण कर लिया, इनका मद बढ़ा और शोभित भी हुआ। हृष्ट होकर वे वेगसे चलने लगे॥ १३॥

मृगाः प्रदक्षिणं सस्रुः शिवाः सम्यग् ववाशिरे।
अवामैः पुस्फुरे देहैःप्रसेदे चित्तवृत्तिभिः॥ १४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—मृगाः प्रदक्षिणं सस्रुः । शिवाः सम्यक् ववाशिरे । अवामैः देहैः पुस्फुरे । चित्तवृत्तिभिः प्रसेदे ।

व्याख्या—मृगाः = हरिणाः, प्रदक्षिणं = वामेतरद्यथा तथा सस्रुः = सृतवन्तः, एवं संनह्य चलतां मृगा दक्षिणपार्श्वेन गता इति भावः । शिवाः=शृगालाः, सम्यक् समीचीनं यथा तथा, ववाशिरे = शब्दं चक्रुः, शृगालाः वामपार्श्वस्थाः सन्तः शब्दितवन्त इति तात्पर्यम् । अवामैः=दक्षिणैः, देहैः=शरीरैः, लक्षणया देवाऽवयवैर्भुजादिभिरिति भावः । पुस्फुरे = स्फुरितं, चित्तवृत्तिभिः = मनोवृत्तिभिः, प्रसेदे=प्रसन्नम् ॥

व्युत्पत्तिः—शिवा = "स्त्रियां शिवा भूरिमायुगोमायुमृगधूर्तकाः ।" इत्यमरः । ववाशिरे="वाशृ शब्दे" इति धातोर्लिट् । पुस्फुरे="स्फुर संचलने" इति धातोर्भावे लिट् । प्रसेदे = प्रपूर्वकात् "षद्लृ विशरणगत्यवसादनेषु" इति धातोर्भावे लिट् ॥

भाषाऽर्थः—इस तरह कवच धारण करने वालोंके दाहिनी ओर मृग चलने लगे, बाईं ओर शृगाल होकर शब्द करने लगे, दक्षिण भुज आदि शरीरके अवयव स्फुरित होने लगे और वीर लोगों की चित्तवृत्तियाँ प्रसन्न हुईं ॥ १४ ॥

प्राच्यमञ्जिहिषांचक्रे प्रहस्तो रावणाज्ञया ।
द्वारं ररङ्घतुर्याम्यं महापार्श्वमहोदरौ ॥ १५ ॥

अन्वयः—प्रहस्तो रावणाऽऽज्ञया प्राच्यं द्वारम् अञ्जिहिषाञ्चक्रे, महापार्श्वमहोदरौ याम्यं द्वारं ररङ्घतुः ॥

व्याख्या—प्रहस्तः = रावणसेनापतिविशेषः, रावणाऽऽज्ञया = रावणाऽऽदेशेन, प्राच्यं = पूर्वदिग्भवं, द्वारं = प्रतिहारम् , अञ्जिहिषाञ्चक्रे=गन्तुमिष्टवान् । महापार्श्वमहोदरौ = तन्नामकौ सेनापतिविशेषौ, याम्यं = यमदिग्भवं, दक्षिणमित्यर्थः । द्वारं = प्रतीहारं, ररङ्घतुः = गतौ ॥

व्युत्पत्तिः—प्राच्यं = प्राचिभवं, "द्युप्रागपागुदक्प्रतीचो यत्" इति यत् । अञ्जिहिषाञ्चक्रे = सन्नन्तात् "अहि गतौ' इति धातोर्लिट् । इडागमे "अजादेर्द्वितीयस्य" इति द्विर्वचनम् "नन्द्राः संयोगादय" इति नकारस्य द्वित्वप्रतिषेधः । "आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य" इत्यात्मनेपदम् । याम्यं=यमो देवताऽस्येति विग्रहे "यमाच्चेति वक्तव्यम्" इति ण्यप्रत्यय इति काशिका । भाष्येऽदर्शनादेतत्प्रामाण्ये संदिहाना ज्ञानेन्द्रभिक्षुचरणास्तु—"अण्णन्तात्स्वार्थिकेन ष्यञा प्रयोगः सूपपाद" इति प्रत्यपीपदन् । ररङ्घतुः = "रघि गतौ" इति धातोर्लिट् ।

भाषाऽर्थः—प्रहस्तने रावणकी आज्ञासे पूर्व द्वारमें जानेकी इच्छाकी, महापार्श्व और महोदय नामके राक्षसोंने दक्षिण द्वारमें गमन किया ॥ १५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रययाविन्द्रजित्प्रत्यगियाय स्वयमुत्तरम् ।
समध्यासिसिषांचक्रे विरूपाक्षः पुरोदरम् ॥ १६ ॥

अन्वयः—इन्द्रजित् प्रत्यक् प्रययौ । स्वयम् । उत्तरम् इयाय । विरूपाक्षः पुरोदरं समध्यासिसिषाञ्चक्रे ॥

व्याख्या—इन्द्रजित् = मेघनादः, प्रत्यक् = पश्चिमद्वारं; प्रययौ = प्रगतः । स्वयम् = आत्मना, रावण इति भावः, उत्तरम् = उत्तरद्वारम् , इयाय = गतः । विरूपाक्षः = तन्नामा राक्षससेनापतिः, पुरोदरं = पुरमध्यं, समध्यासिसिषाञ्चक्रे = समध्यासितुमिष्टवान् ॥

व्युत्पत्तिः—प्रत्यक् = प्रतीच्यामिति "दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः" इति विहितस्याऽस्तातेः "अञ्चेर्लुक्" इति लुक् । भसंज्ञाभावात् "अच" इति अकारलोपो निवर्तते "चौ" इति दीर्घत्वं च । समध्यासिसिषाञ्चक्रे = समधिपूर्वकात् "आस उपवेशने" सन्नन्ताद्धातोः लिटि इटि अजादिः । पूर्ववत्सनः" इत्यात्मनेपदम् । अनुप्रयोगस्याप्यात्मनेपदम् ।

भाषार्थः—इन्द्रजित् पश्चिम् द्वार को चला । स्वयम् रावण उत्तर द्वारको गया । विरूपाक्षने मध्यभागमें रहने की इच्छा की ॥ १६ ॥

शुश्राव रामस्तत्सर्वं प्रतस्थे च ससैनिकः ।
विस्फारयांचकारास्त्रं बबन्धाथ च बाणधी ॥ १७ ॥

अन्वयः—अथ रामः तत् सर्वं शुश्राव, ससैनिकः प्रतस्थे च, अस्त्रं विस्फारयाञ्चकार, वाणधी च बबन्ध ॥

व्याख्या—अथ = अनन्तरं, रामः = रामचन्द्रः, तत् = पूर्ववृत्तं, सर्वं=सकलं, रावणचेष्टितं, शुश्राव = श्रुतवान् , ससैनिकः = सैन्यसहितः सन् , प्रतस्थे च=गन्तुं प्रवृत्तश्च, अस्त्रं = धनुः, विस्फारयाञ्चकार = आरोप्याऽऽकृष्टवान् , वाणधी च=तूणीरे च, बबन्ध=बध्नाति स्म ॥

व्युत्पत्तिः—ससैनिकः=सेनायां समवेताः सैनिकाः "सेनायां वा" इति पक्षे ठक् ; पक्षे ण्यः=सैन्याः । "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते ।" इत्यमरः । सैनिकैः सहितः । प्रतस्थे="समवप्रविभ्यः स्थः" इत्यात्मनेपदम् । विस्फारयाञ्चकार= विपूर्वकात् "स्फुर संचलने' इति धातोर्णौ लिट् । वि"विस्फुरोर्णौ" इत्यात्वम् । वाणधी=वाणा धीयन्ते अनयोरिति, "कर्मण्यधिकरणे च" इति किप्रत्ययः ॥

भाषाऽर्थः—अनन्तर रामचन्द्रजीने वह सब वृत्तान्त सुना, सैनिकोंके साथ प्रस्थान भी किया; धनुषको फैलाया और दो तूणीरोंको बाँधा ॥ १७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ईक्षांचक्रेऽथ सौमित्रिमनुजज्ञे बलानि च ।
नमश्चकार देवेभ्यः पर्णतल्पं मुमोच च ॥ १८ ॥

अन्वयः—अथ (रामः) सौमित्रिम् ईक्षाञ्चक्रे, बलानि च अनुजज्ञे, देवेभ्यो नमः चकार, पर्णतल्पं मुमोच च ॥

व्याख्या—अथ = अनन्तरं, (रामः=रामचन्द्रः) सौमित्रिं=लक्ष्मणम् , ईक्षाञ्चक्रे=दृष्टवान् , बलानि च=सैनिकांश्च, अनुजज्ञे=अनुज्ञातवान् , देवेभ्यः=सुरेभ्यः, नमः=नमस्कारं, चकार=कृतवान् , पर्णतल्पं=पत्रशयनीयं, मुमोच च=मुक्तवांश्च ।

व्युत्पत्तिः—ईक्षाचक्रे="ईक्ष दर्शने" इति धातोर्लिटि "इजादेश्च गुरुमतोऽनृच्छ" इति आम् । अनुजज्ञे = अनुपूर्वो "ज्ञा अवबोधने" इति धातुरनुज्ञाने वर्तते तस्य परस्मैपदित्वात् "अनुपसर्गाज्ज्ञ" इतिवचनादात्मनेपदम् । उपसर्गेण युक्तत्वात् । देवेभ्यः "नमः" इति पदेन योगे "नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्चे"ति चतुर्थी । यद्यपि "नमश्चकारे"ति क्रियापदेन साक्षाद्योगे "उपपदविभक्तेः कारकविभक्तिर्बलीयसी"ति परिभाषया द्वितीयाविभक्तेरेव प्राप्तिस्तथाप्यत्र नमःशब्दस्य वाचकत्वेन कृञोऽन्वयाच्चतुर्थ्यपि युक्ता ॥

भाषाऽर्थः—अनन्तर रामचन्द्रजीने लक्ष्मणको देखा, सैनिकोंको आज्ञा दी, देवताओंको नमस्कार किया और पत्रशय्याको भी छोड़ा ॥ १८ ॥

चकासांचक्रुरुत्तस्थुर्नेदुरानशिरे दिशः ।
वानरा भूधरान् रेधुर्बभञ्जुश्च ततस्तरून् ॥ १९ ॥

अन्वयः—ततो वानराः चकासाञ्चक्रुः, उत्तस्थुः, नेदुः, दिशः आनशिरे, भूधरान् रेधुः, तरूंश्च बभञ्जुः ॥

व्याख्या—ततः = अनुज्ञानन्तरं, वानराः = कपयः, चकासाञ्चक्रुः = शुशुभिरे, उत्तस्थुः = उत्थिता, नेदुः = अव्यक्तं शब्दं चक्रुः, दिशः = आशाः, आनशिरे = व्याप्तवन्तः, भूधरान् = पर्वतान् , रेधुः = उन्मूलितवन्तः तरूंश्च = वृक्षांश्च, बभञ्जुः = भग्नवन्तः ॥

व्युत्पत्तिः—चकासाञ्चक्रुः = "चकास्ट दीप्तौ" इति धातोर्लिटि "कास्प्रत्ययादाममन्त्रे लिटि" इत्यत्र "कास्यनेकाज्ग्रहणं कर्तव्यम्" इति वचनादाम् । नेदुः = "णद अव्यक्ते शब्दे" इति धातोर्लिट् , "णो न" इति णस्य नः । आनशिरे = "अशूङ् व्याप्तौ" इति धातोर्लिट् "अश्नोतेश्च" इत्यभ्यासस्य नुट् "अत आदेः" इति दीर्घत्वम् । रेधुः = राध संसिद्धौ इति धातोर्लिटि हिंसायाम् "राधो हिंसायाम्" इत्येत्वाऽभ्यासलोपौ ॥

भाषाऽर्थः—रामचन्द्रजीकी आज्ञा देनेके अनन्तर वानर शोभित हुए, उठे,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अव्यक्त शब्द करने लगे, दिशाओंको व्याप्त करने लगे, पर्वतोंको उन्मूलित करने लगे और वृक्षोंको भङ्ग करने ॥ १९ ॥

रामलक्ष्मणयोर्ब्रह्मास्त्रबन्धसूचनाऽर्थमपशकुनं श्लोकद्वयेन दर्शयति—

ददाल भूर्नभो रक्तं गोष्पदप्रं ववर्ष च ।
मृगाः प्रसस्रुपुर्वामं खगाश्चुकुविरेऽशुभम् ॥ २० ॥

अन्वयः--भूः ददाल । नभो रक्तं गोष्पदप्रं ववर्ष । मृगा वामं प्रसस्रुपुः । खगा अशुभं चुकुविरे ।

व्याख्या—भूः = पृथिवी, ददाल=विदीर्णा । नभः = आकाशं रक्तं= रुधिरं, गोष्पदप्रं = गोष्पदं पूरयित्वा, ववर्ष = वृष्टवत् । मृगाः = हरिणाः, वामं = दक्षिणोत्तरं प्रसस्रुपुः=गताः, मृगा वामपार्श्वेन याता इत्यर्थः । खगाः=पक्षिणः, उलूकादय इति शेषः । अशुभं = अमङ्गलं यथा तथा, "अशुभान्" इति पाठे अनिष्टान् इत्यर्थः । चुकुविरे = शब्दितवन्तः ॥

व्युत्पत्तिः--ददाल = "दल विशरणे" इति धातोर्लिट् । गोष्पदप्रं = "वर्षप्रमाण-ऊलोपश्चाऽस्याऽन्यतरस्याम्" इति णमुल् ऊलोपश्च, "कृन्मेजन्त" इत्यव्ययम् । ववर्ष = पित्वादकित्वे धातोर्गुणः । चुकुविरे = "कुङ् शब्दे" इति धातोर्लिट् ।

भाषाऽर्थः—भूमि विदीर्ण हुई । आकाशने रुधिरको गोष्पदको पूर्ण करके बरसाया । मृग वाईं ओर चले । पक्षी अमङ्गलपूर्वक शब्द करने लगे ॥ २० ॥

उल्का ददृशिरे दीप्ता रुरुवुश्चाऽशिवं शिवाः ।
चक्ष्माये च मही रामः शशङ्के चाशुभागमम् ॥ २१ ॥

अन्वयः—दीप्ता उल्का ददृशिरे । शिवा अशिवं रुरुवुः । मही च चक्ष्माये । रामः अशुभाऽऽगमं शशङ्के ।

व्याख्या—दीप्ताः = भासिताः, उल्काः = निर्गतज्वालाः, ददृशिरे = दृष्टाः । शिवाः = शृगालाः, अशिवम् = अशुभं यथा तथा, रुरुवुः=शब्दितवन्तः । मही च = पृथ्वी च, चक्ष्माये = कम्पिता । रामः = रामचन्द्रः अशुभाऽऽगमम् = अनिष्टप्राप्तिं शशङ्के = शङ्कितवान् शकुनदर्शनेनेति भावः ।

व्युत्पत्तिः—ददृशिरे "दृशिर् प्रेक्षणे" इति धातोः कर्मणि लिट् । चक्ष्माये— "क्ष्मायी विधूनने" इति धातोर्लिट् ॥

भाषाऽर्थः—प्रदीप्त उल्कायें देखी गईं । शृगाल अशुभपूर्वक शब्द करने लगे । भूमि भी कम्पित हुई । रामचन्द्रजीने अनिष्ट-प्राप्ति की आशङ्का की ॥ २१ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रावणः शुश्रुवान् शत्रून् राक्षसानभ्युपेयुषः ।
स्वयं युयुत्सयांचक्रे प्राकाराऽग्रे निषेदिवान् ॥ २२ ॥

अन्वयः—राक्षसान् अभ्युपेयुषः शत्रून् शुश्रुवान्, रावणः प्राकाराऽग्रे निषेदिवान् स्वयं युयुत्सयाञ्चक्रे ॥

व्याख्या—राक्षसान्=यातुधानान्, अभ्युपेयुषः=अभिमुखमुपगतवतः, शत्रून् = रिपून्, रामादीनित्यर्थः । शुश्रुवान्=श्रुतवान्, रावणः=दशाऽऽननः, प्राकाराऽग्रे= वप्राऽग्रे, निषेदिवान् = निषण्णः सन्, स्वयम् = आत्मना, युयुत्सयाञ्चक्रे = योद्धुमिच्छन्तं प्रयोजितवान् ॥

व्युत्पत्तिः—शुश्रुवान्=श्रुधातोः "भाषायां सदवसश्रुवः" इति लिटः क्वसुः । निषेदिवान् = निपूर्वात्सदधातोः पूर्वसूत्रेणैव क्वसुः । युयुत्सयाञ्चक्रे = सन्नन्तण्यन्तात् "युध सम्प्रहारे" इति धातोर्लिट् ॥

भाषाऽर्थः—राक्षसोंके सम्मुख आये हुए राम आदि शत्रुओंको सुनने वाले रावणने प्राकारके अग्रभाग में रहकर स्वयम् युद्धकी इच्छा करने वालेको प्रेरणा की ॥ २२ ॥

निरासू राक्षसा बाणान् प्रजहुः शूलपट्टिशान् ।
असींश्च वाहयाञ्चक्रुः पाशैश्चाऽचकृषुस्ततैः ॥ २३ ॥

अन्वयः—राक्षसा बाणान् निरासुः, शूलपट्टिशान् प्रजहुः, असीन् वाहयाञ्चक्रुः ततैः पाशैः आचकृषुश्च ॥

व्याख्या—राक्षसाः=यातुधानाः, रावणप्रेरिता इति शेषः । बाणान्=शरान्, निरासुः = क्षिप्तवन्तः, शूलपट्टिशान् = शूलसहितान् पट्टिशान्, प्रजहुः=त्यक्तवन्तः, असीन् = खड्गान्, वाहयाञ्चक्रुः=व्यापारितवन्तः, ततैः = विस्तृतैः, पाशैः = शस्त्रविशेषैः, आचकृषुश्च = आकृष्टवन्तश्च ॥

व्युत्पत्तिः—निरासुः = निरुपसर्गपूर्वकात् "असु क्षेपणे" इति धातोर्लिट् । शूलपट्टिशान्=शूलसहिताः पट्टिशाः शूलपट्टिशास्तान्, "शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्" इति मध्यमपदलोपी समासः । द्वन्द्वे तु "जातिरप्राणिनाम्" इति समाहारः स्यात् । प्रजहुः = प्रपूर्वकात् "ओहाक् त्यागे" इति धातोर्लिट् । वाहयाञ्चक्रुः="वह प्रापणे" इति णिजन्ताद्धातोर्लिट् । आचकृषुः = आङ्पूर्वकात् "कृष विलेखने" इति धातोर्लिट् । कित्त्वे गुणप्रतिषेधः ॥

भाषाऽर्थः—राक्षसोंने बाणोंको फेका, शूल और पट्टिश नामके अस्त्रोंको छोड़ा, तलवारोंका प्रयोग किया और विस्तृत पाशोंसे शत्रुओंको खींचा भी ॥ २३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भल्लैश्च बि॰ दुस्तीक्ष्णैर्विविधुस्तोमरैस्तथा ।
गदाभिश्चूर्ण ञ्चक्रुः, शितैश्चक्रैश्च चिच्छिदुः ॥ २४ ॥

अन्वयः—(राक्षसाः) क्ष्णैः भल्लैः बिभिदुः, तथा तोमरैः विविधुः, गदाभिः चूर्णयाञ्चक्रुः, शितैः चक्रैश्च ॰च्छिदुः ॥

व्याख्या—तीक्ष्णैः=निशितैः, भल्लैः=शस्त्रविशेषैः, बिभिदुः=विदारितवन्तः, राक्षसा इति शेषः, एवं परत्राऽपि । तथा=तीक्ष्णैः तोमरैः=शर्वलाभिः, विविधुः=ताडितवन्तः, गदाभिः=लौहमयाऽस्त्रविशेषैः, चूर्णयाञ्चक्रुः=चूर्णितवन्तः, शितैः=तीक्ष्णैः, चक्रैश्च=रथाऽङ्गाऽऽकारैरस्त्रविशेषैश्च चिच्छिदुः=छिन्नवन्तः ॥

व्युत्पत्तिः—बिभिदुः="भिदिर् विदारणे" इति धातोर्लिट् । विविधुः="व्यध ताडने" इति धातोर्लिट् । "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च" ति सम्प्रसारणम् । चूर्णयाञ्चक्रुः = "सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" इति णिच् । "चूर्ण प्रेरणे" इति चौरादिकाद्धातोर्वा णिच् । चिच्छिदुः="छिदिर् द्वैधीकरणे" इति धातोर्लिट् ॥

भाषाऽर्थः—राक्षसोंने तीखे भालोंसे शत्रुओंका विदारण किया वैसे ही तोमरोंसे ताडन किया, गदाओंसे चूर्ण किया और तीक्ष्ण चक्रोंसे छेदन भी किया ॥ २४ ॥

वानरा मुष्टिभिर्जघ्नुर्ददंशुर्दशनैस्तथा ।
निरासुश्च गिरींस्तुङ्गान् द्रुमान् विचकरुस्तथा ॥ २५ ॥

अन्वयः—वानरा मुष्टिभिः जघ्नुः, तथा दशनैः ददंशुः, तुङ्गान् गिरीन् निरासुः तथा द्रुमांश्च विचकरुः ॥

व्याख्या—वानराः = कपयः, मुष्टिभिः = सम्पिण्डिताङ्गुलिपाणिभिः, जघ्नुः=हतवन्तः, राक्षसानिति शेषः, एव परत्राऽपि । तथा=तेन प्रकारेण, दशनैः=दन्तैः, ददंशुः = दष्टवन्तः । तुङ्गान्=उन्नतान् , गिरीन् = पर्वतान् , निरासुः = क्षिप्तवन्तः, तथा=तेनैव प्रकारेण, द्रुमांश्च=वृक्षांश्च=विचकरुः=विक्षिप्तवन्तः ॥

व्युत्पत्तिः—विचकरुः="कॄ विक्षेपे"इति धातोर्लिट् । "ऋच्छत्यॄताम्"इति गुणः॥

भाषाऽर्थः—वानरोंने राक्षसोंको मुष्टियोंसे मारा और दाँतोंसे काटा, उनपर ऊँचे पहाड़ फेंके उसी तरह वृक्षोंको भी फेंका ॥ २५ ॥

लाङ्गूलैर्लोठयाञ्चक्रुस्तलैर्निन्युश्च संक्षयम् ।
नखैश्चचक्रतुः क्रुद्धाः पिपिषुश्च क्षितौ बलात् ॥ २६ ॥

अन्वयः—(वानराः) लाङ्गूलैः लोठयाञ्चक्रुः, तलैः संक्षयं च निन्युः, नखैः च चकृतुः, क्रुद्धाः (सन्तः) क्षितौ बलात् पिपिषुः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—लाङ्गूलैः = पुच्छैः, लोठयाञ्चक्रुः = व्यापादितवन्तः, वानरा राक्षसानिति भावः, एवं परत्राऽपि । तलैः = हस्ततलैः संक्षयं च = विनाशं च निन्युः = नीतवन्तः, नखैः = नखरैः, चकृतुः = उच्छिन्नवन्तः, क्रुद्धाः = कुपिताः सन्तः, क्षितौ = पृथिव्यां, बलात् = हठात् , पिपिषुः = चूर्णितवन्तः ॥

व्युत्पत्तिः—लोठयाञ्चक्रुः = णिजन्तस्य "लुठ प्रतिघाते" इति धातोर्लिट् । चकृतुः="कृती छेदने" इति धातोर्लिट् । पिपिषुः="पिष्लृ संचूर्णने" इति धातोर्लिट् ॥

भाषाऽर्थः—वानरोंने राक्षसोंको पूँछसे मारा, हथेलीसे मार डाला, नाखूनोंसे फाड़ा और क्रुद्ध होकर जमीनपर जबर्दस्तीसे चूर्ण किया ॥ २६ ॥

संबभूवुः कबन्धानि प्रोहुः शोणिततोयगाः ।
तेरुर्भटास्यपद्मानि ध्वजैः फेनैरिवाबभे ॥ २७ ॥

अन्वयः—कबन्धानि संबभूवुः । शोणिततोयगाः प्रोहुः । भटाऽऽस्यपद्मानि तेरुः । फेनैः इव ध्वजः आबभे ॥

व्याख्या—कबन्धानि = अपमूर्धकलेवराणि, संबभूवुः = संभूतानि, प्रतिसहस्रं व्यापादनादिति भावः । शोणिततोयगाः = रुधिरनद्यः, प्रोहुः = प्रवृत्ताः । भटाऽऽस्यपद्मानि = योधमुखकमलानि, तेरुः = प्लुतानि, फेनैरिव = डिण्डीरैरिव, ध्वजैः = पताकाभिः, आबभे = शोभितम् , शोणिततोयगास्विति शेषः ।

व्युत्पत्तिः—कबन्धानि="कबन्धोऽस्त्री क्रियायुक्तमपमूर्धकलेवरम् ।" इत्यमरः । प्रोहुः=वहेर्यजादित्वात् सम्प्रसारणम् । भटाऽऽस्यपद्मानि=आस्यानि पद्मानीव आस्यपद्मानि, "उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे" इति समासः । भटानामास्यपद्मानि । तेरुः = "तॄ प्लवनसतरणयोः" इति धातोर्लिट् । "तॄफलभजत्रपश्च" इत्येत्वाऽभ्यासलोपौ । आबभे = भावे लिट् ॥

भाषाऽर्थः—कबन्ध प्रकट हुए । रुधिर की नदियाँ बहने लगीं । उनमें योद्धाओंके मुखकमल तैरने लगे और फेनोंके तुल्य ध्वज शोभित हुए ॥ २७ ॥

रक्तपङ्के गजाः सेदुर्न प्रचक्रमिरे रथाः ।
निममज्जुस्तुरङ्गाश्च गन्तुं नोत्सेहिरे भटाः ॥ २८ ॥

अन्वयः—गजा रक्तपङ्के सेदुः । रथा न प्रचक्रमिरे । तुरङ्गा निममज्जुश्च । भटा गन्तु न उत्सेहिरे ॥

व्याख्या—गजाः = हस्तिनः, रक्तपङ्के = रुधिरकर्दमे, सेदुः = निषण्णाः रक्तपङ्कबाहुल्यादिति भावः । रथाः = स्यन्दनाः, न प्रचक्रमिरे = गन्तुं नाऽऽरब्धाः, तुरङ्गाः = अश्वाः, निममज्जुश्च = निमग्नाश्च । भटाः = योद्धारः, गन्तुं = यातु, न उत्सेहिरे = उत्साहं न कृतवन्तः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—प्रचक्रमिरे = प्रपूर्वकात् "क्रमु पादविक्षेपे" इति धातोर्लिट्। "प्रोपाभ्यां समर्थाभ्याम्" इत्यात्मनेपदम्। निममज्जुः=निपूर्वकात् "टुमस्जो शुद्धौ" इति धातोर्लिट् ॥

भाषाऽर्थः—हाथी रुधिरपंक में पड़ गये। रथों ने गमनका आरम्भ नहीं किया। घोड़े डूब गये। योद्धाओं ने जाने का उत्साह नहीं किया ॥ २८ ॥

कोट्या कोट्या पुरद्वारमेकैकं रुरुधे द्विषाम्।
षट्त्रिंशद्धरिकोट्यश्च निवव्रुर्वानराधिपम् ॥ २६ ॥

अन्वयः—द्विषाम् एकैकं पुरद्वारं कोट्या कोट्या रुरुधे। षट्त्रिंशद्धरिकोट्यश्च वानराऽधिपं निवव्रुः।

व्याख्या—द्विषां = शत्रूणाम्, एकैकं = प्रत्येकं, पुरद्वारं = नगरद्वारं, कोट्या कोट्या = कोटिकोटिसंख्यया वानरसंहत्या, रुरुधे = रुद्धम्। षट्त्रिंशद्धरिकोट्यश्च = षट्त्रिंशत्कोटिसंख्या हरयश्च, वानराऽधिपं = सुग्रीवं, निवव्रुः = आवृतवन्तः।

व्युत्पत्तिः—रुरुधे = "रुधिर् आवरणे" इति धातोः कर्मणि लिट्। षट्त्रिंशद्धरिकोट्यः = हरीणां कोट्यो हरिकोट्यः षट्त्रिंशत्संख्याका हरिकोट्यः, मध्यमपदलोपी समासः ॥

भाषाऽर्थः—शत्रुओं के एक एक शहर के द्वार को कोटि-कोटि वानरों ने रोका। छत्तीस करोड़ वानर सुग्रीवको घेर कर रहे ॥ २९ ॥

यस्तनुर्जह्वलुर्मम्लुर्जग्लुर्लुलुठिरे क्षताः।
मुमूर्च्छुर्ववमू रक्तं ततृषुश्चोभये भटाः ॥ ३० ॥

अन्वयः—उभये भटाः क्षताः (सन्तः) तस्तनुः, जह्वलुः, मम्लुः, जग्लुः, लुलुठिरे, मूमूर्च्छुः, रक्तं ववमुः, ततृषुश्च ॥

व्याख्या—उभये = द्विसम्बन्धिनः, रामरावणसम्बन्धिन इति भावः। भटाः = योद्धारः, क्षताः = विद्धाः सन्तः, तस्तनुः = स्तनितवन्तः, जह्वलुः = चलिताः, मम्लुः = म्लानाः, जग्लुः = हर्षक्षयं गताः, लुलुठिरे = भूमौ लुठितवन्तः, मुमूर्च्छुः = मोहमुपगताः, रक्तं = रुधिरं, ववमुः = उद्गीर्णवन्तः, ततृषुश्च = तृषमुपगताश्च। एतत्संकुलयुद्धमाह ॥

व्युत्पत्तिः—जह्वलुः="ह्वल चलने" इति धातोर्लिट्। लुलुठिरे="लुठ प्रतिघाते" इति तौदादिकाद्धातोर्लिट् ॥

भाषाऽर्थः—राम और रावण उभय पक्षके योद्धाओंने क्षत होकर शब्द किया व चले, म्लान हुए, हर्षक्षय को प्राप्त हुए, जमीन पर लोट-पोट करने लगे, मूर्च्छित हुए, रुधिर-वमन करने लगे और प्यासे हुए ॥ ३० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पातिना प्रजङ्घस्तु युयुधेऽसौ द्रुमाहतः।
चकम्पेऽतीव चुक्रोश जीवनाशं ननाश च ॥ ३१ ॥

अन्वयः—प्रजङ्घस्तु सम्पातिना युयुधे। असौ द्रुमाऽऽहतः (सन्) चकम्पे, अतीव चुक्रोश, जीवनाशं ननाश च ॥

व्याख्या—प्रजङ्घस्तु = प्रजङ्घनामा राक्षसस्तु, सम्पातिना = सम्पातिनामकेन वानरेण सह युयुधे = युद्धं कृतवान्। असौ = प्रजङ्घः, द्रुमाऽऽहतः = वृक्षताडितः सन्, चकम्पे = कम्पितः, अतीव = अत्यर्थं, चुक्रोश = आर्तनादं चकार, जीवनाशं ननाश च = जीवेन विनष्टश्च ॥

व्युत्पत्तिः—चुक्रोश = "क्रुश आह्वाने रोदने च" इति धातोर्लिट्। जीवनाशं = "कर्त्रोर्जीवपुरुषयोर्नशिवहोः" इति णमुल्, "कृन्मेजन्त" इत्यव्ययत्वम् ॥

भाषाऽर्थः—प्रजङ्घ नामका राक्षसने तो सम्पाति नामक वानरसे युद्ध किया। वह (प्रजङ्घ) वृक्षों से ताडित होकर काँपा, अतिशय आर्तनाद करने लगा और जीवनसे रहित हो गया ॥ १३१ ॥

उच्चख्नाते नलेनाजौ स्फुरत्प्रतपनाक्षिणी।
जम्बुमाली जहौ प्राणान् ग्राव्णा मारुतिना हतः ॥ ३२ ॥

अन्वयः—आजौ नलेन स्फुरत्प्रतपनाऽक्षिणी उच्चख्नाते। मारुतिना ग्राव्णा हतो जम्बुमाली प्राणान् जहौ ॥

व्याख्या—आजौ = संग्रामे, नलेन = नलाऽऽख्यवानरेण, स्फुरत्प्रतपनाऽक्षिणी = द्योतमानप्रतपनराक्षसनेत्रे, उच्चख्नाते = उत्खाते। मारुतिना = हनूमता, ग्राव्णा = पाषाणेन, हतः = ताडितः, जम्बुमाली=तदाख्यो राक्षसः, प्राणान्=असून्, जहौ = त्यक्तवान् ॥

व्युत्पत्तिः—स्फुरत्प्रतपनाऽक्षिणी=स्फुरती च ते प्रतपनाऽक्षिणी। उच्चख्नाते = उत्पूर्वकात् "खनु अवदारणे" इति धातोः कर्मणि लिट्। ग्राव्णा = "पाषाणप्रस्तर-ग्रावोपलाश्मानः शिला दृषत्।" इत्यमरः ॥

भाषाऽर्थः—संग्राममें नलने प्रतपन नामके राक्षसकी चमकनेवाली आँखोंको फोड़ डाला। हनूमानजीसे पत्थरसे ताडित होकर जम्बुमाली नामक राक्षसने प्राणत्याग किया ॥ ३२ ॥

मित्रघ्नस्य प्रचुक्षोद गदयाऽङ्गं विभीषणः।
सुग्रीवः प्रघसं नेभे बहून् रामस्ततर्द च ॥ ३३ ॥

अन्वयः—विभीषणः मित्रघ्नस्य अङ्गं गदया प्रचुक्षोद। सुग्रीवः प्रघसं नेभे रामश्च बहून् ततर्द ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—विभीषणः = रावणकनिष्ठभ्राता, मित्रघ्नस्य = तन्नामकस्य राक्षसस्य, अङ्गं = शरीरं, = गदया = शस्त्रविशेषेण, प्रचुक्षोद=चूर्णयामास। सुग्रीवः=वानरराजः, प्रघसं = प्रघसाऽऽख्य राक्षसं, नेभ=हिंसितवान् । रामश्च = रामचन्द्रश्च, बहून्= अनेकान्, राक्षसानित्यर्थः। ततर्द=जघान ॥

व्युत्पत्तिः—नेभे="णभ (तुभ) हिंसायाम्" इति धातोर्लिट्। ततर्द="उतृदिर् हिंसाऽनादरयोः" इति धातोर्लिट् ॥

भाषाऽर्थः—विभीषणने मित्रघ्न नामक राक्षसके शरीरको गदासे चूर्णित किया। सुग्रीवने प्रघस राक्षसको मारा। रामचन्द्रजीने भी बहुतेरे राक्षसोंको मार डाला ॥ ३३ ॥

वज्रमुष्टेर्विशिश्लेष मैन्देनाभिहतं शिरः ।
नीलश्चकर्त चक्रेण निकुम्भस्य शिरः स्फुरत् ॥ ३४ ॥

अन्वयः—मैन्देन अभिहत वज्रमुष्टेः शिरः विशिश्लेष। नीलः चक्रेण स्फुरत् निकुम्भस्य शिरः चकर्त ॥

व्याख्या—मैन्देन=तदाख्येन वानरेण, अभिहितं = ताडितं, वज्रमुष्टेः = तदाख्यस्य राक्षसस्य, शिरः=मूर्द्धा, विशिश्लेष=विश्लिष्टम् । नीलः=नीलनामा वानरः, चक्रेण=रथाऽङ्गाऽऽकारेण शस्त्रेण, स्फुरत् = चलत्, निकुम्भस्य=निकुम्भनाम्ना राक्षसस्य, शिरः=मूर्धानं, चकर्त=चिच्छेद ॥

व्युत्पत्तिः—विशिश्लेष = विपूर्वकात् "श्लिष आलिङ्गने" इति धातोर्लिट्। स्फुरत् = "स्फुर संचलने" इति धातोर्लटः शत्रादेशः। चकर्त = "कृती छेदने" इति धातोर्लिट् ॥

भाषाऽर्थः—मैन्द नामके वानरसे ताडित वज्रमुष्टि नामके राक्षसका शिर धड़से अलग हुआ। नील नामक वानरने चलते हुए निकुम्भके शिरको काट डाला।

विरूपाक्षो जहे प्राणैस्तृढः सौमित्रिपत्त्रिभिः ।
प्रमोचयाञ्चकारासून् द्विविदस्त्वशनिप्रभम् ॥ ३५ ॥

अन्वयः—सौमित्रिपत्त्रिभिः तृढः विरूपाक्षः प्राणैः जहे। द्विविदः अशनिप्रभम् असून् प्रमोचयाञ्चकार ॥

व्याख्या—सौमित्रिपत्त्रिभिः = लक्ष्मणबाणैः, तृढः = हतः, विरूपाक्षः = तन्नामधेयो राक्षसः, प्राणैः= असुभिः, जहे=त्यक्तः । द्विविदः = तन्नामधेयो वानरः, अशनिप्रभं=तन्नामधेयं राक्षसम्, असून्=प्राणान्, प्रमोचयाञ्चकार=त्याजितवान् ॥

व्युत्पत्तिः—सौमित्रिपत्त्रिभिः=सुमित्रायाः अपत्यं पुमान् सौमित्रिः, "बाह्वादिः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्यश्च" इति इट् । सौमित्रेः पत्रिणस्तैः । तृढः="तृहू हिंसाऽर्थः" इति तौदादिका-द्धातोरूदित्त्वान्निष्ठायामिडभावः । जहे="ओहाक् त्यागे" इति धातोः कर्मणि लिट् । प्रमोचयाञ्चकार=पयन्तस्य "मुच्लृ मोक्षणे" इति धातोर्लिट् ॥

भाषाऽर्थः—लक्ष्मणके बाणोंसे ताडित विरूपाक्ष राक्षसने प्राणोंको छोड़ा। द्विविद् वानरने अशनिप्रभ राक्षसको प्राणोंसे छुड़ाया ॥ ३५ ॥

गदा शक्रजिता जिह्ये तां प्रतीयेष वालिजः ।
रथं ममन्थ सहयं शाखिनाऽस्य ततोऽङ्गदः ॥ ३६ ॥

अन्वयः—शक्रजिता गदा जिह्ये । वालिजः तां प्रतीयेष ततः अङ्गदः अस्य सहयं रथं शाखिना ममन्थ ॥

व्याख्या—शक्रजिता=इन्द्रजिता, गदा=शस्त्रविशेषः, जिह्ये=प्रहिता । वालिजः=वालिसूनुः, अङ्गद इत्यर्थः । तां=गदाम् , इन्द्रजित्प्रहितामिति भावः । प्रतीयेष=प्रतीष्टवान् जग्राहेति भावः । ततः=अनन्तरम् , अङ्गदः=वालिसूनुः, अस्य=इन्द्रजितः, सहयम्=अश्वसहितं, रथं=स्यन्दनं, शाखिना=वृक्षेण, ममन्थ=चूर्णितवान् ॥

व्युत्पत्तिः—जिह्ये="हि गतौ वृद्धौ च" इति धातोः कर्मणि लिट् । प्रतीयेष=प्रतिपूर्वकात् "इष इच्छायाम्" इति धातोर्लिट् । "अभ्यासस्याऽसवर्णे" इतीयङ् । ममन्थ="मथि हिंसासंक्लेशनयोः" इति धातोर्लिट् ।

भाषाऽर्थः—इन्द्रजित्‌ने गदाको फेंका । उसे अङ्गदने पकड़ा । उसके अनन्तर अङ्गदने घोड़ोंके साथ उसके रथको वृक्षसे चूर्णकर डाला ॥ ३६ ।

तत्कर्म वालिपुत्रस्य दृष्ट्वा विश्वं विसिष्मिये ।
सत्रसू राक्षसाः सर्वे बहु मेने च राघवः ॥ ३७ ॥

अन्वयः—वालिपुत्रस्य तत् कर्म दृष्ट्वा विश्वं विसिष्मिये । सर्वे राक्षसाः संत्रेसुः । राघवश्च बहु मेने ॥

व्याख्या—वालिपुत्रस्य=अङ्गदस्य, तत्=पूर्वोक्तं, कर्म=कार्यं, रथमन्थनरूपमित्यर्थः । दृष्ट्वा=विलोक्य, विश्वं=त्रैलोक्य, विसिष्मिये=विस्मितं, सर्वे=सकलाः, क्षसाः=यातुधानाः, संत्रेसुः=सन्त्रस्ताः । राघवश्च=रामचन्द्रश्च बहु—अधिकं यथा तथा मेने=बुबुधे, अङ्गदं श्लाघितवानिति भावः ॥

व्युत्पत्तिः—विसिष्मिये "वि पूर्वः "स्मिङ् ईषद्धसने" इति धातुर्विस्मयाऽर्थकः, तस्माल्लिट् । संत्रेसुः=सम्पूर्वक च "त्रसी उद्वेगे" इति धातोर्लिट् ॥

भाषाऽर्थः—अङ्गदके उस कर्मको, देख कर त्रैलोक्य विस्मित हो गया । सब राक्षस संत्रस्त हुए । रामचन्द्रजीने भी अङ्गदकी प्रशंसा की ॥ ३७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुग्रीवो मुमुदे देवाः साध्वित्यूचुः सविस्मयाः ।
विभीषणोऽभितुष्टाव प्रशशंसुः प्लवङ्गमाः ॥ ३८ ॥

अन्वयः—सुग्रीवो मुमुदे । देवाः सविस्मयाः (सन्तः) साधु इति ऊचुः । विभीषणः अभितुष्टाव । प्लवङ्गमाः प्रशशंसुः ॥

व्याख्या—सुग्रीवः—वानरेश्वरः, मुमुदे = हृष्टवान् । देवाः = अमराः, सविस्मयाः = आश्चर्योपेताः सन्तः, साधु = समीचीनम् , इति = एवम् , ऊचुः = उक्तवन्तः । विभीषणः = रावणाऽनुजः, अभितुष्टाव=अभिष्टुतवान् , प्लवङ्गमाः=वानराः, प्रशशंसुः = प्रशंसां कृतवन्तः ॥

व्युत्पत्तिः—मुमुदे="मुद हर्षे" इति धातोर्लिट् "असंयोगाल्लिट् कित्" इति गुणाऽभावः । ऊचुः = "वचिस्वपियजादीनां किति" इति वचेः सम्प्रसारणम् । अभितुष्टाव=अभिपूर्वात् "ष्टुञ् स्तुतौ" इति धातोर्लिट् । "धात्वादेः षः सः" इति षस्य सत्वं, ततः "निमित्ताऽपाये नैमित्तिकस्याऽप्यपायः" इति न्यायेन टकारनिवृत्त्या तकारः । "उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्" इति षत्वम् , "ष्टुना ष्टुः" इति ष्टुत्वं च ॥

भाषाऽर्थः—सुग्रीव प्रसन्न हुए । देवताओंने आश्चर्ययुक्त हो कर साधुवाद ज्ञापित किया । विभीषणने स्तुति की । वानरोंने प्रशंसा की ॥ ३८ ॥

ही चित्रं लक्ष्मणेनोदे रावणिश्च तिरोदधे ।
विचकार ततो रामः शरान् संतत्रसुर्द्विषः ॥ ३९ ॥

अन्वयः—लक्ष्मणेन "ही ! चित्रम् !!" (इति) ऊदे । रावणिश्च तिरोदधे । ततो रामः शरान् विचकार । द्विषः सन्तत्रसुः ॥

व्याख्या—लक्ष्मणेन = रामाऽनुजेन, ही = विस्मयः !, चित्रम् = आश्चर्यम् , (इति = एवम्) ऊदे=उक्तम् । रावणिश्च = इन्द्रजिच्च, तिरोदधे = अदृश्यो जातः । ततः = इन्द्रजित्तिरोधानाऽनन्तरं, रामः = रामचन्द्रः, शरान्=बाणान् , विचकार= विक्षिप्तवान् । द्विषः = शत्रवः, सन्तत्रसुः=सन्त्रस्ताः ॥

व्युत्पत्तिः—ही="अहो ही च विस्मये" इत्यमरः । ऊदे="वद व्यक्तायां वाचि" इति धातोर्भावे लिट् । यजादित्वात् "वचिस्वपियजादीनां किति" इति सम्प्रसारणम् । रावणिः=रावणस्याऽपत्यं पुमान् , "अत इञ्" इति इञ्प्रत्ययः । विचकार= विपूर्वकात् "कॄ विक्षेपे" इति धातोर्लिट् ॥

भाषाऽर्थः—लक्ष्मणसे "ओह ! आश्चर्य है !!" ऐसा कहा गया । इन्द्रजित् अदृश्य हो गया । तब रामचन्द्रजीने बाणोंको फेंका । शत्रुलोग संत्रस्त हुए ॥ ३९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विभिन्ना जुघुरुर्घोरं जक्षुः क्रव्याऽशिनो हतान् ।
चुश्च्योत व्रणिनां रक्तं छिन्नाश्चेलुः क्षणं भुजाः ॥ ४० ॥

अन्वयः—विभिन्ना घोरं जुघुरुः । क्रव्याऽशिनो हतान् जक्षुः । व्रणिनां रक्तं चुश्च्योत । छिन्ना भुजाः क्षणं चेलुः ॥

व्याख्या—विभिन्नाः = विदीर्णाः शरैरिति शेषः । घोर = भयङ्करशब्दं यथा तथा, जुघुरुः = शब्दं चक्रुः । क्रव्याऽशिनः = मांसभक्षकाः, शृगालादय इत्यर्थः । हतान् = मारितान् , जक्षुः = भक्षितवन्तः । व्रणिनां = कृतव्रणानां, शरैरिति शेषः । रक्तं = रुधिरं, चुश्च्योत = श्च्योतितवत् व्रणादिति शेषः । छिन्नाः = कृत्ताः, भुजाः = बाहवः, क्षणं = कञ्चित्कालं, चेलुः = चलिताः ॥

व्युत्पत्तिः—जुघुरुः="घुर भीमाऽर्थशब्दयोः" इति धातोर्लिट् । क्रव्याशिनः = क्रव्यमश्नन्तीति तच्छीलाः, ताच्छील्ये णिनिः । जक्षुः="अद भक्षणे" इति धातोर्लिट्, "लिट्यन्यतरस्याम्" इत्यदेर्घस्लादेशः । "गमहनजनखनघसां लोपः क्ङित्यनङि" इत्युपधालोपः, "खरि चे"ति चर्त्वम् । चुश्च्योत = "श्च्युतिर् क्षरणे" इति धातोर्लिट् । पित्वादकित्वे गुणः ॥

भाषाऽर्थः—शरों से विदीर्ण योद्धाओंने भयङ्कर शब्द किया । शृगाल आदि मांसभक्षकोंने मारे गये योद्धाओंको खाया । शस्त्रोंसे क्षत योद्धाओंके शरीरसे रुधिर बहने लगा । काटे गये बाहु कुछ कालतक फड़कने लगे ॥ ४० ॥

कृत्तैरपि दृढक्रोधो वीरवक्त्रैर्न तत्यजे ।
पलायाञ्चक्रिरे शेषा जिह्रियुः शूरमानिनः ॥ ४१ ॥

अन्वयः—कृत्तैः अपि वीरवक्त्रैः दृढक्रोधो न तत्यजे । शेषाः पलायाञ्चक्रिरे । शूरमानिनो जिह्रियुः ॥

व्याख्या—कृत्तैरपि = छिन्नैरपि, वीरवक्त्रैः = शूरमुखैः, दृढक्रोधः = घनकोपः, न तत्यजे = न त्यक्तः, तत्राऽपि दष्टाऽधरभ्रुकुट्यादीनां सद्भावादिति भावः । शेषाः = अवशिष्टाः, पलायाञ्चक्रिरे = पलायिताः । शूरमानिनः = वीरमानिनः, जिह्रियुः = लज्जिताः, स्वजनपलायनदर्शनादिति भावः ॥

व्युत्पत्तिः—पलायाञ्चक्रिरे = परोपसर्गपूर्वकात् "अय गतौ" इति धातोर्लिट् । "दयायासश्च" इत्याम् "उपसर्गस्याऽयतौ" इति लत्वम् । शूरमानिनः=शूरं मन्यन्त इति, "मन" इति णिनिः ॥

भाषाऽर्थः—काटे जाने पर भी वीरोंके मुखोंने दृढ़ क्रोध नहीं छोड़ा । अवशिष्ट भाग गये । अपनेको शूर मानने वाले लज्जित हुए ॥ ४१ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राघवो न दयाञ्चक्रे दधुर्धैर्यं न केचन।
मम्रे पतङ्गवद्वीरैर्हाहेति च विचुक्रुशे ॥ ४२ ॥

अन्वयः—राघवो न दयाञ्चक्रे। केचन धैर्यं न दधुः। वीरैः पतङ्गवत् मम्रे। 'हा ! हा !!' इति च विचुक्रुशे ॥

व्याख्या—राघवः = रामः, न दयाञ्चक्रे = दयां न कृतवान्, केचन = केऽपि, धैर्यं = धीरतां, न दधुः = न धृतवन्तः, यद्वा के च=केऽपि, धैर्यं = धीरतां, न दधुः (इति) न, अपि तु दधुः, सर्वेऽपि धैर्यं धृतवन्त एवेति भावः। वीरैः=शूरैः, पतङ्गवत् = शलभवत्, मम्रे=मृतम्। हा हा इति च=हन्त ! हन्त !! इति च, विचुक्रुशे=रुदितम् ॥

व्युत्पत्तिः—दयाञ्चक्रे = "दय दानगतिरक्षणहिंसादानेषु" इति धातोर्लिट्, "दयायासश्च" इत्याम्। पतङ्गवत्=पतङ्गैस्तुल्यं, "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययः। मम्रे="मृङ् प्राणत्यागे" इति धातोर्भावे लिट् ॥

भाषाऽर्थः—रामचन्द्रजीने दया नहीं की। किसीने धैर्यधारण नहीं किया। वीर टिड्डी के सदृश मर गये। लोग हाहाकार करने लगे ॥ ४२ ॥

तिरोबभूवे सूर्येण प्रापे च निशयाऽऽस्पदम्
जग्रसे कालरात्रीव वानरान् राक्षसांश्च सा ॥ ४३ ॥

अन्वयः—सूर्येण तिरोबभूवे। निशया आस्पदं प्रापे च। सा च कालरात्री इव वानरान् राक्षसांश्च जग्रसे।

व्याख्या—सूर्येण = आदित्येन, तिरोबभूवे = तिरोभूतम्, अस्तं गतमित्यर्थः। निशया = रात्र्या, आस्पदं=प्रतिष्ठा, प्रापे च = प्राप्त च, सा च = निशा च, कालरात्री इव = कृतान्तरजनी इव, वानरान् = कपीन्, राक्षसांश्च = यातुधानांश्च, जग्रसे = भक्षितवती ॥

व्युत्पत्तिः—तिरोबभूवे = भावे लिट्। आस्पदम् = "आस्पदं प्रतिष्ठायाम्" इति ससुट्को निपातः। प्रापे = प्रपूर्वात् "आप्लृ व्याप्तौ" इति धातोः कर्मणि लिट्। कालरात्री=कालप्रयुक्ता रात्री, "शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्" इति मध्यमपदलोपी समासः। "कृदिकारादक्तिनः" इति ङीप्। इत्थमेव रात्रीपदसिद्धौ वैदिकप्रकरणस्थेन "रात्रेश्चाजसौ" इति सूत्रेण ङीप् इति लिखन्नयमल्लिनाथो नाऽऽदरणीयः ॥

भाषाऽर्थः—सूर्य अस्ताऽचलको चले गये। रातने स्थान पाया। उस रातने कालरात्रिकी सदृश हो कर वानर और राक्षसोंको खा डाला ॥ ४३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चुकोपेन्द्रजिदत्युग्रं सर्पास्त्रं चाजुहाव सः ।
आजुहुवे तिरोभूतः परानीक जहास च ॥ ४४ ॥

अन्वयः—इन्द्रजित् चुकोप, अत्युग्रं सर्पाऽस्त्रं च आजुहाव । सः तिरोभूतः (सन्) पराऽनीकम् आजुहुवे जहास च ॥

व्याख्या—इन्द्रजित् = मेघनादः, चुकोप = कुपितः, अत्युग्रम् = अतिभयङ्करं, सर्पाऽस्त्रं च = सर्परूपमस्त्रं च, आजुहाव = आहूतवान् । सः = इन्द्रजित् , तिरोभूतः= अदृष्टः सन् , पराऽनीकं = शत्रुसैन्यं, रामबलमिति भावः । आजुहुवे = स्पर्धितवान् , जहास च = हसितवांश्च ॥

व्युत्पत्तिः—सर्पाऽस्त्रं=सर्पा अस्त्रमिव सर्पाऽस्त्रं, तत् । आजुहाव = आङ्पूर्वकात् "ह्वेञ् स्पर्धायां शब्दे च" इति धातोः शब्दाऽर्थे लिट् । "अभ्यस्तस्य च" इति द्विर्वचनात्प्राक् सम्प्रसारणं ततो द्विर्वचनम् । आजुहुवे=आङ्पूर्वात्पूर्वधातोरेव "स्पर्धायामाङ" इत्यात्मनेपदम् , लिटि पूर्ववत्सम्प्रसारणं, यजादित्वाद्वा सम्प्रसारणम् । अनन्तरमुवङादेशः ॥

भाषाऽर्थः—इन्द्रजित् कुपित हुआ । उसने अतिशय भयङ्कर सर्पाऽस्त्र को बुलाया । उसने अदृश्य होकर रामचन्द्रजी की सेनाको ललकारा और हास्य भी किया ॥ ४४ ॥

बबाधे च बलं कृत्स्नं निजग्राह च सायकैः ।
उत्ससर्ज शरांस्तेऽस्य सर्पसाच्च प्रपेदिरे ॥ ४५ ॥

अन्वयः—(सः) कृत्स्नं बलं बबाधे, सायकैः निजग्राह च, शरान् उत्ससर्ज ते अस्य सर्पसाच्च प्रपेदिरे ॥

व्याख्या—(सः) इन्द्रजित् , कृत्स्नं = संपूर्णं, बलं = रामसैन्यं, बबाधे= अभिभूतवान् , सायकैः = वाणैः, निजग्राह च = निगृहीतवांश्च, शरान् = बाणान् , उत्ससर्ज = उत्सृष्टवान् , ते = उत्सृष्टाः शराः, अस्य = रामबलस्य, सर्पसाच्च=कार्त्स्न्येन सर्पभूताश्च प्रपेदिरे = सम्पन्नाः ॥

व्युत्पत्तिः—बबाधे = "बाधृ विलोडने" इति धातोर्लिट् । सर्पसात्="विभाषा साति कार्त्स्न्ये" इति सातिः ॥

भाषाऽर्थः—इन्द्रजित्ने सम्पूर्ण रामकी सेनाको अभिभूत किया, बाणोंसे निगृहीत किया, बाणोंको छोड़ा; व बाण रामचन्द्रजीकी सेना में संपूर्णतासे सर्पभूत हो गये ॥ ४५ ॥

आचिचाय स तैः सेनामाचिकाय च राघवौ ।
बभाण च न मे मायां जिगायेन्द्रोऽपि किं नृभिः ॥ ४६ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—स तैः सेनाम् आचिचाय, राघवौ च आचिकाय; बभाण च-"इन्द्रोऽपि मे मायां न जिगाय, नृभिः किम् ?" इति ।

व्याख्या—सः = इन्द्रजित्, तैः = सर्पाऽस्त्रैः, सेनां = वानरसैन्यम्, आचिचाय=आच्छादितवान् । राघवौ च=रामलक्ष्मणौ च, आचिकाय=आच्छादितवान् । बभाण च=उक्तवांश्च, इन्द्रोऽपि=देवराजोऽपि, मे=मम, मायां=शाम्बरीं, न जिगाय=न जितवान्, नृभिः=मनुष्यैः, किं=किं जेष्यते ? मन्मायेति शेषः । नैव जेष्यत इति भावः ॥

व्युत्पत्तिः—आचिचाय="आङ्पूर्वकात् चिञ् चयने" इति धातोर्लिट् । कुत्वाऽभावे रूपम् । राघवौ = रघोरपत्ये पुमांसौ, "तस्याऽपत्यम्" इत्यण् । आचिकाय = "विभाषा चेः" इति कुत्वपक्षे रूपम् । बभाण=शब्दाऽर्थात् भणधातोर्लिट् । जिगाय= "जि जये" इति धातोर्लिट्, "सन्लिटोर्जेः" इति कुत्वम् ॥

भाषाऽर्थः—इन्द्रजित्ने सर्पाऽस्त्रोंसे वानरोंकी सेनाको और राम-लक्ष्मणको भी आच्छादित किया । उसने कहा—"इन्द्रने भी मेरी मायाको नहीं जीता, मनुष्योंसे क्या जीती जायगी" ॥ ४६ ॥

आचिक्याते च भूयोऽपि राघवौ तेन पन्नगैः ।
तौ मुमुहतुरुद्विग्नौ वसुधायां च पेततुः ॥ ४७ ॥

अन्वयः—तेन भूयः अपि पन्नगैः राघवौ आचिक्याते च । तौ उद्विग्नौ । (सन्तौ) मुमुहतुः, वसुधायां पेततुश्च ॥

व्याख्या—तेन = इन्द्रजिता, भूयोऽपि = पुनरपि, पन्नगैः = सर्पैः, राघवौ = रामलक्ष्मणौ, आचिक्याते च = आच्छादितौ च, तौ = रामलक्ष्मणौ, उद्विग्नौ=व्याकुलौ सन्तौ, मुमुहतुः=मोहं गतौ, वसुधायां = पृथिव्यां, पतितौ च बन्धपरवशीकृतत्वादिति शेषः ॥

व्युत्पत्तिः—पन्नगैः = पन्नं (पतितम्) गच्छन्तीति पन्नगास्तैः, "सर्वत्रपन्नयोरुपसंख्यानम्" इति डः । "उरगः पन्नगो भोगी" त्यमरः । आचिक्याते = कर्मणि लिट् । मुमुहतुः = "मुह वैचित्त्ये" इति धातोर्लिट् ॥

भाषाऽर्थः—इन्द्रजित्ने फिर भी सर्पोंसे राम और लक्ष्मणको आच्छादित किया । वे (राम और लक्ष्मण) व्याकुल होते हुए मूर्च्छित होकर जमीनपर गिर पड़े ॥

ततो रामेति चक्रन्दुस्त्रेसुः परिदिदेविरे ।
निशश्वसुश्च सेनान्यः प्रोचुर्धिगिति चात्मनः ॥ ४८ ॥

अन्वयः—ततः सेनान्यो "राम" इति चक्रन्दुः, त्रेसुः, परिदिदेविरे निशश्वसुश्च; आत्मनश्च "धिक्" इति प्रोचुः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—ततः =रामलक्ष्मणपतनाऽनन्तरं, सेनान्यः = नीलादयः, सेनापतयः, "राम" ! इति = हे राम इति नामग्राहपूर्वकं, चक्रन्दुः = रुदितवन्तः, त्रेसुः = त्रस्ताः, परिदिदेविरे=परिदेवनं कृतवन्तः, निशश्वसुश्च=निश्वासं कृतवन्तश्च, आत्मनश्च=स्वांश्च, "धिक्" इति प्रोचुः=गर्हितवन्त इति भावः ॥

व्युत्पत्तिः—सेनान्यः =सेना नयन्तीति, "सत्सूद्विषे"ति क्विप् । चक्रन्दुः = "क्रदि आह्वाने रोदने च" इति धातोर्लिट् । परिदिदेविरे=परिपूर्वकात् "देवृ देवने" इति धातोर्लिट्, "विलापः परिदेवनम्" इत्यमरः । आत्मनः = धिग्योगे—"उभसर्वतसोः कार्यें" त्यादिना द्वितीया ॥

भाषाऽर्थः—राम और लक्ष्मणके गिरनेके अनन्तर नील आदि सेनापति 'हे राम !' कहकर रोने लगे, त्रस्त हुए, विलाप करने लगे, उसासें लेने लगे, अपनेको धिक्कारने लगे ॥ ४८ ॥

मन्युं शेकुर्न ते रोद्धुं नाऽस्रं संरुरुधुः पतत् ।
विविदुर्नेन्द्रजिन्मार्गं परीयुश्च प्लवङ्गमाः ॥ ४९ ॥

अन्वयः—ते मन्युं रोद्धुं न शेकुः पतत् अस्रं न संरुरुधुः, इन्द्रजिन्मार्गं न विविदुः । प्लवङ्गमाश्च परीयुः ॥

व्याख्या—ते = नीलादयः सेनापतयः, मन्युं = शोकं,=रोद्धुं=वारयितुं, न शेकुः= न पारितवन्तः । पतत् = निर्गच्छत्, लोचनाभ्यामिति शेषः । अस्रम् = अश्रु, न संरुरुधुः = न संरुद्धवन्तः । इन्द्रजिन्मार्गं मेघनादपथं, न विविदुः = नो ज्ञातवन्तः, प्लवङ्गमाश्च=वानराश्च, परीयुः = समन्ताद् गताः, इन्द्रजिदन्वेक्काऽसौ तिष्ठतीति । षणार्थमिति भावः ॥

व्युत्पत्तिः—संरुरुधुः = संपूर्वकात् "रुधिर् आवरणे" इति धातोर्लिट् । परीयुः = परिपूर्वकात् "इण् गतौ" इति धातोर्लिट् ॥

भाषाऽर्थः—वे (नील आदि वानरसेनापति) शोकको नहीं रोक सके । उन्होंने आंखोंसे गिरती हुई आंसू को नहीं रोका और इन्द्रजित्का मार्ग नहीं जाना । वानर भी (इन्द्रजित्को ढूँढ़नेके लिए) चारों तरफ चले गये । ॥ ४९ ॥

दधावाऽद्भिस्ततश्चक्षुः सुग्रीवस्य विभीषणः ।
विदाञ्चकार धौताऽक्षः स रिपुं खे ननर्द च ॥ ५० ॥

अन्वयः—ततो विभीषणः अद्भिः सुग्रीवस्य चक्षुः दधाव । धौताऽक्षः सः खे रिपुं विदाञ्चकार, ननर्द च ॥

व्याख्या—ततः = अनन्तरं, विभीषणः = रावणाऽनुजः, अद्भिः = जलैः, स-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्त्रपूतैरिति शेषः । सुग्रीवस्य = वानरराजस्य, चक्षुः = नेत्रं, दधाव = प्रक्षालितवान्, धौताऽक्षः = प्रक्षालितनेत्रः, सः = सुग्रीवः, खे = आकाशे, स्थितमिति शेषः । रिपुं = शत्रुं मेघनादमित्यर्थः, विदाञ्चकार = ज्ञातवान्, ननर्द च = शब्दितवांश्च, क्वेदानीं यास्यसीति ॥

व्युत्पत्तिः—दधाव = "धावु गतिशुद्धयोः" इति धातोर्लिट् । धौताऽक्षः = धौते अक्षिणी यस्य सः, 'बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्" इति समासाऽन्तः षच् । विदाञ्चकार = "विद ज्ञाने" इति धातोर्लिट् "उषविदजागृभ्योऽन्यतरस्याम्" इत्याम् । तदभावपक्षे विवेदेति । ननर्द = "नर्द शब्दे" इति धातोर्लिट् ॥

भाषाऽर्थः—तब विभीषणने जलसे सुग्रीवके नेत्रोंका प्रक्षालन किया । प्रक्षालित नेत्रवाले सुग्रीवने आकाशमें स्थित शत्रु (इन्द्रजित्) को जाना, शब्द भी किया ॥ ५० ॥

> उज्जुगूरे ततः शैलं हन्तुमिन्द्रजितं कपिः ।
> विहाय रावणिस्तस्मादानंहे चाऽन्तिकं पितुः ॥ ५१ ॥

अन्वयः—ततः कपिः इन्द्रजितं हन्तुं शैलम् उज्जुगूरे । रावणिः विहाय तस्मात् पितुः अन्तिकम् आनंहे ॥

व्याख्या—ततः = रिपुवेदनाऽनन्तर, कपिः = सुग्रीवः, इन्द्रजितं = मेघनादं, हन्तु = व्यापादयितुं, शैलं = पर्वतम्, उज्जुगूरे = उत्क्षिप्तवान् । रावणिः = इन्द्रजित्, विहाय = त्यक्त्वा, युद्धमिति शेषः । "बिभाय"ति पाठे भयं प्रापेत्यर्थः । तस्मात् = आकाशात्, पितुः = जनकस्य, रावणस्येत्यर्थः । अन्तिक = समीपम्, आनंहे = गतः ।

व्युत्पत्तिः—उज्जुगूरे = उत्पूर्वकात् "गूरी हिंसागत्योः" इति दैवादिकधातोर्लिट् । रावणिः = रावणस्याऽपत्यं पुमान्, "अत इञ्" इति इञ् । आनंहे = "अहि गतौ" धातोर्लिट् । "अत आदेः" इति अभ्यासस्याऽऽदेरतो दीर्घः "तस्मान्नुड् द्विहलः" इति नुट् ॥

भाषाऽर्थः—शत्रुको जाननेके अनन्तर सुग्रीवने इन्द्रजित्को मारनेके लिए पर्वतको उठाया । इन्द्रजित् युद्ध छोड़कर आकाशसे पिता (रावण) के पास चला गया ॥ ५१ ॥

> आचचक्षे च वृत्तान्तं प्रजहर्ष च रावणः ।
> गाढं चोपजुगूहैनं शिरस्युपशिशिङ्घ च ॥ ५२ ॥

अन्वयः—(रावणिः) वृत्तान्तम् आचचक्षे च रावणश्च प्रजहर्ष, एनं गाढम् उपजुगूह शिरसि उपशिशिङ्घ च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—वृत्तान्तम् = उदन्तं, राघवबन्धनरूपमिति भावः। आचचक्षे च = कथितवांश्च; इन्द्रजिद्रावणमिति शेषः। रावणश्च = दशाऽऽननश्च, प्रजहर्ष = प्रहृष्टः। एनं = रावणिं, गाढं = दृढम्, उपजुगूह = आलिलिङ्ग, शिरसि = मूर्ध्नि, उपशिशिङ्घ च = आघ्रातवांश्च ॥

व्युत्पत्तिः—एनं = "द्वितीयाटौस्स्वेन" इति इदम एनादेशः। उपजुगूह = उपपूर्वकात् "गुहू संवरणे" इति धातोर्लिट्। अत्र क्रियाफलस्याऽविवक्षितत्वान्न आत्मनेपदम्। "ऊदुपधाया गोहः" इत्यूत्वम्। उपशिशिङ्घ = उपपूर्वकात् "शिघि आघ्राणे" इति धातोर्लिट् ॥

भावार्थः—इन्द्रजित्ने रावणको राम और लक्ष्मणके बन्धका वृत्तान्त कहा। रावण भी प्रसन्न हुआ। उसने पुत्रको गाढ आलिङ्गन किया और शिरमें सूंघा भी ॥ ५२ ॥

ध्वजानुद्दुधुवुस्तुङ्गान् मांसं चेमुर्जगुः पपुः।
कामयाञ्चक्रिरे कान्तास्ततस्तुष्टा निशाचराः ॥ ५३ ॥

अन्वयः—ततः निशाचराः तुष्टाः (सन्तः) तुङ्गान् ध्वजान् उद्दुधुवुः, मांसं चेमुः, जगुः, पपुः, कान्ताः कामयाञ्चक्रिरे ॥

व्याख्या—ततः = राघवबन्धनज्ञानाऽनन्तरं, निशाचराः = राक्षसाः, तुष्टाः = प्रीताः सन्तः, तुङ्गान् = उन्नतान् ध्वजान् = पताकाः, उद्दुधुवुः = उत्क्षिप्तवन्तः, मांसं = क्रव्यं, चेमुः = भक्षितवन्तः, जगुः = गीतवन्तः पपुः = पीतवन्तः, मद्यमिति शेषः। कान्ताः = प्रियाः, कामयाञ्चक्रिरे = कामितवन्तः ॥

व्युत्पत्तिः—ततः = तस्मादिति, "पञ्चम्यास्तसिल्" इति तसिल्। चेमुः = "चमु (छमु जमु झमु) अदने" इति धातोर्लिट्। पपुः = "पा पाने" इति धातोर्लिट्। कामयाञ्चक्रिरे = "कमु कान्तौ" इति धातोर्लिट्। कमेर्णिङन्तादाम् ॥

भावार्थः—तब राक्षसोंने प्रसन्न होकर ऊँचे ध्वजोंको फहराया, मांस खाया, गाना गाया, मद्यपान किया और प्रियाओंका अभिलाप किया ॥ ५३ ॥

दर्शयाञ्चक्रिरे रामं सीतां राज्ञश्च शासनात्।
तस्या मिमीलतुर्नेत्रे लुलुठे पुष्पकोदरे ॥ ५४ ॥

अन्वयः—राज्ञः शासनात् (राक्षसाः) सीतां रामं दर्शयाञ्चक्रिरे। तस्याः नेत्रे मिमीलतुः। (सा) पुष्पकोदरे लुलुठे ॥

व्याख्या—राज्ञः = रावणस्य, शासनात् आदेशात्, सीतां = जानकीं, जनकन्या इत्यर्थः। रामं = रामचन्द्रं, दर्शयाञ्चक्रिरे = दर्शितवन्तः, राक्षसा इति शेषः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्याः = सीतायाः, नेत्रे = नयने, मिमीलतुः = निमीलिते। पुष्पकोदरे = पुष्पकविमानमध्ये, लुलुठे = लुठिता, रामलक्ष्मणबन्धनं दृष्ट्वा सीता मूर्च्छया पुष्पकमध्ये लुठितेति भावः।

व्युत्पत्तिः—सीताम् = "अभिवादिदृशोरात्मनेपदे वेति वाच्यम्" इति विकल्पेन कर्मत्वं, पक्षान्तरे सीतया इति च। दर्शयाञ्चक्रिरे = णिजन्ताद् दृश्धातोर्लिट्। मिमीलतुः = "मील (श्मील क्ष्मील) निमेषणे" इति धातोर्लिट्॥

भाषाऽर्थः—रावणकी आज्ञासे राक्षसोंसे सीतासे रामका दर्शन कराया। राम और लक्ष्मणका बन्धन देखकर सीताजीके नेत्र मुद्रित हो गये और वे पुष्पक विमानके मध्यभागमें गिर पड़ीं॥ ५४॥

प्राणा दध्वंसिरे गात्रं तस्तम्भे च प्रिये हते।
उच्छ्श्वास चिराद् दीना रुरोदासौ ररास च॥ ५५॥

अन्वयः—प्रिये हते प्राणा दध्वंसिरे, गात्रं च तस्तम्भे, चिरात् उच्छ्श्वास; दीना असौ रुरोद ररास च॥

व्याख्या—प्रिये = कान्ते, राम इति भावः, हते = बद्धे इति भावः। प्राणाः = असवः, सीताया इति शेषः। दध्वंसिरे = ध्वस्ताः, गात्रं च = शरीरं च, तस्तम्भे = काष्ठवत् निश्चलमभूत्। चिरात् = बहुकालात्, उच्छ्श्वास = उच्छ्वसितवती, दीना = दुःखिता, असौ = सीता, रुरोद = अश्रूणि मुमोच, ररास च=वक्ष्यमाणं विलापं च चकार॥

व्युत्पत्तिः—दध्वंसिरे = "ध्वंसु अवस्रंसने" इति धातोर्लिट्। तस्तम्भे="ष्टभि (स्कभि) प्रतिबन्धे" इति धातोर्लिट्॥

भाषाऽर्थः—रामचन्द्रजीके बद्ध होने पर सीताजीके प्राण ध्वस्त हुए, शरीर काष्ठ के सदृश निश्चल हुआ। उन्होंने बहुत समयके अनन्तर उच्छ्वास लिया। दीन होकर सीताजी आंसू गिराने लगीं और विलाप भी करने लगीं॥ ५५॥

लौहबन्धैर्बबन्धे नु वज्रेण किं विनिर्ममे।
मनो मे न विना रामाद्यत् पुस्फोट सहस्रधा॥ ५६॥

अन्वयः—"लौहबन्धैः मे मनो बबन्धे नु? किं वज्रेण विनिर्ममे? यत् रामात् विना सहस्रधा न पुस्फोट॥

व्याख्या—लौहबन्धैः = लौहविकारबन्धैः, मे = मम, मनः = हृदयं, बबन्धे नु = बद्धं किं, किं = किं वा, वज्रेण = कुलिशेन, विनिर्ममे = निर्मितम्, यत् = यस्माद्धेतोः, रामात् विना=रामचन्द्रं विना, सहस्रधा=सहस्रेण प्रकारैः, न पुस्फोट= न स्फुटितम्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—लौहबन्धैः = लोहस्येमे लौहाः, "तस्येदम्" इत्यण्, लौहाश्च ते बन्धा लौहबन्धास्तैः । बबन्धे = कर्मणि लिट् । विनिर्ममे = विनिरुपसर्गपूर्वकात् "माङ् मान" इति धातोः कर्मणि लिट् । आतो लोपस्य "द्विर्वचनेऽचि" इति स्थानिवद्भावाद् द्विर्वचने ह्रस्वत्वे च रूपम् । रामात्="विना" पदेन योगे "पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्" इति वैकल्पिकी पञ्चमी । सहस्रधा = "संख्याया विधाऽर्थे धा" इति धाप्रत्ययः ॥

भाषाऽर्थः—"लौहबन्धोंसे मेरा हृदय बद्ध है क्या ? अथवा वज्रसे बना हुआ है, जो कि रामके विना हजारों टुकड़ोंके रूपमें विशीर्ण नहीं हुआ ॥ ५६ ॥

उत्तेरिथ समुद्रं त्वं मदर्थेऽरीन् जिहिंसिथ ।
ममर्थ चाऽतिघोरां मां धिग् जीवितलघूकृताम् ॥ ५७ ॥

अन्वयः—त्वं मदर्थे समुद्रम् उत्तेरिथ, अरीन् जिहिंसिथ ममर्थ च, अतिघोरां जीवितलघूकृतां मां धिक् ॥

व्याख्या—हे कान्त ! त्वं, मदर्थे = मन्निमित्ते, समुद्रं = सागरम्, उत्तेरिथ = उत्तीर्णः, अरीन् = शत्रून् राक्षसान्, जिहिंसिथ=निहतवान् असि, ममर्थ च=मृतश्च, त्वन्मरणेऽपि जीवनेन अतिघोराम् = अतिरौद्रां, जीवितलघूकृतां=जीवनेन गौरवरहितामित्यर्थः, मां = सीतां, धिक् ॥

व्युत्पत्तिः—उत्तेरिथ = उत्पूर्वकात् "तॄ प्लवनसन्तरणयोः" इति धातोर्लिट् "तॄफलभजत्रपश्च" इत्येत्वाऽभ्यासलोपौ । मां = धिग्योगे "धिगुपर्यादिषु त्रिषु ।" इति द्वितीया ॥

भाषाऽर्थः—हे नाथ ! आपने मेरे लिए समुद्रतरण किया, शत्रुओंको मारा और स्वयम् भी पञ्चत्वको प्राप्त हो गये । अतिशय कठोर और जीवनसे गौरवरहित मुझे धिक्कार है ॥ ५७ ॥

न जिजीवासुखी तातः प्राणता रहितस्त्वया ।
मृतेऽपि त्वयि जीवन्त्या किं मयाणकभार्यया ॥ ५८ ॥

अन्वयः—(हे वल्लभ !) प्राणता त्वया रहितः तातः असुखी (सन्) न जिजीव । त्वयि मृतेऽपि जीवन्त्या अणकभार्यया मया किम् ?"

व्याख्या—(हे वल्लभ !) प्राणता=जीवता, सता त्वया=भवता, रहितः=वियुक्तः, तातः = पिता, दशरथ इति भावः । असुखी=दुःखी सन्, न जिजीव=नो जीवितः । त्वयि=भवति, मृतेऽपि=उपरतेऽपि, जीवन्त्या = प्राणान्धारयन्त्या, अणकभार्यया = कुत्सितपत्न्या, मया = सीतया, किं = किं प्रयोजनं, न किमपीति भावः ॥

व्युत्पत्तिः—प्राणता=प्राणितीति प्राणन्, तेन । प्रपूर्वकात् "अन प्राणने" इति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धातोर्लटः शत्रादेशः। जिजीव="जीव प्राणधारणे" इति धातोर्लिट्। अणकभार्यया= अणिका चाऽसौ भार्या अणकभार्या, तया "पापाऽणके कुत्सितैः" इति समासः "कुपूयकुत्सिताऽवद्यखेटगर्ह्याऽणकाः समाः।" इत्यमरः॥

भाषाऽर्थः—हे प्रिय! जीते हुए आपसे वियुक्त होकर पिताजी (दशरथ) ने दुःखी होते हुए प्राणका परित्याग किया। आपके मरनेपर भी प्राणोंको धारण करती हुई कुत्सितपत्नी मुझसे क्या प्रयोजन है?"॥ ५८॥

सा जुगुप्सान् प्रचक्रेऽसून् जगर्हे लक्षणानि च।
देहभाञ्जि ततः केशान् लुलुञ्च लुलुठे मुहुः॥ ५९॥

अन्वयः—सा असून् जुगुप्सान् प्रचक्रे, देहभाञ्जि लक्षणानि च जगर्हे ततः केशान् लुलुञ्च, मुहुः लुलुठे॥

व्याख्या—सा=सीता, असून्=प्राणान्, जुगुप्सान्=निन्दितान्, प्रचक्रे= कृतवती; क्वचित् "जुगुप्साम" इति पाठस्तत्र आत्मानि निन्दामित्यर्थः, एवमेव "असूनि"त्यस्य "जगर्हे" इत्यनेन सम्बन्धः। देहभाञ्जि=शरीराऽऽश्रयाणि, लक्षणानि च=चिह्नानि च, सौभाग्यद्योतकानीति शेषः। जगर्हे=निन्दितवती। ततः= अनन्तरं, केशान्=शिरोरुहान्, लुलुञ्च=उत्पाटितवती। मुहुः=वारं वार, लुलुठे=पतिता॥

व्युत्पत्तिः—जुगुप्सान् = जुगुप्सयन्त इति जुगुप्सास्तान्, घञन्तस्य सनि रूपम्। आमि प्रत्यये तु "प्रचक्र" इत्यनुप्रयोगो न घटते। "जुगुप्साम" इति पाठे तु "गुप गोपने" इति धातोः "गुप्तिज्किद्भ्यः सन्" इति सूत्रेण "गुपादिभ्यः स्वार्थे सन्" इति वार्तिकमनुसृत्य निन्दायां सन्, सदन्तात् "अप्रत्ययात्" इति अप्रत्ययः, तदन्तात्टाप्। "उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे।" इत्यमरः। देहभाञ्जि= देहं भजन्तीति देहभाञ्जि, तानि "भजो ण्विः" इति ण्विप्रत्ययः। जगर्हे="गर्ह (गल्ह) कुत्सायाम्" इति धातोर्लिट्। लुलुञ्च="लुञ्च अपनयने" इति धातोर्लिट्।

भाषाऽर्थः—सीताजीने अपने प्राणोंकी निन्दाकी, शरीरस्थित सौभाग्यद्योतक लक्षणोंकी भी निन्दाकी, अनन्तर केशोंका उत्पाटन किया और वे वारंवार भूतलमें गिर पड़ीं॥ ५९॥

जग्लौ दध्यौ त्रितस्तान् क्षणं प्राणं न विव्यथे।
दैव निनिन्द चक्रन्द देहे चाऽतीव मन्युना॥ ६०॥

अन्वयः—(सा) जग्लौ, दध्यौ वितस्तान, क्षणं न प्राणं, विव्यथे, दैवं निनिन्द, चक्रन्द मन्युना अतीव देहे च॥

व्याख्या—(सा=सीता) जग्लौ = ग्लानिं गता, दध्यौ = चिन्तयामास,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनः किं मया द्रष्टव्योऽसीति शेषः । वितस्तान=शब्दं कृतवती । क्षणं=किञ्चित्कालं यावत्, न प्राण=न जिजीव, मूर्च्छयेति भावः । विव्यथे=पीडिता, लब्धसंज्ञा सतीति शेषः । दैवं=भाग्यं, निनिन्द=निन्दितवती, चक्रन्द=रुदिता, मन्युना= शोकेन, अतीव=अत्यर्थं, देहे च=दग्धा च ॥

व्युत्पत्तिः—जग्लौ="ग्लै (ग्लै) हर्षक्षये" इति धातोर्लिट् । दध्यौ="ध्यै चिन्तायाम्" इति धातोर्लिट् । वितस्तान=विपूर्वकात् "स्तन (गदी) देवशब्दे" इति धातोर्लिट् । प्राण=प्रपूर्वकात् "अन प्राणन" इति धातोर्लिट्, "अत आदेः" इति दीर्घत्वम् । विव्यथे="व्यथ भयसंचलनयोः" इति धातोर्लिट् । "व्यथो लिटि" इत्यभ्यासस्य संप्रसारणम् । देहे="दह भस्मीकरणे" इति धातोः कर्मणि लिट् ॥

भाषाऽर्थ—सीताजी ग्लानिको प्राप्त हुईं, चिन्ता करने लगीं, शब्द करने लगीं, कुछ समय तक मूर्च्छित हुईं, होश में आकर पीडित हुईं, भाग्यकी निन्दा करने लगीं, रोने लगीं और शोकसे अतिशय जलीं ॥ ६० ॥

आश्वासयाञ्चकाराऽथ त्रिजटा तां निनाय च ।
ततः प्रजागराञ्चक्रुर्वानराः सविभीषणाः ॥ ६१ ॥

अन्वयः—अथ त्रिजटा ताम् आश्वासयाञ्चकार, निनाय च, ततः सविभीषणा वानराः प्रजागराञ्चक्रुः ॥

व्याख्या—अथ = सीतासन्तपनाऽनन्तरं, त्रिजटा=रावणभगिनी, तां सीताम्, आश्वासयाञ्चकार = आश्वासितवती, विष्णुरसौ राघवः कथं गतचेतनो भविष्यतीति शेषः । निनाय च = नीतवती च, पुष्पकादिति शेषः । ततः=अनन्तरं, सविभीषणाः= विभीषणसहिताः, वानराः=कपयः, प्रजागराञ्चक्रुः=आलोचनां कृतवन्तः, राम-लक्ष्मणयो रक्षणाऽर्थं जागरितवन्त इति वा ॥

व्युत्पत्तिः—आश्वासयाञ्चकार = णिजन्तात् आङ्पूर्वकश्वसधातोर्लिटि रूपम् । प्रजागराञ्चक्रुः = प्रपूर्वकात् "जागृ निद्राक्षये" इति धातोर्लिट् । अत्राऽनुप्रयोगे नाऽऽत्मनेपदं पूर्वस्याऽनात्मनेपदित्वात् ॥

भाषाऽर्थः—सीताजी के सन्ताप करने के अनन्तर त्रिजटा नामकी रावणकी भगिनीने सीताजीको आश्वासन दिया वह पुष्पकविमानसे उन्हें भी ले गई । उसके बाद विभीषणके साथ वानरों ने आलोचना की ॥ ६१ ॥

चिचेत रामस्तत् कृच्छ्रमोषाञ्चक्रे शुचाथ सः ।
मन्युश्चास्य समापिप्ये विरुराव च लक्ष्मणम् ॥ ६२ ॥

अन्वयः—रामः तत् कृच्छ्रं चिचेत । अथ स शुचा ओषाञ्चक्रे । अस्य मन्युश्च समापिप्ये, लक्ष्मणं च विरुराव ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—रामः = रामचन्द्रः, तत् = पूर्ववृत्तं, कृच्छ्रं = कष्टं, सर्पशरबन्धदुःखमिति भावः चिचेत = ज्ञातवान् । अथ = ज्ञानाऽनन्तरं, शोकेन, ओषाञ्चक्रे = दग्धः । अस्य = रामस्य, मन्युश्च = शोकश्च, समापिप्ये = संवृद्धिं गतः, लक्ष्मणं च = स्वाऽनुजं च, विरुराव = शब्दितवान्, वत्स ! जीवसीति शेषः ॥

व्युत्पत्तिः—कृच्छ्रं = "स्यात्कष्टं कृच्छ्रमाभीलम्" इत्यमरः । चिचेत = "चिती संज्ञाने" इति धातोर्लिट् । ओषाञ्चक्रे="उष दाहे" इति धातोः कर्मणि लिट् । "उषविदजागृभ्योऽन्यतरस्याम्" इत्याम् । समापिप्ये = समापूर्वकात् "(स्फायी) ओंप्यायी वृद्धौ" इति धातोर्लिटि "प्यायः पी"ति पीभावः । "एरनेकाचोऽसंयोगपूर्वस्य" इति यण् ।

भाषाऽर्थः—रामचन्द्रजीने (होशमें आकर) उस कष्ट का अनुभव किया । तब वे शोक से दग्ध हुए । उनका शोक संवृद्धिको प्राप्त हुआ । उन्होंने लक्ष्मणको बुलाया ॥ ६२ ॥

समीहे मर्तुमानर्चे तेन वाचाखिलं बलम् ।
आपपृच्छे च सुग्रीवं स्वं देशं विससर्ज च ॥ ६३ ॥

अन्वयः—(सः) मर्तुं समीहे । तेन वाचा अखिलं बलम् आनर्चे । सुग्रीवम् आपपृच्छे, स्वं देशं च विससर्ज ॥

व्याख्या—(सः = रामः) मर्तुं = प्राणांस्त्यक्तुं, समीहे = समीहितवान् । तेन = रामेण, वाचा = वाण्या, अखिलं = सम्पूर्णं, बलं = सैन्यम्, आनर्चे = पूजितं, "भवद्भिः स्वकार्यं साधु निर्व्यूढं, मद्भाग्यमेवाऽपराध्यती"ति शेषोर्थः । सुग्रीवं = कपिराजं स्वमित्रम्, आपपृच्छे = आमन्त्रितवानित्यर्थः, 'दर्शनं देही'ति शेषः । स्वं = आत्मीयं, देशं च = विषयं च, किष्किन्धारूपमिति भावः । विससर्ज = प्रहितवान् । सर्वतोभावेन रामो नैराश्यमनुभूतवानिति भावः ॥

व्युत्पत्तिः—आनर्चे = "अर्च पूजायाम्" इति धातोः कर्मणि लिट् । "तस्मान्नुड् द्विहलः" इति नुट् । आपपृच्छे=आङ्पूर्वकात् "प्रच्छ ज्ञीप्सायाम्" इति धातोर्लिट् । "आङि नुप्रच्छ्योः" इत्यात्मनेपदम् ॥

भाषाऽर्थः—रामने प्राणत्याग करनेकी इच्छा की । उन्होंने वचनसे सब सेनाका सत्कार किया । सुग्रीवको बुलाया और उन्हें अपने देश (किष्किन्धा) में जाने की आज्ञा दी ॥ ६३ ॥

आदिदेश स किष्किन्धां राघवो नेतुमङ्गदम् ।
प्रतिजज्ञे स्वयं चैव सुग्रीवो रक्षसां वधम् ॥ ६४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—स राघवौ किष्किन्धां नेतुम् अङ्गदम् आदिदेश । सुग्रीवः स्वयम् एव रक्षसां वधे प्रतिजज्ञे च ॥

व्याख्या—सः—सुग्रीवः राघवौ=रामलक्ष्मणौ, किष्किन्धां=स्वनगरीं, नेतुं=प्रापयितुम्, अङ्गदं=वालिसूनुम्, आदिदेश=आदिष्टवान्। सुग्रीवः=कपिराजः, स्वयमेव=आत्मनैव, रक्षसां=राक्षसानां, वधं=विनाशं, प्रतिजज्ञे च=प्रतिज्ञातवांश्च, अहमेव राक्षसान्व्यापादयिष्यामीति भावः ॥

व्युत्पत्तिः—राघवौ=मुख्यकर्मैतत्पदम् । किष्किन्धां=गौणकर्मैतत्पदम् । आदिदेश=आङ्पूर्वकात् "दिश अतिसर्जने" इति धातोर्लिट् । उपसर्गवशाद्धातोरर्थान्तरत्वम् । प्रतिजज्ञे=प्रतिपूर्वकात् "ज्ञा अवबोधने" इति धातोर्लिट् । "सम्प्रतिभ्यामनाध्याने" इत्यात्मनेपदम्, सकर्मकाऽर्थं वचनम् ॥

भाषाऽर्थः—उन्होंने (सुग्रीवने) राम और लक्ष्मणको किष्किन्धामें पहुँचानेके लिए अङ्गदको आज्ञा दी । सुग्रीवने स्वयम् ही राक्षसोंको मारनेकी प्रतिज्ञा भी की ॥

नागाऽस्त्रमिदमेतस्य विपक्षस्तार्क्ष्यसंस्मृतिः ।
विभीषणादिति श्रुत्वा तं निदध्यौ रघूत्तमः ॥ ६५ ॥

अन्वयः—"इदं नागाऽस्त्रम् । एतस्य विपक्षः तार्क्ष्यसंस्मृतिः ।" विभीषणात् इति श्रुत्वा रघूत्तमः तं निदध्यौ ॥

व्याख्या—इदं=मेघनादप्रयुक्तं, नागाऽस्त्रं=सर्पाऽस्त्रं, न शरा इति भावः । एतस्य=नागाऽस्त्रस्य, विपक्षः=शत्रुः, तार्क्ष्यसंस्मृतिः=गरुडसंस्मरणं, यत्संस्मरणादेवाऽस्य शान्तिरिति भावः ! विभीषणात्=रावणाऽनुजतः, इति=एवं श्रुत्वा=आकर्ण्य, रघूत्तमः=रामः, तं=तार्क्ष्यं, निदध्यौ=ध्यातवान् ॥

व्युत्पत्तिः—तार्क्ष्यसंस्मृतिः=तार्क्ष्यस्य संस्मृतिः, "गरुत्माग्गरुडस्तार्क्ष्यो वैनतेयः खगेश्वरः ।" इत्यमरः । विभीषणात्="आख्यातोपयोगे" इति अपादानत्वम् । रघूत्तमः=रघुषु (लक्षणया—रघुवंश्येषु राजसु) उत्तमः । निदध्यौ=निपूर्वकात् "ध्यै चिन्तायाम्" इति धातोर्लिट् । "आदेच उपदेशेऽशिति" इत्यात्वम् । "आत औ णल" इति णल औकारादेशः ॥

भाषाऽर्थः—"यह नागाऽस्त्र है । इसका प्रतीकार गरुडजीकी संस्मृति है ।" विभीषणजीसे ऐसा सुनकर रामचन्द्रजीने उन (गरुड) की याद की ॥ ६५ ॥

ततो विजघटे शैलैरुद्वेलं पुप्लुवेऽम्बुधिः ।
वृक्षेभ्यश्चुच्युते पुष्पैर्विरेजुर्भासुरा दिशः ॥ ६६ ॥

अन्वयः—ततः शैलैः विजघटे । अम्बुधिः उद्वेलं पुप्लुवे । वृक्षेभ्यः पुष्पैः चुच्युते । दिशो भासुराः (सत्यः) विरेजुः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—ततः = रामकर्तृकताद‍र्यध्यानाऽनन्तरं, शैलैः = पर्वतैः, विजघटे = विघटितम् । अम्बुधिः = समुद्रः, उद्वेलं = वेलामतिक्रम्येति भावः । पुप्लुवे = गतः । वृक्षेभ्यः = तरुभ्यः, पुष्पैः = कुसुमैः, चुच्युते = च्युतम् । दिशः = आशाः, भासुराः = प्रभासनशीलाः सत्यः गरुडागमनात्सुपर्णपत्त्रप्रभाभिरिति शेषः । विरेजुः = शुशुभिरे ॥

व्युत्पत्तिः—विजघटे = "घट सङ्घाते" इति धातोर्भावे लिट् । उद्वेलम् = उत्क्रान्ता वेला यस्मिन्कर्मणि तद्यथा तथेति क्रियाविशेषणम् । विरेजुः = "राजृ दीप्तौ" इति धातोर्लिट् । "फणां च सप्तानाम्" इत्येत्वाऽभ्यासलोपौ ॥

भाषाऽर्थः—तब पर्वत विघटित हुए । समुद्र वेलाका अतिक्रमण कर चलने लगा । वृक्षों से फूल गिर पड़े । दिशायें प्रकाशशील होती हुई शोभित हो गईं ॥

जगाहिरेऽम्बुधिं नागा ववौ वायुर्मनोरमः ।
तेजांसि शंशमाञ्चक्रुः शरबन्धा विशिश्लिषुः ॥ ६७ ॥

अन्वयः—नागा अम्बुधिं जगाहिरे । मनोरमो वायुः ववौ । तेजांसि शंशमाञ्चक्रुः । शरबन्धा विशिश्लिषुः ।

व्याख्या—नागाः = काद्रवेयाः, अम्बुधिं = समुद्रं, जगाहिरे = प्रविष्टाः, गरुडभयादिति शेषः । मनोरमः = चेतोहरः, वायुः = वातः, ववौ = वाति स्म । तेजांसि = अर्चींषि, रत्नादीनामिति शेषः । शंशमाञ्चक्रुः = अत्यर्थं प्रशान्तानि । शरबन्धाः = बाणबन्धाः, विशिश्लिषुः = विश्लिष्टाः, दूरत एव गरुडप्रभावादिति शेषः ॥

व्युत्पत्तिः—नागाः = "नागाः काद्रवेयाः" इत्यमरः । ववौ = "वा गतिगन्धनयोः" इति धातोर्लिट् । शंशमाञ्चक्रुः = यङ्लुगन्तात् "शमु उपशमे" इति धातोर्लिट् । एवं चाऽनुप्रयोगे परस्मैपदम् ।

भाषाऽर्थः—नागोंने गरुडके भयसे समुद्रमें प्रवेश किया । चित्तको आनन्दित करनेवाला वायु बहने लगा । रत्नादियोंके तेज अतिशय शान्त हुए । बाण–बन्ध विश्लिष्ट हुए ॥ ६७ ॥

भ्रेजिरेऽक्षतवद्योधा लेभे संज्ञां च लक्ष्मणः ।
विभीषणोऽपि बभ्राजे गरुत्मान् प्राप चान्तिकम् ॥ ६८ ॥

अन्वयः—योधा अक्षतवत् भ्रेजिरे । लक्ष्मणश्च संज्ञां लेभे । विभीषणोऽपि बभ्राजे । गरुत्मान् च अन्तिकं प्राप ॥

व्याख्या—योधाः = भटाः, अक्षतवत् = बाणवेधरहिता इव, भ्रेजिरे = अशोभन्त । लक्ष्मणश्च = रामाऽनुजश्च, संज्ञां = चेतनां, लेभे = प्राप्तवान् । विभीषणोऽपि रावणाऽनुजोऽपि, बभ्राजे = दिदीपे, संपन्ना मे मनोरथा इति । गरुत्मांश्च = गरुडश्च, अन्तिकं = समीपं, रामलक्ष्मणयोरिति शेषः । प्राप = प्राप्तवान् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—अक्षतवत् = अक्षतैस्तुल्यं, "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययः । भेजिरे = "भ्राजृ दीप्तौ" इति धातोर्लिट् "फणां च सप्तानाम्" इत्येत्वाऽभ्यासलोपौ । संज्ञां = "संज्ञा स्याच्चेतना नाम हस्ताद्यैश्चाऽर्थसूचना ।" इत्यमरः । बभ्राजे=भ्राजृधातोरेत्वाऽभ्यासलोपाऽभावपक्षे रूपम् । गरुत्मान्=प्रशस्तौ गरुतौ स्तःऽस्येति, "तदस्यास्त्यस्मिन्निति मतुप्" यवादित्वात् "झय" इति वत्वं न ॥

भाषाऽर्थः—योद्धालोग अक्षतके सदृश शोभित हुए। लक्ष्मणने भी चैतन्य पाया। विभीषण भी शोभित हो गये। गरुडजी भी राम और लक्ष्मणके समीपमें प्राप्त हुए ॥ ६८ ॥

संपस्पर्शाथ काकुत्स्थौ जज्ञाते तौ गतव्यथौ ।
तयोरात्मानमाचख्यौ ययौ चाथ यथागतम् ॥ ६९ ॥

अन्वयः—अथ (गरुत्मान्) काकुत्स्थौ संपस्पर्श । तौ गतव्यथौ जज्ञाते । (गरुत्मान्) तयोः आत्मानम् आचख्यौ; अथ यथागतं ययौ ॥

व्याख्या—अथ = गरुत्मदागमनानन्तरं, काकुत्स्थौ = राघवौ, संपस्पर्श = संस्पृष्टवान्, गरुत्मानिति शेषः । तौ = काकुत्स्थौ, गतव्यथौ = पीडारहितौ, जज्ञाते = जातौ । तयोः = काकुत्स्थयोः, आत्मानं = स्वम्, आचख्यौ = आख्यातवान्, गरुत्मानहमिति गरुत्मानिति शेषः । अथ = आत्मपरिचयप्रदानाऽनन्तरं, यथाऽऽगतम् = यथा तेनाऽऽगतं तथा, ययौ = जगाम ॥

व्युत्पत्तिः—गतव्यथौ = गता व्यथा ययोस्तौ । आचख्यौ = आङ्पूर्वकात् "चक्षिङ् व्यक्तायां वाचि" इति धातोर्लिट् । "वा लिटि" इति चक्षिङः ख्याञ् । तदभावपक्षे "चचक्षे" इति रूपम् । यथाऽऽगतम् = आगतमनतिक्रम्येति पदाऽर्थोऽनतिवृत्तौ अव्ययीभावः ॥

भाषाऽर्थः—आनेके अनन्तर गरुड़जीने राम और लक्ष्मणको स्पर्श किया। वे दोनों पीडारहित हो गये। गरुड़जीने उन दोनोंको अपना परिचय दिया। तदनन्तर जैसे आये थे वैसे चले गये ॥ ६९ ॥

स्वेनुस्तित्विपुरुद्येमुरुच्चख्नुः पर्वतांस्तरून् ।
ददृमुश्चाऽथ संग्रामं चाशशासिरे ॥ ७० ॥

अन्वयः—अथ वानराः स्वेनुः, तित्विषुः, उद्येमुः, पर्वतान् तरूंश्च उच्चख्नुः, दद्रमुः, संग्रामं च आशशासिरे ॥

व्याख्या—अथ = गुरुत्मद्गमनाऽनन्तर, वानराः = कपयः, स्वेनुः = शब्दं चक्रुः, तित्विषुः = शोभिताः, उद्येमुः = उद्योगं चक्रुः, पर्वतान् = शैलान्, तरूंश्च =

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृक्षांश्च, उचखनुः = उत्क्षिप्तवन्तः, दद्रमुः = इतस्ततो भ्रान्ताः, संग्रामं च = युद्धं च, आशशासिरे = अभीष्टवन्तः ॥

व्युत्पत्तिः—तित्विषुः="त्विष दीप्तौ" इति धातोर्लिट्। उद्येमुः = उत्पूर्वकात् "यम उपरमे" इति धातोर्लिट्। उच्चख्नुः = उत्पूर्वकात् "खनु अवदारणे" इति धातोर्लिट् "गमहनजनखनघसां लोपः क्ङित्यनङि" इति उपधालोपः। दद्रमुः= "द्रम (हम्म मीमृ) गतौ" इति धातोर्लिट्। आशशासिरे = "आङः शासु इच्छायाम्" इत्यादादिकाद्धातोर्लिट् ॥

भाषाऽर्थः—गरुड़जीके जानेके अनन्तर वानर शब्द करने लगे, शोभित हुए, उद्योग करने लगे, पर्वत और वृक्षोंको उठाने लगे, इधर उधर घूमने लगे और संग्रामकी इच्छा करने लगे ॥ ७० ॥

डुढौकिरे पुनर्लङ्कां बुबुधे तान् दशाननः।
जीवतश्च विवेदारीन् बभ्रंशेऽसौ धृतेस्ततः ॥ ७१ ॥

अन्वयः—(वानराः) पुनः लङ्कां डुढौकिरे। दशाऽऽननः तान् बुबुधे, अरींश्च जीवतो विवेद। ततः असौ धृतेः बभ्रंशे ॥

व्याख्या—पुनः = भूयः, लङ्कां = रावणनगरीं, डुढौकिरे = जग्मुः, वानरा इति शेषः। दशाऽऽननः = रावणः, तान् = लङ्काप्राप्तान्वारान्, बुबुधे = बुद्धवान्, अरींश्च=शत्रूंश्च, रामादीनिति भावः। जीवतः=प्राणान् धारयतः, विवेद=ज्ञातवान्, अन्यथा कथं वानराः समागता इति शेषः। ततः = अरिजीवनवेदनाऽनन्तरम्, असौ = रावणः, धृतेः=धैर्यात् सन्तोषाद्वा सकाशात्, बभ्रंशे = भ्रष्टः ॥

व्युत्पत्तिः—डुढौकिरे = गत्यर्थात् ढौकृधातोर्लिट्। बुबुधे = "बुध अवगमने" इति धातोर्लिट् ॥

भाषाऽर्थः—वानर फिर लङ्काको चले गये। रावणने उन लोगोंको जाना और शत्रुओंको भी जीते हुए जान लिया। तदनन्तर वह धैर्यसे भ्रष्ट हुआ ॥ ७१ ॥

सस्रंसे शरबन्धेन दिव्येनेति बुबुन्द सः।
बभाजाथ परं मोहमूहाञ्चक्रे जयं न च ॥ ७२ ॥

अन्वयः—स दिव्येन शरबन्धेन सस्रंसे इति बुबुन्द, अथ परं मोहं बभाज; जयं च न ऊहाञ्चक्रे ॥

व्याख्या—सः = रावणः, दिव्येन = अलौकिकेन, शरबन्धेन = बाणबन्धेन; नागाऽस्त्रेणेत्यर्थः। सस्रंसे = स्रस्तम्, इति = एवं, बुबुन्द = श्रुतवान्, अथ=अनन्तरं, परं=महान्तं, मोहं=वैचित्त्यं, मूर्च्छाकारमिति भावः। बभाज=सेवितवान्, जयं च=विजयं च, न ऊहाञ्चक्रे=न वितर्कितवान् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—सस्रंसे = "स्रंसु (ध्वंसु भ्रंसु) अवस्रंसने" इति धातोर्लिट् । बुबुन्द = "उबुन्दिर् निशामने" इति धातोर्लिट् । बभाज="भज सेवायाम्" इति धातोर्लिट् । ऊहाञ्चक्रे = "ऊह वितर्के" इति धातोर्लिट् । "इजादेश्च गुरुमतोऽनृच्छः" इत्याम् ॥

भाषाऽर्थः—रावणने "विघ्य शरबन्ध स्रस्त हो गया" ऐसा सुना । तदनन्तर वह अतिशय मोहको प्राप्त हुआ, और उसने जयमालकी आशा छोड़ दी ॥ ७२ ॥

धूम्राक्षोऽथ प्रतिष्ठासाञ्चक्रे रावणसंमतः ।
सिंहास्यैर्युयुजे तस्य वृकास्यैश्च रथः खगैः ॥ ७३ ॥

अन्वयः—अथ धूम्राक्षो रावणसम्मतः (सन्) प्रतिष्ठासाञ्चक्रे । तस्य रथः सिंहाऽऽस्यैः वृकास्यैश्च खगैः युयुजे ॥

व्याख्या—अथ = अनन्तरं, धूम्राक्षः = तन्नामा राक्षसः, रावणसम्मतः = दशाऽऽननाऽनुमतः सन्, प्रतिष्ठासाञ्चक्रे=गन्तुमिच्छां कृतवान् । तस्य = धूम्राक्षस्य, रथः = स्यन्दनः, सिंहाऽऽस्यैः = मृगेन्द्रमुखैः, वृकाऽऽस्यैश्च=ईहामृगमुखैश्च, खगैः = आकाशगामिभिर्यानैः, युयुजे = युक्तः ॥

व्युत्पत्तिः—रावणसम्मतः = रावणेन सम्मतः । प्रतिष्ठासाञ्चक्रे = सन्नन्तात् प्रपूर्वकात् "ष्ठा गतिनिवृत्तौ" इति धातोर्लिट् । "समवप्रविभ्यः स्थ" इत्यात्मनेपदम् । "उपसर्गात्सुनोती"-त्यादिना षत्वम् । सिंहाऽऽस्यैः = सिंहस्येवाऽऽस्यं येषां ते सिंहाऽऽस्यास्तैः । वृकाऽऽस्यैः = वृकस्येवाऽऽस्यं येषां, तैः । युयुजे = कर्मणि लिट् ॥

भाषाऽर्थः—तब धूम्राक्षनामके राक्षसने रावण से आज्ञा पाकर प्रस्थानकी इच्छा की । उसका रथ सिंहके और भेड़िएके जैसे मुखवाले आकाशचारी जन्तुओं से युक्त हुआ ॥ ७३ ॥

त्वक्त्रैः संविव्ययुर्देहान् वाहनान्यधिशिश्रियरे ।
आनर्जुर्नृभुजोऽस्त्राणि ववञ्चुश्चाहवक्षितिम् ॥ ७४ ॥

अन्वयः—नृभुजः त्वक्त्रैः देहान् संविव्ययुः वाहनानि अधिशिश्रियरे, शस्त्राणि आनर्जुः, आहवक्षितिं ववञ्चुश्च ॥

व्याख्या—नृभुजः = नरभक्षकाः, धूम्राक्षसम्बन्धिन इति भावः । त्वक्त्रैः = चर्मरक्षकैः, कवचैरिति भावः, देहान् = शरीराणि, संविव्ययुः = आच्छादितवन्तः, वाहनानि = गजाऽश्वादीनि, अधिशिश्रियरे = आरूढवन्तः, अस्त्राणि = आयुधानि, आनर्जुः = गृहीतवन्तः, आहवक्षितिं च = युद्धभूमिं च ववञ्चुश्च = गताश्च ॥

व्युत्पत्तिः—त्वक्त्रैः=त्वचं त्रायन्त इति त्वक्त्रास्तैः, त्वक्पूर्वकात् "त्रैङ् पालने"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति धातोः "आतोऽनुपसर्गे कः" इति कप्रत्ययः। संविव्ययुः = संपूर्वकात् "व्येञ् संवरणे" इति धातोर्लिट्। "न व्यो लिटि" इत्यात्वप्रतिषेधः। "लिट्यभ्यासस्योभयेषाम्" इति सम्प्रसारणम्. वाहनानि - अधिपूर्वक "शीङ् स्वप्ने" इति धातुना योगे 'अधिशीङ्स्थाऽऽसां कर्म' इति कर्मसंज्ञा, ततो द्वितीया। आनर्जुः = "अर्ज प्रतियत्ने" इति धातोर्लिट्। "अत आदेः" इति दीर्घत्वं "तस्मान्नुड् द्विहलः" इति नुट्। क्वचित् "आनर्चुः" इति पाठान्तरं, तस्य पूजितवन्त इत्यर्थः। ववञ्चुः="वञ्चु गतौ" इति धातोर्लिट्॥

भाषाऽर्थः—धूम्राक्षके अनुयायी राक्षसोंने कवचोंसे शरीरोंको आच्छादित किया, घोड़े हाथी आदि वाहनोंपर आरोहण किया, अस्त्रोंको लिया और रणभूमिमें यात्रा भी की॥ ७४॥

अध्युवास रथं तेये पुराच्चुक्षाव चाशुभम्।
संश्रावयाञ्चकाराख्यां धूम्राक्षस्तत्वरे तथा॥ ७५॥

अन्वयः—धूम्राक्षः रथम् 'अध्युवास, पुरात् तेये, अशुभं च चुक्षाव, आख्यां संश्रावयाञ्चकार, तथा तत्वरे॥

व्याख्या—धूम्राक्षः = रावणाऽनुचरो राक्षसः, रथं = स्यन्दनम्, अध्युवास = आरूढः, पुरात् = लङ्कायाः, तेये = निष्क्रान्तः, अशुभम् = अकल्याणं यथा तथा चुक्षाव = क्षुतशब्दं चकार, आख्यां=नाम, स्वकीयामिति शेषः। संश्रावयाञ्चकार = संश्रावितवान्, तथा = तेन प्रकारेण, तत्वरे = त्वरां चकार, युद्धायेति शेषः॥

व्युत्पत्तिः—रथम् = अधिपूर्वकस्य "वस निवासे" इति धातोर्योगे "उपान्वध्याङ्वसः" इति कर्मत्वम्। तेये = "(अय वय पय लय चय) तय (णय) गतौ" इति धातोर्लिट्। चुक्षाव = "टुक्षु शब्दे" इति धातोर्लिट्। आख्याम्="आख्याऽऽह्वे अभिधानं च नामधेयं च नाम च।" इत्यमरः। तत्वरे="ञित्वरा संभ्रमे" इति धातोर्लिट्॥

भाषाऽर्थः—धूम्राक्षने रथमें आरोहण किया, लङ्कासे प्रस्थान किया, अशुभ रूपसे छिक्का की, अपना नाम सुनाया और इस प्रकारसे युद्धके लिए जल्दीबाजी की

निलिल्ये मूर्ध्नि गृध्रोऽस्य क्रूरा ध्वाङ्क्षा ववाशिरे।
शिशीके शोणितं व्योम चचाल क्ष्मातलं तथा॥ ७६॥

अन्वयः—अस्य मूर्ध्नि गृध्रो निलिल्ये। क्रूरा ध्वाङ्क्षा ववाशिरे। व्योम शोणितं शिशीके। तथा क्ष्मातलं चचाल॥

व्याख्या—अस्य = धूम्राक्षस्य, गच्छत इति शेषः। मूर्ध्नि = शिरसि, गृध्रः = दाक्षाय्यः, निलिल्ये = विलीनः। क्रूराः = कठोराः, अशुभसूचका इति भावः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ध्वाङ्क्षाः = काकाः, ववाशिरे = वाशितवन्तः । व्योम = आकाशं (कर्तृ) शोणितं = रुधिरं, (कर्म), शिशीके = क्षरितवत्, तथा = तेनैव प्रकारेण, क्ष्मातलं = भूतलं, चचाल = चलितम्, उत्पातसूचको भूकम्पोऽपि जात इति भावः ॥

व्युत्पत्तिः—निलिल्ये = निपूर्वकात् "लीङ् श्लेषणे" इति धातोर्लिट् । "एरनेकाचोऽसंयोगपूर्वस्य" इति यण् । ध्वाङ्क्षाः = "ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि" इत्यमरः । ववाशिरे="वाशृ शब्द" इति धातोर्लिट् । "तिरश्चां वाशितं रुतम् ।" इत्यमरः । शिशीके = "शीकृ सेचने" इति धातोर्लिट् ॥

भाषाऽर्थः—धूम्राक्षके शिरके समीप गृध्र निलीन हुआ । अशुभसूचक कौवे शब्द करने लगे । आकाशने रुधिरक्षरण किया । उसी तरहसे भूतल कम्पित हुआ ॥

ततः प्रजघटे युद्धं शस्त्राण्यासुः परस्परम् ।
वव्रश्चुराजुघूर्णुश्च स्येमुश्चुकूर्दिरे तथा ॥ ७७ ॥

अन्वयः—ततो युद्धं प्रजघटे । (हरिराक्षसाः) परस्परं शस्त्राणि आसुः, वव्रश्चुः, आजुघूर्णुः स्येमुः तथा चुकूर्दिरे ।

व्याख्या—ततः = अनन्तरं, युद्धम् = आयोधनं, प्रजघटे = घटितम् । परस्परं = मिथः, शस्त्राणि = आयुधानि, आसुः = क्षिप्तवन्तः हरिराक्षसा इति शेषः एव परत्राऽपि । वव्रश्चुः = छिन्नवन्तः, आजुघूर्णुः = भ्रान्ताः, चक्रवदिति शेषः । स्येमुः = शब्दं कृतवन्तः । तथा = तेन प्रकारेण, चुकूर्दिरे = क्रीडितवन्तः ॥

व्युत्पत्तिः—आसुः = "असु क्षेपणे" इति धातोर्लिट् । "अत आदेः" इति दीर्घः द्विहल्त्वाऽभावान्नुडभावः । वव्रश्चुः = "ओव्रश्चू छेदने" धातोर्लिट् । स्येमुः = "स्यम स्वनध्वन शब्दे" इति धातोर्लिट् "फणां च सप्तानाम्" इत्येत्वाऽभ्यासलोपौ । चुकूर्दिरे = "कुर्द (खुर्द गुर्द गुद) क्रीडायामेव" इति धातोर्लिट् ॥

भाषाऽर्थः—तब युद्ध हुआ । वानर और राक्षस परस्पर अस्त्र फेंकने लगे चक्रके सदृश घूमने लगे, शब्द करने लगे और युद्ध क्रीडा करने लगे ॥ ७७ ॥

रुरुजुर्भ्रेजिरे फेणुर्बहुधा हरिराक्षसाः ।
वीरा न विभयाञ्चक्रुर्भाषयाञ्चक्रिरे परान् ॥ ७८ ॥

अन्वयः—हरिराक्षसाः रुरुजुः भ्रेजिरे बहुधा फेणुः । वीरा न विभयाञ्चक्रुः, परान् भीषयाञ्चक्रिरे ॥

व्याख्या—हरिराक्षसाः = वानरयातुधानाः, रुरुजुः=परस्परं भग्नवन्तः, भ्रेजिरे = शोभिताः, बहुधा = अनेकप्रकारैः, फेणुः = गताः । वीराः=शूराः, न विभयाञ्चक्रुः = नो भीताः, परान् = शत्रून् । भीषयाञ्चक्रिरे = भीषयन्ते स्म, प्रयोजका इति शेषः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—रुरुजुः = "रुजो भङ्गे" इति धातोर्लिट्। बहुधा = "संख्याया विधार्थे धा" इति धाप्रत्ययः। फेणुः="फण गतौ" इति धातोर्लिट् "फणां च सप्तानाम्" इति विभाषया एत्वाऽभ्यासलोपौ। बिभयाञ्चक्रुः="ञिभी भये" इति धातोर्लिट् "भीह्रीभृहुवां श्लुवच्च" इत्याम्। भीधातोः परस्मैपदित्वात् अनुप्रयोगेऽपि परस्मैपदम्। "भियो हेतुभये षुक्" इति षुगागमः॥

भाषाऽर्थः—वानर और राक्षसोंने परस्परोंको परास्त किया। वे शोभित हुए, अनेक प्रकारोंसे चलने लगे, वीर लोग नहीं डरे और शत्रुओंको भीत किया ॥७८॥

रक्तं प्रचुश्चुवुः क्षुण्णाः शिश्वियुर्बाणविक्षताः।
अस्यतां शुशुवुर्बाणान् भुजाः साङ्गुष्ठमुष्टयः ॥ ७९ ॥

अन्वयः—क्षुण्णाः रक्तं प्रचुश्चुवुः शिश्वियुः। बाणान् अस्यतां साऽङ्गुष्ठमुष्टयो भुजाः बाणविक्षताः शुशुवुः॥

व्याख्या—केचित् क्षुण्णाः = खण्डिताः सन्तः, रक्तं = रुधिरं, प्रचुश्चुवुः = प्रक्षरिताः। केचित् शिश्वियुः = शोथयुक्ता बभूवुः। बाणान् = शरान्, अस्यतां = क्षिप्यतां, योधानां, साऽङ्गुष्ठमुष्टयः = अङ्गुष्ठमुष्टिसहिताः, भुजाः = बाहवः, बाणविक्षताः = शरभिन्नाः सन्तः, शुशुवुः = गताः॥

व्युत्पत्तिः—शिश्वियुः = "टुओश्वि गतिवृद्ध्योः" इति धातोर्वृद्धौ लिट्। "विभाषा श्वेः" इति सम्प्रसारणाऽभावपक्षे रूपम्। शुशुवुः = श्विधातोर्गत्यर्थे लिट्, पूर्वसूत्रेण सम्प्रसारणम्॥

भाषाऽर्थः—कुछ लोग खण्डित होते हुए रुधिर गिराने लगे। कुछ लोग शोथयुक्त हो गये। बाणोंको फेकनेवाले योद्धाओंके अङ्गुष्ठ और मुष्टिके साथ बाहु बाणों से भिन्न होकर नष्ट हुए॥ ७९ ॥

रणे चिक्रीड धूम्राक्षस्तं ततर्जाऽनिलात्मजः।
आददे च शिलां सोऽश्वं पिपेषाऽस्य रथं तया ॥ ८० ॥

अन्वयः—धूम्राक्षो रणे चिक्रीड। अनिलाऽऽत्मजः तं ततर्ज, शिलाम् आददे, तया साऽश्वम् अस्य रथं पिपेष॥

व्याख्या—धूम्राक्षः = तन्नामा राक्षसः, रणे = युद्धे, चिक्रीड = क्रीडितवान्। अनिलाऽऽत्मजः = वायुपुत्रः, हनुमानित्यर्थः। तं = धूम्राक्षं, ततर्ज = भर्त्सितवान्, शिलां = प्रस्तरम्, आददे = गृहीतवान्, तया = शिलया, साऽश्वं = हयसहितम्, अस्य = धूम्राक्षस्य, रथं = स्यन्दनं, पिपेष = चूर्णितवान्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—ततर्ज = "तर्ज भर्त्सने" इति धातोर्लिट् । पिपेष = "पिष्लृ संचूर्णने" इति धातोर्लिट् ॥

भाषाऽर्थः—धूम्राक्ष युद्धमें क्रीडा करने लगा । वायुपुत्र हनूमान्‌जी ने उसका भर्त्सन किया और पत्थर ले लिया और उस पत्थरसे घोड़ोंके साथ उसके रथको पीस डाला ॥ ८० ॥

पपात राक्षसो भूमौ, ররাট च भयंकरम् ।
तुतोद गदया चाऽरिं तं दुध्रावाद्रिणा कपिः ॥ ८१ ॥

अन्वयः—राक्षसो भूमौ पपात, भयङ्करं रराट च, गदया अरिं तुतोद । कपिः अद्रिणा तं दुध्राव ॥

व्याख्या—राक्षसः = यातुधानः, धूम्राक्ष इति भावः । भूमौ = पृथिव्यां, पपात = पतितः, भयङ्करं=भीषणं यथा तथा, रराट, च = शब्दं च कृतवान् । गदया = शस्त्रविशेषेण, अरिं=शत्रुं, हनूमन्तमित्यर्थः । तुतोद=आहतवान् । कपिः = हनूमान्, अद्रिणा = पर्वतेन, तं = धूम्राक्षं, दुध्राव = स्थिरं चकार, व्यापादितवानिति भावः ॥

व्युत्पत्तिः—रराट = "रट परिभाषणे" इति धातोर्लिट् । दुध्राव = "ध्रु स्थैर्ये" इति धातोर्लिट् ॥

भाषाऽर्थः—राक्षस धूम्राक्ष जमीनपर गिर पड़ा, और भयंकर शब्दकर उसने गदासे हनूमान्‌जी आहत किया । हनूमान्‌जीने पर्वतसे उसे मार डाला ॥ ८१ ॥

अकम्पनस्ततो योद्धुं चकमे रावणाऽज्ञया ।
स रथेनाभिदुद्राव जुघुरे चातिभैरवम् ॥ ८२ ॥

अन्वयः—ततो रावणाऽऽज्ञया अकम्पनो योद्धुं चकमे । स रथेन अभिदुद्राव, अतिभैरवं जुघुरे च ॥

व्याख्या—ततः धूम्राक्षवधाऽनन्तरं, रावणाऽऽज्ञया = रावणादेशेन, अकम्पनः = तन्नामा राक्षसः, योद्धुं = युद्धं कर्तुं, चकमे = इष्टवान् । सः = अकम्पनः, रथेन = स्यन्दनेन, अभिदुद्राव=अभिमुखं गतः, अतिभैरवम्=अतिभयानकं, जुघुरे च = शब्दं कृतवांश्च ॥

व्युत्पत्तिः—चकमे = "कमु कान्तौ" इति धातोर्लिट् । "आयादय आर्धधातुके वा" इति णिङभावपक्षे रूपम् । जुघुरे = "घुर भीमाऽर्थशब्दयोः" इति धातोर्लिट् ॥

भाषाऽर्थः—धूम्राक्षके विनाशके अनन्तर रावणकी आज्ञासे अकम्पन नामके राक्षसने लड़नेके लिए इच्छा की । वह रथमें चढ़कर सम्मुख आकर अतिशय भयङ्कर शब्द करने लगा ॥ ८२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पस्पन्दे तस्य वामाऽक्षि सस्यमुश्चाऽशिवाः खगाः ।
तान् वव्राजावमत्यासौ बभासे च रणे शरैः ॥ ८३ ॥

अन्वयः—तस्य वामाऽक्षि पस्पन्दे, अशिवाः खगाः सस्यमुश्च । असौ तान् अवमत्य वव्राज, रणे शरैः बभासे च ॥

व्याख्या—तस्य = अकम्पनस्य, वामाऽक्षि = सव्यलोचनं, पस्पन्दे = स्पन्दितम्, अशिवाः = अशुभसूचकाः, खगाः = पक्षिणः, उलूकादय इति भावः । सस्यमुश्च = शब्दं कृतवन्तश्च । असौ = अकम्पनः, तान् = खगान्, अवमत्य = अवज्ञाय, वव्राज = गतः । रणे = सङ्ग्रामे, शरैः = बाणैः, बभासे च = शोभित च ॥

व्युत्पत्तिः—पस्पन्दे = "स्पदि किञ्चिच्चलने" इति धातोर्लिट्, "शर्पूर्वाः खयः" इति सलोपः । सस्यमुः = स्यमुधातोः "फणां च सप्तानाम्" इति वैकल्पिकैत्वाऽभ्यासलोपाभावे रूपम् ॥

भाषाऽर्थः—अकम्पन की बाईं आँख फड़कने लगी। अशुभसूचक पक्षी भी शब्द करने लगे। वह उनकी परवाह न कर चला, और युद्धमें बाण शोभित हुए ॥

खमूयुर्वसुधामूवुः सायका रज्जुवत् तताः ।
तस्माद् बलैरपत्रेपे पुप्रोथाऽस्मै न कश्चन ॥ ८४ ॥

अन्वयः—(तेन) रज्जुवत् तताः सायकाः खम् ऊयुः, वसुधाम् ऊवुः । तस्मात् बलैः अपत्रेपे । अस्मै कश्चन न पुप्रोथ ॥

व्याख्या—रज्जुवत्—रश्मिवत्, तताः = विस्तृताः, सायकाः = बाणाः, तेनेति शेषः । खम् = आकाशम्, ऊयुः = आवृतवन्तः, वसुधां = भूमिम्, ऊवुः = आच्छादितवन्तः । तस्मात् = अकम्पनात्, अकम्पनं वीक्ष्येति भावः । बलैः = कपिसैन्यैः, अपत्रेपे = लज्जितम् । अस्मै = अकम्पनाय, कश्चन = कोऽपि वानरवीरः न पुप्रोथ = न प्रबभूव ॥

व्युत्पत्तिः—रज्जुवत् = रज्जुभिस्तुल्य, "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययः । सायकाः = "शरे खड्गे च सायकः" इत्यमरः । खम् = आकाशम्, ऊयुः = "वञ् तन्तुसन्ताने" इति धातोर्लिट् । "वेञो वयिः" इति वयिरादेशः । "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च" इति यकारस्य सम्प्रसारणे प्राप्ते "लिटि वयो यः" इति निषेधेन वस्य सम्प्रसारणम् । ऊवुः = "वश्चास्यान्यतरस्यां किति" इति यकारस्य वकारादेशः । तस्मात् = "ल्यब्लोपे कर्मण्यधिकरणे च" इति पञ्चमी । अपत्रेपे = अपपूर्वकात् "त्रपूष् लज्जायाम्" इति धातोर्भावे लिट् । "तॄफलभजत्रपश्च" इत्येत्वाऽभ्यासलोपौ । "लज्जा साऽपत्रपाऽन्यतः" इत्यमरः । अस्मै = "नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च" इत्यत्र अलंशब्दस्य पर्याप्त्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

र्थग्रहणात् प्रोथृधातोर्योगे चतुर्थी । पुप्रोथ="प्रोथृ पर्याप्तौ" इति स्वरितेतो धातोर्लिट् । कर्तुः क्रियाफलाऽयोगान्नात्मनेपदम् ॥

भाषाऽर्थः—अकम्पनसे रस्सीके सदृश फैलाये गये बाणोंने आकाश और पृथ्वीको आच्छादित किया । उसको देखकर वानर सेना लज्जित हुई । उससे लड़ने के लिए कोई भी समर्थ नहीं हुआ ॥ ८४ ॥

स भस्मसाच्चकाराऽरीन् दुदाव च कृतान्तवत् ।
चुक्रोध मारुतिस्तालमुच्चखने च महाशिखम् ॥ ८५ ॥

अन्वयः—सः अरीन् भस्मसात् चकार कृतान्तवत् दुदाव च । मारुतिः चुक्रोध, महाशिखं तालम् उच्चखने च ॥

व्याख्या—सः = अकम्पनः, अरीन् = शत्रून्, भस्मसात् चकार = कात्स्न्येन भस्मभूतान् कृतवान् ; कृताऽन्तवत = यमवत्, दुदाव च = पीडितवांश्च । मारुतिः = हनूमान्, चुक्रोध = क्रुद्धः, महाशिखम् = अतिदीर्घं, तालं = तृणराजवृक्षम् उच्चखने च = उत्खातवांश्च ॥

व्युत्पत्तिः—भस्मसात् = "विभाषा साति कात्स्न्यें" इति सातिप्रत्ययः कृताऽन्तवत् = वतिप्रत्ययः । दुदाव = "दुदु उपतापे" इति धातोर्लिट् । महाशिखं= महती शिखा यस्य स महाशिखस्तम् । तालं = "तृणराजाह्वयस्ताल" इत्यमरः । उच्चखने = उत्पूर्वकात् "खनु अवदारणे" इति धातोर्लिट् । कर्तुः क्रियाफलयोगादात्मनेपदम् ॥

भाषाऽर्थः—अकम्पनने शत्रुओंको पर्याप्तरूपसे भस्मभूत कर दिया और यमराजके सदृश ही पीडित भी कर दिया । तब हनूमान्‌जीने क्रुद्ध होकर अतिशय उन्नत तालवृक्षको उठाया भी ॥ ८५ ॥

यमायाऽकम्पनं तेन निरुवाप महापशुम् ।
बभ्रज्ज निहते तस्मिन् शोको रावणमग्निवत् ॥ ८६ ॥

अन्वयः—(सः) तेन अकम्पनं महापशुम् (इवं) यमाय निरुवाप । तस्मिन् निहते शोकः अग्निवत् रावणं बभ्रज्ज ॥

व्याख्या—तेन = तालेन, अकम्पनं = तदाख्यं राक्षसं, महापशुं = यज्ञियं बृहज्जन्तुमिव, यमाय=कृतान्ताय, निरुवाप=दत्तवान् , मारुतिरिति शेषः । तस्मिन्= अकम्पने, निहते = व्यापादिते, हनूमतेति शेषः । शोकः = मन्युः, अग्निवत् = अनलवत् , रावणं = दशाऽऽननं, बभ्रज्ज = दग्धवान् ॥

व्युत्पत्तिः—यमाय = "कर्मणा यमभिप्रैति स सम्प्रदानम्" इति सम्प्रदानसंज्ञा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

-चतुर्थी। निरुवाप=निरुपसर्गपूर्वकात् "डुवप् बीजसन्ताने" इति धातोर्लिट्। "लिट्यभ्यासस्योभयेषाम्" इत्यभ्यासस्य सम्प्रसारणम्। अकित्वात् "वचिस्वपियजादीनां किति" इति तु न सम्प्रसारणम्। अग्निवत्=अग्निना तुल्यं, वतिप्रत्ययः। बभ्रज्ज="भ्रस्ज पाके" इति धातोर्लिट्। "भ्रस्जोरोपधयोरमन्यतरस्याम्" इति रमभावे रूपम्। रमि तु—बभर्ज ॥

भाषाऽर्थः—हनूमान्‌जीने उस ताडके पेडसे महापशुके सदृश अकम्पनको यमराजजीको दे दिया। अकम्पनके मारे जानेपर शोकने अग्निके सदृश होकर रावणको जलाया ॥ ८६ ॥

स विभ्रेष प्रचुक्षोद दन्तैरोष्ठं चखाद च।
प्रगोपायाञ्चकाराऽऽशु यत्नेन परितः पुरम् ॥ ८७ ॥

अन्वयः—स विभ्रेष, प्रचुक्षोद, दन्तैः ओष्ठं चखाद च, पुरं परितो यत्नेन आशु प्रगोपायाञ्चकार ॥

व्याख्या—सः=रावणः, विभ्रेष=चलितः, प्रचुक्षोद=लोष्टादीन् चूर्णितवान्, दन्तैः=दशनैः, ओष्ठम्=अधरं, चखाद=दष्टवान्, पुरं=लङ्कां, परितः=सर्वतः, यत्नेन=प्रयासेन, आशु=शीघ्रं, प्रगोपायाञ्चकार=रक्षितवान् ॥

व्युत्पत्तिः—विभ्रेष="भ्रेषृ चलने" इति धातोर्लिट्। चखाद="खाद भक्षणे" इति धातोर्लिट्। पुरं="परित" इति पदेन योगे "अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि" इति द्वितीया। प्रगोपायाञ्चकार=प्रपूर्वकात् "गुपू रक्षणे" इति धातोर्लिट्। आयप्रत्ययान्तत्वादाम् ॥

भाषाऽर्थः—रावण चला, लोष्ठ आदियोंको क्रोधसे चूर्ण करने लगा, दांतोंको ओष्ठसे काटने लगा और लङ्काके चारों ओर शीघ्र रक्षा करने लगा ॥ ८७ ॥

युग्मम्—

प्रहस्तमर्थयाञ्चक्रे योद्धुमद्भुतविक्रमम्।
किं विचारेण राजेन्द्र ! युद्धाऽर्थी वयमित्यसौ ॥ ८८ ॥
चकाणाशङ्कितो योद्धुमुत्सेहे च महारथः।
निर्ययिरेऽस्य योद्धारश्चक्लृपे चाऽश्वकुञ्जरम् ॥ ८९ ॥

अन्वयः—(सः) अद्भुतविक्रमं प्रहस्तं योद्धुम् अर्थयाञ्चक्रे। असौ 'हे राजेन्द्र ! विचारेण किं ? वयं युद्धार्थाः ॥

इति चकाण, महारथः अशङ्कितः (सन्) योद्धुम् उत्सेहे च। अस्य योद्धारो निर्ययिरे च। अश्वकुञ्जरं च चक्लृपे ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—अद्भुतविक्रमम् = आश्चर्यजनकपराक्रमं, प्रहस्तं = तन्नामानं स्वसचिवं, योद्धुं = युद्धं कर्तुम् , अर्थयाञ्चक्रे=प्रार्थितवान् , रावण इति शेषः। असौ = रावणाऽर्थितः प्रहस्तः, हे राजेन्द्र ! = हे भूपश्रेष्ठ ! विचारेण = विमर्शेन, किं = किं प्रयोजनं, नाऽयं विचारकाल इति भावः। वयं=भवदनुचराः, युद्धाऽर्थाः संग्रामप्रयोजनाः, भवदर्थसिद्ध्यर्थमिति भावः। इति=एवं, चक्राण=बभाण, ततः महारथः= बृहद्रथः—

"एको दशसहस्त्रेण योधयेद्यस्तु धन्विनाम् ।
अस्त्रशस्त्रप्रवीणश्च स महारथ उच्यते ॥"

इति लक्षणलक्षितो योद्धृविशेषो वा। अशङ्कितः = निर्भयः सन् , योद्धुं=युद्धं कर्तुम्, उत्सेहे च = उत्साहं कृतवांश्च। अस्य = प्रहस्तस्य, योद्धारः=भटाः, निर्येमिरे च=नियमिताश्च, अनेन (प्रहस्तेन) सह एतावद्भिर्योद्धव्यमिति रावणेन व्यवस्थापिता इति भावः। अश्वकुञ्जरं च = हयगजं च, चक्लृपे = सज्जीकृतं, युद्धाऽर्थमिति शेषः।

व्युत्पत्तिः—अर्थयाञ्चक्रे = "अर्थ उपयाच्ञायाम्" इति चौरादिकाद्धातोर्लिट्। युद्धाऽर्थाः = युद्धम् अर्थो येषां ते। चक्राण=शब्दाऽर्थात् क्रणधातोर्लिट्। निर्येमिरे= कर्मणि लिट्। अश्वकुञ्जरम् = अश्वाश्च कुञ्जराश्च, "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति सेनाङ्गत्वात्समाहारद्वन्द्वः। चक्लृपे = "कृपू सामर्थ्ये" इति धातोर्लिट् "कृपो रो लः" लत्वम् ॥

भाषाऽर्थः—रावणने अद्भुतपराक्रमवाले प्रहस्तसे लड़नेके लिए प्रार्थना की। उसने "हे महाराज ! विचारसे क्या ? हम लोग युद्धको चाहने वाले हैं" ऐसा कहा। तब रावणने उसके सहकारी योद्धाओंकी व्यवस्था की। लड़नेके लिए घोड़ों और हाथियोंको सज्जित भी किया ॥ ८८-८९ ॥

युयुजुः स्यन्दनानश्वैरीजुर्देवान् पुरोहिताः ।
आनर्चुर्ब्राह्मणान् सम्यगाशिषश्चाशशंसिरे ॥ ९० ॥

अन्वयः—स्यन्दनान् अश्वैः युयुजुः। पुरोहिता देवान् ईजुः। ब्राह्मणान् आनर्चुः। आशिषश्च सम्यक् आशशंसिरे।

व्याख्या—स्यन्दनान् = रथान् , अश्वैः = हयैः, युयुजुः = युक्तांश्चक्रुः, सारथय इति भावः। पुरोहिताः = पुरोधसः, राक्षसानामिति शेषः। देवान् = सुरान् , ईजुः= पूजितवन्तः, ब्राह्मणान् = विप्रान् , आनर्चुः = पूजितवन्तः, राक्षसा इति शेषः। अर्चितास्ते च ब्राह्मणाः—आशिषश्च = हिताऽऽशंसाश्च, सम्यक् = समीचीनं तथा आशशंसिरे = उदितवन्त इति भावः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—ईजुः = "यज देवपूजासङ्गतिकरणदानेषु" इति धातोर्लिट्। "वचिस्वपियजादीनां किति" इति सम्प्रसारणम्। आशिषः = "आङः शासु इच्छायाम्" इति धातोः क्विप्। "आशासः क्वावुपधाया इत्वं वाच्यम्" इतीत्वम्। "स्त्री त्वाशीर्हिताऽऽशंसाऽहिदंष्ट्रयोः" इत्यमरः॥

भाषाऽर्थः—सारथियोंने रथोंको घोड़ोंसे युक्त किया। राक्षसपुरोहितोंने देवताओंकी पूजा की। राक्षसोंने ब्राह्मणोंका पूजन किया। पूजित उन ब्राह्मणोंने अच्छी तरहसे उन्हें आशीर्वाद किया॥ ९०॥

ऊहिरे मूर्ध्नि सिद्धार्था गावश्चाऽऽलेभिरे भटैः।
प्रचुक्षणुवुर्महास्त्राणि जिज्ञासाञ्चक्रिरे हयान्॥ ९१॥

अन्वयः—भटैः मूर्ध्नि सिद्धार्था ऊहिरे, गावश्च आलेभिरे। महाऽस्त्राणि प्रचुक्षणुवुः, हयान् जिज्ञासाञ्चक्रिरे॥

व्याख्या—भटैः = योधैः, मूर्ध्नि = शिरसि, सिद्धार्थाः = सर्षपाः, ऊहिरे=ऊढाः, गावश्च = धेनवश्च, आलेभिरे = स्पृष्टाः। महाशस्त्राणि = बृहदायुधानि, प्रचुक्षणुवुः= तेजितवन्तः, भटा इति शेषः, एवमुत्तरवाक्येऽपि। हयान्=अश्वान्, जिज्ञासाञ्चक्रिरे ज्ञातुमिच्छां कृतवन्तः, एते योद्धुं क्षमा नो वेति॥

व्युत्पत्तिः—ऊहिरे = कर्मणि लिट्, एवं परवाक्येऽपि। प्रचुक्षणुवुः = प्रपूर्वकात् "क्ष्णु तेजने" इति धातोः कर्तरि लिट्। जिज्ञासाञ्चक्रिरे = "ज्ञाश्रुस्मृदृशां सनः" इत्यात्मनेपदित्वादनुप्रयोगेऽपि आत्मनेपदम्॥

भाषाऽर्थः—योद्धाओंने शिरमें सरसों को रक्खा और गायोंका स्पर्श किया, इसी तरह महाऽस्त्रोंको तीक्ष्ण किया और घोड़ों की परीक्षा की॥ ९१॥

युग्मम्—

ललुः खड्गान् ममार्जुश्च ममृजुश्च परश्वधान्।
अलञ्चक्रे समालेभे ववसे बुभुजे पपे॥ ९२॥
जहसे च क्षणं यानैर्निर्जग्मे योद्धृभिस्ततः।
विप्रान् प्रहस्त आनर्च जुहाव च विभावसुम्॥ ९३॥

अन्वयः—(भटाः) खड्गान् ललुः, ममार्जुश्च, परश्वधान् ममृजुश्च। योद्धृभिः अलञ्चक्रे, समालेभे, ववसे, बुभुजे, पपे, क्षणं जहसे च; ततो यानैः निर्जग्मे। प्रहस्तो विप्रान् आनर्च; विभावसुं च जुहाव॥

व्याख्या—खड्गान् = असीन्, ललुः = गृहीतवन्तः, भटा इति शेषः, एवं परत्राऽपि। ममार्जुश्च=विशुद्धान् कृतवन्तश्च। परश्वधान्=परशून्, ममृजुश्च=शोधितवन्तश्च। योद्धृभिः = भटैः, अलञ्चक्रे = अलङ्कृतं, समालेभे = समालब्धम्,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनुलेपनं कृतमित्यर्थः । ववसे = आच्छादितं, बुभुजे = भुक्तं, पपे = पीतं, क्षणं = कञ्चित्कालं जहसे च = हसितं च । ततः = अनन्तरं, यानैः = अश्वादिभिः करणैः, निर्जग्मे = निर्गतम् । प्रहस्तः = रावणसचिवः, विप्रान् = ब्राह्मणान्, आनर्च = पूजितवान्, विभावसुं च = अग्निं च, जुहाव = प्रीणितवान् ॥

व्युत्पत्तिः—ललुः = 'ला आदाने' इति धातोर्लिट् । ममार्जुः = 'मृजू शुद्धौ' इति धातोर्लिट् । 'मृजेर्वृद्धिः' इति 'विङत्यजादौ वेष्यते' इति वैकल्पिकी वृद्धिस्तदभावे ममृजुः । अलञ्चक्रे = भावे लिट्, एवं परत्राऽपि । ववसे = 'वस आच्छादने' इति धातोर्लिट् । पपे = पा पाने' इति धातोर्भावे लिट् । क्षणं = 'कालाऽध्वनोरत्यन्तसंयोगे' इति द्वितीया । जुहाव='हु दानाऽदनयोः' इति धातोर्लिट् ॥

भाषाऽर्थः—योद्धाओंने खड्गोंको लिया, साफ किया, परशुओंको भी साफ किया । उन लोगोंने अलङ्कार धारण किया, अनुलेपन किया, वस्त्रधारण किया, खाना खाया, पान किथा, कुछ समय तक हंसी दिल्लगी भी की, तब वे यानों पर चढ़कर बाहर निकले । प्रहस्तने ब्राह्मणोंकी पूजा की, हवन भी किया ॥ ९२-९३ ॥

संवर्गयाञ्चकाराप्तान् चन्दनेन लिलेप च ।
चचाम मधु मार्द्वीकं त्वक्त्रं चाचकचे वरम् ॥ ९४ ॥

अन्वयः—(प्रहस्तः) आप्तान् संवर्गयाञ्चकार चन्दनेन लिलेप मार्द्वीकं मधु चचाम, वरं त्वक्त्रं च आचकचे ॥

व्याख्या—आप्तान् = विश्वस्तान् संवर्गयाञ्चकार = कटकादिप्रदानेन संभावितवान्, चन्दनेन=श्रीखण्डेन, लिलेप=लेपनं कृतवान्, मार्द्वीकं=द्राक्षाविकारभूतं, मधु=मद्यं, चचाम=पीतवान्, वरं = श्रेष्ठं, त्वक्त्रं च = कवचं च, आचकचे = बद्धवान् ॥

व्युत्पत्तिः—आप्तान् = 'आप्तः प्रत्ययितः समौ' इत्यमरः । संवर्गयाञ्चकार= संवर्गं करोतीति 'तत्करोति तदाचष्टे" इति णिजन्ताल्लिट् । लिलेप='लिप उपदेहे' इति धातोर्लिट् । मार्द्वीकं = मृद्वीकाया विकारः, 'तस्य विकार' इत्यण्, 'मृद्वीका गोस्तनी द्राक्षा' इत्यमरः । आचकचे=आङ्पूर्वकात् 'कच बन्धने' इति धातोर्लिट् ॥

भाषाऽर्थः—प्रहस्तने कटक आदि देकर विश्वासी जनोंकी प्रतिष्ठा की, शरीरमें चन्दनसे लेपन किया, अंगूरकी मदिरा पी ली और श्रेष्ठ कवच पहना भी ॥ ९४ ॥

उष्णीषं मुमुचे चारु रथं च जुजुषे शुभम् ।
आललम्बे महाऽस्त्राणि गन्तुं प्रववृते ततः ॥ ९५ ॥

अन्वयः—(प्रहस्तः) चारु उष्णीषं मुमुचे शुभं रथं जुजुषे, महाऽस्त्राणि आललम्बे, ततो गन्तुं प्रववृते ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—चारु=सुन्दरम् , उष्णीषं = शिरस्त्राणं, मुमुचे = परिदधे, प्रहस्त इति शेषः, एवं परत्राऽपि। शुभं=शोभमानं, रथं=स्यन्दनं, जुजुषे = सेवितवान् , आरूढ इति भावः। महाऽस्त्राणि = बृहदायुधानि, आललम्बे = गृहीतवान् , ततः=अनन्तरं, गन्तुं = यातुं, प्रववृते = प्रवृत्तः ॥

व्युत्पत्तिः—उष्णीषम् = 'उष्णीषं शिरोवेष्टकिरीटयोः' इत्यमरः। जुजुषे = 'जुषी प्रीतिसेवनयोः' इति धातोर्लिट्। आललम्बे = आङ्पूर्वकात् 'लबि अवस्रंसने' इति धातोर्लिट् ॥

भाषाऽर्थः—प्रहस्तने सुन्दर मुकुटको धारण किया, सुन्दर रथपर आरोहण किया, बड़े-बड़े अस्त्रों को ले लिया और वह जानेके लिए प्रवृत्त हुआ ॥ ९५ ॥

आजघ्नुस्तूर्यजातानि तुष्टुवुश्चानुजीविनः ।
रजः प्रववृधे घोरं घोषश्च व्यानशे दिशः ॥ ९६ ॥

अन्वयः—तूर्यजातानि आजघ्नुः। अनुजीविनश्च तुष्टुवुः। घोरं रजः प्रववृधे। घोषश्च दिशो व्यानशे।

व्याख्या—तूर्यजातानि=वाद्यसमूहान् , आजघ्नुः = ताडितवन्तः, वाद्यवादका इति शेषः। अनुजीविनश्च = प्रहस्तस्याऽनुचराश्च, तुष्टुवुः = 'जय, जीवे'ति शब्दैः स्तुतिं चक्रुः। घोरं = भयानकं, रजः = धूलिः, प्रववृधे = प्रवृद्धं, घोषश्च = कोलाहलशब्दश्च, दिशः = आशाः, व्यानशे = व्याप्तवान् ॥

व्युत्पत्तिः—आजघ्नुः = आङ्पूर्वकात् 'हन हिंसागत्योः' इति धातोर्लिट्। सकर्मकत्वात् 'आङो यमहनः' इत्यात्मनेपदं न भवति। व्यानशे=विपूर्वात् 'अशू व्याप्तौ संघाते च' इति धातोर्लिट्। 'अत आदेः' इति दीर्घत्वम् , 'अश्नोतेश्चे'ति नुट् ॥

भाषाऽर्थः—बाजा बजाने वालोंने बाजाओंको बजाया। अनुचरोंने प्रहस्तकी स्तुति की। भयानक धूलि बढ़ गई। शब्दोंने दिशाओंको व्याप्त किया ॥ ९६ ॥

तं यान्तं दुद्रुवुर्गृध्राः क्रव्यादश्च सिषेविरे ।
आववुर्वायवो घोराः खादुल्काश्च प्रचस्करुः ॥ ९७ ॥

अन्वयः—यान्तं तं गृध्राः दुद्रुवुः, क्रव्यादश्च सिषेविरे। घोरा वायव आववुः। खात् उल्काश्च प्रचस्करुः ॥

व्याख्या—यान्तं = गच्छन्तं, समरायेति शेषः। तं=प्रहस्तं, गृध्राः = दाक्षाय्याः, दुद्रुवुः = गतवन्तः, क्रव्यादश्च = शृगालादयश्च, सिषेविरे = सेवितवन्तः। घोराः = भयङ्कराः, पांसुवर्षिण इति भावः। वायवः = वाताः, आववुः = समन्ताद्वान्ति स्म। खात् = आकाशात् , उल्काश्च = निर्गतज्वालाश्च, प्रचस्करुः = पतिताः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—आववुः = आङ्पूर्वकात् 'वा गतिगन्धनयोः' इति धातोर्लिट् । उल्काः-'उल्का स्यान्निर्गतज्वाला ।' इत्यमरः । प्रचचरुः-प्रपूर्वकात् 'चर सञ्चलने' इति धातोर्लिट् अकर्मकोऽयं धातुः ॥

भाषाऽर्थः—प्रहस्तके जानेपर गीध भी गये, शृगाल आदियोंने सेवा की। भयानक वायु बहने लगे । आकाशसे उल्कायें गिर पड़ीं ॥ ९७ ॥

सस्यन्दे शोणितं व्योम रणाऽङ्गानि प्रजज्वलुः ।
रथाः प्रचस्खलुः साऽश्वा न ररंहाश्वकुञ्जरम् ॥ ९८ ॥

अन्वयः—व्योम शोणितं सस्यन्दे । रणाऽङ्गानि प्रजज्वलुः । साऽश्वा रथाः प्रचस्खलुः । अश्वकुञ्जरं न ररंह ॥

व्याख्या—व्योम = आकाशं कर्तृ, शोणितं = रुधिरं, सस्यन्दे = सिक्तवत् । रणाऽङ्गानि = खड्गादीनि, प्रजज्वलुः = प्रज्वलितवन्ति । साश्वाः = हयसहिताः, रथाः = स्यन्दनाः, प्रस्खलुः = स्खलितवन्तः । अश्वकुञ्जरं = हयगजं, न ररंह = न गतम् ॥

व्युत्पत्तिः—सस्यन्दे = 'स्यन्दू प्रस्रवणे' इति धातोर्लिट् । अश्वकुञ्जरम् = अश्वाश्च कुञ्जराश्च, 'द्वन्द्वश्च प्राणितूर्यसेनाऽङ्गानाम्' इति सेनाङ्गत्वात्समाहारद्वन्द्वः ॥

भाषाऽर्थः—आकाशने रुधिरसेचन किया । खड्ग आदि जलने लने । घोड़ोंके साथ रथ फिसले । घोड़े और हाथी गतिहीन हो गये ॥ ९८ ॥

प्रतोदा जगलुर्वाममानञ्चुर्यज्ञिया मृगाः ।
ददाल भूः पुपूरे द्यौः कपीनामपि निःस्वनैः ॥ ९९ ॥

अन्वयः—प्रतोदा जगलुः । यज्ञिया मृगा वामम् आनञ्चुः । भूः ददाल । कपीनां निःस्वनैः अपि द्यौः पुपूरे ॥

व्याख्या—प्रतोदाः = तोत्त्राणि, अश्वादिताडनदण्डा इति भावः । जगलुः = गलिताः, हस्तेभ्यः स्वयं पतिता इति भावः । यज्ञियाः = यज्ञयोग्यः, मृगाः=पशवः, कृष्णसारादय इति भावः । वामं = दक्षिणेतरभागम् , आनञ्चुः = गताः । भूः = पृथिवी, ददाल = विदीर्णा 'जज्वाले'ति पाठान्तरं तस्य चचालेत्यर्थः । कपीनां = वानराणां, निःस्वनैरपि = शब्दैरपि, द्यौः = आकाशं, पुपूरे = पूर्णा प्रहस्तस्य रणभूमिगमनसमये तादृशमशुभं दृष्ट्वा वानराः हर्षशब्दं चक्रुरिति भावः ॥

व्युत्पत्तिः—जगलुः = 'गल अदने" इति धातोर्लिट्, धातोरनेकार्थत्वादिह पतने प्रयोगः । यज्ञियाः = यज्ञमर्हन्तीति, 'यज्ञर्त्विग्भ्यां घखञौ' इति घप्रत्ययः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आनञ्चुः='अञ्चु गतिपूजनयोः' इति धातोर्गतौ लिट्। 'अत आदेः' इति दीर्घत्वं 'तस्मान्नुड् द्विहलः' इति नुट्॥

भाषाऽर्थः—हाथोंसे चाबुक आपसे आप गिर पड़े। यज्ञके योग्य कृष्णसार, मृग आदि पशु बाईं ओर चलने लगे। पृथिवी विदीर्ण हुई। वानरोंके शब्दोंसे भी आकाश पूर्ण हुआ॥ ९९॥

मिमेह रक्तं हस्त्यश्वं राक्षसाश्च नितिष्ठिवुः।
ततः शुशुभतुः सेने निर्दयं च प्रजह्रतुः॥ १००॥

अन्वयः—हस्त्यश्वं रक्तं मिमेह। राक्षसाश्च रक्तं नितिष्ठिवुः। ततः सेने शुशुभतुः, निर्दयं प्रजह्रतुश्च॥

व्याख्या—हस्त्यश्वं=गजहयं, रक्तं=रुधिरं, मिमेह=मूत्रितवत्। राक्षसाश्च=यातुधानाश्च, रक्तं=रुधिरं, नितिष्ठिवुः=निरस्तवन्तः। ततः=दुर्निमित्ताऽनन्तरं, सेने=वानरराक्षससैन्ये, शुशुभतुः=शोभितवत्यौ, निर्दयं=करुणारहितं यथा तथा, प्रजह्रतुश्च=प्रहृतवत्यौ च॥

व्युत्पत्तिः—हस्त्यश्वं=हस्तिनश्च अश्वाश्च, सेनाङ्गत्वात्समाहारद्वन्द्वः। मिमेह='मिह सेचने' इति धातोर्लिट्। नितिष्ठिवुः=निपूर्वकात् 'ष्ठिवु निरसने' इति धातोर्लिट्। शुशुभतुः='शुभ (शुम्भ) शोभाऽर्थे' इति तौदादिकधातोर्लिट्। निर्दयं=निर्गता दया यस्मिन्कर्मणि तद्यथा तथा॥

भाषाऽर्थः—हाथी और घोड़ोंने रुधिरका पेशाब किया, राक्षसोंने भी रक्तको थूका। तब दोनों सेनायें (वानर और राक्षसोंकी) शोभित हुईं और निर्दयतापूर्वक परस्पर प्रहार करने लगीं॥ १००॥

दिद्विषुर्दुद्युवुश्चच्छुश्चक्लमुः सुषुपुर्हताः।
चखादिरे चखादुश्च विलेपुश्च रणे भटाः॥ १०१॥

अन्वयः—रणे भटा दिद्विषुः, दुद्युवुः चच्छुः, हताः (सन्तः) चक्लमुः, सुषुपुः, चखादिरे, चखादुः, विलेपुश्च॥

व्याख्या—रणे=संग्रामे, भटाः=योद्धारः, दिद्विषुः=द्वेषं चक्रुः, परस्परमिति शेषः। दुद्युवुः=अभिमुखं जग्मुः, चच्छुः=छिन्नवन्तः, हताः=आहताः सन्तः, चक्लमुः=मूर्च्छां प्राप्तवन्तः। सुषुपुः=भूमौ पतिताः, चखादिरे=खादिताः, चखादुः=खादितवन्तः, विलेपुश्च=विलापं कृतवन्तश्च॥

व्युत्पत्तिः—दिद्विषुः='द्विष अप्रीतौ' इति धातोर्लिट्। दुद्युवुः='द्यु अभिगमने' इति धातोर्लिट्। चच्छुः='छो छेदने' इति धातोर्लिट्। सुषुपुः='ञिष्वप् शये'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति धातोर्लिट् । वच्यादित्वात् 'वचिस्वपियजादीनां किति' इति सम्प्रसारणम् । चखादिरे='खादृ भक्षणे' इति धातोः कर्मणि लिट् । विलेपुः='अत एकहल्मध्येऽनादेशादेर्लिटि' इत्येत्वाऽभ्यासलोपौ । 'विलापः परिदेवनम्' इत्यमरः ॥

भाषार्थः—युद्धमें योद्धाओंने परस्परमें द्वेष किया, सम्मुख गमन किया, छेदन किया। वे ताडित होते हुए मूर्च्छित हुए, जमीनपर गिर पड़े, दूसरोंसे खाये गये और स्वयम् भी खाया एवम् उन्होंने विलाप भी किया ॥ १०१ ॥

प्रहस्तस्य पुरोऽमात्यान् जिहिंसुर्दधृषुस्तथा ।
वानराः कर्म सेनानी रक्षसां चक्षमे न तत् ॥ १०२ ॥

अन्वयः—वानराः प्रहस्तस्य पुरः अमात्यान् जिहिंसुः, तथा दधृषुः । रक्षसां सेनानीः तत् कर्म न चक्षमे ॥

व्याख्या—वानराः = कपयः, प्रहस्तस्य = रावणसचिवस्य, पुरः = अग्रतः, अमात्यान्=मन्त्रिणः, जिहिंसुः=हतवन्तः, तथा = तेन प्रकारेण, दधृषुः = परिभूतवन्तः । रक्षसां = राक्षसानां, सेनानीः = सेनापतिः, प्रहस्त इति भावः । तत्= पूर्वोक्तं, कर्म = वानरविक्रमं, न चक्षमे = न ममृषे ॥

व्युत्पत्तिः—अमात्यान् = अमा (सह) वर्तन्त इति अमात्यास्तान्, 'अव्ययात्यप्' इति 'अमेहक्वतसित्रेभ्य एव' इति त्यप् । जिहिंसुः=हिसि हिंसायाम्' इति धातोर्लिट् । दधृषुः = 'ञिधृषा प्रागल्भ्ये' इति धातोर्लिट् ॥

भाषार्थः—वानरोंने प्रहस्तके सामने मन्त्रियोंको मार डाला और परिभूत किया। राक्षसोंके सेनापति प्रहस्तने वानरोंके उस कर्मका सहन नहीं किया ॥१०२॥

ऊर्णुनाव स शस्त्रौघैर्वानराणामनीकिनीम् ।
शशास च बहून् योधान् जीवितेन विवेच च ॥ १०३ ॥

अन्वयः—स शस्त्रौघैः वानराणाम् अनीकिनीम् ऊर्णुनाव, बहून् योधान् शशास, जीवितेन च विवेच ॥

व्याख्या—सः = प्रहस्तः, शस्त्रौघैः = आयुधसमूहैः, वानराणां = कपीनाम्, अनीकिनीं = सेनाम्, ऊर्णुनाव = आच्छादितवान्, बहून् = प्रचुरान्, योधान् = भटान्, शशास = जघान, जीवितेन च = जीवनेन च, विवेच = पृथक्कृतवान् ॥

व्युत्पत्तिः—अनीकिनीं = 'ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः ।' इत्यमरः । ऊर्णुनाव='ऊर्णुञ् आच्छादने' इति धातोर्लिट् 'ऊर्णोतेराम्नेति वाच्यम्' इति आमः प्रतिषेधः । शशास = 'शसु हिंसायाम्' इति धातोर्लिट् । जीवितेन = जीवितं, तेन 'नपुंसके भाव क्तः' इति क्तप्रत्ययः । विवेच = 'विचिर् पृथग्भावे' इति रौधादिकाद्धातोर्लिट् । 'इर इत्संज्ञा वाच्या' इतीर इत्संज्ञा ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—प्रहस्तने शस्त्रसमूहोंसे वानरोंकी सेनाको आच्छादित किया, बहुतेरे योद्धाओंको आहत किया और जीवनसे अलग कर दिया ॥ १०३ ॥

आससञ्ज भयं तेषां दिद्युते च यथा रविः ।
नाययास द्विषद्देहैर्जगाहे च दिशो दश ॥ १०४ ॥

अन्वयः—(प्रहस्तः) तेषां भयम् आससञ्ज, रविः यथा दिद्युते च, न आययास द्विषद्देहैः दश दिशः जगाहे च ॥

व्याख्या—तेषां = वानराणां, भयं = भीतिम्, आससञ्ज = आरोपितवान्, प्रहस्त इति शेषः, एवं परत्राऽपि । रविः = सूर्यः, यथा = इव, दिद्युते च=बभौ च, न आययास = आयासं न प्राप । द्विषद्देहैः = शत्रुशरीरैः, दश = दशसंख्यकाः, दिशः = आशाः, जगाहे च = अवष्टब्धवांश्च ॥

व्युत्पत्तिः—आससञ्ज = आङ्पूर्वकात् 'षञ्ज सङ्गे' इत्यकर्मकाद्धातोर्लिट् । अत्राऽन्तर्भावितो णिजर्थः । दिद्युते = 'द्युत दीप्तौ' इति धातोर्लिट् । 'द्युतिस्वाप्योः सम्प्रसारणम्' इति अभ्यासस्य सम्प्रसारणम् । आययास=आङ्पूर्वकात् 'यसु प्रयत्ने' इति धातोर्लिट् ॥

भाषाऽर्थः—प्रहस्तने वानरोंमें भय उत्पन्न किया, और वह सूर्यके तुल्य प्रकाशित हुआ। उसे कुछ भी आयास नहीं हुआ और उसने शत्रुओंके शरीरोंसे दशों दिशाओंको भर दिया ॥ १०४ ॥

केचित्सञ्चुकुटुर्भीता लेजिरेऽन्ये पराजिताः ।
संग्रामाद्बभ्रशुः केचिद्ययाचुश्चापरेऽभयम् ॥ १०५ ॥

अन्वयः—केचित् भीताः (सन्तः) संचुकुटुः । अन्ये पराजिताः (सन्तः) लेजिरे । केचित् संग्रामात् बभ्रशुः । अपरे अभयं ययाचुः ॥

व्याख्या—केचित्=वानराः, भीताः = त्रस्ताः सन्तः, संचुकुटुः = संकुटिताः, कौटिल्यं प्रापुरित्यर्थः । अन्ये=अपरे, पराजिताः=विजिताः सन्तः, लेजिरे = भर्त्सिताः, प्रहस्तेनेति शेषः । केचित् = वानराः, संग्रामात् = युद्धात्, बभ्रशुः = पलायिताः, अपरे = अन्ये, अभयम् = अभीतिं, ययाचुः = याचितवन्तः । प्रहस्तमिति शेषः ॥

व्युत्पत्तिः—संचुकुटुः = संपूर्वकात् 'कुट कौटिल्ये' इति धातोर्लिट् । लेजिरे = 'लज (लाजि) भर्त्सने' इति धातोर्लिट् । बभ्रशुः = '(भृशु) भ्रंशु अधःपतने' इति धातोर्लिट् ॥

भाषाऽर्थः—भीत होकर कुछ वानरोंने कौटिल्यको प्राप्त किया । पराजित अन्य

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वानरोंको प्रहस्तने भर्त्सन किया। कुछ वानर संग्रामस्थलसे भाग गये। कुछ और लोगोंने अभयप्रार्थना की ॥ १०५ ॥

एवं विजिग्ये तां सेनां प्रहस्तोऽतिददर्प च ।
शशाम न च संक्रुद्धो निर्जुगोप निशाचरान् ॥ १०६ ॥

अन्वयः—प्रहस्तः एवं तां सेनां विजिग्ये, अतिददर्प च, संक्रुद्धः (सन्) न च शशाम, निशाचरान् निर्जुगोप ॥

व्याख्या—प्रहस्तः = रावणसेनापतिः, एवं=उक्तप्रकारेण, तां=पूर्वोक्तां, सेनां = बानरपृतनां, विजिग्ये = विजितवान्, अतिददर्प च = सुष्ठु हृष्टवांश्च, संक्रुद्धः = संकुपितः सन्, न च शशाम = न च शमंगतः, निशाचरान् = राक्षसान्, स्वाऽनुयायिन इति भावः । निर्जुगोप = रक्षितवान् ॥

व्युत्पत्तिः—विजिग्ये = विपूर्वकात् 'जि जये' इतिधातोर्लिट् । 'विपराभ्यां जेः' इत्यात्मनेपदम् । 'संन्लिटोर्जेः' इति कुत्वम् । अतिददर्प = अत्युपसर्गपूर्वकात् 'दृप हर्षविमोचनयोः' इति धातोर्लिट् । निशाचरान् = निशासु चरन्तीति निशाचरास्तान्, 'चरेष्ट' इति टः । निर्जुगोप = निरुपसर्गपूर्वकात् 'गुपू रक्षणे' इति धातोर्लिट् । 'आयादय आर्धधातुके वा' इत्यायाभावपक्षे रूपम् ॥

भाषाऽर्थः—प्रहस्तने इस प्रकारसे उस (वानरोंकी) सेनाको जीत लिया और वह अतिशय प्रसन्न हुआ, कुपित होकर शान्त नहीं हुआ और उसने राक्षसोंका संरक्षण किया ॥ १०६ ॥

चुक्रुधे तत्र नीलेन तरुश्चोच्चिक्षिपे महान् ।
प्रहस्तोभिहतस्तेन बाणान् विससृजे बहून् ॥ १०७ ॥

अन्वयः—तत्र नीलेन चुक्रुधे, महान् तरुश्च उच्चिक्षिपे । तेन अभिहतः प्रहस्तो बहून् बाणान् विससृजे ॥

व्याख्या—तत्र=तस्मिन्, प्रहस्त इति भावः । नीलेन = तदाख्येन बानरसेनापतिना, चुक्रुधे = क्रुद्धं, महान् = विशालः, तरुश्च=वृक्षश्च, उच्चिक्षिपे=उत्क्षिप्तः । तेन=महातरुणा, नीलेन वा, अभिहतः=ताडितः, प्रहस्तः=राक्षससेनापतिः, बहून् = प्रचुरान्, बाणान् = शरान्, विससृजे = क्षिप्तवान् ॥

व्युत्पत्तिः—तत्र='सप्तम्यास्त्रल्' इति त्रल् । चुक्रुधे=भावे लिट् । उच्चिक्षिपे=उत्पूर्वकात् 'क्षिप प्रेरणे' इति धातोः कर्मणि लिट् । विससृजे = विपूर्वकात् 'सृज विसर्गे' इति दैवादिकाद्धातोः कर्तरि लिट् ॥

भाषाऽर्थः—प्रहस्तसे वानरसेनापति नील क्रुद्ध हुए और उन्होंने बड़े पेड़को उठाया । उस पेड़से ताडित होकर प्रहस्तने भी बहुतसे बाणोंको छोड़ा ॥ १०७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सेहे कपी रथाऽश्वांश्च रिपोस्ततर्ह शाखिना।
धरित्रीं मुसली तेये प्रहस्तश्चिखिदे न च ॥ १०८ ॥

अन्वयः—कपिः सेहे, शाखिना रिपोः रथाऽश्वांश्च ततर्ह। प्रहस्तः मुसली (सन्) धरित्रीं तेये, न च चिखिदे ॥

व्याख्या—कपिः=वानरः, नील इति भावः। सेहे=सोढवान्, प्रहस्तविसृष्टान् बाणानिति शेषः। शाखिना=वृक्षेण, रिपोः=शत्रोः प्रहस्तस्य, रथाऽश्वांश्च= स्यन्दनहयांश्च, ततर्ह=हतवान्। प्रहस्तः=रावणसेनापतिः, मुसली=गृहीतमुसलः सन्, धरित्रीं=भूमिं, तेये=गतः, न च चिखिदे=न च खिन्नः ॥

व्युत्पत्तिः—सेहे='षह मर्षणे' इति धातोर्लिट्। ततर्ह='तृह (हिसि) हिंसायाम्' इति धातोर्लिट्। मुसली=मुसलमस्याऽस्तीति, 'अत इनिठनौ' इतीनिः। 'सौ च' इति सौ दीर्घत्वम्। तेये=गत्यर्थात्तयधातोर्लिट्। चिखिदे= 'खिद दैन्य' इति धातोर्लिट् ॥

भाषाऽर्थः—वानरसेनापति नीलने प्रहस्तसे छोड़े गये बाणोंका सहन किया, वृक्षसे शत्रुके रथ और घोड़ोंको नष्ट किया। प्रहस्त भी मुसल लेकर जमीनपर उतरा, खिन्न भी नहीं हुआ। ॥ १०८ ॥

संदुधुक्षे तयोः कोपः पस्फाये शस्त्रलाघवम्।
नुनोद शाखिनं नील आवव्रे मुसली तरुम् ॥ १०९ ॥

अन्वयः—तयोः कोपः संदुधुक्षे, शस्त्रलाघवं पस्फाये। नीलः शाखिनं नुनोद। मुसली तरुम् आवव्रे ॥

व्याख्या—तयोः=नीलप्रहस्तयोः, कोपः = क्रोधः, संदुधुक्षे=संप्रदीप्तः, शस्त्रलाघवम्=अस्त्रप्रहारक्षिप्रता, पस्फाये=वृद्धिंगतम्। नीलः=वानरसेनापतिः, शाखिनं=वृक्षं, नुनोद=प्रेरितवान्। मुसली=गृहीतमुसलः, प्रहस्त इति भावः। तरुं=वृक्षम्, आवव्रे=निवारितवान् ॥

व्युत्पत्तिः—संदुधुक्षे='धुक्ष (धिक्ष) सन्दीपनक्लेशनयोः' इति धातोर्लिट्। पस्फाये='स्फायी (ओप्यायी) वृद्धौ' इति धातोर्लिट्। नुनोद='णुद प्रेरणे' इति धातोर्लिट्। मुसली=मुसलमस्याऽस्तीति 'अत इनिठनौ' इतीनिः। 'सौ च' इति सौ दीर्घत्वम् ॥

भाषाऽर्थः—नील और प्रहस्तका कोप प्रयास हुआ। आयुध-प्रहार की शीघ्रता वृद्धिको प्राप्त हो गई। नीलने वृक्षको फेंका। प्रहस्तने मुसल लेकर इसका निवारण किया ॥ १०९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वियत्यानश्रतुर्भूमौ मण्डलानि विचेरतुः ।
प्रदुद्रुवतुरन्योन्यं वीरौ शश्रमतुर्न च ॥ ११० ॥

अन्वयः—वीरौ वियति आनश्रतुः, भूमौ मण्डलानि विचेरतुः, अन्योन्यं प्रदुद्रुवतुः, न च शश्रमतुः ॥

व्याख्या—वीरौ=शूरौ, तौ नीलप्रहस्ताविति भावः । वियति=आकाशे, आनश्रतुः=गतौ, भूमौ=पृथिव्यां, मण्डलानि=तिर्यग्भ्रमणानि, विचेरतुः=आचरितवन्तौ, अन्योन्यं=परस्परं, प्रदुद्रुवतुः=गतौ, प्रहारकत्वेनेति भावः । न च शश्रमतुः=न च श्रान्तौ ॥

व्युत्पत्तिः—वीरौ='शूरो वीरश्च विक्रान्तः' इत्यमरः । वियति=वियतोऽधिकरणत्वेन विवक्षितत्वात्कर्मत्वाऽभावेन न द्वितीया । आनश्रतुः='अश्र गत्यर्थे' इति धातोर्लिट्, 'अत आदेः' इति दीर्घत्वम् 'तस्मान्नुड् द्विहल' इति नुट् । प्रदुद्रुवतुः=प्रपूर्वकात् '(द्रु) द्रु गतौ' इति धातोर्लिट् । शश्रमतुः='श्रमु तपसि खेदे च' इति धातोर्लिट् ॥

भाषाऽर्थः—वीर नील और प्रहस्त आकाश में गये । उन्होंने पृथ्वीमें तिर्यग्भ्रमण किया । वे प्रहारकके तौर पर परस्पर को प्राप्त हुए परन्तु परिश्रान्त नहीं हुए॥

समीरयाञ्चकाराऽथ राक्षसस्य कपिः शिलाम् ।
क्षतस्तया ममारासावाशिश्राय च भूतलम् ॥ १११ ॥

अन्वयः—अथ कपिः राक्षसस्य शिलां समीरयाञ्चकार । तया क्षतः असौ ममार भूतलम् आशिश्राय च ।

व्याख्या—अथ=अनन्तरं, कपिः=वानरः, नील इत्यर्थः । राक्षसस्य=यातुधानस्य, प्रहस्तस्योपरीति भावः । शिलां=पाषाणं, समीरयाञ्चकार=क्षिप्तवान् । तया=शिलया, क्षतः=ताडितः, असौ=प्रहस्तः, ममार=मृतः, भूतलं=धरणीतलम्, आशिश्राय च=आश्रितश्च, पतितश्चेति भावः ॥

व्युत्पत्तिः—समीरयाञ्चकार=सम्पूर्वकात् 'ईर क्षेपे' इति चौरादिकात् उदात्तेतो धातोर्लिट् ममार='मृङ् प्राणत्यागे' इति धातोर्लिट् । आशिश्राय=आङ् पूर्वकात् 'श्रिञ् सेवायाम्' इति धातोर्लिट् ॥

भाषाऽर्थः—तब नीलने राक्षस प्रहस्तपर पत्थर फेंका उससे ताड़ित होकर वह मर गया और जमीनपर गिर पड़ा ॥ १११ ॥

तुतुपुर्वानराः सर्वे नेशुश्चित्रा निशाचराः ।
जेरुराशा दशास्यस्य सैन्यं नील नुनाव च ॥ ११२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—सर्वे वानराः तुतुषुः। चित्रा निशाचरा नेशुः। दशास्यस्य आशा जेरुः। सैन्यं नीलं नुनाव च॥

व्याख्या—सर्वे = समस्ताः, वानराः = कपयः, तुतुषुः = तुष्टाः। चित्राः = नानाप्रकाराः, निशाचराः=राक्षसाः, नेशुः=नष्टाः, पलायिता इति भावः। दशाऽऽस्यस्य=रावणस्य, आशाः=मनोरथाः, जेरुः = जीर्णाः। सैन्यं = सेना, नीलं=वानरसेनापतिं, नुनाव च = स्तुतवच्च॥

व्युत्पत्तिः—तुतुषुः = 'तुष प्रीतौ' इति धातोर्लिट्। नेशुः = 'णश अदर्शने' इति धातोर्लिट्। जेरुः = 'जॄष् (झॄष्) वयोहानौ' इति धातोर्लिट्। 'वा जॄभ्रमुत्रसाम्' इत्येत्वाऽभ्यासलोपौ। नुनाव = 'णु स्तुतौ' इति धातोर्लिट्॥

भाषाऽर्थः—सब वानर सन्तुष्ट हुए। अनेक प्रकारके राक्षस भाग गये। रावण के मनोरथ जीर्ण हो गये और वानरसेनाने नील की स्तुति भी की॥ ११२॥

यदा न फेलुः क्षणदाचराणां मनोरथा रामबलाऽभियोगे।
लङ्कां तदा भेजुरुदीर्णदैन्या व्याचख्युरुच्चैश्च हतं प्रहस्तम्॥११३॥

अन्वयः—रामबलाऽभियोगे क्षणदाचराणां मनोरथाः यदा न फेलुः तदा उदीर्णदैन्याः लङ्कां भेजुः प्रहस्तं हतम् उच्चैः व्याचख्युश्च॥

व्याख्या—रामबलाऽभियोगे=रामसैन्यसंग्रामे, क्षणदाचराणां = निशाचराणां, राक्षसानामित्यर्थः। मनोरथाः = अभिलाषाः। यदा = यस्मिन्काले, न फेलुः=न फलिताः, प्रहस्तस्य हतत्वादिति भावः। तदा = तस्मिन्काले, उदीर्णदैन्याः=अतिशयदैन्ययुक्ताः, ते क्षणदाचरा इति भावः। लङ्कां=रावणनगरीं भेजुः = सेवितवन्तः, प्रहस्तं = राक्षससेनापतिं हतं=मारितं, नीलेनेति शेषः। उच्चैः=तारस्वरेण, व्याचख्युश्च = व्याख्यातवन्तश्च रावणायेति शेषः॥

व्युत्पत्तिः—क्षणदाचराणां=क्षणदायां चरन्तीति क्षणदाचरास्तेषां, 'चरेष्ट'इति ट प्रत्ययः। फेलुः = 'फल निष्पत्तौ' इति धातोर्लिट्। उदीर्णदैन्याः = उदीर्णं दैन्यं येषां ते॥

भाषाऽर्थः—रामचन्द्रजी की सेनाके साथ संग्राममें राक्षसोंके मनोरथ जब फलित नहीं हुए, तब बड़ी दीनतासे युक्त होकर वे राक्षस लङ्कामें पहुँचे और उन्हीं ने 'प्रहस्त मारा गया' ऐसा ऊँचे स्वरसे रावण को कहा भी॥ ११३॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये चतुर्थे तिङन्तकाण्डे लक्षणरूपे प्रथमः परिच्छेदः तथा लक्ष्यरूपे कथानके सर्वबन्धो नाम चतुर्दशः सर्गः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ पञ्चदशः सर्गः

राक्षसेन्द्रस्ततोऽभैषीदैक्षिष्ट परितः पुरम्।
प्रातिष्ठिपच्च बोधाऽर्थं कुम्भकर्णस्य राक्षसान्॥ १॥

इतः प्रभृति लुङमधिकृत्य तद्विलसितमाह। तत्र 'लुङ्' इति भूतसामान्ये लुङ्। ततोऽन्यत्राऽपि दर्शयिष्यति।

अन्वयः—ततो राक्षसेन्द्रः, अभैषीत्, परितः ऐक्षिष्ट कुम्भकर्णस्य बोधाऽर्थं राक्षसान् प्रातिष्ठिपच्च॥

व्याख्या—ततः = प्रहस्तवधश्रवणाऽनन्तरं, राक्षसेन्द्रः = रावणः, अभैषीत् = भीतः, एतादृग् विक्रान्तोऽपि हत इति मत्वेति भावः। पुरं = लङ्कां, परितः = सर्वतः, ऐक्षिष्ट = दृष्टवान्, आत्मगोपनस्थानमिति शेषः। कुम्भकर्णस्य=स्वमध्यमाऽनुजस्य, बोधाऽर्थं = प्रबोधनाऽर्थं, राक्षसान् = यातुधानान्, प्रातिष्ठिपच्च = प्रस्थापितवांश्च॥

व्युत्पत्तिः—अभैषीत् = 'ञिभी भये' इति धातोर्लुङ्, 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः। पुरं='परित' इति पदेन योगे 'अभितः परितः समयानिकषाहाप्रतियोगेऽपि" इति द्वितीया। बोधाऽर्थं=बोधायेदं यथा तथेति क्रियाविशेषणम्। प्रातिष्ठिपत् = णिजन्तात् प्रपूर्वकात् 'ष्ठा गतिनिवृत्तौ' इति धातोर्लुङ्। चङ् परे णावुपधाह्रस्वाऽपवादः 'तिष्ठतेरित्' इतीत्वम्। द्वित्वमभ्यासकार्यं, धातोरादेशः षत्वं ष्टुत्वं च॥

भाषाऽर्थः—प्रहस्तवधको सुननेके अनन्तर राक्षसराज रावण डर गया, लङ्काके चारों ओर रक्षाके स्थानको देखने लगा, और उसने कुम्भकर्णको जगानेके लिए राक्षसोंको भेजा भी॥ १॥

तेऽभ्यगुर्भवनं तस्य सुप्तं चैक्षिषताथ तम्।
व्याहार्षुस्तुमुलान् शब्दान् दण्डैश्चावधिषुर्द्रुतम्॥ २॥

अन्वयः—ते तस्य भवनम् अभ्यगुः, अथ तं सुप्तं च ऐक्षिषत; तुमुलान् शब्दान् व्याहार्षुः दण्डैः द्रुतम् अवधिषुश्च॥

व्याख्या—ते = राक्षसाः, तस्य = कुम्भकर्णस्य, भवनं = निकेतनम्, अभ्यगुः= गताः, अथ = गमनाऽनन्तरं, तं = कुम्भकर्णं, सुप्तं च = निद्राणं च, ऐक्षिषत = दृष्टवन्तः, तुमुलान् = महतः, शब्दान् = ध्वनीन्, व्याहार्षुः = व्याहृतवन्तः, दण्डैः = लगुडैः, द्रुतं = शीघ्रम्, अवधिषुश्च = प्रहृतवन्तश्च॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—अभ्यगुः=अभिपूर्वकात् 'इण् गतौ' इति धातोर्लुङ् 'इणो गा लुङि' इति लुङि गाऽऽदेशः 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु'' इति सिचो लुक्, 'उस्यपदान्तात्' इति पररूपत्वम्। व्याहार्षुः=व्याङ्पूर्वकात् 'हृञ् हरणे' इति धातोर्लुङ्। 'सिचि वृद्धिः परस्मैपदेषु' इति सिचि वृद्धि ॥

भाषाऽर्थः—रावणसे भेजे गये राक्षस कुम्भकर्णके भवनमें चले गये और उन्हों ने कुम्भकर्णको सोते देखा। उन्होंने तुमुल शब्द किया और शीघ्रतापूर्वक जगानेके लिए दण्डोंसे कुम्भकर्ण पर प्रहार भी किया ॥ २ ॥

केशानलुञ्चिषुस्तस्य गजान् गात्रेष्वचिक्रमन् ।
शीतैरभ्यषिचंस्तोयैरलातैश्चाऽप्यदम्भिषुः ॥ ३ ॥

अन्वयः—(ते) तस्य केशान् अलुञ्चिषुः, गात्रेषु गजान् अचिक्रमन्; शीतैः तोयैः अभ्यषिचन्, अलातैः अदम्भिषुश्च ॥

व्याख्या—(ते=राक्षसाः) तस्य=कुम्भकर्णस्य, केशान्=शिरोरुहान्, अलुञ्चिषुः=उत्पाटितवन्तः, गात्रेषु=अङ्गेषु, तस्येति शेषः। गजान्=हस्तिनः, अचिक्रमन्=क्रामितवन्तः, शीतैः=शीतलैः, तोयैः=जलैः, अभ्यषिचन्=अभिषिक्तवन्तः, अलातैः=उल्मुकैः, अदम्भिषुश्च=दग्धवन्तश्च ॥

व्युत्पत्तिः—अलुञ्चिषुः='लुञ्च अपनयने' इति धातोर्लुङ्। अचिक्रमन्='क्रमु पादविक्षेपे' इति णिजन्ताद्धातोर्लुङ्। क्रमेर्मान्तत्वान्मित्संज्ञायां ह्रस्वत्वम्। चङि सन्वद्भावादभ्यासस्य 'सन्यत' इति इत्वम्। अभ्यषिचन्=अभिपूर्वकात् 'षिच क्षरणे' इति धातोर्लुङ्। लिपिसिचिह्वश्च' इत्यङ्, 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम्। अदम्भिषुः='दम्भु दम्भने' इति धातोर्लुङ्। अनेकाऽर्थत्वाद्धातूनामत्राऽस्य दाहार्थकत्वं ज्ञेयम् ॥

भाषाऽर्थः—राक्षसोंने कुम्भकर्णके केशोंका उत्पाटन किया, शरीरमें हाथियोंको चलाया, ठण्ढे जलसे सेचन किया और जलती हुई लकड़ियोंसे जलाया भी ॥ ३ ॥

नखैरकर्तिषुस्तीक्ष्णैरदाङ्क्षुर्दशनैस्तथा ।
शितैरतौत्सुः शूलैश्च भेरीश्चाऽवीवदन् शुभाः ॥ ४ ॥

अन्वयः—(ते) तीक्ष्णैः नखैः अकर्तिषुः, तथा तीक्ष्णैः दशनैः अदाङ्क्षुः, शितैः शूलैः अतौत्सुः शुभा भेरीश्च अवीवदन् ॥

व्याख्या—(ते=राक्षसाः) तीक्ष्णैः=निशितैः, नखैः=नखरैः, अकर्तिषुः=छिन्नवन्तः, कुम्भकर्णमिति शेषः। एवं परत्राऽपि। तथा=तेन प्रकारेण, तीक्ष्णैः=निशितैः, दशनैः=दन्तैः, अदाङ्क्षुः=दष्टवन्तः, शितैः=तीक्ष्णैः, शूलैः=आयुध-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विशेषैः, अतौत्सुः = पीडितवन्तः, शुभाः = शोभनाः, भेरीश्च = आनकांश्च, अवीवदन् = वादितवन्तः ॥

व्युत्पत्तिः—अदाङ्क्षुः = अनिटो दंशधातोः 'वदव्रजहलन्तस्याऽचः' इति वृद्धिः 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वम् 'षढोः कः सि' इति कत्वम् । अतौत्सुः = 'तुद व्यथने' इत्यनिटो धातोः पूर्वसूत्रेणैव वृद्धिः । अवीवदन् = णिजन्तात् 'वद व्यक्तायां वाचि' इति धातोर्लुङ् । 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावादभ्यासस्य 'सन्यतः' इतीत्वम् , 'दीर्घो लघोः' इति दीर्घत्वम् । 'अनीनदन्' इति मल्लिनाथसम्मतः पाठस्तस्य अनादयन्निरयर्थः । उभयत्राऽप्युपपन्नत्वम् ॥

भाषाऽर्थः—राक्षसोंने कुम्भकर्ण को तीक्ष्ण नखोंसे फाड़ा उसी तरहसे तीक्ष्ण दाँतोंसे नोच डाला; तीक्ष्ण शूलोंसे पीडित किया और सुन्दर भेरियों को भी बजाया ॥ ४ ॥

स तान् नाऽजीगणत् सर्वानिच्छयाऽबुद्ध च स्वयम् ।
अबूबुधत कस्मान् मामप्राक्षीच्च निशाचरान् ॥ ५ ॥

अन्वयः—स तान् सर्वान् न अजीगणत् स्वयम् इच्छया अबुद्ध च, 'मां कस्मात् अबूबुधत' (इति) निशाचरान् अप्राक्षीच्च ॥

व्याख्या—सः = कुम्भकर्णः, तान् = पूर्वोल्लिखितान् , सर्वान् = सकलान् , प्रबोधोपायानिति भावः । न अजीगणत् = नो वेदितवानिति भावः । स्वयम् = आत्मना, इच्छया = वाञ्छया, अबुद्ध च = प्रवुद्धश्च, मां कुम्भकर्णं, कस्मात् = कुतः, हेतोरिति भावः । अबूबुधत = प्रबोधितवन्तः, यूयमिति भावः । (इति = एवम्) निशाचरान् = राक्षसान् , अप्राक्षीच्च = पृष्टवांश्च ।

व्युत्पत्तिः—अजीगणत् = 'गण संख्याने' इति स्वार्थिकणिजन्ताद्धातोर्लुङ् । अदन्तस्याऽभ्यासस्य 'ई च गणः' इतीत्वम् । अबुद्ध = 'बुध अवगमने' इति धातोर्लुङ् । 'दीपजनबुधे'त्यादिना चिणभावपक्षे रूपम् । 'झलो झलि' इति सिचो लोपः 'झषस्तथोर्धोऽधः' इति तस्य धः, जश्त्वम् । अबूबुधत = बुधेर्ण्यन्तस्य मध्यमपुरुषबहुवचने 'णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वत्वम् , अभ्यासस्य 'दीर्घो लघोः' इति दीर्घत्वं च । अप्राक्षीत् = 'प्रच्छ ज्ञीप्सायाम्' इति धातोर्लुङ्, 'वदव्रजहलन्तस्याऽचः' इति वृद्धिः 'व्रश्चे' त्यादिना षत्वं 'षढोः कः सि' इति कत्वं च ॥

भाषाऽर्थः—कुम्भकर्णने जगानेके उन सब उपायोंको नहीं जाना, वह स्वयम् इच्छासे जागा । उसने 'तुम लोगोंने मुझे क्यों जगाया ?' इस प्रकार से राक्षसोंसे पूछा भी ॥ ५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेऽभाषिषत राजा त्वां दिदृक्षुः क्षणदाचर ! ।
सोऽस्नासीद्व्यलिपन्मांसमप्सासीद्वारुणीमपात् ।। ६ ।।

अन्वयः—ते 'हे क्षणदाचर ! राजा त्वां दिदृक्षुः' (इति) अभाषिषत । सः अस्नासीत्, व्यलिपत्, मांसम् अप्सासीत्, वारुणीम् अपात् ॥

व्याख्या—ते = राक्षसाः, कुम्भकर्णपृष्टा इति भावः । हे क्षणदाचर = हे राक्षस !, राजा = रावणः; त्वां = भवन्तं, दिदृक्षुः = द्रष्टुमिच्छुः, अस्तीति शेषः । (इति = एवम्) अभाषिषत = भाषितवन्तः । सः=कुम्भकर्णः, अस्नासीत् = स्नातवान्, व्यलिपत् = समालिप्तवान्, चन्दनादिकेनेति शेषः । मांसं = पललम्, अप्सासीत् = भक्षितवान्, वारुणीं = मदिराम्, अपात् = पीतवान् ॥

व्युत्पत्तिः—क्षणदाचर = क्षणं ददातीति क्षणदा, 'निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा' इत्यमरः । क्षणदायां चरतीति क्षणदाचरस्तत्सम्बुद्धौ । 'चरेष्ट' इति टप्रत्ययः । त्वां = दिदृक्षुरिति कृदन्तपदेन योगे 'कर्तृकर्मणोः कृति' इति प्राप्तायाः कारकषष्ठ्या 'न लोकाऽव्ययनिष्ठाखलर्थतृनाम्' इति निषेधः । दिदृक्षुः = 'सनाशंसभिक्ष उः' इति उप्रत्ययः । अभाषिषत = 'भाष व्यक्तायां वाचि' इति धातोर्लुङ् अस्नासीत् = 'ष्णा शौचे' इति धातोर्लुङ् 'यमरमनमातां सक् चे'ति सगिटौ । व्यलिपत् = विपूर्वकात् 'लिप उपदेहे' इति धातोर्लुङ् । 'लिपिसिचिह्वश्चे'ति सूत्रेण अङ्, अप्सासीत् = 'प्सा भक्षणे' इति धातोर्लुङ्, पूर्ववत्सगिटौ । अपात् = 'पा पाने' इति धातोर्लुङ् 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक् ॥

भाषाऽर्थः—राक्षसोंने 'हे राक्षस (कुम्भकर्ण) ! महाराज रावण आपको देखना चाहते हैं' ऐसा कहा । तब कुम्भकर्णने स्नान किया । चन्दनादिका लेपन किया, मांस खाया और मदिरापान भी कर लिया ॥ ६ ॥

न्यवसिष्ट ततो द्रष्टुं रावणं प्रावृतद् गृहात् ।
राजाऽऽयान्तं तमद्राक्षीदुदस्थाच्चेषदासनात् ।। ७ ।।

अन्वयः—ततः (सः) रावणं द्रष्टुं न्यवसिष्ट, गृहात् प्रावृतत् । राजा आयान्तं तम् अद्राक्षीत् आसनात् ईषत् उदस्थाच्च ॥

व्याख्या—ततः = स्नानाद्यनन्तरं, रावणं = स्वाऽग्रजं, द्रष्टुं = विलोकयितुं, न्यवसिष्ट = परिहितवान्, राजदर्शनयोग्यं वस्त्रमिति भावः, कुम्भकर्ण इति शेषः; एवमुत्तरवाक्येऽपि । गृहात् = स्वभवनात्, प्रावृतत् = प्रवृत्तः । राजा = भूपः, रावण इत्यर्थः । आयान्तम् = आगच्छन्तं, तं = कुम्भकर्णम्, अद्राक्षीत् = दृष्टवान्, आसनात् = सिंहासनात्, ईषत् = स्तोकम्, उदस्थाच्च = उत्थितश्च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—न्यवसिष्ट = निपूर्वकात् 'वस आच्छादने' इति धातोर्लुङ् । प्रावृतत् = प्रपूर्वकात् 'वृतु वर्तने' इति धातोर्लुङ् 'द्युद्भ्यो लुङि' इति परस्मैपदम्, 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यङ् । अद्राक्षीत् = 'दृशिर् प्रेक्षणे' इति धातोर्लुङ् 'सृजिदृशोर्झल्यमकिति' इत्यम्, हलन्तलक्षणा वृद्धिश्च । 'इरितो वा' इति अङ्पक्षे अदर्शत् । उदस्थात् = उत्पूर्वकात् 'ष्ठा गतिनिवृत्तौ' इति धातोर्लुङ् । 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक्, ऊर्ध्वकर्मकत्वात् 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदं न ॥

भाषाऽर्थः—तब कुम्भकर्णने रावणका दर्शन करने के लिए कपड़ा पहना। वह भवनसे निकला। राजा रावण आते हुए उसको देखकर आसनसे कुछ उठा॥

अतुषत्पीठमासन्ने निरदिक्षच्च काञ्चनम् ।
अस्मेष्ट कुम्भकर्णोऽल्पमुपाविक्षदथाऽन्तिके ॥ ८ ॥

अन्वयः—(राजा) अतुषत्, आसन्ने काञ्चनं पीठं निरदिक्षच्च । कुम्भकर्णः अल्पम् अस्मेष्ट, अथ अन्तिके उपाविक्षत् ॥

व्याख्या—अतुषत् = तुष्टः, राजेति शेषः । आसन्ने = समीपे, काञ्चनं = सौवर्णं, पीठम् = आसनं, निरदिक्षद् = आदिष्टवान्, कुम्भकर्णः = रावणमध्यमाऽनुजः, अल्पम् = ईषत्, अस्मेष्ट = हसितवान्, अथ = अनन्तरम्, अन्तिके = समीपे, उपाविक्षत् = उपविष्टः ॥

व्युत्पत्तिः—अतुषत् = 'तुष प्रीतौ' इति धातोर्लुङ्, पुषादित्वादङ् । निरदिक्षत् = निरुपसर्गपूर्वकात् 'दिश अतिसर्जने' इति धातोर्लुङ् 'शल इगुपधादनिटः क्सः' इति क्सः । अस्मेष्ट = 'स्मिङ् ईषद्धसने' इति धातोर्लुङ् । उपाविक्षत् = उपपूर्वकात् 'विश प्रवेशने' इति धातोर्लुङ् पूर्ववत् क्सः ॥

भाषाऽर्थः—रावण प्रसन्न हुआ और उसने कुम्भकर्णको बैठने के लिए सुवर्णमय आसनका निर्देश किया। कुम्भकर्ण कुछ हँसा और रावणके निकट बैठ गया॥

अवादीन्मां किमित्याह्वो राज्ञा च प्रत्यवादि सः ।
मा ज्ञासीस्त्वं सुखी रामो यदकार्षीत्स रक्षसाम् ॥ ९ ॥

अन्वयः—'मां किमिति आह्वः' (इति) कुम्भकर्णः अवादीत् । राज्ञा स प्रत्यवादि—'त्वं सुखी, स रामो रक्षसां यत् अकार्षीत्, (तत्) मा ज्ञासीः ॥

व्याख्या—मां = कुम्भकर्णं, किमिति = कस्मात्कारणात्, आह्वः = आहूतवान्, त्वमिति शेषः । (इति=एवं,) कुम्भकर्णः रावणमध्यमभ्राता । अवादीत् = उक्तवान् । राज्ञा = रावणेन, सः = कुम्भकर्णः, प्रत्यवादि = प्रत्युक्तः । त्वं = कुम्भकर्णः, सुखी = सुखोपेतः, सः = जनप्रसिद्धः, रामः = रामचन्द्रः, रक्षसां = राक्षसानां, यत् =

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशाऽन्तरम्, अकार्षीत् = कृतवान् (तत् = दशान्तरम्) (त्वं = कुम्भकर्णः) मा ज्ञासीः = न ज्ञातवान्, स्वकुलदीनदशाया अज्ञानात्त्वं सुखीति तात्पर्यम् ।

व्युत्पत्तिः—आह्वः = आङ्पूर्वकात् 'ह्वेञ् स्पर्धायां शब्दे चे' ति धातोर्लुङ् । 'लिपिसिचिह्वश्चे' त्यङ् । 'आतो लोप इटि चे' त्यातो लोपः । अवादीत् = 'वद व्यक्तायां वाचि' इति धातोर्लुङ् 'वदव्रजहलन्तस्याऽचः' इति वृद्धिः । प्रत्यवादि = प्रतिपूर्वाद्वदधातोः कर्मणि लुङ्, "चिण् भावकर्मणोः' इति चिण् 'चिणो लुक्' इति तलोपः । अकार्षीत् = 'डुकृञ् करणे' इति धातोर्लुङ्, 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः । ज्ञासीः = माङि उपपदे 'ज्ञा अवबोधने' इति धातोः 'माङि लुङ्' इति लुङ् 'न माङ्योगे' इत्यडागमनिषेधः । 'यमरमनमातां सक् च' इति सगिटौ ॥

भाषाऽर्थः—'आपने मुझको क्यों बुलाया ?' कुम्भकर्णने रावणको ऐसा कहा। राजा रावणने उसे उत्तर दिया—'तुम सुखी हो, जो कि प्रसिद्ध रामने राक्षसोंकी जो अवस्थाकी, उसे नहीं जानते हो ॥ ९ ॥

उदतारीदुदन्वन्तं पुरं नः परितोऽरुधत् ।
व्यद्योतिष्ट रणे शस्त्रैरनैषीद्राक्षसान् क्षयम् ॥ १० ॥

अन्वयः—(रामः) उदन्वन्तम् उदतारीत्, नः पुरं परितः अरुधत्, रणे शस्त्रैः व्यद्योतिष्ट, राक्षसान् क्षयम् अनैषीत् ॥

व्याख्या— उदन्वन्तं = समुद्रम्, उदतारीत् = उत्तीर्णः, राम इति शेषः । एवं परत्राऽपि नः = अस्माकं, पुरं = नगरीं, परितः = सर्वतः, अरुधत् = रुद्धवान्, रणे = युद्धे, शस्त्रैः = आयुधैः, व्यद्योतिष्ट = विद्योतितवान्, राक्षसान् = यातुधानान्, क्षयं = नाशम्, अनैषीत् = नीतवान् ॥

व्युत्पत्तिः—उदन्वन्तम् = उदकानि सन्त्यस्मिन्निति उदन्वान्, तम् । 'उदन्वानुदधौ चे' ति मत्वन्तो निपातितः । 'उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः' इत्यमरः । उदतारीत् = उत्पूर्वकात् 'तॄ प्लवनसन्तरणयोः' इति धातोर्लुङ् 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः । पुरं = 'परित' इति पदेन योगे 'अभितः परितः समयानिकषाहाप्रतियोगेऽपि' इति द्वितीया । अरुधत् = 'रुधिर् आवरणे' इति धातोर्लुङ् । 'इरितो वा' इति च्लेरङ् । व्यद्योतिष्ट = विपूर्वकात् 'द्युत दीप्तौ' इति धातोर्लुङ् । 'द्युद्भ्यो लुङी'ति विकल्पेन परस्मैपदविधानात् पक्षे तदभावः । राक्षसान् = नीधातोः प्रधानं कर्म । क्षयम् = अप्रधानं कर्म । अनैषीत् = 'णीञ् प्रापण" इति धातोर्लुङ्, सिचि वृद्धिः ॥

भाषाऽर्थः—रामने समुद्रतरण किया, हमारे शहरको चारों ओर रुद्ध किया । वह युद्धमें शस्त्रोंसे प्रकाशमान हुआ । उसने राक्षसोंको नष्ट कर दिया ॥ १० ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न प्रावोचमहं किञ्चित्प्रियं यावदजीविषम् ।
बन्धुस्त्वमर्चितः स्नेहान् मा द्विषो न वधीर्मम ॥ ११ ॥

अन्वयः—यावत् अहम् अजीविषं (तावत्) किञ्चित् प्रियं न प्रावोचम् । स्नेहात् अर्चितो बन्धुः त्वं मम द्विषो मा न वधीः ॥

व्याख्या—(हे भ्रातः) यावत्=यत्कालं यावत् , अहं=रावणः, अजीविषं= जीवितवान् , परैरनाक्रान्तत्वेनेति शेषः । (तावत्=तत्कालं यावत्) किञ्चित्=किमपि, प्रियम्=अभीष्टं, प्रार्थनारूपेणेति शेषः । न प्रावोचं=न प्रोक्तवान् । किन्तु स्नेहात्= प्रेम्णा, अर्चितः=पूजितः, सत्कृत इति भावः । बन्धुः=भ्राता, त्वं=कुम्भकर्णः, मम= रावणस्य, द्विषः=शत्रून् , रामादीनिति भावः । मा न वधीः=मा न मारय, किन्तु मारयेति तात्पर्यम् ॥

व्युत्पत्तिः—अजीविषं='जीव प्राणधारणे' इति धातोर्लुङ् । प्रियम्='अभी- ष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ।' इत्यमरः । प्रावोचं='ब्रूञ् व्यक्तायां वाचि' इति धातोर्लुङ् , आर्धधातुकाऽधिकारे 'ब्रुवो वचिः' इति वच्यादेशः 'अस्य- तिवक्तिख्यातिभ्योऽङ' इत्यङ् 'वच उम्' इत्युम् । मा वधीः=माङि उपपदे हनधातोर्लुङ् 'लुङि चे'ति हनो वधादेशः ॥

भाषाऽर्थः—(हे भाई !) जब तक मैं (शत्रुसे अनाक्रान्त हो) जीता रहा तब तक मैंने किसी भी अभीष्ट विषयकी प्रार्थना नहीं की । स्नेहसे सत्कृत बन्धु तुम मेरे शत्रुओंको नहीं मारो यह नहीं (बल्कि मार डालो) ॥ ११ ॥

वीर्यं मा न दद्र्शस्त्वं मा न त्रास्थाः क्षतां पुरम् ।
तवाऽद्राक्ष्म वयं वीर्यं त्वमजैषीः पुरा सुरान् ॥ १२ ॥

अन्वयः—(हे भ्रातः !) त्वं वीर्यं मा न दद्र्शः, क्षतां पुरं मा न त्रास्थाः, वयं तव वीर्यं अद्राक्ष्म । पुरा त्वं सुरान् अजैषीः ॥

व्याख्या—(हे भ्रातः) त्वं=कुम्भकर्णः, वीर्यं=पराक्रमं, मा न दद्र्शः= नो दर्शय (इति) न, किन्तु दर्शय, क्षतां=शत्रुपीडितां, पुरं=नगरीं, लङ्कामिति भावः । मा न त्रास्थाः=नो त्रायस्व (इति) न, किन्तु त्रायस्व । वयं=रावणादयो राक्षसाः, तव=भवतः, वीर्यं=पराक्रमम्, अद्राक्ष्म=दृष्टवन्तः । पुरा=प्राक् , त्वं=कुम्भकर्णः, सुरान्=देवान् , अजैषीः=जितवानसि ॥

व्युत्पत्तिः—मा दद्र्शः=माङि उपपदे ण्यन्तस्य दृश्धातोः 'माङि लुङ्' चङि सिपि रूपम् । सन्वद्भावाभावान्न सनीव कार्यम् । मा त्रास्थाः=माङि उपपदे 'त्रैङ् पालने' इति धातोर्लुङ् । अद्राक्ष्म=दृश्धातोर्लुङ् , 'शल इगुपधादनिटः क्स'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति प्राप्तस्य च्लेः क्सादेशस्य 'न दृशः' इति निषेधः। 'इरितो वा' इति विकल्पेनाङ्विधानात्तदभावपक्षे रूपम्। अजैषीः = जिधातोर्लुङ्, 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः॥

भाषाऽर्थः—हे भाई ! तुम पराक्रम मत दिखाओ यह नहीं (बल्कि दिखाओ) शत्रुओंसे पीडित लङ्काकी रक्षा मत करो यह नहीं (बल्कि करो)। हम लोग तुम्हारे पराक्रमको देख चुके हैं। पहले तुमने देवताओंको पराजित किया था ॥१२॥

अवोचत्कुम्भकर्णस्तं वयं मन्त्रेऽभ्यधाम यत्।
न त्वं सर्वं तदश्रौषीः फलं तस्येदमागमत्॥ १३॥

अन्वयः—कुम्भकर्णः तम् अवोचत्—'वयं मन्त्रे यत् अभ्यधाम, त्वं तत् सर्वं न अश्रौषीः; तस्य इदं फलम् आगमत्॥

व्याख्या—कुम्भकर्णः = रावणमध्यमाऽनुजः, तं = रावणम्, अवोचत् = उक्तवान्, वयं = नीतिज्ञाः, मन्त्रे = मन्त्रसमये, यत् = वचनं 'क्रियासमारम्भगतोऽभ्युपायः' (१२-६२) इत्यादिवाक्यकदम्बरूपमिति भावः। अभ्यधाम = अभिहितवन्तः, त्वं = रावणः, तत् = पूर्वाऽभिहितं, सर्वं = सकलं, वचनमिति भावः, न अश्रौषीः = न श्रुतवानसि, तस्य = अश्रवणस्य, इदं=सन्निहितं, फलं=विनाशरूपम्, आगमत् = आगतम्॥

व्युत्पत्तिः—अभ्यधाम = अभिपूर्वकात् 'डुधाञ् धारणपोषणयोः' इति धातोर्लुङ्। 'गतिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक्। अश्रौषीः = 'श्रु श्रवणे' इति धातोर्लुङ् 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः। आगमत् = आङ्पूर्वकात् 'गम्लृ गतौ' इति धातोर्लुङ्। लृदित्वात् 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' इत्यङ्॥

भाषाऽर्थः—कुम्भकर्णने रावणको कहा—'हमने परामर्शकालमें जो कहा था, आपने वह सब नहीं सुना। उसका यह फल आ गया॥ १३॥

प्राज्ञवाक्यान्यवामंस्था मूर्खवाक्येष्ववास्थिथाः।
अध्यगीष्ठाश्च शास्त्राणि प्रत्यपत्था हितं न च॥ १४॥

अन्वयः—(त्वम्) प्राज्ञवाक्यानि अवामंस्थाः, मूर्खवाक्येषु अवास्थिथाः; शास्त्राणि अध्यगीष्ठाः हितं च न प्रत्यपत्थाः॥

व्याख्या—प्राज्ञवाक्यानि = विद्वद्वचनानि, विभीषणादिवाक्यानीति भावः। अवामंस्थाः = अवज्ञातवानसि त्वमिति शेषः, एवमुत्तरवाक्येष्वपि। मूर्खवाक्येषु= अज्ञवचनेषु, प्रहस्तादिवाक्येष्विति भावः। अवास्थिथाः=अवस्थितोऽसि। शास्त्राणि=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नीतिशास्त्राणि, अध्यगीष्ठाः = अधीतवानसि, परं हितं च = पथ्यं च, न प्रत्यपत्थाः = नो प्रतिपन्नवानसि ॥

व्युत्पत्तिः—प्राज्ञवाक्यानि = प्रज्ञास्ति एषां ते प्राज्ञाः, 'प्रज्ञाश्रद्धाऽर्चाभ्यो णः' इति णः । 'धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः' इत्यमरः । प्राज्ञानां वाक्यानि, तानि । अवामंस्थाः = अवपूर्वकात् 'मन ज्ञाने' इति धातोर्लुङ् । अवास्थिथाः = अवपूर्वकात् स्थाधातोर्लुङ् । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् । 'स्थाघ्वोरिच्च' इतीत्वं सिचः कित्वं च । अध्यगीष्ठाः = अधिपूर्वात् 'इङ् अध्ययने' इति धातोर्लुङ् 'विभाषा लुङ्लृङोः' इति इङो गाङादेशः । प्रत्यपत्थाः = प्रतिपूर्वकात् 'पद गतौ' इति धातोर्लुङ् 'झलो झलि' इति सिचो लोपः ॥

भाषाऽर्थः—आपने बुद्धिमानोंके वाक्योंका अपमान किया और मूर्खोंके वाक्योंमें अवस्थिति की । आपने शास्त्रोंका अध्ययन किया परन्तु अपना हित नहीं जाना ॥ १४ ॥

मूर्खास्त्वामववञ्चन्त ये विग्रहमचीकरन् ।
अभाणीन्माल्यवान् युक्तमक्षंस्थास्त्वं न तन्मदात् ॥ १५ ॥

अन्वयः—ये विग्रहम् अचीकरन् (ते) मूर्खाः त्वाम् अववञ्चन्त । माल्यवान् युक्तम् अभाणीत् , त्वं मदात् तत् न अक्षंस्थाः ॥

व्याख्या—ये = प्रहस्ताऽऽदयः, विग्रहं = संग्रामम्, अचीकरन् = कारितवन्तः, भवन्तमिति शेषः । ते मूर्खाः = मूढाः, त्वां = भवन्तम्, अववञ्चन्त = वञ्चितवन्तः । माल्यवान् = मातामहः, युक्तम् = उचितम्, अभाणीत् = भणितवान् । त्वं = रावणः, मदात् = गर्वात् , तत् = माल्यवदुक्तं वचनं, न अक्षंस्थाः = न सोढवानसि ॥

व्युत्पत्तिः—अचीकरन् = णिजन्तात् कृञ्धातोर्लुङ् । अववञ्चन्त = ण्यन्तात् 'वञ्चु प्रलम्भने' इति धातोर्लुङ् । 'गृधिवञ्च्योः प्रलम्भने' इति आत्मनेपदम् । अभाणीत् = 'भण शब्दे' इति धातोर्लुङ् 'इट ईटि' इति सिचो लोपः । अक्षंस्थाः = 'क्षमूष् सहने' इति धातोर्लुङ् ॥

भाषाऽर्थः—जिन्होंने आपसे युद्ध करवाया उन मूर्खोंने आपको प्रतारित किया । मातामह माल्यवान्ने उचित कहा था, परन्तु आपने मदसे उनके वाक्यका सहन नहीं किया ॥ १५ ॥

राघवस्याऽमुसः कान्तामाप्तैरुक्तो न चाऽऽर्पिपः ।
मा नाऽनुभूः स्वकान् दोषान् मा मुहो मा रुषोऽधुना ॥ १६ ॥

अन्वयः—राघवस्य कान्ताम् अमुसः, आप्तैः उक्तश्च न आर्पिपः, स्वकान् दोषान् मा अनुभूः (इति) न । अधुना मा मुहः, मा रुषः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—प्रमादित्वमपि तेऽस्तीति प्रतिपादयति—राघवस्य=रामस्य, कान्तां=प्रियां, सीतामिति भावः। अमुसः=खण्डितवानसि, इदमेव खण्डनं यत्पत्न्या रामेण वियोजनम्। आप्तैः=विश्वस्तैः, विभीषणादिभिरिति भावः। उक्तश्च=अभिहितोऽपि, 'प्रत्यर्प्यताम्' इतीति शेषः। न आर्पिपः=न अर्पितवानसि, स्वकान्=आत्मीयान्, दोषान्=दूषणानि, दुश्चारितानीति भावः। मा अनुभूः=नो अनुभव, (इति) न, अपि त्वनुभव। अधुना=सम्प्रति, मा मुहः=मोहं मा गमः, मा रुषः=रोषं मा कार्षीः, गतशोचनं विहाय धैर्यं धारयेति भावः॥

व्युत्पत्तिः—अमुसः='मुस खण्डने' इति धातोर्लङ्, पुषादित्वादङ्। 'आत्रेयस्तु' कातन्त्रे मूर्धन्यान्तोऽयम्। तथा च 'राघवस्याऽमुषः कान्ताम्' इति भट्टिकाव्ये प्रयोगश्चेति पाठान्तरमप्याह। आप्तैः='आप्तः प्रत्ययितः समौ' इत्यमरः। आर्पिपः='ऋ गतौ' इति धातोर्णौ लुङि 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इति पुक्, गुणः। चङि 'द्विर्वचनेऽचि' इति स्थानिवद्भावात् 'अजादेर्द्वितीयस्य' इति पिशब्दस्य द्वित्वम्। रेफस्य तु 'न न्द्राः संयोगादय' इति द्वित्वनिषेधः। मा अनुभूः=माङि उपपदे 'माङि लुङ्' इति लुङ्। 'न माङ्योगे' इत्यडागमनिषेधः 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक्। मा मुहः=माङि उपपदे 'मुह वैचित्ये' इति धातोः; तथा मा रुषः='रुष (रिष) हिंसायाम्' इति धातोः माङि लुङ्। 'न माङ्योगे' इत्यडागमनिषेधः। उभयत्राऽपि पुषादित्वादङ्॥

भाषाऽर्थः—आपने रामचन्द्रकी पत्नीका हरण किया, विश्वस्त विभीषण आदियोंसे कहे जाने पर भी नहीं लौटाया। अपने दोषोंका अनुभव नहीं किया यह नहीं (बल्कि किया)। अभी आप मोह और क्रोध मत करें॥ १६॥

तस्याऽप्यत्यक्रमीत्कालो यत्तदाऽहमवादिषम्।
अघानिषत रक्षांसि परैः कोशांस्त्वमव्ययीः॥ १७॥

अन्वयः—अहं तदा यत् अवादिषं, तस्याऽपि कालः अत्यक्रमीत्। परैः रक्षांसि अघानिषत, त्वं कोशान् अव्ययीः॥

व्याख्या—अहं=कुम्भकर्णः, तदा=तस्मिन्काले, मन्त्रणासमय इति भावः। यत्=वचनम्, 'रामेण सह सन्धिः क्रियताम्' इत्याकारकमिति भावः। अवादिषम्=उक्तवानस्मि, तस्याऽपि=तद्वचनस्यापि, कालः=समयः, सन्धिसमय इति भावः, अत्यक्रमीत्=अतिक्रान्तः, यत् परैः=शत्रुभिः, रक्षांसि=राक्षसाः, अघानिषत=हतानि, त्वं=रावणः, कोशान्=कोशस्थद्रव्याणि, अव्ययीः=व्ययितवानसि, लङ्कादाहे कोशस्याऽरक्षितत्वादिति भावः॥

व्युत्पत्तिः—अत्यक्रमीत्=अतिपूर्वकात् 'क्रमु पादविक्षेपे' इति धातोर्लुङ्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'स्नुक्रमोरनात्मनेपदनिमित्ते' इतीट्। मान्तत्वाद् वृद्धिप्रतिषेधः। अघानिषत=हन्-धातोः कर्मणि लुङ्। 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च' इति चिण्वद्भावाद् वृद्धिघत्वे। अव्ययीः='व्यय वित्तसमुत्सर्गे' इति चौरादिकाद्धातोर्लुङ् 'आधृषाद्वा' इति णिजभावपक्षे रूपम्। 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति वृद्धिप्रतिषेधः। धातूनामनेकाऽर्थत्वात् 'व्यय गतौ' इति धातोर्वा रूपम् ॥

भाषाऽर्थः—मैंने उस समय जो कहा था, उसका समय (सन्धिकाल) भी बीत चुका, क्योंकि शत्रुओंने राक्षसोंको मार डाला और आप कोशोंको भी व्यय कर चुके ॥ १७ ॥

सन्धानकारणं तेजो न्यगभूत्तेऽकृथास्तथा।
यत्त्वं वैराणि कोशं च सहदण्डमजिग्लपः ॥ १८ ॥

अन्वयः—(त्वम्) तथा अकृथाः (यथा) ते सन्धानकारणं तेजो न्यक् अभूत्। यत् त्वं वैराणि कोशं च सहदण्डम् अजिग्लपः ॥

व्याख्या—तथा = तेन प्रकारेण, अकृथाः = कृतवानसि त्वमिति शेषः। (यथा= येन प्रकारेण) ते = तव, सन्धानकारणं = सन्धिहेतुकं, तेजः = प्रचण्डत्वं, न्यक् = खर्वम्, अभूत् = भूतम्। कुत इत्याह—यत् त्वं = रावणः, वराणि = शत्रुभावान्, कोशं च = अर्थसमूहं च, सहदण्डं = ससैन्यम्, अजिग्लपः=ग्लपितवानसि ॥

व्युत्पत्तिः—अकृथाः=कृधातोर्लुङ् 'तनादिभ्यस्तथासोः' इति सिचो लुक्। न्यक्='न्यङ्नीचखर्वह्रस्वाः स्युः' इत्यमरः। अभूत्=भूधातोर्लुङ्, 'गतिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक्; अजिग्लपः='ग्लै (म्लै) हर्षक्षये' इति धातोर्णिजन्तात् लुङ्। 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इति पुकि 'ग्लास्नावनुवमां च'ेति मित्वाद्ध्रस्वत्वं। ततो लुङि चङि णिलोपः ॥

भाषाऽर्थः—आपने वैसा किया, जिस तरहसे आपका सन्धान-कारण तेज खर्व हो गया; जो कि आपने वैरोंको और खजाना को भी सेनाके साथ क्षीण कर दिया ॥ १८ ॥

अक्रुधच्चाऽभ्यधाद्वाक्यं कुम्भकर्णं दशाननः।
किं त्वं मामजुगुप्सिष्ठा नैदिधः स्वपराक्रमम् ॥ १९ ॥

अन्वयः—दशाननः अक्रुधत्, कुम्भकर्णं वाक्यं च—अभ्यधात्—'किं त्वं माम् अजुगुप्सिष्ठाः, स्वपराक्रमं न ऐदिधः ॥'

व्याख्या—दशाऽऽननः = रावणः, अक्रुधत् = अकुप्यत्, कुम्भकर्णं = स्वमध्यमाऽनुजं, वाक्यं च = पदसमूहं च, अभ्यधात् = अभिहितवान्। किं = किमिति,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वं=कुम्भकर्णः, मां=रावणम्, अजुगुप्सिष्ठाः=निन्दितवानसि, स्वपराक्रमम्=आत्मविक्रमं, न ऐदिधः=न वर्धितवानसि ॥

व्युत्पत्तिः—अक्रुधत=‘क्रुध क्रोधे’ इति धातोर्लुङ्, पुषादित्वादङ्। अभ्यधात्=अभिपूर्वकाद्धातोर्लुङ् ‘गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु’ इति सिचो लुक्। ऐदिधः=‘एध वृद्धौ’ इति णिजन्ताद्धातोर्लुङ्। चङि स्थानिवद्भावात् ‘अजादेर्द्वितीयस्ये’ति धिशब्दस्य द्वित्वम् ॥

भाषाऽर्थः—रावण क्रुद्ध हुआ और उससे कुम्भकर्णको वचन भी कहा—‘क्यों तुमने मेरी निन्दा की और तुम अपने पराक्रमको नहीं बढ़ाते हो’ ॥ १९ ॥

मोज्जिग्रहः सुनीतानि मा स्म क्रंस्था न संयुगे ।
मोपालब्धाः कृतैर्दोषैर्मा न वाक्षीर्हितं परम् ॥ २० ॥

अन्वयः—सुनीतानि मा उज्जिग्रहः। संयुगे मा स्म क्रंस्था (इति) न; कृतैः दोषैः मा उपालब्धाः हितं परं मा वाक्षीः (इति) न ॥

व्याख्या—सुनीतानि=सुनीतीः, मा उज्जिग्रहः=नो उद्ग्राहय नोपदिशेत्यर्थः। संयुगे=युद्धे विषये, मास्म क्रंस्थाः=नो उत्सहस्व, (इति) न, अपि तु उत्सहस्वेति भावः। कृतैः=विहितैः, अस्माभिरिति शेषः, दोषैः=दूषणैः, मा उपालब्धाः=न उपालभस्व। हितं=पथ्यं, परम्=उत्तरं कर्म, युद्धमिति भावः। मा वाक्षीः=नो वह, (इति) न, किन्तु वहेति भावः ॥

व्युत्पत्तिः—मा उज्जिग्रहः=माङि उपपदे ग्रहेर्ण्यन्तस्य ‘माङि लुङ्’ इति लुङि चङि रूपम्। मा स्म क्रंस्थाः=‘स्मोत्तरे लुङ् चे’ति चकाराल्लुङ्। ‘वृत्तिसर्गतायनेषु क्रम’ इति क्रमेः सर्गे (उत्साहे) तङ्। मा उपालब्धाः=माङि उपपदे उपपूर्वकात् ‘डुलभष् प्राप्तौ’ इति धातोर्लुङ्। ‘झलो झलि’ इति सिचो लोपः ‘झषस्तथोर्धोऽधः’ इति धत्वं ‘झलां जश् झशि’ इति जश्त्वम्। मा वाक्षीः=माङि उपपदे ‘वह प्रापणे’ इति धातोर्लुङ्। ‘वदव्रजहलन्तस्याऽचः’ इति वृद्धि ढत्वकत्वषत्वानि च ॥

भाषाऽर्थः—उत्तम नीतियों का ग्रहण मत कराओ, युद्धमें उत्साह मत करो नहीं, बल्कि करो। किये गये दोषोंसे उलहना मत दो। हित युद्ध को नहीं करो यह नहीं बल्कि करो ॥ २० ॥

कुम्भकर्णस्ततोऽगर्जीद्भटांश्चाऽन्यान्न्यवीवृतत् ।
उपायंस्त महाऽस्त्राणि निरगाच्च द्रुतं पुरः ॥ २१ ॥

अन्वयः—ततः कुम्भकर्णः अगर्जीत्, अन्यान् भटांश्च न्यवीवृतत्; महाऽस्त्राणि उपायंस्त पुरो द्रुतं निरगाच्च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—ततः = रावणवाक्याऽनन्तरं, कुम्भकर्णः = रावणमध्यमाऽनुजः, अगर्जीत् = गर्जितवान्, अन्यान् = अपरान्, भटांश्च = योधांश्च, न्यवीवृतत् = निवर्तितवान्, महाऽस्त्राणि = बृहदायुधानि, उपायंस्त = स्वीकृतवान्, पुरः = नगर्याः, लङ्काया इति भावः। द्रुतं=शीघ्रं, निरगाच्च = निर्गतश्च ॥

व्युत्पत्तिः—अगर्जीत् = 'गर्ज शब्दे' इति धातोर्लुङ्। न्यवीवृतत्=निपूर्वकात् 'वृतु वर्तने' इति धातोर्णिचि लुङ्। लघूपधगुणं बाधित्वा 'उऋत्' इति ऋत्वम्, पक्षान्तरे न्यववर्तत्। उपायंस्त = उपाङ्पूर्वाद्यम्धातोर्लुङ् 'उपाद्यमः स्वकरणे' इत्यात्मनेपदम्। अत्र स्वकरणमौपचारिकम्। यद्वा 'समुदाङ्भ्यो यमोऽग्रन्थे' इति आत्मनेपदम्। निरगाच्च = निरुपसर्गपूर्वकात् 'इण् गतौ' इति धातोर्लुङ्। 'इणो गा लुङि' इति इणो गादेशः। 'गतिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक्॥

भाषाऽर्थः—तब कुम्भकर्ण गर्जा, और उसने और राक्षसों को भेजा। इसने बड़े अस्त्रों का स्वीकार किया और शहरसे जल्दी निकल भी पड़ा ॥ २१ ॥

मूर्ध्ना दिवमिवाऽलेखीत्खं व्यापद्वपुषोरुणा।
पादाभ्यां क्ष्मामिवाऽभैत्सीद् दृष्ट्याऽधाक्षीदिव द्विषः ॥ २२ ॥

अन्वयः—(कुम्भकर्णः) मूर्ध्ना दिवम् अलेखीत् इव, उरुणा वपुषा खं व्यापत्, पादाभ्यां क्ष्माम् अभैत्सीत् इव, दृष्ट्या द्विषः अधाक्षीत् इव ॥

व्याख्या—मूर्ध्ना = शिरसा, दिवम् = आकाशम्, अलेखीत् इव = लिखितवान् इव, कुम्भकर्ण इति शेषः, एवं परत्राऽपि। उरुणा = महता, वपुषा=शरीरेण, खम् = आकाशं व्यापत् = व्याप्तवान्, पादाभ्यां = चरणाभ्यां, क्ष्मां=पृथ्वीम्, अभैत्सीत् इव=विदारितवान् इव, दृष्ट्या = दर्शनेनैव, द्विषः = शत्रून्, अधाक्षीत् इव=दग्धवान् इव ॥

व्युत्पत्तिः—व्यापत् = विपूर्वकात् 'आप्लृ व्याप्तौ' इति धातोर्लुङ्, लृदित्वादङ्। अभैत्सीत् = 'भिदिर् विदारणे' इति धातोर्लुङ् 'वदव्रजहलन्तस्याऽचः' इति वृद्धिः। अधाक्षीत् = 'दह भस्मीकरणे' इति लुङ्। प्रथमतृतीयचतुर्थचरणेषु वाच्योत्प्रेक्षात्रयस्य द्वितीयचरणे च प्रतीयमानोत्प्रेक्षाया मिथोऽनपेक्षया स्थितेः संसृष्टिः ॥

भाषाऽर्थः—कुम्भकर्णने शिरसे आकाशका जैसे विलेखन किया, और बड़े शरीरसे उसने आकाशको व्याप्त किया, दो चरणोंसे जैसे पृथ्वीका विदारण किया एवम् दृष्टिमात्रसे जैसे शत्रुओंको दग्ध कर डाला ॥ २२ ॥

दग्धशैल इवाऽभासीत्प्राक्रंस्त क्षयमेघवत्।
प्राचकम्पदुदन्वन्तं राक्षसानप्यतित्रसत् ॥ २३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—(कुम्भकर्णः) दग्धशैल इव अभासीत् , क्षयमेघवत् प्राक्रंस्त, उदन्वन्तं प्राचकम्पत् , राक्षसान् अपि अतित्रसत् ॥

व्याख्या—दग्धशैल इव = प्लुष्टपर्वत इव, अभासीत् = भाति स्म, महत्त्वात्कृष्णत्वाच्चेति भावः । कुम्भकर्ण इति शेषः । क्षयमेघवत् = प्रलयाम्बुदवत् , प्राक्रंस्त= प्रस्थितः, उदन्वन्तं = समुद्रं, प्राचकम्पत् = प्रकम्पितवान् , किम्बहुना स राक्षसान् अपि = स्वबन्धून् यातुधानान् अपि, अतित्रसत् = त्रासितवान् , किमुताऽन्यानिति भावः ॥

व्युत्पत्तिः—अभासीत् = 'भा दीप्तौ' इति धातोर्लुङ्. 'यमरमनमातां सक् चे'ति सगिटौ । क्षयमेघवत् = क्षयमेघेन तुल्यं, 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः । प्राक्रंस्त = प्रपूर्वकात् क्रमुधातोर्लुङ्, 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदम् । प्राचकम्पत् = प्रपूर्वकात् 'कपि चलने' इति ण्यन्तस्य धातोर्लुङि चङि रूपम् । अतित्रसत् = 'त्रसी उद्वेगे' इति ण्यन्तस्य धातोर्लुङि चङि रूपम् । उपमाद्वयस्य अर्थापत्तेश्च संसृष्टिः ॥

भाषाऽर्थः—कुम्भकर्ण जले हुए पर्वतके सदृश प्रतीत हुआ । उसने प्रलयकाल के मेघकी तरह प्रस्थान किया; और समुद्रको प्रकम्पित किया किं बहुना राक्षसों को भी त्रस्त किया ॥ २३ ॥

सपक्षोऽद्रिरिवाऽचालीन्न्यश्वसीत्कल्पवायुवत् ।
अभार्षीद् ध्वनिना लोकानभ्राजिष्ट क्षयाऽग्निवत् ।। २४ ।।

अन्वयः—(कुम्भकर्णः) सपक्षः अद्रिः इव अचालीत्, कल्पवायुवत् न्यश्वसीत् , ध्वनिना लोकान् अभार्षीत् , क्षयाऽग्निवत् अभ्राजिष्ट ॥

व्याख्या—(कुम्भकर्णः) सपक्षः = पक्षसहितः, अद्रिरिव = पर्वत इव, अचालीत् = चलितः, बाह्वोः पक्षाऽनुकारित्वादिति भावः । कल्पवायुवत्=प्रलयवातवत् , न्यश्वसीत् = निश्वसितवान् , ध्वनिना = शब्देन, लोकान् = भुवनानि, अभार्षीत् = पूरितवान् क्षयाऽग्निवत् = प्रलयाऽनलवत् , अभ्राजिष्ट = दीप्तवान् ॥

व्युत्पत्तिः—सपक्षः = पक्षाभ्यां सहितः, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । 'वोपसर्जनस्ये'ति सहस्य सभावः । अचालीत् = चलधातोर्लुङ् , 'अतो ल्रान्तस्ये'ति वृद्धिः । कल्पवायुवत् = कल्पवायुना तुल्यं, 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः । न्यश्वसीत् = निपूर्वकात् 'श्वस प्राणने' इति धातोर्लुङ् 'ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्' इति वृद्धिनिषेधः । अभार्षीत् = 'भृञ् भरणे' इति धातोर्लुङ् , 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः । अभ्राजिष्ट = 'भ्राजृ दीप्तौ' इति धातोर्लुङ् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—कुम्भकर्ण पङ्खोंवाले पर्वतके समान चला। उसने प्रलयके वायुके सदृश निश्वास छोड़ा, शब्दसे भुवनोंको पूर्ण किया और वह प्रलय-कालके अग्निके तुल्य प्रकाशमान हुआ ॥ २४ ॥

अनंसीद् भूर्भरेणाऽस्य रंहसा शाखिनोऽलुठन् ।
सिंहाः प्राद्रुद्रुवन् भीताः प्राक्षुभन् कुलपर्वताः ॥ २५ ॥

अन्वयः—अस्य भरेण भूः अनंसीत्, रंहसा शाखिनः अलुठन्, सिंहा भीताः (सन्तः) प्राद्रुद्रुवन्, कुलपर्वताः प्राक्षुभन् ॥

व्याख्या—अस्य = कुम्भकर्णस्य, भरेण = भारेण, भूः = पृथ्वी, अनंसीत् = नता, रंहसा = वेगेन, शाखिनः=वृक्षाः, अलुठन्=पतिताः, सिंहाः=मृगेन्द्राः, भीताः= त्रस्ताः सन्तः, प्राद्रुद्रुवन् = पलायिताः, कुलपर्वताः = कुलशैलाः, महेन्द्रादय इति भावः। प्राक्षुभन् = सञ्चलिताः ॥

व्युत्पत्तिः—अनंसीत् = 'णम प्रह्वत्वे शब्दे' इति धातोर्लुङ्, 'यमरमनमातां सक चे' ति सगिटौ। अलुठन् = '(रुठ) लुठ प्रतिघाते' इति धातोरनुदात्तेतो द्युतादित्वादङ्। 'द्युद्भ्यो लुङि' इति परस्मैपदविकल्पः। प्राद्रुद्रुवत्=प्रपूर्वकात् '(द्रु) द्रु गतौ' इति धातोर्लुङ्। 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति चङ्। प्राक्षुभन्=प्रपूर्वकात् 'क्षुभ सञ्चलने' इति धातोर्लुङ् द्युतादित्वादङ् ॥

भाषाऽर्थः—कुम्भकर्णके भारसे पृथिवी झुक गई, वेगसे वृक्ष गिर पड़े; सिंह भीत होते हुए दौड़ने लगे और महेन्द्र आदि कुल पर्वत सञ्चलित हो गये ॥ २५ ॥

उत्पाताः प्रावृतंस्तस्य द्यौरशीकिष्ट शोणितम् ।
वायवोऽवासिषुर्भीमाः क्रूराश्चाऽकुषत द्विजाः ॥ २६ ॥

अन्वयः—तस्य उत्पाताः प्रावृतन्, द्यौः शोणितम् अशीकिष्ट, भीमा वायवः अवासिषुः, क्रूरा द्विजाश्च अकुषत ॥

व्याख्या—तस्य = कुम्भकर्णस्य, गच्छत इति शेषः। उत्पाताः = उपसर्गाः, प्रावृतन् = प्रवृत्ताः, द्यौः = आकाशं, शोणितं = रुधिरम्, अशीकिष्ट = असिचत्, भीमाः = भयङ्कराः, वायवः = वाताः, अवासिषुः=वान्ति स्म, क्रूराः = अशुभसूचकाः, द्विजाश्च = पक्षिणश्च, उलूकादय इति भावः। अकुषत = शब्दं कृतवन्तः ॥

व्युत्पत्तिः = उत्पाताः = 'अजन्यं क्लीब उत्पात उपसर्गः समं त्रयम् ।' इत्यमरः। प्रावृतन् = प्रपूर्वकात् 'वृतु वर्तने' इति धातोर्लुङ्। द्युतादित्वादङ् 'द्युद्भ्यो लुङि' इति परस्मैपदं च। अशीकिष्ट = 'शीकृ सेचने' इति अनुदात्तेतो धातोर्लुङ्। अवासिषुः = 'वा गतिगन्धनयोः' इति धातोर्लुङ्। 'यमरमनमातां सक् चे' ति सगिटौ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अकुषत = 'कुङ् शब्दे' इत्यनिटो भौवादिकधातोर्लुङ्, कुटादित्वात्सिचः ङित्वे न गुणः ॥

भाषाऽर्थः—कुम्भकर्णके गमन-कालमें उत्पात हुए। आकाशने रुधिर-सेचन किया। भयङ्कर वायु बहने लगे और अशुभसूचक पक्षी शब्द करने लगे ॥ २६ ॥

अस्पन्दिष्टाऽक्षि वामं च घोराश्चाऽराटिषुः शिवाः ।
न्यपप्तन्मुसले गृध्रा दीप्तयाऽपाति चोल्कया ॥ २७ ॥

अन्वयः—वामम् अक्षि अस्पन्दिष्ट। घोराः शिवाः अराटिषुः। मुसले गृध्रा न्यपप्तन्, दीप्तया उल्कया च अपाति ॥

व्याख्या—वामं = सव्यम्, अक्षि = नेत्रं, कुम्भकर्णस्येति शेषः। अस्पन्दिष्ट = किञ्चिच्चलितवत्, घोराः = भीत्युत्पादिकाः, अनिष्टशंसिन्य इति भावः। शिवाः = गोमायवः, अराटिषुः = शब्दं चक्रुः। मुसले = अयोऽग्रे, गृध्राः = दाक्षाय्याः, न्यपप्तन् = निपतिताः। दीप्तया = प्रज्वलितया, उल्कया च = निर्गतज्वालया च, अपाति = पतितम् ॥

व्युत्पत्तिः—अस्पन्दिष्ट = 'स्पदि किञ्चिच्चलने' इति धातोर्लुङ्। शिवाः = 'स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः' इत्यमरः। अराटिषुः = 'रट परिभाषणे' इति धातोर्लुङ् 'अतो हलादेर्लघोः' इति वृद्धिविकल्पः। मुसले = 'अयोऽग्रो मुसलोऽस्त्री स्यात्' इत्यमरः। न्यपप्तन् = निपूर्वात् 'पत्लृ पतने' इति धातोर्लुङ्, लृदित्वादङ्। 'पतः पुम्' इति पुमागमश्च। अपाति=पतधातोर्भावे लुङ्, चिणादेशः ॥

भाषाऽर्थः—कुम्भकर्णकी बाईं आंख फड़कने लगी। अनिष्टसूचक शृगाल शब्द करने लगे। मुसलमें गृध्र बैठ गये और प्रज्वलित उल्का गिर पड़ी ॥ २७ ॥

आंहिष्ट तानसंमान्य दर्पात्स प्रधनक्षितिम् ।
ततोऽनर्दीदनन्दीच्च शत्रूनाह्वास्त चाऽऽहवे ॥ २८ ॥

अन्वयः—स तान् दर्पात् असंमान्य प्रधनक्षितिम् आंहिष्ट। ततः (सः) अनर्दीत्, अनन्दीत् च, आहवे शत्रून् आह्वास्त च ॥

व्याख्या—सः=कुम्भकर्णः, तान् = उत्पातान्, दर्पात् = गर्वात्, असंमान्य = अवज्ञाय, प्रधनक्षितिं = युद्धभूमिम्, आंहिष्ट = गतवान्। ततः = अनन्तरं, सः = कुम्भकर्णः, अनर्दीत् = गर्जितवान्, अनन्दीत्=सानन्दोऽभूत् च, आहवे=युद्धे शत्रून् रिपून्, आह्वास्त च = 'आगच्छत युध्यध्वम्' इति स्पर्धया आहूतवांश्च ॥

व्युत्पत्तिः—अनन्दीत् = 'टुनदि समृद्धौ' इति धातोर्लुङ्। आह्वास्त = आङ्पूर्वकात् 'ह्वेञ् स्पर्धायां शब्दे च'ति धातोर्लुङ् 'स्पर्धायामाङः' इति धातोरात्मनेपदम् 'आत्मनेपदेष्वन्यतरस्याम्' इत्यङभावपक्षे रूपम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—कुम्भकर्ण उन उत्पातोंको गर्वसे अवज्ञा करके युद्धभूमि की चला। अनन्तर उसने गर्जन किया आनन्दका अनुभव किया और संग्राममें शत्रुओंको ललकारा भी ॥ २८ ॥

प्राशीन्न चाऽतृपत्क्रूरः क्षुच्चाऽस्याऽवृधदश्नतः ।
अधाद्वसामधासीच्च रुधिरं वनवासिनाम् ॥ २९ ॥

अन्वयः—क्रूरः प्राशीत्, न च अतृपत् । अश्नतः अस्य क्षुत् च अवृधत्; वनवासिनां वसाम् अधात् रुधिरम् अधासीच्च ॥

व्याख्या—क्रूरः=घातुकः, कुम्भकर्ण इति भाव । प्राशीत्=भक्षितवान्, वनवासिन इति भावः । नच अतृपत्=न च तृप्तः । अश्नतः=भक्षयतः, अस्य= कुम्भकर्णस्य, क्षुच्च=बुभुक्षा च, अवृधत्=ऐधिष्ट, वनवासिनां=काननिवासिनां, वानराणामिति भावः । वसां=वपाम्, अधात्=पीतवान्, रुधिरं=रक्तम्, अधासीच्च=पीतवांश्च ॥

व्युत्पत्तिः—क्रूरः='नृशंसो घातुकः क्रूरः' इत्यमरः । प्राशीत्=प्रपूर्वकात् 'अश भक्षणे' इति धातोर्लुङ् । अतृपत्='तृप प्रीणने' इति धातोर्लुङ् । पुषादित्यादङ् । अवृधत्='वृधु वृद्धौ' इति धातोर्लुङ्, द्युतादित्वादङ् । वसां='मेदस्तु वपा वसा' इत्यमरः । अधात्='धेट् पाने' इति धातोर्लुङ् । 'विभाषा घ्राधेट्शाच्छासः' इति सिचो लुक्पक्षे रूपम् । अधासीत्="विभाषा धेट्श्व्योः" इति चङभावपक्षे रूपम् ॥

भाषाऽर्थः—हत्यारे कुम्भकर्णने खाया तो भी वह तृप्त नहीं हुआ । खाते हुए उसकी भूख और बढ़ी । उसने वनवासी वानरोंकी चर्बी और रुधिरको पी लिया ॥

मांसेनाऽस्याऽश्वतां कुक्षी जठरं चाऽप्यशिश्वियत् ।
बहूनामग्लुचत्प्राणानग्लोचीच्च रणे यशः ॥ ३० ॥

अन्वयः—मांसेन अस्य कुक्षी अश्वताम् जठरं च अशिश्वियत् । (सः) बहूनां प्राणान् अग्लुचत् रणे यशश्च अग्लोचीत् ॥

व्याख्या—मांसेन=आमिषेण, अस्य=कुम्भकर्णस्य, कुक्षी=उदरपार्श्वौ, अश्वतां=शूनौ, जठरं च=उदरं च, अशिश्वियत् = शूनम् । बहूनां = प्रचुराणां, वानराणामिति भावः । प्राणान्=असून्, अग्लुचत्=हतवान् कुम्भकर्ण इति शेषः । रणे=संग्रामे, यशश्च=कीर्ति च, बहूनामिति शेषः । अग्लोचीत्=अपनीतवान् ॥

व्युत्पत्तिः—अश्वतां='टुओश्वि गतिवृद्ध्योः' इति धातोर्लुङ् । 'जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्चे'ति च्लेरङ् । 'श्वयतेर' इति अत्वम् । अशिश्वि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत् = 'विभाषा धेट्श्व्योः' इति चङ्। इयङादेशः । अग्लुचत् = '(ग्रुचु) ग्लुचु (कुजु खुजु) स्तेयकरणे' इति धातोर्लुङ्, पूर्वसूत्रेण अङ् विकल्पः । अग्लोचीत् = अङभावपक्षे रूपम् ॥

भाषाऽर्थः—मांससे कुम्भकर्णके उदरपार्श्व फूल गये और पेट भी फूल गया। उसने अनेक वानरोंके प्राणोंका अपहरण किया और युद्धमें अनेक वानरोंका यश भी मिटाया ॥ ३० ॥

सामर्थ्यं चाऽपि सोऽस्तम्भीद्विक्रमं चाऽस्य नाऽस्तभन् ।
शाखिनः केचिदध्यष्ठुर्न्यमाङ्क्षुरपरेऽम्बुधौ ॥ ३१ ॥

अन्वयः—स सामर्थ्यं च अस्तम्भीत् । अस्य विक्रमं न अस्तभन् । केचित् शाखिनः अध्यष्ठुः । अपरे अम्बुधौ न्यमाङ्क्षुः ॥

व्याख्या—सः = कुम्भकर्णः, सामर्थ्यं = शक्तिं, शत्रूणामिति शेषः । अस्तम्भीत् = नियमितवान् । अस्य = कुम्भकर्णस्य, विक्रमं = पराक्रमं, न अस्तभन् = नो नियमितवन्तः, केचिदिति शेषः । केचित् = वानराः, शाखिनः = वृक्षान्, अध्यष्ठुः = अधिष्ठितवन्तः; कुम्भकर्णभयादिति भावः । अपरे = अन्ये वानराः, अम्बुधौ = समुद्रे, न्यमाङ्क्षुः = निमग्नाः ॥

व्युत्पत्तिः—सामर्थ्यं = समर्थस्य भावः तत्, 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ्। अस्तम्भीत् = सौत्रस्तम्भुधातोर्लुङ् । अङभावपक्षे सिचि 'इट ईटि' इति सलोपः । अस्तभन् = 'जृस्तम्भि'ति अङभावपक्षे रूपम् । शाखिनः = अधिपूर्वकस्थाधातोर्योगे 'अधिशीङ्स्थाऽऽसां कर्मे'ति आधारत्वम् कर्मत्वम् । अध्यष्ठुः = 'अधिपूर्वकस्थाधातोर्लुङ्' 'गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु' इति सिचो लुक् । आदेशसकारस्य 'आदेशप्रत्यययोः' इति षत्वं ष्टुत्वं च । न्यमाङ्क्षुः = निपूर्वकात् 'टुमस्जो शुद्धौ' इति धातोर्लुङ् । 'मस्जिनशोर्झलि' इति 'मस्जेरन्त्यात्पूर्वो नुम्वाच्य' इति नियमेन नुम् । संयोगादिलोपश्च । हलन्तलक्षणा वृद्धिः, कुत्वषत्वादिकार्यं च ॥

भाषाऽर्थः—उसने शत्रुओंका सामर्थ्य रोका । उसके पराक्रमको किसीने नहीं रोका । कुछ वानर पेड़ोंपर चढ़ गये, और कोई समुद्रमें डूब गये ॥ ३१ ॥

अन्ये त्वलङ्घिषुः शैलान् गुहास्वन्ये न्यलेषत ।
केचिदासिषत स्तब्धा भयात् केचिदघूर्णिषुः ॥ ३२ ॥

अन्वयः—अन्ये तु शैलान् अलङ्घिषुः । अन्ये गुहासु न्यलेषत । केचित् स्तब्धाः (सन्तः) आसिषत । केचित् भयात् अघूर्णिषुः ॥

व्याख्या—अन्ये = अपरे वानराः, शैलान् = पर्वतान्, अलङ्घिषुः = लङ्घितवन्तः, भयादारूढा इति भावः । अन्ये = अपरे, गुहासु = गह्वरेषु, न्यलेषत = निलीनाः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केचित्=केऽपि वानराः, स्तब्धाः=जातस्तम्भाः सन्तः, आसिषत=उपविष्टाः । केचित्= केऽपि भयात्=त्रासात्, अघूर्णिषुः=घूर्णितवन्तः ॥

व्युत्पत्तिः—अलङ्घिषुः=गत्यर्थाल्लघिधातोर्लुङ् । न्यलेषत=निपूर्वात् 'लीङ् श्लेषणे' इति धातोर्लुङ । आसिषत='आस उपवेशने' इति धातोर्लुङ्। अघूर्णिषुः= '(घुण) घूर्ण भ्रमणे' इ त धातोर्लुङ् ॥

भाषाऽर्थः—अन्य वानर पर्वतोंपर चढ़ गये । और लोग गुहाओंमें छिप गये । कुछ स्तब्ध होकर बैठ गये । कुछ वानर डरसे भ्रमण करने लगे ॥ ३२ ॥

उदतारिषुरम्भोधिं वानराः सेतुनाऽपरे ।
अलज्जिष्टाऽङ्गदस्तत्र प्रत्यवास्थित चोर्जितम् ॥ ३३ ॥

अन्वयः—अपरे वानराः सेतुना अम्भोधिम् उदतारिषुः । तत्र अङ्गद अलज्जिष्ट, ऊर्जितं च प्रत्यवास्थित ॥

व्याख्या—अपरे=अन्ये, वानराः=कपयः, सेतुना=आल्या, अम्भोधिं= समुद्रम्, उदतारिषुः=उत्तीर्णाः । तत्र=तेषु वानरेषु विषये, अङ्गदः=वालिपुत्रः, अलज्जिष्ट=लज्जितः, ऊर्जितम् च=पराक्रमं च, प्रत्यवास्थित=प्रतिपन्नवान् ॥

व्युत्पत्तिः—सेतुना='सेतुराली स्त्रियां पुमान्' इत्यमरः । अम्भोधिम्=अम्भांसि धीयन्तेऽत्रेति अम्भोधिस्तम्, 'कर्मण्यधिकरणे चे'ति किप्रत्ययः । उदतारिषुः=उत्पूर्वकात् 'तॄ प्लवनसंतरणयोः' इति धातोर्लुङ् । अलज्जिष्ट='(ओलजी) ओलस्जी व्रीडायाम्' इति धातोर्लुङ् । प्रत्यवास्थित=प्रत्यवपूर्वकात् स्थाधातोर्लुङ् । 'समवप्रविभ्यः स्थ' इत्यात्मनेपदम् । 'ह्रस्वादङ्गात्' इति सिचो लोपः ॥

भाषाऽर्थः—और वानरोंने पुलसे समुद्रका संतरण किया । उनके विषयमें अङ्गदजी लज्जित हुए और उन्होंने पराक्रमका अवलम्बन किया ॥ ३३ ॥

सत्त्वं समदुधुक्षच्च वानराणामयुद्ध च ।
ततः शैलानुदक्षैप्सुरुदगूरिषत द्रुमान् ॥ ३४ ॥

अन्वयः—(अङ्गदः) वानराणां सत्त्वं समदुधुक्षत् अयुद्ध च । ततः (वानराः) शैलान् उदक्षैप्सुः, द्रुमान् उदगूरिषत ॥

व्याख्या—वानराणां=कपीनां, सत्त्वं=बलं, समदुधुक्षत्=सन्दीपितवान्, अङ्गद इति शेषः, एवमागामिक्रियायामपि । अयुद्ध च=युद्धं कृतवांश्च । ततः= अङ्गदकर्तृकसत्त्वसन्धुक्षणाऽनन्तरं, शैलान्=पर्वतान्, उदक्षैप्सुः=उत्क्षिप्तवन्तः, वानरा इति शेषः, एवं परक्रियायामपि । द्रुमान्=पर्वतान्, उदगूरिषत=उत्थापितवन्तः ॥

व्युत्पत्तिः—समदुधुक्षत्=संपूर्वकात् ण्यन्तात् 'धुक्ष (धिक्ष) सन्दीपन-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लेशनयोः' इति धातोर्लुङ्। च्लेश्चङ्। अयुद्ध='युद्ध सम्प्रहारे' इति धातोर्लुङ्, 'झलो झलि' इति सिचो लोपः। उदक्षैप्सुः=उत्पूर्वकात् 'क्षिप प्रेरणे' इति धातोर्लुङ् 'वदव्रजहलन्तस्याऽच' इति वृद्धिः। उदगूरिषत=उत्पूर्वकात् 'गूरी उद्यमने' इति धातोर्लुङ्॥

भाषाऽर्थः—अङ्गदजीने वानरोंके बलको संदीपित किया और युद्ध भी किया। तब वानरोंने पर्वतोंको फेंका और वृक्षोंको उठाया॥ ३४॥

अनर्दिषुः कपिव्याघ्राः सम्यक् चाऽयुत्सताऽऽहवे।
तानमर्दीदखादीच्च निरास्थच्च तलाऽऽहतान्॥ ३५॥

अन्वयः—कपिव्याघ्रा अनर्दिषुः, आहवे सम्यक् अयुत्सत च। (कुम्भकर्णः) तान् अमर्दीत् अखादीत् च, तलाऽऽहतान् निरास्थच्च॥

व्याख्या—कपिव्याघ्राः=वानरश्रेष्ठाः, उत्क्षिप्तशैलद्रुमा इति शेषः, अनर्दिषुः=शब्दं कृतवन्तः। आहवे=युद्धे, सम्यक्=समीचीनं, निर्भयं यथा तथेति भावः। अयुत्सत च=युद्धं कृतवन्तश्च। तान्=पूर्वोक्तान् वानरान्, अमर्दीत्=मृदितवान्, कुम्भकर्ण इति शेषः, एवं परत्राऽपि। अखादीत्=भक्षितवान्, तलाऽऽहतान्=हस्ततलताडितान्, तान्वानरानिति शेषः, निरास्थच्च=इतस्ततः क्षिप्तवांश्च॥

व्युत्पत्तिः—कपिव्याघ्राः=कपयो व्याघ्रा इव, 'उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे' इति समासः। अनर्दिषुः='नर्द शब्दे' इति धातोर्लुङ्। अयुत्सत='युध संप्रहारे' इति धातोर्लुङ्। 'लिङसिचावात्मनेपदेषु' इति सिचः कित्वे गुणाऽभावः। अमर्दीत्='मृद क्षोदे' इति धातोर्लुङ्। लघूपधगुणः। अखादीत्='खाद भक्षणे' इति धातोर्लुङ्। निरास्थत्=निरुपसर्गपूर्वकात् 'असु क्षेपणे' इति धातोर्लुङ्। 'पुषादिद्युताद्यॢदित' इत्यङ्। 'अस्यतेस्थुक्' इति थुगागमश्च॥

भाषाऽर्थः—श्रेष्ठ वानरोंने शब्द किया और संग्राममें निर्भय होकर प्रहार भी किया। कुम्भकर्णने उन लोगोंको मर्दन किया, खा डाला और थप्पड़ोंसे मारकर इधर-उधर फेंक भी दिया॥ ३५॥

प्राचुचूर्णच्च पादाभ्यामबिभीषत च द्रुतम्।
अतर्हीच्चैव शूलेन कुम्भकर्णः प्लवङ्गमान्॥ ३६॥

अन्वयः—कुम्भकर्णः पादाभ्यां प्लवङ्गमान् प्राचुचूर्णत्, द्रुतम् अबिभीषत, शूलेन अतर्हीच्च॥

व्याख्या—कुम्भकर्णः=राव[illegible]ध्यमाऽनुजः, पादाभ्यां=चरणाभ्यां, प्लवङ्गमान्=वानरान्, प्राचुचूर्णत्=प्रचूर्णितवान्, द्रुतं=शीघ्रम्, अबिभीषत=भीषितवान्, शूलेन=आयुधविशेषेण, अतर्हीच्च=विद्धवांश्च॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—प्राचुचूर्णत्=प्रपूर्वकात् 'चूर्ण प्रेरणे' इति चौरादिकाद्धातोः 'सत्यापपाशरूपवीणतूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्' इति णिचि लुङि चङि द्वित्वेऽभ्यासह्रस्वश्च । अविभीषत='ञिभी भये' इति णिजन्ताद्धातोर्लुङ् । 'भीस्म्योर्हेतुभये' इत्यात्मनेपदम् । 'भियो हेतुभये षुक्' इति षुगागमः चङि द्वित्वेऽभ्यासह्रस्वश्च । अतर्हीत्='तृह हिंसायाम्' इति धातोर्लुङ् । हकारान्तत्वात् 'ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इति वृद्धिप्रतिषेधः ॥

भाषाऽर्थः—कुम्भकर्णने दोनों चरणोंसे बन्दरोंको पीस डाला, शीघ्र उन्हें भयभीत बनाया और शूलसे उन लोगोंको मार डाला ॥ ३६ ॥

अतौत्सीद् गदया गाढमपिषच्चोपगूहनैः ।
जानुभ्यामदमीच्चाऽन्यान् हस्तवर्तमवीवृतत् ॥ ३७ ॥

अन्वयः—(कुम्भकर्णः प्लवङ्गमान्) गदया गाढम् अतौत्सीत्, उपगूहनैः अपिषत्, जानुभ्याम् अन्यान् अदमीत्, हस्तवर्तम् अवीवृतत् ॥

व्याख्या—गदया=आयुधविशेषेण, गाढं=दृढम्, अतौत्सीत्=व्यथितवान् कुम्भकर्णः प्लवङ्गमानिति शेषः । एवं परत्राऽपि । उपगूहनैः=आलिङ्गनैः, अपिषत्=संचूर्णितवान्, जानुभ्याम्=अष्ठीवद्भ्याम्, अन्यान्=अपरान् वानरान्, अदमीत्=शासितवान्, हस्तवर्तम् अवीवृतत्=हस्ताभ्यां वर्तितवान्, पिष्टवानित्यर्थः ।

व्युत्पत्तिः—अतौत्सीत्='तुद व्यथने' इति धातोर्लुङ् । अपिषत्="पिष्लृ संचूर्णने' इति धातोर्लुङि लृदित्त्वादङ् । जानुभ्यां='जानूरुपर्वाऽष्ठीवदस्त्रियाम्' इत्यमरः । अदमीत्='दमु उपशमे' इति धातोर्लुङ् । मान्तत्वान्न वृद्धिः । हस्तवर्तम् अवीवृतत्='हस्ते वर्तिग्रहोः' इति णमुल्, 'कषादिषु यथाविध्यनुप्रयोग' इति वृतेर्ण्यन्तस्याऽनुप्रयोगः ॥

भाषाऽर्थः—कुम्भकर्णने वानरोंको गदासे दृढतापूर्वक पीडित किया, आलिङ्गनोंसे पीस डाला; दोनों घुटनोंसे और वानरोंका दमन किया और दोनों हाथोंसे भी पीस डाला ॥ ३७ ॥

अदालिषुः शिलादेहे चूर्ण्यभूवन् महाद्रुमाः ।
क्षिप्तास्तस्य न चाऽचेतीत् तानसौ नाऽपि चाऽक्षुभत् ॥ ३८ ॥

अन्वयः—तस्य देहे क्षिप्ताः शिला अदालिषुः, महाद्रुमाः चूर्ण्यभूवन् । असौ तान् न अचेतीत् नाऽपि अक्षुभत् ।

व्याख्या—तस्य कुम्भकर्णस्य, देहे=शरीरे, क्षिप्ताः=प्रेरिताः, शिलाः=प्रस्तराः, अदालिषुः=विशीर्णाः, महाद्रुमाः=महावृक्षाः, चूर्ण्यभूवन्=चूर्णीभूताः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

असौ = कुम्भकर्णः, तान् = प्रेरितान् , शिलामहावृक्षान् , न अचेतीत् = न चेतितवान् , नाऽपि = नैव, अक्षुभच्च = क्षुभितश्च ॥

व्युत्पत्तिः—अदालिषुः = 'दल विशरणे' इति धातोर्लुङ् । चूर्णीभूवन् = अचूर्णाश्चूर्णा यथा संपद्यन्ते तथा अभूवन् , 'कृभ्वस्तियोगे संपद्यकर्तरि च्विः' इति च्विः । 'अस्य च्वौ' इत्यवर्णस्य ईत्वम् । अचेतीत् = 'चिती संज्ञाने' इति धातोर्लुङ् । अक्षुभम् = 'क्षुभ संचलने' इति दैवादिकाद्धातोर्लुङ् , पुषादित्वादङ् ॥

भाषाऽर्थ—कुम्भकर्णके शरीरमें प्रेरित पत्थर विशीर्ण हो गये, बड़े बड़े वृक्ष चूर-चूर हुए । कुम्भकर्णने उनको नहीं जाना और न वह क्षुब्ध ही हुआ ॥ ३८ ॥

अद्राष्टां तं रघुव्याघ्रौ आख्यच्चैनं विभीषणः ।
एष व्यजेष्ट देवेन्द्रं नाऽशङ्किष्ट विवस्वतः ॥ ३९ ॥

अन्वयः—रघुव्याघ्रौ तम् अद्राष्टाम् । विभीषणः एनम् आख्यच्च = 'एष देवेन्द्रं व्यजेष्ट, विवस्वतो न अशङ्किष्ट ॥'

व्याख्या—रघुव्याघ्रौ = रघुवंशश्रेष्ठौ, रामलक्ष्मणाविति भावः । तं = कुम्भकर्णम्, अद्राष्टां = दृष्टवन्तौ । विभीषणः = रावणकनिष्ठाऽनुजः, एनं = कुम्भकर्णम् आख्यच्च = कथितवांश्च, कुम्भकर्णोऽयमिति शेषः, एवं च—एषः = कुम्भकर्णः, देवेन्द्रं = पाकशासनं व्यजेष्ट = विजितवान् , विवस्वतः = सूर्यात्, न अशङ्किष्ट = न शङ्कितवान् , नाऽभैषीदित्यर्थः ॥

व्युत्पत्तिः—अद्राष्टां = 'दृशिर् प्रेक्षणे' इति धातोर्लुङ् , 'सृजिदृशोर्झल्यमकिति' इत्यमागमः, 'वदव्रजहलन्तस्याचः' इति वृद्धिः । आख्यत् = आङ्पूर्वकात् 'ख्या प्रकथने' इति धातोर्लुङ् , 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यङ् । व्यजेष्ट = विपूर्वकात् 'जि जये' इति धातोर्लुङ् , 'विपराभ्यां जेः' इत्यात्मनेपदम् । अशङ्किष्ट = 'शकि शङ्कायाम्' इति धातोर्लुङ् ॥

भाषाऽर्थः--राघवश्रेष्ठ राम और लक्ष्मणने उस (कुम्भकर्ण) को देखा । विभीषणने राम और लक्ष्मणको कुम्भकर्ण का परिचय दिया और कहा भी—'इन्होंने इन्द्रको जीता और ये सूर्यसे भी शङ्कित नहीं हुए' ॥ ३९ ॥

यक्षेन्द्रशक्तिमच्छासीन्नाऽप्रोथीदस्य कश्चन ।
कुम्भकर्णान्न भैष्टं मा युवामस्मान्नृपाऽऽत्मजौ ॥ ४० ॥

अन्वयः—(एषः) यक्षेन्द्रशक्तिम् अच्छासीत् । अस्य कश्चन न अप्रोथीत् । हे नृपाऽऽत्मजौ ! युवाम् अस्मात् कुम्भकर्णात् मा भैष्टम् (इति) न ॥

व्याख्या—(एषः = कुम्भकर्णः) यक्षेन्द्रशक्तिं = कुबेरस्य प्रहरणविशेषमथवा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सामर्थ्यम्, अच्छासीत् = खण्डितवान् । अस्य = कुम्भकर्णस्य, कश्चन = कोऽपि, न अप्रोथीत् = न प्राभूत् । हे नृपाऽऽत्मजौ = हे राजकुमारौ, युवाम् = भवन्तौ, अस्मात् = कुम्भकर्णात्, मा भैष्टं = न बिभीतम्, (इति = एवम्) न, अपि तु बिभीतम् ॥

व्युत्पत्तिः—यक्षेन्द्रशक्तिं = यक्षाणामिन्द्रः कुबेरस्तस्य शक्तिम् । "कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः" इत्यमरः । अच्छासीत् = "छो छेदने" इति धातोर्लुङ्, "आदेच उपदेशेऽशिति" इत्यात्वम्, "प्रोथ पर्याप्तौ" इति धातोर्लुङ् । पर्याप्तियोगे "नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्चे"ति चतुर्थी न, पर्याप्तेरविवक्षितत्वात् अतः सम्बन्धसामान्ये षष्ठी । कुम्भकर्णात् = "भीत्रार्थानां भयहेतुः" इति अपादानत्वात्पञ्चमी । मा भैष्टं = "ञिभी भये" इति धातोर्माङि उपपदे "माङि लुङ्" इति लुङ्, "न माङ्योगे" इत्यडागमप्रतिषेधः ॥

भावार्थः—इन्होंने (कुम्भकर्णने) कुबेरकी शक्तिको खण्डित किया । इनके विषयमें कोई भी समर्थ नहीं हुआ । हे राजकुमारो ! आप दोनों इनसे मत डरिये यह नहीं (बल्कि डरिये) ॥ ४० ॥

घ्नन्तं मोपेक्षिषाथां च मा न कार्ष्टमिहाऽऽदरम् ।
अमुं मा न वधिष्टेति रामोऽवादीत् ततः कपीन् ॥ ४१ ॥

अन्वयः—घ्नन्तम् (एनम्) मा उपेक्षिषाथाम् । इह आदरं मा कार्ष्टम् (इति) न । ततो रामः "अमुं मा वधिष्ट (इति) न" इति वानरान् अवादीत् ॥

व्याख्या—घ्नन्तं = प्रहरन्तं, कुम्भकर्णमिति भावः । मा उपेक्षिषाथाम् = अत्र उपेक्षको माभूतमित्यर्थः । इह = अस्मिन् कुम्भकर्णे, आदरम् = अप्रमादं, मा कार्ष्ट = नो कुरुतम्, (इति) न = अपि तु कुरुतम् एव । ततः = विभीषणवचनाऽनन्तरं, रामः = रामचन्द्रः, अमुं = कुम्भकर्णं, मा वधिष्ट = नो हत, (इति = एवम्) न, अपि तु हत एव । इति = इत्थं, वानरान् = कपीन् अवादीत् = उक्तवान् ॥

भावार्थः—आप दोनों मारते हुए कुम्भकर्णकी उपेक्षा मत कीजिए । इनमें आदर मत कीजिए, यह नहीं किन्तु कीजिए । तब रामचन्द्रजीने "इसे मत मारो" यह नहीं प्रत्युत मार डालो ऐसा वानरोंको कहा है ॥ ४१ ॥

ते व्यरासिषुराह्वन्त राक्षसं चाऽप्यपिप्लवन् ।
अबभासन् स्वकाः शक्तीर्द्रुमशैलं व्यकारिषुः ॥ ४२ ॥

अन्वयः—ते व्यरासिषुः, राक्षसम् आह्वन्त, अपिप्लवन्, स्वकाः शक्तीः अवभासन् द्रुमशैलं व्यकारिषुः ॥

व्याख्या—ते = वानराः, व्यरासिषुः = किलकिलाशब्दं कृतवन्तः, हर्षोक्तिति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शेषः। राक्षसं = यातुधानम्, आह्वन्त=स्पर्धमाना आहूतवन्तः, अपिप्लवम्=प्लावितवन्तः, स्वकाः = आत्मीयाः, शक्तीः=सामर्थ्यानि, अबभासन्=प्रकाशितवन्तः, द्रुमशैलं= वृक्षपर्वतं, व्यकारिषुः = तदुपरि क्षिप्तवन्तः ॥

व्युत्पत्तिः—व्यरासिषुः = विपूर्वकात् "रस शब्दे" इति धातोर्लुङ्। "अतो हलादेर्लघोः" इति वृद्धिः। आह्वन्त = आङ्पूर्वकात् "ह्वेञ् स्पर्धायां शब्दे च"ति धातोर्लुङ्। "स्पर्धायामाङः"इत्यात्मनेपदम्। "आत्मनेपदेष्वन्यतरस्याम्" इति पक्षे अङ। अपिप्लवन्="प्लुङ् गतौ" इति धातोर्ण्यन्तस्य चङि सन्वत्कार्यं, "स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वे"ति अभ्यासस्येत्वम्। अबभासन्="भास् दीप्तौ" इति ण्यन्तस्य धातोश्चङि "भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" इति सूत्रेणोपधाह्रस्वविकल्पः। द्रुमशैलं=द्रुमाश्च शैलाश्चेति "जातिरप्राणिनाम्" इति समाहारद्वन्द्वः। व्यकारिषुः = विपूर्वकात् "कॄ विक्षेपे" इति धातोर्लुङ्॥

भाषाऽर्थः—वानरोंने शब्द किया, कुम्भकर्णको ललकारा, लङ्घन किया, अपने सामर्थ्योंको प्रकाशित किया और उसके ऊपर वृक्ष और पर्वतोंको फेंका ॥ ४२ ॥

ते तं व्याशिषताक्षौत्सुः पादैर्दन्तैस्तथाऽच्छिदन् ।
आर्जिजच्छरभो वृक्षं नीलस्त्वाऽऽदित पर्वतम् ॥ ४३ ॥

अन्वयः—ते तं व्याशिषत, पादैः अक्षौत्सुः, तथा दन्तैः अच्छिदन्। शरभो वृक्षम् आर्जिजत्। नीलस्तु पर्वतम् आदित ॥

व्याख्या—ते = वानराः, तं = कुम्भकर्णं, व्याशिषत = व्याप्तवन्तः, पादैः = चरणैः, अक्षौत्सुः = पिष्टवन्तः, तथा = तेन प्रकारेण, दन्तैः = दशनैः, आच्छिदन् = छिन्नवन्तः। शरभः = तन्नामा कश्चित्कपिः, वृक्षं = तरुम्, आर्जिजत् = ग्रहीतुं यत्नमकार्षीत्। नीलस्तु = तन्नामकः कपिसेनापतिस्तु, पर्वतं = शैलम्, आदित = गृहीतवान् ॥

व्युत्पत्तिः—व्याशिषत = विपूर्वकात् "अशू व्याप्तौ संघाते चे"ति धातोर्लुङ् अक्षौत्सुः="क्षुदिर् सम्पेषणे" इति धातोर्लुङ्। अच्छिदन्="छिदिर् द्वैधीकरणे" इति धातोर्लुङ्। "इर इत्संज्ञा वाच्या" इतीत्संज्ञा। "इरितो वे"ति च्लेरङ्। आर्जिजत्="अर्ज प्रतियत्ने" इति स्वार्थिकण्यन्ताच्चङि "द्विर्वचनेऽचि" इति स्थानिवद्भावात् "अजादेर्द्वितीयस्ये"ति द्वित्वम्। रेफस्य तु "नन्द्राः संयोगादयः" इति द्वित्वप्रतिषेधः। आदित = आङ् पूर्वकात् "डुदाञ् दाने" इति धातोर्लुङ्। "स्थाघ्वोरिच्चे"ति इदादेशः "ह्रस्वादङ्गात्" इति सलोपः ॥

भाषाऽर्थः—वानरोंने कुम्भकर्णको घेर लिया, चरणोंसे पीस डाला, उसी तरह

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दाँतों से नोच डाला । शरभ नामके वानरने वृक्ष लेने के लिए प्रयत्न किया । नील नामक वानर सेना नामकने तो पर्वत ले लिया ॥ ४३ ॥

ऋषभोऽद्रीनुदक्षैप्सीत्ते तैररिमतर्दिषुः ।
अस्फूर्जीद्गिरिश्टङ्गं च व्यस्राक्षीद् गन्धमादनः ॥ ४४ ॥

अन्वयः—ऋषभः अद्रीन् उदक्षैप्सीत् । ते तैः अरिम् अतर्दिषुः । गन्धमादनः अस्फूर्जीत् गिरिश्टङ्गं च व्यस्राक्षीत् ॥

व्याख्या—ऋषभः = तन्नामा वानरः, अद्रीन् = पर्वतान् , उदक्षैप्सीत् = उत्क्षिप्तवान् । इत्थं ते = शरभादयो वानराः, तैः = वृक्षादिभिः, अरिं = शत्रुं कुम्भकर्णम्, अतर्दिषुः = हतवन्तः । गन्धमादनः = तन्नामको वानरः । अस्फूर्जीत् = वज्रवत् शब्दं चकार, गिरिश्टङ्गं च = पर्वतशिखरं च, व्यस्राक्षीत् = विसृष्टवान् ॥

व्युत्पत्तिः—उदक्षैप्सीत् = उत्पूर्वकात् "क्षिप प्रेरणे" इति धातोर्लुङ्, "वदव्रजहलन्तस्याऽचः" इति वृद्धिः । अतर्दिषुः = "तर्द हिंसायाम्" इति धातोर्लुङ् । अस्फूर्जीत् = "टुओस्फूर्जा वज्रनिर्घोषे" इति धातोर्लुङ् । व्यस्राक्षीत् विपूर्वकात् "सृज विसर्गे" इति धातोर्लुङ्, "सृजिदृशोर्झल्यमकिति" इत्यमागमः, पूर्ववद्वृद्धिश्च ॥

भाषार्थः—ऋषभ नामके वानरने पर्वतोंको उठाया । इस प्रकारसे शरभ आदि वानरोंने वृक्ष आदियोंसे शत्रु कुम्भकर्णको ताडित किया । गन्धमादन नामक वानरने वज्रके तुल्य शब्द किया और पर्वतके शिखरको छोड़ा ॥ ४४ ॥

अकूर्दिष्ट व्यकारीच्च गवाक्षो भूधरान् बहून् ।
स तान् नाऽजीगणद्वीरः कुम्भकर्णोऽव्यथिष्ट न ॥ ४५ ॥

अन्वयः—गवाक्षः अकूर्दिष्ट, बहून् भूधरान् व्यकारीच्च । स वीरः कुम्भकर्णः तान् न अजीगणत् न अव्यथिष्ट ॥

व्याख्या—गवाक्षः = तन्नामा कपिः, अकूर्दिष्ट = क्रीडापूर्वकं चेष्टितवान् , बहून् = प्रचुरान् , भूधरान् = पर्वतान् , व्यकारीच्च = क्षिप्तवांश्च । सः = पूर्वोक्तः, वीरः = शूरः, कुम्भकर्णः = रावणमध्यमाऽनुजः, तान् = शरभादीन् , न अजीगणत् = नो गणयामास, न अव्यथिष्ट = व्यथितो नाऽभूत् ॥

व्युत्पत्तिः—वीरः = "शूरो वीरश्च विक्रान्त" इत्यमरः । अजीगणत् = "गण संख्याने" इति चौरादिकाद्धातोर्लुङ् । "ई च गण" इत्यभ्यासस्य ईत्वं, चादुत्वपक्षे "अजगणत्" इति पाठान्तरम् । अव्यथिष्ट = "व्यथ भयसञ्चलनयोः" इति धातोर्लुङ् ।

भाषार्थः—गवाक्ष नामके वानरने क्रीडापूर्वक चेष्टा की और अनेक पर्वतों को फेंका भी । उस वीर कुम्भकर्णने उनकी परवाह नहीं की और वह व्यथित नहीं हुआ ॥ ४५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अमन्थीच्च पराऽनीकमप्लोष्ट च निरङ्कुशः ।
निहन्तुं चाऽत्वरिष्टाऽरीनजक्षीच्चाऽङ्कमागतान् ॥ ४६ ॥

अन्वयः—(कुम्भकर्णः) परानीकम् अमन्थीत्, निरङ्कुशः (सन्) अप्लोष्ट, अरीन् निहन्तुम् अत्वरिष्ट, अङ्कम् आगतान् अजक्षीच्च ॥

व्याख्या—परानीकं = शत्रुसैन्यम्, अमन्थीत् = क्षोभितवान्, कुम्भकर्ण इति शेषः, एवं परत्राऽपि । निरङ्कुशः = अप्रतिहतशक्तिः सन्, अप्लोष्ट = भ्रान्तवान्, अरीन् = शत्रून्, निहन्तुं = मारयितुम्, अत्वरिष्ट = त्वरां कृतवान्, एवं च अङ्कम् = उत्सङ्गम् समीपमिति भावः, आगतान् = आयातान्, अरीनिति शेषः । अजक्षीच्च = भक्षितवांश्च ॥

व्युत्पत्तिः—अमन्थीत् = "मन्थ विलोडने" इति धातोर्लुङ् । अप्लोष्ट = "प्लुङ् गतौ" इति धातोर्लुङ् । अत्वरिष्ट = "ञित्वरा सम्भ्रमे" इति धातोर्लुङ्, "आदिर्ञिटुडव" इति ञीत्यस्येत्संज्ञा । अजक्षीत् = "जक्ष भक्षहसनयोः" इति धातोर्भक्षणाऽर्थे लुङ्, "नेटी'ति वृद्धिप्रतिषेधश्च ॥

भाषाऽर्थः—कुम्भकर्णने शत्रुसेनाको क्षोभित कर डाला । वह निरङ्कुश होकर घूमने लगा, शत्रुओंको मारनेके लिए शीघ्रता करने लगा और उसने समीप आये हुए शत्रुओं को खा लिया ॥ ४६ ॥

व्यक्रुक्षद्वानराऽनीकं संपलायिष्ट चाऽऽयति ।
हस्ताभ्यां नश्यदक्राक्षीद्भीमे चोपाधिताऽऽनने ॥ ४७ ॥

अन्वयः—(तस्मिन्) आयति वानराऽनीकं अक्रुक्षत् सम्पलायिष्ट च । (कुम्भकर्णः) नश्यत् (तत्) हस्ताभ्याम् अक्राक्षीत्, भीम आनने च उपाधित ॥

व्याख्या—आयति = आगच्छति, तस्मिन्निति शेषः । वानराऽनीकं = कपिसैन्यं, व्यक्रुक्षत् = व्यरुदत्, सम्पलायिष्ट च = सम्पलायितवच्च, नश्यत् = पलायमानं, तदिति शेषः, हस्ताभ्यां = कराभ्याम्, अक्राक्षीत् = आकृष्टवान्, कुम्भकर्ण इति शेषः । भीमे = भयङ्करे, आनने च = मुखे च, उपाधित = न्यस्तवान् ॥

व्युत्पत्तिः—आयति = एतीति आयन्, तस्मिन्, आङ्पूर्वकस्य "इण् गतौ" इति धातोर्लटः शत्रादेशः । व्यक्रुक्षत् = विपूर्वकात् "क्रुश आह्वाने रोदने चे"ति धातोर्लुङ् "शल इगुपधादनिटः क्स" इति च्लेः क्सादेशः । सम्पलायिष्ट = सम्परापूर्वकात् "अय गतौ" इति धातोर्लुङ्, "उपसर्गस्यायतौ" इति रेफस्य लत्वम् । अक्राक्षीत् = "कृष विलेखने" इति धातोर्लुङ्, "अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम्" इत्यम् हलन्तलक्षणा वृद्धिश्च । उपाधित उपपूर्वकात् "डुधाञ् धारणपोषणयोः" इति धातो-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

लुङ्, "स्थाघ्वोरिच्चे"ति इत्वं सिचः कित्वं च कित्वाच्च गुणः "ह्रस्वादङ्गात्" इति सिचो लुक् ॥

भाषाऽर्थः—कुम्भकर्णके आने पर वानरों की सेना रोने लगी और भागने भी लगी। कुम्भकर्णने भागती हुई उसको दोनों हाथोंसे खींचा और भयङ्कर मुखमें डाला भी ॥ ४७ ॥

रक्तेनाऽचिक्लिदद् भूमिं सैन्यैश्चाऽतस्तरद्धतैः ।
नाऽताप्सींद्भक्षयन् क्रूरो नाऽश्रमद् घ्नन् प्लवङ्गमान् ॥ ४८ ॥

अन्वयः—क्रूरो रक्तेन भूमिम् अचिक्लिदत्, हतैः सैन्यैः भूमिम् अतस्तरत् भक्षयन् न अताप्सींत्, प्लवङ्गमान् घ्नन् न अश्रमत् ॥

व्याख्या—क्रूरः = घातुकः, कुम्भकर्ण इति भावः। रक्तेन = रुधिरेण, भूमिं = पृथिवीम्, अचिक्लिदत् = क्लेदितवान्, हतैः = व्यापादितैः, सैन्यैः = सैनिकैः, भूमिम् = पृथिवीम्, अतस्तरत् = छादितवान् ! भक्षयन् = खादन्, न अताप्सींत् = न तृप्तः, प्लवङ्गमान् = वानरान्, घ्नन् = हिंसन्, न अश्रमत् = न श्रान्तः ॥

व्युत्पत्तिः—अचिक्लिदत् = "क्लिदू आर्द्रीभावे" इति ण्यन्तस्य चङि रूपम्। "णौ चङ्युपधाया ह्रस्व" इति उपधाया ह्रस्वत्वम्। अतस्तरत् = "स्तृञ् आच्छादने" (स्तृणातेः) इति धातोर्णौ लुङि चङि रूपम्। "अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम्" इत्यभ्यासस्य अत्वम्। अताप्सींत् = "तृप प्रीणने" इति पुषादेर्धातोर्लुङ्, "स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः" इति पक्षे सिच्। अश्रमत् = "श्रमु तपसि खेदे चे"ति पुषादेर्धातोः खेदे लुङ्, अङ् च ॥

भाषाऽर्थः—क्रूर कुम्भकर्णने बन्दरोंके खूनसे पृथ्वी को आर्द्र कर डाला, मारे गये वानर सैन्योंसे पृथ्वी को आच्छादित कर दिया। वह खाता हुआ तृप्त नहीं हुआ और वानरोंको मारता हुआ थका भी नहीं ॥ ४८ ॥

न योद्धुमशकन् केचिन्नाऽढौकिषत केचन ।
प्राणशन् नासिकाभ्यां च वक्त्रेण च वनौकसः ॥ ४९ ॥

अन्वयः—केचित् योद्धुं न अशकन्। केचन न अढौकिषत। वनौकसो नासिकाभ्यां वक्त्रेण च प्राणशन् ॥

व्याख्या—केचित् = वानराः, योद्धुं = युद्धं कर्तुं, न अशकन् = न शक्ता अभवन्। केचित् = वानराः, न अढौकिषत = समीपं नो जग्मुः। वनौकसः = वानराः, कुम्भकर्णेन मुखे क्षिप्ता इति शेषः। नासिकाभ्यां = घोणाभ्यां, नासिकाविवराभ्यामिति भावः। वक्त्रेण च = मुखेन च, मुखच्छिद्रेणेति भावः। प्राणशन् = प्रनष्टाः पलायिता इति भावः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—अशकन् = "शक्लृ शक्तौ" इति धातोर्लुङ्, लृदित्वादङ्। अढौकिषत = गत्यर्थात् ढौकृधातोर्लुङ्। वनौकसः = वनमोको येषां ते। प्राणशन् = प्रपूर्वकात् "णश अदर्शने" इति धातोर्लुङ्, पुषादित्वादङ् च। "उपसर्गादसमासेऽपि णोपदेशस्ये"ति णत्वम् ॥

भाषाऽर्थः—कुछ वानर लड़नेको समर्थ नहीं हुए, और कुछ तो कुम्भकर्णके समीप नहीं गये। कुम्भकर्णके मुँहके भीतर घुसे हुए कुछ वानर नासिका और मुखके छिद्रसे भागे ॥ ४९ ॥

उदरे चाऽजरन्नन्ये तस्य पातालसन्निभे।
आक्रन्दिषुः सखीनाह्वन् प्रपलायिषताऽस्विदन् ॥ ५० ॥

अन्वयः—अन्ये पातालसन्निभे तस्य उदरे अजरन्, आक्रन्दिषुः, सखीन् आह्वन्, प्रपलायिषत, अस्विदन् ॥

व्याख्या—अन्ये = अपरे, पातालसन्निभे = रसातलसदृशे, तस्य = कुम्भकर्णस्य, उदरे = जठरे, अजरन् = जीर्णाः, आक्रन्दिषुः = आक्रन्दितवन्तः, सखीन् = मित्राणि, आह्वन् = आहूतवन्तः, प्रपलायिषत = प्रपलायितवन्तः, अस्विदन् = स्विन्नाः ॥

व्युत्पत्तिः—पातालसन्निभे = पातालेन सदृशं पातालसन्निभं, तस्मिन्, अस्वपदविग्रहो नित्यसमासः। अजरन् = "जॄष् (झॄष्) वयोहानौ" इति धातोर्लुङ् "जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्चे"ति च्लेरङ् "ऋदृशोऽङि गुणः" इति गुणः। आह्वन् = आङ्पूर्वात् "ह्वेञ् स्पर्धायां शब्दे च"ति धातोर्लुङ्। "लिपिसिचिह्वश्चे" त्यङ्। अस्विदन् = "ञिष्विदा गात्रप्रक्षरणे" इति धातोर्लुङ् "पुषादिद्युताद्यलृदितः परस्मैपदेषु" इति पुषादित्वादङ् ॥

भाषाऽर्थः—और वानर पातालके सदृश कुम्भकर्णके पेटमें जीर्ण हो गये। कुछ चिल्लाने लगे। कोई मित्रोंको बुलाने लगे। कोई भागने लगे। कोई पसीनेसे लथपथ हो गये ॥ ५० ॥

युग्मम् ॥

रक्तमश्च्योतिषुः क्षुण्णाः क्षताश्च कपयोऽतृषन्।
उपास्थायि नृपो भग्नैरसौ सुग्रीवमैजिहत ॥ ५१ ॥

अन्वयः—क्षुण्णाः कपयो रक्तम् अश्च्योतिषुः, क्षताः अतृषन्। असौ नृपो भग्नैः उपास्थायि, सुग्रीवम् (योद्धुम्) ऐजिहत ॥

व्याख्या—क्षुण्णाः = चूर्णिताः सन्तः, कपयः = वानराः, रक्तं = रुधिरम्, अश्च्योतिषुः = क्षरितवन्तः। क्षताः = खण्डिताः, अस्त्रैरिति शेषः। अतृषन् = तृषमुपगताः। असौ = पूर्वोक्तः, नृपः = रामः, भग्नैः = पलायमानैस्तैर्वानरैः, उपा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थापि=उपस्थापितः, सुग्रीवं=वानरराजम्, ऐजिहत्=ईहां कारितवान्, योद्धु मिति परेण सम्बन्धः, योद्धुमादिशदिति भावः ॥

व्युत्पत्तिः—अश्च्योतिषुः="श्च्युतिर् क्षरणे" इति धातोर्लुङ्, "इर इत्संज्ञा वाच्या" इतीत्संज्ञा, "इरितो वा" इति अङ्पक्षे तु "अश्च्युतत्" इति रूपं बोध्यम्। अतृषन्="ञितृषा पिपासायाम्" इति धातोर्लुङ्। पुषादित्वादङ्। उपास्थायि= उपपूर्वात्स्थाधातोः कर्मणि लुङ् अन्तर्भावितणिजर्थः। चिण्। ऐजिहत्="ईह चेष्टा-याम्" इति णिजन्ताद्धातोर्लुङि चङि "द्विर्वचनेऽचि" इति स्थानिवद्भावात् "अजा-देर्द्वितीयस्ये"ति द्वितीयस्य शब्दस्य द्वित्वम्। आट्, "आटश्चे"ति वृद्धिश्च ॥

भाषाऽर्थः—चूर्णित होते हुए वानरोंने रुधिर गिराया। खण्डित वानर प्यासके आकुल हुए। राजा रामने भागते हुए वानरोंको उपस्थित कर सुग्रीवको लड़नेके लिए प्रेरणा की ॥ ५१ ॥

योद्धुं सोऽप्यरुषच्छत्रोरैरिरच्च महाद्रुमम्।
तं प्राप्तं प्रासहिष्टाऽरिः शक्तिं चोग्रामुदग्रहीत् ॥ ५२ ॥

अन्वयः—सोऽपि अरुषत्, योद्धुं शत्रोः महाद्रुमम् ऐरिरच्च। अरिः प्राप्तं तं प्रासहिष्ट, उग्रां शक्तिं च उदग्रहीत् ॥

व्याख्या—सोऽपि=रामप्रेरितः सुग्रीवोऽपि, अरुषत्=रुष्टः, योद्धुं=युद्धं कर्तुं, शत्रोः=रिपोः, कृते समीपे वेति शेषः। महाद्रुमं=महावृक्षम्, ऐरिरच्च= क्षिप्तवांश्च। अरिः=शत्रुः, कुम्भकर्ण इति भावः। प्राप्तम्=आसादितं, तं=महा-द्रुमं, प्रासहिष्ट=सोढवान्, उग्रां=भयङ्करीं, शक्तिं च=आयुधविशेषं च, उदग्रहीत् उद्गृहीतवान् ॥

व्युत्पत्तिः—अरुषत्="रुष रोष" इति धातोर्लुङ्। पुषादित्वादङ्। ऐरिरत्= "ईर क्षेपे" इति स्वार्थिकण्यन्ताद्धातोर्लुङ्। प्रासहिष्ट=प्रपूर्वकात् "षह मर्षणे" इति धातोर्लुङ्। उदग्रहीत्=उत्पूर्वकात् "ग्रह उपादान" इति धातोर्लुङ् ॥

भाषाऽर्थः—सुग्रीव भी रुष्ट हुए और उन्होंने लड़नेके लिए शत्रुके प्रति बड़ेसे पेड़को फेंका भी। शत्रु कुम्भकर्णने प्राप्त हुए उस पेड़का सहन किया और भयङ्कर शक्ति भी उठाई ॥ ५२ ॥

स तामबिभ्रमद्भीमां वानरेन्द्रस्य चाऽमुचत्।
प्रापप्तन्मारुतिस्तत्र तां चाऽलासीद्वियद्गताम् ॥ ५३ ॥

अन्वयः—स भीमां ताम् अबिभ्रमत्, वानरेन्द्रस्य अमुचच्च। तत्र मारुतिः प्रापप्तत्, वियद्गतां ताम् अलासीच्च ॥

व्याख्या—सः=कुम्भकर्णः, भीमां=भयोत्पादिकां, तां=शक्तिम् अबि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्रमत् = भ्रामयामास, वानरेन्द्रस्य = कपिराजस्य सुग्रीवस्येत्यर्थः, उपरीति शेषः। अमुचच्च = मुक्तवांश्च। तत्र=तस्यां, शक्ताविति भावः, मुक्तायामिति शेषः। मारुतिः= हनूमान्, प्रापसत् = प्रत्युपस्थितः, वियद्गतां = आकाशगतां, तां = शक्तिम्, अलासीच्च = गृहीतवांश्च ॥

व्युत्पत्तिः—अबिभ्रमत् = "भ्रमु अनवस्थाने" इति ण्यन्ताद्धातोर्लुङि चङि रूपम्। अमुचत = "मुच्लृ मोक्षणे" इति धातोर्लुङ्, लृदित्वादङ् च। प्रापप्तत = प्रपूर्वकात् "पत्लृ पतने" इति धातोर्लुङ्, लृदित्वादङ् "पतः पुम्" इति पुमागमश्च। अलासीत् = "ला आदाने" इति धातोर्लुङ् "यमरमनमातां सक् चे"ति सगिटौ ॥

भावार्थः—कुम्भकर्णने भयङ्कर उस शक्तिको घुमाया और सुग्रीवके ऊपर फेंका भी। उस शक्तिको छोड़ने पर वहां हनूमान्‌जी उपस्थित हुए और उन्होंने ऊपर गई हुई उस शक्तिको ले भी लिया ॥ ५३ ॥

युग्मम् ॥

अशोभिष्टाऽचखण्डच्च शक्तिं वीरो न चाऽयसत्।
लौहभारसहस्रेण निर्मिता निरकारि मे ॥ ५४ ॥
शक्तिरित्यकुपद् रक्षो गिरिं चोदखनीद् गुरुम्।
व्यसृष्ट तं कपीन्द्रस्य तेनाऽमूर्च्छीदसौ क्षतः ॥ ५५ ॥

अन्वयः—वीरः अशोभिष्ट, शक्तिम् अचखण्डत् न आयसत्। "लौहभार-सहस्रेण निर्मिता मे शक्तिः निरकारि" इति रक्षः अकुपत्, गुरुं गिरिम् उदखनीत्; तं कपीन्द्रस्य व्यसृष्ट। तेन क्षतः असौ अमूर्च्छीत् ॥

व्याख्या—वीरः = शूरः, गृहीतशक्तिर्हनूमानिति भावः। अशोभिष्ट = शोभा प्राप्तवान्, शक्तिं = कुम्भकर्णप्रहितमायुधविशेषम्, अचखण्डत् = खण्डितवान्, न च आयसत् = न च आयासं प्राप। लौहभारसहस्रेण = लोहभारदशशत्या, निर्मिता= रचिता, मे = मम, शक्तिः = आयुधविशेषः, निरकारि = भग्ना, अनेनेति शेषः, इति= अनेन हेतुना, रक्षः = राक्षसः, कुम्भकर्ण इत्यर्थः। अकुपत् = कुपितः, गुरुं=गौरवविशिष्टं, गिरिं = पर्वतम्, उदखनीत् = उत्खातवान्, तं = गिरिं, कपीन्द्रस्य=वानरराजस्य, सुग्रीवस्येति भावः, उपरीति शेषः। व्यसृष्ट = विसृष्टवान्। तेन = गिरिणा, क्षतः = हतः, असौ = कपीन्द्रः, अमूर्च्छीत्=मूर्च्छितवान् ॥

व्युत्पत्तिः—अचखण्डत् = "(खड) खडि भेदने" इति चौरादिकाद्धातोर्लुङ्। आयसत्=आङ्पूर्वकात् "यसु प्रयत्ने" इति धातोर्लुङ्, पुषादित्वादङ्। लौहभार-सहस्रेण=लौहानां भारास्तेषां सहस्रेण, "तुला स्त्रियां पलशतं, भारः स्याद्विंशति-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तुलाः" इत्यमरः । अकुपत् = "कुप क्रोधे" इति धातोर्लुङ्, पुषादित्वादङ् । उद-खनीत् = उत्पूर्वकात् "खनु अवदारणे" इति धातोर्लुङ् "अतो हलादेर्लघोः" इति वृद्ध्यभावपक्षे रूपम् । व्यसृष्ट = विपूर्वकात् "सृज विसर्गे" इत्यनुदात्ततो धातोर्लुङ् । "झलो झलि" इति सिचो लोपः "लिङ्सिचावात्मनेपदेषु" इति सिचः कित्वान्न गुणो नाऽप्यम् । अमूर्च्छीत् = "मूर्छा मोहसमुच्छ्राययोः" इति धातोर्लुङ् ॥

भाषाऽर्थः—वीर हनुमान् जी शोभित हुए । उन्होंने शक्तिको तोड़ डाला परन्तु आयास का अनुभव नहीं किया । "लोहेके हजार भारोंसे बनी हुई मेरी शक्तिको इसने तोड़ा" ऐसा विचार कर राक्षस कुम्भकर्ण कुपित हुआ और उसने बड़े पहाड़ उखाड़ डाला, और उसे सुग्रीवके ऊपर फेंका । उस पहाड़से ताडित होकर सुग्रीवजी मूर्च्छित हो गये ॥ ५४–५५ ॥

> अलोठिष्ट च भूपृष्ठे शोणितं चाऽप्यसुस्रुवत् ।
> तमादाय पलायिष्ट व्यरोचिष्ट च राक्षसः ॥ ५६ ॥

अन्वयः—(असौ) भूपृष्ठे अलोठिष्ट, शोणितं चापि (अस्य) असुस्रुवत् । राक्षसः तम् आदाय पलायिष्ट व्यरोचिष्ट च ॥

व्याख्या—भूपृष्ठे, = भूमिपृष्ठे, अलोठिष्ट = लुठितवान्, सुग्रीव इति शेषः । शोणितं च = रुधिरं, असुस्रवत् = स्रुतं, सुग्रीवस्येति शेषः । राक्षसः = कुम्भकर्णः, तं = सुग्रीवम्, आदाय = गृहीत्वा, पलायिष्ट = पलायितः, व्यरोचिष्ट च = व्यरुचच्च, विजयेनेति शेषः ॥

व्युत्पत्तिः—अलोठिष्ट = "(रुठ) लुठ प्रतिघाते" इति द्युतादेर्धातोर्लुङ् "द्युद्भ्यो लुङि" इति परस्मैपदविकल्पत्वादात्मनेपदम् । असुस्रुवत् = "स्रु गतौ" इति धातोर्लुङ् "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति चङ् । पलायिष्ट = परापूर्वकात् "अय गतौ" इति धातोर्लुङ् "उपसर्गस्याऽयतौ" इति रेफस्य लत्वम् । व्यरोचिष्ट = विपूर्वकात् "रुच दीप्तावभिप्रीतौ चे"ति धातोर्लुङ् ॥

भाषार्थः—सुग्रीवजी भूपृष्ठपर गिर पड़े । उनका रुधिर बहने लगा । कुम्भकर्ण, उनको लेकर भागा और शोभित हुआ ॥ ५६ ॥

युग्मम्—

> अभैषुः कपयोऽन्वारत् कुम्भकर्णं मरुत्सुतः ।
> शनैरबाधि सुग्रीवः सोऽलुञ्चीत् कर्णनासिकम् ॥ ५७ ॥
> राक्षसस्य न चाऽत्रासीत् प्रनंष्टमयतिष्ट च ।
> अक्रोधि कुम्भकर्णेन पेष्टुमारम्भि च क्षितौ ॥ ५८ ॥

अन्वयः—कपयः—अभैषुः । मरुत्सुतः कुम्भकर्णम् अन्वारत् । सुग्रीवः शनैः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अबोधि । स राक्षसस्य कर्णनासिकम् अलुञ्चीत्, न अत्रासीत्। प्रनंष्टुम् अयतिष्ट च । कुम्भकर्णेन अक्रोधि, क्षितौ पेष्टुम् आरम्भि च ॥

व्याख्या—कपयः = वानराः, अभैषुः = भीताः, मरुत्सुतः = वायुपुत्रः, हनूमानित्यर्थः । कुम्भकर्णं = रावणमध्यमाऽनुजम्, अन्वारत् = अनुगतः । सुग्रीवः = कपीश्वरः, शनैः = मनाक्, अबोधि = लब्धसंज्ञोऽभूत् । सः = सुग्रीवः, राक्षसस्य = कुम्भकर्णस्य, कर्णनासिकं = श्रोत्रघोणम्, अलुञ्चीत् = कृत्तवान्, न अत्रासीत् = नो त्रस्तः, प्रनंष्टुं = पलायितुम्, अयतिष्ट च = यत्नं कृतवांश्च । ततः कुम्भकर्णेन = रावणमध्यमाऽनुजेन, अक्रोधि = क्रुद्धं, क्षितौ = पृथिव्यां, पेष्टुं = चूर्णयितुम्, आरम्भि च = आरब्धश्च, सुग्रीव इति शेषः ॥

व्युत्पत्तिः—अभैषुः = "ञिभी भये" इति धातोर्लुङ्। अन्वारत् = अनुपूर्वकात् "ऋ (सृ) गतौ" इति धातोर्लुङ् "सर्तिशास्त्यर्तिभ्यश्च" च्लेः अङ् "ऋदृशोऽङि गुणः" इति गुणः । अबोधि = "बुध अवगमने" इति धातोर्लुङ्, "दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्" इति च्लेः कर्तरि चिणादेशः । कर्णनासिकं = कर्णौ च नासिके च, "द्वन्द्वश्च प्राणितूर्यसेनाऽङ्गानाम्" इति प्राण्यङ्गत्वात्समाहारद्वन्द्वः । अलुञ्चीत् = "लुञ्च अपनयने" इति धातोर्लुङ्। अत्रासीत् = "त्रसी उद्वेगे" इति धातोर्लुङ् । प्रनंष्टुं=प्रपूर्वकात् "णश अदर्शने" इति धातोः "समानकर्तृकेषु तुमुन्" इति तुमुन् "मस्जिनशोर्झलि" इति नुम् । अयतिष्ट = "यती प्रयत्ने" इति धातोर्लुङ् । अक्रोधि = क्रुधधातोर्भावे लुङ् । आरम्भि = आङ्पूर्वकात् "रभ राभस्ये" इति धातोः कर्मणि लुङ । राभस्यमुपक्रमः । "रभेरशब्लिटोः" इति नुम् ॥

भाषाऽर्थः—वानरलोग डर गये । हनूमान्‌जीने कुम्भकर्णका अनुगमन किया । सुग्रीवजी धीरे-धीरे जाग पड़े । उन्होंने कुम्भकर्णकी नाक और कानों को काट डाला । वे त्रस्त भी नहीं हुए और भागनेके लिए कोशिश भी करने लगे । कुम्भकर्ण क्रुद्ध हुआ और सुग्रीवको जमीनपर पीसनेके लिए आरम्भ भी करने लगा ॥ ५८ ॥

सुग्रीवोऽस्याऽभ्रशद्धस्तात् समगाहिष्ट चाऽम्बरम् ।
तूर्णमन्वसृपद् राममानन्दच्च वानरान् ॥ ५९ ॥

अन्वयः—सुग्रीवः अस्य हस्तात् अभ्रशत् अम्बरं समगाहिष्ट च; तूर्णं रामम् अन्वसृपत् वानरान् आनन्दच्च ॥

व्याख्या—सुग्रीवः = वानरराजः, अस्य = कुम्भकर्णस्य, हस्तात् = करात्, अभ्रशत् = भ्रष्टः, अम्बरम् = आकाशं, समगाहिष्ट च = आक्रान्तवांश्च, तूर्णं = सत्वरं राम = रामचन्द्रम्, अन्वसृपत् = अनुगतः, वानरान् = कपीन्, आनन्दच्च = तोषितवांश्च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—अभ्रशत्="(भृशु) भ्रंशु अधः पतने" इति धातोर्लुङ्, पुषादित्वादङ्। समगाहिष्ट=संपूर्वकात् "गाहू विलोडन" इत्यनुदात्तेतो धातोर्लुङ्। अन्वसृपत्="(गम्लृ) सृप्लृ गतौ" इति धातोर्लुङ्, लृदित्वादङ्। आननन्दत्= आङ्पूर्वकात् "टुनदि समृद्धौ" इति ण्यन्ताद्धातोर्लुङ् इदित्वान्नुम् ॥

भाषाऽर्थः—सुग्रीवजी कुम्भकर्णके हाथसे छूट गये और उन्होंने आकाशमें अवगाहन किया। वे शीघ्र रामके अनुगत हुए। उन्होंने अपने कर्मसे वानरोंको आनन्दित भी किया ॥ ५९ ॥

अतत्वरच्च तान् योद्धुमचिचेष्टच्च राघवौ ।
कुम्भकर्णो न्यवर्तिष्ट रणेऽयुत्सत वानराः ॥ ६० ॥

अन्वयः—(सः) तान् योद्धुम् अतत्वरत् राघवौ च अचिचेष्टत्। कुम्भकर्णो रणे न्यवर्तिष्ट। वानराः अयुत्सत ॥

व्याख्या—तान्=वानरान्, योद्धुं=युद्धं कर्तुम्, अतत्वरत्=त्वरयति स्म, सुग्रीव इति शेषः। राघवौ च=रामलक्ष्मणौ च, अचिचेष्ट=योद्धुं चेष्टयामास। कुम्भकर्णः=रावणमध्यमाऽनुजः, रणे=संग्रामे, न्यवर्तिष्ट=निवृत्तः। वानराः= कपयः, अयुत्सत=युध्यन्ते स्म ॥

व्युत्पत्तिः—अतत्वरत्="ञित्वरा संभ्रमे" इति ण्यन्ताद्धातोर्लुङ्, "अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्" इत्यभ्यासस्य अत्वम्। अचचेष्टत="चेष्ट चेष्टायाम्" इति ण्यन्ताद्धातोर्लुङ्। "विभाषा वेष्टिचेष्ट्योः" इति अभ्यासस्य अत्वपक्षे रूपं, तदभावे "अचिचेष्टत्" इति रूपम्। न्यवर्तिष्ट=निपूर्वात् "वृतु वर्तने" इति धातोर्लुङ्। "द्युद्भ्यो लुङि" इति परस्मैपदाऽभावपक्षे रूपम्। अयुत्सत="युध संप्रहारे" इति धातोर्लुङ्, सिच्, झस्यादादेशश्च ॥

भाषाऽर्थः—सुग्रीवने वानरोंको लड़नेके लिए शीघ्रता कराई और राम और लक्ष्मणको भी लड़नेके लिए चेष्टित किया। कुम्भकर्ण युद्धसे निवृत्त हुआ। वानर लड़ने लगे ॥ ६० ॥

अविवेष्टन्नृपाऽऽदेशादारुक्षंश्चाऽऽशु राक्षसम् ।
तानधावीत् समारूढांस्तेऽप्यस्रंसिषताऽऽकुलाः ॥ ६१ ॥

अन्वयः—(रामो वानरैः) राक्षसम् अविवेष्टत्। नृपाऽऽदेशात् (ते) राक्षसम् आशु आरुक्षँश्च। (राक्षसः) समारूढान् तान् अधावीत्। ते अपि आकुलाः (सन्तः) अस्रंसिषत ॥

व्याख्या—राक्षसं=कुम्भकर्णम्, अविवेष्टत्=वेष्टयति स्म (रामो वानरैरिति शेषः)। नृपाऽऽदेशात्=राजनियोगात्, राजाऽऽज्ञया इति भावः। राक्षसं=कुम्भ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्णम्, आशु = शीघ्रम्, आरुरुहन् = आरूढाश्च, वानरा इति शेषः। समारूढान् = स्वस्योपरि कृताऽऽरोहणान्, तान्=वानरान्, अधावीत्=धूतवान्, कुम्भकर्ण इति शेषः। तेऽपि=वानरा अपि, आकुलाः=व्याकुलाः सन्तः, अस्रंसिषत= स्रस्ताः, पतिता इति भावः॥

व्युत्पत्तिः—अविवेष्टत्="वेष्ट वेष्टने" इति ण्यन्ताद्धातोर्लुङ्। पक्षान्तरे "विभाषा वेष्टिचेष्ट्योः" इति अभ्यासस्य अत्वेन "अववेष्टत्" इति रूपम्। अत्र प्रयोजककर्तृत्वेन "राम" इति पदस्य अध्याहारं कुर्वतोऽपि जयमङ्गलभरतमल्लि-कादयो "वानरा अविवेष्टन्" इति "वानरान् वेष्टयामासुः" इति च कथं नाम समलिखन्निति नैव वेद्मि, वेष्टधातोः सकर्मकत्वात् प्रयोज्ये कर्तरि तृतीययैव विभक्त्या भाव्यमिति सामकीना मनीषा। मल्लिनाथस्तु "वानरा" इति पदमध्याहृत्य "वानरा नृपादेशात् आशु राक्षसम् अविवेष्टन्" इत्यन्वययोजनामकार्षीत्तत्र अविवेष्टन्त इत्यर्थः। एवं चाऽत्र णिजर्थस्याऽनन्वयादविवक्षेति द्रष्टव्यम् इत्यपि स एवाह। आरुरुहन् = आङ् पूर्वकात् रुहधातोर्लुङ्, "शल इगुपधादनिटः क्सः" इति च्लेः क्सा-देशः। अधावीत्="धूञ् कम्पने" इति धातोर्लुङ्, "स्वरतिसूतिसूयतिधूञूदितो वा" इति इडागमः "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः। अस्रंसिषत = "स्रंसु (ध्वंसु भ्रंसु) अवस्रंसने" इति द्युतादेर्धातोर्लुङ्, परस्मैपदाऽभावान्नाङ्॥

भाषाऽर्थः—रामने वानरोंसे कुम्भकर्ण को वेष्टित करवाया। रामकी आज्ञासे उन लोगोंने कुम्भकर्णके ऊपर शीघ्र आरोहण किया। कुम्भकर्णने अपने ऊपर चढ़े हुए उन वानरों को कम्पित किया। वे भी आकुल होते गिर पड़े॥ ६१॥

अग्रसिष्ट व्यधाविष्ट समाश्लिक्षच्च निर्दयम्।
ते चाऽप्यघोरिषुर्घोरं रक्तं चाऽवमिषुर्मुखैः॥ ६२॥

अन्वयः—(कुम्भकर्णः कांश्चित्) अग्रसिष्ट (कांश्चित) व्यधाविष्ट, निर्दयं समाश्लिक्षच्च। ते च घोरम् अघोरिषुः, मुखैः रक्तम् अवमिषुश्च॥

व्याख्या—अग्रसिष्ट=भक्षितवान्, कुम्भकर्णः कांश्चिदिति शेषः, एवं परत्राऽपि। व्यधाविष्ट=विधावितवान्, निर्दयं=निष्करुणं यथा तथा, समाश्लिक्षच्च= आलिङ्गितवांश्च, आलिङ्गय हतवांश्चेति भावः। ते च=कुम्भकर्णपीडिता वानराश्च, घोरं=भयङ्करं यथा तथा, अघोरिषुः=शब्दं कृतवन्तः, मुखैः=आननैः रक्तं=रुधिरम्, अवमिषुश्च=उद्गीर्णवन्तश्च॥

व्युत्पत्तिः—अग्रसिष्ट="ग्रसु (ग्लसु) अदने" इति धातोर्लुङ्। व्यधाविष्ट= विपूर्वकात् "धावु गतिशुद्धयोः" इति धातोर्लुङ्। निर्दयं=निर्गता दया यस्मिन्कर्मणि तद्यथा तथेति क्रियाविशेषणम्। समाश्लिक्षत्=समाङ्पूर्वकात् "श्लिष आलि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षन" इति धातोर्लुङ्, "शल इगुपधादनिटः क्स" इति च्लेः क्सादेशः । अघोरिषुः= "घुर भीमाऽर्थशब्दयोः" इति धातोर्लुङ् । अवमिषुः= "टुवम् उद्गिरणे" इति धातोर्लुङ् ॥

भाषाऽर्थः—कुम्भकर्णने कुछ वानरोंको खा डाला, कुछ वानरोंके ऊपर धावन किया और कुछ लोगोंको निर्दयतापूर्वक आलिङ्गन कर मार डाला! वानर भी भयङ्कर शब्द करने लगे और मुखसे रक्तवमन करने लगे ॥ ६२ ॥

स चाऽपि रुधिरैर्मत्तः स्वेषामप्यदयिष्ट न ।
अग्रहीच्चाऽऽयुरन्येषामरुद्ध च पराक्रमम् ॥ ६३ ॥

अन्वयः—स च रुधिरैः मत्तः (सन्) स्वेषाम् अपि न अदयिष्ट, अन्येषाम् आयुः अग्रहीत्, पराक्रमं च अरुद्ध ॥

व्याख्या—स च = कुम्भकर्णश्च, रुधिरैः = रक्तैः, मत्तः = उत्कटः सन्, स्वेषाम् अपरेषां किमुतेति भावः, अर्थापत्तिरलङ्कारः । अन्येषाम् = अपरेषां, वानराणामिति भावः । आयुः = जीवितम्, अग्रहीत् = गृहीतवान् । "अदोहीवायुः" इति पाठान्तरं तत्र तादृशं कुम्भकर्णं दृष्टवताम् अन्येषां = वानराणाम्, आयुः = जीवितम्, अदोहि इव = स्वयं गतम् इवेत्यर्थः । पराक्रमं च = विक्रमं च, अन्येषामिति शेषः । अरुद्ध = रुद्धवान् ॥

व्युत्पत्तिः—स्वेषाम् = "अदयिष्टे"ति दयधातोर्योगे "अधीगर्थदयेशां कर्मणि" इति षष्ठी । अदयिष्ट = "दय दानगतिरक्षणहिंसादानेषु" इति धातोर्लुङ् । अग्रहीत् = "ग्रह उपादाने" इति धातोर्लुङ् । हकारान्तत्वात् "ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्" इति वृद्धिनिषेधः । अदोहि = "दुह प्रपूरणे" इति धातोः "दुहश्चे"ति कर्मकर्तरि चिण् । अरुद्ध = "रुधिर् आवरणे" इति धातोर्लुङ्, "झलो झलि" इति सिचो लोपः । "झषस्तथोर्धोऽधः" इति धत्वं "झलां जश् झशि" इति दत्वं च । मल्लिनाथस्तु "अरुधत्" इति पाठान्तरमुल्लिख्य "इरितो वे"ति विकल्पादङ् इत्याह ॥

भाषाऽर्थः—कुम्भकर्णने रुधिरसे मत्त होकर आत्मीय राक्षसोंके ऊपर भी दया नहीं की । उसने कई वानरोंका जीवन ले लिया और उनके पराक्रमको भी रोक डाला ॥ ६३ ॥

संत्रस्तानामपाहारि सत्त्वं च वनवासिनाम् ।
अच्छेदि लक्ष्मणेनाऽस्य किरीटं कवचं तथा ॥ ६४ ॥

अन्वयः—(तेन) संत्रस्तानां वनवासिनां सत्त्वं च अपाहारि । लक्ष्मणेन अस्य किरीटं तथा कवचम् अच्छेदि ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—संत्रस्तानां=सम्भीतानां, वनवासिनां=वानराणां, सत्त्वं च=बलं च, अपाहारि=अपहृतं, तेनेति शेषः। अथ, लक्ष्मणेन=रामाऽनुजेन, अस्य=कुम्भकर्णस्य, किरीटं=मुकुटं, तथा=तेन प्रकारेण, कवचं=वर्म, अच्छेदि=छिन्नम् ॥

व्युत्पत्तिः—अपाहारि=अपपूर्वकात् "हृञ् हरणे" इति धातोः कर्मणि लुङ्। अच्छेदि="छिदिर् द्वैधीकरणे" इति धातोः कर्मणि लुङ् ॥

भाषाऽर्थ—कुम्भकर्णने डरे हुए वानरोंके बलका भी अपहरण किया। तब लक्ष्मणजीने उसके मुकुट और कवचको काट दिया ॥ ६४ ॥

अभेदि च शरैर्देहः प्राशंसीत्तं निशाचरः।
अस्पर्धिष्ट च रामेण तेनाऽस्याऽक्षिप्सतेषवः ॥ ६५ ॥

अन्वयः—(लक्ष्मणेन) शरैः देहः अभेदि। निशाचरः तं प्राशंसीत्, रामेण अस्पर्धिष्ट च। तेन अस्य इषवः अक्षिप्सत ॥

व्याख्या—शरैः=बाणैः, देहः=शरीरं, कुम्भकर्णस्येति भावः। अभेदि=भिन्नः। लक्ष्मणेनेति शेषः। निशाचरः=राक्षसः, कुम्भकर्ण इति भावः। तं=लक्ष्मणं, प्राशंसीत्=स्तुतवान्, रामेण=रामचन्द्रेण, अस्पर्धिष्ट च=योद्धुं स्पर्धां कृतवान्। तेन=रामेण, अस्य=कुम्भकर्णस्य, कृते इति शेषः। इषवः=बाणाः, अक्षिप्सत=क्षिप्ताः ॥

व्युत्पत्तिः—अभेदि="भिदिर् विदारणे" इति धातोः कर्मणि लुङ्। निशाचरः=निशायां चरतीति, "चरेष्ट" इति टः। प्राशंसीत्=प्रपूर्वकात् "शंसु स्तुतौ" इति धातोर्लुङ्। अस्पर्धिष्ट="स्पर्ध संघर्षे" इति धातोर्लुङ्, संघर्षः पराऽभिभवेच्छा। अक्षिप्सत="क्षिप प्रेरणे" इति धातोः कर्मणि लुङ्, इक्समीपहलन्तादात्मनेपदे लिचः कित्वाद् गुणाऽभावः ॥

भाषाऽर्थ—लक्ष्मणजीने बाणोंसे कुम्भकर्णके शरीरको भेदन किया। कुम्भकर्णने लक्ष्मणकी प्रशंसा की और रामचन्द्रजीके साथ स्पर्धा की। रामचन्द्रजीने उसके ऊपर बाण फेंके ॥ ६५ ॥

यैरघानि खरो वाली मारीचो दूषणास्तथा।
अवामंस्त स तान् दर्पात् प्रोदयंसीच्च मुद्गरम् ॥ ६६ ॥

अन्वयः—यैः खरो वाली मारीचः तथा दूषणः अघानि। स तान् दर्पात् अवामंस्त, मुद्गरं च प्रोदयंसीत् ॥

व्याख्या—यैः=इषुभिः, खरः=तन्नामा राक्षसः, वाली=सुग्रीवाऽग्रजः, मारीचः=तन्नामा राक्षसः, तथा=तेन प्रकारेण, दूषणः=तन्नामा राक्षसः, अघानि=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यापादितः, ते अचिक्षिपत इति पूर्वेण सम्बन्धः । सः = कुम्भकर्णः तान् = तादृशान् इषून् , दर्पात् = गर्वात् , अवामंस्त = तिरश्चकार, मुद्गरं च = द्रुघणं च, प्रोदयंसीत् = उद्गूर्णवान् ॥

व्युत्पत्तिः—अघानि="हन हिंसागत्योः" इति धातोः कर्मणि लुङ् चिणि वृद्धिः, "हो हन्तेर्ञ्णिन्नेषु" इति कुत्वं च । मुद्गरं—"द्रुघणे मुद्गरघनौ" इत्यमरः । प्रोदयंसीत्=प्रोत्पूर्वकात् "यमु उपरमे" इति धातोर्लुङ् । "यमरमनमातां सक् च" इति सगिटौ । अत्र परस्मैपदं चिन्त्यं "समुदाङ्भ्यो यमोऽग्रन्थे" इत्यात्मनेपदविधानात्" इति मल्लिनाथः ॥

भाषाऽर्थः—रामचन्द्रजीने जिन बाणों से खर, बाली, मारीच और दूषणको मारा था, उन्हीं बाणोंको छोड़ा । कुम्भकर्णने दर्पसे उनकी उपेक्षा की और मुद्गरको भी उठाया ॥ ६६ ॥

वायव्याऽस्त्रेण तं पाणिं रामोऽच्छैत्सीत् सहाऽऽयुधम् ।
आदीपि तरुहस्तोऽसावधावीच्चाऽरिसंमुखम् ॥ ६७ ॥

अन्वयः—रामो वायव्याऽस्त्रेण सहाऽऽयुधं तं पाणिम् अच्छैत्सीत् । असौ तरुहस्त आदीपि अरिसम्मुखं च अधावीत् ॥

व्याख्या—रामः = रामचन्द्रः, वायव्याऽस्त्रेण = वायव्याऽऽयुधेन, सहायुधम् = आयुधसहितं, समुद्गरमिति भावः । तं = पूर्वोक्तं, पाणिं = करं, कुम्भकर्णस्येति शेषः । अच्छैत्सीत् = छिन्नवान् । असौ = कुम्भकर्णः, तरुहस्तः = वृक्षकरः सन् , आदीपि = आदीप्तः, अरिसम्मुखं च = शत्रुसम्मुखं च, रामाऽभिमुखमिति भावः । अधावीत् = वेगेन गतः ॥

व्युत्पत्तिः—वायव्याऽस्त्रेण = वायुर्देवताऽस्येति वायव्यं, "वाय्वृतुपित्रुषसो यत्" इति यत् , "ओर्गुणः" इति गुणः "वान्तो यि प्रत्यये" इत्यवादेशः । वायव्यं च तदस्त्रं, तेन । सहाऽऽयुधम् = आयुधेन सहितः सहायुधस्तम्, "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः । अच्छैत्सीत्="छिदिर् द्वैधीकरणे" इति धातोर्लुङ् । तरुहस्तः= तरुर्हस्तेऽस्य सः, तरोः प्रहरणत्वात् "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ" इति पूर्वनिपातः । आदीपि=आङ्पूर्वकात् "दीपी दीप्तौ' इति धातोर्लुङ् , "दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्" इति कर्तरि चिण् । अधावीत् = "धावु गतिशुद्ध्योः" इति धातोर्लुङ् ॥

भाषाऽर्थः—रामचन्द्रजीने वायव्याऽस्त्रसे मुद्गरके सहित कुम्भकर्णके हाथ को काट डाला । तब कुम्भकर्ण हाथमें वृक्ष लेकर शोभित हुआ और शत्रु (रामचन्द्रजी) के सम्मुख दौड़ पड़ा ॥ ६७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सवृक्षमच्छिदत्तस्य शक्राऽस्त्रेण करं नृपः ।
जङ्घे चाऽशीशतद् बाणैरप्रासीदिषुभिर्मुखम् ॥ ६८ ॥

अन्वयः—नृपः शक्राऽस्त्रेण सवृक्षं तस्य करम् अच्छिदत्; बाणैः जंघे अशीशतत्, इषुभिः मुखम् अप्रासीत् ॥

व्याख्या—नृपः = महाराजः, रामचन्द्र इत्यर्थः। शक्रास्त्रेण = इन्द्राऽस्त्रेण, सवृक्षं = तरुसहितं, तस्य = कुम्भकर्णस्य, करं = हस्तम्, अच्छिदत् = छिन्नवान्, बाणैः = शरैः, जंघे = प्रसृते, कुम्भकर्णस्येति शेषः। अशीशतत् = गमनाऽसमर्थे कृतवान्, इषुभिः=बाणैः, मुखं=वक्त्रम्, अप्रासीत् = पूरितवान् ॥

व्युत्पत्तिः—नृपः=नॄन्पातीति नृपः, "आतोऽनुपसर्गे क" इति कप्रत्ययः। "राज्ञि राट्पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः" इत्यमरः। अच्छिदत् = "छिदिर् द्वैधीकरणे" इति धातोर्लुङ्। "इर इत्संज्ञा वाच्या" इतीर इत्संज्ञा, "इरितो वा" इति विकल्पेन च्लेरङ्। तदभावपक्षे "अच्छैत्सीत्" इति रूपम्। अशीशतत्="शद्लृ शातने" इति धातोर्णौ लुङ्। "शदेरगतौ त" इति तोऽन्तादेशः। प्रासीत्="प्राप् पूरणे" इति धातोर्लुङ्, "यमरमनमातां सक् चे"ति सगिटौ ॥

भाषाऽर्थः—राजा (राम) ने इन्द्राऽस्त्रसे वृक्षयुक्त कुम्भकर्णके हाथ को काट डाला, बाणोंसे जङ्घाओंको चलने में असमर्थ बनाया और बाणोंसे मुखको भर दिया ॥ ६८ ॥

ऐन्द्रेण हृदयेऽव्यासीत् सोऽध्यवात्सीच्च गां हतः ।
अपिक्षातां सहस्रे द्वे तद्देहेन वनौकसाम् ॥ ६९ ॥

अन्वयः—(रामः) ऐन्द्रेण (कुम्भकर्णस्य) हृदये अव्यात्सीत्। हतः स गाम् अध्यवात्सीत्। तद्देहेन वनौकसां द्वे सहस्रे अपिक्षाताम् ॥

व्याख्या—ऐन्द्रेण = इन्द्राऽस्त्रेण, हृदये = वक्षःस्थले, कुम्भकर्णस्येति शेषः। अव्यात्सीत् = विद्धवान्, राम इति शेषः। हतः = विद्धः, सः = कुम्भकर्णः, गां = भूमिम्, अध्यवात्सीत् = अध्युषितवान्। तद्देहेन = कुम्भकर्णशरीरेण, वनौकसां = वानराणां, द्वे सहस्रे = द्वे दशशत्यौ, अपिक्षातां = चूर्णिते ॥

व्युत्पत्तिः—ऐन्द्रेण = इन्द्रो देवताऽस्येति ऐन्द्रं, तेन। "साऽस्य देवता" इत्यण्। अव्यात्सीत् = "व्यध ताडने" इति धातोर्लुङ्, "वदव्रजहलन्तस्याऽचः" इति वृद्धिः। गाम् = "अध्यवात्सीत्" इति अधिपूर्वकस्य "वस निवासे" इति धातोर्योगे "उपान्वध्याङ्वसः" इति आधारस्य कर्मत्वम्। "गौरिला कुम्भिनी क्षमा।" इति कोषः। वनौकसां=वनमोको येषां ते वनौकसस्तेषाम्। अपिक्षातां = "पिष्लृ संचूर्णने" इति धातोः कर्मणि लुङ् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—रामचन्द्रजीने इन्द्राऽस्त्रसे कुम्भकर्ण के हृदयमें वेधन किया। विद्ध होकर उसने भूमिपर निवास किया। उसके शरीरमें दो हजार वानर पीसे गये ॥ ६९ ॥

अस्ताविषुः सुरा रामं दिशः प्रापन्निशाचराः ।
भूरकम्पिष्ट साऽद्रीन्द्रा व्यचालीदम्भसां पतिः ॥ ७० ॥

अन्वयः—सुरा रामम् अस्ताविषुः । निशाचरा दिशः प्रापन् । साऽद्रीन्द्रा भूः अकम्पिष्ट । अम्भसां पतिः व्यचालीत् ॥

व्याख्या—रामेण कुम्भकर्णे हते सति—सुराः = देवाः, राम = रामचन्द्रम्, अस्ताविषुः = स्तुतवन्तः । निशाचराः = राक्षसाः, दिशः = आशाः, प्रापन् = प्राप्तवन्तः, भयादिति शेषः । साऽद्रीन्द्रा = कुलपर्वतसहिता, भूः = पृथिवी, अकम्पिष्ट = कम्पिता । अम्भसां पतिः = समुद्रः, व्यचालीत् = प्रक्षुभितवान् ॥

व्युत्पत्तिः—अस्ताविषुः = "ष्टुञ् स्तुतौ" इति धातोर्लुङ् । "स्तुसुधूञ्भ्यः परस्मैपदेषु" इतीट । प्रापन् = प्रपूर्वकात् "आप्लृ व्याप्तौ" इति धातोर्लुङ् । लृदित्वात् "पुषादिद्युताद्यलृदितः परस्मैपदेषु" इति च्लेरङ् । साऽद्रीन्द्रा = अद्रीणामिन्द्रा अद्रीन्द्राः, महेन्द्रादयः कुलपर्वताः, तैः सहिता । व्यचालीत् = विपूर्वाच्चलधातोर्लुङ्, "अतो ल्रान्तस्ये"ति वृद्धिः ॥

भाषाऽर्थः—कुम्भकर्णके मारे जानेपर देवताओंने रामचन्द्रजीकी स्तुति की। भयसे राक्षस दिशाओंमें भाग गये। महेन्द्र आदि कुलपर्वतोंके साथ पृथ्वी काँपी। समुद्र भी विचलित हुआ ॥ ७० ॥

हतं रक्षांसि राजानं कुम्भकर्णमशिश्रवन् ।
अरोदीद्रावणोऽशोचीन् मोहं चाऽशिश्रियत्परम् ॥ ७१ ॥

अन्वयः—रक्षांसि राजानं हतं कुम्भकर्णम् अशिश्रवन् । रावणः अरोदीत्, अशोचीत्, परं मोहं च अशिश्रियत् ॥

व्याख्या—रक्षांसि = राक्षसाः, राजानं = भूपं रावणमिति भावः । हतं = व्यापादितं, रामेणेति शेषः । कुम्भकर्णं = रावणमध्यमाऽनुजम्, अशिश्रवन् = श्रावितवन्तः । "कुम्भकर्णो हत" इति रावणं श्रावितवन्त इत्यर्थः । ततो रावणः = दशाननः, अरोदीत् = अश्रूणि मुमोच, अशोचीत् = शोकं चकार, परम् = अधिकं, मोहं च = मूर्च्छां च, अशिश्रियत् = आश्रितः ।

व्युत्पत्तिः—राजानं = श्रुधातोर्बुद्ध्यर्थत्वात् "गतिबुद्धिप्रत्यवसानाऽर्थशब्दकर्माकर्मकाणामणि कर्ता स णौ" इति अणिकर्तुः कर्मत्वम् । अशिश्रवन् = "श्रु श्रवणे" इति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धातोर्ण्यन्ताल्लुङ्। "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति चङि "सन्वल्लघुनि चङ्परेऽनग्लोपे" इति सन्वद्भावे च "स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा" इति अभ्यासस्य विकल्पेन इत्वं। तदभावे "अशुश्रवन्" इति रूपम्। अरोदीत्="रुदिर् अश्रुविमोचने" इति धातोर्लुङ्। "इरितो वे"ति च्लेरङभावपक्षे सिचीट् "इट ईटि" इति सलोपः "नेटी"ति वृद्धिनिषेधाल्लघूपधगुणः। अशिश्रियत्="श्रिञ् सेवायाम्" इति ण्यन्ताद्धातोर्लुङ्। "णिश्री"त्यादिना चङ्, इयङादेशश्च॥

भाषाऽर्थः—राक्षसोंने रावणको कुम्भकर्णके मारे जानेका वृत्तान्त सुनाया। रावणने आँसू गिराया, शोक किया और उत्कट मूर्च्छाका आश्रय लिया॥ ७१॥

अपप्रथद् गुणान् भ्रातुरचिकीर्तच्च विक्रमम्।
क्रुद्धेन कुम्भकर्णेन येऽदर्शिषत शात्रवः॥ ७२॥
कथं न्वजीविषुस्ते च स चाऽमृत महाबलः।
अयुयुत्सिषताऽऽश्वास्य कुमारा रावणं ततः॥ ७३॥

अन्वयः—(रावणः) भ्रातुः गुणान् अपप्रथत् "क्रुद्धेन कुम्भकर्णेन ये शात्रवः अदर्शिषत, ते कथं नु अजीविषुः? स च महाबलः अमृत" (इति) विक्रमं च अचिकीर्तत्। ततः कुमारा रावणम् आश्वास्य अयुयुत्सिषत॥

व्याख्या—भ्रातुः=अनुजस्य, कुम्भकर्णस्येति भावः। गुणान्=शौर्यादीन्, अपप्रथत्=प्रख्यापितवान्, रावण इति शेषः। क्रुद्धेन=कुपितेन, कुम्भकर्णेन=मदीयमध्यमभ्रात्रा, ये, शात्रवः=वैरिणः, अदर्शिषत=दृष्टाः, ते=शात्रवः, कथं नु=केन प्रकारेण नु, अजीविषुः=जीविताः, स च=तादृशश्च, महाबलः=महावीरः, अमृत=मृतः, (इति=इत्थम्), विक्रमं च=पराक्रमं च कुम्भकर्णस्येति शेषः। अचिकीर्तत्=उदीरितवान्। ततः=अनन्तरं, कुमाराः=रावणपुत्राः, देवान्तकादय इति भावः। रावणं=दशाननम्, आश्वास्य=आश्वस्तं विधाय, अपनीतशोकं कृत्वेति भावः। अयुयुत्सिषत=योद्धुमिष्टवन्तः॥

व्युत्पत्तिः—अपप्रथत्="प्रथ प्रख्याने" इति घटादेर्धातोर्ण्यन्ताल्लुङ्। चङि "अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्" इति अत्वम्। अदर्शिषत="दृशिर् प्रेक्षणे" इति ण्यन्ताद्धातोः कर्मणि लुङ्, "स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् चे"ति चिण्वदिट्। अजीविषुः="जीव प्राणधारणे" इति धातोर्लुङ्। महाबलः=महत् बलं यस्य सः, "आन्महतः समानाऽधिकरणजातीययोः" इत्यात्वम्। अमृत="मृङ् प्राणत्यागे" इति धातोर्लुङ्। "म्रियतेर्लुङ्लिङोश्चे"ति तङ्। "ह्रस्वादङ्गात्" इति सिचो लोपः। अचिकीर्तत्="कृत संशब्दने" इति चौरादिकाद्धातोर्लुङ्। "उर्ऋत्" इति ऋकाराऽभावपक्षे रूपम्। "उपधायाश्चे"तीत्वम्। "र्वोरुपधाया दीर्घ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इक" इति दीर्घः। पक्षान्तरे "अचीकृतत्" इति रूपम्। अयुयुत्सिषत="युध-संप्रहारे" इति सन्नन्ताद् धातोर्लुङ्। "हलन्ताच्चे"ति सनः कित्त्वम्। "पूर्ववत्सन" इति आत्मनेपदम्। सिचीट्, झस्य चादादेशः॥

भाषार्थः—रावणने भाई कुम्भकर्णके गुणोंका प्रकाशन किया—"कुपित होकर कुम्भकर्णने जिन शत्रुओंको देखा, वे कैसे जीते? वैसा महाबलवाला भी मर गया" इस प्रकारसे उसके पराक्रमका भी कीर्तन किया। अनन्तर देवान्तक आदि राजकुमारोंने रावणको आश्वासन देकर युद्ध करनेकी इच्छा की॥

देवान्तकोऽतिकायश्च त्रिशिराः स नरान्तकः।
ते चांऽऽहिषत संग्रामं बलिनो रावणाऽऽत्मजाः॥ ७४॥

अन्वयः—देवान्तकः अतिकायः त्रिशिराः स नरान्तकः ते च बलिनो रावणाऽऽत्मजाः संग्रामम् आंहिषत॥

व्याख्या—देवान्तकः=तन्नामधेयः, अतिकायः=तदाख्यः। त्रिशिराः=तदभिख्यः, सः=प्रसिद्धः, नरान्तकः=तदभिधानः, ते च=पूर्वोक्ताश्च, बलिनः=बलवन्तः, रावणाऽऽत्मजाः=रावणपुत्राः, संग्रामं=युद्धम्, आंहिषत=गताः॥

व्युत्पत्तिः—बलिनः=बलमस्ति येषां ते, "अत इनिठनौ" इति इनिः प्रत्ययः। आंहिषत="अहि गतौ" इति धातोर्लुङ् "आडजादीनाम्" इत्याडागमः, इदित्वान्नुम्, सिचीट् आटश्चेति वृद्धिश्च॥

भाषाऽर्थः—देवान्तक, अतिकाय, त्रिशिरा और सुप्रसिद्ध नरान्तक एवं वे सब बलवान् रावणपुत्र युद्धस्थल को चले गये॥ ७४॥

युद्धोन्मत्तं च मत्तं च राजा रक्षार्थमाञ्जिहत्।
सुतानां निरगातां तौ राक्षसौ रणपण्डितौ॥ ७५॥

अन्वयः—राजा सुतानां रक्षाऽर्थं युद्धोन्मत्तं मत्तं च आञ्जिहत्। रणपण्डितौ तौ राक्षसौ निरगाताम्॥

व्याख्या—राजा=रावणः, सुतानां=पुत्राणां, देवान्तकादीनामिति भावः। रक्षाऽर्थं,=रक्षणार्थं, युद्धोन्मत्तं=तन्नामानं, मत्तं च तदभिधानं च राक्षसम्, आञ्जिहत्=प्रस्थापितवान्। रणपण्डितौ=युद्धकुशलौ, तौ=पूर्वोक्तौ, युद्धोन्मत्तमत्ताविति भावः। राक्षसौ=यातुधानौ, निरगाताम्=निर्गतौ॥

व्युत्पत्तिः—रक्षाऽर्थं=रक्षायै इदं यथा तथेति क्रियाविशेषणम्, "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इति "अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्" इति समासः। युद्धोन्मत्तं मत्तं च=गत्यर्थकस्य अहिधातोरणिकर्त्रोरुभयोरपि "गति-बुद्धिप्रत्यवसानाऽर्थशब्दकर्माऽकर्मकाणामणि कर्ता स णौ" इति कर्मत्वम्। आञ्जिहत्=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अहि गतौ" इति णिजन्ताद्धातोर्लुङ्। "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति चङ्। निरगाताम् = निरुपसर्गपूर्वकात् "इण् गतौ" इति धातोर्लुङ्। "इणो गा लुङि" इति गाऽऽदेशः। "गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु" इति सिचो लुक्॥

भाषाऽर्थः—राजा रावणने देवान्तक आदि अपने पुत्रोंकी रक्षाके लिए युद्धोन्मत्त और मत्त इन दो राक्षसों को भेजा। युद्ध-कुशल वे दोनों राक्षस निकल पड़े॥

तैरजेषत सैन्यानि द्विषोऽकारिषताऽऽकुलाः।
पर्वतानिव ते भूमावचैषुर्वानरोत्तमान्॥ ७६॥

अन्वयः—तैः सैन्यानि अजेषत, द्विषः आकुलाः अकारिषत। ते भूमौ वानरोत्तमान् पर्वतान् इव अचैषुः॥

व्याख्या—तैः = राक्षसैः, सैन्यानि = वानरबलानि, अजेषत = जितानि, द्विषः = शत्रवः, आकुलाः = व्याकुलाः, अकारिषत = कृताः, ते = राक्षसाः, भूमौ = भुवि, वानरोत्तमान् = श्रेष्ठवानरान्, पर्वतान् इव = शैलान् इव, अचैषुः = पुञ्जीकृतवन्तः॥

व्युत्पत्तिः—अजेषत = "जि जये" इति धातोः कर्मणि लुङ्, अचिण्वद्भावपक्षे रूपम्। अकारिषत = "डुकृञ् करणे" इति धातोः कर्मणि लुङ्, चिण्वद्भावश्च। अचैषुः = "चिञ् चयने" इति धातोर्लुङ्। उपमाऽलङ्कारः।

भाषाऽर्थः—राक्षसोंने वानरसेनाओं को जीता और शत्रुओंको आकुल किया। इन लोगोंने भूमिपर श्रेष्ठ वानरोंको मार कर पर्वतोंके सदृश ढेर लगा दिया॥७६॥

अङ्गदेन समं योद्धुमचेष्टिष्ट नरान्तकः।
प्रैषिषद्राक्षसः प्रासं सोऽस्फोटीदङ्गदोरसि॥ ७७॥

अन्वयः—नरान्तकः अङ्गदेन समं योद्धुम् अचेष्टिष्ट। राक्षसः प्रासं प्रैषिषत्। सः अङ्गदोरसि अस्फोटीत्॥

व्याख्या—नरान्तकः = रावणकुमारः, अङ्गदेन = बालिसुतेन, समं = सह, योद्धुं = युद्धं कर्तुम्, अचेष्टिष्ट = चेष्टितवान्। राक्षसः = यातुधानः, नरान्तक इति भावः। प्रासं = कुन्तं, प्रैषिषत् = प्रेषितवान्। सः = प्रासः, अङ्गदोरसि = अङ्गदवक्षःस्थले, अस्फोटीत् = विशीर्णः॥

व्युत्पत्तिः—अङ्गदेन = "समम्" इति सहार्थेन पदेन योगे "सहयुक्तेऽप्रधाने" इति तृतीया। अचेष्टिष्ट = "चेष्ट चेष्टायाम्" इति धातोर्लुङ्। प्रैषिषत् = प्रपूर्वकस्य "इष गतौ" इति ण्यन्तस्य धातोर्लुङि चङि रूपम्। अस्फोटीत् = "स्फुटिर विशरणे" इति धातोर्लुङ्। "इरितो वा" इति च्लेरङभावे तु "अस्फुटत्" इति रूपम्॥

भाषाऽर्थः—नरान्तकने अङ्गदके साथ युद्ध करनेके लिए चेष्टा की। उसने

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उनके ऊपर कुन्त नामक वस्त्र फेंका। वह (कुन्त) अङ्गदजीके वक्षःस्थलमें विशीर्ण हुआ ॥ ७७ ॥

अश्वान् वालिसुतोऽहिंसीदतताडच्च मुष्टिना ।
रावणिश्चाऽव्यथो योद्धुमारब्ध च महीं गतः ॥ ७८ ॥

अन्वयः—वालिसुतः अश्वान् अहिंसीत्, मुष्टिना अतताडच्च । रावणिः अव्यथः महीं गतः (सन्) योद्धुम् आरब्ध ॥

व्याख्या—वालिसुतः=अङ्गदः, अश्वान्=हयान्, नरान्तकरथयुक्तानिति भावः । अहिंसीत्=व्यापादितवान्, मुष्टिना=पाणिना, अतताडच्च=आहतवांश्च । ततो रावणिः=रावणपुत्रः, नरान्तक इत्यर्थः । अव्यथः=व्यथारहितः, महीं=भूमिं, गतः=प्राप्तः सन्, योद्धुं=विग्रहीतुम्, आरब्ध=आरब्धवान् ॥

व्युत्पत्तिः—अहिंसीत्="(तृह) हिसि हिंसायाम्" इति धातोर्लुङ् । अतताडत्=ताडनं ताडः, 'तड आघाते" इति धातोः "भावे" इति घञ् । ताडम् अकार्षीदिति, "तत्करोति तदाचष्टे" इति णिच्, णाविष्ठवद्भावात् टिलोपः, "णौ चङ्युपधाया ह्रस्व" इति ह्रस्वस्य "नाऽग्लोपिशास्वृदिताम्" इति प्रतिषेधः । रावणिः=रावणस्याऽपत्यं पुमान् "अत इञ्" इति इञ् । आरब्ध=आङ्पूर्वात्रभधातोर्लुङ् "झलो झलि" इति सिचो लोपः, "झषस्तथोर्धोऽध" इति तस्य धत्वं च ॥

भावाऽर्थः—अङ्गदजीने नरान्तकके रथके घोड़ोंको मार डाला और उसको भी मुक्केसे आहत किया। नरान्तक व्यथारहित होकर जमीन पर उतर कर लड़नेके लिए उपक्रम करने लगा ॥ ७८ ॥

तस्याऽहारिषत प्राणा मुष्टिना वालिसूनुना ।
प्रादुद्रुवंस्ततः क्रुद्धाः सर्वे रावणयोऽङ्गदम् ॥ ७९ ॥

अन्वयः—वालिसूनुना तस्य प्राणा मुष्टिना अहारिषत । ततः सर्वे रावणयः क्रुद्धाः (सन्तः) अङ्गदं प्रादुद्रुवन् ॥

व्याख्या—वालिसूनुना=अङ्गदेन, तस्य=नरान्तकस्य, प्राणाः=असवः, मुष्टिना=संपिण्डिताऽङ्गुलिपाणिना, अहारिषत=हृताः । ततः=अनन्तरं, सर्वे=समस्ताः, रावणयः=रावणपुत्राः, देवान्तकादयः, क्रुद्धाः=कुपिताः सन्तः, अङ्गदं=वालिपुत्रं, प्रादुद्रुवन्=गताः ॥

व्युत्पत्तिः—अहारिषत="हृञ् हरणे" इति धातोः कर्मणि लुङ् "स्यसिच्सीयुट्तासिष्वि"त्यादिना चिण्वद्भावः । प्रादुद्रुवन् प्रपूर्वकात् "(द्रु) द्रु गतौ" इति धातोर्लुङ्, "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति चङ् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—अङ्गदने मुक्केसे नरान्तकके प्राणोंका हरण किया। तब रावणके सभी पुत्र (देवान्तक आदि) कुपित होते हुए अङ्गदके पास गये ॥ ७९ ॥

ततो नीलहनूमन्तौ रावणीनववेष्टताम् ।
अकारिष्टां गिरींस्तुङ्गानरौत्सीत् त्रिशिराः शरैः ॥ ८० ॥

अन्वयः—ततो नीलहनूमन्तौ रावणीन् अववेष्टताम्, तुङ्गान् गिरीन् अकारिष्टाम् । त्रिशिराः शरैः अरौत्सीत् ॥

व्याख्या—ततः=अनन्तरं, नीलहनूमन्तौ=नीलमारुती, रावणीन्=रावणपुत्रान्, अववेष्टतां=वेष्टितवन्तौ, तुङ्गान्=उन्नतान्, गिरीन्=पर्वतान्, अकारिष्टां=विक्षिप्तवन्तौ । त्रिशिराः=तन्नामधेयो राक्षसः, शरैः=बाणैः, अरौत्सीत्=आवृतवान् ॥

व्युत्पत्तिः—अववेष्टताम्="वेष्ट वेष्टन" इति धातोर्णिजन्तात्लुङ्, "विभाषा वेष्टिचेष्ट्योः" इति अभ्यासस्य पक्षेऽकारः, तदभावपक्षे "अविवेष्टताम्" इति रूपम् । अकारिष्टां="कृ विक्षेपे" इति धातोर्लुङ् । "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः । अरौत्सीत्="रुधिर् आवरण" इति धातोर्लुङ्, हलन्तलक्षणा वृद्धिः । "इरितो वा" इत्यङ्पक्षे "अरुधत्" इति रूपम् ॥

भाषाऽर्थः—अनन्तर नील और हनूमान्जीने रावणके पुत्रोंको घेर लिया और उनके ऊपर ऊँचे पर्वतों को फेंका । त्रिशिरा नामके राक्षसने बाणोंसे उनको रोका ॥

परिघेणाऽऽवधिष्टाऽथ रणे देवान्तको बली ।
मुष्टिनाऽददरत् तस्य मूर्धानं मारुताऽऽत्मजः ॥ ८१ ॥

अन्वयः—अथ रणे बली देवान्तकः परिघेण आवधिष्ट । मारुताऽऽत्मजो मुष्टिना तस्य मूर्धानम् अददरत् ॥

व्याख्या—अथ=अनन्तरं, रणे=युद्धे, बली=बलवान्, देवान्तकः=रावणपुत्रः, परिघेण=आयुधविशेषेण, आवधिष्ट=हतवान् । मारुताऽऽत्मजः=हनूमान्, मुष्टिना=सम्पिण्डिताऽङ्गुलिपाणिना, तस्य=देवान्तकस्य, मूर्धानं=शिरः, अददरत्=दारितवान् ॥

व्युत्पत्तिः—बली=बलमस्याऽस्तीति, "अत इनिठनौ" इतीनिः । आवधिष्ट=आङ्पूर्वकात् "हन हिंसागत्योः" इति धातोर्लुङ् । "आङो यमहन" इत्यात्मनेपदम् । अविवक्षितकर्मकत्वात् "आत्मनेपदेष्वन्यतरस्याम्" इति हनो वधादेशः । अददरत्="दृ विदारणे" इति ण्यन्तस्य धातोश्चङि "अत्स्मृदृत्वरप्रथम्रदस्तस्पशाम्" इत्यभ्यासस्याऽत्वम् ॥

भाषाऽर्थः—अनन्तर युद्धमें बलवान् देवान्तकने परिघसे मारा । हनूमान्जीने मुक्केसे उसके शिरको विदीर्ण किया ॥ ८१ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अदीदिपत् ततो वीर्यं नीलं चाऽपीपिडच्छरैः ।
युद्धोन्मत्तस्तु नीलेन गिरिणाऽनायि संक्षयम् ॥ ८२ ॥

अन्वयः—ततो युद्धोन्मत्तो वीर्यम् अदीदिपत्, शरैः नीलं च अपीपिडत्। नीलेन गिरिणा (सः) तु संक्षयम् अनायि ॥

व्याख्या—ततः = देवान्तकहननाऽनन्तरं, युद्धोन्मत्तः = तन्नामकः कश्चिद्राक्षसः, वीर्यं=पराक्रमम्, अदीदिपत्=दीपितवान्, शरैः=बाणैः, नीलं च=वानरसेनापतिं च, अपीपिडत्=पीडितवान्। नीलेन=वानरसेनापतिना, गिरिणा=पर्वतेन, (सः) तु = युद्धोन्मत्तस्तु, संक्षयं = नाशम्, अनायि=नीतः, हत इति भावः ॥

व्युत्पत्तिः—अदीदिपत्="दीपी दीप्तौ" इति णिजन्ताद्धातोर्लुङ्। "भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" इत्युपधाह्रस्वविकल्पः। तदभावपक्षे—"अदिदीपत्" इति रूपम्। अपीपिडत्="पीड अवगाहन" इति णौ लुङि चङि पूर्वसूत्रेणैवोपधाह्रस्वविकल्पः, तदभावपक्षे "अपिपीडत्" इति रूपम्। "अपीपरत्" इति पाठान्तरम् "पॄ पूरणे" इति चुरादेर्धातोर्लुङ्। सः="अनायि" इति नीधातोर्योगे प्रधानकर्मणि "गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृषवहाम्।" इति प्रथमा विभक्तिः। संक्षयं=गौणकर्मत्वाद् द्वितीया। अनायि="णीञ् प्रापण" इति धातोः कर्मणि लुङ् ॥

भाषाऽर्थः—देवान्तकके मारे जानेके अनन्तर युद्धोन्मत्त नामके राक्षसने अपने पराक्रमको प्रकाशित किया और बाणोंसे नीलको भी पीडित किया। नीलने पर्वतसे उसको मार डाला ॥ ८२ ॥

अबभ्राजत् ततः शक्तिं त्रिशिराः पवनाऽऽत्मजे ।
हनूमता क्षतास्तस्य रणेऽमृषत वाजिनः ॥ ८३ ॥

अन्वयः—ततः त्रिशिराः पवनात्मजे शक्तिम् अबभ्राजत्। रणे हनूमता क्षताः तस्य वाजिनः अमृषत ॥

व्याख्या—ततः = युद्धोन्मत्तव्यापादनाऽनन्तरं, त्रिशिराः = तन्नामा रावणकुमारः, पवनात्मजे = हनूमति, शक्तिम् = आयुधविशेषम्, अबभ्राजत्=दीपितवान्, रणे = युद्धे, हनूमता = वायुपुत्रेण, क्षताः=ताडिताः, तस्य=त्रिशिरसः, वाजिनः = अश्वाः, रथयुक्ता इति शेषः। अमृषत = मृताः ॥

व्युत्पत्तिः—अबभ्राजत्="(एजृ भ्रेजृ) भ्राजृ दीप्तौ" इति धातोर्णौ लुङि चङि "भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" इति उपधाह्रस्वविकल्पाऽभावपक्षे रूपम्, उपधाह्रस्वत्वे तु "अबिभ्रजत्" इति रूपम्। अमृषत="मृङ् प्राणत्यागे" इति धातोर्लुङ् "म्रियतेर्लुङ्लिङोश्च" त्यात्मनेपदम् ॥

भाषाऽर्थः—युद्धोन्मत्तके मारे जानेपर त्रिशिरा नामके रावणकुमारने हनुमान्-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जीके विषयमें शक्तिका प्रकाशन किया। युद्धमें हनूमान्‌जीसे ताडित उसके घोड़े मर गये ॥ ८३ ॥

> अस्रसच्चाऽऽहतो मूर्ध्नि खड्गं चाऽजीहरद् द्विषा।
> प्राणानौज्झीच्च खड्गेन छिन्नैस्तेनैव मूर्धभिः ॥ ८४ ॥

अन्वयः—मूर्ध्नि आहतः (त्रिशिराः) अस्रसत्, द्विषा खड्गम् अजीहरत्; तेन एव खड्गेन छिन्नैः मूर्धभिः प्राणान् औज्झीच्च ॥

व्याख्या—मूर्ध्नि=शिरसि, आहतः=ताडितः; त्रिशिरा इति भावः, हनूमता इति शेषः। अस्रसत्=स्रस्तः, भूमौ पतित इति भावः। द्विषा=शत्रुणा, हनूमतेत्यर्थः। खड्गं=करवालं, हस्तस्थमिति भावः। अजीहरत्=हारितवान् तेन एव=पूर्वोक्तेन एव, खड्गेन=असिना, छिन्नैः=कृत्तैः, मूर्धभिः=शिरोभिः, त्रिभिरेव मस्तकैर्हेतुभूतैरित्यर्थः। प्राणान्=असून्, औज्झीच्च=त्यक्तवांश्च ॥

व्युत्पत्तिः—अस्रसत्-"स्रंसु (ध्वंसु भ्रंसु) अवस्रंसने" इति धातोर्लुङ्। "द्युद्भ्यो लुङि" इति परस्मैपदम्। चतुर्स्थाम "पुषादिद्युताद्यॢदितः परस्मैपदेषु" इति अङ्, "अनिदितां हल उपधायाः क्ङिति" इत्यनुनासिकलोपः। पक्षान्तरे "अस्रंसिष्ट" रूपम्। अजीहरत्="हृञ् हरणे" इति णिजन्ताद्धातोर्लुङ् "णौ चङ्युपधाया ह्रस्वः" इति ह्रस्वत्वं सन्वत्कार्यं च। औज्झीत्="उज्झ उत्सर्गे" इति धातोर्लुङ्, "आडजादीनाम्" इत्याडागमः ॥

भाषाऽर्थः—हनूमानजीसे शिरमें ताडित होकर त्रिशिरा जमीनपर गिर पड़ा। हनूमान्‌जीने उसका खड्ग छीन लिया। उसी खड्गसे काटे गये शिरोंसे त्रिशिराने प्राणोंको छोड़ा भी ॥ ८४ ॥

यमकम्—

> मत्तेनाऽमारि संप्राप्य शरभाऽस्तां महागदाम्।
> सहस्रहरिणाऽक्रीडीदतिकायस्ततो रणे ॥ ८५ ॥
> रथेनाऽविव्यथच्चाऽरीन् व्यचारीच्च निरङ्कुशः।
> विशीषणेन सोऽख्यायि राघवस्य महारथः ॥ ८६ ॥

अन्वयः—शरभाऽस्तां महागदां संप्राप्य मत्तेन अमारि। ततो रणे अतिकायः सहस्रहरिणा रथेन अक्रीडीत; अरीन् अविव्यथत् निरङ्कुशः (सन्) व्यचारीच्च। विभीषणेन स राघवस्य महारथः अख्यायि ॥

व्याख्या—शरभाऽस्तां=शरभाऽऽख्यवानरप्रेरितां, महागदां=बृहत्तमायुधविशेषं, संप्राप्य=आसाद्य, मत्तेन=तन्नामकेन राक्षसेन, अमारि=मृतम्। ततः=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मत्तमरणाऽनन्तरं, रणे=युद्धे, अतिकायः=रावणपुत्रः, सहस्रहरिणा=सहस्रहय-युक्तेन, रथेन=स्यन्दनेन, अक्रीडीत्=क्रीडितवान्, अरीन्=शत्रून्, वानरानिति भावः । अविव्यथत्=पीडितवान्, निरङ्कुशः=अप्रतिहतशक्तिः सन्, व्यचारीच=बभ्राम च । विभीषणेन=रावणाऽनुजेन, राघवस्य=रामचन्द्रस्य, समीप इति शेषः । महारथः=बृहत्स्यन्दनः, अयुतधन्विभिः सह शस्त्राऽस्त्रनिपुणयोद्धा वा, सः=अतिकायः, अख्यायि=कथितः ॥

व्युत्पत्तिः—शरभास्तां=शरभेणाऽस्ता शरभाऽस्ता, ताम् । "अस्ताम्" इत्यत्र "असु क्षेपणे" इति धातोः क्तप्रत्ययः । अमारि="मृङ् प्राणत्यागे" इति धातोर्भावे लुङ् । सहस्रहरिणा=सहस्रं हरयो यस्य स सहस्रहरिस्तेन, "हरिश्चन्द्राऽर्कवाताऽश्वशुकभेकयमाऽऽदिषु ।" इति मेदिनी । अविव्यथत्="व्यथ भयचलनयोः" इति धातोर्ण्यन्तस्य लुङि चङि रूपं "ग्रहिज्ये"त्यादिना सम्प्रसारणम् । व्यचारीत्=विपूर्वात "(अभ्र वभ्र मभ्र) चर गत्यर्थाः" इति धातोर्लुङ्, "अतो ल्रान्तस्ये"ति वृद्धिः । अख्यायि="ख्या प्रकथने" इति धातोः कर्मणि लुङ्, चिणि युगागमश्च ॥

भाषाऽर्थः—शरभ नामके वानरसे फेंकी गई बड़ी गदाके चोटसे मत्त नामक राक्षस मर गया । तब युद्धमें अतिकाय नामके रावणपुत्रने हजार घोड़ोंवाले रथमें चढ़कर क्रीडा की । शत्रुओंको पीडित किया और वह निरङ्कुश होकर घूमने लगा । विभीषणने रामचन्द्रजीसे "यह अतिकाय महारथ है" ऐसा कहा ॥ ८५-८६ ॥

अतस्तम्भदयं वज्रं स्वयम्भुवमतूतुषत् ।
अशिक्षिष्ट महाऽस्त्राणि रणेऽरक्षीच्च राक्षसान् ॥ ८७ ॥

अन्वयः—अयं वज्रम् अतस्तम्भत्, स्वयम्भुवम् अतूतुषत्; महाऽस्त्राणि अशिक्षिष्ट, रणे राक्षसान् अरक्षीच्च ।

व्याख्या—अयम=अतिकायः, वज्रं=कुलिशम्, अतस्तम्भत्=स्तम्भितवान्, स्वयम्भुवं=ब्रह्मदेवं वा स्वयम्=आत्मनैव, (पालनादिनेति शेषः), भुवं=पृथिवीमिति केचित् । अतूतुषत्=तोषितवान्, महाऽस्त्राणि=ब्रह्मास्त्रादीनि, अशिक्षिष्ट=शिक्षितवान्, रणे=युद्धे, राक्षसान्=यातुधानान्, अरक्षीत्=रक्षितवान् ॥

व्युत्पत्तिः—अतस्तम्भत्="ष्टभि (स्कभि) प्रतिबन्धे" इति ण्यन्तस्य धातोर्लुङि "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति चङ् । अतूतुषत्="तुष प्रीतौ" इति धातोर्ण्यन्ताल्लुङ् अशिक्षिष्ट="शिक्ष विद्योपादाने" इति धातोर्लुङ् ॥

भाषाऽर्थः—"इसने वज्रको स्तब्ध किया, ब्रह्माजीको सन्तुष्ट किया, महाऽस्त्रोंको सीखा और राक्षसोंकी रक्षा की ॥ ८७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अध्यगीष्टाऽर्थशास्त्राणि यमस्याऽह्नोष्ट विक्रमम् ।
देवाऽऽहवेष्वदीपिष्ट नाऽजनिष्टाऽस्य साध्वसम् ॥ ८८ ॥

अन्वयः—(अयम्) अर्थशास्त्राणि अध्यगीष्ट, यमस्य विक्रमम् अह्नोष्ट; देवाऽऽहवेषु अदीपिष्ट। अस्य साध्वसं न अजनिष्ट ॥

व्याख्या—अर्थशास्त्राणि=अर्थोपयुक्तानि शास्त्राणि शुक्रबृहस्पत्यादिप्रणीतानीति भावः, अध्यगीष्ट=अधीतवान्, अतिकाय इति शेषः। यमस्य=यमराजस्य, विक्रमं=पराक्रमम्, अह्नोष्ट=अपनीतवान्, देवाहवेषु=सुरसंग्रामेषु, अदीपिष्ट=शोभितः। अस्य=अतिकायस्य, साध्वसं=भयं, न अजनिष्ट=नो जातम् ॥

व्युत्पत्तिः—अध्यगीष्ट=अधिपूर्वकात् "इङ् अध्ययन" इति धातोर्लुङ्, "विभाषा लुङ्लृङोः" इतीङो गाङादेशः। "घुमास्थागापाजहातिसां हलि" इति आत ईत्त्वम्। गाङादेशाऽभावपक्षे "अध्यैष्टे"ति रूपम्। अह्नोष्ट="ह्नुङ् अपनयन" इति धातोर्लुङ्, अहलन्तत्वात्सिचो न कित्त्वम्। अदीपिष्ट="दीपी दीप्तौ" इति धातोर्लुङो चिणभावपक्षे रूपम्। अजनिष्ट="जनी प्रादुर्भावे" इति धातोर्लुङ्, "दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्" इति चिणभावपक्षे रूपम्। चिण्पक्षे-"अजनी"ति रूपम् ॥

भाषाऽर्थः—इस (अतिकाय) ने अर्थशास्त्रोंका अध्ययन किया है, यमराजके पराक्रमको हटाया है। यह देवताओंके युद्धोंमें शोभित हुआ है। इसे भय नहीं हुआ है ॥ ८८ ॥

एष रावणिरापादि वानराणां भयङ्करः ।
आह्वताऽथ स काकुत्स्थं धनुश्चाऽपुस्फुरद् गुरु ॥ ८९ ॥

अन्वयः—"वानराणां भयङ्कर एष रावणिः आपादि" (इति विभीषणेन अख्यायि)। अथ स काकुत्स्थम् आह्वत गुरु धनुश्च अपुस्फुरत् ॥

व्याख्या—वानराणां=कपीनां, भयङ्करः=भीषणः, एषः=अयं, रावणिः=रावणपुत्रः, अतिकायः इत्यर्थः। आपादि=आगतः, अस्मत्समीप इति शेषः। "इति विभीषणेन अख्यायि" इति षडशीतितमश्लोकस्थपदानामध्याहारः। अथ=विभीषणवाक्याऽवसानाऽनन्तरं, सः=अतिकायः, काकुत्स्थं=रामम्, आह्वत=युद्धाय आहूतवान्, गुरु=महत, धनुश्च=कार्मुकं च, अपुस्फुरत्=स्फोरितवान् ॥

व्युत्पत्तिः—भयङ्करः=भयं करोतीति "मेघर्तिभयेषु कृञः" इति खच्, "अरुर्द्विषदजन्तस्य मुम्" इति मुम्। "भयङ्करं प्रतिभयं रौद्रं तूग्रममी त्रिषु।" इत्यमरः। आपादि=आङ्पूर्वकात् "पद गतौ" इति धातोर्लुङ् "चिण् ते पद" इति चिण,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"चिणो लुक्" इति तशब्दस्य लुक्। आह्वत=आङ्पूर्वकात् "ह्वेञ् स्पर्धायां शब्दे चे"ति धातोर्लुङ् "स्पर्धायामाङ" इत्यात्मनेपदम्।"आत्मनेपदेष्वन्यतरस्याम्" इति च्लेरङादेशः। अपुस्फुरत्="स्फुर (स्फुल) संचलने" इति धातोर्णौ लुङ्। "चिस्फुरोर्णौ" इत्यात्वाऽभावपक्षे रूपम्। आत्वपक्षे "अपुस्फरत्" इति रूपम्।"णौ चङ्युपधाया ह्रस्व" इति ह्रस्वत्वम् ॥

भाषाऽर्थः—"वानरोंको भय उत्पन्न करनेवाला यह रावणकुमार (अतिकाय) समीप आया है" विभीषणने ऐसा कहा। अनन्तर अतिकायने रामचन्द्रजीको ललकारा और बड़ेसे धनुषको भी संचालित किया ॥ ८९ ॥

सौमित्रिः सर्पवत्सिंहमार्दिदत्तं महाऽऽहवे ।
तौ प्रावीवृततां जेतुं शरजालान्यनेकशः ॥ ९० ॥

अन्वयः—सौमित्रिः सिंहं सर्पवत् तं महाहवे आर्दिदत्। तौ जेतुम् अनेकशः शरजालानि प्रावीवृतताम् ॥

व्याख्या—सौमित्रिः=लक्ष्मणः, सिंहं=केसरिणं, सर्पवत्=भुजङ्ग इव, तम्=अतिकायं, महाऽऽहवे=महारणे, आर्दिदत्=गतः, पीडितवान् वा। तौ=सौमित्र्यतिकायौ, जेतुं=जयं लब्धुम्, अनेकशः=बहुशः, शरजालानि=बाणसमूहान्, प्रावीवृततां=प्रवर्तितवन्तौ ॥

व्युत्पत्तिः—सौमित्रिः=सुमित्राया अपत्यं पुमान्, "बाह्वादिभ्यश्चे"ति इञ्। सिंहं=हिनस्तीति सिंहस्तं "हिसि हिंसायाम्" इति धातोः पचाद्यच, "पृषोदरादीनि यथोपदिष्टम्" इति वर्णविपर्ययः "सिंहो मृगेन्द्रः पञ्चाऽऽस्यो हर्यक्षः केसरी हरिः।" इत्यमरः। सर्पवत्=सर्पेण तुल्यं, "तेन तुल्यं क्रिया चेद्वतिः" इति वतिः। आर्दिदत्=अर्दनमर्दः, "अर्द गतौ" इति धातोः "भावे" इति घञ्। अर्दमकार्षीत् इति आर्दिदत्, "तत्करोति तदाचष्टे" इति णिच्, तदन्ताल्लुङि चङि रूपम्। यद्वा "अर्द हिंसायाम्" इति चौरादिकाद्धातोर्लुङ्। चङि णिलोपस्य स्थानिवत्त्वाद्रेफवर्जितस्य देर्द्वित्वम्। अनेकशः=अनेकानिति "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्" इति शस्। प्रावीवृततां=प्रपूर्वकात् "वृतु वर्तने" इति णिजन्ताद्धातोर्लुङ् "उर्ऋत्" इत्युपधाया अपवाद ऋकारः ॥

भाषाऽर्थः—लक्ष्मणजीने जैसे सिंहको सर्प आक्रमण करता है उसी तरह अतिकायको महायुद्धमें पीडित किया। उन दोनों (लक्ष्मण और अतिकाय) ने जीतनेके लिये प्रचुर बाणसमूहोंको छोड़ा ॥ ९० ॥

अच्छैत्तां च महाऽत्मानौ चिरमश्रमतां न च ।
तथा तावास्थतां बाणानतानिष्टां तमो यथा ॥ ९१ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—महात्मानौ अच्छैत्तां, चिरम् न अश्रमताम्। तौ तथा बाणान् आस्थतां, यथा तमः अतानिष्टाम् ॥

व्याख्या—महात्मानौ = महायत्नौ, सौमित्र्यतिकायाविति भावः। अच्छैत्तां = छिन्नवन्तौ, परस्परस्य शरजालानीति शेषः। चिरं = बहुकालेनाऽपि, न अश्रमतां = नो श्रान्तौ। तौ = सौमित्र्यतिकायौ, तथा = तेन प्रकारेण, बाणान् = शरान्, आस्थतां = क्षिप्तवन्तौ, यथा = येन प्रकारेण, तमः = अन्धकारम्, अतानिष्टां = विस्तारितवन्तौ ॥

व्युत्पत्तिः—महात्मानौ = महान् आत्मा ययोस्तौ, "आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च" इत्यमरः। अच्छैत्तां = "छिदिर् द्वैधीकरणे" इति धातोर्लुङ् "इरितो वे"ति च्लेरङभावपक्षे रूपम्। "झलो झलि" इति सिचो लोपः। अश्रमतां = "श्रमु तपसि खेदे च"ति धातोर्लुङ्, पुषादित्वादङ्। आस्थताम् = "असु क्षेपणे" इति धातोर्लुङ्, "पुषादिद्युताद्ि" इति च्लेरङ्, "अस्यतेस्थुक्" इति थुगागमः। अतानिष्टां = "तनु विस्तारे" इति धातोर्लुङ्, "अतो हलादेर्लघोः" इति वृद्धिविकल्पः ॥

भाषाऽर्थः—महाप्रयत्नसे युक्त लक्ष्मण और अतिकायने एकने दूसरेके बाणों को काटा। वे बहुत समय तक भी श्रान्त नहीं हुए। उन दोनोंने अन्धकारके सदृश बाणोंका विस्तार किया ॥ ९१ ॥

सौर्याऽऽग्नेये व्यकारिष्टामस्त्रे राक्षसलक्ष्मणौ।
ते चोपागमतां नाशं समासाद्य परस्परम् ॥ ९२ ॥

अन्वयः—राक्षसलक्ष्मणौ सौर्याऽऽग्नेये अस्त्रे व्यकारिष्टाम्। ते च परस्परं समासाद्य नाशम् उपागमताम् ॥

व्याख्या—राक्षसलक्ष्मणौ = अतिकायसौमित्री, सौर्याऽऽग्नेये = सूर्याऽग्निसम्बन्धिनी, अस्त्रे = आयुधे, व्यकारिष्टां = विक्षिप्तवन्तौ। ते च = सौर्याऽऽग्नेये अस्त्रे परस्परं = मिथः, समासाद्य = सम्प्राप्य, नाशम् = अदर्शनम् उपागमतां = प्रापतुः ॥

व्युत्पत्तिः—सौर्याग्नेये = सूर्यो देवताऽस्येति सौर्यं, "साऽस्य देवता" इति अण्। अग्निर्देवताऽस्येति आग्नेयम्, "अग्नेर्ढक्" इति ढक, "आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्" इति ढस्य एयः। सौर्यं च आग्नेयं च सौर्याऽऽग्नेये, ते। व्यकारिष्टां = विपूर्वात् "कॄ विक्षेपे" इति धातोर्लुङ्। उपागमताम् = उपपूर्वाद् गम्लृधातोर्लुङ्, लृदित्वादङ् ॥

भाषाऽर्थः—राक्षसने सौर्यास्त्र और लक्ष्मणने आग्नेयाऽस्त्र छोड़ा। वे दोनों अस्त्र परस्पर प्राप्त होकर नष्ट हो गये ॥ ९२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अबिभ्रजत्ततः शस्त्रमैषीकं राक्षसो रणे।
तदप्यध्वसदासाद्य माहेन्द्रं लक्ष्मणेरितम् ॥ ६३ ॥

अन्वयः—ततो राक्षसो रणे ऐषीकं शस्त्रम् अबिभ्रजत्। तत् अपि लक्ष्मणेरितं माहेन्द्रम् आसाद्य अध्वसत् ॥

व्याख्या—ततः = सौर्याऽऽग्नेयाऽस्त्रनाशाऽनन्तरं, राक्षसः=यातुधानः, अतिकाय इति भावः। रणे=युद्धे, ऐषीकम्=इषीकासम्बन्धि, शस्त्रम् = आयुधम्, अबिभ्रजत्=दीपितवान्। तदपि = तत्, ऐषीक शस्त्रमपि, लक्ष्मणरितं = लक्ष्मणप्रेरितं, माहेन्द्रं = महेन्द्रसम्बन्धिशस्त्रम्, आसाद्य = प्राप्य, अध्वसत् = ध्वस्तम् ॥

व्युत्पत्तिः—ऐषीकम् = इषीकाया इदम् ऐषीकं, तत् "तस्येदम्" इत्यण्। अबिभ्रजत् = "भ्राजृ दीप्तौ" इति धातोर्णौ लुङि चङि रूपम्। "भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" इति उपधाह्रस्वत्वम्, तदभावपक्षे "अबभ्राजत्" इति रूपम्। माहेन्द्रं = महांश्चाऽसौ इन्द्रो महेन्द्रः, महेन्द्रो देवताऽस्येति माहेन्द्रं, तत्। अध्वसत् = "(स्रंसु) ध्वंसु (भ्रंसु) अवस्रंसने" इति धातोर्लुङ्, द्युतादित्वादङ्, "अनिदितां हल उपधायाः क्ङिति" इति नलोपः ॥

भाषाऽर्थः—सौर्याऽस्त्र और आग्नेयाऽस्त्रके नष्ट होने के अनन्तर राक्षसने युद्ध में ऐषीक शस्त्रको प्रकाशित किया। वह (ऐषीक शस्त्र) भी लक्ष्मणसे प्रेरित माहेन्द्र शस्त्रको प्राप्तकर ध्वस्त हुआ ॥ ९३ ॥

ततः सौमित्रिरस्मार्षीददेविष्ट च दुर्जयम्।
ब्रह्माऽस्त्रं तेन मूर्धानमदध्वंसन्नरद्विषः ॥ ६४ ॥

अन्वयः—ततः सौमित्रिः दुर्जयं ब्रह्माऽस्त्रम् अस्मार्षीत् अदेविष्ट च। (सौमित्रिः) तेन नरद्विषो मूर्धानम् अदध्वंसत् ॥

व्याख्या—ततः = ऐषीकाऽस्त्रनाशनाऽनन्तरं, सौमित्रिः = लक्ष्मणः, दुर्जयम्=अनभिभवनीयं ब्रह्मदैवतमस्त्रम्, अस्मार्षीत् = स्मृतवान्, अदेविष्ट च = द्योतते स्म च, यद्वा स्मरणोपस्थितं तत् ब्रह्माऽस्त्रम् अदेविष्ट च। तेन = ब्रह्माऽस्त्रेण, प्रयोज्यकर्त्रा नरद्विषः=राक्षसस्य, अतिकायस्येति भावः। मूर्धानं = शिरः, अदध्वंसत = पातितवान्, सौमित्रिरिति शेषः ॥

व्युत्पत्तिः—दुर्जयं=दुःखेन जेतुं शक्यं दुर्जयं, तत् "ईषद्दुःसुषु कृच्छ्राऽकृच्छ्राऽर्थेषु खल्" इति खल्प्रत्ययः। अस्मार्षीत्="स्मृ चिन्तायाम्" इति धातोर्लुङ्, "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः। अदेविष्ट="(तेवृ) देवृ देवने" इत्यनुदात्तेतो धातोर्लुङ्, देवनस्याऽनेकार्थत्वादत्र द्योतनरूपोऽर्थः। नरद्विषः=नरान्द्वेष्टीति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नरद्विट्, तस्य 'सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्" सर्वाऽपहारी लोपः। अदध्वंसत् = हेतुमण्ण्यन्ताद्ध्वंसुधातोर्लुङि चङि रूपम्। "सम्प्रध्वंसतेऽप्येति विनश्यति विलीयते।" इति भट्टमल्लः॥

भाषाऽर्थः—ऐषीकाऽस्त्रको नष्ट करनेके अनन्तर लक्ष्मणजीने अभिभवके अविषय ब्रह्माऽस्त्रका स्मरण किया और वे प्रकाशमान भी हुए। लक्ष्मणजीने उस (ब्रह्माऽस्त्र) से राक्षस (अतिकाय) के शिर को ध्वस्त किया (गिरा डाला) ॥९४॥

ततोऽक्रन्दीद्दशग्रीवस्तमाशिश्वसदिन्द्रजित् ।
निरयासीच्च संक्रुद्धः प्रार्चिचच्च स्वयम्भुवम् ॥ ९५ ॥

अन्वयः—ततो दशग्रीवः अक्रन्दीत्। इन्द्रजित् तम् आशिश्वसत्, संक्रुद्धः (सन्) निरयासीत् स्वयम्भुवं प्रार्चिचत् च ॥

व्याख्या—ततः = अतिकायाऽऽख्यस्वपुत्रहननाऽनन्तरं, दशग्रीवः = रावणः, अक्रन्दीत् = अरुदत्। इन्द्रजित् = मेघनादः, तं = रावणम्, आशिश्वसत् = आश्वासितवान्, संक्रुद्धः = संकुपितः सन्, निरयासीत् = निर्गतः, रावणप्रासादादिति शेषः। स्वयम्भुवं = ब्रह्मदेवं, प्रार्चिचत् च = पूजितवांश्च ॥

व्युत्पत्तिः—अक्रन्दीत् = "(कदि) क्रदि (क्लदि) आह्वाने रोदने चे"ति धातोर्लुङ्। आशिश्वसत् = आङ्पूर्वकात् "श्वस प्राणने" इति हेतुमण्ण्यन्तस्य धातोर्लुङि चङि रूपम्। निरयासीत् = निरुपसर्गपूर्वकात् "या प्रापणे" इति धातोर्लुङ्, "यमरमनमातां सक् चे"ति सगिटौ। प्रार्चिचत् = प्रपूर्वकात् "अर्च पूजायाम्" इति चौरादिकाद् धातोर्लुङ्, "चङि" इति द्वित्वम्, अजादित्वात् द्वितीयस्य द्विर्वचनम् ॥

भाषाऽर्थः—अतिकायके मारे जानेके अनन्तर पुत्र शोकसे रावण रोने लगा। इन्द्रजित्ने उसे आश्वासन दिया। कुपित होता हुआ वह रावणके प्रासादसे निकला उसने ब्रह्मदेवकी पूजा भी की ॥ ९५ ॥

अहौषीत्कृष्णवर्त्मानं समयष्टाऽऽस्त्रमण्डलम् ।
सोऽलब्ध ब्रह्मणः शस्त्रं स्यन्दनं च जयाऽवहम् ॥ ९६ ॥

अन्वयः—स कृष्णवर्त्मानम् अहौषीत्, अस्त्रमण्डलं समयष्ट, ब्रह्मणो जयाऽऽवहं शस्त्रं स्यन्दनं च अलब्ध ॥

व्याख्या—सः = इन्द्रजित्, कृष्णवर्त्मानम् = अग्निम्, अहौषीत् = हुतवान्, हव्येन प्रीणितवानिति भावः। अस्त्रमण्डलम् = आयुधसमूहं, समयष्ट = संपूजितवान्, ब्रह्मणः = धातुः, जयाऽऽवहं = विजयप्रदं, शस्त्रम् = आयुधं, स्यन्दनं च = रथं च, अलब्ध = लब्धवान् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—कृष्णवर्त्मानं = कृष्णं वर्त्म यस्य स कृष्णवर्त्मा, तम् । "वह्निः शुष्मा कृष्णवर्त्मा शोचिष्केश उपर्बुधः ।" इत्यमरः । अहौषीत्="हु दानादानयोः" इति धातोर्लुङ्, "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः । समयष्ट=संपूर्वकात् "यज देवपूजासङ्गतिकरणदानेषु" इति धातोर्लुङ् । जयाऽऽवहम् = आवहतीति आवहं पचाद्यच् । जयस्याऽऽवहं तत् । अलब्ध = "डुलभष् प्राप्तौ" इति धातोर्लुङ् । "झलो झलि" इति सिचो लोपः, षत्वजश्त्वे च ॥

भावार्थः—इन्द्रजित्ने अग्निमें हवन किया, अस्त्रसमूहकी पूजा की और अग्निदेवसे विजयप्रद शस्त्र और रथको भी पाया ॥ ९६ ॥

तमध्यासिष्ट दीप्राऽग्रममोदिष्ट च रावणिः ।
छन्नरूपस्ततोऽकर्तीद्देहान् रावणविद्विषाम् ॥ ९७ ॥

अन्वयः—रावणिः दीप्राऽग्रम् अध्यासिष्ट अमोदिष्ट च । ततः छन्नरूपः (सन्) रावणविद्विषां देहान् अकर्तीत् ॥

व्याख्या—रावणिः = रावणपुत्रः, इन्द्रजिदित्यर्थः । दीप्राऽग्रम् = अति दीपनशीलोपरिभागं, तं = स्यन्दनम्, अध्यासिष्ट = अध्यासितवान् , अमोदिष्ट च = हृष्टवांश्च । ततः = स्यन्दनाऽऽरोहणाऽनन्तरं, छन्नरूपः = अदृश्यः सन् , रावणविद्विषां = रावणशत्रूणां, वानराणामित्यर्थः । "रावणिविद्विषाम्" इति पाठे देवान्तकाऽऽदिशत्रूणामित्यर्थः । देहान् = शरीराणि, अकर्तीत् = छिन्नवान् , रावणिरिति शेषः ।

व्युत्पत्तिः—दीप्राऽग्रं = दीपनशीलो दीप्रः, "नमिकम्पिस्म्यजसकमहिंसदीपो र" इति र प्रत्ययः । दीप्रोऽग्रो यस्य, तम् । तम्="अध्यासिष्ट"त्यस्य अधिपूर्वकस्य आसधातोर्योगे "अधिशीङ्स्थाऽऽसां कर्म"ति कर्मत्वम् । अध्यासिष्ट = अधिपूर्वकस्य "आस उपवेशने" इति धातोर्लुङ् । अमोदिष्ट="मुद हर्षे" इति धातोर्लुङ् । छन्नरूपः= छन्नं रूपं यस्य सः । रावणविद्विषां = रावणं विद्विषन्तीति रावणविद्विषस्तेषाम्, क्विप्प्रत्ययः । अकर्तीत् = "कृती छेदने" इति धातोर्लुङ् , "सेऽसिचि कृतचृतछृदतृदनृतः" इति सिचोऽन्यत्र इड्विकल्पः ॥

भावार्थः—इन्द्रजित् अतिदीपनशील ऊर्ध्वभागसे युक्त उस रथमें चढ़ा और प्रसन्न भी हुआ । अनन्तर वह अदृश्य होकर वानरोंके शरीरोंको काटने लगा ॥९७॥

सप्तषष्टिं प्लवङ्गानां कोटीर्बाणैरसूषुपत् ।
निशाऽन्ते रावणिः क्रुद्धो राघवौ च व्यमूमुहत् ॥ ९८ ॥

अन्वयः—रावणिः क्रुद्धः (सन्) प्लवङ्गानां सप्तषष्टिं कोटीः बाणैः असूषुपत् ; निशान्ते राघवौ च व्यमूमुहत् ॥

व्याख्या—रावणिः = रावणपुत्रः, इन्द्रजिदित्यर्थः । क्रुद्धः = कुपितः सन् ,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्लवङ्गानां = वानराणां, सप्तषष्टिं कोटीः = सप्ताऽधिकषष्टिसंख्यकाः कोटीः, वाणैः = शरैः, असूषुपत् = स्वापितवान्, हतवानिति भावः। किं बहुना—निशाऽन्ते = राऽयवसाने, राघवौ च = रामलक्ष्मणौ च, व्यमूमुहत् = मोहितवान् ॥

व्युत्पत्तिः—रावणिः = रावणस्याऽपत्यं पुमान्, "अत इञ्" इति इञ्। सप्तषष्टिं=सप्ताऽधिका षष्टिः सप्तषष्टिस्तां, "शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्" इति मध्यमपदलोपी समासः। असूषुपत् = "ञिष्वप् शयन" इति धातोर्णौ लुङ्, "स्वापेश्चङि" इति सम्प्रसारणं पश्चाद् द्वित्वमभ्यासदीर्घश्च। राघवौ= रघोरपत्ये पुमांसौ राघवौ, तौ "तस्याऽपत्यम्" इत्यण् "तद्धितेष्वचामादेः" इत्यादिवृद्धिश्च। व्यमूमुहत् = विपूर्वकात् "मुह वैचित्त्य" इति धातोर्णौ चङि उपधाह्रस्वत्वमभ्यासदीर्घता च ॥

भाषाऽर्थः—इन्द्रजित्ने क्रुद्ध होकर सड़सठ करोड़ वानरोंको वाणोंसे सुलाया (मार डाला) और रातके अवसानमें राम और लक्ष्मणको भी मूर्च्छित किया ॥

अपिस्फवत् स्वसामर्थ्यमगूहीत सायकैर्दिशः।
अघोरीच्च महाघोरं गत्वा प्रैषीच्च रावणम् ॥ ६६ ॥

अन्वयः—(रावणिः) स्वसामर्थ्यम् अपिस्फवत्, सायकैः दिशः अगूहीत्; महाघोरम् अघोरीत्, गत्वा च रावणं प्रैषीत्।

व्याख्या—स्वसामर्थ्यं = निजपराक्रमम् अपिस्फवत् = वर्द्धयामास, रावणिरिति शेषः, एवं परत्राऽपि। सायकैः = बाणैः, दिशः = आशाः, अगूहीत्—छादितवान्, महाघोरम् = अतिभयङ्करं यथा तथा, अघोरीत् = शब्दं कृतवान्, गत्वा च = यात्वा च, लङ्कामिति शेषः। रावणं = दशाऽऽननं, प्रैषीत् = प्रेषितवान्, स्वपराक्रमदर्शनाऽर्थमिति भावः ॥

व्युत्पत्तिः—स्वसामर्थ्यं = समर्थस्य भावः कर्म वा सामर्थ्यं, "गुणवचनब्राह्मणादिभ्यः कर्मणि च" इति ष्यञ्। स्वस्य सामर्थ्यं स्वसामर्थ्यं, तत्। अपिस्फवत् = "स्फायी (ओप्यायी) वृद्धौ" इति धातोर्णौ लुङि चङि रूपम् "स्फायो व" इति णौ वत्वम्। सायकः = "शरे खड्गे च सायक' इत्यमरः। अगूहीत् = "गुहू संवरणे" इति धातोर्लुङ्, "नेटि" इति यद्वा हकारान्तत्वात् "ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम्" इति वृद्धिप्रतिषेधः। अघोरीत् = "घुर भीमाऽर्थशब्दयोः" इति धातोर्लुङ्। प्रैषीत्= प्रपूर्वकात् "इषु गतौ" इति धातोर्लुङ् ॥

भाषाऽर्थः—इन्द्रजित्ने अपनी शक्तिको बढ़ाया, वाणोंसे दिशाओंको आच्छादित किया, अति भयङ्कर शब्द किया और लङ्कामें जाकर अपने पराक्रमको दिखानेके लिए रावणको भेजा ॥ ९९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युग्मम्—

विभीषणस्ततोऽबोधि सस्फुरौ रामलक्ष्मणौ ।
अपारीत् स गृहीतोल्को हतशेषान् प्लवङ्गमान् ॥ १०० ॥

मा शोचिष्ट रघुव्याघ्रौ नाऽमृषातामिति ब्रुवन् ।
अवाबुद्ध स नीलाऽऽदीन् निहतान् कपियूथपान् ॥ १०१ ॥

अन्वयः—ततो विभीषणो रामलक्ष्मणौ सस्फुरौ अबोधि । स गृहीतोल्कः (सन्) हतशेषान् प्लवङ्गमान् "मा शोचिष्ट । रघुव्याघ्रौ न अमृषाताम्" इति ब्रुवन् अपारीत् । स नीलाऽऽदीन् कपियूथपान् निहतान् अवाबुद्ध ॥

व्याख्या—ततः = अनन्तरं, विभीषणः = रावणाऽनुजः, रामलक्ष्मणौ = कौशल्येयसौमित्री, सस्फुरौ = चलन्तौ, जीवन्ताविति भावः । अबोधि = ज्ञातवान् । सः = विभीषणः, गृहीतोल्कः = आत्तज्ज्वलदुल्मुकः सन्, अन्धकारादिति भावः । हतशेषान् = व्यापादिताऽवशिष्टान्, प्लवङ्गमान् = वानरान्, मा शोचिष्ट = शोकं नो कुरुत, रघुव्याघ्रौ = राघवशार्दूलौ, रामलक्ष्मणाविति भावः । न अमृषातां = न मृतौ, इति = एवं, ब्रुवन् = भाषमाणः सन्, अपारीत् = प्रीणितवान् । सः = विभीषणः, नीलादीन् = नीलप्रभृतीन्, कपियूथपान् = वानरसेनापतीन्, निहतान् = व्यापादितान्, अवाबुद्ध = अवबुद्धवान् ॥

व्युत्पत्तिः—सस्फुरौ = स्फुरणं स्फुरः, "स्फुर संचलने" इति धातोः "घञर्थे कविधानम्" इति कः । अत्र भाष्ये "स्थास्नापाव्यधिहनियुध्यर्थम्" इति यदुक्तं तदुपलक्षणं न परिगणनम् । स्फुरेण सहितौ सस्फुरौ, तौ "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः, "वोपसर्जनस्ये"ति सहस्य सभावः । मल्लिनाथमते तु—"स्फुरणं स्फूः, सम्पदादित्वात् क्विप्, तत्सहितौ सस्फुरौ, तौ अबोधि = "बुध अवगमने" इति धातोर्लुङ् "दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्" इति कर्तरि चिण् । गृहीतोल्का येन सः । हतशेषान् = हतेभ्यः शेषान् । मा शोचिष्ट = "ईशुचिर् पूतिभावे" इति धातोः "माङि लुङ्" इति लुङ्, "न माङ्योगे" इत्यडागमप्रतिषेधः । पूतिभावः क्लेदः, अत्र "धातूपसर्गाणामनेकाऽर्थाः" इति नयेन शुचधातोः शोकाऽर्थता । रघुव्याघ्रौ = रघुषु (लक्षणया-रघुवंशोत्पन्नेषु) व्याघ्रौ (श्रेष्ठौ), "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठाऽर्थगोचराः ॥" इत्यमरः । अमृषातां = "मृङ् प्राणत्यागे" इति धातोर्लुङ् "उश्चे"ति सिचः कित्वान्न गुणः । अपारीत् = "पॄ पालनपूरणयोः" इति धातोर्लुङ् । "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः । कपियूथपान् = कपीनां यूथं कपियूथं, तत् पान्तीति कपियूथपास्तान्, आतोऽ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नुपसर्गे क" इति कप्रत्ययः । अवाबुद्ध = अवपूर्वकाद्बुधधातोर्लुङ्, "दीपजने"इत्यादिना चिणो विकल्पात्तदभावपक्षे रूपम् । "झलो झलि" इति सिचो लोपः ॥

भाषाऽर्थः—तब विभीषणने राम और लक्ष्मणको हिलते हुए जाना । उन्होंने जलते हुए उल्मुकको लेकर मरनेसे अवशिष्ट वानरोंको "शोक मत करो राम और लक्ष्मण मरे नहीं हैं" ऐसा कह कर प्रसन्न किया । उन्होंने नील आदि वानर सेनापतियोंको मरे हुए जाना ॥ १००-१०१ ॥

तत्रेषज्जाम्बवान् प्राणीदुदमीलीच्च लोचने ।
पौलस्त्यं चाऽगदीत्कच्चिदजीवीन्मारुतात्मजः ॥ १०२ ॥

अन्वयः—तत्र जाम्बवान् ईषत् प्राणीत् लोचने च उदमीलीत्; पौलस्त्यं च अगदीत्—"मारुताऽऽत्मजः कच्चित् अजीवीत् ?" ॥

व्याख्या—तत्र = तेषु वानरेषु, जाम्बवान् = भल्लूकसेनापतिः, ईषत् = मनाक्, प्राणीत् = उच्छ्वसिति स्म, लोचने च = नेत्रे च, उदमीलीत् = उन्मीलितवान्, पौलस्त्यं च = विभीषणं च, अगदीत् = गदितवान् । मारुताऽऽत्मजः = हनूमान्, कच्चित् = किम्, अजीवीत् = जीवितः ॥

व्युत्पत्तिः—प्राणीत् = प्रपूर्वकात् "अन प्राणन" इति धातोर्लुङ् "अनितेः" इति णत्वम् । उदमीलीत् = उत्पूर्वकात् "मील (षमील) निमेषणे" इति धातोर्लुङ् । पौलस्त्यं = पुलस्त्यस्याऽपत्यं पुमान्पौलस्त्यस्तं, "तस्याऽपत्यम्" इत्यण् । अगदीत् = "गद व्यक्तायां वाचि" इति धातोर्लुङ्, "अतो हलादेर्लघोः" इति वृद्ध्यभावे रूपम् । अजीवीत् = "जीव प्राणधारणे" इति धातोर्लुङ् ॥

भाषाऽर्थः—उनमें जाम्बवान्ने कुछ उच्छ्वसित होकर आँखोंको खोला और कहा—"हनूमान्जी जीये क्या ?" ॥ १०२ ॥

तस्य क्षेमे महाराज ! नाऽमृष्महाखिला वयम् ।
पौलस्त्योऽशिश्रवत्तं च जीवन्तं पवनात्मजम् ॥ १०३ ॥

अन्वयः—"हे महाराज ! तस्य क्षेमे अखिला वय न अमृष्महि" । पौलस्त्यः तं जीवन्तं पवनाऽऽत्मजम् अशिश्रवत् ॥

व्याख्या—हे महाराज = हे राजेन्द्र !, तस्य = हनूमतः, क्षेमे = कुशले, जीवनरूप इति भावः । अखिलाः = सर्वे, वयं = भल्लूकवानराः, न अमृष्महि = नो मृताः । पौलस्त्यः = विभीषणः, तं = जाम्बवन्तं, जीवन्तं = प्राणान्धारयन्तं, पवनात्मजं = हनूमन्तम्, अशिश्रवत् = श्रावितवान् ॥

व्युत्पत्तिः—महाराज = महाँश्चाऽसौ राजा महाराजस्तत्सम्बुद्धौ, "सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः" इति समासः, "आन्महतः समानाऽधिकरणजातीययोः"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्यात्वम्, "राजाऽहःसखिभ्यष्टच्" इति टच्। अमृष्महि="मृङ् प्राणत्यागे" इति धातोः "आशंसायां भूतवच्चे"ति लुङ्। अशिश्रवत्="श्रु श्रवणे" इति धातोर्ण्यन्ताच्चङि सन्वद्भावे अभ्यासोकारस्य "स्रवतिशृणोतिद्रवतिप्लवतिप्रवतिच्यवतीनां वे"ति वैकल्पिकमित्वं तदभावपक्षे—"अशुश्रवत्" इति रूपम् ॥

भाषाऽर्थः—"हे महाराज (विभीषण)! उन (हनूमान्) के कुशलमें सब हमलोग नहीं मरे हैं"। विभीषणजीने जाम्बवान्को "हनूमान्जी जीते हैं" ऐसा सुनाया ॥ १०३ ॥

युग्मम्—

आयिष्ट मारुतिस्तत्र तौ चाऽप्यहृषतां ततः ।
प्राहैष्टां हिमवत्पृष्ठे सर्वौषधिगिरिं ततः ॥ १०४ ॥
तौ हनूमन्तमानेतुमोषधीं मृतजीविनीम् ।
सन्धानकरणीं चाऽन्यां विशल्यकरणीं तथा ॥ १०५ ॥

अन्वयः—तत्र मारुतिः आयिष्ट। ततः तौ अहृषतां। ततः तौ मृतजीविनीं सन्धानकरणीं तथा अन्यां विशल्यकरणीम् ओषधीम् आनेतुं हनुमन्तं हिमवत्पृष्ठे सर्वौषधिगिरिं प्राहैष्टाम् ॥

व्याख्या—तत्र=तस्मिन्स्थाने, मारुतिः=हनूमान्, आयिष्ट=आगतः। ततः=मारुत्यागमनाऽनन्तरं, तौ=जाम्बवद्विभीषणौ, अहृषतां= प्रापतुः। ततः= अनन्तरं, तौ=जाम्बवद्विभीषणौ, मृतजीविनीं=तदाख्यां, मृतजीवनप्रदामिति भावः। सन्धानकरणीं=तदाख्यां, क्षतसन्धायिनीमिति भावः। तथा=तेन प्रकारेण, अन्याम्=अपराम्, विशल्यकरणीं=तदाख्यां, विशल्यकारिणीमिति भावः। ओषधीम्=औषधम्, आनेतुम्=आहर्तुं, हनूमन्तं=वायुपुत्रं, हिमवत्पृष्ठे=हिमाऽऽलयपृष्ठभागे, सर्वौषधिगिरिं=सकलभेषजयुक्तं पर्वतम्, प्राहैष्टां=प्रहितवन्तौ ॥

व्युत्पत्तिः—आयिष्ट=आङ्पूर्वकात् "अय गतौ" इति धातोर्लुङ्। अहृषतां= "हृष तुष्टौ" इति धातोर्लुङ्, पुषादित्वात् "पुषादिद्युताद्यॢदितः परस्मैपदेषु" इति अङ्। मृतजीविनीं=मृतं जीवयतीति मृतजीविनी, ताम्। "कृत्यल्युटो बहुलम्" इति बहुलग्रहणसामर्थ्यात्कर्तरि ल्युट्, ततः स्त्रीत्वविवक्षायां "टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः" इति ङीप्। सन्धानकरणीं=सन्धानं करोतीति सन्धानकरणी, ताम्। पूर्ववल्ल्युट् ङीप् च। विशल्यकरणीं=विगतं शल्यं यस्य सः विशल्यः, "वा पुंसि शल्यं शङ्कुर्ना" इत्यमरः। विशल्यं करोतीति विशल्यकरणी, ताम्, पूर्ववत्प्रक्रिया ज्ञेया। ओषधीम्=ओषधिशब्दात् "कृदिकारादक्तिन" इति ङीप्, इत्थमेवैतत्पदसिद्धौ "ओषधेश्च विभक्तावप्रथमायाम्" इति दीर्घत्वमिति वक्तृ

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोके छान्दसप्रक्रियामाश्रयञ्जयमङ्गलाचार्य उपेक्ष्यः । सर्वौषधिगिरिं=सर्वा ओषधयो यस्मिन्स सर्वौषधिः, स चाऽसौ गिरिस्तम् । प्राहैष्टां=प्रपूर्वकात् "हि गतौ" इति धातोर्लुङ्, "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः ॥

भाषाऽर्थः—उस स्थानमें हनूमान्जी आ गये तब दोनों (जाम्बवान् और विभीषण) प्रसन्न हुए । अनन्तर उन दोनोंने मृतजीविनी (मरे हुएको जिलानेवाली), सन्धानकरणी (क्षतको सन्धान करने वाली) और दूसरी विशल्यकरणी (गड़े हुए बाणाऽग्रको हटानेवाली) ओषधि लानेके लिए हनूमान्जीको हिमालयके मध्यभागमें स्थित संपूर्ण औषधोंसे युक्त पर्वतमें भेजा ॥ १०४-१०५ ॥

प्रोदपाति नभस्तेन स च प्रापि महागिरिः ।
यस्मिन्नज्वालिषू रात्रौ महौषध्यः सहस्रशः ॥ १०६ ॥

अन्वयः—तेन नभः प्रोदपाति, स च महागिरिः प्रापि । यस्मिन् रात्रौ सहस्रशो महौषध्यः अज्वालिषुः ॥

व्याख्या—तेन=हनूमता, नभः=आकाशं, प्रोदपाति=उत्पतितं, स च=पूर्वोक्तश्च, महागिरिः=महापर्वतः, प्रापि=प्राप्तः, । यस्मिन्=महागिरौ, रात्रौ=रजन्यां सहस्रशः=अनेकधा, महौषध्यः=महौषधानि, अज्वालिषुः=ज्वलिताः ॥

व्युत्पत्तिः—प्रोदपाति=प्रोत्पूर्वकात् "पत्लृ पतन" इति धातोः कर्मणि लुङ् । प्रापि=प्रपूर्वकात् "आप्लृ व्याप्तौ" इति धातोः कर्मणि लुङ् । सहस्रशः=सहस्रेण प्रकारैरिति, "बह्वल्पाऽर्थाच्छस्कारकादन्यतरस्याम्" इति शस् । अज्वालिषुः="ज्वल दीप्तौ" इति धातोर्लुङ्, "अतो ल्रान्तस्ये"ति वृद्धिः ।

भाषाऽर्थः—हनूमान्जी आकाशकी ओर उड़ गये । उन्होंने उस महापर्वतको प्राप्त किया । जिसमें रातमें हजारों महौषधियाँ उद्दीप्त होती थीं ॥ १०६ ॥

निरचायि यदा भेदो नौषधीनां हनूमता ।
सर्व एव समाहारि तदा शैलः सहौषधिः ॥ १०७ ॥

अन्वयः—हनूमता यदा ओषधीनां भेदो न निरचायि, तदा सहौषधिः सर्वः शैल एव समाहारि ॥

व्याख्या—हनूमता=पवननन्दनेन, यदा=यस्मिन्काले, ओषधीनां=भेषजानां, भेदः=विशेषः, न निरचायि=नो निश्चितः, तदा=तस्मिन्काले, सहौषधिः=ओषधिसहितः, सर्वः=समस्तः, शैल एव=पर्वत एव, समाहारि=समानीतः ॥

व्युत्पत्तिः—निरचायि=निरुपसर्गपूर्वकात् "चिञ् चयने" इति धातोः कर्मणि लुङ् । सहौषधिः=ओषधिभिः सहितः । समाहारि=समाङ्पूर्वकात् "हृञ् हरण" इति धातोः कर्मणि लुङ् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—हनूमान्‌जी जब औषधभेदोंका निश्चय नहीं कर सके तब वे औषधोंके साथ समूचे पहाड़को उठा ले आये ॥ १०७ ॥

प्राणिषुर्निहताः केचित्केचित्तु प्रोदमीलिषुः ।
तमोऽन्येऽहासिषुर्योधा व्यजृम्भिषत चाऽपरे ॥ १०८ ॥

अन्वयः—निहताः केचित् प्राणिषुः । केचित्तु प्रोदमीलिषुः । अन्ये योधा तमः अहासिषुः । अपरे च व्यजृम्भिषत ॥

व्याख्या—निहताः = व्यापादिताः, केचित् = योधाः, प्राणिषुः = उच्छ्वसितवन्तः, ओषधिसन्निधानादिति शेषः। केचित्तु = योधाः, प्रोदमीलिषुः=उन्मीलितनयना बभूवुः । अन्ये=अपरे, योधाः=भटाः, तमः = अन्धकारं, मोहरूपमिति भावः। अहासिषुः = त्यक्तवन्तः, "तथाऽन्येहासिषुः" इति पाठान्तरे—अहासिषुः=हसितवन्त इत्यर्थः। अपरे च = अन्ये च योधाः, व्यजृम्भिषत = जृम्भिकां कृतवन्तः ॥

व्युत्पत्तिः—प्राणिषुः = प्रपूर्वकात् "अन प्राणन" इति धातोर्लुङ् "अनितेः" इति णत्वम् । प्रोदमीलिषुः = प्रोत्पूर्वकात् "मील (उमील) निमेषणे" इति धातोर्लुङ् । अहासिषुः = "ओहाक् त्यागे" इति धातोर्लुङ्, "यमरमनमातां सक् चे"ति सगिटौ । व्यजृम्भिषत = विपूर्वकात् "(जृभी) जृम्भिगात्रविनासे" इति धातोर्लुङ् ।

भाषाऽर्थः—औषधों के सामीप्यसे मारे गये कुछ वानर सांस लेने लगे, कुछ नेत्रोंको खोलने लगे । अन्य योद्धा होशमें आने लगे । कुछ तो जमुहाई लेने लगे ॥

अजिघ्रपंस्तथैवाऽन्यानोषधीरालिपंस्तथा ।
एवं तेऽचेतिषुः सर्वे वीर्यं चाऽधिषताऽधिकम् ॥ १०९ ॥

अन्वयः—(योधाः) तथा एव अन्यान् ओषधीः अजिघ्रपन् , तथा आलिपन् । एवं ते सर्वे अचेतिषुः, अधिकं वीर्यं च अधिषत ॥

व्याख्या—तथा एव = तेन प्रकारेण एव, अन्यान् = अपरान् , ओषधीः = औषधानि, अजिघ्रपन् = घ्रापितवन्तः लब्धसंज्ञा योधा इति शेषः । तथा = तेन प्रकारेण, आलिपन् = लिप्तवन्तः, अन्यानोषधीभिरिति शेषः । एवम् = अनेन प्रकारेण, ते = पूर्वोक्ताः, सर्वे = समस्ताः, अचेतिषुः = संज्ञां प्राप्तवन्तः, अधिकम्=अतिरिक्तं, वीर्यं च = पराक्रमं च अधिषत = धारितवन्तः ॥

व्युत्पत्तिः—अन्यान् = "अजिघ्रपन्" इत्यत्र ज्ञानविशेषाऽर्थकस्य प्रत्यवसानाऽर्थस्य वा घ्राधातोर्योगे "गतिबुद्धिप्रत्यवसानाऽर्थशब्दकर्माऽकर्मकाणामणिकर्ता स णौ" इत्यणिकर्तुः कर्मत्वम्, अजिघ्रपन् = "घ्रा गन्धोपादाने" इति धातोर्णौ लुङ् । "अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ" इति पुगागमः । "जिघ्रतेर्वा" इति इत्वम्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"णौ चङ्युपधाया ह्रस्व" इत्युपधाया ह्रस्वत्वम्। आलिपन्=आङ्पूर्वकात् "लिप उपदेहे" इति धातोर्लुङ्, "लिपिसिचिह्वश्चे" त्यङ्। अचेतिषुः="चिती संज्ञाने" इति धातोर्लुङ्। अधिषत="डुधाञ्-धारणपोषणयोः" इति धातोर्लुङ्, "स्थाध्वोरिच्चे"ति सिचः कित्त्वमित्वं च ॥

भाषाऽर्थ—योद्धाओं ने उसी तरह औरोंको औषध सुंघाया तथा औरोंको औषधोंको लेपन किया। इस प्रकारसे वे सब होशमें आये और अधिक शक्तिका धारण करने लगे ॥ १०९ ॥

अजिह्लदत्स काकुत्स्थो शेषांश्चाऽजीजिवत्कपीन्।
हनूमानथ ते लङ्कामग्निनाऽदीदिपन्द्रुतम् ॥ ११० ॥

अन्वयः—स हनूमान् काकुत्स्थौ अजिह्लदत्, शेषान् कपींश्च अजीजिवत्। अथ ते लङ्काम् अग्निना द्रुतम् अदीदिपन् ॥

व्याख्या—सः=सर्वौषधिगिर्यानेता, हनूमान्=वायुपुत्रः, काकुत्स्थौ=रामलक्ष्मणौ, अजिह्लदत्=आह्लादितवान्, शेषान्=अवशिष्टान्, कपींश्च=वानरांश्च, अजीजिवत्=जीवितवान्। अथ=अनन्तरं, ते=कपयः, जीविताः सन्त इति शेषः। लङ्कापुरीम्, अग्निना=अनलेन, द्रुतं=शीघ्रम्, अदीदिपन्=दीपितवन्तः ॥

व्युत्पत्तिः—अजिह्लदत्="ह्लादी सुखे चे"ति ण्यन्ताद्धातोर्लुङ् उपधाह्रस्वत्वमभ्यासकार्यं च। अजीजिवत्="जीव प्राणधारणे" इति ण्यन्ताद्धातोर्लुङ् "भ्राजभासे"तिह्रस्वपक्षे रूपम्। तदभावे अजिजीवत् इति। अदीदिपन्="दीपी दीप्तौ" इति ण्यन्ताद्धातोर्लुङ्, "भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" इत्युपधाह्रस्वपक्षे रूपम्। तदभावे—"अदिदीपन्" इति रूपम् ॥

भाषाऽर्थः—हनूमान्जीने राम और लक्ष्मणको आह्लादित किया और अवशिष्ट वानरोंको जिलाया। तदनन्तर जीवित उन वानरोंने लङ्का आगसे शीघ्र जला दी ॥

समनात्सीत्ततः सैन्यममार्जीद्भल्लतोमरम्।
अमार्क्षीचाऽसिपत्रादीनबभासत्परश्वधान् ॥ १११ ॥

अन्वयः—ततः सैन्यं समनात्सीत्, भल्लतोमरम् अमार्जीत्; असिपत्रादीन् अमार्क्षीत्, परश्वधान् अबभासत् ॥

व्याख्या—ततः=अनन्तरं, सैन्यं=सेना, रावणस्येति शेषः। समनात्सीत्=सन्नद्धम्। भल्लतोमरं=भल्लाख्यं तोमराख्यं च शस्त्रविशेषम्, अमार्जीत्=शोधितवत्, असिपत्रादीन्=खड्गादीन्, अमार्क्षीत्=शोधितवत्, परश्वधान्=परशून्, अबभासत्=दीपितवत् "अभासीत्" इति पाठान्तरं, तत्राऽपि ण्यर्थस्य अन्तर्भावितत्वात्स एवाऽर्थः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—समनात्सीत्=संपूर्वकात् "णह बन्धने" इति धातोर्लुङ् "नहो ध" इति धत्वं "वदव्रजहलन्तस्याऽच" इति वृद्धिः। अमार्जीत्="मृजू शुद्धौ" इति धातोर्लुङ्, ऊदित्वात् "स्वरतिसूतिसूयतिधूञूदितो वा" इतीडागमो वैकल्पिकः, "मृजेर्वृद्धिः" इति वृद्धिः। अमार्क्षीत्=इडागमस्य वैकल्पिकत्वात्तदभावपक्षे रूपम्। अवभासत्="भासृ दीप्तौ" इति धातोर्णौ लुङ् "भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" इत्युपधाह्रस्वाभावपक्षे रूपम्। तदभावे—"अबीभसत्" इतिरूपम्॥

भाषाऽर्थः—अनन्तर (लड़ने के लिए) रावणकी सेना सन्नद्ध हुई। उसने भाला, तोमर और तलवारोंको साफ किया और फरसोंको उज्ज्वल बनाया ॥१११॥

कुम्भकर्णसुतौ तत्र समनाद्धां महाबलौ।
निकुम्भश्चैव कुम्भश्च प्रापतां तौ प्लवङ्गमान् ॥ ११२ ॥

अन्वय—तत्र निकुम्भः कुम्भश्च महाबलौ कुम्भकर्णसुतौ समनाद्धाम्। तौ प्लवङ्गमान् प्रापताम् ॥

व्याख्या—तत्र=रणस्थले, निकुम्भः=तदाख्यः, कुम्भश्च=तन्नामधेयश्च, महाबलौ=महापराक्रमौ, कुम्भकर्णसुतौ=कुम्भकर्णपुत्रौ, समनाद्धां=सन्नद्धौ। तौ=निकुम्भकुम्भौ, प्लवङ्गमान्=वानरान्, प्रापतां=प्राप्तवन्तौ ॥

व्युत्पत्तिः—महाबलौ=महत् बलं ययोस्तौ। समनाद्धां=सम्पूर्वकात् "णह बन्धने" इति धातोर्लुङ्। धातुरयं दैवादिकः। उभयपदी च। हलन्तलक्षणा वृद्धिः। प्रापतां=प्रपूर्वकात "आप्लृ व्याप्तौ" इति धातोर्लुङ्, लृदित्वादङ्॥

भाषाऽर्थः—वहां पर निकुम्भ और कुम्भ नाम वाले महाशक्तिसे सम्पन्न कुम्भकर्ण-पुत्र युद्धके लिए सन्नद्ध हुए। वे वानरोंके पास पहुंच गये ॥ ११२ ॥

अगोपिष्टां पुरीं लङ्कामगौप्तां रक्षसां बलम्।
अत्याक्तामायुधानीकमनैष्टां च क्षयं द्विषः ॥ ११३ ॥

अन्वयः—(तौ) लङ्कां पुरीम् अगोपिष्टां, रक्षसां बलम् अगौप्ताम्, आयुधाऽनीकम् अत्याक्तां, द्विषः क्षयम् अनैष्टाम् ॥

व्याख्या—लङ्कां=लङ्काऽभिधानां, पुरीं=नगरीम्, अगोपिष्टां=रक्षितवन्तौ, निकुम्भकुम्भाविति शेषः, एवं परत्राऽपि। राक्षसानां, बलं=सैन्यम्, अगौप्तां=रक्षितवन्तौ, आयुधाऽनीकं=शस्त्रसमूहम्, अत्याक्तां=त्यक्तवन्तौ, द्विषः=शत्रून्, क्षयं=नाशम्, अनैष्टां=नीतवन्तौ ॥

व्युत्पत्तिः—अगोपिष्टां="गुपू रक्षणे" इति धातोर्लुङ्, "स्वरतिसूतिसूयतिधूञूदितो वा" इति वैकल्पिक इडागमः "नेटी"ति वृद्धिप्रतिषेधः। अगौप्तां=गुपूधातोरिडभावपक्षे लुङि रूपम्। "वदव्रजहलन्तस्याऽच" इति वृद्धिः "झलो झलि" इति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिचो लोपः। आयुधाऽनीकम्=आयुधानामनीकम्, "अनीकोऽस्त्री रणे सैन्ये" इति मेदिनीकोशादनीकशब्दस्य समूहाऽर्थवाचकत्वाऽभावेऽपि लक्षणया एषोऽर्थः। अत्याक्षीं="त्यज हानौ" इति धातोर्लुङ्। पूर्ववद्वृद्धिः सिचो लोपश्च। अनैष्टां="णीञ् प्रापणे" इति धातोर्लुङ् "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः॥

भाषाऽर्थः—निकुम्भ और कुम्भने लङ्कापुरी की और राक्षसों की सेनाकी रक्षा की; अस्त्रसमूह को छोड़ा और शत्रुओंको नष्ट किया॥ ११३॥

अकोकूयिष्ट तत्सैन्यं प्रपलायिष्ट चाकुलम्।
अच्युतच्च क्षतं रक्तं हतं चाध्यशयिष्ट गाम्॥ ११४॥

अन्वयः—तत् सैन्यम् अकोकूयिष्ट, आकुलं (सत्) प्रपलायिष्ट; क्षतं (सत्) रक्तम् अच्युतत्, हतं (सत्) गाम् अध्यशयिष्ट च॥

व्याख्या—तत्=प्रसिद्धं, सैन्यं=बलं, वानराणामिति शेषः। अकोकूयिष्ट=अत्यर्थं शब्दं कृतवत्, आकुलं=विह्वलं सत्, प्रपलायिष्ट=प्रपलायितवत्, क्षतं=खण्डितं सत्, रक्तं=रुधिरम्, अच्युतत्=क्षरितवत्, हतं=निहतं सत्, गां=भूमिम्, अध्यशयिष्ट च=अधिशयितवत्॥

व्युत्पत्तिः—सैन्यं=सेनैव, "चतुर्वर्णादीनां स्वाऽर्थे उपसंख्यानम्" इति स्वाऽर्थे ष्यञ्। अकोकूयिष्ट="कुङ् शब्दे" इति धातोः "धातोरेकाचो हलादेः क्रियासमभिहारे यङ्" इति भृशाऽर्थे यङि "न कवतेर्यङि" इत्यभ्यासस्य चुत्वप्रतिषेधः। यङन्ताल्लुङ्। प्रपलायिष्ट=प्रपरापूर्वकात् "अय गतौ" इति धातोर्लुङ्। "उपसर्गस्याऽयतौ" इति रेफस्य लत्वम्। अच्युतत्="च्युतिर् आसेचने" इति धातोर्लुङ्, "इर इत्संज्ञा वाच्या" इतीर इत्संज्ञा, "इरितो वा" इत्यङ्। गां="गौरिला कुम्भिनी क्षमा।" इत्यमरः, अधिपूर्वकशीङ् धातोर्योगे "अधिशीङ्स्थाऽऽसां कर्म"ति आधारस्य कर्मत्वम्। अध्यशयिष्ट=अधिपूर्वात् "शीङ् स्वप्ने" इति धातोर्लुङ्॥

भाषाऽर्थः—तब वानरोंकी सेनाने अतिशय शब्द किया। वह आकुल होती हुई भागी, खण्डित होती हुई रक्त गिराने लगी और निहत होती हुई भूमिपर गिर पड़ी॥ ११४॥

अङ्गदेनाऽहसातां तौ युध्यकम्पनकम्पनौ।
अभ्यार्दीद्वालिनः पुत्रं प्रजङ्घोऽपि समत्सरः॥ ११५॥

अन्वयः—अङ्गदेन युधि तौ अकम्पनकम्पनौ अहसाताम्। प्रजङ्घोऽपि समत्सरः (सन्) वालिनः पुत्रम् अभ्यार्दीत्॥

व्याख्या—अङ्गदेन=वालिपुत्रेण, युधि=रणे, तौ=पूर्वोक्तौ, अकम्पनकम्पनौ=तन्नामधेयौ, राक्षसौ, अहसातां=हतौ. प्रजङ्घोऽपि=तन्नामको राक्षसोपि, समत्सरः=सकोपः सन्, वालिनः पुत्रम्=अङ्गदम्, अभ्यार्दीत्=प्रहृतवान्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—अकम्पनकम्पनौ = अकम्पनश्च कम्पनश्च "अल्पाऽच्तरम्" इति नियमेन कम्पनशब्दस्य पूर्वप्रयोगे प्राप्तेऽपि "भ्रातुर्ज्यायसः" इति नियमेन अकम्पनशब्दस्य पूर्वनिपातः। अहसातां = हन हिंसागत्योः" इति धातोः कर्मणि लुङ्, "आत्मनेपदेष्वन्यतरस्याम्" इति वधादेशाऽभावपक्षे रूपम्। समत्सरः = मत्सरेण सहितः, "अथ मत्सरः। अन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिषु ।" इति विश्वः। अभ्यार्दीत् = अभिपूर्वकात् "अर्द हिंसायाम्" इति धातोर्लुङ् "आडजादीनाम्" इत्याडागमः॥

भाषाऽर्थः—अङ्गदसे संग्राममें अकम्पन और कम्पन मारे गये। प्रजङ्घ नामक राक्षसने भी क्रोधयुक्त होकर बालिपुत्र अङ्गदको प्रहार किया॥ ११५॥

तस्याऽप्यबेभिदिष्टाऽसौ मूर्धानं मुष्टिनाऽङ्गदः।
अहार्षीच्च शिरः क्षिप्रं यूपाक्षस्य निराकुलः॥ ११६॥

अन्वयः—अङ्गदः तस्याऽपि मूर्धानं मुष्टिना अबेभिदिष्ट। निराकुलो यूपाक्षस्य शिरः क्षिप्रम् अहार्षीच्च॥

व्याख्या—अङ्गदः = बालिपुत्रः, तस्याऽपि = प्रजङ्घस्याऽपि, मूर्धानं = शिरः, मुष्टिना = सम्पिण्डिताऽङ्गुलिपाणिना, अबेभिदिष्ट = अत्यर्थं भिन्नवान्। निराकुलः = तन्नामकः कश्चिद्वानरः, केषांचिन्मते अङ्गद एव निराकुलः = आकुलतारहितः सन्निस्यर्थः। यूपाक्षस्य = तन्नामकस्य राक्षसस्य, शिरः = मूर्धानं, क्षिप्रं = सत्वरम्, अहार्षीच्च = छिन्नवांश्च॥

व्युत्पत्तिः—अबेभिदिष्ट = "भिदिर् विदारणे" इति धातोर्यङन्तस्य लुङि रूपम्। "अतो लोपः" इत्यकारलोपः, "यस्य हलः" इति यलोपः। अहार्षीत् = "हृञ् हरणे" इति धातोर्लुङ्, "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः॥

भाषाऽर्थः—अङ्गदजीने प्रजङ्घके शिरको भी मुक्केसे अतिशय भिन्न किया। निराकुल नामक वानरने यूपाक्ष नामके राक्षसके शिरको छिन्न कर डाला॥ ११६॥

शरीरं लोहिताक्षस्य न्यभाङ्क्षीद् द्विविदस्तदा।
क्रुद्धः कुम्भस्ततोऽभैत्सीन्मैन्दं सद्विविदं शरैः॥ ११७॥

अन्वयः—तदा द्विविदः लोहिताक्षस्य शरीरं न्यभाङ्क्षीत्। ततः कुम्भः क्रुद्धः (सन्) सद्विविदं मन्दं शरैः अभैत्सीत्॥

व्याख्या—तदा = तस्मिन्काले, द्विविदः = तदाख्यो वानरः, लोहिताक्षस्य = तदाख्यस्य राक्षसस्य, शरीरं = देहं, न्यभाङ्क्षीत् = चूर्णितवान्। ततः = अनन्तरं, कुम्भः = कुम्भकर्णः, क्रुद्धः = कुपितः सन्, सद्विविदं = द्विविदसहितं, मैन्दं = तन्नामानं वानरं, शरैः = बाणैः, अभैत्सीत् = भिन्नवान्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—तदा = तस्मिन्काले इति, "सर्वैकान्यकिंयत्तदः काले दा" इति दाप्रत्ययः। न्यभाङ्क्षीत्=निपूर्वकात् "भञ्जो आमर्दने" इति धातोर्लुङ्। अभैत्सीत्= "भिदिर् विदारणे" इति धातोर्लुङ्।

भावार्थः—उस समय द्विविद नामक वानरने लोहिताक्ष नामक राक्षसके शरीरको चूर चूर कर डाला। अनन्तर कुम्भ नामक कुम्भकर्णके पुत्रने कुपित होकर द्विविद के साथ मैन्द नामक वानरको बाणोंसे विदीर्ण कर दिया॥ ११७॥

युग्मम्—

आघूर्णिष्टां क्षतौ क्ष्मां च तावाशिश्रियतामुभौ।
मातुलौ विह्वलौ दृष्ट्वा कुम्भं वालिसुतो नगैः॥ ११८॥
प्रौर्णावीच्छरवर्षेण तानपौहीन्निशाचरः।
वानरानैजिहद्रामस्तूर्णं रक्षितुमङ्गदम् ॥ ११९॥

अन्वयः—तौ उभौ क्षतौ (सन्तौ) आघूर्णिष्टां, क्ष्मां च आशिश्रियताम्। वालिसुतो मातुलौ विह्वलौ दृष्ट्वा कुम्भं नगैः प्रौर्णावीत्। निशाचरः शरवर्षेण तान् अपौहीत्। रामः अङ्गदं रक्षितुं तूर्णं वानरान् ऐजिहत्॥

व्याख्या—तौ = पूर्वोक्तौ, उभौ = द्वौ, मैन्दद्विविदाविति भावः। क्षतौ = शरताडितौ सन्तौ, आघूर्णिष्टां = चक्रवद्भ्रान्तावित्यर्थः। अनन्तरं, क्ष्मां च = भूमिं च, आशिश्रियताम् = आश्रितवन्तौ, भूमौ पतिताविति भावः। वालिसुतः=अंगदः, मातुलौ = मातृभ्रातरौ, मैन्दद्विविदौ इत्यर्थः। विह्वलौ = विक्लवौ, दृष्ट्वा = विलोक्य, कुम्भं = कुम्भकर्णपुत्रं, नगैः = वृक्षैः, प्रौर्णावीत् = आच्छादितवान्। निशाचरः = राक्षसः, कुम्भ इत्यर्थः। शरवर्षेण = बाणवृष्ट्या, तान् = नगान्, अपौहीत = निरस्तवान्। रामः = रामचन्द्रः, अङ्गदं = वालिपुत्रं, रक्षितुं = त्रातुं, तूर्णं = सत्वरं, वानरान् = अन्यान्कपीन्, ऐजिहत् = व्यापारितवान्॥

व्युत्पत्तिः = आघूर्णिष्टाम् = आङ्पूर्वकात् "(घुण) घूर्ण भ्रमणे" इति धातोर्लुङ्। आशिश्रियताम् = आङ्पूर्वकात् "श्रिञ् सेवायाम्" इति धातोर्लुङ्। "णिश्रिद्रुस्रुभ्यः कर्तरि चङ्" इति चङ्। इयङादेशश्च। मातुलौ = मातुर्भ्रातरौ, "पितृव्यमातुलमातामहपितामहाः" "मातुर्डुलच्" इति डुलच्प्रत्ययान्तो निपातः, "मातुर्भ्राता तु मातुलः" इत्यमरः। नगैः = न गच्छन्तीति नगास्तैः, "अन्यत्रापि दृश्यत इति वक्तव्यम्" इति डप्रत्ययः "नगोऽप्राणिष्वन्यतरस्याम्" इति नञ् वा प्रकृत्या। "शैलवृक्षौ नगावगौ" इत्यमरः। प्रौर्णावीत् = प्रपूर्वकात् "ऊर्णुञ् आच्छादने" इति धातोर्लुङ् "विभाषोर्णोः" इति ङित्वाभावपक्षे "ऊर्णोतेर्विभाषा" इति पाक्षिक-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृद्धिः । अपौहीत्=अपपूर्वकात् "ऊह वितर्के" इति धातोर्लुङ्, "उपसर्गादस्यत्यूह्योर्वेति वाच्यम्" इत्यात्मनेपदस्य वैकल्पिकत्वात्तदभावपक्षे रूपम् । ऐजिहत्="ईज चेष्टायाम्" इति धातोर्ण्यन्ताल्लुङ् ॥

भाषाऽर्थ—वे दोनों (मैन्द और द्विविद) कुम्भके बाणोंसे विद्ध होकर चक्रके सदृश घूमने लगे और जमीनपर गिर पड़े । अङ्गदने अपने मामाओंको विह्वल देखकर कुम्भको वृक्षोंसे आच्छादित किया । कुम्भने भी बाणोंकी वृष्टिसे उन (वृक्षों) को हटाया । रामचन्द्रजीने अङ्गदकी रक्षा करनेके लिए शीघ्र अन्य वानरोंको प्रेरणाकी ॥ ११८–११९ ॥

द्रुतमत्रास्त सुग्रीवो भ्रातृव्यं शत्रुसंकटात् ।
मुष्टिना कौम्भकर्णिं च क्रुद्धः प्राणैरतित्यजत् ॥ १२० ॥

अन्वयः—सुग्रीवो भ्रातृव्यं शत्रुसङ्कटात् द्रुतम् अत्रास्त । (सः) क्रुद्धः (सन्) मुष्टिना कौम्भकर्णिं प्राणैः अतित्यजत् ॥

व्याख्या—सुग्रीवः=वानरेश्वरः, भ्रातृव्यं=भ्रातृपुत्रम्, अङ्गदमित्यर्थः । शत्रुसङ्कटात्=रिपुदुःखात्, द्रुतं=शीघ्रम्, अत्रास्त=रक्षितवान् । तमेव रक्षाप्रकारं कथयति—क्रुद्धः=कुपितः सन्, सुग्रीव इति शेषः । मुष्टिना=संपिण्डिताऽङ्गुलिपाणिना, कौम्भकर्णिं=कुम्भकर्णपुत्रं, कुम्भमित्यर्थः । प्राणैः=असुभिः, अतित्यजत्=त्याजितवान् ।

व्युत्पत्तिः—भ्रातृव्यं=भ्रातुरपत्यं पुमान् भ्रातृव्यस्तं, "भ्रातुर्व्यच्च" इति व्यत्प्रत्ययः, चाच्छप्रत्यये सति "भ्रात्रीय" इति रूपम् । अत्रास्त="त्रैङ् पालने" इति धातोर्लुङ्, "आदेच उपदेशेऽशिति" इत्यात्वम् । कौम्भकर्णिं=कुम्भकर्णस्याऽपत्यं पुमान्कौम्भकर्णिस्तम्, "अत इञ्" इति इञ्प्रत्ययः । अतित्यजत्=त्यजेर्ण्यन्ताल्लुङ् ।

भाषाऽर्थः—सुग्रीवने अपने भाईके पुत्र (अङ्गद) को शत्रुसङ्कटसे शीघ्र बचाया । उन्होंने क्रुद्ध होकर मुक्केसे कुम्भको प्राणोंसे छुड़ाया (मारडाला) ॥१२०॥

निकुम्भो वानरेन्द्रस्य प्राहैषीत्परिघं ततः ।
हनूमांश्चाऽऽपतन्तं तमभाङ्क्षीद्भोगिभीषणम् ॥ १२१ ॥

अन्वयः—ततो निकुम्भो वानरेन्द्रस्य परिघं प्राहैषीत् । हनूमांश्च आपतन्तं भोगिभीषणं तम् अभाङ्क्षीत् ॥

व्याख्या—ततः=कुम्भवधाऽनन्तरं, निकुम्भः=कुम्भभ्राता, वानरेन्द्रस्य=कपिराजस्य, सुग्रीवस्येत्यर्थः, समीप इति शेषः । परिघं=परिघातनाऽपरनामानमस्त्रविशेषं, प्राहैषीत्=प्रहितवान् । हनूमांश्च=वायुपुत्रश्च । आपतन्तम्=आगच्छन्तं, भोगिभीषणं=सर्पसमभयानकं, तं=परिघम्, अभाङ्क्षीत्=भग्नवान् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—परिघं="परिघः परिघातनम्" इत्यमरः । प्राहैषीत्=प्रपूर्वकात् "हि गतौ" इति धातोर्लुङ्, "सिचि वृद्धिः परस्मैपदेषु" इति वृद्धिः । भोगिभीषणं= भोगः (सर्पशरीरम्) अस्यास्तीति भोगी, "अत इनिठनौ" इति नित्ययोगे इनिः, "उरगः पन्नगो भोगी" इत्यमरः । भोगीव भीषणो भोगिभीषणस्तम्, "उपमानानि सामान्यवचनैः" इति समासः । अभाङ्क्षीत्—"भञ्जो आमर्दने" इति धातोर्लुङ् ॥

भाषाऽर्थः—कुम्भवधके अनन्तर निकुम्भने सुग्रीवके पास परिघ नामक अस्त्र फेंका । हनूमानजीने आते हुए सर्पके सदृश भयङ्कर उस अस्त्रको तोड़ डाला ॥१२१॥

प्रौर्णुवीत्तेजसाऽरातिमरासीच्च भयंकरम् ।
ग्रीवां चाऽस्य तथाक्राक्षीदजिजीवद्यथा न तम् ॥ १२२ ॥

अन्वयः—(हनूमान्) तेजसा अरातिं प्रौर्णुवीत्, भयङ्करम् अरासीच्च, अस्य ग्रीवां तथा अक्राक्षीत्, यथा तं न अजिजीवत् ॥

व्याख्या—तेजसा=विक्रमेण, अरातिं=शत्रुं निकुम्भमिति भावः, प्रौर्णुवीत्= अभिभूतवान् हनूमानिति शेषः, एवं परत्राऽपि, भयङ्करं=भीषणं यथा तथा, अरासीच्च=शब्दितवांश्च । अस्य=निकुम्भस्य, ग्रीवां=कन्धरां, तथा=तेन प्रकारेण, अक्राक्षीत्=आकृष्टवान्, यथा=येन प्रकारेण, तं=निकुम्भं न अजिजीवत्=न जीवयामास । हनूमान्ग्रीवामाकृष्य निकुम्भं हतवानिति भावः ॥

व्युत्पत्तिः—प्रौर्णुवीत्=प्रपूर्वकात् "ऊर्णुञ् आच्छादने" इति धातोर्लुङ् 'विभाषोर्णोः" इति ङित्वपक्षे वृद्ध्यभावे रूपम् । अरासीत्="रस शब्दे" इति धातोर्लुङ् । ग्रीवाम्="अथ ग्रीवायां शिरोधिः कन्धरेत्यपि ॥" इत्यमरः । अक्राक्षीत्="कृष विलेखने" इति धातोर्लुङ्, "अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम्" इत्यमागमपक्षे रूपम् । अजिजीवत्="जीव प्राणधारणे" इति धातोर्ण्यन्तस्य लुङि रूपम् । "भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्" इति उपधाया ह्रस्वाऽभावपक्षे रूपम् । ह्रस्वपक्षे तु "अजीजिवत्" इति रूपम् ॥

भाषार्थः—हनूमानजीने तेजसे शत्रु निकुम्भको अभिभूत किया और भयङ्कर शब्द किया । उन्होंने उसकी ग्रीवाको उस प्रकारसे खींचा जैसा कि वह जीवित न रहा ॥ १२२ ॥

समगत कपिसैन्यं सम्मदेनाऽतिमात्रं
विटपहरिणनाथः सिद्धिमौहिष्ट नित्याम् ।
नृपतिमतिररंस्त प्राप्तकामेव हर्षाद्
रजनिचरपतीनां सन्ततोऽतायि शोकः ॥ १२३ ॥

अन्वयः—कपिसैन्यं संमदेन अतिमात्रं समगत । विटपहरिणनाथः नित्यां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सिद्धिम् औहिष्ट। नृपतिमतिः प्राप्तकामा इव हर्षात् अरंस्त । रजनिचरपतीनां सन्ततः शोकः अतायि ॥

व्याख्या—कपिसैन्यं = वानरसेना, संमदेन = हर्षेण, अतिमात्रम् = अत्यर्थं, समगत = संगतं, कुम्भकर्णादीनां प्रधानवैरिणां निधनेनेति भावः। विटपहरिणनाथः = शाखामृगपतिः, सुग्रीव इत्यर्थः। नित्याम् = अवश्यंभाविनीं, सिद्धिं=सफलताम्, औहिष्ट = तर्कितवान् । नृपतिमतिः = रामबुद्धिः, प्राप्तकामा इव = सम्पन्नाऽभिलाषा इव, हर्षात् = प्रमोदात् , अरंस्त = रमते स्म । रजनिचरपतीनां = राक्षसाऽधिपानां, रावणमेघनादादीनामिति भावः। सन्ततः = अविच्छिन्नः, शोकः = मन्युः, अतायि = अवर्द्धत ॥

व्युत्पत्तिः —समगत = संपूर्वकात् "गम्लृ गतौ" इति धातोर्लुङ्। "समो गम्यृच्छिभ्याम्" इत्यात्मनेपदम् । "वा गमः" इति सिचः कित्त्वे "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इति मकारलोपे "ह्रस्वादङ्गात्" इति सिचो लोपः। तदभावपक्षे "समगंस्त" इति रूपम्। विटपहरिणनाथः = विटपेषु (शाखासु) हरिणास्तेषां नाथः। औहिष्ट = "ऊह वितर्के" इति धातोर्लुङ्। प्राप्तकामा = प्राप्तः कामो यया सा। अरंस्त = "रमु क्रीडायाम्" इति धातोर्लुङ्। रजनिचरपतीनां = रजनौ चरन्तीति रजनिचराः, "चरेष्टः" इति टः। रजनिचराणां पतयस्तेषाम्। अतायि = "तायृ सन्तानपालनयोः" इति धातोर्लुङ्, 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इति कर्तरि चिण्॥

भाषाऽर्थः—वानरोंकी सेना हर्षसे अतिशय संगत हुई। वानरराज सुग्रीवने अवश्य होनेवाली सफलताकी तर्कना की। रामचन्द्रजी की बुद्धि सम्पन्न अभिलाषवाली की सदृश हर्षसे क्रीडा करने लगी। राक्षसेश्वर और मेघनाद आदियोंका अविच्छिन्न शोक बढ़ गया ॥ १२३ ॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये चतुर्थे तिङन्तकाण्डे लक्षणरूपे द्वितीयः परिच्छेदः (वर्गः), तथा लक्ष्यरूपे कथानके कुम्भकर्णवधो नाम पञ्चदशः सर्गः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ षोडशः सर्गः

इतः प्रभृति "लृट् शेषे चे"ति सूत्रेण विधीयमानस्य लृटो विलसितमाह कुत्रचित्तु सूत्रान्तरेण विधीयमानमपि लृटं दर्शयिष्यति। तथा चाऽत्र सर्गे सर्वत्रैव "स्यतासी लृलुटोः" इति स्यप्रत्ययश्च ॥

ततः प्ररुदितो राजा रक्षसां हतबान्धवः।
किं करिष्यामि राज्येन सीतया किं करिष्यते ॥ १ ॥

अन्वयः—ततो हतबान्धवो रक्षसां राजा प्ररुदितः-"राज्येन किं करिष्यामि? सीतया किं करिष्यते?

व्याख्या—ततः=कुम्भकर्णाऽऽदिवधाऽनन्तरं, हतबान्धवः=निषूदितबन्धुसमूहः। रक्षसां=यातुधानानां, राजा=भूपः, रावण इत्यर्थः। प्ररुदितः=क्रन्दितुमारब्धः, प्ररुदितस्वरूपमाह—किमिति। राज्येन=राष्ट्रेण, किं करिष्यामि=किं विधास्यामि, सीतया=जानक्या, किं करिष्यते=किं विधास्यते, न किञ्चिदिति भावः। बान्धवनाशान्नैष्फल्यप्रसक्तेरिति तात्पर्यम् ॥

व्युत्पत्तिः—हतबान्धवः=बन्धूनां समूहो बान्धवं, "तस्य समूह" इत्यण्, "ओर्गुण" इति गुणः। हतं बान्धवं यस्य सः प्ररुदितः=प्रपूर्वकात् "रुदिर् अश्रुविमोचने" इति धातोः "आदिकर्मणि क्तः कर्तरि चे"ति क्तप्रत्ययः। राज्येन=राज्ञो भावः कर्म वा राज्यं,तेन "राजाऽसे" इति यत्प्रत्ययः। करिष्यामि="डुकृञ् करणे" इति धातोः "लृट् शेषे चे"ति लृट "ऋद्धनोः स्ये" इतीट्। करिष्यते=कर्मणि लृट् ॥

भाषाऽर्थः—कुम्भकर्ण आदियोंके वध होनेके अनन्तर जिसके अनेकों बान्धव मारे गये हैं ऐसा राक्षसराज रावण विलाप करने लगा—"मैं राज्यसे क्या करूंगा और सीतासे क्या किया जायगा?" ॥ १ ॥

अतिकाये हते वीरे प्रोत्सहिष्ये न जीवितुम्।
ह्रेपयिष्यति कः शत्रून् केन जायिष्यते यमः ॥ २ ॥

अन्वयः—वीरे अतिकाये हते जीवितुं न प्रोत्सहिष्ये। कः शत्रून् ह्रेपयिष्यति? केन यमो जायिष्यते?

व्याख्या—वीरे=शूरे, अतिकाये=तन्नामके मत्पुत्रे, हते=व्यापादिते, शत्रुणेति शेषः। जीवितुं=प्राणान्धारयितुं, न प्रोत्सहिष्ये=न प्रोत्साहं करिष्यामि, अहमिति शेषः। कः=अतिकायादन्यो वीरः, शत्रून्=रिपून्, ह्रेपयिष्यति=लज्जयिष्यति, केन=अतिकायादन्येन वीरेण, यमः=धर्मराजः, जायिष्यते=जितः करिष्यते, न केनाऽपीति भावः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—वीरे="शूरो वीरश्च विक्रान्त" इत्यमरः । प्रोत्सहिष्ये=प्रोत्पूर्वकात् "षह मर्षण" इति धातोर्लृट् । ह्रेपयिष्यति="ह्री लज्जायाम्" इति धातोर्णौ लृट् "अतिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ" इति पुगागमे "पुगन्तलघूपधस्य च"ति गुणे रूपम् । जायिष्यते="जि जय" इति धातोः कर्मणि लृट्, "स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् चे"ति चिण्वदिट् च ॥

भाषाऽर्थः—वीर अतिकायके मारे जानेपर मैं जीनेके लिए भी उत्साह नहीं करूंगा । कौन शत्रुओंको लज्जित करेगा ? किससे यमराज जीता जायगा ? ॥ २ ॥

अतिकायाद्विना पाशं को वा छेत्स्यति वारुणम् ।
रावणं मंस्यते को वा स्वयम्भूः कस्य तोष्यति ॥ ३ ॥

अन्वयः—अतिकायात् विना वारुणं पाशं को वा छेत्स्यति ? को वा रावणं मंस्यते ? स्वयम्भूः कस्य तोष्यति ?

व्याख्या—अतिकायात् विना=अतिकायं विना, वारुणं=वरुणसम्बन्धिनं, पाशं=शस्त्रविशेषं, को वा=को जनो वा, छेत्स्यति=द्विधा करिष्यति, न कोऽपीति भावः । को वा=जनः, रावणं=मां, मंस्यते=पूजयिष्यति । स्वयम्भूः=ब्रह्मा, कस्य=जनस्य, तोष्यति=प्रीतिं जनयिष्यति, सर्वश्चैष श्लाघनीयो व्यापारोऽतिकायेन सहैवाऽपगत इति भावः ॥

व्युत्पत्तिः—अतिकायात्="विना" पदेन योगे "पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्" इति पञ्चमी पक्षे द्वितीया च । वारुणं=वरुणस्याऽयं वारुणस्तं, "तस्येदम्" इत्यण् "तद्धितेष्वचामादेः" इत्यादिवृद्धिश्च । छेत्स्यति="छिदिर् द्वैधीकरण" इति धातोर्लृट् । स्वयम्भूः=स्वयं भवतीति "भुवः संज्ञाऽन्तरयोः" इति क्विप्प्रत्ययः, "हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः ।" इत्यमरः । तोष्यति="तुष प्रीतौ" इति धातोर्लृट् "षढोः कः सी"ति षस्य कत्वम्, "इण्कोः" इति षत्वं च ॥

भाषाऽर्थः—अतिकायके विना वरुण के पाशको कौन काटेगा ? कौन (मुझ) रावणकी प्रतिष्ठा करेगा ? ब्रह्माजी किसको सन्तुष्ट करेंगे ? ॥ ३ ॥

श्लाघिष्ये केन को बन्धून् नेष्यत्युन्नतिमुन्नतः ।
कः प्रेष्यति पितॄन् काले कृत्वा कत्थिष्यते न कः ॥ ४ ॥

अन्वयः—केन श्लाघिष्ये ? क उन्नतः (सन्) बन्धून् उन्नतिं नेष्यति ? काले कः पितॄन् प्रेष्यति ? कृत्वा को न कत्थिष्यते ?

व्याख्या—केन=जनेन, अतिकायाद्विनेति शेषः, एवं परत्राऽपि योज्यम् । श्लाघिष्ये=श्लाघां करिष्यामि, "ममैतादृशः सर्वगुणसम्पन्नः पुत्र" इति भावः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कः = जनः, उन्नतः = गुणैरुन्नतियुक्तः सन्, बन्धून् = आत्मबान्धवान्, उन्नतिं = परां कोटिं, नेष्यति = प्रापयिष्यति । काले = समये, पितृक्रियोचित इति भावः । कः = जनः । पितृन् = पितृपितामहप्रपितामहादीन्, प्रेष्यति = तर्पयिष्यति । कृत्वा = विधाय, महदपि कार्यमिति शेषः, कः = जनः, न कत्थिष्यते अहमेतादृशो योग्य इति आत्मश्लाघां न करिष्यति ॥

व्युत्पत्तिः—श्लाघिष्ये = "श्लाघृ कत्थन" इति धातोर्लृट् । बन्धून् = द्विकर्मकस्य नीधातोः प्रधानं कर्म । उन्नतिम् = "अकथितं चे"ति कर्मत्वाद्गौणं कर्म । प्रेष्यति—"प्रीञ तर्पण" इति धातोर्लृट् । कत्थिष्यते = "कत्थ श्लाघायाम्" इति धातोर्लृट् ॥

भाषाऽर्थः—अतिकायके विना किससे मैं अपनी श्लाघा करूंगा ? कौन उन्नत होकर अपने बन्धुओंको भी उन्नत करेगा ! पितृक्रियाके उचित कालमें कौन पितरोंको तर्पण करेगा ? महत्त्वपूर्ण कार्य करके भी कौन अपने ही मुखसे अपनी बड़ाई नहीं करेगा ? ॥ ४ ॥

उद्यंस्यति हरिर्वज्रं विचरिष्यति निर्भयः ।
भोक्ष्यते यज्ञभागांश्च शूरमानं च वक्ष्यति ॥ ५ ॥

अन्वयः—हरिः वज्रम् उद्यंस्यति, निर्भयः (सन्) विचरिष्यति; यज्ञभागान् भोक्ष्यते, शूरमानं च वक्ष्यति ॥

व्याख्या—हरिः = इन्द्रः, वज्रं = कुलिशम्, उद्यंस्यति = उत्थापयिष्यति, अतिकायाऽभावेनेति शेषः । निर्भयः = भयरहितः सन्, विचरिष्यति = इतस्ततो गमिष्यति । यज्ञभागान् = मखांऽशान्, स्वकीयानिति शेषः भोक्ष्यते = भक्षयिष्यति । शूरमानं च "शूरोऽस्मी"ति हि चित्तसमुन्नतिं च, वक्ष्यति = धारयिष्यति ॥

व्युत्पत्तिः—हरिः = "यमाऽनिलेन्द्रचन्द्राऽर्कविष्णुसिंहांऽशुवाजिषु । शुकाऽहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥" इत्यमरः । उद्यंस्यति—उत्पूर्वकात् "यमु उपरमे" इति धातोर्लृट । निर्भयः = निर्गतं भयं यस्मात्सः । भोक्ष्यते = "भुज पालनाऽभ्यवहारयोः" इति धातोर्लृट् । "भुजोऽनवने" इत्यात्मनेपदम् । शूरमानं = शूरस्य मानस्तं, "मानश्चित्तसमुन्नतिः" इत्यमरः । वक्ष्यति = "वह प्रापण" इति धातोर्लृट् "हो ढ" इति ढत्वं, कः सी"ति तस्य कत्वं च ॥

भाषाऽर्थः—अतिकायके न होने पर इन्द्र वज्र उठायेगा, निर्भय होता हुआ विचरण करेगा; यज्ञोंमें अपने भागोंको खायेगा और 'मैं शूर हूँ" ऐसा समझकर अभिमान करेगा ॥ ५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रविस्तप्स्यति निःशङ्कं वास्यत्यनियतं मरुत् ।
निर्वर्त्स्यर्त्यृतुसंघातः स्वेच्छयेन्दुरुदेष्यति ॥ ६ ॥

अन्वयः—रविः निःशङ्कं तप्स्यति । मरुत् अनियतं वास्यति । ऋतुसंघातो निर्वर्त्स्यति । इन्दुः स्वेच्छया उदेष्यति ॥

व्याख्या—रविः = सूर्यः, निःशङ्कं = शङ्कारहितं यथा तथा, तप्स्यति = तापं करिष्यति, निग्रहीतुरतिकायस्याऽभावादिति शेषः, एवं परत्राऽपि । मरुत् = वायुः अनियतं = नियमरहितं यथा तथा, स्वाच्छन्द्येनेति भावः । वास्यति = गमनं करिष्यति । ऋतुसंघातः = वसन्ताद्यृतुसमुच्चयः, निर्वर्त्स्यति = निवृत्तो भविष्यति, अतिकायाऽभावेन मन्नगरे षड् ऋतवो वास्तव्यकुटुम्बितां हित्वा क्रमेण प्रादुर्भविष्यन्तीति भावः । एवं च इन्दुः = चन्द्रः, स्वेच्छया = निजवाञ्छया, न तु मन्नियमपारतन्त्र्येणेति भावः । उदेष्यति = उदयमेष्यति । अतिकायराहित्येन चन्द्रो मन्नगरे प्रत्यहं पूर्णमण्डलत्वेन नोद्गमिष्यतीति तात्पर्यम् ॥

व्युत्पत्तिः—निःशङ्कं = निर्गता शङ्का यस्मिन्कर्मणि तद्यथा तथा । तप्स्यति = "तप संतापे" इति धातोर्लृट् । वास्यति = "वा गतिगन्धनयोः" इति धातोर्लृट् । निर्वर्त्स्यति = निरुपसर्गपूर्वकात् "वृतु वर्तने" इति धातोर्लृट्, "वृद्भ्यः स्यसनोः" इति वैकल्पिकं परस्मैपदं, "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधः । उदेष्यति = उत्पूर्वकात् "इण् गतौ" इति धातोर्लृट् ॥

भाषाऽर्थः—अतिकायके अभावमें सूर्य निःशङ्क होकर ताप करेगा । वायु अनियत रूपसे बहेगा । मेरे नगरमें वसन्ताऽऽदि ऋतुओंका समूह विच्छिन्न होगा (क्रमसे एक एक ऋतुका (आविर्भाव होगा) । चन्द्र अपनी इच्छासे उगेगा (प्रतिदिन चन्द्रका पूर्णमण्डल नहीं रहेगा) ॥ ६ ॥

तीव्रं स्यन्दिष्यते मेघैरुग्रं वर्तिष्यते यमः ।
अतिकायस्य मरणे किं करिष्यन्ति नाऽन्यथा ॥ ७ ॥

अन्वयः—मेघैः तीव्रं स्यन्दिष्यते । यम उग्रं वर्तिष्यते । अतिकायस्य मरणे (इन्द्रादयः) किम् अन्यथा न करिष्यन्ति ?

व्याख्या—मेघैः = बलाहकैः, तीव्रं = साऽतिशयं, स्यन्दिष्यते = वर्षिष्यते, रजःप्रशमनमात्रं विहायाऽधुना मेघाः पर्याप्तं वर्षिष्यन्तीति भावः । यमः = यमराजः, उग्रं = रौद्रं, वर्तिष्यते = चरिष्यति । अतिकायस्य = तदाख्यस्य तत्पुत्रस्य, मरणे = निधने, किम्, अन्यथा = विपर्ययं, न करिष्यन्ति = नो विधास्यन्ति, विधास्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न्स्येव, इन्द्रादय इति शेषः। "किं भविष्यति नाऽन्यथे"ति पाठान्तरं तत्र किम् अन्यथा=वैपरीत्यं, न भविष्यति ? तत्र सर्वमेतद्भविष्यत्येवेति भावः ॥

व्युत्पत्तिः—स्यन्दिष्यते=“स्यन्दू प्रस्रवणे” इति धातोर्भावे लृट्। “न वृद्भ्यश्चतुर्भ्यः” इतीट्प्रतिषेधो न, तत्र परस्मैपदस्य अनुवर्तनात्। वर्तिष्यते=आत्मनेपदित्वेनेट्प्रतिषेधाऽभावः ॥

भाषाऽर्थः—मेघ तीव्र रूपसे वृष्टि करेंगे। यमराज भयङ्कर आचरण करेगा। अतिकायके मरणमें इन्द्र आदि देवता क्या विपर्यय नहीं करेंगे ? ॥ ७ ॥

ततो नरान्तकाऽभिधानं पुत्रमनूद्य शोकं प्रकाशयति—

उन्मीलिष्यति चक्षुर्मे वृथा यद्विनयागतम्।
आज्ञालाभोन्मुखं नम्रं न द्रक्ष्यति नरान्तकम् ॥ ८ ॥

अन्वयः—यत् विनयाऽऽगतम् आज्ञालाभोन्मुखं नम्रं नरान्तकं न द्रक्ष्यति, (अतः) मे चक्षुः वृथा उन्मीलिष्यति ॥

व्याख्या—यत्=यस्मात्कारणात्, विनयागतं=विनीतम्, आज्ञालाभोन्मुखम्=आदेशप्राप्त्यर्थमूर्ध्वमुखं, नम्रं=नमनशीलं, नरान्तकं=तन्नामधेयं मत्सूनुं, न द्रक्ष्यति=नो विलोकयिष्यति अत इति शेषः। मे=मम, रावणस्येत्यर्थः। चक्षुः=नेत्रं, वृथा=व्यर्थं, निष्फलमिति भावः, उन्मीलिष्यति=उन्मीलितं भविष्यति ॥

व्युत्पत्तिः—यत्=यच्छब्दप्रतिरूपकमव्ययम् । आज्ञालाभोन्मुखम्=उत् (ऊर्ध्वम्) मुखं यस्य स उन्मुखः। आज्ञाया लाभे (विषये) उन्मुखस्तम्। नम्रं=“णम प्रह्वत्वे शब्दे” इति धातोः “नमिकम्पिस्म्यजसकमहिंसदीपो र” इति रप्रत्ययः। द्रक्ष्यति=“दृशिर् प्रेक्षणे” इति धातोर्लृट्। “सृजिदृशोर्झल्यमकिति” इत्यमागमः। उन्मीलिष्यति=उत्पूर्वकात् “मील (श्मील ष्माल) निमेषणे” इति धातोर्लृट् ॥

भाषाऽर्थः—जिस कारणसे कि विनयसे आए हुए, आज्ञालाभमें उन्मुख और नम्र नरान्तकको नहीं देखेगा इस कारणसे मेरा नेत्र व्यर्थ उन्मीलित होगा ॥ ८ ॥

धिङ्मां त्रिशिरसा नाऽहं सन्दर्शिष्येऽद्य यत् पुनः।
घानिष्यन्ते द्विषः केन तस्मिन् पञ्चत्वमागते ॥ ९ ॥

अन्वयः—यत् अद्य अहं पुनः त्रिशिरसा न सन्दर्शिष्ये, (तत्) मां धिक्। तस्मिन् पञ्चत्वम् आगते केन द्विषो घानिष्यन्ते ?

व्याख्या—यत्=यस्माद्धेतोः अद्य=अस्मिन्दिने, अहं=रावणः भूयः=पुनः, त्रिशिरसा=तन्नामकेन मत्पुत्रेण, न सन्दर्शिष्ये=न संद्रक्ष्ये न दृष्टो भविष्यामि, इति भावः। (तत्=तस्माद्धेतोः) मां=रावणं, धिक्। तस्मिन्=त्रिशि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रसि, पञ्चत्वम् = पञ्चभावम्, आगते = आयाते, मृत इति भावः। केन = अन्येन केन जनेन, द्विषः = शत्रवः, घानिष्यन्ते=हनिष्यन्ते, व्यापादयिष्यन्त इति भावः ॥

व्युत्पत्तिः—सन्दर्शिष्ये=संपूर्वकात् दृशिर्धातोः कर्मणि लृट्, "स्यसिच्सीयुट्तासिष्वि"त्यादिना चिण्वदिट् च। मां = धिक्पदेन योगे "धिगुपर्यादिषु त्रिषु" इति द्वितीया। द्विषः=द्विषन्तीति, "द्विष अप्रीतौ" इति धातोः "सत्सूद्विषे"त्यादिना क्विप्, सर्वाऽपहारी लोपः। घानिष्यन्ते=हनधातोः कर्मणि लृट्, चिण्वदिट् च ॥

भाषाऽर्थः—जिससे आज मैं फिर त्रिशिरासे नहीं देखा जाऊँगा, इस कारणसे मुझे धिक्कार है। उस (त्रिशिरा) के पञ्चत्वको प्राप्त होनेपर किससे शत्रु मारे जायेंगे ॥ ९ ॥

शत्रुभिर्निहते मत्ते द्रक्ष्येऽहं संयुगे सुखम् ।
युद्धोन्मत्ताद्विना शत्रून् समास्कन्त्स्यति को रणे ॥ १० ॥

अन्वयः—मत्ते शत्रुभिः निहते अहं संयुगे सुखं द्रक्ष्ये। रणे युद्धोन्मत्तात् विना शत्रून् कः समास्कन्त्स्यति ? ॥

व्याख्या—मत्ते = तन्नामके राक्षसे, शत्रुभिः = वैरिभिः, निहते = व्यापादिते, अहं=रावणः, संयुगे=संग्रामे, सुखं=सुखपूर्वकं, द्रक्ष्ये=दृष्टो भविष्यामि, पूर्वं भयाद् दृष्टः परं मत्तवधाऽनन्तरं तैरेव शत्रुभिर्निर्भयमहं दृष्टो भविष्यामीति भावः। रणे= संग्रामे, युद्धोन्मत्ताद्विना=तन्नामकराक्षसादृते, शत्रून्=रिपून्, कः = युद्धोन्मत्तात्कोऽपरो जनः, समास्कन्त्स्यति=अभियास्यति मत्तयुद्धोन्मत्तौ नाम देवान्तकादीनामात्मपुत्राणां रक्षणाऽर्थं रावणप्रेषितौ राक्षसौ बोध्यौ ॥

व्युत्पत्तिः—द्रक्ष्ये=दृशिर् धातोः कर्मणि लृट्, अचिण्वद्भावपक्षे रूपं, चिण्वद्भावपक्षे तु "दर्शिष्ये" इति रूपम्। युद्धोन्मत्तात्="विना"पदयोगे "पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्" इति पञ्चमी। समास्कन्त्स्यति = समाङ्पूर्वकात् "स्कन्दिर् गतिशोषणयोः" इति धातोर्लृट्, "खरि चे"ति चर्त्वम् ॥

भाषाऽर्थः—मत्तनामकराक्षसके शत्रुओंसे मारे जाने पर मैं संग्राममें शत्रुओंसे सुखपूर्वक देखा जाऊंगा। युद्धमें युद्धोन्मत्त राक्षसके विना शत्रुओंके पास कौन अभियान करेगा ॥ १० ॥

आह्वास्यते विशङ्को मां योत्स्यमानः शतक्रतुः ।
प्रकल्प्स्यति च तस्याऽर्थो निकुम्भे दुर्हणे हते ॥ ११ ॥

अन्वयः—शतक्रतुः योत्स्यमानः विशङ्कः मां युद्धाय आह्वास्यते। दुर्हणे निकुम्भे हते तस्य अर्थः प्रकल्प्स्यति च।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या:—शतक्रतुः=इन्द्रः, योत्स्यमानः=युद्धं करिष्यन्, विशङ्कः=शङ्का-रहितः, निर्भयः सन्निति भावः। मां=रावणं, युद्धाय=संग्रामाय, आह्वास्यते=आकारयिष्यति, दुर्हणे=दुःखेन व्यापाद्यमाने, निकुम्भे=कुम्भकर्णपुत्रे, हते=व्यापादिते सति, तस्य=इन्द्रस्य, अर्थः=प्रयोजनं, निष्कण्टकराज्यलक्षणमिति भावः। प्रकल्प्स्यति च=संपत्स्यते च॥

व्युत्पत्तिः—शतक्रतुः=शतं क्रतवो यस्य सः। योत्स्यमानः=योत्स्यत इति, "युध संप्रहारे" इति धातोः "लृटः सद्वा" इति शानच्प्रत्ययः। आह्वास्यते=आङ्पूर्वकात् "ह्वेञ् स्पर्धायां शब्दे चे"ति धातोः "स्पर्धायामाङः" इत्यात्मनेपदम्। दुर्हणे दुःखेन हन्यत इति दुर्हणस्तस्मिन्, "ईषद्दुःसुषु कृच्छ्राऽकृच्छ्राऽर्थेषु खल्" इति खल्प्रत्ययः "हन्ते" रिति णत्वमिति मल्लिनाथः। वस्तुतस्तु अत्र णत्वे कर्तव्ये "दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्य" इति वार्तिकेन दुर उपसर्गत्वप्रतिषेधात् "दुर्हण" इत्यत्र णत्वं प्रामादिकं प्रतीयते। प्रकल्प्स्यति=प्रपूर्वकात् "कृपू सामर्थ्ये" इति धातोर्लृट्, "कृपो रो लः" इति रेफस्य लत्वं; "लुटि च क्लृपः" इति परस्मैपदविकल्पः, अत एव "तासि च क्लृपः" इतीडागमप्रतिषेधः॥

भाषाऽर्थ—अब इन्द्र युद्ध करता हुआ निर्भय होकर मुझे युद्धके लिए ललकारेगा। दुःखसे मारे जाने वाले निकुम्भके मारे जानेपर इन्द्रका प्रयोजन भी संपन्न होगा॥ ११॥

कल्पिष्यते हरेः प्रीतिर्लङ्का चोपहनिष्यते।
आगंस्यते सुरैश्चेह रिपोर्यास्यामि वश्यताम्॥ १२॥

अन्वयः—हरेः प्रीतिः कल्पिष्यते। लङ्का च उपहनिष्यते। इह सुरैश्च आगंस्यते। रिपोः वश्यतां यास्यामि॥

व्याख्या—हरेः=इन्द्रस्य, प्रीतिः=हर्षः, कल्पिष्यत=भविष्यति, शत्रुकर्तृककुम्भनिपातनश्रवणेनेति शेषः। एवं च लङ्का च=तदाख्या अस्मन्नगरी च, उपहनिष्यते=विलोप्स्यते, शत्रुभिरिति शेषः। इह=लङ्कायां, सुरैश्च=देवैश्च, आगंस्यते=आयास्यते। परिणामे रिपोः=शत्रोः, वश्यताम्=अधीनतां, यास्यामि=प्राप्स्यामि॥

व्युत्पत्तिः—कल्पिष्यते=कृपूधातोर्लृट्, ऊदित्त्वात् "स्वरतिसूतिसूयतिधूञूदितो वे"ति इडागमो वैकल्पिकः। उपहनिष्यते=उपपूर्वकाद्धनधातोर्लृट्, अचिण्वद्भावपक्षे "ऋद्धनोः स्ये" इतीट्। अत्र तृतीयचरणत्वेन निर्णयसागरे वेङ्कटेश्वरे च मुद्रणाऽऽलये स्थितो "देवान्तक! त्वया त्यक्त" इत्याकारकः पाठो जयमङ्गलभरताभ्यामनभ्युपगतोऽस्ति। देवान्तको रावणस्याऽन्यतमः पुत्रः। आगंस्यते=आङ्पूर्वकाद्गम्लृधातोर्भावे लृट्। यास्यामि="या प्रापणे" इति धातोः कर्तरि लृट्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—कुम्भको मारे हुए जानकर इन्द्रको हर्ष होगा। शत्रुओंसे लङ्का नष्ट की जायगी। यहां देवतालोग आयंगे। मैं भी शत्रुओंका अधीन हो जाऊंगा॥

मरिष्यामि विजेष्ये वा हताश्चेत्तनया मम।
हनिष्यामि रिपूंस्तूर्णं न जीविष्यामि दुःखितः॥ १३॥

अन्वय—मम तनया हताः चेत्, मरिष्यामि वा विजेष्ये। रिपून् तूर्णं हनिष्यामि। दुःखितो न जीविष्यामि॥

व्याख्या—मम=रावणस्य, तनयाः=पुत्राः, देवान्तकादय इति शेषः। हताश्चेत्=व्यापादिता यदि, तर्हि मरिष्यामि=प्राणास्त्यक्ष्यामि, वा=अथवा, विजेष्ये=जेष्यामि, शत्रूनिति शेषः। ततो रिपून्=शत्रून्, तूर्णं=सत्वरं, हनिष्यामि=व्यापादयिष्यामि। दुःखितः=व्यथितः सन् बन्धुनाशादिति शेषः। न जीविष्यामि=प्राणान्नो धारयिष्यामि॥

व्युत्पत्तिः—तनयाः="आत्मजस्तनयः सूनुः सुतः पुत्रः" इत्यमरः। मरिष्यामि="मृङ प्राणत्यागे" इति धातोर्लृट्, "म्रियतेर्लुङ्लिङोश्चे"ति नियमादात्मनेपदम्। विजेष्ये=विपूर्वकात् "जि जये" इति धातोर्लृट् "विपराभ्यां जेः" इत्यात्मनेपदम्। जीविष्यामि="जीव प्राणधारणे" इति धातोर्लृट्॥

भाषाऽर्थः—मेरे पुत्र मारे गये तो मैं मरूंगा वा शत्रुओंको जीतूंगा। शत्रुओंको शीघ्र मार डालूंगा। बन्धुनाशसे दुःखित होकर नहीं जीऊंगा॥ १३॥

स्मेष्यन्ते मुनयो देवाः कथयिष्यन्ति चाऽनिशम्।
दशग्रीवस्य दुर्नीतेर्विनष्टं रक्षसां कुलम्॥ १४॥

अन्वयः—मुनयः स्मेष्यन्ते। देवाः "दशग्रीवस्य दुर्नीतेः रक्षसां कुलं विनष्टम्।" (इति) अनिशं कथयिष्यन्ति॥

व्याख्या—मुनयः=तापसाः, स्मेष्यन्ते=ईषद्धसिष्यन्ति, हर्षादिति शेषः। देवाः=सुराः, दशग्रीवस्य=रावणस्य, दुर्नीतेः=दुर्नयात्, रक्षसां=राक्षसानां, कुलं=वंशः, विनष्टं=विनाशं गतम, (इति=इत्थम्) अनिशं=निरन्तरं, कथयिष्यन्ति=वदिष्यन्ति॥

व्युत्पत्तिः—मुनय इति, "मन ज्ञाने" इति धातोः "मनेरुच्च" इतीनिः उत्वं च। स्मेष्यन्ते="ष्मिङ् ईषद्धसने"इति धातोर्लृट्। दशग्रीवस्य=दश ग्रीवा यस्य स दशग्रीवस्तस्य। दुर्नीतेः=दुष्टा नीतिर्दुर्नीतिस्तस्याः, "कुगतिप्रादय" इति समासः, "दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्य" इति दुर उपसर्गत्वप्रतिषेधाण्णत्वाऽभावः। कथयिष्यन्ति="कथ वाक्यप्रबन्ध" इति धातोर्लृट्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—मुनि लोग हर्षसे मुसकुरायंगे। देवगण "रावणकी दुर्नीतिसे राक्षसोंका कुल विनष्ट हो गया।" ऐसा निरन्तर कहेंगे ॥ १४ ॥

केन सम्भावितं तात कुम्भकर्णस्य राघवः।
रणे कर्त्स्यति गात्राणि मर्माणि च वितर्त्स्यति ॥ १५ ॥

अन्वयः—हे तात! "राघवो रणे कुम्भकर्णस्य गात्राणि कर्त्स्यति मर्माणि च वितर्त्स्यति" (एतत्) केन सम्भावितम् ?

व्याख्या—हे तात = हे पितः, शोकाद् बुद्धिस्थस्य पितुरभिमुखीकरणाऽर्थमियमुक्तिः। राघवः = रामः, रणे = युद्धे, कुम्भकर्णस्य = मन्मध्यमभ्रातुः, गात्राणि = अङ्गानि, रूढिमत्या लक्षणयाऽयमर्थः। कर्त्स्यति = छेत्स्यति, मर्माणि च = मर्मस्थानानि च, वितर्त्स्यति = हिंसिष्यति, (एतत् = व्यापादनम्) केन = जनेन, सम्भावितं = निश्चितम् ॥

व्युत्पत्तिः—राघवः = रघोरपत्यं पुमान्, "तस्याऽपत्यम्" इत्यण्, "ओर्गुण" इत्युवर्णस्य गुणश्च। गात्राणि = "गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः।" इत्यमरः। कर्त्स्यति = "कृती छेदने" इति धातोर्लृट्, "सेऽसिचि कृतचृतछृदतृदनृत" इत्यनेन इटो वैकल्पिकत्वात्पक्षे तदभावः। वितर्त्स्यति = विपूर्वकात् "उतृदिर् हिंसाऽनादरयोः" इति धातोर्लृट् पूर्वसूत्रेण इड्विकल्पः।

भाषाऽर्थः—हे पिताजी! "रामचन्द्र युद्धमें कुम्भकर्णके शरीराऽवयवोंको काटेगा और मर्मस्थानोंकी हिंसा भी करेगा" यह किसने निश्चय किया था ? ॥१५॥

पतिष्यति क्षितौ भानुः पृथिवी तोलयिष्यते।
नभस्वान् भङ्क्ष्यते व्योम मुष्टिभिस्ताडयिष्यते ॥ १६ ॥

अन्वयः—भानुः क्षितौ पतिष्यति। पृथिवी तोलयिष्यते। नभस्वान् भङ्क्ष्यते। व्योम मुष्टिभिः ताडयिष्यते ॥

व्याख्या—भानुः = सूर्यः, क्षितौ = भूमौ, पतिष्यति = अधोगमिष्यति। पृथिवी = भूमिः, तोलयिष्यते = ऊर्ध्वं क्षेप्स्यते। नभस्वान् = वायुः, भङ्क्ष्यते = भग्नः करिष्यते, काष्ठवदिति शेषः, व्योम = आकाशं, मुष्टिभिः = संपिण्डिताऽङ्गुलिपाणिभिः, ताडयिष्यते = हनिष्यते, "कुम्भकर्णः ''' पुंसा ''' परिभविष्यते" एतानि न सम्भावितानि ...." इत्यष्टादशश्लोकस्थैः पदैः सम्बन्धः। एवं श्लोकान्तरेऽपि ज्ञेयः। यथा सर्वाण्येतान्यसम्भाव्यानि तथैव रामकर्तृकं कुम्भकर्णहननमपि नैव सम्भाव्यं परं दुर्नियतिवशात्तदेव संवृत्तमिति भावः ॥

व्युत्पत्तिः—तोलयिष्यते = "तुल उन्माने" इति धातुश्चुरादावदन्तेषु च पठ्यते,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मात् कर्मणि लृट् । भङ्क्ष्यते="भञ्जो आमर्दने" इति धातोः कर्मणि लृट् । ताडयिष्यते="तड आघाते" इति चौरादिकधातोः कर्मणि लृट् ॥

भाषाऽर्थः—सूर्य जमीनपर गिरेगा । पृथिवी ऊपर फेंकी जायगी । वायु लकड़ी के सदृश तोड़ा जायगा । आकाश मुक्कोंसे पीटा जायगा ॥ १६ ॥

इन्दोः स्यन्दिष्यते वह्निः समुच्छोष्यति सागरः ।
जलं धक्ष्यति तिग्मांशोः स्यन्त्स्यन्ति तमसां चयाः ॥ १७ ॥

अन्वयः—इन्दोः वह्निः स्यन्दिष्यते । सागरः समुच्छोष्यति । जलं धक्ष्यति । तिग्मांऽशोः तमसां चयाः स्यन्त्स्यन्ति ॥

व्याख्या—इन्दोः=चन्द्रात्, वह्निः=अग्निः, स्यन्दिष्यते=प्रस्रविष्यति । सागरः=समुद्रः समुच्छोष्यति=शोषं यास्यति । जलं=तोयं धक्ष्यति=दाहं करिष्यति । तिग्मांशोः=सूर्यात्, तमसाम्=अन्धकाराणां, चयाः=समूहाः, स्यन्त्स्यन्ति=क्षरिष्यन्ति एतानि नैव सम्भावितानीति भावः ॥

व्युत्पत्तिः—स्यन्दिष्यते="स्यन्दू प्रस्रवणे" इति धातोर्लृट् "वृद्भ्यः स्यसनोः" इति परस्मैपदस्य वैकल्पिकत्वात्पक्षे तदभावः । समुच्छोष्यति=समुत्पूर्वकात् "शुष शोषणे" इति धातोर्लृट् । धक्ष्यति="दह भस्मीकरण" इति धातोर्लृट्, यत्तु "हो ढ" इति हस्य ढत्वमिति जयमङ्गलस्तन्न, "दादेर्धातोर्घः" इति ढत्वाऽपवादन्न घत्वस्य विधानात् । तत्र "एकाचो बशो भष् झषन्तस्य स्ध्वोः" इति भष्भावेन दकारस्य धकारे तस्य "खरि च"ेति चर्त्वम् । तिग्मांऽशोः=तिग्मा अंशवो यस्य स तिग्मांऽशुस्तस्य । स्यन्त्स्यन्ति=स्यन्दूधातोर्लृट् "वृद्भ्यः स्यसनोः" इति परस्मैपदविकल्पः "न वृद्भ्यश्चतुर्भ्यः" इतीट्प्रतिषेधः ॥

भाषाऽर्थः—चन्द्रसे अग्नि बहेगा । समुद्र सूख जायगा । जल दाह करेगा । सूर्यसे अन्धकारसमूह बहेंगे ॥ १७ ॥

कुम्भकर्णो रणे पुंसा क्रुद्धः परिभविष्यते ।
संभावितानि नैतानि कदाचित्केनचिज्जने ॥ १८ ॥

अन्वयः—कुम्भकर्णो रणे क्रुद्धः (सन्) पुंसा परिभविष्यते । एतानि जने केनचित् कदाचित् न सम्भावितानि ॥

व्याख्या—कुम्भकर्णः=मन्मध्यमभ्राता, रणे=युद्धे, क्रुद्धः=कुपितः सन्, पुंसा=मनुष्येण, परिभविष्यते=जेष्यते । एतानि=भानुपतनादीनि कुम्भकर्णपरिभवाऽन्तानि, जने=लोके, केनचित्=पुरुषेण, कदाचित्=जातुचित्, न सम्भावितानि=न चिन्तितानि ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—परिभविष्यते = परिपूर्वकात् "भू सत्तायाम्" इति धातोः कर्मणि लृट्। तत्र भानुपतनादेः कुम्भकर्णपरिभवेन साऽश्यासेपान्निदर्शनालङ्कारः॥

भाषाऽर्थः—कुम्भकर्ण युद्धमें कुपित होता हुआ मनुष्यसे जीता जायगा। ये (सूर्य-पतनसे लेकर कुम्भकर्णपराजयपर्यन्त विषय) लोकमें किसी से कभी भी सम्भावित नहीं हुए थे॥ १८॥

कुम्भकर्णे हते लङ्कामरोक्ष्यन्ति प्लवङ्गमाः।
दङ्क्ष्यन्ति राक्षसान् दृप्ता भङ्क्ष्यन्ति च ममाश्रमान्॥१९॥

अन्वयः—कुम्भकर्णे हते प्लवङ्गमा लङ्काम् आरोक्ष्यन्ति, राक्षसान् दङ्क्ष्यन्ति दृप्ताः (सन्तः) मम आश्रमांश्च भङ्क्ष्यन्ति॥

व्याख्या—कुम्भकर्णे = मन्मध्यमभ्रातरि, हते = व्यापादिते सति, प्लवङ्गमाः = वानराः, लङ्कां = मन्नगरीम्, आरोक्ष्यन्ति = आक्रमिष्यन्ति, राक्षसान् = यातुधानान्, दङ्क्ष्यन्ति = दशनैः छेत्स्यन्ति, दृप्ताः = दर्पयुक्ताः सन्तः, मम = रावणस्य, आश्रमांश्च = सौधांश्चेत्यर्थः, भङ्क्ष्यन्ति = चूर्णयिष्यन्ति॥

व्युत्पत्तिः—आरोक्ष्यन्ति = आङ्पूर्वकात् "रुह बीजजन्मनि प्रादुर्भावे चे"ति धातोर्लृट्। दङ्क्ष्यन्ति = "दंश दशने" इति धातोर्लृट्, दशनं दंष्ट्राव्यापारः। पृषोदरादित्वादनुनासिकलोपः। भङ्क्ष्यन्ति = "भञ्जो आमर्दने" इति धातोर्लृट्॥

भाषाऽर्थः—कुम्भकर्णके मारे जानेपर वानर लङ्कामें आक्रमण करेंगे; राक्षसों को दाढोंसे नोचेंगे, गर्वयुक्त होते हुए मेरे भवनोंको भी चूर्ण कर डालेंगे॥ १९॥

चर्त्स्यन्ति बालवृद्धांश्च नर्त्स्यन्ति च मुदा युताः।
तेन राक्षसमुख्येन विना तान् को निरोत्स्यति॥ २०॥

अन्वयः—(प्लवङ्गमाः) बालवृद्धान् चर्त्स्यन्ति, मुदा युता नर्त्स्यन्ति च। तेन राक्षसमुख्येन विना तान् को निरोत्स्यति ?

व्याख्या—बालवृद्धान् = शिशून् जरठांश्च राक्षसान्, चर्त्स्यन्ति=व्यापादयिष्यन्ति, प्लवङ्गमा इति शेषः, एवं परवाक्येऽपि। मुदा = हर्षेण, युताः=सम्बद्धाः सन्तः, नर्त्स्यन्ति च = नृत्यं च करिष्यन्ति। तेन = कुम्भकर्णेन, राक्षसमुख्येन विना= राक्षसप्रवरेण विना, तान् = प्लवङ्गमान्, को निरोत्स्यति=को निवारयिष्यति॥

व्युत्पत्तिः—चर्त्स्यन्ति="चृती हिंसाग्रन्थनयोः" इति तौदादिकाद्धातोर्लृट्, "सेऽसिचि कृतचृतछृदतृदनृत" इति विकल्पेनेडागमः। तदभावे चर्तिष्यन्ति। नर्त्स्यन्ति="नृती गात्रविक्षेपे" इति धातोर्लृट्, पूर्वसूत्रेण विकल्पेनेडागमस्तदभावपक्षे नर्तिष्यन्तीति रूपम्। राक्षसमुख्येन = "विना" पदयोगे "पृथग्विनानानाभिस्तृती

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

याऽन्यतरस्याम्' इति तृतीया, पक्षे द्वितीया पञ्चमी च। निरोत्स्यति=निपूर्वकात् "रुधिर् आवरण" इति धातोर्लृट्॥

भाषाऽर्थः—वानर, बालक और बुड्ढे राक्षसोंको भी मार डालेंगे, हर्षयुक्त होते हुए नाचेंगे भी। उस श्रेष्ठ राक्षस (कुम्भकर्ण) के बिना उन्हें कौन रोकेगा? ॥२०॥

अमर्षो मे परः सीतां राघवः कामयिष्यते।
च्युतराज्यात्सुखं तस्मात्किंकिलाऽसाववाप्स्यति ॥ २१ ॥

अन्वयः—(हन्त!) मे परः अमर्षः। राघवः सीतां कामयिष्यते। असौ च्युतराज्यात्तस्मात् किंकिल सुखम् अवाप्स्यति?

व्याख्या—मे=मम, रावणस्येत्यर्थः। परः=उत्कृष्टः, अमर्षः=अक्षमा, कोपो वा। अमर्षहेतुं प्रतिपादयति=सीतामिति। यत् राघवः=रामः, सीतां=जानकीं कामयिष्यते=एषिष्यति। असौ=सीता, च्युतराज्यात्=राज्यभ्रष्टात्, तस्मात्=रामात्, किंकिल=किं नाम, किङ्किलेति समुदायः क्रोधद्योतक उपपदम्। सुखं=प्रमोदम्, अवाप्स्यति=प्राप्स्यति, तन्न सम्भावयामीति भावः॥

व्युत्पत्तिः—कामयिष्यते="कमु कान्तौ" इति धातोर्णिङन्तात् "अनवक्लृप्त्य-मर्षयोरकिंवृत्तेऽपि" इति अमर्षे (क्रोधे अक्षमायां वा) लृट्। च्युतराज्यात्=च्युतं राज्यं यस्मात्स च्युतराज्यस्तस्मात्, "निष्ठे"ति निष्ठाऽन्तस्य पूर्वनिपातः। अवाप्स्य-ति=अवपूर्वकात् "आप्लृ व्याप्तौ" इति धातोः "किङ्किलाऽस्त्यर्थेषु लृट्" इति अन-वक्लृप्तौ (असम्भावनायाम्) किङ्किलशब्द उपपदे लृट्॥

भाषाऽर्थः—मुझे अतिशय क्रोध है, जो कि रामचन्द्र सीताकी इच्छा करेगा। सीता राज्यभ्रष्ट उस (राम) से क्या सुख पायेगी? ॥ २१ ॥

मारयिष्यामि वैदेहीं खादयिष्यामि राक्षसैः।
भूमौ वा निखनिष्यामि विध्वंसस्याऽस्य कारणम् ॥ २२ ॥

अन्वयः—अस्य विध्वंसस्य कारणं वैदेहीं मारयिष्यामि, राक्षसैः खादयिष्यामि, वा भूमौ निखनिष्यामि॥

व्याख्या—अथ वा अस्य=सम्प्रति संवृत्तस्य, विध्वंसस्य=विनाशस्य, कार-णं=हेतुं, वैदेहीं=सीतां, मारयिष्यामि=हनिष्यामि, राक्षसैः=यातुधानैः, खाद-यिष्यामि=भोजयिष्यामि, वा=अथ वा भूमौ=भुवि, निखनिष्यामि=अवदारयिष्यामि, गर्ते स्थापयिष्यामि इति भावः॥

व्युत्पत्तिः—विध्वंसस्य=विशिष्टो ध्वंसो विध्वंसस्तस्य "कुगतिप्रादय" इति समासः। मारयिष्यामि="मृङ् प्राणत्यागे" इति धातोर्णौ लृट्। राक्षसैः=प्रत्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वसानाऽर्थस्य खादधातोर्योगे "गतिबुद्धिप्रत्यवसानाऽर्थशब्दकर्माऽकर्मकाणामणि कर्ता सणौ" इति कर्मसंज्ञायां प्राप्तायाम् "आदिखाद्योर्ने"ति निषेधात् अनभिहिते प्रयोज्यकर्तरि "कर्तृकरणयोस्तृतीये"ति तृतीया। खादयिष्यामि="खाद भक्षणे" इति धातोर्णौ लृट्। निखनिष्यामि=निपूर्वात् "खनु अवदारण" इति धातोर्लृट् ॥

भाषाऽर्थः—इस विनाशकी हेतुभूत सीताको मार डालूंगा, राक्षसोंको खिलाऊंगा अथवा जमीनको खोद कर उसके भीतर डाल दूंगा ॥ २२ ॥

नाऽनुरोत्स्ये जगल्लक्ष्मीं घटिष्ये जीवितुं न वा ।
न रंस्ये विषयैः शून्ये भवने बान्धवैरहम् ॥ २३ ॥

अन्वयः—जगल्लक्ष्मीं न अनुरोत्स्ये। जीवितुं वा न घटिष्ये। अहं बान्धवैः शून्ये भवने विषयैः न रंस्ये ॥

व्याख्या—जगल्लक्ष्मीं=लोकश्रियं, न अनुरोत्स्ये=न कामयिष्ये, जीवितुं वा=प्राणान्धारयितुं वा, न घटिष्ये=प्रयत्नं नो करिष्यामि। अहं=रावणः, बान्धवैः=बन्धुभिः, शून्ये=रहिते, भवने=सौधे, विषयैः=शब्दस्पर्शादिभिरिन्द्रियाऽर्थैः, न रंस्ये=न क्रीडिष्यामि ॥

व्युत्पत्तिः—अनुरोत्स्ये=अनुपूर्वकात् "रुधिर् आवरण" इति धातोर्लृट्, अनुपूर्वको रुधिरिच्छायां यथाऽऽह भट्टमल्लः आख्यातचन्द्रिकायां "लिप्सते हर्यतीच्छायां स्वटस्यथानुरुध्यते।" इति घटिष्ये="घट चेष्टायाम्" इति धातोर्लृट्, शून्ये=शुने हितं शून्यं, तस्मिन्, "शुनः सम्प्रसारणं वा च दीर्घत्वम्" इति सम्प्रसारणसहकृतो यत्प्रत्ययः, दीर्घत्वस्य वैकल्पिकत्वात्पक्षे शुन्यमिति ह्रस्वत्वमपि। "शून्यं तु वशिकं तुच्छरिक्तके।" इत्यमरः। रंस्ये="रमु क्रीडायाम्" इति धातोर्लृट्, "नश्चाऽपदान्तस्य झलि" इत्यनुस्वारः ॥

भाषाऽर्थः—मैं लोककी लक्ष्मीकी भी इच्छा नहीं करूंगा। जीनेके लिए भी प्रयत्न नहीं करूंगा। मैं बान्धवोंसे शून्य भवनमें शब्द, स्पर्श आदि विषयोंसे क्रीडा नहीं करूंगा ॥ २३ ॥

मोदिष्ये कस्य सौख्येऽहं को मे मोदिष्यते सुखे ।
आदेयाः किंकृते भोगाः कुम्भकर्ण ! त्वया विना ॥ २४ ॥

अन्वयः—हे कुम्भकर्ण ! त्वया विना कस्य सौख्ये अहं मोदिष्ये ? को मे सुखे मोदिष्यते ? किंकृते भोगा आदेयाः ?

व्याख्या—हे कुम्भकर्ण=हे मन्मध्यमाऽनुज !, त्वया विना=त्वां विना, कस्य=अपरस्य जनस्य, सौख्ये=सुखे, अहं=रावणः, मोदिष्ये=हर्षिष्ये, न कस्यचिदिति भावः। कः=जनः, मे=मम, सुखे=हर्षे सति, मोदिष्यते=हृष्टो भवि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ष्यति, न कश्चिदपीति भावः । किंकृते = किं निमित्तं, भोगाः = परभोगाः, आदेयाः = आदातव्याः, मयेति शेषः ॥

व्युत्पत्तिः—सौख्ये = सुखमस्याऽस्तीति सुखः, "अर्शआदिभ्योऽच्" इत्यच्प्रत्ययः । सुखस्य भावः सौख्यं, तस्मिन् । "गुणवचनब्राह्मणादिभ्यः कर्मणि चे"ति ष्यञ् । मोदिष्ये = "मुद हर्षे" इति धातोर्लृट् । किंकृतं = कृते इति निमित्ताऽर्थकमव्ययम् । कस्य कृते । आदेयाः = आदातुं योग्याः, आङ्पूर्वकात् "डुदाञ् दाने" इति धातोः "अचो यत्" इति यत् "ईद्यति" इत्यात ईत्वं गुणश्च ॥

भावाऽर्थः—हे कुम्भकर्ण ! तुम्हारे विना किसके सुखमें मैं हर्ष मानूंगा ? कौन मेरे सुखमें हर्ष मानेगा ? अब किसके लिए दूसरोंके भोग मुझे लेने चाहिए ? ॥२४॥

याः सुहृत्सु विपन्नेषु मामुपैष्यन्ति संपदः ।
ताः किं मन्युक्षताऽऽभोगा न विपत्सु विपत्तयः ॥ २५ ॥

अन्वयः—सुहृत्सु विपन्नेषु याः संपदो माम् उपैष्यन्ति, ता मन्युक्षताऽऽभोगाः (सत्यः) किं विपत्सु न विपत्तयः ?

व्याख्या—सुहृत्सु = स्निग्धेषु, विपन्नेषु=विपत्तिं प्राप्तेषु, याः, सम्पदः = विभूतयः, मां=रावणम्, उपैष्यन्ति=उपागमिष्यन्ति, ताः=सम्पदः, मन्युक्षताऽऽभोगाः= शोकखण्डितविस्ताराः सत्यः, किं, विपत्सु = विपत्तिषु मध्ये न विपत्तयः = नो विपदः ? तत्तुल्यसंस्थानीया भवन्तीति भावः ॥

व्युत्पत्तिः—उपैष्यन्ति = उपाङ्पूर्वकात् "इण् गतौ" इति धातोर्लृट् । मन्युक्षताऽऽभोगाः=मन्युना क्षता आभोगा यासां ताः, 'आभोगः परिपूर्णता" इत्यमरः ॥

भावाऽर्थः—स्निग्धोंके विपद्ग्रस्त होने पर जो संपत्तियां मेरे पास आयेंगी, वे शोकसे खण्डित विस्तार वाली होती हुई क्या विपत्तियोंके मध्यमें विपत्तिस्वरूप नहीं हैं ? ॥ २५ ॥

विनङ्क्ष्यति पुरी क्षिप्रं तूर्णमेष्यन्ति वानराः ।
असन्धित्सोस्तवेत्येतद्विभीषणसुभाषितम् ॥ २६ ॥

अन्वयः—"असन्धित्सोः तव पुरी क्षिप्रं विनङ्क्ष्यति । वानराः तूर्णम् एष्यन्ति ।" इत्येतत् विभीषणसुभाषितम् ॥

व्याख्या—"असन्धित्सोः=सन्धानमनिच्छोः, रामेणेति शेषः । तव = भवतः, पुरी=नगरी, लङ्केत्यर्थः । क्षिप्रं=सत्वरं, विनङ्क्ष्यति = विनाशमेष्यति । वानराः = कपयः, तूर्णं=सत्वरम्, एष्यन्ति = आगमिष्यन्ति ।" इत्येतत् = इत्याकारकं वचनं, विभीषणसुभाषितं = मदनुजसुवचनम्, आसीदिति शेषः । तच्च विभीषणवचनं— "सन्धानमेवाऽस्तु परेण तस्मात्" (१२-५४) इत्याकारकं बोध्यम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

व्युत्पत्तिः—असन्धित्सोः—सन्धातुमिच्छुः सन्धित्सुः, न सन्धित्सुः असन्धित्सुस्तस्य "सनाशंसभिक्ष उः" इत्युप्रत्ययः। विनङ्क्ष्यति = विपूर्वकात् "णश अदर्शने" इति धातोः "क्षिप्रवचने लृट्" इति लृट् "मस्जिनशोर्झलि" इति नुम्। एष्यति = पूर्वसूत्रेणैव लृट्, तत्र क्षिप्रपर्याये तूर्णस्याऽपि ग्रहणात् ॥

भाषाऽर्थः—'सन्धिकी इच्छा न करने वाले आपकी पुरी (लङ्का) शीघ्र विनष्ट हो जायगी। वानर सत्वर आजायंगे ऐसा विभीषणका सुभाषित था ॥ २६ ॥

अर्थेन संभृता राज्ञा न भाषिष्यामहे वयम्।
संयोत्स्यामह इत्येतत्प्रहस्तेन च भाषितम् ॥ २७ ॥

अन्वयः—"राज्ञा अर्थेन संभृता वयं न भाषिष्यामहे, संयोत्स्यामहे।" इत्येतत् प्रहस्तेन च भाषितम् ॥

व्याख्या—"राज्ञा = भूपेन, रावणेनेत्यर्थः, अर्थेन = धनेन, संभृताः = पोषिताः, वयम् = अनुचराः, न भाषिष्यामहे = नो वक्ष्यामः, सन्धिमिति शेषः। संयोत्स्यामहे = युद्धं करिष्यामः," इत्येतत् = इत्याकारकं वचनं, प्रहस्तेन च = तन्नामकेन मन्त्रिणा च, भाषितं = कथितम् ? यद्यपि मन्त्रनिर्णये प्रहस्तेनेदृशं वचनं नोक्तं तथाऽपि विभीषणवचनं तेनाऽङ्गीकृतमित्यनुमीयते ॥

व्युत्पत्तिः—भाषिष्यामहे="भाष व्यक्तायां वाची"ति धातोर्लृट्। संयोत्स्यामहे=संपूर्वकात् "युध सम्प्रहारे" इति धातोर्लृट् ॥

भाषाऽर्थः—"महाराज (रावण) से धनसे पोसे गये हम लोग सन्धिकी बात नहीं करेंगे किन्तु युद्ध करेंगे" ऐसा वचन प्रहस्तने भी कहा था ॥ २७ ॥

मानुषो नाम पत्काषी राजानं पुरुषाऽशिनाम्।
योधयिष्यति संग्रामे दिव्याऽस्त्ररथदुर्जयम् ॥ २८ ॥

अन्वयः—मानुषः पत्काषी सग्रामे दिव्याऽस्त्ररथदुर्जयं पुरुषाशिनां राजानं योधयिष्यति नाम ॥

व्याख्या—मानुषः = मनुष्यः, राम इति भावः, सोऽपि—पत्काषी = पदातिः सन्, संग्रामे=युद्धे, दिव्याऽस्त्ररथदुर्जयम्=अलौकिकाऽऽयुधस्यन्दनदुरभिभवनीयं, पुरुषाशिनां = नरभक्षकाणां, राक्षसानामित्यर्थः। राजानं = भूपं, मामिति भावः। योधयिष्यति = युद्धं करिष्यति, नाम = कुत्सितमित्यर्थः ॥

व्युत्पत्तिः—मानुषः = मनोरपत्यं पुमान्, "मनोर्जातावञ्यतौ षुक् चे"ति अञ्प्रत्ययः षुगागमश्च। "मनुष्या मानुषा मर्त्या मनुजा मानवा नराः।" इत्यमरः। पत्काषी=पादौ कषतीति तच्छीलः, पादोपपदपूर्वकात् हिंसाऽर्थात् कषधातोः "सुप्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जातौ णिनिस्ताच्छील्य" इति णिनिप्रत्ययः "हिमकाषिहतिषु चे"ति पादस्य पद्भावः। दिव्याऽस्त्ररथदुर्जयं=अस्त्राणि च रथाश्चेति अस्त्ररथं, "द्वन्द्वश्च प्राणितूर्यसेनाऽङ्गानाम्" इति सेनाऽङ्गत्वात्समहारद्वन्द्वः। दिवि भवं दिव्यं, "द्युप्रागपागुदक्प्रतीचो यत्" इति यत्। दिव्यं च तत् अस्त्ररथं दिव्याऽस्त्ररथम्। दुःखेन जेतुं शक्यो दुर्जयः, "ईषद्दुःसुषु कृच्छ्राऽकृच्छ्राऽर्थेषु खल्" इति खल्। दिव्याऽस्त्ररथेन दुर्जयो दिव्याऽस्त्ररथदुर्जयस्तम्। पुरुषाऽशिनां=पुरुषान् अश्नन्तीति तच्छीलाः पुरुषाशिनस्तेषां, णिनिप्रत्ययः। योधयिष्यति=णिजन्तात् युधधातोर्लृट्। नाम="नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने।" इत्यमरः॥

भाषाऽर्थः—मनुष्य, उसपर भी पैदल (रामचन्द्र) संग्राममें दिव्य अस्त्र और रथों से दुर्जय राक्षसराज (मुझ) को लड़ायेगा। यह कुत्सित बात है॥ २८॥

सन्नत्स्याम्यथवा योद्धुं न कोष्ये सत्त्वहीनवत्।
अद्य तर्प्स्यन्ति मांसाऽदा भूः पास्यत्यरिशोणितम्॥ २६॥

अन्वयः—अथवा योद्धुं सन्नत्स्यामि। सत्त्वहीनवत् न कोष्ये। अद्य मांसादाः तर्प्स्यन्ति। भूः अरिशोणितं पास्यति॥

व्याख्या—अथवा=पक्षाऽन्तरे, योद्धुं=युद्धं कर्तुं, सन्नत्स्यामि=सन्नद्धो भविष्यामि। सत्त्वहीनवत्=बलहीनवत्, न कोष्ये=न रोदिष्यामि। ततश्च अद्य=अस्मिन्नहनि, मांसादाः=क्रव्यादाः, गृध्रादय इत्यर्थः, तर्प्स्यन्ति=तृप्ता भविष्यन्ति। एवं च—भूः—पृथिवी, अरिशोणितं=शत्रुरुधिरं, पास्यति=धास्यति।

व्युत्पत्तिः—सन्नत्स्यामि=संपूर्वकात् "णह बन्धने" इति धातोरमर्षे लृटि स्यप्रत्ययः। "णो नः" इति णस्य नत्वं, 'नहो ध' इति हस्य धत्वम्। "खरि चे"ति चर्त्वम्। सत्त्वहीनवत=सत्त्वेन हीनः सत्त्वहीनस्तेन तुल्यं, "तेन तुल्यं क्रिया चेद्वतिः" इति वतिप्रत्ययः। कोष्ये="कु शब्दे" इति धातोर्लृट। मांसादाः=मांसमदन्तीति, "अदोऽनन्ने" इति विटि प्राप्ते "वाऽसरूपोऽस्त्रियाम्" इति न्यायेन "कर्मण्यण्" इत्यणपि। तर्प्स्यन्ति="तृप प्रीणन" इति धातोर्लृट्। इट् पक्षे "तर्पिष्यन्ती" त्यपि। "अनुदात्तस्य चर्दुपधस्याऽन्यतरस्याम्" इत्यमागमविकल्पे-"त्रप्स्यन्ती"त्यपि रूपम्। पास्यति="पा पाने" इति धातोश्चित्रीकरणे गम्ये "शेषे लृडयदौ" इति लृट्॥

भाषाऽर्थः—अथवा लड़नेके लिए सन्नद्ध हूँगा। बलहीनके सदृश नहीं रोऊंगा। आज मांस खानेवाले (गृध्र आदि) तृप्त होंगे। पृथ्वी शत्रुओंके रुधिरको पीयेगी॥ २९॥

आकर्ष्यामि यशः शत्रूनपनेष्यामि कर्मणा।
अनुभाविष्यते शोको मैथिल्याऽद्य पतिक्षयात्॥ ३०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—यश आकर्ष्यामि । कर्मणा शत्रून् अपनेष्यामि । अद्य पतिक्षयात् मैथिल्या शोकः अनुभाविष्यते ॥

व्याख्या—यशः = कीर्तिं, सर्वयोद्धृणामिति शेषः । आकर्ष्यामि = हरिष्यामि, कर्मणा=क्रियया, युद्धरूपस्येति भावः । शत्रून्=रिपून् , अपनेष्यामि=दूरीकरिष्यामि, "अपचेष्यामी"ति पाठे न्यूनयिष्यामीत्यर्थः । अथ = अस्मिन्दिने, पतिक्षयात् = भर्तृविनाशात् , मत्कर्तृकरामवधादिति भावः । मैथिल्या = सीतया, शोकः = मन्युः, अनुभाविष्यते = अनुभविष्यते-अनुभूतः करिष्यते, इति भावः । अद्य रामं हनिष्यामीति भावः ।

व्युत्पत्तिः—आकर्ष्यामि = आङ्पूर्वकात् "कृष विलेखने" इति धातोर्लृट्, विलेखनमिहाकर्षणम् । अनुदात्तस्य "चर्दुपधस्याऽन्यतरस्याम्" इत्यम्विकल्पपक्षे "आक्रक्ष्यामी"ति रूपम् । अपनेष्यामि = अपपूर्वकात् "णीञ प्रापण" इति धातोर्लृट् । पतिक्षयात् = पत्युः क्षयस्तस्मात् । हेतौ पञ्चमी, अनुभाविष्यते = अनुपूर्वकात् भूधातोः कर्मणिलृट् "स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च"ति चिण्वदिट् ॥

भाषाऽर्थः—सब योद्धाओंके यशका हरण करूंगा । कर्मसे शत्रुओंको हटाऊंगा । आज पति (राम) के नाशसे सीतासे शोकका अनुभव किया जायगा ॥

मन्तूयिष्यति यक्षेन्द्रो वल्गूयिष्यति नो यमः ।
ग्लास्यन्त्यपतिपुत्राश्च वने वानरयोषितः ॥ ३१ ॥

अन्वयः—यक्षेन्द्रो मन्तूयिष्यति । यमो नो वल्गूयिष्यति । वने वानरयोषितश्च अपतिपुत्रा (सत्यः) ग्लास्यन्ति ॥

व्याख्या—यक्षेन्द्रः = कुबेरः, मन्तूयिष्यति = दुर्मना भविष्यति रामवधेनेति भावः । यमः = यमराजः, नो वल्गूयिष्यति = हृष्टमना न भविष्यति । नो पूजयिष्यतीति मल्लिनाथसम्मतोऽर्थः । वने = अरण्ये, वानरयोषितश्च = मर्कटस्त्रियश्च, अपतिपुत्राः = पतिपुत्ररहिताः सत्यः, ग्लास्यन्ति = ग्लानिं यास्यन्ति ॥

व्युत्पत्तिः—यक्षेन्द्रः=यक्षाणामिन्द्रः, "कुवेरस्त्र्यम्बकसखो यक्षराड्गुह्यकेश्वरः ।" इत्यमरः । मन्तूयिष्यति = कण्ड्वादीनां धातुत्वेन प्रातिपदिकत्वेन च द्वैविध्यात् "कण्ड्वादिभ्यो यक्" इति यगन्तान्मन्तुशब्दाल्लृट् । "मन्तु अपराधे, रोष इत्येके" इति कण्ड्वादिपाठे यद्यपि दौर्मनस्यरूपाऽर्थस्य न प्राप्तिस्तथाऽपि धातूपसर्गाणामनेकाऽर्थत्वादयमर्थः प्रकरणाऽनुरूपष्टीकाकृत्सम्मतः, चान्द्रे व्याकरणे "मन्तुञ रोषणवैमनस्ययोरपराधे च"ति दर्शनाद्व्याकरणाऽन्तरसम्मतश्चेति सर्वं निरवद्यम् । मल्लिनाथमते तु "कोपिष्यतीत्यर्थः । वल्गूयिष्यति=अत्रापि पूर्ववद्यगन्ताद्वल्गुशब्दाल्लृट् ।"

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"वल्गु पूजामाधुर्ययोः" इति कण्ड्वादिधातुः=ग्लास्यन्ति="ग्लै (म्लै) हर्षक्षये" इति धातोर्लृट् । "आदेच उपदेशेऽशिति" इत्यात्वम् ॥

भाषाऽर्थः—रामका वध सुनकर कुबेर दुर्मना होगा । यमराजभी प्रसन्नचित्त नहीं होगा । वनमें वानरस्त्रियाँ भी पति और पुत्रों से रहित होती हुई ग्लानियुक्त हो जायँगी ॥ ३१ ॥

सुखं स्वप्स्यन्ति रक्षांसि भ्रमिष्यन्ति च निर्भयम् ।
न विक्रोक्ष्यन्ति राक्षस्यो नरांश्चाऽत्स्यन्ति हर्षिताः ॥ ३२ ॥

अन्वयः—रक्षांसि सुखं स्वप्स्यन्ति, निर्भयं भ्रमिष्यन्ति च। राक्षस्यो न विक्रोक्ष्यन्ति हर्षिताः (सत्यः) नरान् अत्स्यन्ति च ॥

व्याख्या—रक्षांसि=राक्षसाः, सुखं=सानन्दं यथा तथा, स्वप्स्यन्ति=शयिष्यन्ते, रामवधानन्तरमिति शेषः । निर्भयं=भयरहितं यथा तथा, भ्रमिष्यन्ति च= भ्रमणं करिष्यन्ति च । राक्षस्यः=यातुधान्यः, न विक्रोक्ष्यन्ति=नो क्रन्दिष्यन्ति, हर्षिताः=सञ्जातहर्षाः सत्यः, नरान्=मनुष्यान्, अत्स्यन्ति च=भक्षयिष्यन्ति च ॥

व्युत्पत्तिः—स्वप्स्यन्ति="ञिष्वप् शये" इति धातोर्लृट् । निर्भयं=निर्गतं भयं यस्मिन्कर्मणि तद्यथा । भ्रमिष्यन्ति="भ्रमु अनवस्थाने" इति धातोर्लृट् । विक्रोक्ष्यन्ति=विपूर्वात् "क्रुश आह्वाने रोदने च"ति धातोर्लृट् । हर्षिताः=हर्षः सञ्जात आसां ताः, "तदस्य संजातं तारकादिभ्य इतच्" इतीतच् । अत्स्यति= "अद भक्षणे" इति धातोर्लृट् ॥

भाषार्थः—रामवधके अनन्तर राक्षस सुखपूर्वक सोयेंगे और निर्भय होकर भ्रमण भी करेंगे । राक्षसियाँ नहीं रोयेंगी और हर्षयुक्त होती हुईं घूमेंगी भी ॥३२॥

युग्मम्—

प्राङ्मुहूर्तात् प्रभातेऽहं भविष्यामि ध्रुवं सुखी ।
आगामिनि ततः काले यो द्वितीयः क्षणोऽपरः ॥ ३३ ॥
तत्र जेतुं गमिष्यामि त्रिदशेन्द्रं सहाऽमरम् ।
ततः परेण भूयोऽपि लङ्कामेष्याम्यमत्सरः ॥ ३४ ॥

अन्वयः—प्रभाते मुहूर्तात् प्राक् अहं ध्रुवं सुखी भविष्यामि । तत आगामिनि काले यः अपरो द्वितीयः क्षणः तत्र सहाऽमरं त्रिदशेन्द्रं जेतुं गमिष्यामि । ततः परेण अमत्सरः (सन्) भूयः अपि लङ्काम् एष्यामि ॥

व्याख्या—प्रभाते=प्रातः काले, मुहूर्तत्रयसम्मित इति भावः, घटिकाद्वयेनैको मुहूर्तः संपद्यत इत्यवधेयम् । मुहूर्तात्=द्वितीयमुहूर्तादिति भावः, प्राक्=प्रथमं,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रथमे मुहूर्ते इति भावः। अहं = रावणः, ध्रुवम्=अवश्यं, सुखी = साऽऽनन्दः, भविष्यामि = वर्तिष्ये, तदैव शत्रुहननादिति भावः। ततः = अनन्तरम्, आगामिनि = भविष्यति, काले = समये यः, अपरः = अन्यः, द्वितीयः = द्वयोः पूरणः, क्षणः = मुहूर्तः, तत्र = तस्मिन्, सहाऽमरं = देवसहितं, त्रिदशेन्द्रं = देवराजम्, इन्द्रमिति भावः। जेतुं=वशीकर्तुं, गमिष्यामि=यास्यामि। ततः = तस्मात्, द्वितीयमहूर्त्तादिति भावः, परेण = उत्तरवर्तिना कालेन, तृतीयमुहूर्तेनेति भावः। अमत्सरः = अन्यशुभद्वेषरहितः सन्, सपत्नाऽभावादिति भावः। भूयोऽपि = पुनरपि, लङ्कां = स्वनगरीम्, एष्यामि = आगमिष्यामि। प्रातः सङ्गवमध्याह्नाऽपराह्णसायङ्कालरूपविभागपञ्चकाऽवच्छिन्ने दिने मुहूर्तत्रयात्मकप्रातःकाले प्रथमे मुहूर्ते रामहननं विधाय द्वितीयेऽमराऽवत्यभियानेन ससुरमिन्द्रं पराजित्य तृतीये मुहूर्त शत्रुपराजयेन विगतकोपः सन् पुनः स्वपुरीं प्रत्यागमिष्यामीति दशाऽऽननमनोरथः॥

व्युत्पत्तिः—मुहूर्तात् = अञ्चूत्तर (प्राक्) पदेन योगे "अन्यारादितरर्तेदिक्छब्दाऽञ्चूत्तरपदाजाहियुक्ते" इति पञ्चमी। सुखी=सुखमस्याऽस्तीति, "अत इनिठनौ" इतीनिः। क्षणः = "क्षणो व्यापारशून्यत्वमुहूर्तोत्सवपर्वसु।" इति रुद्रः। सहाऽमरम् = अमरैः सहितः सहाऽमरस्तं, "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः। भविष्यामि = "कालविभागे चाऽनहोरात्राणाम्" इत्यनद्यतनवत्प्रत्ययप्रतिषेधे लृट्। तत्र हि "नाऽनद्यतनवत्क्रियाप्रबन्धसामीप्ययोः" इति "भविष्यति मर्यादावचनेऽवरस्मिन्" इति चाऽनुवर्तते। एवं गमिष्यामीत्यत्राऽपि। ततः = "परेणे"ति पदेन योगे "अन्यारादितरर्ते" इत्यादिना पञ्चमी, ततः "पञ्चम्यास्तसिल्" इति तसिल्। अमत्सरः = अविद्यमानो मत्सरो यस्य सः, "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोप" इति नञ्बहुव्रीहिः। "मत्सरोऽन्यशुभद्वेषे" इत्यमरः। एष्यामि = आङ्पूर्वात् "इण् गतौ" इति धातोः "परस्मिन् विभाषा" इत्यनेन विभाषालुट्प्रतिषेधात्लृट्। तत्र हि कालविभागे सति भविष्यति काले परस्मिन् विभाषा अनद्यतनवत्प्रत्ययविधिर्न भवतीत्युक्तम्॥

भाषाऽर्थः—प्रातःकालमें प्रथम मुहूर्तमें मैं (रामको मारकर) अवश्य सुखी हूँगा। अनन्तर आगामी समयमें जो दूसरा मुहूर्त है उसमें देवताओंके साथ इन्द्र को जीतनेके लिए जाऊंगा। उसके वाद तृतीय मुहूर्तमें कोपरहित होकर फिर भी लङ्कामें चला जाऊंगा॥ ३३–३४॥

तमेवंवादिनं मूढमिन्द्रजित्समुपागतः।
युयुत्सिष्येऽहमित्येवं वदन् रिपुभयंकरः॥ ३५॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—एवंवादिनं तं मूढम् "अहं युयुत्सिष्ये" इत्येवं वदन् रिपुभयङ्कर इन्द्रजित् समुपागतः ॥

व्याख्या—एवंवादिनम् = एवंभाषणशीलं, तं = पूर्वोक्तं, मूढं = मूर्खं, रावणमिति भावः । अहम् = इन्द्रजित् , युयुत्सिष्ये = योद्धमिच्छां करिष्यामि, इत्येवम् = इत्येतादृशं वदन् = भाषमाणः, रिपुभयङ्करः = शत्रुभीतिजनकः, इन्द्रजित् = मेघनादः, समुपागतः = समुपायातः ॥

व्युत्पत्तिः—एवंवादिनम् = एवं वदतीति तच्छील एवंवादी, तं "सुप्यजातौ णिनिस्ताच्छील्ये" इति णिनिप्रत्ययः । युयुत्सिष्ये = "युध सम्प्रहारे" इति धातोः सन्नन्ताल्लृट् । रिपुभयङ्करः = भयं करोतीति भयङ्करः, "मेघर्तिभयेषु कृञः" इति खच् "अरुर्द्विषदजन्तस्य मुम्" इति मुम्, रिपूणां भयङ्करः ।

भाषाऽर्थः—ऐसा कहनेवाले उस मूढ रावणके पास "मैं लड़नेकी इच्छा करता हूँ" ऐसा कहता हुआ शत्रुओंको भय उत्पन्न करनेवाला इन्द्रजित् आ गया ॥ ३५ ॥

नाऽभिज्ञा ते महाराज ! जेष्यावः शक्रपालितम् ।
दृप्तदेवगणाकीर्णमावां सह सुरालयम् ॥ ३६ ॥

अन्वयः—हे महाराज ! ते अभिज्ञा न, शक्रपालितं दृप्तदेवगणाऽऽकीर्णं सुराऽऽलयम् आवां सह जेष्यावः ॥

व्याख्या—हे महाराज != हे महाभूप ! ते = तव, अभिज्ञा = स्मृतिः, न = नाऽस्ति, यत् शक्रपालितम् = इन्द्ररक्षितं, दृप्तदेवगणाऽऽकीर्णं = सदर्पसुरसमूहव्याप्तं, सुराऽऽलयं = स्वर्गम्, आवां = भवान् अहं च, द्वावेवेति भावः, सह = संभूय, जेष्यावः = जितवन्तौ ॥

व्युत्पत्तिः—हे महाराज = महांश्चाऽसौ राजा महाराजस्तत्सम्बुद्धौ, "राजाऽहःसखिभ्यष्टच्" इति टच् । दृप्तदेवगणाऽऽकीर्णं = दृप्ताश्च ते देवगणा दृप्तदेवगणास्तैराकीर्णस्तम् । जेष्यावः = "जि जये" इति धातोः स्मृतिवाचके अभिज्ञापदे उपपदे भूताऽनद्यतने "अभिज्ञावचने लृट्" इति लृट् ॥

भाषाऽर्थः—हे महाराज ! आपको स्मरण नहीं है, इन्द्रसे रक्षित दर्पसे युक्त देवगणसे व्याप्त स्वर्गको हम दोनोंने मिलकर जीता था ॥ ३६ ॥

नाऽभिज्ञा ते सयत्नेन्द्रं भङ्क्ष्यावो यद्यमं बलात् ।
रत्नानि चाऽऽहरिष्यावः प्राप्स्यावश्च पुरीमिमाम् ॥ ३७ ॥

अन्वयः—(हे महाराज !) ते अभिज्ञा न, यत् (आवाम्) सयत्नेन्द्रं यमं बलात् भङ्क्ष्यावो रत्नानि आहरिष्याव इमां पुरीं प्राप्स्यावश्च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे महाराज ! ते=तव, अभिज्ञा=स्मृतिः, न=नाऽस्ति, यत्, सयक्षेन्द्रं=धनदसहितं यमं=यमराजं, बलात्=सामर्थ्यात्, भक्ष्याव=भग्नवन्तौ, आवामिति शेषः, एवं परत्राऽपि। रत्नानि=पद्मरागादीनि, आहरिष्यावः=आहृतवन्तौ, इमाम्=एतां, पुरीं=नगरीं, लङ्कामित्यर्थः। प्राप्स्यावश्च=प्राप्तवन्तौ च ॥

व्युत्पत्तिः—सयक्षेन्द्रं=यक्षाणामिन्द्रो यक्षेन्द्रः, "कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः।" इत्यमरः। यक्षेन्द्रेण सहितस्तम्। भक्ष्यावः, आहरिष्यावः, प्राप्स्यावश्च="भञ्जो आमर्दने" इति आङ्पूर्वकात् "हृञ् हरणे" इति प्रपूर्वकात् "आप्लृ व्याप्तौ" इति धातोश्च "विभाषा साऽऽकाङ्क्षे" इति साकाङ्क्षे स्मृतिबोधिनि उपपदे लृट्। लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा, तत्र भञ्जनं लक्षणं रत्नाऽऽहरणं पुरीप्रापणं च लक्ष्यम्। साधनसम्बन्धविवक्षाऽऽकाङ्क्षा ॥

भाषाऽर्थः—हे महाराज ! आपको याद नहीं है जो कि हम दोनोंने कुबेरके साथ यमराजको बलपूर्वक पराजित किया था तथा रत्नोंका आहरण किया था और उसके बाद हम दोनों लङ्कापुरीको प्राप्त भी हुए थे ॥ ३७ ॥

एष पेक्ष्याम्यरीन् भूयो न शोचिष्यसि रावण ! ।
जगद्द्रक्ष्यसि नीराममवगाहिष्यसे दिशः ॥ ३८ ॥

अन्वयः—एषः (अहम्) भूयः अरीन् पेक्ष्यामि। हे रावण ! न शोचिष्यसि जगत् नीरामं द्रक्ष्यसि दिशः अवगाहिष्यसे ॥

व्याख्या—एषः=भवत्समीपतरवर्ती, अहमिति शेषः। भूयः=पुनः, अरीन्=शत्रून्, रामादीनिति भावः। पेक्ष्यामि=चूर्णयिष्यामि। येन हे रावण !=हे दशाऽऽनन !, न शोचिष्यसि=शोकं न करिष्यसि। जगत्=लोकं, नीरामं=रामरहितं, द्रक्ष्यसि=विलोकयिष्यसि। दिशः=आशाः, अवगाहिष्यसे=व्याप्स्यसि ॥

व्युत्पत्तिः—पेक्ष्यामि="पिष्लृ संचूर्णने" इति धातोः "वर्तमानसामीप्ये वर्तमानवद्वा" इति वार्तमानिकप्रत्ययस्य विकल्पेन विधानाल्लृडेव। शोचिष्यसि="शुच शोके" इति धातोर्भविष्यति लृट्। नीरामं=निर्गतो रामो यस्मात्तम्, "रो रि" इति रलोपः "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति पूर्वस्याऽणो दीर्घत्वम्। द्रक्ष्यसि="दृशिर् प्रेक्षणे" इति धातोर्लृट्, "सृजिदृशोर्झल्यमकिति" इत्यमागमः। अवगाहिष्यसे=अवपूर्वात् "गाहू विलोडने" इति धातोर्लृट् ॥

भाषाऽर्थः—यह मैं शत्रुओंको फिर पीस डालूंगा। पिताजी ! आप पीछे शोक नहीं करेंगे, जगत्को रामसे रहित देखेंगे और दिशाओंको व्याप्त करेंगे ॥ ३८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सहभृत्यः सुरावासे भयं भूयो विधास्यसि ।
प्रणंस्यत्यद्य देवेन्द्रस्त्वां वक्ष्यति स सन्नतिम् ॥ ३९ ॥

अन्वयः—(हे पितः) सहभृत्यः (सन्) सुरावासे भूयः भयं विधास्यसि; अद्य देवेन्द्रः त्वां प्रणंस्यति । स सन्नतिं वक्ष्यति ॥

व्याख्या—(हे पितः !) सहभृत्यः = अनुचरसहितः सन् , सुराऽऽवासे=स्वर्गे, भूयः = पुनः, भयं = त्रासं, विधास्यसि = करिष्यसि । अद्य = अस्मिन्दिने, देवेन्द्रः = देवराजः, त्वां=भवन्तं, प्रणंस्यति="त्वदीयोऽहम्" इति निवेदयिष्यति । सः=देवेन्द्रः, सन्नतिं = नमस्कारं, वक्ष्यति = वदिष्यति ॥

व्युत्पत्तिः—सहभृत्यः = भृत्यैः सहितः, तुल्ययोगबहुव्रीहिः । सुरावासे = आ (समन्तात्) वसन्ति अस्मिन्निति आवासः, "हलश्च" त्यधिकरणे घञ् । सुराणामावासस्तस्मिन् । विधास्यसि = विपूर्वात् "डुधाञ् धारणपोषणयोः" इति धातोर्लृट् । प्रणंस्यति = प्रपूर्वकात् "णम प्रह्वत्वे शब्दे" इति धातोर्लृट् । "णो नः" इति नत्वम्, "उपसर्गादसमासेऽपि णोपदेशस्ये"ति नस्य णत्वम् । सन्नतिं = नमनं नतिः णमधातोः "स्त्रियां क्तिन्" इति क्तिन्प्रत्ययः । "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इत्यनुनासिकलोपः । सती चाऽसौ नतिः सन्नतिस्ताम् । वक्ष्यति = "वच परिभाषणे" इति धातोर्लृट् ॥

भावार्थः—पिताजी ! आप भृत्योंके साथ स्वर्गमें फिर भय उत्पन्न करेंगे, आज इन्द्र आपसे "मैं आपका अनुगत हूँ" ऐसा निवेदन करेगा । वह आपको नमस्कार ज्ञापित करेगा ॥ ३९ ॥

भेष्यते मुनिभिस्त्वत्तस्त्वमधिष्ठास्यसि द्विषः ।
ज्ञास्येऽहमद्य संग्रामे समस्तैः शूरमानिभिः ॥ ४० ॥

अन्वयः—(हे पितः !) मुनिभिः त्वत्तो भेष्यते । त्वं द्विषः अधिष्ठास्यसि । अहम् अद्य संग्रामे समस्तैः शूरमानिभिः ज्ञास्ये ॥

व्याख्या—(हे पितः !) मुनिभिः = तापसैः, त्वत्तः = भवतः, भेष्यते=त्रसिष्यते । त्वं = राक्षसेश्वरः, द्विषः=शत्रून् , अधिष्ठास्यसि = परिभविष्यसि । अहम्=इन्द्रजित् , अद्य = अस्मिन्दिने, संग्रामे = युद्धे, समस्तैः = समग्रैः, शूरम्मन्यैः, ज्ञास्ये = ज्ञातो भविष्यामि ॥

व्युत्पत्तिः—त्वत्तः = त्वदिति, "पञ्चम्यास्तसिल्" इति तसिल्प्रत्ययः, "प्रत्ययोत्तरपदयोश्चे"ति तसिल्प्रत्यये परे युष्मच्छब्दस्य त्वदादेशः । भेष्यते="ञिभी भये" इति धातोर्भावे लृट् । द्विषः=अधिपूर्वकस्थाधातोर्योगे "अधिशीङ्स्थाऽऽसां कर्म"ति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मसंज्ञा । अधिष्ठास्यसि=अधिपूर्वकात् "ष्ठा गतिनिवृत्तौ" इति धातोर्लृट्="उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्" इति षत्वम् । शूरमानिभिः = शूरमात्मानं मन्यन्त इति शूरमानिनस्तैः, "आत्ममाने खश्चे"ति चाणिनिः । ज्ञास्ये = "ज्ञा अवबोधने" इति धातोः कर्मणि लृट् ॥

भाषाऽर्थः—हे पिताजी ! मुनिलोग आपसे डरेंगे । आप शत्रुओंको परिभूत करेंगे । मैं आज संग्राममें अपनेको शूर माननेवाले सब लोगोंसे जाना जाऊँगा ॥४०॥

ज्ञायिष्यन्ते मया चाऽद्य वीरंमन्या द्विषद्गणाः ।
गूहिष्यामि क्षितिं कृत्तैरद्य गात्रैर्वनौकसाम् ॥ ४१ ॥

अन्वयः—अद्य मया वीरम्मन्या द्विषद्गणा ज्ञायिष्यन्ते । अद्य कृत्तैः वनौकसां गात्रैः क्षितिं गूहिष्यामि ॥

व्याख्या—अद्य = अस्मिन्दिने, मया = इन्द्रजिता, वीरम्मन्याः = वीरमानिनः, द्विषद्गणाः = शत्रुसमूहाः, ज्ञायिष्यन्ते = ज्ञास्यन्ते परिच्छेत्स्यन्ते इति भावः । अद्य= अस्मिन् दिने, कृत्तैः = छिन्नैः, वनौकसा=वानराणां, गात्रैः = शरीरैः, क्षितिं=पृथिवीं, गूहिष्यामि = आच्छादयिष्यामि ॥

व्युत्पत्तिः—वीरम्मन्याः = वीरमात्मानं मन्यन्त इति, "आत्ममाने खश्चे" ति खश्प्रत्ययः, "अरुर्द्विषदजन्तस्य मुम्" इति मुम् । ज्ञायिष्यन्ते = "ज्ञा अवबोधन" इति धातोः कर्मणि लृट् , "स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च"ति चिण्वदिट् । वनौकसां = वनमोको येषां ते वनौकसस्तेषाम् । गात्रैः = "गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।" इत्यमरः । गूहिष्यामि = "गुहू संवरण" इति धातोर्लृट् ॥

भाषाऽर्थः—आज मुझसे अपनेको वीर माननेवाले शत्रुओंके समूह जाने जायंगे । आज काटे गये वानरोंके शरीरोंसे पृथिवीको मैं आच्छादित कर दूँगा ॥४१॥

आरोक्ष्यामि युगान्तवारिदघटासंघट्टधीरध्वनिं
निर्यास्यन् रथमुच्छ्रितध्वजधनुःखड्गप्रभाभासुरम् ।
श्रोष्यस्यद्य विकीर्णवृक्णविमुखव्यापन्नशत्रौ रणे
तृप्तान्छोणितशोणभीषणमुखान् क्रव्याऽशिनः क्रोशतः ॥४२॥

अन्वयः—निर्यास्यन् युगाऽन्तवारिदघटासंघट्टधीरध्वनिम् उच्छ्रितध्वजधनुःखड्गप्रभाभासुरं रथम् आरोक्ष्यामि । अद्य विकीर्णवृक्णविमुखव्यापन्नशत्रौ रणे तृप्तान् शोणितशोणभीषणमुखान् क्रोशतः क्रव्याऽशिनः श्रोष्यसि ॥

व्याख्या—(हे पितः !) निर्यास्यन् = इतो निर्गमिष्यन् । अहमिति शेषः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युगाऽन्तवारिदघटासंघट्टघोरध्वनिं=प्रलयमेघसमूहमिथःसंमर्दगम्भीरशब्दम्, उच्छ्रितध्वजधनुःखड्गप्रभाभासुरम्=उन्नतपताकाकार्मुकाऽसिकचिभासनशीलं, रथं=स्यन्दनम्, आरोपयामि=आरोहणं करिष्यामि, अहमिति शेषः। अद्य=अस्मिन्दिने, विकीर्णवृक्णविमुखव्यापन्नशत्रौ=विक्षिप्तच्छिन्नपराङ्मुखमृताऽरातौ, रणे=युद्धे, तृप्तान्=सुहितान्, शोणितमांसोपभोगादिति भावः। शोणितशोणभीषणमुखान्=रुधिराऽरुणभयङ्कराऽऽननान्, क्रोशतः=शब्दं कुर्वाणान्, क्रव्याऽशिनः=शृगालाऽऽदीन्, लक्षणया तादृशशृगालादीनां शब्दान् श्रोष्यसि=आकर्णयिष्यसि, त्वमिति शेषः॥

व्युत्पत्तिः—निर्यास्यन्=निर्यास्यतीति, "आरोपयामी"ति क्रियायां क्रियाऽर्थायामुपपदे "लृट् शेषे चे"ति चकारात्लृट्। युगाऽन्तवारिदघटासंघट्टघोरध्वनिं=युगाऽन्ते या वारिदघटाः, तासां संघट्टः, तस्येव घोरो ध्वनिर्यस्य सः, तम्। उच्छ्रितध्वजधनुःखड्गप्रभाभासुरम्=उच्छ्रितानि ध्वजधनूंषि यस्मिन् स उच्छ्रितध्वजधनुः। खड्गप्रभाभिर्भासुरः खड्गप्रभाभासुरः। उच्छ्रितध्वजधनुश्चाऽसौ खड्गप्रभाभासुर उच्छ्रितध्वजधनुःखड्गप्रभाभासुरस्तम्। यद्वा उच्छ्रितानां ध्वजधनुःखडगानां प्रभाभिर्भासुरस्तम्। आरोपयामि=आङ्पूर्वाद्रुहधातोर्लृट्। विकीर्णवृक्णविमुखव्यापन्नशत्रौ=विकीर्णा वृक्णा विमुखा व्यापन्नाः शत्रवो यस्मिन्स विकीर्णवृक्णविमुखव्यापन्नशत्रुस्तस्मिन्। वृक्ण इत्यत्र "ओव्रश्चू छेदन" इति धातोर्निष्ठायां क्तप्रत्ययः। "ओदितश्चे"ति निष्ठाया नत्वं तस्याऽसिद्धत्वात् "चोः कुः" इति कुत्वं च। शोणितशोणभीषणमुखान्=शोणितेन शोणानि भीषणानि मुखानि येषां ते शोणितशोणभीषणमुखास्तान्। क्रोशतः=क्रोशन्तीति क्रोशन्तः, तान्। "क्रुश आह्वाने रोदने चे"ति धातोर्लटः शत्रादेशः। क्रव्याऽशिनः=क्रव्यमश्नन्तीति तच्छीलाः क्रव्याऽशिनस्तान्, ताच्छील्ये णिनिप्रत्ययः। श्रोष्यसि="श्रु श्रवण" इति धातोर्लृट्। शार्दूलविक्रीडितं वृत्तम्॥

भाषाऽर्थः—हे पिताजी! यहाँसे बाहर निकलता हुआ मैं प्रलयकालके मेघसमूहोंके परस्पर विमर्दके सदृश गम्भीर ध्वनिसे युक्त, उन्नत पताकायें और धनुषोंसे सम्पन्न एवम् खड्गोंकी कान्तियोंसे चमकनेवाले रथपर चढूंगा। आज आप बिखरे हुये, छिन्न, पराङ्मुख और मृत शत्रुओंसे सम्बद्ध युद्धभूमिमें तृप्त, रुधिरसे लाल और भयंकर मुखवाले शृगाल आदियोंके शब्दोंको सुनेंगे॥ ४२॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये चतुर्थे तिङन्तकाण्डे लक्षणरूपे तृतीयः परिच्छेदः (वर्गः) तथा लक्ष्यरूपे कथानके रावणविलापो नाम षोडशः सर्गः॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ सप्तदशः सर्गः

इतः प्रभृति लङ्विलसितमाह। तत्र "अनद्यतने लङ्" इति सूत्रेण भूताऽनद्यतने लङ् भवति। "अतीताया रात्रेः पश्चाद्र्धेनाऽऽगामिन्या पूर्वार्द्धेन च सहितो दिवसोऽद्यतनस्तद्भिन्नोऽनद्यतन" इति। क्वचित्तु लक्षणाऽन्तरेण भूताऽनद्यतनभिऽन्नेपि लङं दर्शयति।

आशासत ततः शान्तिमस्नुरग्नीनहावयन्।
विप्रानवाचयन् योधाः प्राकुर्वन् मङ्गलानि च ॥ १ ॥

अन्वयः—ततो योधाः शान्तिम् आशासत, अस्नुः, अग्नीन् अहावयन्, विप्रान् अवाचयन् मङ्गलानि च प्राकुर्वन् ॥

व्याख्या—ततः प्रतिज्ञाऽनन्तरं योधाः = इन्द्रजिद्भटाः, शान्तिं = शमम्, उपद्रवपरिहाराऽर्थमिति भावः। आशासत = अभीष्टवन्तः। शान्तिं च दर्शयति—अस्नुरित्यादिना। अस्नुः = स्नाताः। अग्नीन् = अनलान्, अहावयन्=हुतान् अकारयन्, ऋत्विग्भिः, होमं कारितवन्त इति भावः। विप्रान्=ब्राह्मणान्, अवाचयन्=स्वस्तिवाचनं कारितवन्तः। इत्थं च मङ्गलानि च = मङ्गलयुक्तानि कर्माणि, प्राकुर्वन् = कृतवन्तः ॥

व्युत्पत्तिः—योधाः = युध्यन्त इति, "युध संप्रहारे" इति धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इत्यच्, "भटा योधाश्च योद्धार" इत्यमरः। आशासत = "आङः शासु इच्छायाम्" इत्यनुदात्तेतो धातोः "अनद्यतने लङ्" इति लङ्। "आत्मनेपदेष्वनत" इति झस्य अत्। अस्नुः = "ष्णा शौचे" इति धातोर्लङ्, "धात्वादेः षः स" इति मूर्धन्यषकारस्य दन्त्यसकारादेशस्ततः "निमित्ताऽपाये नैमित्तिकस्याऽप्यपायः" इति न्यायेन णत्वनिमित्तस्य मूर्धन्यषकारस्याऽपाये नैमित्तिकस्य णस्यापि अपायेन नकारभावः। "आतः" इति "लङः शाकटायनस्यैवे"ति झेर्जुस्, "चुटू" इति जकारस्येत्संज्ञा ततः "उस्यपदान्तात्" इति पररूपत्वम्। अहावयन् = "हु दानाऽदनयोः" इति धातोर्णौ लङ्। विप्रान् = वचधातोः शब्दकर्मकत्वात् "गतिबुद्धिप्रत्यवसानाऽर्थशब्दकर्माऽकर्मकाणामणिकर्ता स णौ" इत्यणि कर्तुः कर्मत्वम्। अवाचयन् = "वच परिभाषण" इति धातोर्णौ लङ्। प्राकुर्वन्=प्रपूर्वकात् "डुकृञ् करण" इति धातोर्लङ्। "आदिर्ञिटुडव" इति डोरित्संज्ञा। प्रायेणाऽत्र क्रियासमुच्चयः शब्दाऽलङ्कारः ॥

भाषाऽर्थः—इन्द्रजित्के प्रतिज्ञा करनेके अनन्तर उसके योद्धाओंने शान्तिकी इच्छा की, स्नान किया, ब्राह्मणोंसे होम और स्वस्तिवाचन कराया और मङ्गलयुक्त कर्मोंको कर लिया ॥ १ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपूजयन् कुलज्येष्ठानुपागूहन्त बालकान् ।
स्त्रीः समावर्धयन् साऽस्राः कार्याणि प्रादिशंस्तथा ॥ २ ॥

अन्वयः—(योधाः) कुलज्येष्ठान् अपूजयन् , बालकान् उपागूहन्त; साऽस्राः स्त्रीः समावर्धयन् , तथा कार्याणि प्रादिशन् ॥

व्याख्या—कुलज्येष्ठान् = वंशवृद्धान् , अपूजयन् = पूजितवन्तः, पादपतनादिनेति भावः, योधा इति शेषः; एवं परत्राऽपि । बालकान् = शिशून् , उपागूहन्त = आश्लिष्टवन्तः । साऽस्राः = सदस्रः, नाशाऽऽशङ्कयेति भावः । स्त्रीः = योषितः, समावर्धयन् = संवर्धितवन्तः, आश्वासितवन्त इति भावः । तथा=तेन प्रकारेण, कार्याणि गृहकर्माणि, प्रादिशन् = "इदं कार्यम्" इति निर्दिष्टवन्त इति भावः ॥

व्युत्पत्तिः—कुलज्येष्ठान् = अतिशयेन प्रशस्या ज्येष्ठाः, प्रशस्यशब्दात् "अतिशायने तमबिष्ठनौ" इति इष्ठन्प्रत्ययः "ज्य चे"ति प्रशस्यस्य ज्याऽऽदेशः । कुले ज्येष्ठाः कुलज्येष्ठास्तान् । अपूजयन्="पूज पूजायाम्" इति धातोर्लङ् । उपागूहन्त = उपपूर्वकात् "गुहू संवरण" इति धातोर्लङ् । सास्राः = अस्रैः सहिताः साऽस्रास्ताः, "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः, "वोपसर्जनस्ये"ति सहस्य सभावः । स्त्रीः = "वाऽम्शसोः" इतीयङभावपक्षे पूर्वसवर्णदीर्घपक्षे रूपम् । समावर्धयन्="प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्चे"ति णिचि लङ "समावर्जयन्" इति मल्लिनाथसम्मतः पाठस्तस्य आश्वासयन्नित्यर्थः । "समावर्गयन्नि"ति पाठेप्ययमेवाऽर्थः "तत्करोती"ति ण्यन्ताल्लङ् , प्रादिशन्=प्रपूर्वकात् "दिश अतिसर्जन" इति धातोर्लङ् ॥

भाषाऽर्थः—योद्धाओंने वंशके वृद्धोंकी पूजा की, बालकोंको आलिङ्गन किया; अनिष्टकी आशङ्कासे आंखोंमें आंसू भरने वाली स्त्रियोंको दिलासा दिया और गृहकार्योंका निर्देश किया ॥ २ ॥

आच्छादयन् व्यलिम्पंश्च प्राश्नन्नथ सुराऽमिषम् ।
प्रापिबन् मधु माध्वीकं भक्ष्यांश्चादन् यथेप्सितान् ॥ ३ ॥

अन्वयः—(योधाः) आच्छादयन् , व्यलिम्पन् , अथ सुराऽऽमिषं प्राश्नन् माध्वीकं मधु प्रापिबन् यथेप्सितान् भक्ष्यांश्च आदन् ॥

व्याख्या—आच्छादयन् = परिहितवन्तः वस्त्राणीति भावः, योधा इति शेषः, एवं परत्राऽपि । व्यलिम्पन् = समालिप्तवन्तः, अङ्गरागं कृतवन्त इति भावः । अथ = अनन्तरं, सुराऽऽमिषं = सुरायुक्तं मांसं, सुराणां मांसमिति भरतमल्लिकः । प्राश्नन्= भक्षितवन्तः, माध्वीकं = मधूकपुष्पकृतं, मधु = मद्यं, "मधुमाध्वीकम्" इत्येकं नाम केचित् तच्च द्राक्षाविकार इति भरतः । "मार्द्वीकम्" इति मल्लिनाथसंमतः पाठ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तस्य मृद्वीकायाः (द्राक्षायाः) विकार इत्यर्थः। "मृद्वीका गोस्तनी द्राक्षा" इत्यमरः । प्रापिबन् = पीतवन्तः । यथेप्सितान् = यथाऽभीष्टान्, अपर्याश्च = खण्ड-पायसादींश्च, आदन् = अभ्यवहृतवन्तः ॥

व्युत्पत्तिः—व्यलिम्पन्=विपूर्वकात् "लिप उपदेहे" इति धातोर्लङ्, "शे मुचादीनाम्" इति नुम् । व्यलिम्पन् + च = व्यलिम्पंश्च "नश्छव्यप्रशान्" इति रुत्वम्, अनुनासिकाऽभावपक्षे "अनुनासिकात्परोऽनुस्वार" इत्यनुस्वारः । प्राश्नन् = प्रपूर्वकात् "अश भोजने" इति धातोर्लङ् । प्रापिबन् = प्रपूर्वकात् "पा पाने" इति धातोर्लङ् "पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदा" इति पाधातोः पिबादेशः । आदन् = "अद भक्षणे" इति धातोर्लङ् । "अदः सर्वेषाम्" इत्यडागमः ॥

भाषाऽर्थः—राक्षसोंने कपड़े पहने, अङ्गराग किया, अनन्तर सुरासे युक्त मांस खाया, मधूक पुष्पोंके मद्यकी पीया और इच्छाके अनुसार भक्ष्यपदार्थोंको खा लिया॥

न्यश्यन् शस्त्राण्यभीष्टानि समनह्यंश्च वर्मभिः ।
अध्यासत सुयानानि द्विषद्भ्यश्चाऽशपंस्तथा ॥ ४ ॥

अन्वयः—(योधाः) अभीष्टानि शस्त्राणि न्यश्यन्, वर्मभिः समनह्यन्; सुयानानि अध्यासत तथा द्विषद्भ्यश्च अशपन् ॥

व्याख्या—अभीष्टानि=अभीप्सितानि, शस्त्राणि=खड्गादीन्यायुधानि, न्यश्यन्= तेजितवन्तः, वर्मभिः = कवचैः, समनह्यन् = सन्नद्धाः, कवचैः शरीराणि आवृतवन्त इत्यर्थः । सुयानानि = शोभनयानानि, हस्त्यश्वरथादीनीति भावः । अध्यासत = आरूढाः, तथा = तेन प्रकारेण, द्विषद्भ्यश्च = शत्रुभ्यश्च, अशपन् = "पापाः ! क्व यास्यथ" इति आक्रुष्टवन्त इत्यर्थः ॥

व्युत्पत्तिः—न्यश्यन् = निपूर्वकात् "शो तनूकरणे" इति धातोर्लङ् । "ओतः श्यनि" इत्योकारलोपः । समनह्यन् = सम्पूर्वकात् "णह बन्धने" इति दैवादिकाद्धातोर्लङ् । सुयानानि=यान्ति एभिरिति यानानि, "या प्रापणे" इति धातोः "करणाऽधिकरणयोश्च" इति करणे ल्युट् । शोभनानि यानानि "कुगतिप्रादय" इति समासः। तानि, अधिपूर्वकाऽऽसधातोर्योगे "अधिशीङ्स्थाऽऽसां कर्म" इति कर्मसंज्ञा । द्विषद्भ्यः = द्विषन्तीति द्विषन्तस्तेभ्यः, शपधातोर्योगे "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इति सम्प्रदानसंज्ञा । अशपन् = "शप आक्रोशे" इति धातोर्लङ् ॥

भाषाऽर्थः—योद्धाओंने अभीष्ट शस्त्राका तीक्ष्ण या । वे कवचोंसे सन्नद्ध हुए, घोड़े, हाथी आदि उत्तम सवारियों पर आरूढ हुए और शत्रुओंको आक्रोश करने लगे ॥ ४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपूजयंश्चतुर्वक्त्रं विप्रानार्चंस्तथाऽस्तुवन् ।
समालिपत शक्राऽरिर्यानं चाऽभ्यलषद्वरम् ॥ ५ ॥

अन्वयः—(भटाः) चतुर्वक्त्रम् अपूजयन्, विप्रान् आर्चन् तथा अस्तुवन् । शक्राऽरिः समालिपत, वरं यानं च अभ्यलषत् ॥

व्याख्या—चतुर्वक्त्रं = ब्रह्मदेवम्, अपूजयन् = पूजितवन्तः, भटा इति शेषः, एवं परत्राऽपि । विप्रान् = ब्राह्मणान्, आर्चन् = अर्चितवन्तः, दाननमस्काराऽऽदिनेति भावः । तथा = तेन प्रकारेण, अस्तुवन् = स्तुतवन्तः, परस्परमिति शेषः । अथ शक्राऽरिः = इन्द्रशत्रुः इन्द्रजिदित्यर्थः । समालिपत = समालिप्तवान्, अङ्गानीति शेषः । मल्लिनाथस्तु "समालभत' इति पाठान्तरमाह, तस्य चन्दनादिकमलिपदित्यर्थः । वरम्=उत्कृष्टं, यानं च=वाहनं च, अभ्यलषत् = अभीष्टवान् ॥

व्युत्पत्तिः—चतुर्वक्त्रं = चत्वारि वक्त्राणि यस्य स चतुर्वक्त्रस्तम् । आर्चन् = "अर्च पूजायाम्" इति धातोर्लङ, "आडजादीनाम्"इत्याडागमः । अस्तुवन्="ष्टुञ् स्तुतौ" इति धातोर्लङ। समालिपत=समाङ पूर्वकात् "लिप उपदेहे" इति धातोर्लङ् । यानं="सर्वं स्याद्वाहनं यानं युग्यं पत्त्रं च धोरणम् ।" इत्यमरः । अभ्यलषत्= अभिपूर्वकात् "लष कान्तौ" इति धातोर्लङ । कान्तिरिच्छेत्यर्थः ॥

भाषाऽर्थः—योद्धाओंने ब्रह्माजी की पूजा की, दान, नमस्कार आदिसे ब्राह्मणों का सत्कार किया और परस्पर में (एकने दूसरे की) स्तुति (तारीफ) की । तदनन्तर इन्द्रजित्ने चन्दन आदिसे शरीरमें लेपन किया और उत्तम सवारीका अभिलाष किया ॥ ५ ॥

आमुञ्चद्वर्म रत्नाढ्यमबध्नात्खड्गमुज्ज्वलम् ।
अध्यास्त स्यन्दनं घोरं प्रावर्तत ततः पुरः ॥ ६ ॥

अन्वयः—(शक्राऽरिः) रत्नाढ्यं वर्म आमुञ्चत्, उज्ज्वलं खड्गम् अबध्नात्, घोरं स्यन्दनम् अध्यास्त ततः पुरः प्रावर्तत ॥

व्याख्या—रत्नाढ्यं = मणिसम्पन्नं, वर्म = कवचम्, आमुञ्चत्=परिहितवान्, शक्रारिरिति शेषः, एवं परत्राऽपि । उज्ज्वलम् = अवदातं, खड्गम् = असिम्, अबध्नात् = बद्धवान्, पार्श्वे इति शेषः । घोरं = भयङ्करं, स्यन्दनं = रथम्, अध्यास्त = आरूढः, ततः = अनन्तरं, पुरः = पुरतः, प्रावर्तत = प्रवृत्तः, युद्धायेति शेषः ॥

व्युत्पत्तिः—आमुञ्चत् = आङ्पूर्वकात् "मुच्लृ मोक्षण" इति धातोर्लङ्, "शे मुचादीनाम्" इति नुम् । स्यन्दनम् = अधिपूर्वकस्यासधातोर्योगे "अधिशीङ्-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थाऽऽसां कर्मे"ति कर्मसंज्ञा। अध्यास्त = अधिपूर्वात् "आस उपवेशन" इति धातोर्लङ्॥

भाषाऽर्थः—इन्द्रजित्‌ने रत्नोंसे सम्पन्न कवच पहना, बगलमें उज्ज्वल (चमकदार) खड्ग बांधा, वह भयङ्कर रथपर चढ़ा, तदनन्तर लड़नेके लिए आगे बढ़ा ॥६॥

आघ्नन् भेरीर्महास्वानाः कम्बूंश्चाऽप्यधमन् शुभान्।
अताडयन् मृदङ्गांश्च पेराश्चाऽपूरयन् कलाः ॥ ७ ॥

अन्वयः—महास्वाना भेरीः आघ्नन्, शुभान् कम्बून् अधमन्; मृदङ्गान् अताडयन् कलाः पेरा अपूरयन् ॥

व्याख्या—महास्वानाः = महानादाः, भेरीः = दुन्दुभीन्, आघ्नन् = ताडितवन्तः, वादका इति भावः, तस्मिन्प्रवृत्त इति शेषः, एवं परत्राऽपि। शुभान्=सुस्वरान्, कम्बून् = शङ्खान्, अधमन्=वादितवन्तः, मृदङ्गान् = मुरजान्, अताडयन् = ताडितवन्तः, कलाः = अव्यक्तमधुरस्वराः, पेराः = काहलाः, अपूरयन् = पूरितवन्तः, मुखमारुतेनेति शेषः ॥

व्युत्पत्तिः—महास्वानाः = "स्वान" इत्यत्र "स्वनहसोर्वा" इत्यबभावपक्षे घञि रूपम्। महान् स्वानो यासां ता महास्वानास्ताः। भेरीः = "भेर्यामानकदुन्दुभी" इत्यमरः। आघ्नन् = आङ्पूर्वकात् "हन हिंसागत्योः" इति धातोर्लङ्। "गमहने" त्यादिनोपधालोपः। सकर्मकत्वात् "आङो यमहन" इति नात्मनेपदम्। अधमन् = "ध्मा शब्दाऽग्निसंयोगयोः" इति धातोर्लङ्, "पाघ्राध्मे" त्यादिना धमादेशः। अताडयन् = "तड आघात" इति चौरादिकाद्धातोर्लङ्॥

भाषाऽर्थः—इन्द्रजित्‌के युद्धभूमिमें प्रवृत्त होने पर वादकोंने महान् शब्दों वाली भेरियोंको, सुन्दर स्वरवाले शङ्खोंको, पखावजों को और अव्यक्त मधुर शब्द वाली "काहला" नामके वाद्योंको भी बजाया ॥ ७ ॥

अस्तुवन् वन्दिनः शब्दानन्योन्यं चोदभावयन्।
अनदन् सिंहनादांश्च प्राद्रेकत हयद्विपम् ॥ ८ ॥

अन्वयः—वन्दिनः अस्तुवन्। (सैनिकाः) अन्योन्यं शब्दान् उदभावयन्, सिंहनादांश्च अनदन्। हयद्विपं प्राद्रेकत ॥

व्याख्या—वन्दिनः = स्तुतिपाठकाः, अस्तुवन् = स्तुतिं चक्रुः "जय जीवे" त्यादिनेति शेषः। अन्योन्यम्=अन्यस्य अन्यस्य च, शब्दान्=स्वनान्, साङ्ग्रामिकनामानीति भावः। उदभावयन् = उद्घाटितवन्तः, सैनिका इति शेषः, एव परत्राऽपि। तथा च सिंहनादांश्च = मृगेन्द्रगर्जितानि च, अनदन् = शब्दितवन्तः। हयद्विपम् = अश्वगजं, प्राद्रेकत = शब्दितवत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—उद्भावयन् = उत्पूर्वकाद्भूधातोर्णौ लङ् । अनदन् = "णद अव्यक्ते शब्दे" इति धातोर्लङ् । हयद्विपं=हयाश्च द्विपाश्चेति पशुद्वन्द्वस्य "विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वाऽपराऽधरोत्तराणाम्" इति विभाषया सेनाङ्गत्वात् "द्वन्द्वश्चे" त्यादिना वा समाहारद्वन्द्वः । प्राद्वेकत = "ह्रेकृ शब्दोत्साहे" इत्यनुदात्तेतो धातोर्लङ् ॥

भाषाऽर्थ—स्तुतिपाठकोंने इन्द्रजित् की स्तुति की । सैनिकोंने परस्परमें संग्राम-कर्ताके नामोंका उद्घाटन किया और सिंहनाद किये । घोड़े और हाथी शब्द करने लगे ॥ ८ ॥

अनिमित्तान्यथाऽपश्यन्नस्फुटद्रविमण्डलम् ।
औक्षन् शोणितमम्भोदा वायवोऽवान् सुदुःसहाः ॥ ९ ॥

अन्वयः—अथ अनिमित्तानि अपश्यन्—रविमण्डलम् अस्फुटत् । अम्भोदाः शोणितम् औक्षन् । सुदुःसहा वायवः अवान् ॥

व्याख्या—अथ = अनन्तरम्, अनिमित्तानि = कुत्सितनिमित्तानि अपश्यन् = दृष्टवन्तः, इन्द्रजिदादय इति शेषः, एवं परत्राऽपि । तान्यनिमित्तानि दर्शयति—अस्फुटदिति । रविमण्डलं = सूर्यमण्डलम्, अस्फुटत् = स्फुटितं, विदीर्णमित्यर्थः । अम्भोदाः = मेघाः, शोणितं = रुधिरम्, औक्षन् = वृष्टवन्तः । सुदुःसहाः = प्रचण्डाः, वायवः = वाताः अवान् = वान्ति स्म ॥

व्युत्पत्तिः—अनिमित्तानि = न निमित्तानि अनिमित्तानि, तानि । अत्र अप्राशस्त्ये नञ्, तद्यथा—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता ।
अप्राशस्त्यं विरोधश्चश्च नञर्थाः षट् प्रकीर्तिताः ॥" इति ।

अस्फुटत् = "स्फुट भेदने" इति धातोर्लङ् । अम्भोदाः=अम्भांसि ददतीति, "आतोऽनुपसर्गे कः" इति कप्रत्ययः । औक्षन् = "उक्ष सेचने" इति धातोर्लङ् । "आडजादीनाम्" इत्याडागमः, "आटश्चे"ति वृद्धिश्च । अवान्="वा गतिगन्धनयोः" इति धातोर्लङ् । "लङः शाकटायनस्यैव" इति शाकटायनमतेझेर्जुसि तु "अवुः" इति रूपम् ॥

भाषाऽर्थः—अनन्तर इन्द्रजित् आदियोंने अनेक अपशकुनोंको देखा—सूर्यमण्डल विदीर्ण हुआ । मेघोंने रुधिर-वृष्टि की । प्रचण्ड हवायें चलने लगीं ॥ ९ ॥

आच्छॅन् वामं मृगाः कृष्णाः शस्त्राणां व्यस्मरन् भटाः ।
रक्तं न्यष्ठीवदक्राम्यदखिद्यद्वाजिकुञ्जरम् ॥ १० ॥

अन्वयः—कृष्णा मृगा वामम् आच्छॅन् । भटाः शस्त्राणां व्यस्मरन् । वाजिकुञ्जरं रक्तं न्यष्ठीवत् . अक्राम्यत् अखिद्यच्च ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—कृष्णाः = श्यामलाः, मृगाः=हरिणाः, वामं = सव्यपार्श्वम्, आच्छ्रंन्=गताः निर्गच्छतामिति शेषः ; भटाः = योधाः, शस्त्राणां व्यस्मरन्=आयुधानि विस्मृतवन्तः । वाजिकुञ्जरं = हयगजं, रक्तं= रुधिरं, न्यष्ठीवत् = निरसितवत् , अक्लाम्यत् = क्लान्तम्, अखिद्यत् = खिन्नं चाऽभवत् ॥

व्युत्पत्तिः—आच्छ्रंन् = "ऋ गतिप्रापणयोः" इति धातोर्लङ्, "पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः" इति ऋच्छादेशः। यद्वा "ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु" इति धातोर्लङ्। शस्त्राणाम् = अधीगर्थस्य स्मृधातोर्योगे "अधीगर्थदयेशां कर्मणी"ति कर्मणि षष्ठी। वाजिकुञ्जरं=वाजिनश्च कुञ्जराश्च, "विभाषा वृक्षमृगे"त्यादिना सेनाङ्गत्वात् "द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्" इति वा समाहारद्वन्द्वः। न्यष्ठीवत् = निपूर्वात् "ष्ठिवु निरसन" इति भौवादिकाद्धातोर्लङ्। "धात्वादेः षः स" इति प्राप्तस्य सत्वस्य "सुब्धातुष्ठिवुष्वष्कतीनां सत्वप्रतिषेधो वक्तव्य" इति प्रतिषेधः। अत्र द्वितीयस्थकारष्ठकारो वेति वृत्तिः। आचार्येण शिष्येभ्य उभयथा प्रतिपादनादुभयमपि प्रमाणमिति व्याख्यातार इति माधवाचार्याः। "ष्ठिवुक्लमुचमां शिति" इति दीर्घः। अक्लाम्यत् = "क्लमु ग्लानौ" इति दैवादिकधातोर्लङ्, पूर्वसूत्रेणैव दीर्घत्वम्। अखिद्यत् = "खिद परिघात" इति धातोर्लङ्॥

भाषाऽर्थः—युद्धके लिए अभियान करनेवाले इन्द्रजित्‌के सैनिकोंकी बाईं ओर काले मृग चलने लगे। योधा लोग शस्त्रोंको भूलने लगे घोड़े और हाथी रक्त वमन करने लगे, और विना परिश्रमके भी क्लान्त तथा खिन्न होने लगे ॥ १० ॥

न तानगणयन् सर्वानास्कन्दंश्च रिपून् द्विषः ।
अच्छिन्दन्नसिभिस्तीक्ष्णैरभिन्दंस्तोमरैस्तथा ॥ ११ ॥

अन्वयः—द्विषः तान् सर्वान् न अगणयन्, रिपून् आस्कन्दन् ; तीक्ष्णैः असिभिः अच्छिन्दन्, तथा तोमरः अभिन्दन् ॥

व्याख्या—द्विषः = शत्रवः, राक्षसा इत्यर्थः। तान् = पूर्वोक्तान्, सर्वान् = समस्तान्, अशुभानिति भावः। न अगणयन् = नाऽऽदृतवन्तः। रिपून् = शत्रून्, वानरादीनिति भावः। आस्कन्दन् = अभिगताः। तीक्ष्णैः = निशितैः, असिभिः = खड्गैः, अच्छिन्दन् = छिन्नवन्तः, शत्रूनिति शेषः। तथा = तेन प्रकारेण, तोमरैः = शर्वलाभिः, अभिन्दन् = विदारितवन्तः।

व्युत्पत्तिः—अगणयन् = "गण संख्याने" इति धातोर्लङ्। आस्कन्दन् = आङ्पूर्वकात् "स्कन्दिर् गतिशोषणयोः" इति धातोर्लङ्। अच्छिन्दन् = "छिदिर् द्वैधी·

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

करणे" इति धातोर्लङ् । तोमरैः="शर्वला तोमरोऽस्त्रियाम्" इत्यमरः । अभिन्दन्="भिदिर् विदारणे" इति धातोर्लङ् ॥

भाषाऽर्थः—राक्षसोंने उन सब अशुभोंका अनादर किया । वे शत्रुओंके सम्मुख गये । उन्होंने तीक्ष्ण तलवारोंसे शत्रुओंको काट डाला गँडासोंसे भेदन कर डाला ॥ ११ ॥

न्यकृन्तंश्चक्रधाराभिरतुदन् शक्तिभिर्दृढम् ।
भल्लैरविध्यन्नुग्राऽग्रैरतृंहंस्तोमरैरलम् ॥ १२ ॥

अन्वयः—(द्विषः) चक्रधाराभिः न्यकृन्तन्, शक्तिभिः दृढम् अतुदन्; उग्राऽग्रैः भल्लैः अविध्यन् तोमरैः अलम् अतृंहन् ॥

व्याख्या—चक्रधाराभिः = रथाऽङ्गधाराभिः, न्यकृन्तन् = छिन्नवन्तः, राक्षसा वानरादीनिति शेषः, एवं परत्राऽपि । शक्तिभिः = कासूपरपर्यायैः प्रहरणविशेषैः, दृढम् = अत्यर्थम्, अतुदन् = व्यथितवन्तः । उग्राऽग्रैः = तीक्ष्णाऽग्रैः, भल्लैः = शस्त्रविशेषैः, अविध्यन् = ताडितवन्तः, तोमरैः = शर्वलाभिः, अलं = पर्याप्तम्, अतृंहन् = हतवन्तः ॥

व्युत्पत्तिः—न्यकृन्तन् = निपूर्वात् "कृती छेदने" इति धातोर्लङ् । "शे मुचादीनाम्" इति नुम् । अतुदन् = "तुद व्यथने" इति धातोर्लङ् । उग्राऽग्रैः = उग्रमग्रं येषां ते उग्राऽग्रास्तैः । अविध्यन् = "व्यध ताडने" इति धातोर्लङ्, "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च" इति सम्प्रसारणम् । अतृंहन् = "तृह हिंसायाम्" इति धातोर्लङ्, "रुधादिभ्यः श्नम्" इति श्नम्, "श्नसोरल्लोपः" इत्यल्लोपः, "नश्चाऽपदान्तस्य झलि" इत्यनुस्वारश्च ॥

भाषाऽर्थः—राक्षसोंने चक्रोंकी धारोंसे शत्रुओंको काट डाला, शक्तियोंसे अतिशय पीड़ित किया, तीखी नोकवाले भालोंसे वेध डाला और गँडासोंसे पर्याप्त रूपसे वैरियोंको मार डाला ॥ १२ ॥

साम्प्रतं वानरकर्तृकं राक्षसविक्रमप्रतिकारमाह—

आस्यन् प्लवङ्गमा वृक्षानधुन्वन् भूधरैर्भृशम् ।
अहिंसन् मुष्टिभिः क्रोधाददशन्दशनैरपि ॥ १३ ॥

अन्वयः—प्लवङ्गमा वृक्षान् आस्यन्, भूधरैः भृशम् अधुन्वन्; क्रोधात् मुष्टिभिः अहिंसन्, दशनैरपि अदशन् ॥

व्याख्या—प्लवङ्गमाः = वानराः, वृक्षान् = तरून्; आस्यन् = क्षिप्तवन्तः, राक्षसेष्विति भावः । भूधरैः = पर्वतैः भृशम् = अत्यर्थम्, अधुन्वन् = हतवन्तः, राक्षसानिति शेषः । "अधूर्वन्" इति पाठान्तरं, तत्राऽपि स एवाऽर्थः । क्रोधात् = कोपाद्धेतोः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुष्टिभिः = संपिण्डिताऽङ्गुलिपाणिभिः, अहिंसन् = ताडितवन्तः, दशनैरपि=दन्तैरपि, अदशन् = दष्टवन्तः ॥

व्युत्पत्तिः—आस्यन् = "असु क्षेपणे" इति दैवादिकाद्धातोर्लङ्, "आडजादीनाम्" इत्याडागमः "आटश्चे"ति वृद्धिश्च। अधुन्वन्="धुञ् कम्पने" इति स्वादिगणस्थधातोर्लङ्। "अधूर्वन्" इति पाठान्तरे हिंसाऽर्थाद्दौवादिकाद् धुर्वीधातोर्लङ् "उपधायां चे"ति दीर्घत्वम्। अहिंसन् = "हिसि हिंसायाम्" इति रौधादिकाद्धातोर्लङ्। दशनैः="रदना दशना दन्ता रदाः" इत्यमरः। अदशन् = "दंशि दंशने" इति धातोर्लङ्, "दंशसञ्जस्वञ्जां शपी"त्यनुनासिकलोपः ॥

भावाऽर्थः—वानरोंने राक्षसोंके ऊपर वृक्षोंको फेंका, पर्वतोंसे राक्षसोंको पर्याप्तरूपसे मार डाला; क्रोधसे उन्हें मुक्कोंसे ताडित किया और दाँतोंसे भी काटा ॥१३॥

प्राहुन्वन् जानुभिस्तूर्णमतुदंस्तलकूर्परैः।
प्राहिण्वन्नरिमुक्तानि शस्त्राणि विविधानि च ॥ १४ ॥

अन्वयः—(प्लवङ्गमाः) जानुभिः तूर्णं प्राहुन्वन्, तलकूर्परैः अतुदन्; अरिमुक्तानि विविधानि शस्त्राणि च प्राहिण्वन् ॥

व्याख्या—जानुभिः=ऊरुपर्वभिः, तूर्णं=त्वरं, प्राहुन्वन्=पीडितवन्तः, प्लवङ्गमा राक्षसानिति शेषः। एवं परत्राऽपि। तलकूर्परैः = चपेटैः कफोणिभिश्च, अतुदन् = व्यथितवन्तः; किं बहुना—अरिमुक्तानि=शत्रुप्रेरितानि, विविधानि=अनेकप्रकाराणि, शस्त्राणि = आयुधानि च, प्राहिण्वन् = प्रहितवन्तः, वानरा राक्षसप्रेरितानि शस्त्राणि तेष्वेव प्रेरितवन्त इति भावः ॥

व्युत्पत्तिः—जानुभिः = "जानूरुपर्वाऽष्ठीवदस्त्रियाम्।" इत्यमरः। प्राहुन्वन् = प्रपूर्वकात् "टुदु उपतापे" इति स्वादिधातोर्लङ् "आदिर्ञिटुडवः" इति टोरित्संज्ञा। तलकूर्परैः = "स्यात्कफोणिस्तु कूर्परः" इत्यमरः। अतुदन्="तुद व्यथने" इति धातोर्लङ् "तुदादिभ्यः शः" इति शः। विविधानि = विविधा विधाः (प्रकाराः) येषां तानि विविधानि तानि। प्राहिण्वन् = प्रपूर्वकात् "हि गतौ वृद्धौ चे"ति धातोर्लङ्।

भावाऽर्थः—वानरोंने राक्षसोंको घुटनोंसे शीघ्र पीडित कर दिया, थप्पड़ों और केहुनियोंसे उन्हें व्यथित किया। शत्रुओंसे छोड़े गये अनेक शस्त्रोंको उन्हींके ऊपर फेंक दिया ॥ १४ ॥

अतृणेट् शक्रजिच्छत्रूनभ्राम्यच्च समन्ततः।
अध्वनच्च महाघोरं न च कंचन नाऽद्रुनोत् ॥ १५ ॥

अन्वयः—शक्रजित् शत्रून् अतृणेट्, समन्ततः अभ्राम्यत्; महाघोरम् अध्वनच्च, कंचन न अद्रुनोत् (इति) न ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—शक्रजित् = इन्द्रजित्, शत्रून् = अरातीन्, वानरानित्यर्थः। अतृणेट् = हिंसितवान्, समन्ततः = सर्वतः, अभ्राम्यत् = भ्रान्तवान्, महाघोरम् = अतिभीषणं यथा तथा, अध्वनच्च = शब्दितवांश्च कंचन = कमपि, शत्रुमिति शेषः। न अतृणेत् (इति) न = न उपतापितवान् (इति) न, अपि तु सर्वमपि उपतापितवानेवेत्यर्थः॥

व्युत्पत्तिः—अतृणेट् = "तृह (हिसि) हिंसायाम्" इति धातोर्लङ्। रुधादित्वात् "रुधादिभ्यः श्नम्" इति श्नमि कृते "तृणह इम्" इतीमागमः, हल्ङ्यादिलोपः। हकारस्य ढत्वजश्त्वचर्त्वानि। अभ्राम्यत् = "भ्रमु अनवस्थाने" इति धातोर्लङ्, "शमामष्टानां दीर्घः श्यनि" इति दीर्घत्वम्। अध्वनत् = "ध्वन शब्दे" इति धातोर्लङ्॥

भाषाऽर्थः—इन्द्रजित्ने शत्रुओंकी हिंसा की। वह चारों ओर घूमने लगा और भयङ्कर शब्द करने लगा। उसने किसीको पीडित नहीं किया यह नहीं, बल्कि सबको पीडित किया॥ १५॥

नाऽजानन् सन्दधानं तं धनुर्नैक्षन्त बिभ्रतम्।
नेषूनचेतन्नस्यन्तं हतास्तेनाऽविदुर्द्विषः॥ १६॥

अन्वयः—द्विषः सन्दधानं तं न अजानन्, धनुः बिभ्रतं न ऐक्षन्त; इषून् अस्यन्तं न अचेतन् तेन हताः (सन्तः) अविदुः॥

व्याख्या—द्विषः = इन्द्रजिद्वैरिणः, वानरा इत्यर्थः। सन्दधानं = धनुषि शरमारोपयन्तं, तम् = इन्द्रजितं, न अजानन् = नो ज्ञातवन्तः, हस्तलाघवादेनोगिति भावः, एवं परत्राऽपि। एवं च धनुः = कार्मुकं, बिभ्रतं = धारयन्तम् इन्द्रजितं, न ऐक्षन्त = नो दृष्टवन्तः, इत्थमेव—इषून् = बाणान्, अस्यन्तं = क्षिप्यन्तम् इन्द्रजितं, न अचेतन् = नो ज्ञातवन्तः, परिणामे—तेन = इन्द्रजिता, हताः = शरविद्धाः सन्तः, अविदुः = पूर्वोक्तं शरसन्धानादिमिन्द्रजिद्व्यापारं ज्ञातवन्त इत्यर्थः॥

व्युत्पत्तिः—अजानन् = "ज्ञा अवबोधने" इति क्र्यादिस्थधातोर्लङ्, "ज्ञाजनोर्जा" इति शित्प्रत्यये जाऽऽदेशः। अचेतन् = "चिती संज्ञाने" इति धातोर्लङ्। अचेतन् अस्यन्तमित्यत्र "ङमो ह्रस्वादचि ङमुण्नित्यम्" इति ङमुट्। अविदुः = "विद ज्ञाने" इति धातोर्लङ्, "सिजभ्यस्तविदिभ्यश्चे"ति झेर्जुस्॥

भाषाऽर्थः—वानरोंने धनुषमें शरसन्धान करनेवाले इन्द्रजित्को नहीं जाना, धनुको धारण करते हुए उसको नहीं देखा, उसको बाण फेंकते हुए भी नहीं पाया, आखिर उससे शरविद्ध होते हुए उन लोगोंने उसे जान लिया॥ १६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

अश्रृण्वन्नन्यतः शब्दं प्रपलायन्त चाऽन्यतः ।
आक्रन्दमन्यतोऽकुर्वंस्तेनाऽहन्यन्त चाऽन्यतः ॥ १७ ॥

अन्वयः—(द्विषः) अन्यतः शब्दम् अश्रृण्वन् , अन्यतः प्रपलायन्त, अन्यतः आक्रन्दम् अकुर्वन् , तेन अन्यतः अहन्यन्त ॥

व्याख्या—अन्यतः = अन्यस्मिन्प्रदेशे, शब्दं = ध्वनिम्, अश्रृण्वन् = श्रुतवन्तः, इन्द्रजिद्द्विषो वानरा इति शेषः । अन्यतः = अन्यत्र प्रदेशे स्थिताः; प्रपलायन्त = प्रपलायिताः, अन्यतः = अन्यदेशस्थिताः, आक्रन्दं = रोदनम्, अकुर्वन् = अकार्षुः । तेन = इन्द्रजिता, अन्यतः = अन्यत्र, अहन्यन्त = व्यापादिताः ॥

व्युत्पत्तिः—अन्यतः = अन्यस्मिन्निति, "आद्यादिभ्य उपसंख्यानम्" इति तसिः । अश्रृण्वन्="श्रु श्रवणे" इति धातोर्लङ् . "श्रुव. शृ च"ति श्नभावः श्नुप्रत्ययश्च। प्रपलायन्त = प्रपराऽपूर्वकात "अय गतौ" इति धातोर्लङ् , "उपसर्गस्याऽयतौ" इति लत्वम् । अहन्यन्त "हन हिंसागत्योः" इति धातोः कर्मणि लङ् ॥

भाषाऽर्थः—कुछ वानरोंने दूसरे स्थानपर शब्द सुना । दूसरे प्रदेशमें रहे हुए कुछ भाग गये । कुछ दूसरे स्थानमें रोने लगे । इन्द्रजित्से दूसरी जगहपर कुछ वानर मार गये ॥ १७ ॥

प्रालोठन्त व्यभिद्यन्त परितो रक्तमस्रवन् ।
पर्यश्राम्यन्नतृष्यंश्च क्षतास्तेनाऽम्रियन्त च ॥ १८ ॥

अन्वयः—तेन क्षताः (केचित्) प्रालोठन्त, व्यभिद्यन्त, परितः रक्तम् अस्रवन् ; पर्यश्राम्यन् , अतृष्यन् ; अम्रियन्त च ॥

व्याख्या—तेन = इन्द्रजिता, क्षताः = आहताः सन्तः, प्रालोठन्त = भूमौ प्रलुठिताः, केचिदिति शेषः । व्यभिद्यन्त = व्यनीयन्त, हताः सन्तः इतस्ततो नीता इति भावः । परितः = समन्तात, रक्तं = रुधिरम्, अस्रवन् = मुक्तवन्तः, पर्यश्राम्यन् = परिश्रान्ताः, अतृष्यन् = पिपासिताः, अम्रियन्त च = मृताश्च ॥

व्युत्पत्तिः = प्रालोठन्त = प्रपूर्वकात् "लुठ प्रतिघाते" इति धातोर्लङ् । व्यभिद्यन्त=विपूर्वकात "भिदिर् विदारण" इति धातोः कर्मणि लङ् । अस्रवन्="स्रु स्रवण" इति धातोर्लङ् । पर्यश्राम्यन् = परिपूर्वकात् "श्रमु तपसि खेदे च"ति धातोर्लङ् , दिवादित्वात् "दिवादिभ्यः श्यन्" इति श्यन् । अतृष्यन्="ञितृषा पिपासायाम्" इति दैवादिकाद्धातोर्लङ् । अम्रियन्त="मृङ् प्राणत्यागे" इति धातोर्लङ् । "म्रियतेर्लुङ् लिङोश्चे"त्यात्मनेपदम् ॥

भाषाऽर्थः—इन्द्रजित्से आहत कुछ वानर जमीनपर गिर पड़े, कुछ इधर-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उधर ले जाये गये, कुछ रुधिर गिराने लगे; कुछ परिश्रान्त हुए, कुछ प्यासे हुए और कुछ मर गये ॥ १८ ॥

सौमित्रिराकुलस्तस्मिन् ब्रह्माऽस्त्रं सर्वरक्षसाम् ।
निधनायाऽऽजुहूषत्तं व्यष्टभ्नाद्रघुनन्दनः ॥ १९ ॥

अन्वयः—तस्मिन् सौमित्रिः आकुलः (सन्) सर्वरक्षसां निधनाय ब्रह्माऽस्त्रम् आजुहूषत् । रघुनन्दनः तं व्यष्टभ्नात् ॥

व्याख्या।—तस्मिन् = इन्द्रजिति, तादृशे सतीति शेषः । सौमित्रिः = लक्ष्मणः, आकुलः=व्यग्रचित्तः सन् , सर्वरक्षसां=सर्वराक्षसानां, निधनाय=मरणाय, ब्रह्मास्त्रं= ब्राह्ममस्त्रम्, आजुहूषत् = आह्वातुमैच्छत् । अथ रघुनन्दनः = रामः, तं = सौमित्रिं, व्यष्टभ्नात्=निवारितवान् , विभीषणस्य निरपराधानामन्येषां च राक्षसानां नाशभयादिति भावः ॥

व्युत्पत्तिः—सौमित्रिः = सुमित्रायाः अपत्यं पुमान् , "बाह्वादिभ्यश्चे"ति इञ् । आजुहूषत् = आङ्पूर्वकात् "ह्वेञ् स्पर्धायां शब्दे चे"ति धातोः सनि लङि रूपम् । "अभ्यस्तस्य चे"ति अभ्यस्तकारणस्य ह्वयतेः द्विर्वचनात्प्रागेव सम्प्रसारणम् । व्यष्टभ्नात् = विपूर्वकात् "स्तन्भु प्रतिबन्धे" इति सौत्राद्धातोर्लङ् "स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्चे"ति चात् श्नाप्रत्ययः । "स्तन्भेः" इति सस्य षः ॥

भावार्थः—इस प्रकारसे इन्द्रजित्के संहारक होने पर आकुल होकर लक्ष्मणने सब राक्षसोंके संहारके लिए ब्रह्मास्त्रको बुलानेकी इच्छा की । रामचन्द्रजीने उन्हें रोका ॥ १९ ॥

ततो मायामयीं सीतां घ्नन् खड्गेन वियद्गतः ।
अदृश्यतेन्द्राजिद्वाक्यमवदत्तं मरुत्सुतः ॥ २० ॥

अन्वयः—ततः इन्द्रजित् वियद्गतः (सन्) मायामयीं सीतां खड्गेन घ्नन् अदृश्यत । मरुत्सुतः तं वाक्यम् अवदत ॥

व्याख्या—ततः = अनन्तरम्, इन्द्रजित् = मेघनादः, वियद्गतः = आकाशगतः सन् , मायामयीं = मायानिर्मितां, सीतां = जानकीं, खड्गेन = असिना, घ्नन् = व्यापादयन् , अदृश्यत = दृष्टः । मरुत्सुतः=वायुपुत्रः हनूमानित्यर्थः । तम्=इन्द्रजितं, वाक्यं = वक्ष्यमाणप्रकारं वचनम्, अवदत् = भाषितवान् ॥

व्युत्पत्तिः—वियद्गतः = वियत् गतः, "द्वितीया श्रिताऽतीतपतितगताऽत्यस्तप्राप्ताऽऽपन्नैः" इति द्वितीयातत्पुरुषः । अदृश्यत = "दृशिर् प्रेक्षणे" इति धातोः कर्मणि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लङ् । अवदत् = "वद व्यक्तायां वाचि" इति धातोर्लङ्, अधातोः समानार्थकत्वेन "अर्थनिबन्धनेयं संज्ञा" इत्युक्तेर्द्विकर्मकत्वम् ॥

भाषाऽर्थः—अनन्तर इन्द्रजित् आकाशमें जाकर मायासे निर्मित सीताको खड्गसे मारता हुआ दिखाई पड़ा। वायुपुत्र हनूमानजीने उसे ऐसा वाक्य कहा ॥२०॥

माऽपाराध्नोदियं किंचिदभ्रश्यत्पत्युरन्तिकात् ।
सीता राक्षस ! मा स्मैनां निगृह्णाः पाप ! दुःखिताम् ॥२१॥

अन्वयः—"हे राक्षस ! सीता पत्युः अन्तिकात् अभ्रश्यत्, इयं किञ्चित् मा अपाराध्नोत् हे पाप ! दुःखिताम् एनां मा स्म निगृह्णाः" ॥

व्याख्या—हे राक्षस ! = हे यातुधान !, सीता=जानकी पत्युः=भर्तुः, रामस्येत्यर्थः । अन्तिकात्=समीपात्, अभ्रश्यत=अपगता, इयं=सीता, किञ्चित् = किमपि, मा अपाराध्नोत्=न अपराद्धा, भवद्विषय इति शेषः। तस्मात्कारणात् हे पाप = रे क्रूर !, दुःखितां = व्यथिताम्, एनां = सीतां, मा स्म निगृह्णाः = मा वधीः ॥

व्युत्पत्तिः—अभ्रश्यत = "भ्रशु भ्रंशु अधःपतने" इति दैवादिकाद्धातोर्लङ् "अनिदितां हल उपधायाः क्ङिति" इत्यनुनासिकलोपः । मा = नायं माङ् किन्तु माशब्दः, अत एतद्योगे न लुङ् । अपाराध्नोत् = अपपूर्वकात् "राध (साध संसिद्धौ)" इति स्वादिस्थधातोर्लङ् । हे पाप = पापमस्याऽस्तीति पापस्तत्सम्बुद्धौ, "अर्शआदिभ्योऽच्" इत्यच्प्रत्ययः । "नृशंसो घातुकः क्रूरः पाप" इत्यमरः । एनां = "द्वितीयाटौस्स्वेन" इत्यन्वादेशे एनादेशः । मा स्म निगृह्णाः = मास्मोपपदात् निपूर्वात् "ग्रह उपादाने" इति धातोः "स्मोत्तरे लङ् चे"ति वर्तमाने लङ् ॥

भाषाऽर्थः—"हे राक्षस ! ये (सीता) पति (राम) के समीपसे भ्रष्ट हुई (बिछुड़ गई)। इन्होंने तुम्हारा कुछ भी अपराध नहीं किया। हे क्रूर ! दुःखित इनको मत मारो" ॥ २१ ॥

पीडाकरममित्राणां कर्तव्यमिति शक्रजित् ।
अब्रवीत् खड्गकृष्टश्च तस्या मूर्धानमच्छिनत् ॥ २२ ॥

अन्वयः—"अमित्राणां पीडाकरं कर्तव्यम्" इति शक्रजित् अब्रवीत्; खड्गकृष्टः (सन्) तस्या मूर्धानम् अच्छिनत् ॥

व्याख्या—अमित्राणां = शत्रूणां, पीडाकरं = व्यथोत्पादकं, कर्मेति शेषः । कर्तव्यम् = अनुष्ठेयम्, अतो निरपराधाया अप्यस्या वधो युक्त इति भावः । इति = एवं शक्रजित् = इन्द्रजित्, अब्रवीत् = उक्तवान् । ततः खड्गकृष्टः = आकृष्टकरवालः सन्, तस्याः = पूर्वोक्तायाः मायामय्याः सीताया इति भावः । मूर्धानं=शिरः, अच्छिनत् = छिन्नवान् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—पीडाकरं=पीडां करोतीति, "कृञो हेतुताच्छील्यानुलोम्येषु" इति हेत्वर्थे टप्रत्ययः। "पीडा बाधा व्यथा दुःखम्" इत्यमरः। अब्रवीत्="ब्रूञ्-व्यक्तायां वाचि" इति धातोर्लङ्। "ब्रुव ईट्" इति ईट्। खड्गकृष्टः=कृष्टः खड्गो येन सः, "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ" इति प्रहरणार्थकस्य खड्गशब्दस्य पूर्वनिपातः। अच्छिनत्="छिदिर् द्वैधीकरणे" इति धातोर्लङ्, "हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्" इति तिपो लोपः ॥

भावार्थः—"शत्रुओंको पीडा करनेवाला कर्म करना चाहिए" इन्द्रजित्ने ऐसा कहा और तलवार खींचकर उस मायामयी सीताका शिर काट डाला ॥२२॥

यत्कृतेऽरीन् व्यगृह्णीम समुद्रमतराम च ।
सा हतेति वदन् राममुपातिष्ठन् मरुत्सुतः ॥ २३ ॥

अन्वयः—"यत्कृते अरीन् व्यगृह्णीम, समुद्रं च अतराम; सा हता" इति वदन् मरुत्सुतो रामम् उपातिष्ठत् ॥

व्याख्या—यत्कृते=यन्निमित्तं, यस्याः सीताया निमित्त इति भावः। अरीन्=शत्रून्, व्यगृह्णीम=विगृहीतवन्तः, वयमिति शेषः, एवं परत्रापि। समुद्रं च=सागरं च, अतराम=तीर्णवन्तः। सा=सीता, हता=व्यापादिता, इन्द्रजितेति शेषः। इति=एवं, वदन् मरुत्सुतः=वायुपुत्रः, हनूमानित्यर्थः। रामं=रामचन्द्रम्, उपातिष्ठत्=उपगतः ॥

व्युत्पत्तिः—व्यगृह्णीम=विपूर्वात् ग्रहधातोर्लङ् "नित्यं ङितः" इति उत्तमपुरुषस्य सकारस्य लोपः। अतराम="तॄ प्लवनतरणयोः" इति धातोर्लङ् "अतो दीर्घो यञि" इति दीर्घत्वम्। पूर्ववत्सकारस्य लोपः। उपातिष्ठत्=उपपूर्वकात् "ष्ठा गतिनिवृत्तौ" इति धातोर्लङ् "पाघ्राध्मास्थाम्ने"त्यादिना तिष्ठादेशः। उपश्लेषाऽभावात् "उपाद् देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्" इत्यनेन आत्मनेपदाऽभावः ॥

भावार्थः—"जिन सीताजीके लिए हमलोगोंने शत्रुओंसे विग्रह किया और समुद्रतरण किया वे मारी गई" ऐसा कहते हनुमान रामचन्द्रजीके पास गये ॥२३॥

ततः प्रामुह्यतां वीरौ राघवावरुतां तथा ।
उष्णं च प्राणितां दीर्घमुच्चैर्व्यक्रोशतां तथा ॥ २४ ॥

अन्वयः—ततो वीरौ राघवौ प्रामुह्यतां, तथा अरुताम्; दीर्घम् उष्णं च प्राणितां तथा उच्चैः व्याक्रोशताम् ॥

व्याख्या—ततः=हनूमद्वचनाऽनन्तरं, वीरौ=शूरौ, राघवौ=रामलक्ष्मणौ,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रामुह्यतां = प्रमोहं गतौ, तथा = तेन प्रकारेण, अरुतां = क्रन्दितवन्तौ, दीर्घम् = आयतम्, उष्णं च = अशीतं च, प्राणितां = निश्वसितवन्तौ, तथा = तेन प्रकारेण, उच्चैः = तारस्वरेण, व्याक्रोशतां = "हा सीते !" इत्याहूतवन्तौ ॥

व्युत्पत्तिः—प्रामुह्यतां = प्रपूर्वकात "मुह वैचित्ये" इति धातोर्लङ्। अरुतां = "रु शब्द" इत्यादादिकाद्धातोर्लङ्, "उतो वृद्धिर्लुकि हलि" इति वृद्धिर्न पित्वाऽभावात्। प्राणितां = प्रपूर्वकात् "अन प्राणन" इति धातोर्लङ्। "रुदादिभ्यः सार्वधातुके" इतीट्, "अनितेः" इति नस्य णत्वम्। व्याक्रोशतां = व्याङ्पूर्वकात् "क्रुश आह्वाने रोदने चे"ति धातोर्लङ् ॥

भाषाऽर्थः—हनूमानके वचनके अनन्तर वीर राम और लक्ष्मण अतिशय मोहको प्राप्त हुए, रोने लगे, दीर्घ और उष्ण निःश्वास लेने लगे और ऊँचे स्वरसे सीताजीको पुकारने लगे ॥ २४ ॥

तावभाषत पौलस्त्यो मा स्म प्ररुदितं युवाम् ।
ध्रुवं स मोहयित्वाऽस्मान् पापोऽगच्छन्निकुम्भिलाम् ॥ २५ ॥

अन्वयः—पौलस्त्यः तौ अभाषत—"युवां मा स्म प्ररुदितम्। ध्रुवं स पापः अस्मान् मोहयित्वा निकुम्भिलाम् अगच्छत् ॥

व्याख्या—पौलस्त्यः = विभीषणः, आगत्येति शेषः। तौ = राघवौ, अभाषत = उक्तवान्। युवां = रामलक्ष्मणौ, मा स्म प्ररुदितं = मा रोदिष्टम्। ध्रुवम् = अवश्यं, सः = इन्द्रजित्, पापः = क्रूरः, अस्मान्, मोहयित्वा = मायया धर्षयित्वा, निकुम्भिलां = लङ्कास्थितामग्निशालाम्, अगच्छत = गतः ॥

व्युत्पत्तिः—पौलस्त्यः = पुलस्त्यस्याऽपत्यं पुमान्, "तस्याऽपत्यम्" इत्यण्, "तद्धितेष्वचामादेः" इत्यादिवृद्धिश्च। अभाषत = "भाष व्यक्तायां वाचि" इति धातोर्लङ्। मा स्म प्ररुदितं = मास्मेत्युपपदात् प्रपूर्वकात् "रुदिर् अश्रुविमोचने" इति धातोः "स्मोत्तरे लङ् चे"ति वर्तमाने लङ्। अस्मान् = मुहधातोरकर्मकत्वात् "गतिबुद्धिप्रत्यवसानाऽर्थशब्दकर्माऽकर्मकाणामणि कर्ता स णौ" इति कर्मसंज्ञा। मोहयित्वा = "मुह वैचित्य" इति धातोर्णौ "समानकर्तृकयोः पूर्वकाले" इति क्त्वाप्रत्ययः। अगच्छत् = "गम्लृ गतौ" इति धातोर्लङ्, "इषुगमियमां छः" इति छत्वम्। अत्र भूताऽनद्यतनार्थकलङ्प्रयोगात् मायिकसीताहननाऽनन्तरं मेघनादे निकुम्भिलां प्राप्ते दिनान्तर आगत्य विभीषणोऽभाषतेत्यर्थः प्रतीयते ॥

भाषाऽर्थः—विभीषणने आकर राम और लक्ष्मणको कहा—"आप दोनों मत रोवें। अवश्य वह क्रूर इन्द्रजित् हम लोगोंको मायासे मोहित करके निकुम्भिला (लङ्कास्थित अग्निशाला) को चला गया है ॥ २५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मा स्म तिष्ठत तत्रस्थो वध्योऽसावहुताऽनलः ।
अस्त्रे ब्रह्मशिरस्युग्रे स्यन्दने चाऽनुपार्जिते ॥ २६ ॥

अन्वयः—मा स्म तिष्ठत । तत्रस्थः असौ अहुतानलो ब्रह्मशिरसि उग्रे अस्त्रे स्यन्दने च अनुपार्जिते (सति) वध्यः ॥

व्याख्या—मा स्म तिष्ठत = मा स्थात्, विलम्बं मा कार्ष्ट यूयमिति भावः । यतः तत्रस्थः = निकुम्भिलास्थः, असौ = इन्द्रजित्, अहुताऽनलः=अकृताऽग्निकार्यः, अत एव—ब्रह्मशिरसि = ब्रह्मशिरोनाम्नि, उग्रे = दुःसहे, अस्त्रे = आयुधे, स्यन्दने च=रथे च अनुपार्जिते = अप्राप्ते सत्येव, वध्यः = हन्तुं शक्यः, निकुम्भिलायां हवनेऽनुष्ठिते सति स ब्रह्मशिरोनामकं महाऽस्त्रं स्यन्दनं चाऽऽसादयिष्यति । तदनु स हन्तुमशक्यो भविष्यत्यतस्तद्धवने सत्वरं प्रत्यूहोऽनुष्ठीयतामिति भावः ॥

व्युत्पत्तिः—मा स्म तिष्ठत = मास्मेत्युपपदात् स्थाधातोः "स्मोत्तरे लङ् चे"ति वर्तमाने लङ् । तत्रस्थः=तत्र तिष्ठतीति, "सुपि स्थ"इत्यत्र योगविभागात्कप्रत्ययः । अहुताऽनलः = अहुतोऽनलो येन सः । वध्यः = हन्तुं शक्यः, "शकि लिङ् चे"त्यत्र चात्कृत्याः । अतः "हनो वा यद्वधश्च वक्तव्य" इति यत् वधादेशश्च । पक्षे "ऋहलो-र्ण्यत्" इति ण्यति "हनस्तोऽचिण्णलोः" इति तत्वे "हो हन्तेर्ञ्णिन्नेषु" इति कुत्वे च उपधावृद्धौ "घात्य" इत्यपि । यद्वा वधमर्हतीति वध्यः "दण्डादिभ्य" इति यत् । "वध्यः शीर्षच्छेद्य इमौ समौ" इत्यमरः ॥

भावाऽर्थः—आप लोग विलम्ब मत करें । निकुम्भिलामें विद्यमान इन्द्रजित् जब तक अग्निकार्य नहीं करता है, ब्रह्मशिरा नामके दुःसह अस्त्रका और रथका उपार्जन नहीं करता है तभी तक वह मारा जा सकता है ॥ २६ ॥

ब्रह्माऽदधाद्वधं तस्य तस्मिन् कर्मण्यसंस्थिते ।
प्रायच्छदाज्ञां सौमित्रेर्यूथपानां च राघवः ॥ २७ ॥

अन्वयः—तस्मिन् कर्मणि असंस्थिते ब्रह्मा तस्य वधम् अदधात् । राघवः सौमित्रेः यूथपानां च आज्ञां प्रायच्छत् ॥

व्याख्या—तस्मिन् = पूर्वोक्ते, हवनाऽऽख्ये इति भावः, कर्मणि = अनुष्ठाने, असंस्थिते = असमाप्त एव, ब्रह्मा = पितामहः, तस्य=इन्द्रजितः वधं = हिंसनम्, अदधात्=धारितवान्, नियुक्तवानिति भावः । विभीषणवाक्यश्रवणाऽनन्तरं—राघवः=रामचन्द्रः, सौमित्रेः = लक्ष्मणस्य, यूथपानां च = वानरयूथपतीनां, सुग्रीवादीनां चेति भावः । आज्ञाम्=आदेशं, गन्तुमिति शेषः । प्रायच्छत्= दत्तवान् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—अदधात्="डुधाञ् धारणपोषणयोः" इति जौहोत्यादिकाद्धातोर्लङ्, "जुहोत्यादिभ्यः श्लुः" इति श्लौ "श्लौ" इति द्वित्वम्। यूथपानां=यूथं पान्तीति यूथपास्तेषाम्, "आतोऽनुपसर्गे कः" इति कप्रत्ययः। प्रायच्छत्=प्रपूर्वकात् "दाण् दाने" इति धातोर्लङ्, "पाघ्राध्मास्थाम्नादाण्दृश्यर्ती" त्यादिना यच्छादेशः॥

भाषाऽर्थः—हवन कर्मके असमाप्त होनेपर ब्रह्माजीने इन्द्रजित् के वधका स्थापन किया है। ऐसा विभीषणका वचन सुनकर रामचन्द्रजीने लक्ष्मण और वानरयूथपतियोंको जानेकी आज्ञा दे दी॥ २७॥

युग्मम्—

तां प्रत्यैच्छन् सुसंप्रीतास्ततस्ते सविभीषणाः।
निकुम्भिलां समभ्यायान्न्यरुध्यन्त च राक्षसैः॥ २८॥
दिक्पालैः कदनं तत्र सेने प्राकुरुतां महत्।
ऐतां रक्षांसि निर्जित्य द्रुतं पौलस्त्यलक्ष्मणौ॥ २९॥

अन्वयः—ततः ते सविभीषणाः सुसंप्रीताः तां प्रत्यैच्छन्, निकुम्भिलां समभ्यायान् दिक्पालैः राक्षसैः न्यरुध्यन्त च॥ तत्र सेने महत् कदनं प्राकुरुताम्। रक्षांसि निर्जित्य पौलस्त्यलक्ष्मणौ द्रुतं ऐताम्॥

व्याख्या—ततः=रामाऽऽदेशाऽनन्तरं, ते=पूर्वोक्ताः, सविभीषणाः=विभीषणसहिताः सौमित्रिकपियूथपाः, सुप्रीताः=अतिप्रसन्नाः सन्तः, तां=रामाज्ञां, प्रत्यैच्छन्=प्रतिगृहीतवन्तः। निकुम्भिलां=तदाख्यां यज्ञशालां, समभ्यायान्=समभिगताः, तत्र च दिक्पालैः=दिग्रक्षकैः, राक्षसैः=यातुधानैः, निकुम्भिलारक्षकैरिति भावः। न्यरुध्यन्त च=निरुद्धाश्च, यज्ञानुष्ठानस्थाने प्रवेशं नो लब्धवन्त इति भावः॥ तत्र=निकुम्भिलायां, सेने=उभयपक्षस्थे सैन्ये, महत्=बृहत्, कदनं=विनाशनं युद्धं, प्राकुरुतां=कृतवत्यौ। रक्षांसि=राक्षसान्, निर्जित्य=निःशेषेण जित्वा, पौलस्त्यलक्ष्मणौ=विभीषणलक्ष्मणौ, द्रुतं=शीघ्रम् ऐताम्=गतवन्तौ।

व्युत्पत्तिः—सविभीषणाः=विभीषणेन सहिताः। प्रत्यैच्छन्=प्रतिपूर्वकात् "इष इच्छायाम्" इति धातोर्लङ्, "इषुगमियमां छः" इति छः समभ्यायान्=समभ्याङ्पूर्वकात् "या प्रापणे" इति धातोर्लङ्। "लङः शाकटायनस्यैवे"ति झेर्जुस्भावपक्षे "समभ्यायुः" इति रूपम्। न्यरुध्यन्त=निपूर्वकात् "रुधिर् आवरणे" इति धातोः कर्मणि लङ्॥ कदनं="कदनं युद्धमाहवे" इति कोषः। ऐताम्="इण् गतौ" इति धातोर्लङ्। "आटश्चे"ति वृद्धिः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—रामचन्द्रजी की आज्ञाको विभीषणके साथ लक्ष्मण और वानर यूथपति सुग्रीव आदियोंने ग्रहण किया। वे निकुम्भिलाको चले और वहाँ के रक्षक दिक्पाल राक्षसोंसे रोके गये ॥ २८ ॥

निकुम्भिलामें दोनों पक्षकी सेनाओंने बड़ी लड़ाई की। इसी बीचमें राक्षसोंको जीतकर विभीषण और लक्ष्मण शीघ्र गये ॥ २९ ॥

तत्रेन्द्रजितमैक्षेतां कृतधिष्ण्यं समाहितम् ।
सोऽजुहोत्कृष्णवर्त्मानमामनन् मन्त्रमुत्तमम् ॥ ३० ॥

अन्वयः—तत्र (तौ) कृतधिष्ण्यं समाहितम् इन्द्रजितम् ऐक्षेताम् । स उत्तमं मन्त्रम् आमनन् कृष्णवर्त्मानम् अजुहोत् ॥

व्याख्या—तत्र = निकुम्भिलायां, कृतधिष्ण्यं = विहिताग्न्यगारं, समाहितम् = एकाग्रमानसम्, इन्द्रजितं = मेघनादम्, ऐक्षेतां = दृष्टवन्तौ, पौलस्त्यलक्ष्मणाविति शेषः । सः = इन्द्रजित्, उत्तम = मुख्यं, मन्त्रं = मनुम्, आमनन् = आवर्तयन्, कृष्णवर्त्मानम् = अग्निम्, अजुहोत् = हुतवान् ।

व्युत्पत्तिः—कृतधिष्ण्यं = कृतं धिष्ण्यं येन स कृतधिष्ण्यस्तं, "धिष्ण्यं स्थाने गृहे भेऽग्नौ" इत्यमरः । आमनन् = आम्नतीति, आङ्पूर्वकात् "म्ना अभ्यासे" इति धातोर्लटः शत्रादेशः "पाघ्राध्मास्थाम्ने" त्यादिना मनादेशः । अजुहोत् = "हु दानादनयोः" इति धातोर्लङ् ।

भाषाऽर्थः—निकुम्भिलामें विभीषण और लक्ष्मणने अग्निशालाकी रचना करने वाले एकाग्रचित्त इन्द्रजित्को देखा। उत्तम मन्त्रकी आवृत्ति करते हुए उसने (इन्द्रजित ने) अग्नि में हवन किया ॥ ३० ॥

अध्यायच्छक्रजिद् ब्रह्म समाधेरचलन्न च ।
तमाह्वयत सौमित्रिरगर्जच्च भयंकरम् ॥ ३१ ॥

अन्वयः—शक्रजित् ब्रह्म अध्यायत् समाधेश्च न अचलत् । सौमित्रिः तम् आह्वयत भयङ्करम् अगर्जच्च ॥

व्याख्या—शक्रजित् = इन्द्रजित् ब्रह्म = परमात्मानम्, अध्यायत् = चिन्तितवान्, समाधेश्च = चित्तवृत्तिनिरोधाच्च, न अचलन् = नो चलितः । अत्राऽन्तरे सौमित्रिः = लक्ष्मणः, तं = शक्रजित युद्धाय आहूतवान्, भयङ्करं = भीषणं यथा तथा, अगर्जच्च = गर्जनं कृतवांश्च ।

व्युत्पत्तिः—अध्यायत् = "ध्यै चिन्तायाम्" इति धातोर्लङ् । "आदेच उपदेशेऽशिति" इति आत्वं शिति न भवति । आह्वयत = आङ्पूर्वकात् "ह्वेञ् स्पर्धायां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शब्दे चे"ति धातोर्लङ् । स्पर्धायां "स्पर्धायामाङः" इति आत्मनेपदम् । अगर्जत् = "गर्ज शब्दे" इति धातोर्लङ् ॥

भाषाऽर्थः—इन्द्रजित्‌ने परमात्माका चिन्तन किया । वह समाधिसे चलित नहीं हुआ । इसी बीचमें लक्ष्मणजीने उसे ललकारा और भयङ्कर गर्जन भी किया ॥

अकुप्यदिन्द्रजित्तत्र पितृव्यं चाऽगदद् वचः ।
त्वमत्राऽजायथा देह इहाऽपुष्यत्सुराऽमिषैः ॥ ३२ ॥

अन्वयः—तत्र इन्द्रजित् अकुप्यत् पितृव्यं वचश्च अगदत्—"त्वम् अत्र अजायथाः, इह देहः सुराऽमिषैः अपुष्यत् ॥

व्याख्या—तत्र = तस्मिन्, लक्ष्मणस्य युद्धाह्वाने गर्जने च सतीति भावः । इन्द्रजित् = मेघनादः, अकुप्यत्=कुपितः, पितृव्यं=पितृभ्रातरं, विभीषणमित्यर्थः । वचश्च = वचनं च, वक्ष्यमाणप्रकारमिति भावः । अगदत् = उक्तवान् त्वं=विभीषणः, अत्र = अस्मिन्, राक्षसकुल इति भावः । अजायथाः = जातोऽसि । इह = अत्र, रक्षःकुल इति तात्पर्यम् । देहः = शरीरं, तवेति शेषः । सुराऽमिषैः=मद्यमांसैः, अपुष्यत्=पुष्टः । "देहमपुष्य" इति पाठान्तरं तत्र देहं = शरीरम्, अपुष्यः = पोषितवानसि इत्यर्थः । अत्र पुषधातुरन्तर्भावितण्यर्थ इति जयमङ्गलः । वस्तुतस्तु पुषधातुरपि जिधातुवत् अकर्मकः सकर्मकश्च ॥

व्युत्पत्तिः—अकुप्यत् = "कुप क्रोधे" इति दैवादिकाद्धातोर्लङ् । पितृव्यं = पितुर्भ्राता पितृव्यस्तं, "पितृव्यमातुलमातामहपितामहाः" इति सूत्रनिर्देशात् "पितुर्भ्रातरि व्यत्" इति व्यत्प्रत्ययः । अगदत् = "गद व्यक्तायां वाची"ति धातोर्लङ्, अस्य धातोर्ब्रूधातोः समानार्थकत्वाद् द्विकर्मकत्वम् । अजायथाः = "जनी प्रादुर्भावे" इति दैवादिकादनुदात्तेतो धातोर्लङ् । "ज्ञाजनोर्जा" इति जाऽऽदेशः । अपुष्यत् = "पुष पुष्टौ" इति दैवादिकाद्धातोर्लङ् ।

भाषाऽर्थः—लक्ष्मणजीके ललकारने और गर्जन करने पर इन्द्रजित् कुपित हुआ और पितृव्य (चचा) विभीषणको वचन कहने लगा—"तुम राक्षसकुलमें पैदा हुए हो और इसी कुलमें तुम्हारा शरीर सुरा और मांससे पुष्ट हुआ ॥ ३२ ॥

इहाऽजीव इहैव त्वं क्रूरमारभथाः कथम् ।
नाऽपश्यः पाणिमार्द्रं त्वं बन्धुत्वं नाऽप्यपैक्षथाः ॥ ३३ ॥

अन्वयः—(हे पितृव्य !) इह अजीवः, इह एव त्वं क्रूरं (कर्म) कथम् आरभथाः; त्वम् आर्द्रं पाणिं न अपश्यः बन्धुत्वम् अपि न अपैक्षथाः ॥

व्याख्या—(हे पितृव्य !) इह = राक्षसकुले, अजीवः = जीवितोऽसि, इह

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एव = अस्मिन्नेव राक्षसकुले, त्वं = विभीषणः, क्रूरं = दारुणं, कर्मेति शेषः । कथं = केन प्रकारेण, आरभथाः = आरब्धवानसि । त्वं = विभीषणः, आर्द्रं = क्लिन्नं, पाणिं = करं, न अपश्यः = नो दृष्टवानसि; भोजनाऽनन्तरं यावता समयेन पाणिः शुष्यति तावन्तमपि समयं नाऽपेक्षितवानसि इति भावः, मनोमालिन्यस्य स्वल्पेनैव कालेन पूर्वजात स्नेहबन्धनमुपकारभरं च विस्मृत्य दारुणया विधयाऽपकाराचरणं कर्तुं प्रवृत्तोऽसीति हार्दोऽभिप्रायः । किं बहुना बन्धुत्वमपि = एकगोत्रत्वमपि, न अपैक्षथाः = नाऽपेक्षितवानसि ॥

व्युत्पत्तिः—अजीवः = "जीव प्राणधारणे" इति धातोर्लङ् । आरभथाः = आङ् पूर्वकात् "रभ राभस्ये" इति धातोर्लङ्, राभस्यं नामोपक्रमः । आर्द्रं = "आर्द्रं सार्द्रं क्लिन्नं तिमितं स्तिमितं समुन्नमुत्तं च"इत्यमरः । बन्धुत्वं = बन्धोर्भावो बन्धुत्वं, तत्र "तस्य भावस्त्वतलौ" इति त्वप्रत्ययः ॥

भाषाऽर्थः—चाचाजी ! तुमने यहीं जीवन धारण किया है, तुमने यहीं पर क्रूर कर्मका कैसे आरम्भ किया ? तुमने भीगे हुए हाथको भी नहीं देखा और बन्धुताकी भी अपेक्षा नहीं की ॥ ३३ ॥

अधर्मान्नाऽत्रसः पाप ! लोकवादान्न चाऽबिभेः ।
धर्मदूषण ! नूनं त्वं नाऽजाना नाऽशृणोरिदम् ॥ ३४ ॥

अन्वयः—हे पाप ! (त्वम्) अधर्मात् न अत्रसः लोकवादाच्च न अबिभेः । हे धर्मदूषण ! नूनं त्वम् इदं न अजानाः न अशृणोः ॥

व्याख्या—हे पाप = हे क्रूर ! अधर्मात् = पापात्, न अत्रसः = न त्रस्तोऽसि, त्वमिति शेषः । लोकवादाच्च=जनाऽपवादाच्च, न अबिभेः=नभीतोऽसि । हे धर्मदूषण= हे पुण्योच्छेदक !, नूनम् = अवश्यं, त्वं = विभीषणः, इदं = वक्ष्यमाणप्रकारकं वचनं, न अजानाः = नो ज्ञातवानसि, न अशृणोः = नो श्रुतवानसि ॥

व्युत्पत्तिः—अधर्मात् = भयाऽर्थस्य त्रसीधातोर्योगे "भीत्राऽर्थानां भयहेतुः" इत्यपादानत्वं ततः "अपादाने पञ्चमी"ति पञ्चमी । अत्रसः = "त्रसी उद्वेगे" इति दैवादिकाद्धातोर्लङ्, "वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः" इति श्यनोऽभावपक्षे शप् । लोकवादात् = अत्राऽपि पूर्वसूत्रेणाऽपादानत्वम् । अबिभेः = "ञिभी भये" इति—जुहोत्यादिधातोर्लङ् "श्लौ" इति द्विर्वचनम् । धातोर्गुणश्च । धर्मदूषण=दूषयतीति दूषणः, "दुष वैकृत्ये" इति धातोः "कृत्यल्युटो बहुलम्" इति बहुलग्रहणसामर्थ्यात् कर्तरि ल्युट् "दोषो णौ" इत्युपधाया ऊत्वम् । अत्र नन्द्यादिगणे दुषधातोः पाठेऽपि पूजार्थत्वाऽभावात् न ल्युः । धर्मस्य दूषणो धर्मदूषणस्तत्सम्बुद्धौ ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुटुम्बक्षयकारककर्माऽनुष्ठातृत्वाद्धर्मदूषणत्वमवसेयम् । अजानाः="ज्ञा अवबोधने" इति क्र्यादिस्थादुदात्तेतो धातोर्लङ् "ज्ञाजनोर्जा" इति जादेशः । अश्रृणोः="श्रु श्रवण" इति धातोर्लङ्, "श्रुवः शृ च"ेति शृरादेशः ॥

भाषाऽर्थः—हे नृशंस ! तुम अधर्मसे नहीं डरते हो और लोकाऽपवादसे भी भय नहीं करते हो ! हे पुण्योच्छेदक ! अवश्य तुमने इस वचन को न तो जाना है और न सुना ही है ॥ ३४ ॥

तदेव वचनमाह—

निराकृत्य यथा बन्धून् लघुत्वं यात्यसंशयम् ।
पितृव्येण ततो वाक्यमभ्यधीयत शक्रजित् ॥ ३५ ॥

अन्वयः—यथा (लोकः) बन्धून् निराकृत्य असंशयं लघुत्वं याति" । ततः पितृव्येण शक्रजित् वाक्यम् अभ्यधीयत ॥

व्याख्या—"यथा=येन प्रकारेण, बन्धून्=बान्धवान्, निराकृत्य=परित्यज्य, असंशयं=निश्चितं यथा तथा, लघुत्वं=लाघवं, याति=गच्छति, लोक इति शेषः । "त्वमिदं नाऽजाना नाऽश्रृणोः" इति पूर्वश्लोकस्थपदैः सम्बन्धः । ततः=औपव्यवचनाऽनन्तरं, पितृव्येण=पितृभ्रात्रा, विभीषणेनेत्यर्थः । शक्रजित्=इन्द्रजित्, वाक्यं=वचनम्, अभ्यधीयत=अभिहितः ॥

व्युत्पत्तिः—असंशयं=संशयस्य अभावस्तद्यथा तथा, "अव्ययं विभक्ती"त्यादिना अर्थाऽभावेऽव्ययीभावः । वाक्यं-"तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकाऽन्विता ।" इत्यमरः । अभ्यधीयत=अभिपूर्वकात् "डुधाञ् धारणपोषणयोः" इति धातोः कर्मणि लङ्, "दाधा घ्वदाप्" इति घुसंज्ञत्वेन "घुमास्थागापाजहातिसां हलि" इतीत्वम् ॥

भावार्थः—"जैसे कि—लोक बान्धवोंका परित्याग कर निश्चय लाघवको प्राप्त होता है" । तदनन्तर चाचा विभीषण ने भतीजे इन्द्रजित्को निम्नस्थ वाक्य कहे ॥ ३५ ॥

मिथ्या मा स्म व्यतिक्रामो मच्छीलं मा न बुध्यथाः ।
सत्यं समभवं वंशे पापानां रक्षसामहम् ॥ ३६ ॥

अन्वयः—(हे इन्द्रजित् !) मिथ्या मा स्म व्यतिक्रामः, मच्छीलं मा न बुध्यथाः, अहं पापानां रक्षसां वंशे सत्यं समभवम् ॥

व्याख्या—(हे इन्द्रजित्) मिथ्या=मृषा, मा स्म व्यतिक्रामः=व्यतिक्रमं न कुरु, त्वमिति शेषः । मच्छीलं=मत्स्वभावं, मा न बुध्यथाः=मा न बुद्धाः;

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि तु ज्ञातवानसीति भावः । अहं = विभीषणः, पापानां = क्रूराणां, रक्षसां = राक्षसानां, वंशे = कुले, सत्यं = तथ्यं, समभवं = संभूतः ॥

व्युत्पत्तिः—मा स्म व्यतिक्रामः = मास्मोपपदात् व्यतिपूर्वकात् "क्रमु पादविक्षेप" इति धातोः "स्मोत्तरे लङ् चे"ति लङ् । "क्रमः परस्मैपदेषु" इति शिति दीर्घत्वम् । मा स्म बुध्यथाः = मास्मोपपदपूर्वकात् "बुध अवगमन" इति दैवादिकाद्धातोः पूर्वसूत्रेण लङ् । समभवं = संपूर्वकाद् भूधातोर्लङ् ॥

भावार्थः—हे इन्द्रजित् ! तुम झूठमूठ व्यतिक्रम मत करो । तुम मेरे स्वभावको नहीं जानते हो यह नहीं (जानते ही हो) मैं क्रूर राक्षसोंके वंशमें सचमुच ही उत्पन्न हुआ हूँ ॥ ३६ ॥

न त्वजायत मे शीलं तादृग् , यादृक् पितुस्तव ।
क्षयाऽऽवहेषु दोषेषु वार्यमाणो मयाऽऽरमत् ॥ ३७ ॥

अन्वयः—तु मे शीलं तादृक् न अजायत यादृक् तव पितुः (अजायत) क्षयाऽऽवहेषु दोषेषु मया वार्यमाणः (दशग्रीवः) आरमत् ॥

व्याख्या—तु = परन्तु, मम क्रूररक्षोवंशप्रसूतत्वेऽपीति भावः । मे = मम, शीलं = स्वभावः, तादृक् = तादृशं, न अजायत = न अभूत्, यादृक् = यादृशं, तव = भवतः, पितुः = जनकस्य, रावणस्येत्यर्थः, अजायतेति शेषः । क्षयावहेषु = विनाशोत्पादकेषु, दोषेषु = दूषणेषु, परदारहरणादिष्विति भावः । मया = अनुजेन, वार्यमाणः = क्रियमाणवारणेऽपि, आरमत् = रतिं कृतवान् , क्षयावहेषु दोषेष्विति भावः ॥

व्युत्पत्तिः—क्षयाऽऽवहेषु = आवहन्तीति आवहाः, पचाद्यच् क्षयस्यावहाः, तेषु । आरमत् = आङ्पूर्वकात् "रमु क्रीडायाम्" इतिधातोः "व्याङ्परिभ्यो रमः" इति परस्मैपदं ततो लङ् ॥

भावार्थः—परन्तु मेरा स्वभाव वैसा नहीं हुआ जैसा तुम्हारे पिता का हुआ । परस्त्रीहरण आदि नाश करनेवाले दोषोंमें मुझसे निवारित होते हुए भी रावणने उन्हींमें प्रीति की ॥ ३७ ॥

दशग्रीवोऽहमेतस्मादत्यजं न तु विद्विषन् ।
परस्वान्याजर्जयन्नारीरन्यदीयाः परामृशत् ॥ ३८ ॥

अन्वयः—अहम् एतस्मात् (दशग्रीवम्) अत्यजं । न तु विद्विषन् । दशग्रीवः परस्वानि आर्जयत् , अन्यदीया नारीः परामृशत् ॥

व्याख्या—अहं = विभीषणः, एतस्मात् = कारणात् , अत्यजं = त्यक्तवानस्मि, दशग्रीवमिति शेषः । न तु विद्विषन् = न पुनरमित्रीभवन् , त्यक्तवानस्मीति शेषः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशग्रीवस्य दोषजातमाह—परस्वानीति । दशग्रीवः = रावणः, परस्वानि = अन्यधनानि, आर्जयत् = अन्यैर्ग्राहितवान् , अन्यदीयाः = परकीयाः, नारीः = ललनाः, पराम्रशत् = स्पृष्टवान् ॥

व्युत्पत्तिः—अत्यजं = "त्यज हानौ" धातोर्लङ् । विद्विषन् = विद्वेष्टीति, विपूर्वकात् "द्विष अप्रीतौ" इति धातोर्लटः "द्विषोऽमित्रे" इति शतृप्रत्ययः । आर्जयत् = "अर्ज (सर्ज) अर्जने" भौवादिकाद्धातोर्हेतुमण्णिच् लङ् । यद्वा "अर्ज प्रतियत्ने" इति चौरादिकात् धातोर्लङ् । अन्यदीयाः = अन्येषामिमा अन्यदीयास्ताः, गहादेराकृतिगणत्वात् "गहादिभ्यश्चे"ति छप्रत्ययः, "अषष्ठ्यतृतीयास्थस्याऽन्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु" इति दुगागमः । पराम्रशत्=परापूर्वकात् "मृश आमर्शने" इति तौदादिकादनुदात्तेतो धातोर्लङ् ॥

भाषाऽर्थः—मैंने इस कारणसे रावणको छोड़ा, वैर करते हुए नहीं (छोड़ा) रावणने परधनोंका दूसरेसे ग्रहण कराया, दूसरोंकी स्त्रियोंका स्पर्श किया ॥ ३८ ॥

व्यजिघृक्षत्सुरान्नित्यं प्रामाद्यद् गुणिनां हिते ।
आशङ्कत सुहृद्बन्धूनवृद्धान् बह्वमन्यत ॥ ३९ ॥

अन्वयः—(दशग्रीवः) सुरान् नित्यं व्यजिघृक्षत् , गुणिनां हिते प्रामाद्यत् , सुहृद्बन्धून् आशङ्कत अवृद्धान् बहु अमन्यत ॥

व्याख्या—सुरान् = देवान् , नित्यं = सततं, व्यजिघृक्षत् = विग्रहीतुमैच्छत् , दशग्रीव इति शेषः, एवं परत्राऽपि । गुणिनां = गुणवतां, माल्यवत्प्रभृतीनामित्यर्थः । हिते = हितकारके वचने, प्रामाद्यत् = प्रमादं गतः । सुहृद्बन्धून् = मित्रज्ञातीन् , आशङ्कत = शङ्कितवान् , अवृद्धान् = अपण्डितान् , प्रहस्तादीनित्यर्थः । बहु=अधिकं यथा तथा, अमन्यत = श्लाघितवान् ॥

व्युत्पत्तिः—व्यजिघृक्षत् = विपूर्वकात् "ग्रह उपादाने" इति धातोः सनि लङ् । "सनि ग्रहगुहोश्चे"ति इडागमनिषेधः । "ग्रहिज्ये"त्यादिना सम्प्रसारणं, सनः षत्वस्याऽसिद्धत्वाद्भष्भावः । गुणिनां = गुणाः सन्ति एषां ते गुणिनस्तेषाम्, "अत इनिठनौ" इतीनिः । प्रामाद्यत् = प्रपूर्वकात् "मदी हर्षे" इति दैवादिकाद्धातोर्लङ् , "शमामष्टानां दीर्घः श्यनि" इति दीर्घत्वम् । सुहृद्बन्धून् = शोभनं हृदयं येषां ते सुहृदः "सुहृद्दुर्हृदौ मित्राऽमित्रयोः" इति हृदयस्य हृद्भावो निपात्यते । सुहृदश्च बन्धवश्च सुहृद्बन्धवस्तान् ॥

भाषाऽर्थः—रावणने देवताओंसे निरन्तर लड़नेकी इच्छा की, माल्यवान् आदि गुणियोंके हितकारक वचनमें प्रमाद किया; मित्रों और ज्ञातियोंमें शङ्का की अविद्वान् प्रहस्त आदियोंकी अधिक प्रशंसा की ॥ ३९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युग्मम्—

दोषैररमतैभिस्ते पिताऽत्यज्यत यैर्मया ।
ततोरुष्यदनर्दच्च द्विविंशतिभिरेव च ॥ ४० ॥
शरैरताडयद्बन्धुं पञ्चविंशतिभिर्नृपम् ।
रावणिस्तस्य सौमित्रिरमथ्नाच्चतुरो हयान् ॥ ४१ ॥

अन्वयः—एभिः दोषैः ते पिता अरमत । यैः मया अत्यज्यत" । ततो रावणिः अरुष्यत् अनर्दच्च, द्विविंशतिभिः शरैः एव बन्धुं पञ्चविंशतिभिः शरैः नृपम् अताडयन् । सौमित्रिः तस्य चतुरो हयान् अमथ्नात् ॥

व्याख्या—एभिः = पूर्वोक्तैः, दोषैः = दूषणैः, ते = तव, पिता = जनकः, रावण इत्यर्थः । अरमत = क्रीडितवान् । यैः = दोषैः, हेतुभिः । मया = विभीषणेन. अत्यज्यत = त्यक्तः, स्वपितेति शेषः । ततः = पितुर्दोषप्रकाशनवचनादनन्तरं, रावणिः = रावणपुत्रः, इन्द्रजिदित्यर्थः । अरुष्यत् = रुष्टः, अनर्दच्च = अगर्जच्च, द्विविंशतिभिः = चत्वारिंशता, शरैः = बाणैः, एव, बन्धुं = पितृबन्धुं, पितृव्यं विभीषणमिति भावः । पञ्चविंशतिभिः = शतसंख्यकैरिति भावः । शरैः = बाणैः, नृपं = राजानं, लक्ष्मणमित्यर्थः । अताडयत् = ताडितवान् , सौमित्रिः = लक्ष्मणः, तस्य = रावणेः, चतुरः = चतुःसंख्यान् , हयान् = अश्वान् , रथनियुक्तानिति भावः । अमथ्नात् = हिंसितवान् ॥

व्युत्पत्तिः—अत्यज्यत = "त्यज हानौ" इति धातोः कर्मणि लङ् । रावणिः = रावणस्याऽपत्यं पुमान् , "अत इञ्" इति इञ् । अरुष्यत् = "रुष रुष्टौ" इति दैवादिकाद्धातोर्लङ् । अनर्दत = "नर्द (गर्द) शब्दे" इति धातोर्लङ् । द्विविंशतिभिः = द्वे विंशती येषां ते द्विविंशतयस्तैः, अत्र द्वौ च विंशतिश्च इति द्व्यधिका विंशतिर्वा इति व्याख्याने तु 'द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः" इति सूत्रेणाऽऽत्वे द्वाविंशतिस्तृतीयायां तु द्वाविंशत्या इति रूपं स्यात् । पञ्चविंशतिभिः = पञ्च विंशतयो येषां ते पञ्चविंशतयस्तैरत्राऽपि पूर्ववद्बहुव्रीहिः, नो चेत् "द्वाविंशत्या" इतिवत् "पञ्चविंशत्ये"ति रूपं स्यात् । अमथ्नात् = "मन्थ विलोडने" इति क्र्यादिस्थधातोर्लङ् ॥

भाषाऽर्थः—इन (पूर्वोक्त) दोषोंसे तुम्हारे पिता (रावण) ने क्रीडा की. जिनके कारण मैंने उन्हें छोड़ दिया । ऐसा सुनकर इन्द्रजित् रुष्ट हुआ और गर्जन करने लगा । उसने चालिस बाणोंसे विभीषणको और सौ बाणोंसे लक्ष्मणजीको ताडन किया । तब उन्होंने (लक्ष्मणने) उसके चार घोड़ोंको मार डाला ॥ ४०-४१ ॥

सारथिं चाऽलुनाद्बाणैरभनक् स्यन्दनं तथा ।
सौमित्रिरसकिरद्बाणैः परितो रावणिस्ततः ॥ ४२ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—(सौमित्रिः) (तस्य) सारथिम् अलुनात् तथा बाणैः स्यन्दनम् अभनक्। ततो रावणिः सौमित्रिं परितो बाणैः अकिरत् ॥

व्याख्या—सारथिं = सूतं, रावणेरिति शेषः। अलुनात्=छिन्नवान् , सौमित्रिरिति शेषः, एवं परत्राऽपि। तथा = तेन प्रकारेण, बाणैः=शरैः, स्यन्दनं = रथम्, अभनक् = भग्नवान्। ततः = अनन्तरं, रावणिः = इन्द्रजित् , सौमित्रिं परितः = लक्ष्मणमभितः, बाणैः = शरैः, अकिरत् = छादितवान् ॥

व्युत्पत्तिः—अलुनात् = "लूञ् छेदने" इति क्र्यादिस्थधातोर्लङ् , "क्र्यादिभ्यः श्ना" इति श्नाप्रत्ययः, "प्वादीनां ह्रस्वः" इति ह्रस्वत्वम्। अभनक्="भञ्जो आमर्दने" इति रौधादिकधातोर्लङ् "रुधादिभ्यः श्नम्" इति श्नम्। सौमित्रिं="परित" इति पदेन योगे "अभितः परितः समयानिकषाहाप्रतियोगेऽपि" इति द्वितीया। अकिरत्="कॄ विक्षेपे" इति तौदादिकधातोर्लङ् , "तुदादिभ्यः शः" इति शप्रत्ययः "ॠत इद्धातोः" इतीत्वम् ॥

भाषाऽर्थः—लक्ष्मणजीने इन्द्रजित्के सारथिको काट डाला और बाणोंसे उसके रथको तोड़ा। तब इन्द्रजित्ने लक्ष्मणजीके चारों तरफ बाणोंसे आच्छादित कर दिया ॥ ४२ ॥

तावस्फावयतां शक्तिं बाणांश्चाऽकिरतां मुहुः।
वारुणं लक्ष्मणोऽक्षिप्यदक्षिपद्रौद्रमिन्द्रजित् ॥ ४३ ॥

अन्वयः—तौ शक्तिम् अस्फावयतां, बाणांश्च मुहुः अकिरताम्; लक्ष्मणो वारुणम् अक्षिप्यत् , इन्द्रजित् रौद्रम् अक्षिपत् ॥

व्याख्या—तौ = सौमित्रिरावणी, शक्तिं = सामर्थ्यम्, अस्फावयतां = वर्धितवन्तौ, बाणांश्च = शरांश्च, मुहुः = वारं वारम्, अकिरतां = विक्षिप्तवन्तौ। लक्ष्मणः = सौमित्रिः, वारुणं = वरुणदैवतमस्त्रम्, अक्षिप्यत् = क्षिप्तवान्। इन्द्रजित् = रावणिः, रौद्रं = रुद्रदैवतमस्त्रं, पाशुपतमित्यर्थः। अक्षिपत् = क्षिप्तवान् ॥

व्युत्पत्तिः—अस्फावयतां="स्फायी (ओप्यायी) वृद्धौ" इति धातोर्णौ लङ्। "स्फायो वः" इति वत्वम्। वारुणं=वरुणस्येदं वारुणं तत् , "तस्येदम्" इत्यण्। अक्षिप्यत् = "क्षिप प्रेरणे" इति दैवादिकाद्धातोर्लङ्। रौद्रं = रुद्रस्येदं रौद्रं, तत् , पूर्ववदण्। अक्षिपत् = "क्षिप प्रेरणे" इति तौदादिकधातोर्लङ् ॥

भाषाऽर्थः—लक्ष्मण और इन्द्राजत्ने अपनी शक्ति बढ़ाई, बाणोंको भी बारबार फेंका। तब लक्ष्मणने वारुणाऽस्त्र फेंका, उसका प्रतिकार करनेके लिए इन्द्रजित् ने पाशुपताऽस्त्र छोड़ा ॥ ४३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ते परस्परमासाद्य शस्त्रे नाशमगच्छताम् ।
आसुरं राक्षसः शस्त्रं ततो घोरं व्यसर्जयत् ॥ ४४ ॥

अन्वयः—ते शस्त्रे परस्परम् आसाद्य नाशम् अगच्छताम् । ततो राक्षसो घोरम् आसुरं शस्त्रं व्यसर्जयत् ॥

व्याख्या—ते = सौमित्रिरावणिप्रहिते, शस्त्रे = आयुधे वारुणपाशुपतास्त्रे इति भावः । परस्परं = मिथः । आसाद्य = प्राप्य, नाशम् = अदर्शनम्, अगच्छतां = प्राप्तौ, शस्त्रनाशाऽनन्तरं, राक्षसः = यातुधानः, इन्द्रजिदित्यर्थः, घोरं = भयङ्करम्, आसुरम् = असुरदैवतं, शस्त्रम् = आयुधं, व्यसर्जयत् = क्षिप्तवान् ॥

व्युत्पत्तिः—आसुरम् = असुरो देवताऽस्येति आसुरं, तत् "साऽस्य देवता" इत्यण् ॥

भावार्थः—शस्त्र (वारुणास्त्र और पाशुपतास्त्र) परस्पर प्राप्त होकर नष्ट हुए । तब इन्द्रजित्‌ने भयङ्कर आसुरास्त्र छोड़ा ॥ ४४ ॥

तस्मान्निरपतद् भूरि शिलाशूलेष्टिमुद्गरम् ।
माहेश्वरेण सौमित्रिरस्तम्भात्तत्सुदुर्जयम् ॥ ४५ ॥

अन्वयः—तस्मात् भूरि शिलाशूलेष्टिमुद्गरं निरपतत् । सौमित्रिः सुदुर्जयं यत् माहेश्वरेण अस्तम्भात् ॥

व्याख्या—तस्मात् = इन्द्रजित्प्रहितादासुरास्त्रात्, भूरि = प्रचुरं, शिलाशूलेष्टिमुद्गरं = पाषाणशूलखड्गद्रुघणं, निरपतत् = निर्गतम् । सौमित्रिः = लक्ष्मणः, अतिशयदुःखेन जेतुं शक्यं, तत् = पूर्वोक्तम्, आसुराऽस्त्रमित्यर्थः । माहेश्वरेण = माहेश्वराऽस्त्रेण, अस्तम्भात् = स्तम्भितवान् ॥

व्युत्पत्तिः—शिलाशूलेष्टिमुद्गरं = शिलाश्च शूलानि च इष्टयश्च मुद्गराश्चेति समाहारद्वन्द्वः । इष्टिः प्रहरणविशेष इति जयमङ्गलः । "इष्टिः खड्गः प्रसारोऽसिर्धर्मपालः प्रजाकरः ।" इति वैजयन्तीति भरतः । सुदुर्जयं = दुःखेन जेतुं शक्यं दुर्जयम्, "ईषद्दुःसुषु कृच्छ्राऽकृच्छ्राऽर्थेषु खल्" इति खल्प्रत्ययः । अत्यन्तं दुर्जयं सुदुर्जयं, तत् "कुगतिप्रादयः" इति समासः । माहेश्वरेण = महेश्वरो देवताऽस्येति माहेश्वरं, तेन "साऽस्य देवता" इत्यण् । अस्तम्भात् = रोधनाऽर्थात् सौत्रात्स्तम्भुधातोः लङ् "स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्चे"ति चात् श्नाप्रत्ययः ॥

भावार्थः—इन्द्रजित्से प्रेरित उस आसुराऽस्त्रसे प्रचुर पत्थर, शूल, तलवार और मुद्गर गिर पड़े । लक्ष्मणजीने अतिशय दुःखसें जीते जानेवाले उस आसुराऽस्त्रको माहेश्वराऽस्त्रसे रोका ॥ ४५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततो रौद्रसमायुक्तं माहेन्द्रं लक्ष्मणोऽस्मरत् ।
तेनाऽऽगम्यत घोरेण शिरश्चाऽह्रियत द्विषः ॥ ४६ ॥

अन्वयः—ततो लक्ष्मणो रौद्रसमायुक्तं माहेन्द्रम् अस्मरत् । घोरेण तेन आगम्यत, द्विषः शिरश्च अह्रियत ॥

व्याख्या—ततः—अनन्तरं, लक्ष्मणः = सौमित्रिः, रौद्रसमायुक्तं = रौद्राऽस्त्रसहितं, माहेन्द्रं = महेन्द्रदैवतमस्त्रम्, अस्मरत् = चिन्तितवान् । घोरेण = भयङ्करेण तेन = अस्त्रेण, आगम्यत = आगतं, द्विषः = शत्रोः, इन्द्रजित इत्यर्थः । शिरश्च = मूर्धा च, अह्रियत = हृतं, छिन्नमित्यर्थः, तेनाऽस्त्रेणेति शेषः ॥

व्युत्पत्तिः—आगम्यत = आङ्पूर्वकाद् गम्लृधातोर्भावे लङ् । अह्रियत = "हृञ् हरणे" इति धातोः कर्मणि लङ् ॥

भाषाऽर्थः—तदनन्तर लक्ष्मणजीने रौद्र अस्त्रसे युक्त माहेन्द्र अस्त्रका चिन्तन किया । भयङ्कर उस अस्त्रने आनेके अनन्तर ही शत्रु (इन्द्रजित्) के शिरको काट डाला ॥ ४६ ॥

अतुष्यन्नमराः सर्वे प्राहृष्यन् कपियूथपाः ।
पर्यष्वजत सौमित्रिं मूर्ध्न्यजिघ्रच्च राघवः ॥ ४७ ॥

अन्वयः—सर्वे अमरा अतुष्यन् । कपियूथपाः प्राहृष्यन् । राघवः सौमित्रिं पर्यष्वजत मूर्ध्नि अजिघ्रच्च ॥

व्याख्या—इन्द्रजिति हते सति, सर्वे = समस्ताः, अमराः = देवाः, अतुष्यन् = तुष्टाः । कपियूथपाः = वानरसङ्घपतयः, सुग्रीवादय इत्यर्थः । प्राहृष्यन् = प्रहृष्टाः । राघवः = रामचन्द्रः, सौमित्रिं = लक्ष्मणं, पर्यष्वजत = आलिङ्गितवान्, मूर्ध्नि = शिरसि, अजिघ्रच्च = आघ्रातवांश्च ॥

व्युत्पत्तिः—प्राहृष्यन् = प्रपूर्वकात् "हृष तुष्टौ" इति दैवादिकाद्धातोर्लङ् । पर्यष्वजत = परिपूर्वकात् "ष्वञ्ज परिष्वङ्गे" इति धातोर्लङ्, "दंशसञ्जस्वञ्जां शपि" इति शपि अनुनासिकलोपः । "प्राक्सितादड्व्यवायेऽपि" इति वचनात् "परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्" इति षत्वम् । अजिघ्रत् = "घ्रा गन्धोपादाने" इति धातोर्लङ्, "पाघ्राध्मे"त्यादिना जिघ्रादेशः ॥

भाषाऽर्थः—इन्द्रजितके मारे जानेपर सब देवता सन्तुष्ट हुए । वानरसमूहके अधिपति सुग्रीव आदि प्रसन्न हो गये । रामचन्द्रजीने लक्ष्मणका आलिङ्गन किया और उनके शिरसें सुंघा भी ॥ ४७ ॥

अरोदीद्राक्षसाऽनीकमरोदन्नृभुजां पतिः ।
मैथिल्यै चाऽशपद्धन्तुं तां प्राक्रमत चाऽऽतुरः ॥ ४८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—राक्षसाऽनीकम् अरोदीत् । नृभुजां पतिः अरोदत् । (सः) मैथिल्यै अशपत्, तां हन्तुम् आतुरः (सन्) प्राक्रमत च ॥

व्याख्या—राक्षसाऽनीकं=यातुधानसैन्यम्, अरोदीत्=रुदितम् । नृभुजां=मनुष्यभक्षकाणां, राक्षसानामित्यर्थः । पतिः=स्वामी, रावण इत्यर्थः । अरोदत्=रुदितः । मैथिल्यै ...त्=सीताम् आक्रुष्टवान्, सर्वदोषस्य मूलमिति मत्वेति भावः । स इति शेषः । तां=सीतां, हन्तुं=व्यापादयितुम्, आतुरः=शोकपीडितः सन्, प्राक्रमत च=प्रारब्धवांश्च ॥

व्युत्पत्तिः—अरोदीत्="रुदिर् अश्रुविमोचने" इति धातोर्लङ् "रुदश्च पञ्चभ्यः" इतीट् । अरोदत्=रुदिधातोर्लङि पक्षान्तरे "अड् गार्ग्यगालवयोः" इत्यडागमः । मैथिल्यै=शपधातोर्योगे "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" इति कर्मणि संप्रदानसंज्ञा । अशपत्="शप आक्रोशे" इति धातोर्लङ् । प्राक्रमत=प्रपूर्वकात् "क्रमु पादविक्षेपे" इति धातोः "प्रोपाभ्यां समर्थाभ्याम्" इति आत्मनेपदम् ॥

भाषाऽर्थः—इन्द्रजित्के मारे जानेपर राक्षसोंकी सेना रोने लगी । राक्षसेश्वर रावण भी रोने लगा । वह सीताको गाली देने लगा और उन्हें मारनेके लिए शोकपीडित होकर आरम्भ करने लगा ॥ ४८ ॥

अयुक्तमिदमित्यन्ये तमाप्ताः प्रत्यवारयन् ।
न्यरुन्धंश्चाऽस्य पन्थानं बन्धुता शुचमारुणत् ॥ ४९ ॥

अन्वयः—अन्ये आप्ता इदम् अयुक्तम् इति तं प्रत्यवारयन्, अस्य पन्थानं च न्यरुन्धन् । बन्धुता अस्य शुचम् आरुणत् ॥

व्याख्या—अन्ये=अपरे, आप्ताः=विश्वस्ताः राक्षसाः, इदं=सीताहननरूपं कार्यम्, अयुक्तम्=अनुचितम् । इति=एवम्, उक्त्वेति शेषः । तं=रावणं, प्रत्यवारयन्=निवारितवन्तः । अस्य=रावणस्य, पन्थानं च=मार्गं च, न्यरुन्धन्=निरुद्धवन्तः, हस्तपादादिग्रहणेनेति शेषः । बन्धुता=बान्धवसमूहः, अस्य=रावणस्य, शुचं=शोकम्, आरुणत्=अपनीतवती ॥

व्युत्पत्तिः—आप्ता="आप्तः प्रत्ययितः समौ" इत्यमरः । प्रत्यवारयन्=प्रतिपूर्वकात् "वृञ् आवरणे" इति चौरादिकाद्धातोर्लङ् । न्यरुन्धन्=निपूर्वकात् "रुधिर् आवरणे" इति धातोर्लङ् । बन्धुता=बन्धूनां समूहः, "ग्रामजनबन्धुसहायेभ्यस्तल्" इति तल्प्रत्ययः । आरुणत्=आङ्पूर्वाद्रुधधातोर्लङ्; हल्ङ्यादिलोपो धकारस्य जश्त्वं च ॥

भाषाऽर्थः—दूसरे आप्त राक्षसोंने "स्त्री की हत्या अनुचित है" ऐसा कहकर

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रावणको निवारण किया और उसके मार्गको भी रोका। बन्धुसमूहने उसके शोकको हटाया ॥ ४९ ॥

आस्फायताऽस्य वीरत्वममर्षश्चाऽप्यतायत ।
रावणस्य ततः सैन्यं समस्तमयुयुत्सयत् ॥ ५० ॥

अन्वयः—अस्य रावणस्य वीरत्वम् आस्फायत अमर्षश्च अपि अतायत। ततः (सः) सैन्यम् अयुयुत्सयत् ॥

व्याख्या—अस्य = एतस्य, रावणस्य = दशाननस्य, वीरत्वं = शौर्यम् , आस्फायत = अवर्द्धत, अमर्षश्च अपि = कोपश्च अपि, अतायत = विस्तीर्णः। ततः = वीरत्वाऽमर्षोपचयाऽनन्तरं, समस्तं = सकलं, सैन्यं = सेनाम्, अयुयुत्सयत् = युद्धेच्छामकारयत् रावण इति शेषः ॥

व्युत्पत्तिः—आस्फायत = आङ्पूर्वात् "स्फायी (ओप्यायी) वृद्धौ" इति धातोर्लङ्। अमर्षः = "कोपक्रोधाऽमर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियौ।" इत्यमरः। अतायत = "तायृ सन्तानपालनयोः" इति धातोर्लङ्। सन्तानः प्रबन्धः। सैन्यं = सेनैव सैन्यं, तत्र "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्" इति स्वार्थे (प्रकृत्यर्थे) ष्यञ्। अयुयुत्सयत् = "युध सम्प्रहारे" इति सन्नन्ताद्धातोर्णिचि लङ् ॥

भाषार्थः—रावणकी वीरता बढ़ी और क्रोध भी विस्तीर्ण हुआ। अनन्तर उसने सम्पूर्ण सेनाको लड़नेकी इच्छासे युक्त कराया ॥ ५० ॥

अग्नीनवरिवस्यंश्च तेऽनमस्यंश्च शङ्करम् ।
द्विजानप्रीणयन् शान्त्यै यातुधाना भवद्भियः ॥ ५१ ॥

अन्वयः—ते यातुधाना भवद्भियः (सन्तः) अग्नीन् अवरिवस्यन् , शङ्करम् अनमस्यन् ; शान्त्यै द्विजान् अप्रीणयन् ॥

व्याख्या—ते—पूर्वोक्ताः, यातुधानाः = राक्षसाः, भवद्भियः = उत्पद्यमानभयाः सन्तः, अग्नीन् = अनलान् ; अवरिवस्यन् = परिचरितवन्तः, शङ्करं = महादेवम्, अनमस्यन् = पूजितवन्तः, शान्त्यै = शमाऽर्थं, द्विजान् = ब्राह्मणान् , अप्रीणयन् = प्रीणितवन्तः ॥

व्युत्पत्तिः—यातुधानाः = यातूनि (यातनाः) धीयन्ते एषु, "करणाऽधिकरणयोश्च" इत्यधिकरणे ल्युट्. "यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी।" इत्यमरः। भवद्भियः = भवन्ती भीर्येषां ते। "पुंवत्कर्मधारयजातीयदेशीयेषु" इति पूर्वपदस्य पुंवद्भावः। अवरिवस्यन् = "नमोवरिवश्चित्रङः क्यच्" इति वरिवसः परिचर्यायां क्यच् , तदन्ताल्लङ्। शङ्करं = शं करोतीति शङ्करस्तं, "शमि धातोः संज्ञायाम्" इत्यच्, टाऽपवादः। अनमस्यन् = पूर्वसूत्रेणैव नमसः पूजायां क्यच् , तदन्ताल्लङ्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अप्रीणयन्="प्रीञ् तर्पण" इति चौरादिकधातोर्लङ्, "धूञ्प्रीञोर्नुग्वक्तव्य" इति नुक् ॥

भाषाऽर्थः—राक्षसोंने भययुक्त होकर अग्निमें हवन किया महादेवजीकी पूजा की और शान्तिके लिए ब्राह्मणोंको प्रसन्न किया ॥ ५१ ॥

परितः पर्यवाद्वायुराज्यगन्धिर्मनोरमः ।
अश्रूयत सपुण्याहः स्वस्तिघोषः समुच्चरन् ॥ ५२ ॥

अन्वयः—आज्यगन्धिः मनोरमो वायुः परितः पर्यवात् । सपुण्याहः समुच्चरन् स्वस्तिघोषः अश्रूयत ॥

व्याख्या—आज्यगन्धिः=घृतगन्धिः, मनोरमः=चेतोहरः, वायुः=वातः, परितः=सर्वतः, पर्यवात्=वाति स्म । सपुण्याहः=पुण्याहशब्दसहितः, समुच्चरन्=समुद्गच्छन्, स्वस्तिघोषः=स्वस्त्ययनशब्दः, अश्रूयत=श्रुतः ॥

व्युत्पत्तिः—आज्यगन्धिः=अत्र समासान्त इप्रत्ययः सन्दिग्धः, "आज्यगन्धी"ति इन्प्रत्ययान्तत्वे तु न काऽपि विचिकित्सा । मल्लिनाथस्तु आज्यगन्धोऽस्याऽस्तीति "अर्शआदिभ्योच्" इत्यच् इति "आज्यगन्ध" इति पाठं स्वीचकार । मनोरमः="कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ।" इत्यमरः । पर्यवात्=परिपूर्वकात् "वा गतिगन्धनयोः" इति धातोर्लङ् । सपुण्याहः=पुण्यं च तत् अहः पुण्याह, "राजाऽहःसखिभ्यष्टच्" इति टच् । "अह्नोऽह्न एतेभ्य" इति प्राप्तस्य अह्नादेशस्य "उत्तमैकाभ्यां च"ति निषेधः, अत्रोत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह । पुण्याहेन सहितः; "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः, "वोपसर्जनस्य" इति सहस्य सभावः । अश्रूयत=श्रुधातोः कर्मणि लङ् ॥

भाषाऽर्थः—घीके गन्धसे युक्त चित्तको हरण करने वाला वायु चारों ओर बहने लगा । पुण्याहशब्दसे युक्त उत्पन्न होता हुआ स्वस्तिवाचनका शब्द सुनाई पड़ा ॥ ५२ ॥

योद्धारोऽबिभरुः शान्त्यै साऽक्षतं वारि मूर्धभिः ।
रत्नानि चाऽददुर्गाश्च समवाञ्छन्नथाऽशिषः ॥ ५३ ॥

अन्वयः—योद्धारः शान्त्यै साऽक्षतं वारि मूर्धभिः अबिभरुः, रत्नानि गाश्च अददुः; अथ आशिषः समवाञ्छन् ॥

व्याख्या—योद्धारः=भटाः, शान्त्यै=शान्त्यर्थं, साऽक्षतम्=अक्षततण्डुलैर्युक्तं, सलाजं चेति शेषः । वारि=जलं, मूर्धभिः=शिरोभिः, अबिभरुः=धृतवन्तः, रत्नानि=मणीन्, गाश्च=धेनूश्च, अददुः=दत्तवन्तः, ब्राह्मणेभ्य इति शेषः । अथ=अनन्तरम्, आशिषः=आशीर्वादान् समवाञ्छन्=काङ्क्षितवन्तः, ब्राह्मणेभ्य इति शेषः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—योद्धारः = युध्यन्त इति, "युध सम्प्रहारे" इति धातोः "ण्वुल्तृचौ" इति तृच्, "झषस्तथोर्धोऽधः" इति तस्य धत्वम्। "भटा योधाश्च योद्धार" इत्यमरः। अबिभरुः "डुभृञ् धारणपोषणयोः" इति जौहोत्यादिकधातोर्लङ्, "भृञामित्" इतीत्वं "सिजभ्यस्तविदिभ्यश्च" इति झेर्जुस्, "जुसि चे"ति गुणः। रत्नानि="रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि चे"त्यमरः। अददुः = "डुदाञ् दाने" इति जौहोत्यादिकधातोर्लङ्, पूर्ववज्जुस्। समवाञ्छन् = संपूर्वकात् "वाछि इच्छायाम्" इति धातोर्लङ्॥

भाषाऽर्थः—राक्षस भटोंने शान्तिके लिए अक्षत युक्त जलको शिरसे धारण किया, रत्नों और गायों का ब्राह्मणोंको दिया अनन्तर उनसे आशीर्वादोंकी इच्छा की॥

अदिहंश्चन्दनैः शुभ्रैर्विचित्रं समवस्त्रयन्।
अधारयन् स्रजः कान्ता वर्म चाऽन्येऽदधुर्द्रुतम्॥ ५४॥

अन्वयः—(योद्धारः) शुभ्रैः चन्दनैः अदिहन्, विचित्रं समवस्त्रयन्, कान्ताः स्रजः अधारयन्। अन्ये वर्म द्रुतम् अदधुः॥

व्याख्या—शुभ्रैः=शुक्लैः, चन्दनैः = श्रीखण्डलेपैः, अदिहन् = लिप्तवन्तः, गात्राणीति शेषः, योद्धार इति शेषः। विचित्रं = शोभनं यथा तथा, समवस्त्रयन् = समाच्छादितवन्तः, कान्ताः = रुचिराः, स्रजः = पुष्पमालाः, अधारयन् = धृतवन्तः। अन्ये = अपरे राक्षसाः, वर्म = कवच, द्रुतं = शीघ्रम्, अदधुः = धृतवन्तः॥

व्युत्पत्तिः—अदिहन् = "दिह उपचये" इति धातोर्लङ्। समवस्त्रयन् = वस्त्रेण सम्यगाच्छादयन्, वस्त्रं पर्यदधत इति वा, "मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच्" इति "वस्त्रात्समाच्छादने"इति कृञर्थे णिचि लङ्। अधारयन्= "धृञ् धारणे" इति धातोर्लङ्, स्वार्थे णिच्। अदधुः = "डुधाञ् धारणपोषणयोः" इति धातोर्लङ्॥

भाषाऽर्थः—योद्धाओंने सफेद चन्दनोंसे शरीरोंको लिप्त किया, विचित्र प्रकारसे वस्त्रोंको धारण किया और सुन्दर मालाओंको धारण किया। औरोंने कवचको शीघ्र पहना॥ ५४॥

समक्ष्णुवत शस्त्राणि प्रामृजन् खड्गसंहतीः।
गजाऽऽदीनि समारोहन्प्रातिष्ठन्ताऽथ सत्वराः॥ ५५॥

अन्वयः—(योद्धारः) शस्त्राणि समक्ष्णुवत, खड्गसंहतीः प्रामृजन्; गजादीनि समारोहन् अथ सत्वराः प्रातिष्ठन्त॥

व्याख्या—शस्त्राणि = आयुधानि, समक्ष्णुवत = निशितानि चक्रुः, योद्धार इति शेषः; एवं परत्राऽपि। खड्गसंहतीः=असिसमूहान्, प्रामृजन्=शोधितवन्तः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गजादीनि = हस्त्यादीनि यानानि, "गजादिषु" इति पाठान्तरं, तत्राऽधिकरणत्वं विवक्षितम् । समारोहन् = समारूढाः । अथ=अनन्तर, सत्वराः = त्वरायुक्ताः सन्तः, प्रातिष्ठन्त = प्रस्थिताः, युद्धार्थमिति शेषः ॥

व्युत्पत्तिः—समक्ष्णुवत = संपूर्वकात् "क्ष्णु तेजने" इति धातोर्लङ्, "समः क्ष्णुवः" इत्यात्मनेपदम् । खड्गसंहतीः = खड्गानां संहतयस्ताः "स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ।" इत्यमरः । प्रामृजन्=प्रपूर्वकात् "मृजू शुद्धौ" इति धातोर्लङ्, "मृजेर्वृद्धिः" इत्यत्र "क्ङित्यजादौ वेष्यते" इति वचनात् वृद्ध्यभावे रूपम् । वृद्धौ तु "प्रामार्जन्" इति रूपम् । गजादीनि=गज आदिर्येषां तानि, तानि । प्रातिष्ठन्त = प्रपूर्वकात् स्थाधातोर्लङ् "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् ॥

भाषाऽर्थः—योद्धाओंने अस्त्रोंको तीक्ष्ण किया, खड्गसमूहोंको साफ किया; वे हाथी आदि सवारियोंपर चढ़े और शीघ्रतापूर्वक चल पड़े ॥ ५५ ॥

अपूरयन् नभः शब्दो बलसंवर्तसंभवः ।
अपूर्यन्त च दिग्भागास्तुमुलैस्तूर्यनिस्वनैः ॥ ५६ ॥

अन्वयः—बलसंवर्तसंभवः शब्दो नभः अपूरयत् । तुमुलैः तूर्यनिस्वनैः दिग्भागा अपूर्यन्त च ॥

व्याख्या—बलसंवर्तसंभवः = सैन्यैकीभावोत्पन्नः, शब्दः = निनादः, नभः = आकाशम्, अपूरयत् = पूरितवान् । तुमुलैः = सङ्कुलैः, तूर्यनिस्वनैः = वाद्यघोषैः, दिग्भागाः = दिशांऽशाः, अपूर्यन्त च = पूर्णाश्च ॥

व्युत्पत्तिः—बलसंवर्तसंभवः = बलानां संवर्तो बलसंवर्तः, तस्मात् संभवो यस्य स इति व्यधिकरणबहुव्रीहिः । अपूरयत् = "पूरी आप्यायने" इति चौरादिकधातोर्लङ् । अपूर्यन्त = पूरीधातोः । कर्मणि लङ् ॥

भाषाऽर्थः—सेनाओंके इकट्ठे हो जानेसे उत्पन्न शब्दने आकाशको व्याप्त किया । सङ्कुल वाद्यघोषोंसे दिशाओंके भाग पूर्ण किये गये ॥ ५६ ॥

आसीद् द्वारेषु संघट्टो रथाऽश्वद्विपरक्षसाम् ।
सुमहाननिमित्तैश्च समभूयत भीषणैः ॥ ५७ ॥

अन्वयः—द्वारेषु रथाऽश्वद्विपरक्षसां सुमहान् संघट्ट आसीत् । भीषणैः अनिमित्तैः समभूयत ॥

व्याख्या—द्वारेषु = प्रतीहारेषु, लङ्काया इति शेषः । रथाऽश्वद्विपरक्षसां = स्यन्दनहयहस्तिराक्षसानां, सुमहान् = अतिप्रभूतः, संघट्टः = सम्बाधः, मल्लिनाथस्तु "संमर्दः" इति पाठमाह, अर्थः स एव । आसीत् = अभूत् । भीषणैः = भयङ्करैः, अनिमित्तैः = अपशकुनैः सम्भूतम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—रथाऽश्वद्विपरक्षसां = रथाश्च अश्वाश्च द्विपाश्च रक्षांसि च, तेषाम्। "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" इति परवल्लिङ्गत्वम्। आसीत् = "अस भुवि" इति धातोर्लङ्, "अस्तिसिचोऽपृक्त" इतीट्। समभूयत = संपूर्वकाद्भूधातोर्भावे लङ्॥

भाषाऽर्थः—द्वारोंमें रथ, घोड़े, हाथी और राक्षसोंकी बड़ी भारी भीड़ हो गई। भयङ्कर अपशकुन हुए॥ ५७॥

कपयोऽबिभयुस्तस्मिन्नभञ्जंश्च महाद्रुमान्।
प्रोदखायन् गिरींस्तूर्णमगृह्णंश्च महाशिलाः॥ ५८॥

अन्वयः—तस्मिन् कपयः अबिभयुः, महाद्रुमान् अभञ्जन्, गिरीन् तूर्णं प्रोदखायन् महाशिलाश्च अगृह्णन्॥

व्याख्या—तस्मिन् = रावणे, निर्गत इति शेषः। कपयः = वानराः, अबिभयुः = भीताः, महाद्रुमान् = बृहत्तरून्, अभञ्जन् = भग्नवन्तः, गिरीन् = पर्वतान्, तूर्णं = क्षिप्रं, प्रोदखायन् = प्रोत्खातवन्तः, महाशिलाश्च = बृहत्पाषाणांश्च, अगृह्णन् = गृहीतवन्तः॥

व्युत्पत्तिः—तस्मिन् = "यस्य च भावेन भावलक्षणम्" इति सप्तमी। अबिभयुः = "ञिभी भये" इति धातोर्लङ्, "सिजभ्यस्तविदिभ्यश्चे"ति झेर्जुसि "जुसि चे"ति गुणे अयादेशः। अभञ्जन् = "भञ्जो आमर्दने" इति धातोर्लङ्। प्रोदखायन् = प्रोत्पूर्वकात् "खै खदने" इति धातोर्लङ्, शपि शित्वात्वाऽभाव आयादेशः। महाशिलाः = महत्यश्च ताः शिला महाशिलास्ताः, "पाषाणप्रस्तरग्रावोपलाऽश्मानः शिला दृषत्।" इत्यमरः। "आन्महतः समानाऽधिकरणजातीययोः" इत्यात्वम्॥

भाषाऽर्थः—रावणके निकलनेपर वानरलोग डर गये। उन्होंने बड़े बड़े पेड़ोंको तोड़ा, पर्वतोंको शीघ्र—उखाड़ा और बड़े बड़े पत्थरोंको ले लिया॥ ५८॥

ततः समभवद्युद्धं प्राहरन् कपिराक्षसाः।
अन्योन्येनाऽभ्यभूयन्त विमर्दमसहन्त च॥ ५९॥

अन्वयः—ततो युद्धं समभवत्। कपिराक्षसाः प्राहरन्; अन्योन्येन अभ्यभूयन्त विमर्दम् असहन्त च॥

व्याख्या—ततः = अनन्तरं, युद्धं = संग्रामः, समभवत् = प्रवृत्तम्, कपिराक्षसाः = वानरयातुधानाः, प्राहरन् = प्रहृतवन्तः, अन्योन्येन अभ्यभूयन्त = इतरेतरेण अभिभूताः, कपयो राक्षसैः राक्षसाश्च कपिभिरिति भावः। विमर्दं = प्रहारम्, असहन्त च = सोढवन्तश्च, नाऽश्राम्यन्निति भावः॥

व्युत्पत्तिः—युद्धम् = "युद्धमायोधनं जन्यम्" इत्यमरः। प्राहरन् = प्रपूर्वकात्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"हृञ् हरणे" इति धातोर्लङ् । अभ्यभूयन्त = अभिपूर्वकात् भूधातोः कर्मणि लङ् । असहन्त = "षह मर्षणे" इति धातोर्लङ्, "धात्वादेः षः सः" इति षस्य सत्वम् ॥

भाषाऽर्थः—तब युद्ध हुआ, वानर और राक्षसलोग प्रहार करने लगे। वे परस्परमें वानर राक्षसोंसे और राक्षस वानरोंसे अभिभूत किये गये और प्रहार को सहने लगे ॥ ५९ ॥

प्रावर्धत रजो भौमं तद्व्याश्नुत दिशो दश ।
पराऽऽत्मीयविवेकं च प्रामुष्णात्कपिरक्षसाम् ॥ ६० ॥

अन्वयः—भौमं रजः प्रावर्धत । तत् दश दिशो व्याश्नुत, कपिरक्षसां पराऽऽत्मीयविवेकं च प्रामुष्णात् ।

व्याख्या—भौमं = पार्थिवं, रजः = धूलिः, रथाऽश्वादिक्षोभसंभवेति भावः । प्रावर्धत = प्रवृद्धम् । तत् = रजः, दश = दशसंख्यकाः, दिशः = आशाः, व्याश्नुत = व्याप्नोत्, एवं च कपिरक्षसां = वानरयातुधानानां, परात्मीयविवेकं च=स्वपरविवेकं च, मल्लिनाथस्तु "परात्मीयविभागं चे"ति पाठं स्वीचकार । प्रामुष्णात् = अपनीतवत् ॥

व्युत्पत्तिः—भौमं = भूमेरिदं, "तस्येदम्" इत्यण्, "तद्धितेष्वचामादेः" इत्यादिवृद्धिश्च । प्रावर्द्धत = प्रपूर्वकात् "वृधु वृद्धौ" इति धातोर्लङ् । व्याश्नुत = व्याङ्पूर्वकात् "अशू व्याप्तौ" इति धातोर्लङ् । परात्मीयविवेकं = परश्च आत्मीयश्च परात्मीयौ, तयोर्विवेकस्तं, "विवेकः पृथगात्मता" इत्यमरः । प्रामुष्णात् = प्रपूर्वकात् "मुष स्तेये" इति क्र्यादिकधातोर्लङ् ॥

भाषाऽर्थः—रथ और घोड़े आदियोंके क्षोभसे धूल चढ़ गई। उसने दशों दिशाओंको व्याप्त कर दिया और वानरों और राक्षसोंका "यह अपना है और यह पराया है" ऐसे विवेकको हटा दिया ॥ ६० ॥

ततोऽद्विषुर्निरालोके स्वेभ्योऽन्येभ्यश्च राक्षसाः ।
अद्विषन्वानराश्चैव वानरेभ्योऽपि निर्दयः ॥ ६१ ॥

अन्वयः—ततो निरालोके राक्षसाः स्वेभ्यः अन्येभ्यश्च अद्विषुः । वानराश्च निर्दयाः (सन्तः) वानरेभ्यः अपि अद्विषन् ॥

व्याख्या—ततः = रजोव्यापनात्, निरालोके = प्रकाशरहिते, रण इति शेषः राक्षसाः = यातुधानाः, स्वेभ्यः = आत्मीयेभ्यः, राक्षसेभ्य इति भावः । अन्येभ्यश्च वानरादिशत्रुभ्यश्चेति भावः । अद्विषुः = अक्रुध्यन् । एवमेव वानराश्च = कपयश्च, निर्दयाः = निष्करुणाः सन्तः, मल्लिनाथस्तु "निर्भया" इति पाठान्तरमाह । वानरेभ्यः = कपिभ्यः, आत्मीयेभ्य इति भावः । अपि = अपिशब्दात् राक्षसेभ्यश्च,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्विषन् = अक्रुध्यन् , उभयेऽपि ते प्रागेव कोपान्धा अथ रजोन्धाश्चेत्येवमाचरणं युक्तमिति भावः ॥

व्युत्पत्तिः—निरालोके = निर्गत आलोको यस्मात्तस्मिन् । स्वेभ्योऽन्येभ्यः = क्रोधार्थकद्विषधातोर्योगे "क्रुधद्रुहेर्ष्यासूयाऽर्थानां यं प्रति कोप" इति सम्प्रदानत्वाच्चतुर्थी । अद्विषुः = "द्विष अप्रीतौ" इति धातोर्लङ्, आदादिकत्वात् "अदप्रभृतिभ्यः शप्" इति शपो लुक् । "द्विषश्चे"त्यनेन शाकटायनमतेन झेर्जुस् । वानरेभ्यः = पूर्ववद्द्विषधातोर्योगे "क्रुधे"त्यादिना सम्प्रदानत्वाच्चतुर्थी । अद्विषन्=द्विषधातोः शाकटायनेतरमते झोऽन्ताऽऽदिकार्यम् ॥

भाषाऽर्थः—अनन्तर प्रकाशरहित रणस्थलमें राक्षस आत्मीयों (राक्षसों) से और परजनों (वानर आदियों) से क्रोध करने लगे । इसी प्रकारसे वानर भी निर्दय होते हुए वानरोंसे और राक्षसोंसे भी क्रोध करने लगे ॥ ६१ ॥

अघुरंस्ते महाघोरमश्च्योतदथ शोणितम् ।
समपद्यत रक्तेन समन्तात्तेन कर्दमः ॥ ६२ ॥

अन्वयः—अथ ते महाघोरम् अघुरन् शोणितम् अश्च्योतत् । तेन रक्तेन समन्तात् कर्दमः समपद्यत ॥

व्याख्या—अथ = अनन्तरं, ते = हताः, वानरा राक्षसाश्चेति भावः । महाघोरम् = अतिभयङ्करं यथा तथा, अघुरन्=शब्दं चक्रुः, शोणितं = रुधिरम् अश्च्योतत्=अक्षरत् । तेन = पूर्वप्रतिपादितेन, रक्तेन = रुधिरेण, समन्तात् = सर्वतः, कर्दमः = पङ्कः, शोणितमय इति भावः । समपद्यत = सम्पन्नः ॥

व्युत्पत्तिः—अघुरन् = "घुर भीमाऽर्थशब्दयोः" इति धातोर्लङ् । शोणितं = "रुधिराऽसृग्लोहिताऽस्ररक्तक्षतजशोणितम् ।" इत्यमरः । अश्च्योतत् = "श्च्युतिर् क्षरणे" इति धातोः कर्तरि लङ् । मल्लिनाथस्तु "समपाद्यत" इति पाठान्तरमाह, तस्य सम्पादित इत्यर्थः, तत्र पद्यतेर्ण्यन्तात्कर्मणि लङ् ॥

भाषाऽर्थः—अनन्तर ताडित उन वानर और राक्षसोंने अतिभयङ्कर शब्द किया । लोहू बहने लगा । उस लोहूसे चारों ओर रुधिरमय कीचड़ उत्पन्न हुआ ॥

गम्भीराः प्रावहन्नद्यः समजायन्त च ह्रदाः ।
वृद्धं च तद्रजोऽशाम्यत्समवेद्यन्त च द्विषः ॥ ६३ ॥

अन्वयः—गम्भीरा नद्यः प्रावहन् , ह्रदाश्च समजायन्त । वृद्धं तत् रजश्च अशाम्यत् , द्विषश्च समवेद्यन्त ॥

व्याख्या—गम्भीराः = अगाधाः, नद्यः = रुधिरसरितः, प्रावहन् = प्रवृत्ताः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेन रक्तेनेति शेषः । ह्रदाश्च = रुधिरतडागाश्च, समजायन्त = संजाताः । वृद्धं=स-मृद्धं, तत् = पूर्वोक्तं, रजश्च = धूलिश्च अशाम्यत्=शान्तम् । रजःशमनाऽनन्तरं च--द्विषश्च = शत्रवश्च, समवेद्यन्त = संज्ञाताः, ततः स्वपरविवेकलाभाच्छत्रवः प्रहृता इति भावः ॥

व्युत्पत्तिः—रजः = "पांशुर्ना न द्वयो रजः" इत्यमरः । अशाम्यत्="शमु उप-शम" इति धातोर्लङ्, "शमामष्टानां दीर्घः श्यनि" इति दीर्घत्वम् । समवेद्यन्त = संपूर्वकात् "विद चेतनाख्यानिवासेषु" इति चौरादिकधातोः कर्मणि लङ् ॥

भाषाऽर्थः—उस रुधिरसे गहरी नदियां वहने लगीं, और रुधिरके तालाव भी उत्पन्न हुए । उससे बढ़ी हुई वह धूल शान्त हो गई, इस कारणसे शत्रु भी पह-चाने गये ॥ ६३ ॥

ततोऽचित्रीयताऽस्त्रौघैर्धनुश्चाऽधूनयन्महत् ।
रामः समीहितं तस्य नाऽचेतन् स्वे न चाऽपरे ॥ ६४ ॥

अन्वयः—ततो रामः शस्त्रौघैः अचित्रीयत, महत् धनुश्च अधूनयत् । तस्य समीहितं स्वे अपरे च न अचेतन् ॥

व्याख्या—ततः = अनन्तरं, रामः = रामचन्द्रः, शस्त्रौघैः = आयुधसमूहैः, अचित्रीयत = चित्रम् (आश्चर्यम्) अकरोत्, महत्=बृहत्, धनुश्च=कार्मुकं च, अधूनयत् = अधुनोत् । तस्य = रामस्य, समीहितं = चेष्टितं, शरसन्धानादिरूपमिति भावः । स्वे = आत्मीयाः, अपरे च = परकीयाश्च, न अचेतन् = नो ज्ञातवन्तः, तस्य तादृशहस्तलाघवादिति भावः ॥

व्युत्पत्तिः—अचित्रीयत = "चित्रङ आश्चर्ये" इति धातोः "नमोवरिवश्चित्रङः क्यच्" इति आश्चर्याऽर्थे क्यच् । ङित्करणात् "अनुदात्तङित आत्मनेपदम्" इत्यात्म-नेपदम् । "क्यचि चे"ति ईकारः । ततो लङ् । अधूनयत् = "धूञ् कम्पन" इति धातोर्लङ्, "धूञ्प्रीणोर्नुग्वक्तव्य" इति नुक् । अचेतन् = "चिती संज्ञान" इति धातोर्लङ् ॥

भाषाऽर्थः—तब रामचन्द्रजीने शस्त्रोंके समुदायोंसे आश्चर्य कर डाला और बड़ेसे धनुको कम्पित किया । उनकी शरसन्धान आदि चेष्टाको आत्मीयों (वानर आदि) और परकीयों (राक्षस आदि) ने नहीं जाना ॥ ६४ ॥

छिन्नानैक्षन्त भिन्नांश्च समन्ताद्रामसायकैः ।
क्रुष्टं हाहेति चाऽशृण्वन्न च रामं न्यरूपयन् ॥ ६५ ॥

अन्वयः—रामसायकैः समन्तात् छिन्नान् भिन्नांश्च ऐक्षन्त; हा ! हा !! इति क्रुष्टं च अशृण्वन् रामं च न न्यरूपयन् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—रामसायकैः=रामचन्द्रबाणैः, समन्तात्=सर्वतः, छिन्नान्=द्विधाकृतान्, भिन्नांश्च=विदारितांश्च, ऐक्षन्त=अपश्यन्, रणस्था जना इति शेषः, एवं परत्राऽपि। हा हा इति क्रुष्टं च=हा हा इति शब्दं च, अश्रृण्वन्=श्रुतवन्तः, पर—रामं च=रामं तु, न न्यरूपयन्=नो निश्चितवन्तः, अयमेव चेष्टत इति न निरधारयन्निति भावः॥

व्युत्पत्तिः—रामसायकैः=रामस्य सायकैः, "शरे खड्गे च सायकः" इत्यमरः। क्रुष्टं=क्रोशनं क्रुष्टं, तत् "नपुंसके भावे क्त" इति भावे क्तः। न्यरूपयन्=निपूर्वकात् "रूप व्याक्रियायाम्" इति चौरादिकधातोर्लङ्।

भाषाऽर्थः—रणभूमिमें स्थित पुरुषोंने रामके बाणोंसे चारों ओर छिन्न और भिन्न पुरुषोंको देखा, हा हा !! ऐसे शब्दको भी सुना परन्तु वे "रामचन्द्रजी ही यह शरसन्धान आदि चेष्टा कर रहे हैं" ऐसा नहीं जान सके॥ ६५॥

अभिनच्छत्रुसंघातानक्षुणद्वाजिकुञ्जरम्
अपिनट् च रथाऽनीकं न चाऽज्ञायत संचरन्॥ ६६॥

अन्वयः—(सः) शत्रुसंघातान् अभिनत्, वाजिकुञ्जरम् अक्षुणत्; रथाऽनीकम् अपिनट् सञ्चरन् न अज्ञायत॥

व्याख्या—शत्रुसंघातान्=वैरिसमूहान्, अभिनत्=भिन्नवान्, राम इति शेषः। एवं परत्राऽपि। वाजिकुञ्जरं=हयगजम्; अक्षुणत्=अचूर्णयत्। रथाऽनीकं=स्यन्दनसमूहम्, अपिनट्=पिष्टवान्. परं सञ्चरन्=सञ्चरणं कुर्वन् रामः, न अज्ञायत=नो ज्ञातः तादृक् तस्य सञ्चारलाघवमित्यर्थः॥

व्युत्पत्तिः—अभिनत्="भिदिर् विदारणे" इति रौधादिकधातोर्लङ्, परत्राऽपि धातो रौधादिकत्वमवसेयम्। वाजिकुञ्जरं=वाजिनश्च कुञ्जराश्च वाजिकुञ्जरं, तत् "द्वन्द्वश्च प्राणितूर्यसेनाऽङ्गानाम्" इति समाहारद्वन्द्वः। अक्षुणत्="क्षुदिर् सम्पेषणे" इति धातोर्लङ्। अपिनट्="पिष्लृ संचूर्णने" इति धातोर्लङ्। अज्ञायत="ज्ञा अवबोधने" इति धातोः कर्मणि लङ्॥

भाषाऽर्थः—रामचन्द्रजीने शत्रु-समूहों का विदारण किया, घोड़ों और हाथियों को चूर-चूर किया, रथोंके समूहको पीस डाला परन्तु इस तरह सञ्चरण करते हुए भी आत्मीयों और परोंसे किसीसे भी नहीं जाने गये॥ ६६॥

युग्मम्—

श्लोकद्वयेन रामस्य हस्तलाघवमाह—

दश दन्तिसहस्राणि रथिनां च महाऽऽत्मनाम्।
चतुर्दश सहस्राणि साऽऽरोहाणां च वाजिनाम्॥ ६७॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लक्षे च द्वे पतादीनां राघवेण धनुर्भृता ।
अनीयन्ताष्टमे भागे दिवसस्य परिक्षयम् ॥ ६८ ॥

अन्वयः—धनुर्भृता राघवेण दिवसस्य अष्टमे भागे दश दन्तिसहस्राणि, महात्मना रथिनां साऽऽरोहाणां वाजिनां च चतुर्दश सहस्राणि, पदातीनां द्वे लक्षे च परिक्षयम् अनीयन्त ॥

व्याख्या—धनुर्भृता = धानुष्केण, राघवेण = रामेण, दिवसस्य = वासरस्य, अष्टमे = अष्टानां पूरणे, भागे = अंशे, अर्धप्रहर इति भावः। दश दन्तिसहस्राणि = दशहस्तिसहस्राणि, महात्मनां=महामनसां, रथिनां = रथारूढानां सारोहाणां = सादिसहितानां, वाजिनां च = अश्वानां च, चतुर्दश, सहस्राणि = चतुर्दश दशशतयः, पदातीनां=पत्तीनां, द्वे लक्षे च = लक्षद्वितयं च, तथा चैते सर्वेऽपि परिक्षयं = नाशम्, अनीयन्त = नीताः। "अनीयते"ति पाठान्तरं, तत्र सर्वमतदनीयतेति योज्यम् ॥

व्युत्पत्तिः—अष्टमे = अष्टानां पूरणे, "तस्य पूरणे डट्" इति डट्, "नान्तादसंख्यादेर्मट्" इति मट्। मल्लिनाथस्तु "अष्टभागेने"ति पाठान्तरमाह व्याचख्यौ च "अर्द्धप्रहरेणेत्यर्थः। संख्याशब्दस्य वृत्तिविषये पूरणार्थत्वं त्रिभागादिवत्" इति। साऽऽरोहाणाम्=आरोहन्तीति आरोहाः, पचाद्यच्। आरोहैः सहिताः सारोहास्तेषां, "तेन सहेति तुल्ययोग" इति बहुव्रीहिः, "वोपसर्जनस्य" इति सहस्य सभावः। पदातीनां=पादाभ्यामतन्तीति पदातयस्तेषाम् "अज्यतिभ्यां पादे चे"ति इण्प्रत्ययः, "पादस्य पदाज्यातिगोपहतेषु" इति पादस्य पदादेशः। अनीयन्त="णीञ् प्रापणे" इति द्विकर्मकाद्धातोः प्रधानकर्मणि लङ् ॥

भावार्थः—धनुर्धारी रामचन्द्रजीने दिनके आठवें भागमें (आध प्रहरमें) दशहजार हाथी, चौदह हजार मनस्वी रथी और घुड़सवार, सहित घोड़े, दो लाख पैदल सेनायें इन सबको नष्ट कर डाला ॥ ६७–६८ ॥

यमलोकमिवाग्रथ्नाद्रुद्राऽऽक्रीडमिवाऽकरोत् ।
शैलैरिवाऽचिनोद् भूमिं बृहद्भी राक्षसैर्हतैः ॥ ६९ ॥

अन्वयः—(सः) बृहद्भिः हतैः राक्षसैः भूमिं यमलोकम् इव अग्रथ्नात्, रुद्राक्रीडम् इव अकरोत्, शैलैः इव अचिनोत् ॥

व्याख्या—बृहद्भिः = महद्भिः हतैः = व्यापादितैः राक्षसैः = यातुधानैः भूमिं= पृथिवीं यमलोकम् इव = अन्तकभुवनम् इव, अग्रथ्नात् = सन्दर्भितवान्, यमलोकमिव अकरोदित्यर्थः, राम इति शेषः। रुद्राक्रीडम् इव = हरक्रीडास्थानम् इव, श्मशानमिवेति भावः। अकरोत् = कृतवान्। शैलैः इव = पर्वतैः इव, अचिनोत् = आच्छादितवान् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—राक्षसैः = रक्षांस्येव राक्षसास्तैः, स्वार्थेऽण्। अग्रथ्नात् "(श्रन्थ) ग्रन्थ सन्दर्भे" इति क्र्यादिस्थधातोर्लङ्। अचिनोत् "चिञ् चयने" इति स्वादिस्थधातोर्लङ्, "स्वादिभ्यः श्नुः" इति श्नुः। अत्रोत्प्रेक्षात्रयस्य मिथोऽनपेक्षया स्थितेः संसृष्टिः॥

भाषाऽर्थः—रामचन्द्रजीने मारे गये बड़े बड़े राक्षसोंसे भूमिको यमलोकके सदृश बना डाला, श्मशानके सदृश किया और जैसे पर्वतोंसे आच्छादित कर दिया॥६९॥

अस्तुवन्देवगन्धर्वा व्यस्मयन्त प्लवङ्गमाः।
कपीन्द्रेऽतन्यत प्रीतिः पौलस्त्योऽमन्यताऽद्भुतम्॥ ७०॥

अन्वयः—देवगन्धर्वाः (तम्) अस्तुवन्। प्लवङ्गमा व्यस्मयन्त। कपीन्द्रे प्रीतिः अतन्यत। पौलस्त्यः अद्भुतम् अमन्यत॥

व्याख्या—देवगन्धर्वाः = सुरतद्गायनाः, अस्तुवन् = स्तुतवन्तः, राममिति शेषः। प्लवङ्गमाः=वानराः; व्यस्मयन्त=विस्मिताः रामविक्रम इति भावः। कपीन्द्रे= वानरराजे, सुग्रीव इति भावः। प्रीतिः = प्रेम, अतन्यत = विस्तृता, सुग्रीवोऽपि सन्तुष्ट इति भावः। पौलस्त्यः=विभीषणः, अद्भुतम्=आश्चर्यम्, अमन्यत=ज्ञातवान्॥

व्युत्पत्तिः—अस्तुवन् = "ष्टुञ् स्तुतौ" इति धातोर्लङ्। व्यस्मयन्त = विपूर्वकात् "स्मिङ् ईषद्धसने" इति धातोर्लङ्, ङित्वात् "अनुदात्तङित आत्मनेपदम्" इत्यात्मनेपदम्। स्मिङ्धातोरीषद्धसनाऽर्थत्वेऽपि उपसर्गयोगेन "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।" इति नयेनाऽत्राऽर्थान्तरवाचकत्वम्। अतन्यत = "तनु विस्तारे" इति धातोः कर्मकर्तरि लङ्॥

भाषाऽर्थः—देवता और गन्धर्वोंने रामचन्द्रजीकी स्तुति की। वानरलोग विस्मित हुए। सुग्रीवमें प्रीति विस्तृत हुई। विभीषणने आश्चर्य माना॥ ७०॥

राक्षस्यः प्रारुदन्नुच्चैः प्राजुगुप्सन्त रावणम्।
अमुह्यद्बालवृद्धं च समरौदितरो जनः॥ ७१॥

अन्वयः—राक्षस्यः उच्चैः प्रारुदन्, रावणं प्राजुगुप्सन्त। बालवृद्धम् अमुह्यत्। इतरो जनः समरौत्॥

व्याख्या—राक्षस्यः राक्षसस्त्रियः, उच्चैः = तारस्वरं, प्रारुदन् = प्ररुदितवत्यः, भर्त्रादिवधदुःखेनेति भावः। रावणं= दशाऽऽननं, प्राजुगुप्सन्त = अगर्हन्त। बालवृद्धं = शिशुजरठं, मल्लिनाथस्तु "अमुह्यन् बालवृद्धाश्चे"ति पाठान्तरं स्वीचकार। अमुह्यत् = अमूर्च्छत्, भयादिति भावः। इतरः = राक्षसीबालवृद्धेभ्योऽन्यः, जनः = लोकः, समरौत् = आक्रुष्टवान्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—प्रारुदन् = प्रपूर्वकात् "रुदिर् अश्रुविमोचने" इति धातोर्लङ्, "रुदादिभ्यः सार्वधातुके" इतीट् न अहलादित्वात् । प्राजुगुप्सन्त = प्रपूर्वकात् "गुपे-र्निन्दायाम्" इति धातोः "गुप्तिज्किद्भ्यः सन्" इति सन्, तदन्ताल्लङि "झोऽन्त" इत्यन्तादेशः । बालवृद्धं = बालाश्च वृद्धाश्चेति "सर्वो द्वन्द्वो विभाषयैकवद्भवती"ति नयेन समाहारद्वन्द्वता । अमुह्यत् = "मुह वैचित्ये' इति दैवादिकधातोर्लङ् । समरौत् = संपूर्वकात् "रु शब्द" इत्यादादिकधातोर्लङ्, शपो लुक् । "उतो वृद्धिर्लुकि हलि" इति वृद्धिः ॥

भाषाऽर्थः—राक्षसियाँ ऊँचे स्वरसे रोने लगीं और रावणकी निन्दा करने लगीं । लड़के और बुड्ढे मूर्च्छित हुए । अन्य जन रोने लगे ॥ ७१ ॥

सर्वतश्चाऽभयं प्राप्नोन्नैच्छन्नृभ्यस्तु रावणः ।
फलं तस्येदमभ्यायाद् दुरुक्तस्येति चाऽब्रुवन् ॥ ७२ ॥

अन्वयः—(अपरे) "रावणः सर्वतश्च अभयं प्राप्नोत्, नृभ्यस्तु न ऐच्छत्; तस्य दुरुक्तस्य इदं फलम् अभ्यायात् ।" इति च अब्रुवन् ॥

व्याख्या—रावणः = दशाऽऽननः, सर्वतश्च = देवादिभ्यश्च, अभयं = भयाऽभावम्, अवध्यत्ववरप्राप्त्येति भावः । प्राप्नोत् = प्राप्तवान् । परं नृभ्यस्तु = मनुष्येभ्यस्तु, न ऐच्छत = न इष्टवान्, अनादरात् ब्रह्मणः सकाशे मनुष्येभ्योऽभयं न वव्रे इति भावः । तस्य = तादृशस्य, दुरुक्तस्य = दुर्वचनस्य, इदं = सन्निकृष्टस्थं, फलं = राक्षसविनाशरूपः परिणामः, अभ्यायात् = आयातम्, इति च = एवं च, अब्रुवन् = अकथयन्, अपरे जना इति शेषः ॥

व्युत्पत्तिः—अभय = भयस्याऽभावोऽभयं, तत् "अव्ययं विभक्ती" त्यादिना अर्थाऽभावेऽव्ययीभावः । अभ्यायात् = अभ्याङ्पूर्वकात् "या प्रापणे" इति धातोर्लङ् । अब्रुवन् = "ब्रूञ् व्यक्तायां वाचि" इति धातोर्लङ् ॥

भाषाऽर्थः—लङ्कावासी और लोगोंने "रावणने देवादिकोंसे अभय पा लिया नाशरूप ऐसा परिणाम आ पड़ा ।" ऐसा भी कहा ॥ ७२ ॥

ततोऽधावन्महाघोरं रथमास्थाय रावणः ।
अदमायत मही गृध्राः समारार्यन्त भीषणाः ॥ ७३ ॥

अन्वयः—ततो रावणो महाघोरं रथम् आस्थाय अधावत् । मही अदमायत । भीषणाः गृध्राः समारार्यन्त ॥

व्याख्या—ततः = रामपराक्रमाऽनन्तरं, रावणः = दशाऽऽननः, महाघोरम् =

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिभयङ्करं, रथं=स्यन्दनम्, आस्थाय=आरुह्य, अधावत्=गतवान्, रामं प्रतीति शेषः। तस्मिन्समये दुर्निमित्तमाह—अचमायतेति। मही=पृथिवी, अचमायत=कम्पिता। भीषणाः=भयङ्कराः, गृध्राः=दाक्षाय्याः, समारार्यन्त=अत्यर्थं गताः॥

व्युत्पत्तिः—ततः=तस्मादिति, "पञ्चम्यास्तसिल्" इति तसिल्प्रत्ययः। अधावत्="धावु गतिशुद्ध्योः" इति धातोर्लङ्। अचमायत="चमायी विधूनने" इति धातोर्लङ्। समारार्यन्त=समाङ्पूर्वकात् "ऋ गतौ" इति धातोः "सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्य" इति यङि "यङि चे"ति गुणे "समार्यति"स्थिते "यकारपररेफस्य न द्वित्वनिषेधः "अरार्यते" इति भाष्योदाहरणात्" इति तद्वचनेन रेफसहितस्य यकारस्य द्वित्वेऽभ्यासकार्ये दीर्घे समारार्यति यङन्तात्लङि तङि शपि "झोऽन्तः" इत्यन्तादेशे अजादित्वात् 'आडजादीनाम्" इत्याडागमे "समारार्यन्तेति रूपम्॥

भाषाऽर्थः—तदनन्तर रावण अतिभयङ्कर रथपर चढ़कर दौड़ा। उस समय पृथ्वी काँपी और भयङ्कर गृध्र (गीध) खूब घूमने लगे॥ ७३॥

मेघाः सविद्युतोऽवर्षंश्चेलक्नोपं च शोणितम्।
अवान्भीमा नभस्वन्तः प्रारुवन्नशिवाः शिवाः॥ ७४॥

अन्वयः—सविद्युतो मेघाश्च चेलक्नोपं शोणितम् अवर्षन्। भीमा नभस्वन्तः अवान्। अशिवाः शिवाः प्रारुवन्॥

व्याख्या—सविद्युतः=तडित्सहिताः, मेघाश्च=बलाहकाश्च, चेलक्नोपं=वस्त्रक्लेदनप्रमाणं, शोणितं=रुधिरम्, अवर्षन्—वर्षितवन्तः, यावता शोणितेन वस्त्रं सिच्यते तावत्प्रमाणं रुधिरं वर्षितवन्त इति भावः। भीमाः=भयङ्कराः, नभस्वन्तः=वायवः, अवान्=ववुः। अशिवाः=अमङ्गलाः, शिवाः=शृगालाः, प्रारुवन्=ववाशिरे॥

व्युत्पत्तिः—चेलक्नोपं=चेलं क्नोपयित्वा (सिक्त्वा) इति, "क्नूयी शब्द उन्दने चे"ति धातोर्ण्यन्तात् "अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ" इति पुगागमे "चेले क्नोपेः" इति णमुल्प्रत्ययः, "कृन्मेजन्त" इत्यव्ययत्वम्। नभस्वन्तः="नभस्वद्वातपवनपवमानप्रभञ्जनाः।" अवान्="वा गतिगन्धनयोः" इति धातोर्लङ् "लङः शाकटायनस्यैवे"ति नियमादन्यमते झेर्जुसभावपक्षे "झोऽन्त" इत्यन्तादेशे रूपम्। अशिवाः=अविद्यमानं शिवं यासां ताः, "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" इति नञ्बहुव्रीहिः। शिवा="स्त्रियां शिवा भूरिमायगोमायुमृगधूर्तकाः।" प्रारुवन्=प्रपूर्वकात् "रु शब्दे" इति धातोर्लङि रूपम्॥

भाषाऽर्थः—बिजलीसे युक्त मेघोंने जितने रुधिरसे वस्त्र भींगता है उतना रुधिर बरसाया। भयङ्कर वायु बहने लगे। अमङ्गलरूप शृगाल रोने लगे॥ ७४॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आटाट्यताऽवमत्याऽसौ दुर्निमित्तानि संयुगे ।
अधुनोद्धनुरस्त्रौघैः प्रौर्णोनूयत विद्विषः ॥ ७५ ॥

अन्वयः—असौ दुर्निमित्तानि अवमत्य संयुगे आटाट्यत; धनुः अधुनोत् अस्त्रौघैः विद्विषः प्रौर्णोनूयत ॥

व्याख्या—असौ = रावणः, दुर्निमित्तानि=अपशकुनानि, अवमत्य=अनादृत्य, संयुगे=संग्रामे आटाट्यत=भृशमभ्रीत्, धनुः=कार्मुकम्, अधुनोत्=कम्पितवान्, अस्त्रौघैः=आयुधसमूहैः, विद्विषः=शत्रून्, प्रौर्णोनूयत=भृशम् आच्छादयत ॥

व्युत्पत्तिः—दुर्निमित्तानि=दुष्टानि निमित्तानि दुर्निमित्तानि, तानि "कुगतिप्रादय" इति समासः। आटाट्यत="अट गतौ" इति धातोः "सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्य" इति यङि द्वितीयैकाचो द्विर्वचनेऽभ्यासकार्यं यङन्ताल्लङि लङि शबादिकार्यं च अजादित्वात् "आडजादीनाम्" इत्याडागमः। अधुनोत्="धू विधूनने" इति स्वादिस्थधातोर्लङ्। प्रौर्णोनूयत=प्रपूर्वकात् "ऊर्णुञ् आच्छादने" इति धातोर्णुवद्भावात् "सूचिसूत्री" त्यादिना यङ्। "अजादेर्द्वितीयस्ये"ति द्वित्वे "नन्द्राः संयोगादय" इति रेफस्य द्वित्वाऽभावः। नु शब्दस्य द्वित्वम् "गुणो यङलुकोः" इत्यभ्यासस्य गुणः "अकृत्सार्वधातुकयोर्दीर्घ" इति दीर्घत्वं ततो यङन्ताल्लङि आत्मनेपदम्, आड्वृद्धिश्च ॥

भावार्थः—रावण अपशकुनोंका अनादर करके रणभूमिमें अतिशय घूमने लगा। उसने धनुको कम्पित किया और अस्त्रसमूहोंसे शत्रुओंको अत्यधिक आच्छादित कर डाला ॥ ७५ ॥

युग्मम्—

व्यनाशयंस्ततः शत्रून् सुग्रीवाऽस्ता महीभृतः ।
ततो व्यरसदग्लायदभ्यशेत महीतलम् ॥ ७६ ॥
आश्च्योतद्रुधिरं तोयमलपच्चाऽतिविह्वलम् ।
अशीयत नृमांसाऽदां बलं सुग्रीवबाधितम् ॥ ७७ ॥

अन्वयः—ततः सुग्रीवाऽस्ता महीभृतः शत्रून् व्यनाशयन्। ततः सुग्रीवबाधितं नृमांसादां बलं व्यरसत्, अग्लायत्, महीतलम् अभ्यशेत, रुधिरम् आश्च्योतत्, अतिविह्वलं च (सत्) तोयम् अलपत् अशीयत च ॥

व्याख्या—ततः = रावणपराक्रमाऽनन्तरं, सुग्रीवास्ताः=सुग्रीवप्रेरिताः, महीभृतः=पर्वताः, शत्रून्=रिपून्, राक्षसानिति भावः। व्यनाशयन्=हतवन्तः। ततः=अनन्तरं, सुग्रीवबाधितं=सुग्रीवपीडितं, नृमांसादां = नरमांसभक्षकाणां, राक्ष-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सानामिति भावः। बलं=सैन्यं, व्यरसत=आक्रन्दत, अग्लायत्=ग्लानिं गतं, महीतलम् अध्यशेत=भूतले पतितं, रुधिरं=रक्तम्, आश्च्योतत्=अक्षरत्, अतिविह्वलं च=विक्लवं च सत्, तोयं=जलम्, अलषत्=अभिललाष, अतृष्यदिति भावः। अशीयत च=अवसन्नं च॥

व्युत्पत्तिः—सुग्रीवाऽस्ताः=सुग्रीवेणाऽस्ताः, "अस्ता" इत्यत्र "असु क्षेपणे" इति धातोर्निष्ठायां क्तप्रत्ययः। व्यनाशयन्=विपूर्वकात् ण्यन्तात् "णश अदर्शने" इति धातोर्लङ्। नृमांसादां=नृमांसमदन्तीति नृमांसादस्तेषां, "अदोऽनन्ने" इति विटप्रत्ययः। व्यरसत्=विपूर्वकात् "रस शब्दे" इति धातोर्लङ्। अग्लायत्="ग्लै (ग्लै) हर्षक्षये" इति धातोर्लङ् शिति आत्वाऽभावादायादेशः। महीतलम्=अधि-पूर्वकशीङ्धातोर्योगे "अधिशीङ्स्थाऽऽसां कर्मे"ति आधारस्य कर्मत्वम्। आश्च्योतत्=आङ्पूर्वकात् "श्च्युतिर् क्षरणे" इति धातोर्लङ्। अलषत्="लष कान्तौ" इति धातोर्लङ्, मल्लिनाथस्तु "अभ्यलषत्" इति पाठान्तरमाह। "वा भ्राशभ्लाश-भ्रमुक्रमुक्लमुत्रसित्रुटिलषः" इति श्यनो वैकल्पिकत्वात्पक्षे तदभावः। अशीयत="शदॢ शातने" इति धातोर्लङ् "शदेः शितः" इत्यात्मनेपदम्। "पाघ्राध्मास्थाम्ना-दाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः" इति शीयादेशः॥

भाषाऽर्थः—रावण के पराक्रम के अनन्तर सुग्रीवसे फेंके गये पर्वतोंने शत्रुओंको नष्ट किया। अनन्तर सुग्रीवसे पीडित राक्षसोंकी सेना चिल्लाने लगी, ग्लानियुक्त हुई, पृथ्वीपर गिर पड़ी, लोहू गिराने लगी, विह्वल होती हुई पानी पीनेकी इच्छा करने लगी और अवसन्न हो गई॥ ७६-७७॥

विरूपाक्षस्ततोऽक्रीडत्संग्रामे मत्तहस्तिना।
मुष्टिनाऽदालयत्तस्य मूर्धानं वानराऽधिपः॥ ७८॥

अन्वयः—ततो विरूपाक्षः संग्रामे मत्तहस्तिना अक्रीडत्। वानराऽधिपः तस्य मूर्धानं मुष्टिना अदालयत्॥

व्याख्या—ततः=सुग्रीवविक्रमाऽनन्तरं विरूपाक्ष=तदाख्यः कश्चिद्राक्षसः, संग्रामे युद्धे, मत्तहस्तिना=उत्कटगजेन वाहनेन, अक्रीडत्=क्रीडितवान्, भ्रान्त-वानिति भावः। वानराधिपः=कपीश्वरः, सुग्रीव इत्यर्थः। तस्य=विरूपाक्षस्य, मूर्धानं=शिरः, मुष्टिना=संपिण्डिताऽङ्गुलिपाणिना, अदालयत्=विदारितवान्॥

व्युत्पत्तिः—मत्तहस्तिना=हस्तोऽस्याऽस्तीति हस्ती, "अत इनिठनौ" इति नित्ययोगे इनिः। मत्तश्चासौ हस्ती, तेन। "मत्ते शौण्डोत्कटक्षीबाः" इत्यमरः। अदालयत्="दल विदारणे" इति चौरादिकधातोर्लङ्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—सुग्रीवके पराक्रम प्रकाशनके अनन्तर विरूपाक्ष नामका राक्षस युद्धमें मत्त हाथी पर चढ़कर क्रीडा करने लगा। सुग्रीवने उसके शिरको मुक्केसे विदारित कर डाला ॥ ७८ ॥

अचूर्णयच्च यूपाक्षं शिलया तदनन्तरम् ।
संक्रुद्धो मुष्टिनाऽतुभ्नादङ्गदोऽलं महोदरम् ॥ ७९ ॥

अन्वयः—(वानराऽधिपः) तदनन्तरं यूपाक्षं शिलया अचूर्णयत् । अङ्गदः संक्रुद्धः (सन्) महोदरं मुष्टिना अलम् अतुभ्नात् ॥

व्याख्या—तदनन्तरं = विरूपाक्षवधाऽनन्तरं, यूपाक्षं = तन्नामानं कंचिद्राक्षसं, शिलया = पाषाणेन, अचूर्णयत्=चूर्णितवान् , वानराऽधिप इति शेषः । अङ्गदः = वालिपुत्रः, संक्रुद्धः = संकुपितः सन् , महोदरं=तदाख्यं राक्षसं, मुष्टिना=संपिण्डिताङ्गुलिपाणिना, अलं=पर्याप्तं यथा तथा, अतुभ्नात्=व्यापादितवान् ॥

व्युत्पत्तिः—अचूर्णयत् = "चूर्ण सङ्कोचने" इति चौरादिकधातोः "सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्" इति ण्यन्ताल्लङ् । अतुभ्नात्="(णभ) तुभ हिंसायाम्" इति क्र्यादिस्थधातोर्लङ्, "क्र्यादिभ्यः श्ना" इति श्नाप्रत्ययः ॥

भाषाऽर्थः—सुग्रीवने उसके बाद यूपाक्ष नामके राक्षसको पत्थरसे चूर्णकर डाला । अङ्गदने कुपित होते हुए महोदर नामके राक्षसको मुक्केसे पर्याप्त रूपसे मार डाला ॥ ७९ ॥

ततोऽकुष्णाद्दशग्रीवः क्रुद्धः प्राणान्वनौकसाम् ।
अगोपायच्च रक्षांसि दिशश्चाऽरीनभाजयत् ॥ ८० ॥

अन्वयः—ततो दशग्रीवः क्रुद्धः (सन्) वनौकसां प्राणान् अकुष्णात् , रक्षांसि अगोपायत् अरींश्च दिशः अभाजयत ॥

व्याख्या—ततः = सुग्रीवाऽङ्गदविक्रमप्रकाशनाऽनन्तरं, दशग्रीवः = रावणः, क्रुद्धः = कुपितः सन् , वनौकसां = वानराणां, प्राणान् = असून् , अकुष्णात्=चकर्ष, रक्षांसि = राक्षसान् , अगोपायत्=अरक्षत् , अरींश्च=शत्रूंश्च, वानरादीनिति भावः । दिशः = आशाः, अभाजयत्=प्रहितवान् ॥

व्युत्पत्तिः—वनौकसां = वनमोको येषां ते वनौकसस्तेषाम् । अकुष्णात् = "कुष निष्कर्षे" इति क्रैयादिकधातोर्लङ् । अगोपायत् = "गुपू रक्षणे" इति धातोः "गुपूधूपविच्छिपणिपनिभ्य आय" इति आयप्रत्ययः स्वाऽर्थे (प्रकृत्यर्थे), तदन्ताल्लङ् । अभाजयत् = "भज सेवायाम्" इति धातोर्ण्यन्ताल्लङ् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—तब रावणने क्रुद्ध होकर वानरोंके प्राणोंको खींचा, राक्षसों की रक्षा की और शत्रुओंको दिशाओंमें भगाया ॥ ८० ॥

आलोकयत्स काकुत्स्थमधृष्णोद्धोरमध्वनत् ।
धनुरभ्रमयद्भीममभीषयत विद्विषः ॥ ८१ ॥

अन्वयः—सः काकुत्स्थम् आलोकयत् अधृष्णोत्, घोरम् अध्वनत्, भीमं धनुः अभ्रमयत्, विद्विषः अभीषयत ॥

व्याख्या—सः = रावणः, काकुत्स्थं = रामम्, आलोकयत् = अपश्यत्, अधृष्णोत् = धृष्टः स्थितः, घोरं = भयङ्करम्, अध्वनत् = ध्वनितवान्, भीमं = भयङ्करं, धनुः = कार्मुकम्, अभ्रमयत् = भ्रमितवान्, विद्विषः = शत्रून्, अभीषयत् = त्रासितवान् ॥

व्युत्पत्तिः—आलोकयत् = आङ्पूर्वकात् "लोकृ दर्शने" इति धातोर्लङ् । अधृष्णोत् = "ञिधृषा प्रागल्भ्ये" इति स्वादिस्थधातोर्लङ् । अध्वनत् = "ध्वन शब्दे" इति धातोर्लङ् । अभ्रमयत् = "भ्रमु अनवस्थाने" इति णिजन्ताद्धातोर्लङ्, मान्तत्वात् "मितां ह्रस्व" इति ह्रस्वत्वम् । अभीषयत् = "ञिभी भये" धातोर्णिजन्ताल्लङ् "भीस्म्योर्हेतुभये" इत्यात्मनेपदं "भियो हेतुभये षुक्" इति षुक् ॥

भाषाऽर्थः—रावणने रामचन्द्रजीको देखा । वह ढीठ होकर रहा । उसने भयङ्कर धनु घुमाया और शत्रुओंको त्रास दिया ॥ ८१ ॥

आस्कन्दल्लक्ष्मणं बाणैरत्यक्रामच्च तं द्रुतम् ।
राममभ्यद्रवज्जिष्णुरस्कुनाच्चेषुवृष्टिभिः ॥ ८२ ॥

अन्वयः—जिष्णुः (सः) लक्ष्मणं बाणैः आस्कन्दत्, तं द्रुतम् अत्यक्रामत्; च, रामम् अभ्यद्रवत् इषुवृष्टिभिः अस्कुनाच्च ॥

व्याख्या—जिष्णुः = जयशीलः, रावण इति शेषः । लक्ष्मणं = रामाऽनुजं, बाणैः = शरैः, आस्कन्दत् = पीडितवान्, तं = लक्ष्मणं, द्रुतं = शीघ्रम्, अत्यक्रामत् = अतिक्रान्तः, अनन्तरं रामं = रामचन्द्रम् अभ्यद्रवत् = अभिमुखं गतः, इषुवृष्टिभिः = बाणवर्षैः, अ॰ कुनाच्च = आवृणोच्च ॥

व्युत्पत्तिः—जिष्णुः = जिधातोः "ग्लाजिस्थश्च ग्स्नुः" इति ग्स्नुः । आस्कन्दत् = आङ्पूर्वकात् "स्कन्दिर गतिशोषणयोः" इति धातोर्लङ् । अत्यक्रामत् = अतिपूर्वकात् "क्रमु पादविक्षेप" इति धातोर्लङ्, "क्रमः परस्मैपदेषु" इति दीर्घत्वम् । अभ्यद्रवत् = अभिपूर्वकात् "द्रु गतौ" इति धातोर्लङ् । इषुवृष्टिभिः = इषूणां वृष्टिभिः, "वृष्टिर्वर्षम्" इत्यमरः । अस्कुनात् = "स्कुञ् आप्रवणे" इति धातोर्लङ्, आप्रवणमावरणम् । "स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्चे"ति चात् श्नाप्रत्ययः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—जयशील रावणने लक्ष्मणजीको बाणोंसे पीडित किया उनका शीघ्र लङ्घन किया । तब वह रामचन्द्रजीके सम्मुख गया और उसने बाणवृष्टियोंसे उन्हें आच्छादित कर डाला ॥ ८२ ॥

अपौहद् बाणवर्षं तद्भल्लै रामो निराकुलः ।
प्रत्यस्कुनोद्दशग्रीवं शरैराशीविषोपमैः ॥ ८३ ॥

अन्वयः—रामो निराकुलः (सन्) तद् बाणवर्षं भल्लैः अपौहत्, आशीविषोपमैः शरैः दशग्रीवं प्रत्यस्कुनोत् ॥

व्याख्या—रामः = रामचन्द्रः, निराकुलः = आकुलतारहितः सन्, तत् = पूर्वं रावणप्रहितं, बाणवर्षं = शरवृष्टिं, भल्लैः = बाणविशेषैः, अपौहत् = अपाकरोत्, आशीविषोपमैः = सर्पसदृशैः, दुःसहत्वादिति भावः । शरैः = बाणैः, दशग्रीवं = रावणं, प्रत्यस्कुनोत् = प्रत्यावृणोत् ॥

व्युत्पत्तिः—निराकुलः = निर्गतः आकुलः (आकुलभावः) यस्मात्सः । अपौहत् = अपपूर्वकात् "ऊह वितर्के" इति धातोर्लङ् "उपसर्गादस्यत्यूह्योर्वेति वाच्यम्" इति पक्षे परस्मैपदम् । आशीविषोपमैः = आशीषु (दंष्ट्रासु) विषं येषां ते आशीविषाः, "आशीः स्यादहिदंष्ट्रेऽपी"ति कोशः । "आशीविषो विषधरश्चक्री व्यालः सरीसृपः ।" इत्यमरः । आशीविषा उपमा येषां ते आशीविषोपमास्तैः । प्रत्यस्कुनोत् = प्रतिपूर्वकात् "स्कुञ् आप्रवण" इति धातोर्लङ्, "स्तन्भ्वि"त्यादिना श्नुः । मल्लिनाथस्तु "प्रत्यस्कुभ्नोत्"इति पाठान्तरं प्राह, तत्र "स्कुन्भु आवरणे" इति धातोर्लङ्, पूर्वसूत्रेणैव श्नुः ॥

भाषाऽर्थः—रामचन्द्रजीने आकुल न होकर रावणसे प्रेरित उस बाणवृष्टिको भल्ल नामके बाणविशेषोंसे हटाया, और सर्पसदृश बाणोंसे रावणको प्रत्याच्छादित कर डाला ॥ ८३ ॥

मण्डलान्याटतां चित्रमच्छिन्तां शस्त्रसंहतीः ।
जगद्व्यस्मापयेतां तौ न च वीरावसीदताम् ॥ ८४ ॥

अन्वयः—वीरौ तौ चित्रं मण्डलानि आटतां, शस्त्रसंहतीः अच्छिन्तां; जगत् व्यस्मापयेतां न च असीदताम् ॥

व्याख्या—वीरौ = शूरौ, तौ = रामरावणौ, चित्रम् = आश्चर्यं यथा तथा, मण्डलानि आटतां = चक्रवद्भ्रान्तौ, शस्त्रसंहतीः = परस्पराऽऽयुधसमूहान्, अच्छिन्तां = छिन्नवन्तौ, जगत् = लोकं, व्यस्मापयेतां = विस्मापितवन्तौ, न च असीदतां = न च अवसन्नौ ॥

व्युत्पत्तिः—चित्रं = "विस्मयोऽद्भुतमाश्चर्यं चित्रम्" इत्यमरः । आटताम् =

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अट गतौ" इति धातोर्लङ् "आडजादीनाम्" इत्याडागमः "आटश्चे"ति वृद्धिश्च। अच्छिन्तां="छिदिर् द्वैधीकरणे" इति रौधादिकधातोर्लङ्। व्यस्मापयेतां=विपूर्वात् स्मिङ्धातोर्ण्यन्ताल्लङि "भीस्म्योर्हेतुभये" इत्यात्मनेपदं "नित्यं स्मयतेः" इत्यात्वे पुगागमश्च। असीदतां="षद्लृ विशरणगत्यवसादनेषु" इति धातोर्लङ्, "पाघ्राध्मे" त्यादिना सदः सीदादेशः॥

भाषाऽर्थः—वीर राम और रावण विचित्र रूपसे चक्रके सदृश घूमने लगे, एक दूसरेके शस्त्रसमूहोंको काटने लगे; लोकको विस्मित करने लगे परन्तु खिन्न नहीं हुए॥ ८४॥

व्योम प्राचिनुतां बाणैः क्ष्मामक्ष्मापयतां गतैः।
अभिन्तां तूर्णमन्योन्यं शिक्षाश्चाऽतनुतां मुहुः॥ ८५॥

अन्वयः—(तौ) बाणैः व्योम प्राचिनुतां, गतैः क्ष्माम् अक्ष्मापयतां; तूर्णम् अन्योन्यम् अभिन्तां शिक्षाश्च मुहुः अतनुताम्॥

व्याख्या—बाणैः=शरैः, व्योम=आकाशं, प्राचिनुताम्=आच्छादितवन्तौ, ताविति शेषः। एवं परत्राऽपि। गतैः=गमनैः, "हतै"रिति मल्लिनाथसम्मते पाठे हताःकपिभिरित्यर्थः। क्ष्मां=पृथिवीम्, अक्ष्मापयतां=कम्पितवन्तौ; तूर्णं=क्षिप्रम्, अन्योन्यं=परस्परं, अभिन्तां=विदारितवन्तौ, शिक्षाश्च=अभ्यासपाटवानि च, आयुधप्रहार इति शेषः। मुहुः=वारं वारम्, अतनुतां=विस्तारितवन्तौ॥

व्युत्पत्तिः—प्राचिनुतां=प्रपूर्वकात् "चिञ् चयने" इति धातोर्लङ्। क्ष्मां= "क्ष्माऽवनिर्मेदिनी मही"त्यमरः। अक्ष्मापयतां="क्ष्मायी विधूनने" इति धातोर्ण्यन्ताल्लङ् "अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ" इति पुक् यकारलोपश्च। अभिन्तां="भिदिर् विदारण" इति धातोर्लङ्, तसस्तामादेशः "श्नसोरल्लोप" इत्यल्लोपः; चर्त्वेन च तकारः। अतनुतां="तनु विस्तार" इति तनादिधातोर्लङ् "तनादिकृञ्भ्य उः" इति उप्रत्ययः॥

भाषाऽर्थः—राम और रावणने बाणोंसे आकाशको आच्छादित कर डाला, अपने गमनोंसे पृथ्वीको कम्पित किया; शीघ्र एकने दूसरेको विदारित किया और आयुधप्रहारमें अभ्यास पाटवोंको बारंबार फैलाया॥ ८५॥

समाधत्ताऽऽसुरं शस्त्रं राक्षसः क्रूरविक्रमः।
तदक्षरन्महासर्पान् व्याघ्रसिंहांश्च भीषणान्॥ ८६॥

अन्वयः—क्रूरविक्रमो राक्षसः आसुरं शस्त्रं समाधत्त। तत् भीषणान् महासर्पान् व्याघ्रसिंहांश्च अक्षरत्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—क्रूरविक्रमः = नृशंसपराक्रमः, "क्रूरविग्रहः" इति मल्लिनाथसम्मते पाठे भयङ्करशरीरो भयङ्करकलहो वेत्यर्थः । राक्षसः = यातुधानः, रावण इत्यर्थः । आसुरम् = असुरदैवतं, शस्त्रं = बाणं, समाधत्त = सन्दधे, धनुषीति शेषः । तत् = आसुरं शस्त्रं, भीषणान् = भयानकान्, महासर्पान् = बृहद्भुजगान्, व्याघ्रसिंहांश्च = शार्दूलमृगेन्द्रांश्च, असृजत् = असृजदिति भावः ॥

व्युत्पत्तिः—क्रूरविक्रमः = क्रूरो विक्रमो यस्य सः । आसुरम् = असुरो देवताऽस्येति आसुरं, तत्र "साऽस्य देवता" इत्यण् । समाधत्त = समाङ्पूर्वकात् "डुधाञ् धारणपोषणयोः" इति धातोर्लङ्, श्लौ द्वित्वमभ्यासकार्यं च "श्नाऽभ्यस्तयोरातः" इत्याकारलोपः "दधस्तथोश्चे"ति भष्भावः "अध" इति प्रतिषेधात् "झषस्तथोर्धो-ऽधः" इति तकारस्य धत्वं न ॥

भाषाऽर्थः—क्रूर पराक्रमवाले राक्षस (रावण) ने असुर देवतावाले शस्त्रको धनुमें सन्धान किया । उस शस्त्रने भयङ्कर बड़े-बड़े सर्प और व्याघ्र तथा सिंहोंको भी प्रकट किया ॥ ८६ ॥

न्यषेधत् पावकाऽस्त्रेण रामस्तद्राक्षसस्ततः ।
अदीव्यद्रौद्रमत्युग्रं मुसलाऽऽद्यगलत्ततः ॥ ८७ ॥

अन्वयः—रामः तत् पावकाऽस्त्रेण न्यषेधत् । ततो राक्षसः अत्युग्रं रौद्रम् अदीव्यत्, ततो मुसलादि अगलत् ॥

व्याख्या—रामः = रामचन्द्रः, तत् = रावणप्रहितमासुरं शस्त्रं, पावकाऽस्त्रेण = आग्नेयास्त्रेण, न्यषेधत् = निषिद्धवान्, न्यवारयदिति भावः, ततः = आसुराऽस्त्रनिवारणाऽनन्तरं, राक्षसः = रावणः, अत्युग्रम् = अतिभयङ्करं, रौद्रं = रुद्रदैवतमस्त्रम्, अदीव्यत्=व्यवहृतवान्, प्रयुक्तवानित्यर्थः । ततः = तस्मात्, रौद्राऽस्त्रादिति भावः । मुसलादि=मुसलाद्यनेकशस्त्रम्, अगलत्=निर्गतम् ॥

व्युत्पत्तिः—पावकाऽस्त्रेण = पावकदैवतमस्त्रं पावकाऽस्त्रं, तेन "शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्" इति मध्यमपदलोपी समासः । न्यषेधत् = निपूर्वकात् "षिध गत्याम्" इति धातोर्लङ् "प्राक्सिताद्ड्व्यवायेऽपि" इति षत्वम् । उपसर्गेण धातोरर्थान्तरत्वम् । रौद्रं = रुद्रो देवताऽस्येति रौद्रं तत्, अण् प्रत्ययः । अदीव्यत् = "दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु" इति धातोर्व्यवहारऽर्थे लङ् "हलि चे"ति दीर्घत्वम् । अगलत्="गल अदने" इति धातोर्लङ्, धातोरनेकार्थत्वात्त्र गलिर्निर्गलनेऽर्थे ॥

भाषाऽर्थः—रामचन्द्रजीने रावणसे प्रेरित उस आसुराऽस्त्रको आग्नेयाऽस्त्रसे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

निवारित किया। तब रावणने अतिभयङ्कर रौद्र अस्त्र छोड़ा, उससे मुसल आदि अनेक अस्त्र निकले ॥ ८७ ॥

गान्धर्वेण न्यविध्यत्तत् क्षितीन्द्रोऽथ नराऽशनः।
सर्वमर्मसु काकुत्स्थमौम्भत्तीक्ष्णैः शिलीमुखैः ॥ ८८ ॥

अन्वयः—क्षितीन्द्रः तत् गान्धर्वेण न्यविध्यत्। अथ नराशनः तीक्ष्णैः शिलीमुखैः काकुत्स्थं सर्वमर्मसु औम्भत् ॥

व्याख्या—क्षितीन्द्रः = रामः, तत् = रावणप्रेरितं रौद्राऽस्त्रं, गान्धर्वेण = गन्धर्वाऽस्त्रेण, न्यविध्यत् = ताडितवान्, न्यवारयदित्यर्थः। अथ = रौद्राऽस्त्रनिवारणाऽनन्तरं, नराशनः = मनुष्यभक्षकः, रावण इति भावः। तीक्ष्णैः = निशितैः, शिलीमुखैः = बाणैः, काकुत्स्थं = रामं, सर्वमर्मसु = सकलमर्मस्थानेषु, औम्भत् = अपूरयत्।

व्युत्पत्तिः—गान्धर्वेण = गन्धर्वो देवताऽस्येति गान्धर्वं, तेन "साऽस्य देवता" इत्यण्। न्यविध्यत् = निपूर्वात् "व्यध ताडने" इति धातोर्लङ् "ग्रहिज्यावयिव्यधि" त्यादिना सम्प्रसारणम्। नराशनः = नरान् अश्नातीति, "कृत्यल्युटो बहुलम्" इत्यत्र बहुलग्रहणसामर्थ्यात्कर्तरि ल्युट्। औम्भत् = "उम्भ पूरणे" इति तौदादिकधातोर्लङ्, आड्वृद्धिः ॥

भाषाऽर्थः—रामचन्द्रजीने रावणसे प्रेरित उस रौद्राऽस्त्रको गन्धर्वाऽस्त्रसे निवारित किया। तब रावणने तीखे बाणोंसे रामचन्द्रजीके संपूर्ण मर्म स्थानोंको पूर्ण कर दिया ॥ ८८ ॥

ततस्त्रिशिरसं तस्य प्रावृश्चल्लक्ष्मणो ध्वजम्।
अमथ्नात्सारथिं चाऽऽशु भूरिभिश्चाऽतुदच्छरैः ॥ ८९ ॥

अन्वयः—ततो लक्ष्मणः तस्य त्रिशिरसं ध्वजं प्रावृश्चत्, सारथिम् अमथ्नात्; भूरिभिः शरैः आशु अतुदत् ॥

व्याख्या—ततः = रावणविक्रमाऽनन्तरं, लक्ष्मणः = रामाऽनुजः, तस्य = रावणस्य, त्रिशिरसं = त्रिशिखं त्रिशूलाग्रमिति भावः। ध्वजं = पताकां, प्रावृश्चत् = छिन्नवान्, सारथिं = रावणसूतम्, अमथ्नात् = जघानेति भावः। भूरिभिः = प्रचुरैः, शरैः = बाणैः, आशु = शीघ्रम्, अतुदत् = व्यथितवान्, रावणमिति शेषः ॥

व्युत्पत्तिः—त्रिशिरसं = त्रीणि शिरांसि यस्मिन् स त्रिशिरास्तम्। प्रावृश्चत् = प्रपूर्वकात् "ओव्रश्चू छेदने" इति तौदादिकधातोर्लङ्। अमथ्नात् = "मन्थ विलोडने" इति क्र्यादिस्थधातोर्लङ्। अतुदत् = "तुद व्यथने" इति धातोर्लङ्। "तुदादिभ्यः शः" इति शप्रत्ययः। लघूपधगुणं बाधित्वा नित्यत्वात् शे कृते तस्य अपित्वात् "सार्वधातुकमपित्" इति ङित्वात् "क्ङिति चे"ति गुणनिषेधः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषार्थः—तब लक्ष्मणजीने अग्रभागमें त्रिशूलके चिह्नवाले रावणके ध्वजको काट डाला, रावणके सारथिको मारा और प्रचुर बाणोंसे रावणको भी शीघ्र पीडित किया ॥ ८९ ॥

अश्वान् विभीषणोऽतुभ्नात्स्यन्दनं चाऽक्षिणोद्द्रुतम् ।
नाऽक्षुभ्नाद्राक्षसो भ्रातुः शक्तिं चोदवृहद्गुरुम् ॥ ९० ॥

अन्वयः—विभीषणः अश्वान् अतुभ्नात्, स्यन्दनं च द्रुतम् अक्षिणोत् । राक्षसो न अक्षुभ्नात्, भ्रातुः गुरुं शक्तिम् उदवृहत् ॥

व्याख्या—विभीषणः = रावणाऽनुजः, अश्वान् = रावणरथहयान्, अतुभ्नात् = हतवान्, स्यन्दनं च = रावणरथं च, द्रुतं = शीघ्रम्, अक्षिणोत् = बभञ्जेति भावः । राक्षसः = यातुधानः, रावण इति भावः । न अक्षुभ्नात् = क्षोभं न गतः, भ्रातुः = विभीषणस्य, कृते इति शेषः । गुरुं = गुर्वीं, शक्तिं = कासूम्, उदवृहत् = उद्यतवान् ॥

व्युत्पत्तिः—अतुभ्नात् = "(नभ) तुभ हिंसायाम्" इति क्र्यादिधातोर्लङ् । अक्षिणोत् = "क्षिणु हिंसायाम्" इति तनादिधातोर्लङ् । "तनादिकृञ्भ्य उः" इति उप्रत्यये गुणः । अक्षुभ्नात् = "क्षुभ सञ्चलन" इति क्र्यादिधातोर्लङ् । गुरुं = "वोतो गुणवचनात्" इति ङीषो वैकल्पिकत्वात् पक्षे तदभावः । उदवृहत् = उत्पूर्वकात् "वृहू उद्यमने" इति तौदादिकधातोर्लङ् ।

भाषाऽर्थः—विभीषणने रावणके घोड़ों को मार डाला, रथको भी शीघ्र तोड़ डाला । रावण क्षुब्ध नहीं हुआ और उसने भाई को मारनेके लिए बड़ी सी शक्ति उठाई ॥ ९० ॥

युग्मम्—

तामापतन्तीं सौमित्रिस्त्रिधाऽकृन्तच्छिलीमुखैः ।
अशब्दायन्त पश्यन्तस्ततः क्रुद्धो निशाचरः ॥ ९१ ॥

अष्टघण्टां महाशक्तिमुदयच्छन्महत्तराम् ।
रामाऽनुजं तयाऽविध्यत्स महीं व्यसुराश्रयत् ॥ ९२ ॥

अन्वयः—सौमित्रिः आपतन्तीं तां शिलीमुखैः त्रिधा अकृन्तत् । पश्यन्तः अशब्दायन्त । ततः निशाचरः क्रुद्धः (सन्) अष्टघण्टां महत्तरां महाशक्तिम् उदयच्छत् । तया रामाऽनुजम् अविध्यत् । स व्यसुः (सन्) महीम् आश्रयत् ॥

व्याख्या—सौमित्रिः = लक्ष्मणः, आपतन्तीम् = आयान्तीं, विभीषणोपरीति शेषः, तां = शक्तिं, शिलीमुखैः = बाणैः, त्रिधा = खण्डत्रयेण, अकृन्तत् = छिन्न-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वान् । ततः पश्यन्तः=तत्कर्म प्रेक्षमाणा जनाः, अशब्दायन्त=शब्दं कृतवन्तः। ततः=शक्तिकृन्तनाऽनन्तरं निशाचरः=राक्षसः, रावण इति भावः। क्रुद्धः= कुपितः सन्, अष्टघण्टां=घण्टाऽष्टकोपेतां, महत्तरां=महाप्रमाणां, महाशक्तिं= बृहत्कासूम्, उदयच्छत्=उद्यतवान्, तया=महाशक्त्या, रामाऽनुजं=लक्ष्मणम्, अविध्यत्=विद्धवान् । स=लक्ष्मणः, व्यसुः=विगतप्राणः सन्, महीं= आश्रयत्=पृथिवीम्, आश्रितः, मह्यां पपातेति भावः ॥

व्युत्पत्तिः—सौमित्रिः=सुमित्राया अपत्यं पुमान्, "बाह्वादिभ्यश्चे"ति इञ्। त्रिधा=त्रिभिः प्रकारैः, "संख्याया विधाऽर्थे धा" इति धाप्रत्ययः। अकृन्तत्= "कृती छेदने" इति तुदादिधातोर्लङ्, "श मुचादीनाम्" इति नुम्। अशब्दायन्त= "शब्दवैरकलहाऽभ्रकण्वमेघेभ्यः करणे" इति करोत्यर्थे क्यङ्, तदन्तात्तङ्। ङित्वा- दात्मनेपदम्। निशाचरः=निशासु चरतीति "चरेष्ट" इत्यधिकरण उपपदे टप्रत्ययः। अष्टघण्टाम्=अष्टौ घण्टा यस्यां साऽष्टघण्टा, ताम्। महत्तराम्=अतिशयेन महती महत्तरा, ताम् "द्विवचनविभज्योपपदे तरबीयसुनौ" इति तरप्प्रत्ययः। उदयच्छत्= उत्पूर्वकात् "यमु उपरमे" इति धातोर्लङ् "इषुगमियमां छः" इति छः। अकर्त्रभिप्रा- यत्वात् "समुदाङ्भ्यो यमोऽग्रन्थे" इत्यात्मनेपदं न। रामाऽनुजं=राममनुजातवा- निति रामानुजस्तम्, "अनौ कर्मणि" इति डः। अविध्यत्="व्यध ताडने" इति धातोर्लङ् "ग्रहिज्यावयिव्यधि" त्यादिना सम्प्रसारणम्। व्यसुः=विगता असवो यस्मात्सः। आश्रयत्=आङ्पूर्वकात् "श्रिञ सेवायाम्" इति धातोर्लङ्॥

भाषाऽर्थः—लक्ष्मणजीने विभीषणके ऊपर आ पड़ती हुई उस शक्तिके तीन टुकड़े कर दिये। उस कर्मको देखने वाले शब्द करने लगे। तब रावणने क्रुद्ध होकर आठ घण्टाओंसे युक्त बड़ी भारी शक्ति उठाई। उससे लक्ष्मणको विद्ध किया। तब निष्प्राण होकर लक्ष्मणजी जमीन पर गिर पड़े॥ ९१-९२॥

राघवस्याऽभृशायन्त सायकास्तैरुपद्रुतः।
ततस्तूर्णं दशग्रीवो रणक्ष्मां पर्यशेषयत्॥ ९३॥

अन्वयः—राघवस्य सायका अभृशायन्त। ततः तैः उपद्रुतो दशग्रीवः तूर्णं रणक्ष्मां पर्यशेषयत्॥

व्याख्या—राघवस्य=रामस्य, सायकाः=बाणाः, अभृशायन्त=शीघ्रगतयो जाता इति भावः। ततः=अनन्तरं, तैः=सायकैः, उपद्रुतः=पीडितः, दशग्रीवः= रावणः, तूर्णं=क्षिप्रं, रणक्ष्मां=युद्धभूमिं, पर्यशेषयत्=शेषयति स्म, आत्मापलायनेन तामेव शेषितवानित्यर्थः, त्यक्तवानिति भावः॥

व्युत्पत्तिः—अभृशायन्त=अभृशा भृशा अभवन्, "भृशादिभ्यो भुव्यच्वेर्लो-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पश्च हल" इति च्व्यर्थे क्यङन्ताल्लङ् । पर्यशेषयत्=अरिपूर्वकात् "शिष असर्वोपयोगे" इति चौरादिकधातोर्लङ् ॥

भाषाऽर्थः—तब रामके बाण शीघ्रगतिवाले हो गये। उसके अनन्तर उन बाणों से पीडित होकर रावणने युद्धभूमिको शीघ्र छोड़ दिया ॥ ९३ ॥

सस्फुरस्योदकर्षच्च सौमित्रेः शक्तिमग्रजः ।
असिञ्चदोषधीस्ता याः समानीता हनूमता ॥ ९४ ॥

अन्वयः—अग्रजः सस्फुरस्य सौमित्रेः शक्तिम् उदकर्षत्, या हनूमता समानीताः ता ओषधीः असिञ्चत् ॥

व्याख्या—अग्रजः=ज्येष्ठभ्राता, राम इत्यर्थः । सस्फुरस्य=उच्छ्वसतः, अन्तर्लीनप्राणस्येति भावः । सौमित्रेः=लक्ष्मणस्य, शक्तिं=कासू, हृदयलग्नामिति भावः । उदकर्षत्=उद्धृतवान् । मल्लिनाथस्तु "अस्फुरत्" इति पाठान्तरं प्राह तत्र सौमित्रेः अग्रजः अस्फुरत्=अचेष्टतेत्यर्थः । याः=ओषध्यः, हनूमता=पवनतनयेन, समानीताः=आहृताः, ताः=तादृशीः, ओषधीः=औषधान्, मृतसञ्जीविनीप्रमुखानिति भावः । असिञ्चत्=अक्षरत्, व्रणेषु इति भावः ॥

व्युत्पत्तिः—सस्फुरस्य=स्फुरतीति स्फुरः अन्तःस्फुरन्प्राणवायुः । "इगुपधज्ञाप्रीकिरः क" इति कप्रत्ययः । स्फुरेण सहितः सस्फुरस्तस्य, "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः, "वोपसर्जनस्य" इति सहस्य सादेशः । असिञ्चत्="षिच क्षरणे" इति धातोर्लङ् "शे मुचादीनाम्" इति नुम् ॥

भाषाऽर्थः—ज्येष्ठ भ्राता रामचन्द्रजीने अन्तर्लीन प्राणवाले लक्ष्मणके हृदयमें लगी हुई शक्तिको निकाल डाला। हनूमान्‌जी जिनको ले आये थे मृतसञ्जीविनी आदि उन औषधोंको लक्ष्मणजीके व्रणस्थानोंमें रामचन्द्रजीने सेचन किया ॥ ९४ ॥

उदजीवत् सुमित्राभूर्भ्राताऽऽश्लिष्यत्तमायतम् ।
सम्यङ्मूर्धन्युपाशिङ्घदपृच्छच्च निरामयम् ॥ ९५ ॥

अन्वयः—सुमित्राभूः उदजीवत् । भ्राता तम् आयतम् आश्लिष्यत्; मूर्द्धनि सम्यक् उपाशिङ्घत् निरामयं च अपृच्छत् ॥

व्याख्या—सुमित्राभूः=सौमित्रिः, लक्ष्मण इत्यर्थः. पराजितत्वान्मातृसम्बन्धेन व्यपदेशो बोध्यः । उदजीवत्=उज्जीवितः ओषधीसेचनसमकालमेवेति भाव । भ्राता=रामः, तं=लक्ष्मणम्, आयतं=दीर्घकालं यथा तथा, आश्लिष्यत्=आलिङ्गितवान् , मूर्द्धनि=शिरसि, सम्यक्=यथाशास्त्रम्, उपाशिङ्घत्=अजिघ्रत् , निरामयं च=आमयाऽभावं च व्यथाशान्तिं चेति भावः । अपृच्छत्=पृष्टवान् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—सुमित्राभूः = सुमित्रायां भवतीति । उदजीवत् = उत्पूर्वकात् "जीव प्राणधारण" इति धातोर्लङ् । आश्लिष्यत् = आङ्पूर्वकात् "श्लिष आलिङ्गन" इति धातोर्लङ् । मूर्द्धनि = "विभाषा ङिश्योः" इत्यल्लोपाऽभावपक्षे रूपम् । अल्लोपपक्षे "मूर्ध्नि" इति रूपम् । उपाशिङ्घत्=उपाङ्पूर्वकात् "शिघि आघ्राण" इति धातोर्लङ् ॥

भाषाऽर्थः—लक्ष्मणजी उज्जीवित हो गये। भाई रामचन्द्रजीने उन्हें दीर्घ कालतक आलिङ्गन किया; शिरमें शास्त्रके अनुसार सूँघा और कुशल प्रश्न भी किया ॥

ततः प्रोदसहन् सर्वे योद्धुमभ्यद्रवत् परान् ।
अकृच्छ्रायत च प्राप्तो रथेनाऽन्येन रावणः ॥ ९६ ॥

अन्वयः—ततः सर्वे योद्धुं प्रोदसहन् । रावणः अन्येन रथेन प्राप्तः परान् अभ्यद्रवत् अकृच्छ्रायत च ।

व्याख्या—ततः=लक्ष्मणोज्जीवनाऽनन्तरं, सर्वे = रामाऽऽदयः, योद्धुं=युद्धं कर्तुं, प्रोदसहन्=प्रोत्सेहिरे । रावणः = दशाननः, अन्येन = अपरेण, रथेन = स्यन्दनेन, प्राप्तः = आसादितः सन् , परान् = शत्रून् , उत्सहत इति भावः । "हरीन्" इति मल्लिनाथसम्मतः पाठस्तस्य वानरानित्यर्थः । अभ्यद्रवत् = अभिमुखं गतः, अकृच्छ्रायत च=कृच्छ्राय (पापाय) अक्रामच्च, हन्तुं प्रवृत्तश्चेति भावः ॥

व्युत्पत्तिः—प्रोदसहन् = प्रोत्पूर्वकात् "षह मर्षणे" इति चौरादिकात् परस्मैपदिनो धातोः "आधृषाद्वे"ति णिजभावपक्षे लङ् । भौवादिकात्तु धातोरात्मनेपदमेवेति पूर्वे व्याख्यातारः । भट्टमल्लस्तु—"तितिक्षतेऽधिकुरुते क्षान्तौ सहति सह्यति । मृष्यत्यामर्षति चेति आत्मनेऽपि चतुष्टयम् ॥" इत्याचष्टेति मल्लिनाथः । अभ्यद्रवत्= अभिपूर्वकात् "द्रु गतौ" इति धातोर्लङ् । अकृच्छ्रायत="कष्टाय क्रमण" इत्यत्र "सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्" इति क्यङन्तात्कृच्छ्रायधातोर्लङ् । कण्वम्=पापमित्यर्थः ॥

भाषाऽर्थः—लक्ष्मणजीके जीनेके अनन्तर रामचन्द्र आदि सब लोगोंने युद्ध करनेके लिए उत्साह किया। रावण दूसरे रथसे आकर उत्साह करने वाले शत्रुओंके सम्मुख गया और उन्हें मारनेके लिए प्रवृत्त हुआ ॥ ९६ ॥

भूमिष्ठस्याऽसमं युद्धं रथस्थेनेति मातलिः ।
आहरद्रथमत्युग्रं सशस्त्रं मघवाऽऽज्ञया ॥ ९७ ॥

अन्वयः—भूमिष्ठस्य रथस्थेन युद्धम् असमम् इति मघवाऽऽज्ञया मातलिः अत्युग्रं सशस्त्रं रथम् आहरत् ॥

व्याख्या—भूमिष्ठस्य=भूस्थितस्य, रामस्येति भावः । रथस्थेन=स्यन्दनस्थितेन, रावणेन सहेति भावः । युद्धं = संग्रामः, असमम् = अतुल्यम्, अयुक्तमित्यर्थः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति = एवम्, निरूप्य इति शेषः । मघवाऽऽज्ञया = इन्द्राऽऽदेशेन, मातलिः = इन्द्र-सारथिः, अत्युग्रम् = अतिभीषणं, रथं = स्यन्दनम्, आहरत् = आनयत् ॥

व्युत्पत्तिः—भूमिष्ठस्य = भूमौ तिष्ठतीति भूमिष्ठस्तस्य, "सुपि स्थ" इति कप्रत्ययः "अम्बाऽऽम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थ" इति मूर्धन्यत्वे ष्टुत्वम् । रथस्थेन = रथे तिष्ठतीति, तेन, पूर्ववत्कः । मघवाऽऽज्ञया=मघोन आज्ञा मघवाऽऽज्ञा, तया । "वासवाऽऽज्ञया" इति मल्लिनाथसम्मतः पाठः । सशस्त्रं = शस्त्रैः सहितः सशस्त्रस्तम् ॥

भाषाऽर्थः—भूमिस्थित रामचन्द्रजीका रथस्थित रावणसे युद्ध अनुचित है ऐसा विचार कर इन्द्रकी आज्ञासे मातलि अति भयङ्कर तथा शस्त्रोंसे युक्त रथ ले आये ॥ ९७ ॥

सोऽध्यष्ठीयत रामेण शस्त्रं पाशुपतं ततः ।
निरास्यत दशाऽऽस्यस्तच्छक्राऽस्त्रेणाजयन्नृपः ॥ ९८ ॥

अन्वयः—स रामेण अध्यष्ठीयत । ततो दशाऽऽस्यः पाशुपतं शस्त्रं निरास्यत । नृपः तत् शक्राऽस्त्रेण अजयत् ॥

व्याख्या—सः = मातल्याहृतो रथः, रामेण = रामचन्द्रेण, अध्यष्ठीयत = अधिष्ठितः । ततः = रामकर्तृकरथाऽधिष्ठानाऽनन्तरं, दशाऽऽस्यः = रावणः, पाशुपतं = पशुपतिदैवतं, शस्त्रम् = आयुधं, निरास्यत = क्षिप्तवान् । नृपः = राजा, राम इत्यर्थः । तत् = दशाऽऽस्यनिरस्तं पाशुपताऽस्त्रं, शक्रास्त्रेण = इन्द्रास्त्रेण, अजयत्=जितवान् ॥

व्युत्पत्तिः—अध्यष्ठीयत = अधिपूर्वकात् "ष्ठा गतिनिवृत्तौ" इति धातोः कर्मणि लङ् । "घुमास्थागापाजहातिसां हलि" इत्यात ईत्वम् "उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्" इत्यनेन "प्राक्सितादड्व्यवायेऽपी"ति नियमेनाड्व्यवायेऽपि षत्वम् । पाशुपतं = पशुपतिर्देवताऽस्येति पाशुपतं, तत् "साऽस्य देवता" इत्यण । निरास्यत = निरुपसर्गपूर्वकात् "असु क्षेपण" इति धातोर्लङ्, "उपसर्गादस्यत्यूह्योर्वेति वाच्यम्" इत्यात्मनेपदम् । शक्राऽस्त्रेण = शक्रदैवतं शस्त्रं, शक्राऽस्त्रं, तेन, मध्यमपदलोपी समासः ॥

भाषाऽर्थः—रामचन्द्रजी मातलिसे लाये गये उस रथपर आरूढ हुए । तब रावणने पाशुपत शस्त्रको छोड़ा । राजारामने उस शस्त्रको इन्द्राऽस्त्रसे जीत लिया ॥

ततः शतसहस्रेण रामः प्रौर्णोन्निशाचरम् ।
बाणानामक्षिणोद्धुर्यान् सारथिं चाऽदुनोद्द्रुतम् ॥ ९९ ॥

अन्वयः—ततो रामो बाणानां शतसहस्रेण निशाचरं प्रौर्णोत्, धुर्यान् अक्षिणोत् सारथिं च द्रुतम् अदुनोत् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—ततः = पाशुपतास्त्रजयाऽनन्तरं, रामः=रामचन्द्रः, बाणानां शराणां शतसहस्रेण = लक्षेण निशाचर = राक्षसराजं रावणं, प्रौर्णोत् = आच्छादयत्, धुर्यान् = रथाऽश्वान्, अक्षिणोत् = हतवान्, सारथिं च = सूतं च, द्रुतं = शीघ्रम्, अदुनोत् = उपतापितवान् ॥

व्युत्पत्तिः—शतसहस्रेण = शतानां सहस्रं, शतसहस्रं तेन। प्रौर्णोत् = प्रपूर्वकात् "ऊर्णुञ आच्छादने" इति धातोर्लङ् "गुणोऽपृक्ते" इति गुणः। धुर्यान् = धुरं वहन्तीति धुर्यास्तान्, "धुरो यड्ढकौ" इति यत्। अक्षिणोत् = "क्षिणु हिंसायाम्" इति तनादेर्धातोर्लङ्। अदुनोत् = "टुदु उपतापे" इति स्वादिस्थधातोर्लङ् ॥

भाषाऽर्थः—तब रामचन्द्रजीने लाख बाणों से राक्षसराज रावणको आच्छादित कर डाला, उसके रथके घोड़ोंको मारा और सारथिको भी शीघ्र पीडित कर दिया ॥

अदृश्यन्ताऽनिमित्तानि प्राह्वलत्क्षितिमण्डलम्।
रावणः प्राहिणोच्छूलं शक्तिं चैन्द्रीं महीपतिः ॥ १०० ॥

अन्वयः—अनिमित्तानि अदृश्यन्त। क्षितिमण्डलं प्राह्वलत्। रावणः शूलं, महीपतिश्च ऐन्द्रीं शक्तिं प्राहिणोत् ॥

व्याख्या—अनिमित्तानि = अशकुनानि, अदृश्यन्त = दृष्टानि, रावणस्याऽग्र इति शेषः। क्षितिमण्डलं = भूगोल, प्राह्वलत् = चलितम्। रावणः = दशाऽऽननः, शूलं = ब्रह्मदत्तमायुधविशेष, महीपतिश्च = भूपश्च, रामश्चेति भावः। ऐन्द्रीम् = इन्द्रदेवताम्, इन्द्रप्रदत्तां वा, शक्तिं = कासूं, प्राहिणोत् = प्रायुङ्क्त ॥

व्युत्पत्तिः—अदृश्यन्त = दृशधातोः कर्मणि लङ्। प्राह्वलत् = प्रपूर्वकात् "ह्वल चलने" इति धातोर्लङ्। प्राहिणोत् = प्रपूर्वकात् "हि गतौ" इति स्वादिस्थधातोर्लङ् "हिनुमीना" इति णत्वम् ॥

भाषाऽर्थः—रावणके आगे अशकुन देखे जाने लगे। भूमण्डल डोलने लगा। रावणने ब्रह्माजीसे दिये गये शूलको छोड़ा, उसको हटाने के लिए राजा रामने इन्द्र की शक्ति छोड़ा ॥ १०० ॥

युग्मम्—

ताभ्यामन्योन्यमासाद्य समवाप्यत संशमः।
लक्षेण पत्रिणां वक्षः क्रुद्धो रामस्य राक्षसः ॥ १०१ ॥
अस्तृणादधिकं रामस्ततोऽदेवत सायकैः।
अक्लाम्यद्रावणस्तस्य सूतो रथमनाशयत् ॥ १०२ ॥

अन्वयः—ताभ्याम् अन्योन्यम् आसाद्य संशमः समवाप्यत। क्रुद्धो राक्षसः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पत्रिणां लक्षेण रामस्य वक्षः अस्तृणात् । ततो रामः अधिकं सायकैः अदेवत । रावणः अक्लाम्यत् । तस्य सूतो रथम् अनाशयत् ॥

व्याख्या—ताभ्यां = शूलशक्तिभ्याम्, अन्योन्यं = परस्परम्, आसाद्य = प्राप्य, संशमः = संक्षयः, समवाप्यत = संप्राप्तः । अथ क्रुद्धः = कुपितः, राक्षसः = रावणः, पत्रिणां = बाणानां, लक्षेण = शतसहस्रेण, रामस्य = रामचन्द्रस्य, वक्षः = उरःस्थलम्, अस्तृणात् = आच्छादितवान् । ततः = अनन्तरं, रामः = रामचन्द्रः, अधिकं = रावणादधिके यथा तथा, सायकैः = बाणैः, अदेवत = अक्रीडत् । ततो रावणः = दशाननः, अक्लाम्यत् = क्लान्तोऽभूत्, मूर्च्छित इति भावः । अथ तस्य = रावणस्य, सूतः = सारथिः, रथं = स्यन्दनम्, अनाशयत् = अदर्शनमगमयत्, अन्यतोऽनयदिति भावः, रावणरक्षार्थमिति तात्पर्यम् ।

व्युत्पत्तिः—संशमः = संशमनं संशमः, "भावे" इति घञ् "नोदात्तोपदेशस्य मान्तस्याऽनाचमेः" इति वृद्धिनिषेधः । समवाप्यत = समवपूर्वकात् "आप्लृ व्याप्तौ" इति धातोः कर्मणि लङ् । अस्तृणात् = "स्तॄञ् आच्छादने" इति क्र्यादिस्थधातोर्लङ "प्वादीनां ह्रस्वः" इति ह्रस्वत्वम् । अदेवत = "(तेवृ) देवृ देवने" इति भौवादिकादनुदात्तेतो धातोर्लङ् । अक्लाम्यत् = "क्लमु ग्लानौ" इति धातोर्लङ् । सूतः = "सूतः क्षत्ता च सारथिः" इत्यमरः । अनाशयत् = "णश अदर्शने" इति धातोर्णिजन्ताल्लङ् ॥

भाषाऽर्थः—शूल और शक्ति परस्पर मिलकर नष्ट हो गये । क्रुद्ध होकर रावणने लाख बाणोंसे रामचन्द्रजी की छातीको आच्छादित कर डाला । तब रामचन्द्रजी ने बाणोंसे पर्याप्त क्रीडा की । रावण मूर्च्छित हुआ । तब सारथि उसकी रक्षाके लिए रथको युद्धभूमिसे दूर ले गया ॥ १०१-१०२ ॥

राक्षसोऽतर्जयत् सूतं पुनश्चाऽढौकयद्रथम् ।
निरास्येतामुभौ बाणानुभौ धुर्यानविध्यताम् ॥ १०३ ॥

अन्वयः—राक्षसः सूतम् अतर्जयत्, पुनश्च रथम् अढौकयत् । उभौ बाणान् निरास्येताम् । उभौ धुर्यान् अविध्यताम् ॥

व्याख्या—राक्षसः = यातुधानः, रावण इति भावः । सूतं = सारथिम्, अतर्जयत् = भर्त्सितवान्, रणस्थानाद्रथस्य दूराऽपनयनादिति भावः । पुनश्च भूयोऽपि, रथं = स्यन्दनम्, अढौकयत् = अगमयत्, रामसमीपमिति शेषः । उभौ = रामरावणौ, बाणान् = शरान्, निरास्येतां = क्षिप्तवन्तौ । उभौ = द्वौ, रामरावणाविति भावः । धुर्यान् = अश्वान्, अविध्यतां = ताडितवन्तौ ॥

व्युत्पत्तिः—अतर्जयत् = "तर्ज भर्त्सने" इति भौवादिकाद्धातोर्णिचि लङ् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मल्लिनाथस्तु "तर्ज (भर्त्स) तर्जने" इति चौरादिकधातोरनुदात्तेत्वेऽपि तस्य चक्षिङादेशस्य ङित्करणाज्ज्ञापकादनित्यत्वज्ञापनात्परस्मैपदप्रयोग इति जग्रन्थ। अढौकयत्=गत्यर्थाड्ढौकृधातोर्णौ लङि रूपम्। निरास्येतां=निरुपसर्गपूर्वकात् "असु क्षेपण" इति धातोः "उपसर्गादस्यत्यूह्योर्वेति वाच्यम्" इत्य त्मनेपदं, ततो लङ्। अजादित्वात् "आडजादीनाम्" इत्याडागमः। धुर्यान्=धुरं वहन्तीति धुर्यास्तान्, "धुरो यड्ढकौ" इति यत्प्रत्ययः। अविध्यताम्="व्यध ताडन" इति दैवादिकधातोर्लङ् "ग्रहिज्यावयिव्यधी" त्यादिना सम्प्रसारणम् ॥

भाषाऽर्थः—रावणने रथको युद्धभूमिसे दूर ले जानेके कारण सारथिको भर्त्सन किया और फिर रथको युद्धभूमिमें पहुँचाया। राम और रावण दोनोंने बाणोंको छोड़ा। दोनोंने एक दूसरेके घोड़ोंको बाणोंसे बेध डाला ॥ १०३ ॥

उभावकृन्ततां केतूनव्यथेतामुभौ न तौ।
अदीप्येतामुभौ धृष्णू प्रायुञ्जातां च नैपुणम् ॥ १०४ ॥

अन्वयः—उभौ केतून् अकृन्ताम्। तौ उभौ न अव्यथेताम् उभौ अदीप्येतां, धृष्णू (सन्तौ) नैपुणं च प्रायुञ्जाताम् ॥

व्याख्या—उभौ=द्वौ, रामरावणावित्यर्थः। केतून्=ध्वजान्, अकृन्ततां= छिन्नवन्तौ। तौ=पूर्वोक्तौ, उभौ=द्वौ, रामरावणौ। न अव्यथेतां=नो भीतौ नो चलितौ वा। उभौ=रामरावणौ, अदीप्येताम्=अराजताम्, धृष्णू=धर्षण· शीलौ सन्तौ, रामरावणाविति शेषः। नपुणं च=युद्धकौशलं च, प्रायुञ्जातां= प्रयुक्तवन्तौ ॥

व्युत्पत्तिः—अकृन्ततां="कृती छेदने" इति तौदादिकाद्धातोर्लङ् "शे मुचा· दीनाम्" इति नुम्। अव्यथेतां="व्यथ भयचलनयोः" इति धातोर्लङ्। अदीप्येतां= "दीपी दीप्तौ" इति धातोर्लङ्। धृष्णू="धृष प्रसहने" इति चौरादिकाद्धातोः "त्रसिगृधिधृषिक्षिपेः क्नुः" इति क्नुप्रत्ययः। प्रायुञ्जातां=प्रपूर्वकात् "युजिर् योगे" इति धातोर्लङ्।

भाषाऽर्थः—राम और रावण दोनोंने एक दूसरेके ध्वजोंको काट डाला। दोनों पीडित अथवा विचलित नहीं हुए। दोनों शोभित हो गये और धर्षणशील होते हुए उन्होंने युद्धकौशलका प्रयोग किया ॥ १०४ ॥

उभौ मायां व्यतायेतां वीरौ नाऽश्राम्यतामुभौ।
मण्डलानि विचित्राणि क्षिप्रमाक्रामतामुभौ ॥ १०५ ॥

अन्वयः—उभौ मायां व्यतायेताम्। उभौ वीरौ न अश्राम्यताम्। उभौ विचि· त्राणि मण्डलानि क्षिप्रम् आक्रामताम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—उभौ=रामरावणौ, मायां=कपटप्रयोगं, व्यतायेतां=व्यतनुताम्। उभौ=द्वौ, वीरौ=शूरौ, रामरावणाविति भावः। न अश्राम्यतां=नो श्रान्तौ। उभौ=रामरावणौ, विचित्राणि=अद्भुतानि, मण्डलानि=चक्रवालानि, क्षिप्रं=द्रुतम्, आक्रामताम्=आचरताम्, तावुभौ विचित्रमण्डलाकारेण भ्रान्ताविति भावः॥

व्युत्पत्तिः—व्यतायेतां=विपूर्वात् "तायृ सन्तानपालनयोः" इति भौवादिकाद्धातोर्लङ्। अश्राम्यतां="श्रमु तपसि खेदे च"ति धातोर्लङ्। क्षिप्रं-"लघु क्षिप्रमरं द्रुतम्" इत्यमरः। आक्रामताम्=आङ्पूर्वकात् "क्रमु पादविक्षेप" इति धातोर्लङि "वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः" इति श्यनो वैकल्पिकत्वात् पक्षे शप्॥

भाषाऽर्थः—राम और रावण दोनोंने कपट प्रयोग फैलाया। दोनों वीर श्रान्त नहीं हुए। दोनों विचित्र मण्डलों को दिखलाते हुए घूमने लगे॥ १०५॥

न चोभावप्यलक्ष्येतां यन्तारावाहतामुभौ।
स्यन्दनौ समपृच्येतामुभयोर्दीप्तवाजिनौ॥ १०६॥

अन्वयः—उभौ अपि न अलक्ष्येताम्। उभौ यन्तारौ आहताम्। दीप्तवाजिनौ उभयोः स्यन्दनौ समपृच्येताम्॥

व्याख्या—उभौ अपि=द्वौ अपि, रामरावणाविति भावः, न अलक्ष्येतां=नो दृष्टौ, प्रेक्षकैरिति शेषः, मण्डलाचारवेगादिति भावः। उभौ=द्वौ, रथिनौ रामरावणावित्यर्थः। यन्तारौ=अन्योन्यसारथी इति भावः। आहतां=प्राहरताम्। दीप्तवाजिनौ=उज्ज्वलहयौ, चामरादिमण्डनादिति भावः। उभयोः=द्वयोः, रामरावणयोरिति भावः। स्यन्दनौ=रथौ, समपृच्येतां=संपृक्तौ।

व्युत्पत्तिः—अलक्ष्येतां="लक्ष दर्शनाङ्कनयोः" इति धातोः कर्मणि लङ्। आहताम्=आङ्पूर्वकात् "हन हिंसागत्योः" इति धातोर्लङि तसः "तस्थस्थमिपां तान्तन्तामः" इति तामादेशः। "अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति" इत्यनुनासिकलोपः। दीप्तवाजिनौ=दीप्तौ वाजिनौ ययोस्तौ। "दीप्रवाजिनौ" इति मल्लिनाथसम्मतः पाठस्तत्राऽप्ययमेवाऽर्थः। दीपनशीला दीप्राः "नमिकम्पिस्म्यजसकमहिंसदीपो रः" इति दीपीधातो रप्रत्यये दीप्रपदसिद्धिः। "दृप्तवाजिनौ" इति पाठे बलिष्ठाऽश्वावित्यर्थः। समपृच्येतां=सम्पूर्वकात् "पृची सम्पर्के" इति धातोः कर्मणि लङ्॥

भाषाऽर्थः—प्रेक्षकोंसे वे दोनों (राम और रावण) मण्डलाचारके वेगसे नहीं देखे गये। दोनोंने एक दूसरेके सारथिपर प्रहार किया। उज्ज्वल घोड़ों वाले दोनों के रथोंका परस्परमें सम्पर्क हुआ॥ १०६॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततो मायाम न्मूर्ध्नो राक्षसोऽप्रथयद्रणे ।
रामेणैकशतं षां प्राव्रृश्च्यत शिलीमुखैः ॥ १०७ ॥

अन्वयः—ततो राक्षस मायामयान् मूर्ध्नः अप्रथयत्। रामेण तेषाम् एकशतं शिलीमुखैः प्राव्रृश्च्यत ॥

व्याख्या—ततः=अन तरं रणे=युद्धे, राक्षसः=यातुधानः, रावण इति भावः। मायामयान्=मायास्वभावान्, मूर्ध्नः=शिरांसि, अप्रथयत्=विस्तारितवान्। स्वाभाविकमस्तकरक्षणार्थं मायया मस् न्तराणि कल्पितवानिति भावः। रामेण= रामचन्द्रेण, तेषा=मूर्ध्नाम्, एकश तम्=एकोत्तरशतं, शिलीमुखैः=बाणैः, प्राव्रृश्च्यत=छिन्नम् ॥

व्युत्पत्तिः—मायामयान्= "तत्प्रकृतवचने मयट्" इति मयट्। अप्रथयत्= "प्रथ प्रख्याने" इति घटादेर्धातोर्लङ्। एकशतम्=एकोत्तरं शतम्, "शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्" इति मध्यमपदलोपी समासः। शिलीमुखैः= "अलिबाणौ शिलीमुखौ" इत्यमरः। प्राव्रृश्च्यत=प्रपूर्वकात् "ओव्रश्चू छेदने" इति धातोः कर्मणि लङ् ॥

भाषाऽर्थः—तब युद्धमें रावणने मायामय शिरोंको फैलाया। रामचन्द्रजीने उन एक सौ एक शिरोंको बाणोंसे काट डाला ॥ १०७ ॥

समक्षुभ्नन्नुदन्वन्तः प्राकम्पन्त महीभृतः।
सन्त्रासमबिभः शक्रः प्रैङ्खच्च क्षुभिता क्षितिः ॥ १०८ ॥

अन्वयः—उदन्वन्तः समक्षुभ्नन्। महीभृतः प्राकम्पन्त। शक्रः सन्त्रासम् अबिभः प्रैङ्खच्च। क्षितिश्च क्षुभिता ॥

व्याख्या—उदन्वन्तः=समुद्राः, समक्षुभ्नन्=संचलिताः, शिरःपातभरादिति शेषः। महीभृतः=पर्वताः, प्राकम्पन्त=कम्पिताः। शक्रः=इन्द्रः, सन्त्रासं= भीतिम्, अबिभः=भृतवान्, प्रैङ्खच्च=क्षुभितश्च। क्षितिश्च=पृथिवी च, क्षुभिता= चलिता ॥

व्युत्पत्तिः—समक्षुभ्नन्=संपूर्वकात् "क्षुभ सञ्चलने" इति क्र्यादिस्थधातोर्लङ्। अबिभः= "डुभृञ् धारणपोषणयोः" इति धातोर्लङ्, "श्लौ" इति द्वित्वं "भृञामित्" इत्यभ्यासस्येत्वं, धातोर्गुणो रपरस्तल्लोपे रेफस्य विसर्जनीयः। प्रैङ्खत्=प्रपूर्वकात् इखिधातोर्भौवादिकाल्लङ्, इदित्वान्नुम् आड्वृद्धिश्च ॥

भाषाऽर्थः—रावणके गिरे हुए शिरोंके भारसे समुद्र सञ्चलित हुए। पर्वत कांपने लगे। इन्द्र त्रस्त और क्षुभित हुए। पृथ्वी भी क्षुब्ध हुई ॥ १०८॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ततो मातलिना शस्त्रमस्मर्यत महीपतेः ।
वधाय रावणस्योग्रं स्वयम्भूर्यदकल्पयत् ॥ १०९ ॥

अन्वयः—स्वयम्भूः रावणस्य वधाय उग्रं यत् अकल्पयत्, ततो मातलिना (तत्) शस्त्रं महीपतेः अस्मर्यत ॥

व्याख्या—स्वयम्भूः = ब्रह्मा, रावणस्य = दशाऽऽननस्य, वधाय = संहाराय, उग्रं = भयङ्करं, यत् = शस्त्रम्, अकल्पयत् = कल्पितवान्, ततः = रावणस्य शिरः-प्ररोहाऽनन्तरं, मातलिना = इन्द्रसारथिना, (तत्) शस्त्रम् = आयुधं, महीपतेः = राज्ञः, रामस्येति भावः । अस्मर्यत=स्मारितम् ॥

व्युत्पत्तिः—अकल्पयत् = 'कृपू सामर्थ्ये' इति धातोर्णौ लङ् । गुणः, 'कृपो रो लः' इति लत्वं च । महीपतेः=मह्याः पतिर्महीपतिस्तस्य, 'स्मृधातोर्योगे' 'अधीगर्थदयेशां कर्मणी'ति कर्मणि षष्ठी । अस्मर्यत = 'स्मृ आध्याने' इति धातोर्णौ कर्मणि लङ् । मल्लिनाथस्तु 'अस्मार्यत महीपति' रिति पाठमकल्पयत् व्याख्यच्च—'मातलिना महीपतिः=स्मर्यतेर्बुद्ध्यर्थत्वात् 'गतिबुद्धी'त्यादिना कर्मत्वम्, अभिहिते कर्मणि प्रथमा । अत्र शेषत्वाऽविवक्षायां न 'अधीगर्थे'त्यादिना कर्मणि 'शेषे षष्ठी' इति । शस्त्रं='कर्मणि द्वितीया' इति द्वितीया ॥'

भाषाऽर्थः—ब्रह्माजीने रावण के वधके लिए भयङ्कर जिस अस्त्रकी रचना की थी रावण के शिरः-प्ररोह के अनन्तर मातलिने रामको उसी अस्त्रका स्मरण दिलाया ॥ १०९ ॥

युग्मम्—

नभस्वान् यस्य वाजेषु फले तिग्मांशुपावकौ ।
गुरुत्वं मेरुसङ्काशं देहः सूक्ष्मो वियन्मयः ॥ ११० ॥
राजितं गारुडैः पक्षैर्विश्वेषां धाम तेजसाम् ।
स्मृतं तद्रावणं भित्त्वा सुघोरं भुव्यशाययत् ॥ १११ ॥

अन्वयः—यस्य वाजेषु नभस्वान्, फले तिग्मांऽशुपावकौ, गुरुत्वं मेरुसङ्काशं देहो वियन्मयः सूक्ष्मः, गारुडैः पक्षैः राजितं, विश्वेषां तेजसां धाम, स्मृतं सुघोरं तत् रावणं भित्त्वा अशाययत् ॥

व्याख्या—यस्य = शस्त्रस्य, वाजेषु = पक्षेषु नभस्वान् = वायुः सन्निहित इति शेषः । फले=शल्ये, तिग्मांऽशुपावकौ=सूर्याऽनलौ, गुरुत्वं गौरवं मेरुसङ्काशं=सुमेरु-सदृशं, 'दृढत्वं मेरुसङ्काशम्' इति पाठान्तरं तत्र दृढत्वं=दार्ढ्यमित्यर्थः । देहः = शरीरं, वियन्मयः आकाशात्मकः, अत एव सूक्ष्मः=अतीन्द्रियः, गारुडैः = गरुडस-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽवन्धिभिः, पत्रैः=पतत्रैः, राजितं=शोभितं, 'वाजितम्' इति मल्लिनाथसम्मते पाठे—पत्रवत् यत्कृतम् । विश्वेषां=समस्तानां, तेजसां=धाम्नां, धाम=सर्वदेवतेजोमयं स्थानं, स्मृतं=ध्यातं, सुघोरम्=अतिभयङ्करं, तत्=शस्त्रं, रावणं=दशाननं, भित्त्वा=विदार्य, भुवि=भूमौ, अशाययत्=शायितवत्, अपातयदिति भावः ॥

व्युत्पत्तिः—वाजेषु='छदः पत्त्रो गरुद्वाज' इति यादवः । तिग्मांऽशुपावकौ=तिग्मा अंशवो यस्य स तिग्मांऽशुः, तिग्मांऽशुश्च पावकश्चेति द्वन्द्वः । मेरुसङ्काशं=मेरुणा सदृशं, 'निभसङ्काशनीकाशप्रतीकाशोपमादयः ।' इत्यमरः । 'मेरुवत्' इति मल्लिनाथसंमतः पाठस्तत्र मेरोरिवेति विग्रहे 'तत्र तस्येवे'ति वतिप्रत्ययः । गारुडैः—गरुडस्येमे गारुडास्तैः, 'तस्येदम्' इत्यण, 'तद्धितेष्वचामादेः' इत्यादिवृद्धिश्च । राजितं='राजृ दीप्तौ' इति धातोः क्तप्रत्ययः, 'वाजितम्' इति पाठे वाजोऽस्ति अस्मिंस्तत् वाजवत् 'तदस्यास्त्यस्मिन्निति मतुप' इति मतुप् 'मादुपधायाश्च मतोर्वोऽयवादिभ्य' इति मस्य वः । वाजवत्कृतं वाजितं, वाजवच्छब्दात् 'तत्करोति तदाचष्टे'इति ण्यन्तात्कर्मणि क्तप्रत्ययः । णाविष्ठवद्भावात् 'विन्मतोर्लुक्' इति मतोर्लुक् । अशाययत्='शीङ् स्वप्ने' इति ण्यन्ताद्धातोर्लङ् ॥

भाषाऽर्थः—जिस शस्त्रके पत्रोंमें वायु, शल्य (नोक) में सूर्य और अग्नि विद्यमान हैं, जिसकी गुरुता सुमेरु पर्वतके सदृश, शरीर आकाशात्मक अतीन्द्रिय है; गरुडजीके पत्रोंसे शोभित, सब देवताओंके तेजोमय और स्मृत अतिभयङ्कर उस अस्त्रने रावणको विदीर्ण कर पृथ्वीमें सुला दिया ॥ ११०–१११ ॥

आबध्नन् कपि-वदनानि संप्रसादं, प्राशंसत्सुर-समितिर्नृपं जिताऽरिम् ।
अन्येषां विगतपरिप्लवा दिगन्ता, पौलस्त्योऽजुषत शुचं विपन्नबन्धुः ॥

अन्वयः—कपिवदनानि संप्रसादम् आबध्नन् । सुरसमितिः जिताऽरिं नृपम् प्राशंसत् । अन्येषां दिगन्ता विगतपरिप्लवाः (जाताः)। विपन्नबन्धुः पौलस्त्यः शुचम् अजुषत् ॥

व्याख्या—कपिवदनानि—वानरमुखानि, संप्रसादं=प्रसन्नतां, 'संप्रहासम्' इति पाठे संप्रहास्यमित्यर्थः । अबध्नन्=सेवितवन्ति, रावणे हते सुग्रीवादिकपयः सुप्रसन्ना जाता इति भावः । एवं सुरसमितिः=देवसमूहः, जिताऽरिं=जितशत्रुं नृपं=राजानं, रामचन्द्रमित्यर्थः । प्राशंसत्=तुष्टाव । अन्येषाम्=इन्द्रादिदिक्पालानां, दिगन्ताः=आशाऽन्ताः, तत्तत्पाल्यविभागा इति भावः, विगतपरिप्लवाः=निरुपद्रवाः, जाता इति शेषः । विपन्नबन्धुः=विनष्टभ्रातृक इति भावः । पौलस्त्यः=विभीषण इत्यर्थः । शुचं=शोकम्, अजुषत=अभजत, दुष्टबान्धवस्याऽपि वियोगो दुःसह इति भावः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—आवध्नन् = आङ्पूर्वात् 'बन्ध बन्धने' इति धातोर्लङ्। जितारिं= जितोऽरिर्येन स जिताऽरिस्तम्। विगतपरिप्लवाः = विगतः परिप्लवो येभ्यस्ते। विपन्नबन्धुः = विपन्नो बन्धुर्यस्य सः। अजुषत = 'जुषी प्रीतिसेवनयोः' इति तौदादिकादनुदात्तेतो धातोर्लङ्। प्रहर्षिणी वृत्तम्। तल्लक्षणं यथा-'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्।'. इति।

भाषाऽर्थः—रावणके मारे जाने पर सुग्रीव आदि वानरोंके मुख प्रसन्न हुए। देवताओंके समूहने शत्रुको जीतने वाले राजा रामकी प्रशंसा की। इन्द्र आदि दिक्पालोंकी तत्तद् दिशाएं उपद्रवरहित हो गयीं। भाई रावणके मारे जानेसे विभीषणजी शोकयुक्त हो गये ॥ ११२ ॥

इति श्रीचन्द्रकलाव्याख्यामण्डिते भट्टिकाव्ये चतुर्थे तिङन्तकाण्डे लक्षणरूपे चतुर्थः परिच्छेदः (वर्गः), तथा लक्ष्यरूपे कथानके रावणवधो नाम लङ्विलासाख्यः सप्तदशः सर्गः।

—००:०:००—

अथ अष्टादशः सर्गः

अतः प्रभृति 'वर्तमाने लट्' इति विधीयमानं लटमधिकृत्याऽऽह व्यश्नुत इति। कुत्रचित्तु वर्तमानादन्यत्राऽपि दर्शयिष्यति।

व्यश्नुते स्म ततः शोको नाभिसम्बन्धसम्भवः।
विभीषणमसावुच्चै रोदिति स्म दशाऽऽननम् ॥ १ ॥

अन्वयः—ततो नाभिसम्बन्धसम्भवः शोको विभीषणं व्यश्नुते स्म। असौ दशाऽऽननम् उच्चैः रोदिति स्म।

व्याख्या—ततः = रावणवधादनन्तरं, नाभिसम्बन्धसम्भवः = एकोदरसम्भूतः, शोकः = मन्युः, विभीषणं = रावणाऽनुजं, व्यश्नुते स्म = व्याप्नोत्। असौ = विभीषणः, दशाऽऽननं = रावणम्, उद्दिश्येति शेषः। उच्चैः = तारस्वरेण, रोदिति स्म = विललाप।

व्युत्पत्तिः—नाभिसम्बन्धसम्भवः = नाभिसम्बन्धात्संभवो यस्य सः। व्यश्नुते स्म = विपूर्वकात् 'अशू व्याप्तौ' इति धातोः स्मयोगे 'लट् स्मे' इति भूताऽनद्यतनपरोक्षे लट्। रोदिति स्म = 'रुदिर् अश्रुविमोचने' इति धातोः पूर्ववल्लट्, 'इर इत्संज्ञा वाच्या' इतीर इत्संज्ञा 'रुदादिभ्यः सार्वधातुके' इतीट् ॥

भाषाऽर्थः—रावणवधके अनन्तर एक उदरके सम्बन्धसे उत्पन्न शोकने विभीषणको व्याप्त किया। वे रावणको उद्देश्य करके ऊँचे स्वरसे विलाप करने लगे ॥ १ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'भूमौ शेते दशग्रीवो महार्हशयनोचितः ।
नेक्षते विह्वलं मां च न मे वाचं प्रयच्छति ॥ २ ॥

अन्वयः—महाऽर्हशयनोचितो दशग्रीवो भूमौ शेते, विह्वलं मां न ईक्षते मे वाचं न प्रयच्छति ॥

व्याख्या—रोदनप्रकारमाह—भूमाविति । महाऽर्हशयनोचितः = अभ्यस्तोत्तमशय्यः, दशग्रीवः = रावणः, भूमौ = पृथिव्यां, शेते = स्वपिति, एवं च—विह्वलं = विक्लवं, मां = भ्रातरं विभीषणं, न ईक्षते = नो पश्यति, मे = मह्यं, वाचं = वाणीं, न प्रयच्छति = नो ददाति, न मया सम्भाषत इति भावः ॥

व्युत्पत्तिः—महाऽर्हशयनोचितः = महान् अर्हो (मूल्यम्) यस्य तत् महाऽर्हं, तच्च तत् शयनं, तस्मिन्नुचितः । यद्वा उचितं महाऽर्हशयनं यस्य सः, 'वाऽऽहिताग्न्यादिषु' इति उचितपदस्य विकल्पेन परनिपातः । पक्षान्तर 'उचितमहाऽर्हशयन' इत्यपि प्रयोगो भवति । शेते = 'शीङ् स्वप्ने' इति धातोः 'वर्तमाने लट्' इति वर्तमाने लट् । प्रारब्धाऽपरिसमाप्तक्रियाश्रयत्वं वर्तमानत्वम् । प्रयच्छति = प्रपूर्वकात् 'दाण् दाने' इति धातोर्लटि 'पाघ्राध्मास्थाम्नादाणि' त्यादिना यच्छादेशः ॥

भाषाऽर्थः—उत्तम शय्यामें सोनेका अभ्यास करनेवाले रावण जमीनपर सो रहे हैं, मुझे नहीं देख रहे हैं और न मेरे साथ भाषण ही कर रहे हैं ॥ २ ॥

विपाकोऽयं दशग्रीव ! संदृष्टोऽनागतो मया ।
त्वं तेनाऽभिहितः पथ्यं किं कोपं न नियच्छसि ॥ ३ ॥

अन्वयः—हे दशग्रीव ! अयं विपाको मया अनागतः (एव) संदृष्टः । तेन त्वं पथ्यम् अभिहितः, कोपं किं न नियच्छसि ? ॥

व्याख्या—हे दशग्रीव = हे रावण !, अयम् = ईदृक, मरणरूप इति भावः । विपाकः = परिणामः, मया = भवद्भ्रात्रा, अनागतः = भविष्यन्नेव, संदृष्टः = समवलोकितः, उपलब्ध इति भावः । तेन = कारणेन, संदर्शनरूपेणेति भावः । त्वं = भवान्, पथ्यं = हितम्, अभिहितः = उक्तः, 'सीतां मुञ्चे'ति भावः । तथाऽपि—कोपं = क्रोधं, किं न नियच्छसि = किमिति न अपनयसि, नाऽस्तीह मदीयो दोष इति भावः ॥

व्युत्पत्तिः—विपाकः = विपच्यत इति, कर्मणि घञ् । पथ्यं = पथः अनपेतं पथ्यं तत्, 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । अभिहितः = अभिपूर्वकात् 'डुधाञ् धारणपोषणयोः' इति धातोर्ब्रूधातोः समानाऽर्थकत्वाद् दुहादित्वेन अप्रधाने कर्मणि क्तः । नियच्छसि 'वर्तमानसामीप्ये वर्तमानवद्वा' इति सामीप्ये वर्तमानप्रत्ययः निपूर्वात् 'यमु उपरमे' इति धातोः, 'इषुगमियमां छः' इति छत्वम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—हे रावण ! मैंने पहले ही ऐसे परिणामको जान लिया था। इस कारणसे मैंने आपको हितवचन कहा था। आप क्यों क्रोधको नहीं हटा रहे हैं ? ॥३॥

भजन्ति विपदस्तूर्णमतिक्रामन्ति सम्पदः ।
तान् मदान् नाऽवतिष्ठन्ते ये मते न्यायवादिनाम् ॥ ४ ॥

अन्वयः—ये न्यायवादिनां मते मदात् न अवतिष्ठन्ते, तान् विपदः तूर्णं भजन्ति सम्पदश्च अतिक्रामन्ति ॥

व्याख्या—ये = प्रभवः, न्यायवादिनां = हितोपदेशकानां, माल्यवत्सदृशानामिति भावः। मते = इष्टेऽर्थे, मदात् = अभिमानात्, न अवतिष्ठन्ते = नाऽवस्थितिं कुर्वन्ति, तान् = तादृशान्पुरुषान्, विपदः = आपत्तयः, तूर्णं = सत्वरं, भजन्ति = आश्रयन्ति, सम्पदश्च = सम्पत्तयश्च, अतिक्रामन्ति = उल्लङ्घयन्ति। तान् इत्यत्र 'ते' इति मल्लिनाथसंमतः पाठः ॥

व्युत्पत्तिः—न्यायवादिनां = न्यायं वदन्तीति तच्छीलास्ते न्यायवादिनस्तेषां, 'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिप्रत्ययः। अवतिष्ठन्ते = अवपूर्वकात्स्थाधातोः 'समवप्रविभ्यः स्थः' इत्यात्मनेपदे लट्। भजन्ति = 'भज सेवायाम्' इति धातोर्लट् ॥

भाषाऽर्थः—जो न्यायवादियोंके मतमें मदसे अवस्थित नहीं होते हैं, उन्हें विपत्तियां शीघ्र आश्रय करती हैं और सम्पत्तियां उल्लङ्घन करती हैं ॥ ४ ॥

अपथ्यमायतौ लोभादामनन्त्यनुजीविनः ।
प्रियं शृणोति यस्तेभ्यस्तमृच्छन्ति न सम्पदः ॥ ५ ॥

अन्वयः—अनुजीविन आयतौ अपथ्यं प्रियम् आमनन्ति। यः तेभ्यः शृणोति सम्पदः तं न ऋच्छन्ति ॥

व्याख्या—न्यायवादिमताऽतिक्रमिणो नश्यन्तीत्युक्तमेवमनाप्तवाक्यश्राविणोऽपि नश्यन्तीति प्रतिपादयति—अपथ्यमिति। अनुजीविनः = भृत्याः, प्रहस्ताऽऽदिसदृशा इति भावः। आयतौ = उत्तरकाले, अपथ्यम् = अहितं प्रियम् = अभीष्टमर्थम्, आमनन्ति = उपदिशन्ति, 'साधु इदम्' इति शेषः। यः = प्रभुः, तेभ्यः = तादृशेभ्यः, अपथ्याऽभिधायिभ्य इति भावः। शृणोति = आकर्णयति, तदपथ्यमिति शेषः। सम्पदः = सम्पत्तयः, तं = तादृशम्, अपथ्यश्रवणशीलं प्रभुमिति भावः। न ऋच्छन्ति = न गच्छन्ति। प्रहस्तादिमूढवाक्यश्रवणादीदृशी ते मतिरिति भावः॥

व्युत्पत्तिः—अनुजीविनः = अनुजीवन्तीति, णिनिप्रत्ययः। आमनन्ति = आङ्पूर्वकात् 'म्ना अभ्यास' इति धातोर्लट् 'पाघ्राध्मास्थाम्ने'त्यादिना मनादेशः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तेभ्यः='आख्यातोपयोगे' इति अपादानत्वात्पञ्चमी। ऋच्छन्ति='ऋ गतौ' इति धातोः 'पाघ्रे'त्यादिना ऋच्छादेशः॥

भाषाऽर्थः—भृत्यलोग लोभके कारण उत्तर कालमें अहित प्रिय वचनका उपदेश करते हैं। जो प्रभु उनसे प्रिय वचन सुनते हैं, सम्पत्तियां उनके पास नहीं जाती हैं॥ ५॥

प्राज्ञास्तेजस्विनः सम्यक् पश्यन्ति च वदन्ति च।
तेऽवज्ञाता महाराज! क्लाम्यन्ति विरमन्ति च॥ ६॥

अन्वयः—प्राज्ञाः तेजस्विनः सम्यक् पश्यन्ति वदन्ति च। हे महाराज! ते अवज्ञाताः (सन्तः) क्लाम्यन्ति विरमन्ति च॥

व्याख्या—प्र[ज्ञा]ः=प्रज्ञावन्तः, तेजस्विनः=प्रतापयुक्ताश्च, अस्मत्सदृशा इति भावः। सम्यक=[स]ाधु, पश्यन्ति=अवलोकयन्ति, वदन्ति च=उपदिशन्ति चेति भावः। हे महारा[ज]=हे भूपाल!, ते=तादृशाः, सम्यग्दर्शिनो हितोपदेशकाश्चे भावः। अवज्ञाताः=तिरस्कृताः सन्तः, क्लाम्यन्ति=खिद्यन्ते, विरमन्ति = उदासते च दुर्दान्तप्र[भ]ुपरिचारिणामीदृशी दशेति भावः॥

व्युत्पत्तिः—प्राज्ञा[ः]=प्रज्ञाऽस्ति एषां ते, 'प्रज्ञाश्रद्धाऽर्चाभ्यो ण' इति ण[प्रत्]ययः। 'धीरो मनीषी ज्ञः प्रा[ज्ञ]ः संख्यावान्पण्डितः कविः।' इत्यमरः। तेजस्विनः=प्रशस्तं तेजोऽस्ति एषां ते, 'अ[]स्मायामेधास्रजो विनिः' इति विनिप्रत्ययः। महाराज=महांश्चाऽसौ राजा महाराजस्[]तत्सम्बुद्धौ, 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासः 'आन्महतः सम[ा]नाऽधिकरणजातीययोः' इत्यात्वं, 'राजाऽहःसखिभ्यष्टच्' इति समासान्तष्टच्। 'अवज्ञाता' इत्यत्र 'अभिभूता' इति मल्लिनाथसंमतः पाठः। क्लाम्यन्ति='क्लमु ग्लानौ' इति दिवादिकधातोर्लट्, 'वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटि[ल]षः' इति वैकल्पिकः श्यन्, तदभावे 'क्लामन्ति' इति च। विरमन्ति=विपूर्वा[त्] 'रमु क्रीडायाम्' इति धातोर्लट् 'व्याङ्परिभ्यो रमः' इति परस्मैपदम्॥

भाषाऽर्थः—बुद्धिमान् और प्रतापी लोग ठीक-ठीक देखते हैं और हितका उपदेश करते हैं। हे महाराज! वे तिरस्कृत होनेपर खिन्न और उदासीन हो जाते हैं॥

लेढि भेषजवन्नित्यं यः पथ्यानि कटून्यपि।
तदर्थं सेवते चाऽऽप्तान् कदाचिन्न 'स' सीदति॥ ७॥

अन्वयः—यो भेषजवत् कटूनि अपि पथ्यानि नित्यं लेढि, तदर्थम् आप्तांश्च सेवते स कदाचित् न सीदति।

व्याख्या—यः=प्रभुः, भेषजवत्=औषधवत्, कटूनि अपि=तत्कालतीक्ष्णानि अपि, 'यत्तदग्रे विषमिव परिणामेऽमृतोपमम्' इति वचनाऽनुसारेणेति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावः । पथ्यानि=हितानि, परिणामसुखानि हितवचनानीति भावः । नित्यं=निरन्तरं लेढि = आस्वादयति, लक्षणया—शृणोतीति भावः । तदर्थं = पथ्यपरिज्ञानाऽर्थम्, आप्तांश्च = वृद्धांश्च, सेवते = आश्रयते, सः = प्रभुः, पथ्याकर्णनशील इति भावः । कदाचित् = जातुचित् , न सीदति = न नश्यति ॥

व्युत्पत्तिः—भेषजवत् = भेषजेन तुल्यं, 'तेन तुल्यं क्रिया चेद्वतिः' इति वति-प्रत्ययः, 'भेषजौषधभैषज्यान्यगदो जायुरित्यपि ।' इत्यमरः । पथ्यानि = पथोऽनपेतानि पथ्यानि, तानि 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । लेढि = 'लिह आस्वादने' इति धातोर्लट् 'अदिप्रभृतिभ्यः शपः' इति लुकि ढत्वादिकार्ये 'पुगन्तलघूपधस्य च' इति लघूपधगुणः । आप्तान् = 'आप्तः प्रत्ययितः समौ' इत्यमरः ॥

भाषाऽर्थः—जो राजा औषधके सदृश कटु होने पर भी हित वचनोंको नित्य सुनता रहता है और उसके लिए वृद्धोंकी सेवा करता है वह कभी नष्ट नहीं होता ॥ ७ ॥

> सर्वस्य जायते मानः स्वहिताच्च प्रमाद्यति ।
> वृद्धौ भजति चाऽपथ्यं नरो येन विनश्यति ॥ ८ ॥

अन्वयः—सर्वस्य वृद्धौ (सत्याम्) मानो जायते । (सः) स्वहिताच्च प्रमाद्यति, अपथ्यं च भजति येन नरो विनश्यति ॥

व्याख्या—सर्वस्य = समस्य जनस्य, वृद्धौ = समृद्धौ सत्याम्, मानः = गर्वः, जायते = उत्पद्यते, वृद्धेश्चित्तविकारित्वादिति भावः । ततः स्वहिताच्च=आत्मपथ्याच्च, प्रमाद्यति = स्खलति, तत्परिणामस्वरूपम् अपथ्यं च=अहितकारकं कर्म च, भजति= सेवते, स इति शेषः । येन = अपथ्येन, नरः = जनः । विनश्यति = विनाशं गच्छति, अतो हितेच्छुना पुरुषेण वृद्धौ मानिना न भाव्यमिति भावः ॥

व्युत्पत्तिः—स्वहितात् = स्वस्मै, हितं स्वहितं तस्मात् 'हितयोगे च' इति चतुर्थी, 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' इति चतुर्थीतत्पुरुषः । 'प्रमाद्यती'ति पदेन योगे 'जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्' इति पञ्चमी । भजति = 'भज सेवायाम्' इति धातोर्लट् । विनश्यति = विपूर्वात् 'णश अदर्शने' इति दैवादिकधातोर्लट् ॥

भाषाऽर्थः—वृद्धि होनेपर सबको अहङ्कार उत्पन्न होता है, तब वह अपने हितमें प्रमाद करता है और अपथ्यसेवन भी करने लगता है जिससे मनुष्य नष्ट होता है ॥ ८ ॥

> द्वेष्टि प्रायो गुणेभ्यो यन्न च स्निह्यति कस्यचित् ।
> वैरायते महद्भिश्च क्षीयते वृद्धिमानपि ॥ ९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—यत् वृद्धिमान् प्रायो गुणेभ्यो द्वेष्टि, कस्यचिच्च न स्निह्यति, महद्भिः वैरायते, च, शीयते अपि।

व्याख्या—यत = यस्माद्धेतोः, ऋद्धिमान् = समृद्धिसम्पन्नो जनः, प्रायः = बाहुल्येन, गुणेभ्यः = वृद्धसेवित्वादिभ्यः, द्वेष्टि = द्रुह्यति, कस्यचिच्च = कस्मिन्नपि जने इति भावः। न स्निह्यति = नो प्रीयते, महद्भिः = वृद्धैः सह, वैरायते च = वैरं करोति च, ततः स शीयते अपि = नश्यति अपि॥

व्युत्पत्तिः—वृद्धिमान् = प्रशस्ता वृद्धिरस्ति अस्य, 'तदस्यास्त्यस्मिन्निति मतुप्' इति मतुप्प्रत्ययः। गुणेभ्यः = क्रोधार्थकद्विषधातोर्योगे 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति सम्प्रदानत्वात् चतुर्थी। कस्य = सम्बन्धसामान्ये षष्ठी। वैरायते = 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इति क्यङन्ताल्लट्। शीयते = 'शद्लृ शातन' इति धातोर्लट्। 'पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इति शदेः शीयादेशः॥

भाषाऽर्थः—जिस कारणसे कि वृद्धिसम्पन्न मनुष्य अकसर गुणोंसे द्वेष करता है, किसी पर भी स्नेह नहीं करता है, बड़ोंसे वैर करता है और उसके फलस्वरूप नष्ट भी हो जाता है॥ ९॥

> समाश्वसिमि केनाऽहं कथं प्राणिमि दुर्गतः।
> लोकत्रयपतिर्भ्राता यस्य मे स्वपिति क्षितौ॥ १०॥

अन्वयः—यस्य मे लोकत्रयपतिः भ्रात क्षितौ स्वपिति दुर्गतः अहं केन समाश्वसिमि ? कथं प्राणिमि ?॥

व्याख्या—यस्य, मे = मम, विभीषणस्येत्यर्थः। लोकत्रयपतिः = त्रिलोकेश्वरः, भ्राता = अग्रजो बन्धुः, रावण इति भावः। क्षितौ = भूमौ, स्वपिति = शेते, दुर्गतः = दीनः, अहं = विभीषणः, केन = उपायेन, समाश्वसिमि = स्वस्थो भवामि, कथं = केन प्रकारेण, प्राणिमि = जीवामि, न कथञ्चिदिति भावः॥

व्युत्पत्तिः—लोकत्रयपतिः = त्रयोऽवयवा यस्य तत् त्रयं, 'संख्याया अवयवे तयप्' इति तयप्प्रत्ययः 'द्वित्रिभ्यां तयस्याऽयज् वा' इति अयजादेशः। लोकानां त्रयं, तस्य पतिः। 'अथो जगती लोको विष्टपं भुवनं जगत्।' इत्यमरः। स्वपिति = 'ञिष्वप शये' इति धातोर्लट् 'रुदादिभ्यः सार्वधातुके' इतीट्। समाश्वसिमि = समाङ्पूर्वकात् 'श्वस प्राणने' इति धातोर्लट्। पूर्वसूत्रेण इट्। प्राणिमि = प्रपूर्वकात् 'अन प्राणन' इति धातोर्लट्, पूर्ववदिट्, 'अनितेः' इति नस्य णत्वम्॥

भाषाऽर्थः—जिस मेरे तीन लोकोंके स्वामी भाई रावण जमीनपर सो रहे हैं, दुःखी वैसा मैं किस उपायसे स्वस्थ हूँगा और कैसे प्राणधारण करूँगा॥ १०॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहो जागर्ति कृच्छ्रेषु दैवं यद्बलभिज्जितः ।
लुठ्यन्ति भूमौ क्लिद्यन्ति बान्धवा मे स्वपन्ति च ॥ ११ ॥

अन्वयः—अहो ! कृच्छ्रेषु दैवं जागर्ति । यत् बलभिज्जितो मे बान्धवा भूमौ लुठ्यन्ति स्वपन्ति च ॥

व्याख्या—अहो = आश्चर्यम्, कृच्छ्रेषु = दुःखेषु विषये, दैवं = भाग्यं, जागर्ति = चेष्टते, दुःखोत्पादने दैवं नित्यं जागरूकमिति भावः । यत्—यस्मात्कारणात्, बलभिज्जितः=इन्द्रजयिनः, मे=मम, विभीषणस्य । बान्धवाः=ज्ञातयः, रावणकुम्भकर्णादय इति भावः । भूमौ = पृथिव्यां, लुठ्यन्ति = परिवर्तन्ते, क्लिद्यन्ति = क्लेदयुक्ता भवन्ति, स्वपन्ति च = दीर्घं निद्रान्ति चेति भावः ॥

व्युत्पत्तिः— कृच्छ्रेषु = 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः । जागर्ति = 'जागृ निद्राक्षये' इत्यादादिकाद्धातोर्लट् । बलभिज्जितः = बलं भिनत्तीति बलभित्, 'क्विप् चे'ति क्विप् । 'बलाऽरातिः शचीपतिः' इत्यमरः । बलभिदं जयन्तीति बलभिज्जितः 'सम्पदादिभ्यः क्विप्' इति क्विप्प्रत्ययः । लुठ्यन्ति = '(रुठ) लुठ लोठने' इति दैवादिकाद्धातोर्लट् । क्लिद्यन्ति = 'क्लिदू आर्द्रीभावे' इति धातोर्लट् ॥

भाषाऽर्थः—आश्चर्य है, दुःखोंके विषयमें भाग्य चेष्टा करता रहता है । जो कि इन्द्रको जीतनेवाले रावण आदि मेरे बान्धव भूलुण्ठित और क्लेदयुक्त होकर सो रहे हैं ॥ ११ ॥

शिवाः कुष्णन्ति मांसानि भूमिः पिबति शोणितम् ।
दशग्रीवसनाभीनां समदन्त्यामिषं खगाः ॥ १२ ॥

अन्वयः—दशग्रीवसनाभीनां मांसानि शिवाः कुष्णन्ति, शोणितं भूमिः पिबति, आमिषं खगाः समदन्ति ॥

व्याख्या—दशग्रीवसनाभीनां=रावणसपिण्डानां मांसानि=पिशितानि, शिवाः= श्रृगालाः, कुष्णन्ति = कर्षन्ति, शोणितं = रुधिरं, भूमिः = पृथिवी, पिबति = धयति आमिषं = मांसशोणितातिरिक्तमन्त्रवसादिकं, खगाः = पक्षिणः, काकगृध्रादय इति भावः । समदन्ति = सम्यग्भक्षयन्ति । एकस्य दशग्रीवस्य दुर्नयात्तत्सपिण्डानां कीदृशी दुर्दशा समजनीति भावः ॥

व्युत्पत्तिः—दशग्रीवसनाभीनां = दश ग्रीवा यस्य स दशग्रीवः । समाननाभिः (मूलपुरुषः) येषां ते सनाभयः, 'ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु' इति समानस्य सभावः । दशग्रीवस्य सनाभयो दशग्रीवसनाभयस्तेषाम् । 'सपिण्डास्तु सनाभयः' इत्यमरः । कुष्णन्ति='कुष निष्कर्षे' इति क्र्यादिस्थधातोर्लट् । समदन्ति = संपूर्वकात् 'अद भक्षणे' इति धातोर्लट् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—रावणके सपिण्डोंके मांसोंको स्यार लोग खींच रहे हैं, लोहूको जमीन पी रही है और चरबी आदि आमिषको कौवे और गीध आदि पक्षी खा रहे हैं ॥ १२ ॥

येन पूतक्रतोमूर्ध्नि स्थीयते स्म महाऽऽहवे ।
तस्याऽपीन्द्रजितो दैवाद् ध्वांक्षैः शिरसि लीयते ॥ १३ ॥

अन्वयः—येन महाऽऽहवे पूतक्रतोः मूर्ध्नि स्थीयते स्म, तस्य इन्द्रजितः अपि शिरसि दैवात् ध्वाङ्क्षैः लीयते ॥

व्याख्या—येन = इन्द्रजिता, महाऽऽहवे = महायुद्धे, पूतक्रतोः = इन्द्रस्य, मूर्ध्नि = शिरसि, स्थीयते स्म = स्थितम् । तस्य = तादृशस्य, महावीरस्येति भावः । इन्द्रजितोऽपि = मेघनादस्याऽपि, अन्यस्य तु रक्षसः का कथेति भावः । शिरसि—मूर्ध्नि, दैवात् = दुर्भाग्यवशादिति भावः । ध्वाङ्क्षैः = काकैः, लीयते = स्थीयते इति भावः ॥

व्युत्पत्तिः—पूतक्रतोः = पूताः (पवित्रीकृताः) क्रतवः (यज्ञाः) येन स पूतक्रतुस्तस्य । स्थीयते स्म = 'ष्ठा गतिनिवृत्तौ' इति धातोर्भावे लट् 'अपरोक्षे चे'ति स्मशब्दयोगे भूताऽनद्यतनाऽपरोक्षाऽर्थे लट् , इन्द्रजितः कृतेन्द्रजयस्य पुरा विभीषणस्याऽपरोक्षत्वात् । ध्वाङ्क्षैः = 'ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसा अपि ।' इत्यमरः । लीयते = 'लीङ् श्लेषणे' इति दैवादिकधातोर्भावे वर्त्तमाने लटि 'सार्वधातुके यक्' इति यक् ॥

भाषाऽर्थः—जिस इन्द्रजितसे महायुद्धमें इन्द्रके शिरमें रहा गया था, आज उसके भी शिरमें दुर्भाग्यसे कौवोंसे रहा जा रहा है ॥ १३ ॥

स्वर्भानुर्भास्करं ग्रस्तं निष्ठीवति कृताऽह्निकः ।
अभ्युपैति पुनर्भूतिं रामग्रस्तो न कश्चन ॥ १४ ॥

अन्वयः—कृताह्निकः स्वर्भानुः ग्रस्तं भास्करं निष्ठीवति । रामग्रस्तः कश्चन पुनः भूतिं न अभ्युपैति ॥

व्याख्या—कृताऽह्निकः = विहिताऽऽहारः, स्वर्भानुः = राहुः, ग्रस्तं = कवलितं, भास्करं = सूर्यम्, उपलक्षणमेतच्चन्द्रमसमपि, निष्ठीवति = निरस्यति, स्वमुखादिति शेषः । राहुग्रस्तोऽपि सूर्यः पुनर्जीवनं प्राप्नोतीति भावः, परं—रामग्रस्तः = रामाऽभिभूतः, कश्चन = कोऽपि जनः, पुनः = भूयः, भूतिं = वृद्धिं, न अभ्युपैति = न प्राप्नोति । अत्रोपमानभूताद्राहोरुपमेयभूतस्य रामस्योत्कर्षवर्णनाद्व्यतिरेकाऽलङ्कारः॥

व्युत्पत्तिः—कृताऽऽह्निकः = अह्ना निर्वृत्तमाह्निकं, 'तेन निर्वृत्तम्' इति ठञ् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतमाह्निकं येन सः स्वर्भानुः='तमस्तुः राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः'। इत्यमरः। भास्करं=भाः करोतीति भास्करस्तं, 'दिवाविभे' त्यादिना टप्रत्ययः। 'कस्कादिषु चे'ति विसर्गस्य सत्वम्। निष्ठीवति=निपूर्वकात् 'ष्ठिवु निरसन' इति भौवादिकाद्धातोर्लट्। 'ष्ठिवुक्लमुचमां शिति' इति दीर्घत्वम्। अभ्युपैति=अभ्युप-पूर्वकात् 'इण् गतौ' इति धातोर्लट्, 'एत्येधत्यूठ्' इति पररूपबाधिनी वृद्धिः॥

भाषाऽर्थः—आहार करने वाला राहु खाये गये सूर्यको फेंक देता है। परन्तु रामसे अभिभूत कोई भी फिर वृद्धि नहीं पाता है॥ १४॥

त्वमजानन्निदं राजन्नीडिषे स्म स्वविक्रमम्।
दातुं नेच्छसि सीतां स्म विषयाणां च नेशिषे॥ १५॥

अन्वयः—हे राजन्! त्वम् इदम् अजानन् स्वविक्रमम् ईडिषेस्म, सीतां दातुं न इच्छसिस्म; विषयाणां च न ईशिषेस्म॥

व्याख्या—हे राजन्=हे महाराज!, त्वम्, इदम्=ईदृशं, रामसामर्थ्यमिति भावः, अजानन्=अनवगच्छन्, स्वविक्रमम्=आत्मपराक्रमम्, ईडिषेस्म=स्तुतवानसि, तत एव सीतां=जानकीं, दातुं=रामाय अर्पयितुं, न इच्छसिस्म=न इष्टवानसि, विषयाणां च=शब्दस्पर्शादीनां च, न ईशिषेस्म=न प्रभवसिस्म, अजितेन्द्रियत्वात्त्वं विषयान्न जितवानसीति भावः॥

व्युत्पत्तिः—ईडिषेस्म='ईड स्तुतौ' इति धातोः 'अपरोक्षे चे'ति लट्, एवं परत्रापि। 'ईशः से' 'ईडजनोर्ध्वे च' इतीडागमः योगविभागो वैचित्र्याऽर्थः। विषयाणाम्=ईशधातोर्योगे 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी। ईशिषेस्म='ईश ऐश्वर्य' इति धातोः पूर्ववल्लट्॥

भाषाऽर्थः—हे महाराज! आपने ऐसे रामचन्द्रजीके पराक्रमको न जान कर अपने पराक्रमकी तारीफ की, सीताजीको लौटानेकी इच्छा नहीं की और शब्दस्पर्श आदि विषयोंको नहीं जीता॥ १८॥

मन्त्रे जातु वदन्त्यज्ञास्त्वं तानप्यनुमन्यसे।
कथं नाम भवांस्तत्र नाऽवैति हितमात्मनः॥ १६॥

अन्वयः—मन्त्रे जातु अज्ञा वदन्ति। त्वं तान् अपि अनुमन्यसे। तत्र भवान् आत्मनो हितं कथं नाम न अवैति?

व्याख्या—मन्त्रे=विचारकाले, जातु=कदाऽपि, अज्ञाः=मूढाः, वदन्ति=ब्रुवन्ति, उपदिशन्तीति भावः, गर्हितमेतत्। त्वं, तान् अपि=तादृशान् अज्ञान् अपि, अनुमन्यसे=अनुमतवानसि, आप्तत्वेनाऽङ्गीकरोषीति भावः। एतदपि गर्हि'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तम् । इत्थं च द्वयमप्येतद्गर्हितमिति भावः । तत्र भवान्=स भवान्, आत्मनः=स्वस्य हितं=पथ्यं, कथं नाम=केन प्रकारेण इदम्, न अवैति=न जानाति, विदुषस्ते गर्हितमेतदित्यर्थः ।

व्युत्पत्तिः—अज्ञाः=जानन्तीति ज्ञाः, 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः। न ज्ञा अज्ञाः। वदन्ति-अनुमन्यसे=उभयत्र क्रमेण जातुशब्दस्य अपिशब्दस्य च प्रयोगे 'गर्हायां लडपि जात्वोः' इति कालसामान्ये लट्। तत्र भवान्='इतराभ्योऽपि दृश्यन्ते' इति भवदादिशब्दयोगे सार्वविभक्तिकस्त्रल्प्रत्ययः । अवैति=अत्र कथं पदेन योगे विभाषा कथमि लिङ् चे'ति च-शब्दात् गर्हायां लट् ॥

भाषाऽर्थः—विचारके समयमें कदाचित् मूर्ख उपदेश करते हैं, आप ऐसे मूर्खों को भी आप्त मान बैठते हैं, यह दोनों बात गर्हित है, माननीय आप अपने हितको कैसे नहीं जानते हैं ? यह भी गर्हित बात है ॥ १६ ॥

अपृष्टो नु ब्रवीति त्वां मन्त्रे मातामहो हितम् ।
न करोमीति पौलस्त्य ! तदा मोहात्त्वमुक्तवान् ॥ १७ ॥

अन्वयः—मन्त्रे अपृष्टो मातामहः त्वां हितं नु ब्रवीति । हे पौलस्त्य ! तदा त्वं मोहात् 'न करोमि' इति उक्तवान् ॥

व्याख्या—मन्त्रे=विचारकाले, अपृष्टः=अननुयुक्तः, मातामहः=मातृपिता, माल्यवानिति भावः । त्वां=भवन्तं, हितं नु=पथ्यं नु, हे रावण ! त्वं सीतां प्रत्यर्पयेत्याकारकं हितवचनमिति भावः ब्रवीति=उक्तवान् । हे पौलस्त्य !=हे रावण ! तदा=तस्मिन्काले त्वं=रावणः, मोहात्=अज्ञानात् न करोमीति=नाऽऽचरामीति, उक्तवान्=अभिहितवान् , तस्यैव फलं साम्प्रतमनुभूतमिति भावः ॥

व्युत्पत्तिः—ब्रवीति=नुशब्द उपपदे 'नन्वोर्विभाषा' इति नुशब्द उपपदे पृष्टप्रतिवचने भूतार्थे लट् । न करोमि=न-शब्द उपपदे पूर्वसूत्रेण लट् ।

भाषाऽर्थः—मन्त्रमें पूछे गये मातामह (नाना) माल्यवान्ने आपको हितवचन कहा था, हे रावण ! उस समय आप ने मोहसे 'मैं नहीं करूंगा' ऐसा कहा ॥

त्वं स्म वेत्थ महाराज ! यत्स्माऽऽह न विभीषणः ।
पुरा त्यजसि यत्क्रुद्धो मां निराकृत्य संसदि ॥ १८ ॥

अन्वयः—हे महाराज ! विभीषणो यत् आह स्म त्वं (तत्) न वेत्थ स्म; यत् क्रुद्धः (सन्) संसदि मां निराकृत्य पुरा त्यजसि ॥

व्याख्या—हे महाराज=हे राजश्रेष्ठ !, विभीषणः=त्वदनुजः, यत्=वचनम्, आह स्म=उक्तवान् , त्वं=न वेत्थ स्म=नो विदितवानसि- तदिति शेषः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्वचनं हितत्वेन न ज्ञातवानसीति भावः । तज्ज्ञापकं लिङ्गमाह—पुरेति । यत्= यस्माद्धेतोः, क्रुद्धः = कुपितः सन् , 'सीतां प्रत्यर्पये'ति यदुपदेशेनेति शेषः । संसदि= सभायां, मां = हितोपदेष्टारं भ्रातरं, निराकृत्य = प्रत्यादिश्य, पादप्रहारेणेति भावः । पुरा त्यजसि = पूर्वं त्यक्तवानसि ॥

व्युत्पत्तिः—आह स्म = 'ब्रूञ् व्यक्तायां वाचि' इति धातोः 'ब्रुवः पञ्चानाम् आदित आहो ब्रुवः' इति लिटि तिपो णलादेशो ब्रुवश्चाऽऽहादेशः । 'अपरोक्षे च' इत्यपरोक्षे लट् । वेत्थस्म = 'विद ज्ञाने' इति धातोः पूर्ववल्लट् 'विदो लटो वे'ति विदेर्लटि सिपस्थादेशः । निराकृत्य = 'प्रत्यादेशो निराकृतिः' इत्यमरः । त्यजसि = 'त्यज हानौ' इति धातोः 'पुरि लुङ् चाऽस्मे' इति स्मशब्दवर्जिते पुरा-शब्द उपपदे भूताऽनद्यतने लट् ॥

भाषाऽर्थः—हे महाराज ! विभीषणने जो वचन कहा था, उसे आपने नहीं जाना । जो कि आपने क्रुद्ध होकर सभामें मुझे पादप्रहारसे निराकरण कर छोड़ दिया ॥ १८ ॥

हविर्जक्षिति निःशङ्को मखेषु मघवानसौ ।
प्रवाति स्वेच्छया वायुरुद्गच्छति च भास्करः ॥ १९ ॥

अन्वयः—असौ मघवान् मखेषु निःशङ्कः हविः जक्षिति । वायुः स्वेच्छया प्रवाति, भास्करश्च उद्गच्छति ॥

व्याख्या—असौ = अमरावतीस्थः, मघवान् = इन्द्रः, मखेषु = यज्ञेषु, निशङ्कः= आतङ्करहितः सन् , हविः = हवनीयद्रव्यं, चरुपुरोडाशादिकमित्यर्थः । जक्षिति = भक्षयति, भवति सत्येतादृशो व्यतिकरो नाऽभूदिति भावः, एवं परत्राऽपि । वायुः = वातः, स्वेच्छया=आत्मवाञ्छया, स्वतन्त्रतया न तु परतन्त्रतयेति भावः । प्रवाति= गच्छति, 'पवते' इति पाठान्तरं तत्र पवित्रीकरोतीत्यर्थः । एवं च भास्करश्च=सूर्यश्च, उद्गच्छति = स्वेच्छया तपन्नुदेतीति भावः ॥

व्युत्पत्तिः—मघवान् = मह्यते (पूज्यते) इति, 'मह पूजायाम्' इति धातोः 'श्वन्नुक्षन्नि'त्यादिना औणादिकसूत्रेण 'मघव'न्निति निपातितम् । 'मघवा बहुलम्' इति पक्षे त्रादेशः 'उगिदचां सर्वनामस्थानेऽधातोः' इति नुमागमः, संयोगाऽन्तलोप-स्याऽसिद्धत्वान्न नलोपः । त्रादेशाऽभावपक्षे 'मघवे'ति रूपम् । 'इन्द्रो मरुत्वान्म-घवा विडौजाः पाकशासनः ।' इत्यमरः । जक्षिति = 'जक्ष भक्षहसनयोः' इति धातोर्लट् 'रुदादिभ्यः सार्वधातुके' इतीट् । भास्करः = 'भास्कराऽहस्करब्रध्नप्रभा-करविभाकराः ।' इत्यमरः ॥

भाषाऽर्थः—अब इन्द्र यज्ञोंमें निःशङ्क होकर आज्य आदि हवनीयपदार्थको

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

खायंगे, वायुदेव अपनी इच्छा से बहेंगे और सूर्य भी अपनी इच्छासे ताप करते हुए उगेंगे ॥ १९ ॥

धनानामीशते यक्षा यमो दाम्यति राक्षसान् ।
तनोति वरुणः पाशमिन्दुनोदीयतेऽधुना ॥ २० ॥

अन्वयः—अधुना यक्षा धनानाम् ईशते । यमो राक्षसान् दाम्यति । वरुणः पाशं तनोति । इन्दुना उदीयते ॥

व्याख्या—अधुना = साम्प्रतं, यक्षाः = कुबेरादयः, धनानां = द्रव्याणाम्, ईशते= प्रभवन्ति, स्वाम्यं लभन्त इति भावः । यमः = यमराजः, राक्षसान् = यातुधानान्, दाम्यति = वशीकरोति । वरुणः = पाशी; पाशं = नागपाशं तनोति = विस्तारयति इन्दुना=चन्द्रमसा, उदीयते=वृद्धिक्षयाभ्यामुदितेन भूयते न तु प्रागिव नित्यपूर्णं भावः । एतत्सर्वं भवदभावे जातमिति भावः ॥

व्युत्पत्तिः—धनानाम् = ईशधातोर्योगे 'अधीगर्थदयेशां कर्मणि' इति षष्ठी । ईशते = 'ईश ऐश्वर्ये' इति धातोर्लट्, शपो लुकि 'आत्मनेपदेष्वनत झस्याऽदादेशः । दाम्यति = 'दमु उपशमे' इति दैवादिकधातोर्लट् 'शमामष्टानां दीर्घः श्यनि' इति दीर्घत्वम् । तनोति = 'तनु विस्तारे' इति धातोर्लट् तनादि-कृञ्भ्य उः' इत्युः । उदीयते = उत्पूर्वकात् 'इण् गतौ' इति धातोर्भावे लट्, अकृत्सार्वधातुकयोर्दीर्घं' इति दीर्घत्वम् ॥

भाषाऽर्थः—इस समय कुबेर आदि यक्षलोग अर्थोंकी प्रभुताको प्राप्त करेंगे। यमराज राक्षसोंको वशमें करेंगे। वरुण नागपाश फैलायेंगे। चन्द्रदेव पारी पारीसे वृद्धि और क्षयका अवलम्बन कर उदित होंगे ॥ २० ॥

शाम्यत्यृतुसमाहारस्तपस्यन्ति वनौकसः ।
नो नमस्यन्ति ते बन्धून् वरिवस्यन्ति नाऽमराः ॥ २१ ॥

अन्वयः—ऋतुसमाहारः शाम्यति । वनौकसः तपस्यन्ति । अमराः ते बन्धून् नो नमस्यन्ति न वरिवस्यन्ति (च) ॥

व्याख्या—ऋतुसमाहारः = वसन्तादिऋतूनां संभूयाऽवस्थानं, शाम्यति = अपैति, पूर्वं तु स्वत्परिचरणाऽर्थमृतूनां सम्भूयवृत्तिरासीदिति भावः । वनौकसः=अरण्य-वासिनः, मुनय इति भावः । तपस्यन्ति=तपश्चरन्ति, प्रतिबन्धकाऽभावादिति तात्पर्यम् । अमराः = देवाः, ते = तव, बन्धून् = बान्धवान्, नो नमस्यन्ति = पूर्ववत् पूजयन्ति, न वरिवस्यन्ति = न परिचरन्ति च ॥

व्युत्पत्तिः—शाम्यति = 'शमु उपशमे' इति दैवादिकाद्धातोर्लट्, 'शमाम-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ष्टानां दीर्घः श्यनि' इति दीर्घत्वम्। वनौकसः = वनमोको येषां ते। तपस्यन्ति = 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ्, 'तपसः परस्मैपदं चे'ति परस्मैपदत्वम्। नमस्यन्ति = नमसः पूजायां 'नमोवरिवश्चित्रङः क्यच्' इति क्यच्। वरिवस्यन्ति = वरिवसः परिचर्यायां पूर्वसूत्रेण क्यच्॥

भाषाऽर्थः—अब ऋतुओंका मिलजुलकर सदा रहना बन्द हो जायगा। मुनिलोग निःशङ्कतासे तपस्या करेंगे। देवतालोग पहलेकी तरह आपके बन्धुओंकी पूजा और सेवा नहीं करेंगे॥ २१॥

श्रीर्निष्कुष्यति लङ्कायां विरज्यन्ति समृद्धयः।
न वेद तन्न यस्याऽस्ति मृते त्वयि विपर्ययः॥ २२॥

अन्वयः—लङ्कायां श्रीः निष्कुष्यति, समृद्धयो विरज्यन्ति। त्वयि मृते यस्य विपर्ययो न अस्ति तत् न वेद॥

व्याख्या—लङ्कायां = पुर्यां, श्रीः = लक्ष्मीः, निष्कुष्यति = कुप्यति, 'न हृष्यति' इति भरतमल्लिलसम्मतः पाठस्तस्य च न हृष्टा भवतीत्यर्थः। समृद्धयः = सम्पत्तयः, विरज्यन्ति = विरक्ता भवन्ति, त्वयि = भवति, रावण इति भावः। मृते=पञ्चत्वं गते सति, यस्य = वस्तुनः, विपर्ययः = वैपरीत्यं, न अस्ति = न वर्तते, तत् = वस्तु, न वेद = न वेद्मि, भवदभावात्सर्वं विपर्यस्तमिति भावः॥

व्युत्पत्तिः—निष्कुष्यति = निष्पूर्वकात् 'कुष निष्कर्षे' इति क्र्यादिस्थधातोः 'कुषिरजोः प्राचां श्यन्परस्मैपदं चे'ति कर्मकर्तरि यगात्मनेपदाऽपवादौ श्यन्प्रत्ययः। धातूपसर्गाणामनेकार्थत्वादत्र कुषधातोः कोपाऽर्थता। विरज्यन्ति = विपूर्वकात् 'रञ्ज रागे' इति धातोः पूर्ववत् श्यन्प्रत्ययः। वेद = 'विद ज्ञाने' इति धातोः 'विदो लटो वे'ति मिपो वैकल्पिको णलादेशः, तदभावपक्षे 'वेद्मी'ति रूपम्॥

भाषाऽर्थ—लङ्कामें लक्ष्मी रूठेगी, सम्पत्तियां स्वयं ही विरक्त होंगी। आपके मरनेपर जिस वस्तुका वैपरीत्य नहीं होगा ऐसी वस्तु मैं नहीं जानता हूँ॥ २२॥

शक्तिं संस्वजते शक्रो गोपायति हरिः श्रियम्।
देवबन्द्यः प्रमोदन्ते चित्रीयन्ते घनोदयाः॥ २३॥

अन्वयः—शक्रः शक्तिं संस्वजते। हरिः श्रियं गोपायति। देवबन्द्यः प्रमोदन्ते। घनोदयाः चित्रीयन्ते।

व्याख्या—शक्रः = इन्द्रः, शक्तिं = कासूं (प्रहरणविशेषं) सामर्थ्यं वा, क्वचित् 'शचीम्' इति पाठस्तस्य इन्द्राणीमित्यर्थः। संस्वजते = गृह्णाति। हरिः = विष्णुः, श्रियं=लक्ष्मीं, पुरा स्वपुरवर्तिनीमिति भावः। गोपायति=रक्षति, स्वायत्तीकरोतीति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भावः । देवबन्द्यः=बन्दीकृता देवस्त्रियः, प्रमोदन्ते=हृष्यन्ति, मुक्तिलाभादिति भावः । एवं च घनोदयाः=मेघोन्नतयश्च चित्रीयन्ते=आश्चर्यभिवन्ति, नानाविधरूपैरिति तात्पर्यम् । सर्वं चैतत्तवाऽभावादेव भविष्यतीति आकूतम् ॥

व्युत्पत्तिः—संस्वजते=सम्पूर्वकात् 'स्वञ्ज परिष्वङ्गे' इति धातोर्लट् 'दंशसञ्जस्वञ्जां शपी' त्यनुनासिकलोपः । गोपायति='गुपूरक्षण' इति धातोर्लट्, 'गुपूधूपविच्छिपणिपनिभ्य आय' इति स्वार्थ आयप्रत्ययः । प्रमोदन्ते=प्रपूर्वकात् 'मुद हर्षे' इति धातोर्लट् । चित्रीयन्ते='चित्रङ् आश्चर्य' इति धातोः 'नमोवरिवश्चित्रङः क्यच्' इति क्यजन्ताल्लट् । ङित्करणात् 'अनुदात्तङित आत्मनेपदम्' इत्यात्मनेपदम् ॥

भापाऽर्थः—अब इन्द्र अपने सामर्थ्यका ग्रहण करेंगे । विष्णु लक्ष्मीको अपने अधीन करेंगे । बन्दी बनायी गयीं देवस्त्रियां मुक्ति-लाभके कारण प्रसन्न होंगी । मेघोंकी उन्नतियां भी अनेक रूपोंसे आश्चर्यपूर्ण हो जायंगी ॥ २३ ॥

बिभ्रत्यस्त्राणि साऽमर्षा रणकाम्यन्ति चाऽमराः ।
चकासति च मांसाऽदां तथा रन्ध्रेषु जाग्रति ॥ २४ ॥

अन्वयः—अमराः साऽमर्षाः (सन्तः) अस्त्राणि बिभ्रति रणकाम्यन्ति चकासति च; तथा मांसादां रन्ध्रेषु जाग्रति ॥

व्याख्या—अमराः=देवाः, साऽमर्षाः=सकोपाः सन्तः, अस्त्राणि=आयुधानि, बिभ्रति=धारयन्ति, रणकाम्यन्ति=आत्मनो रणमिच्छन्ति, चकासति च=प्रकाशन्ते च; तथा=तेनैव प्रकारेण, मांसादां=राक्षसानां, रन्ध्रेषु=छिद्रेषु, जाग्रति=सावधाना भवन्ति ॥

व्युत्पत्तिः—सामर्षाः=अमर्षेण सहिताः, तेनसहेतियोगाद्बहुव्रीहिः । बिभ्रति='डुभृञ् धारणपोषणयोः' इति ह्वादिधातोर्लटि झौ रूपम् । शपः 'जुहोत्यादिभ्यः श्लुः' इति श्लौ, 'श्लौ' इति द्वित्वे 'भृञामित्' इतीत्वे अभ्यस्तसंज्ञायाम् 'अदभ्यस्तात्' इत्यत् । रणकाम्यन्ति='काम्यच्चे'ति काम्यच्प्रत्यये 'सनाद्यन्ता धातव' इति तदन्तस्य धातुत्वं, ततो लट् । चकासति='चकासृ दीप्तौ' इति धातोर्लट् । मांसादां=मांसमदन्तीति मांसादस्तेषाम्, 'अदोऽनन्ने' इति विट् । जाग्रति='जागृ निद्राक्षये' इति धातोर्लट् । 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा, 'अदभ्यस्तात्' इति झस्याऽदादेशः ॥

भापाऽर्थः—अब देवगण क्रोधयुक्त होते हुए अस्त्रोंको धारण करेंगे, लड़नेकी इच्छा करेंगे और शोभित भी होंगे तथा राक्षसोंके छिद्रोंमें सावधान (होशियार) रहेंगे ॥ २४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चञ्चूर्यन्तेऽभितो लङ्कामस्मांश्चाऽप्यतिशेरते ।
भूमयन्ति स्वसामर्थ्यं कीर्तिं नः कनयन्ति च ॥ २५ ॥

अन्वयः—(अमराः) लङ्काम् अभितः चञ्चूर्यन्ते, अस्मान् अपि च अतिशेरते, स्वसामर्थ्यं भूमयन्ति नः कीर्तिं कनयन्ति च ॥

व्याख्या—लङ्काम् अभितः = लङ्काम् उभयतः, अन्तर्बहिश्चेति भावः । चञ्चूर्यन्ते = गर्हितं चरन्ति, स्वच्छन्दं चरन्तीत्यर्थः, अमरा इति शेषः, एवं परत्राऽपि । अस्मान् अपि च = अस्मादृशराक्षसान् अपि च, अतिशेरते=अतिक्रामन्ति, स्वसामर्थ्यम् = आत्मशक्तिं, भूमयन्ति = वर्धयन्ति, नः = अस्माकं, राक्षसानामिति भावः । कीर्तिं = यशः, कनयन्ति च = अल्पयन्ति च ।

व्युत्पत्तिः—लङ्काम् = 'अभित' इति पदेन योगे 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति द्वितीया । अभितः = अभिशब्दात् 'पर्यभिभ्यां चे' ति तसिप्रत्ययः । चञ्चूर्यन्ते = चरधातोः 'लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम्' इति भावगर्हायां यङ् 'चरफलोश्चे' ति अभ्यासस्य नुमागमः, 'उत्परस्यातः' इत्युत्वं 'हलि चे' ति दीर्घत्वम् । अतिशेरते = अतिपूर्वकात् 'शीङ् स्वप्ने' इति धातोर्लट् 'शीङो रुट्' इति रुडागमः । स्वसामर्थ्यं = समर्थस्य भावः कर्म वा सामर्थ्यं 'गुणवचनब्राह्मणादिभ्यः कर्मणि चे' ति ष्यञ्,स्वस्य सामर्थ्यं, तत् । भूमयन्ति=बहोर्भावो भूमा, बहुशब्दात् 'पृथ्वादिभ्य इमनिज्वा' इतीमनिच् । 'बहोर्लोपो भू च बहोः' इति बहोर्भूरादेशः, इमनिजादिलोपश्च । भूमवत्कुर्वन्तीति भूमयन्ति, मत्वन्ताद्भूमवत्शब्दात् 'तत्करोति तदाचष्टे' इति णिचि णाविष्ठवद्भावे 'विन्मतोर्लुक्' इति मतोर्लुकि टिलोपे च साधुत्वम् । कनयन्ति=अल्पां कुर्वन्ति इति विग्रहे अल्पशब्दात् 'तत्करोति तदाचष्टे' इति णिचि णाविष्ठवद्भावे 'युवाल्पयोः कनन्यतरस्याम्' इति अल्पशब्दस्य वैकल्पिकः कनादेशः ॥

भाषाऽर्थः—देवगण लङ्का के भीतर और बाहर दोनों तरफ स्वच्छन्द होकर घूमेंगे हम लोगोंका भी लंघन करेंगे अपने सामर्थ्य को बढायेंगे और हमारी कीर्ति को अल्प कर देंगे ॥ २५ ॥

दिशो व्यश्नुवते दृप्तास्त्वत्कृतां जहति स्थितिम् ।
क्षोदयन्ति च नः क्षुद्रा, हसन्ति त्वां विपद्गतम् ॥ २६ ॥

अन्वयः—(अमराः) (दृप्ताः) दिशो व्यश्नुवते, त्वत्कृतां स्थितिं जहति; क्षुद्राः विपद्गतं त्वां हसन्ति क्षोदयन्ति च ॥

व्याख्या—दृप्ताः—दर्पयुक्ताः सन्तः, दिशः=आशाः, व्यश्नुवते=व्याप्नुवन्ति, अमरा इति शेषः । एवं परत्राऽपि त्वत्कृतां = भवद्विहितां, स्थितिं = मर्यादां, जहति=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्यजन्ति। क्षुद्राः = अल्पाः, ते देवाः। विपद्गतं = विपन्नं, त्वां = भवन्तं, हसन्ति = तिरस्कुर्वन्ति, चोदयन्ति च = क्षुद्रमाचक्षते च ॥

व्युत्पत्तिः—व्यश्नुवते = विपूर्वकात् 'अशू व्याप्तौ' इति धातोर्लट्। त्वत्कृतां = त्वया कृताम्, 'प्रत्ययोत्तरपदयोश्चे'ति उत्तरपदे परे युष्मच्छब्दस्य त्वदादेशः। स्थितिं = 'संस्था तु मर्यादा धारणा स्थितिः' इत्यमरः। जहति = 'ओहाक् त्यागे' इति धातोर्लट्, अभ्यस्तत्वात् झेरदादेशे 'श्नाऽभ्यस्तयोरातः' इत्याल्लोपः। विपद्गतं = विपदं गतो विपद्गतस्तं, 'द्वितीया श्रिताऽतीतपतितगताऽत्यस्तप्राप्तापन्नैः' इति द्वितीयातत्पुरुषः। चोदयन्ति = क्षुद्रमाचक्षत इति क्षुद्रशब्दात् 'तत्करोति तदाचष्ट' इति णिचि णाविष्ठवद्भावे 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः' इति यणादिपरलोपः पूर्वस्य च गुणः।

भावार्थः—देवगण दर्पयुक्त होते हुए दिशाओंको व्याप्त करेंगे, आपसे की गयी मर्यादाका त्याग करेंगे। क्षुद्र वे लोग आपद्ग्रस्त आपकी हँसी करेंगे और आप को ही क्षुद्र कहेंगे भी ॥ २६ ॥

> शमं शमं नभस्वन्तः पुनन्ति परितो जगत्।
> उज्जिहीषे महाराज ! त्वं प्रशान्तो न किं पुनः ॥ २७ ॥

अन्वयः—नभस्वन्तः शमं शमं परितो जगत् पुनन्ति। हे महाराज त्वं पुनः प्रशान्तः (सन्) किं न उज्जिहीषे ?

व्याख्या—नभस्वन्तः=वायवः, शमं शमं=शान्त्वा शान्त्वा, परितः=सर्वतः, जगत् = लोकं, पुनन्ति = पवित्रयन्ति, शान्ता अपि पुनः प्रवहन्तीति भावः। हे महाराज = हे भूपालश्रेष्ठ !, त्वं पुनः = भूयः, प्रशान्तः = निर्वाणः सन्, किं=किमर्थं, न उज्जिहीषे = नोत्तिष्ठसि, नोज्जीवसीति भावः ॥

व्युत्पत्तिः—शमं शमं = 'शमु उपशमे' इति धातोः 'आभीक्ष्ण्ये णमुल्' इति णमुल् 'नोदात्तोपदेशस्य मान्तस्याऽनाचमेः' इति वृद्धिप्रतिषेधः, आभीक्ष्ण्ये द्वे भवतः। 'कृन्मेजन्तः' इत्यव्ययत्वम्। पुनन्ति = 'पूञ् पवने' इति धातोर्लट्, 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। उज्जिहीषे = उत्पूर्वकात् 'ओहाङ् गतौ' इति धातोर्लट् 'भृञामित्' इत्यभ्यासस्येत्वम् 'ई हल्यघोः' इतीत्वम् ॥

भावार्थः—वायु शान्त होकर चारों तरफ जगत् को पवित्र कर रहे हैं। हे महाराज ! आप प्रशान्त होकर फिर क्यों उज्जीवित नहीं हो रहे हैं ? ॥ २७ ॥

> प्रोर्णोति शोकश्चित्तं मे सत्त्वं सशाम्यतीव मे।
> प्रमार्ष्टि दुःखमालोकं मुञ्चाम्यूर्जं त्वया विना ॥ २८ ॥

अन्वयः—(हे महाराज !) त्वया विना शोको मे चित्तं प्रोर्णोति, मे सत्त्वं सशाम्यति इव। दुःखम् आलोकं प्रमार्ष्टि। ऊर्जं मुञ्चामि ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—त्वया विना=भवन्तम् अन्तरेण, शोकः=मन्युः, मे=मम, चित्तं=मानसं, प्रोर्णोति=आच्छादयति, मे=मम, सत्त्वं=प्राणः, संशाम्यति इव=विरमति इव। दुःखं=व्यथा, आलोकं=प्रकाशं, प्रमार्ष्टि=अपनयति। ऊर्जं=बलं, मुञ्चामि=त्यजामि, अहमिति शेषः॥

व्युत्पत्तिः—त्वया='विने'तिपदेन योगे 'पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्' इति तृतीया, पक्षे पञ्चमीद्वितीये च। प्रोर्णोति=प्रपूर्वकात् 'ऊर्णुञ् आच्छादने'इति आदादिकाद्धातोर्लट्, 'ऊर्णोतेर्विभाषा'इति वृद्ध्यभावपक्षे रूपम्। मल्लिनाथस्तु 'प्रोर्णौति' इति पाठमाह, तत्र वृद्धिः। सत्त्वं='प्राणे बलेऽन्तःकरणे' इति सत्त्वशार्थेषु यादवः। संशाम्यति=सम्पूर्वकात् 'शमु उपशमे' इति धातोर्लट् 'शमामष्टाना' मित्यादिना दीर्घत्वम्। आलोकम्='आलोको दर्शनद्योतौ' इत्यमरः। प्रमार्ष्टि=प्रपूर्वकात् 'मृजू शुद्धौ' इत्यादादिकाद्धातोर्लट्, 'मृजेर्वृद्धिः' इति वृद्धिः। मुञ्चामि='मुच्लृ मोक्षणे' इति तौदादिकाद् धातोर्लट्, 'शे मुचादीनाम्' इति नुम्॥

भाषाऽर्थः—हे महाराज' आपके विना शोक मेरे चित्तको आच्छादित कर रहा है, मेरा प्राण जैसे शान्त हो रहा है। दुःख प्रकाश हटा रहा है। मैं अपने बल का त्याग कर रहा हूँ॥ २८॥

> के न संविद्रते नाऽन्यस्त्वत्तो बान्धववत्सलः।
> विरौमि शून्ये प्रोर्णौमि कथं मन्युसमुद्भवम्॥ २९॥

अन्वयः—त्वत्तः अन्यः बान्धववत्सलो न (इति) के न संविद्रते? शून्ये विरौमि। मन्युसमुद्भवं कथं प्रोर्णौमि?

व्याख्या—हे महाराज! त्वत्तः=भवतः, अन्यः=अपरः, बान्धववत्सलः=बन्धुप्रियः, न=नाऽस्ति, (इति=इदम्) के=जनाः, न संविद्रते=न जानन्ति, सर्वेऽपि जानन्तीति भावः। अतोऽहं शून्ये=रिक्ते सति, विरौमि=क्रन्दामि। मन्युसमुद्भवं=शोकोदयं, कथं=केन प्रकारेण, प्रोर्णौमि=आच्छादयामि, वारयामीति भावः॥

व्युत्पत्तिः—त्वत्तः=त्वदिति, युष्मच्छब्दात् 'पञ्चम्यास्तसिल्' इति तसिलप्रत्यये परे 'प्रत्ययोत्तरपदयोश्चे'ति तस्य त्वदादेशः। बान्धववत्सलः=बन्धव एव बान्धवाः, 'प्रज्ञादिभ्यश्चे'ति स्वाऽर्थेऽण्। वत्सशब्दात् कामवत्यर्थे 'वत्सांऽसाभ्यां कामबले' इति लच्प्रत्ययः, 'स्निग्धस्तु वत्सल' इत्यमरः। बान्धवेषु वत्सलः। संविद्रते=संपूर्वकात् 'विद ज्ञाने' इति धातोर्लट्, 'समो गम्यृच्छिभ्याम्' इत्यधिकारे 'विदिप्रच्छिस्वरतीनामुपसंख्यानम्' इत्यात्मनेपदं 'वेत्तेर्विभाषा' इति झादेशस्याऽ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तो रुडागमः। विरौमि=विपूर्वात् 'रु शब्दे' इति धातोर्लट् 'उतो वृद्धिर्लुकि हलि' इति वृद्धिः, 'तुरुस्तुशम्यमः सार्वधातुके' इतीट्पक्षे 'विरवीमी'ति रूपम् ॥

भाषाऽर्थ—'हे महाराज!' आपके अतिरिक्त बन्धुप्रिय दूसरा नहीं है, इस बात को कौन नहीं जानते हैं। इस लिए मैं उस स्थानके रिक्त होने पर रो रहा हूँ। मैं शोकके उदयको कैसे हटाऊँ ॥ २९ ॥

रोदिम्यनाथमात्मानं बन्धुना रहितस्त्वया।
प्रमाणं नोपकाराणामवगच्छामि यस्य ते ॥ ३० ॥

अन्वयः—बन्धुना त्वया रहितः अनाथम् आत्मानं रोदिमि। यस्य ते उपकाराणां प्रमाणं न अवगच्छामि ॥

व्याख्या—बन्धुना=बान्धवेन, त्वया=भवता, रहितः=शून्यः अहमिति शेषः। अनाथं=रक्षकरहितम्, आत्मानं=स्वम्, उद्दिश्येति शेषः। रोदिमि=परिदेवये। यस्य=कृतकार्यस्य ते=तव, उपकाराणाम्=उपकृतीनां, प्रमाणम्=इयत्तां, न अवगच्छामि=न जाने, तादृशं त्वामुद्दिश्य कथं न शोचामीति भावः ॥

व्युत्पत्तिः—अनाथम्=अविद्यमानो नाथो यस्य, तं 'नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः' इति नञ्बहुव्रीहिः ॥

भाषाऽर्थः—आपके ऐसे बान्धवसे बिछुड़कर अनाथ होकर मैं अपने लिए विलाप कर रहा हूँ। मैं आपके उपकारोंकी इयत्ता नहीं जान रहा हूँ ॥ ३० ॥

नेदानीं शक्रयक्षेन्द्रौ बिभीतो न दरिद्रितः।
न गर्वं जहितो दृप्तौ न क्लिश्नीतो दशाऽऽनन! ॥ ३१ ॥

अन्वयः—हे दशाऽऽनन! इदानीं शक्रयक्षेन्द्रौ न बिभीतः, न दरिद्रितः, दृप्तौ गर्वं न जहितः न क्लिश्नीतः ॥

व्याख्या—हे दशाऽऽनन=हे रावण!, इदानीं=साम्प्रतं, शक्रयक्षेन्द्रौ=इन्द्रकुबेरौ, न बिभीतः=नो भयं कुरुतः, न दरिद्रितः=नो दरिद्रौ भवतः, पुनरात्मसम्पत्तिलाभादिति भावः। अपि तु दृप्तौ=दर्पयुक्तौ सन्तौ, ताविति शेषः। गर्वम्=अभिमानं, न जहितः=नो त्यजतः, एवं च—न क्लिश्नीतः=न त्वद्भयेनाऽऽत्मानं पीडयत इत्यर्थः ॥

व्युत्पत्तिः—शक्रयक्षेन्द्रौ=शक्रश्च यक्षेन्द्रश्च, 'अल्पाऽच्तरम्' इति 'अभ्यर्हितं चे'ति वा शक्रपदस्य पूर्वनिपातः। बिभीतः='ञिभी भये' इति धातोर्लट्, 'भियोऽन्यतरस्याम्' इति इत्वाऽभावपक्षे रूपम्। इत्वे तु 'बिभितः' इति रूपम्। दरिद्रितः='दरिद्रा दुर्गतौ' इत्यादादिकाद्धातोर्लट्। तसि शपो लुक् 'इद्दरिद्रस्य'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति हलादौ क्ङिति सार्वधातुक इत्। जहितः='ओहाक् त्यागे' इति जौहोत्यादिकाद्धातोर्लट् 'जहातेश्च' इतीत्वम् । क्लिश्नीतः='क्लिशू विबाधने' इति क्रैयादिकधातोर्लट् 'ई हल्यघोः' इतीत्वम्। 'शात्' इति श्चुत्वनिषेधः, धातुरयं सकर्मकः ॥

भाषाऽर्थः—हे रावण ! इस समय इन्द्र और कुबेर भीत नहीं हो रहे हैं, दरिद्र नहीं हो रहे हैं, दर्पयुक्त होकर घमण्ड नहीं छोड़ रहे हैं, आपके भयके कारण चिन्ता आदिसे अपनेको पीड़ित नहीं कर रहे हैं ॥ ३१ ॥

त्वयाऽपि नाम रहिताः कार्याणि तनुमो वयम् ।
कुर्मश्च जीविते बुद्धिं, धिक् तृष्णां कृतनाशिनीम् ॥ ३२ ॥

अन्वयः—वयं त्वया रहिताः कार्याणि अपि नाम तनुमः ? जीविते च बुद्धिं कुर्मः । कृतनाशिनीं तृष्णां धिक् ॥

व्याख्या—वयं=बन्धवः, त्वया=भवता, रहिताः=त्यक्ताः सन्तः कार्याणि=अपि कृत्यानि अपि, सन्धिविग्रहादीनीति भावः। नामेति कुत्सने। तनुमः=कुर्मः, न करिष्याम इत्यर्थः। जीविते च=जीवने च, बुद्धिं=मतिं, कुर्मः=तनुमः। तत् कृतनाशिनीं=कृतघ्नरूपां, मल्लिनाथमते तु 'कृतनाशिनाम्' इति पाठस्तस्य कृतघ्नानामित्यर्थः। तृष्णां=गर्धां, रक्षकाऽभावेऽपि कार्याचरण जीवनमतिरूपामिति भावः। धिक्=धिगस्तु, महोपकारं रक्षकं त्वां विना जीवितं गर्हितमिति भावः ॥

व्युत्पत्तिः—नाम='नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने।' इत्यमरः। तनुमः='तनु विस्तारे' इति धातोः 'गर्हायां लडपिजात्वोः' इति भविष्यति लट्। तृष्णां=धिग्योगे 'धिगुपर्यादिषु त्रिषु' इति द्वितीया ॥

भाषाऽर्थः—हे महाराज ! हम आपसे रहित होकर क्या सन्धि-विग्रह आदि कार्य भी करेंगे ? और जीवनधारण करने में बुद्धि रक्खेंगे ? तब इस कृतघ्न तृष्णाको धिक्कार है ॥ ३२ ॥

तृणेह्मि देहमात्मीयं, त्वं वाचं न ददासि चेत् ।
द्राघयन्ति हि मे शोकं स्मर्यमाणा गुणास्तव ॥ ३३ ॥

अन्वयः—(हे महाराज !) त्वं वाचं न ददासि चेत् आत्मीयं देहं तृणेह्मि । हि स्मर्यमाणाः तव गुणाः मे शोकं द्राघयन्ति ॥

व्याख्या—(हे महाराज !) त्वं वाचं=वाणीं, न ददासि चेत्=नो वितरसि यदि, न संभाषसे चेदिति भावः। अहम्, आत्मीयं=स्वकीयं, देहं=शरीरं, तृणेह्मि=हिनस्मि । हि=यतः, स्मर्यमाणाः=स्मृतिविषयीकृताः, तव=भवतः गुणाः=शौर्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रक्षणादिरूपा इति भावः, मे = मम, शोकं—मन्युं, द्राघयन्ति = दीर्घीकुर्वन्ति।

व्युत्पत्तिः—तृणेढि = 'तृह (हिसि) हिंसायाम्' इति धातोर्लट्, 'तृणह इम्' इति इमागमः। द्राघयन्ति = दीर्घशब्दात् 'तत्करोति तदाचष्टे' इति णिचि णाविष्ठवद्भावे 'प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः' इति द्राघ्यादेशः॥

भाषाऽर्थः—हे महाराज! आप मुझसे संभाषण नहीं करते हैं तो मैं अपने शरीरको नष्ट कर डालता हूँ। क्योंकि स्मरण करने पर आपके गुण मेरे शोकको फैला रहे हैं॥ ३३॥

उन्मुच्य स्रजमात्मीयां मां स्रजयति को हसन्।
नेदयत्यासनं को मे, कर्हि मे वदति प्रियम्॥ ३४॥

अन्वयः—आत्मीयां स्रजम् उन्मुच्य को हसन् मां स्रजयति? को मे आसनं नेदयति? कर्हि को मे प्रियं वदति?

व्याख्या—आत्मीयां = स्वकीयां, स्रजं = मालाम्, उन्मुच्य = अपनीय, देहादिति शेषः। कः, हसन् = हास्यं कुर्वन्, परितोषादिति भावः। मां = भ्रातरं, स्रजयति = स्रग्विणं करोति, कः, मे = मम, आसनम् = उपवेशनस्थानं नेदयति = अन्तिकं करोति, कर्हि = कदा, कः, मे = मम, प्रियं = प्रीतिजनकं वचनं, वदति = वदिष्यति॥

व्युत्पत्तिः—स्रजयति=स्रग्विञ्छब्दात् 'तत्करोति तदाचष्टे' इति णिचि णाविष्ठवद्भावे 'विन्मतोर्लुक्' इति विनो लुकि 'प्रकृत्यैकाच्' इति प्रकृतिभावाभावात् टिलोपः। नेदयति = अत्राऽपि णाविष्ठवद्भावात् 'अन्तिकबाढयोर्नेदसाधौ' इत्यन्तिकशब्दस्य नेदादेशः। कर्हि = 'अनद्यतने र्हिलन्यतरस्याम्' इति किमो र्हिप्रत्ययः। वदति = 'विभाषा कदाकर्ह्योः' इति कदाशब्दस्य प्रयोगाद्भविष्यदर्थे लट्॥

भाषाऽर्थः—अपनी मालाको उतारकर हंसता हुआ कौन मुझे पहना देगा? कौन मेरे आसनको अपने आसनके समीप रक्खेगा? कौन मुझसे प्रियवाक्य बोलेगा॥

न गच्छामि पुरा लङ्कामायुर्यावद् दधाम्यहम्।
कदा भवति मे प्रीतिस्त्वां पश्यामि न चेदहम्॥ ३५॥

अन्वयः—अहं यावत् आयुः दधामि (तावत्) लङ्कां पुरा न गच्छामि। त्वां न पश्यामि चेत् कदा मे प्रीतिः भवति॥

व्याख्या—(हे महाराज!) अहं = भवदनुजः, यावत् = यत्कालपर्यन्तम्, आयुः = जीवितं, दधामि = धारयिष्यामीति जीविष्यामीति भावः। (तावत् = तत्कालपर्यन्तं) लङ्कां = तदाख्यां पुरीं, पुरा न गच्छामि = न गमिष्यामि। अहं = भवद्-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्राता विभीषणः, त्वां = भवन्तं, पितृसमं ज्येष्ठभ्रातरमिति भावः । न पश्यामि = नो विलोकयामि, चेत् = यदि कदा = कस्मिन्काले, मे = मम, पुत्रसमस्य कनिष्ठ-भ्रातुरिति भावः । प्रीतिः = प्रसन्नता, भवति = भविष्यतीत्यर्थः ॥

व्युत्पत्तिः—दधामि = 'डुधाञ् धारणपोषणयोः' इति धातोर्यावच्छब्देन योगे 'यावत्पुरानिपातयोर्लट्' इति भविष्यदर्थे लट् । पुरा न गच्छामि = पुरापदेन योगे 'गम्लृ गतौ' इति धातोः पूर्वसूत्रेण लट् । कदा = 'सर्वैकान्यकिंयत्तदः काले दा' इति दाप्रत्ययः । भवति = कदाशब्दयोगात् 'विभाषा कदाकर्ह्योः' इति भविष्यदर्थे लट् ॥

भाषाऽर्थः—हे महाराज ! मैं जब तक जीऊँगा तब तक लङ्कामें नहीं जाऊंगा । मैं आपको नहीं देखूंगा तो कब मुझे प्रीति होगी ? ॥ ३५ ॥

ऊर्ध्वं म्रिये मुहूर्ताद्धि विह्वलः क्षतबान्धवः ।
मन्त्रे स्म हितमाख्यामि, न करोमि तवाऽप्रियम् ॥ ३६ ॥

अन्वयः—क्षतबान्धवो विह्वलः (अहम्) मुहूर्तात् ऊर्ध्वं म्रिये हि । मन्त्रे हितम् आख्यामि स्म । तव अप्रियं न करोमि ॥

व्याख्या—(हे महाराज !) क्षतबान्धवः = हतबन्धुः, अत एव—विह्वलः = विवशः, अहमिति शेषः एवं परत्राऽपि । अतः प्राप्तकालत्वात्—मुहूर्तात् = कस्मा-च्चित्क्षणात् , ऊर्ध्वम् = उपरि, म्रिये = मरिष्यामि, हि = निश्चयेन । स्वकीयमपराधाऽ-भावं प्रतिपादयति—मन्त्र इति । मन्त्रे = मन्त्रविचारकाले, हितं = पथ्यम्, आख्यामि स्म = आख्यम् । तव = भवतः, अप्रियम् = अनभीष्टं, न करोमि = नाऽकार्षम् ॥

व्युत्पत्तिः—क्षतबान्धवः = बन्धव एव बान्धवाः, 'प्रज्ञादिभ्यश्चे'ति स्वाऽर्थेऽण् क्षता बान्धवा यस्य सः । म्रिये = 'मृङ् प्राणत्यागे' इति धातोः 'म्रियतेर्लुङ्लिङो-श्चे' ति चकारात् 'शितश्चात्मनेपदम्' 'लिङ् चोर्ध्वमौहूर्तिके' इति लोडर्थलक्षणे भविष्यति लट् ; प्राप्तकाललक्षणश्चाऽत्र लोडर्थः । आख्यामि स्म = आङ्पूर्वकात् 'ख्या प्रकथने' इति धातोः 'लट् स्मे' 'अपरोक्षे चे' ति भूताऽपरोक्षे लट् । न करोमि = नशब्दयोगे कृधातोः 'नन्वोर्विभाषा' इति पृष्टप्रतिवचने भूते लट् ॥

भाषाऽर्थः—बान्धवोंके नष्ट होनेके कारण विह्वल होकर मैं मुहूर्तके अनन्तर ही निश्चय मर जाऊँगा । हे महाराज ! मैंने मन्त्रविचारके समयमें हितवचन कहा था, आपका अप्रिय नहीं किया था' ॥ ३६ ॥

अन्तःपुराणि पौलस्त्यं पौराश्च भृशदुःखिताः ।
संश्रुत्य स्माऽभिधावन्ति हतं रामेण संयुगे ॥ ३७ ॥

अन्वयः—पौलस्त्यं संयुगे रामेण हतं संश्रुत्य अन्तःपुराणि पौराश्च भृशदुः-खिताः (सन्तः) अभिधावन्ति स्म ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—पौलस्त्यं=रावणं, संयुगे=संग्रामे, रामेण=रामचन्द्रेण, हतं=व्यापादितं, संश्रुत्य=आकर्ण्य, अन्तःपुराणि=अवरोधाः, लक्षणया अन्तःपुरस्त्रियः इत्यर्थः। पौराश्च=नागरिकाश्च, भृशदुःखिताः=अतिशयव्यथिताः सन्तः, अभिधावन्ति स्म=अभ्यधावन् ॥

व्युत्पत्तिः—पौलस्त्यं=पुलस्त्यस्याऽपत्यं पुमान्पौलस्त्यस्तम्, 'तस्याऽपत्यम्' इत्यण्। पौराः=पुरि भवाः, 'तत्र भव' इत्यण। भृशदुःखिताः=भृशं दुःखिताः='सह सुपा' इति। समासः। अभिधावन्ति स्म=अभिपूर्वकात् 'धावु गतिशुद्ध्योः' इति धातोः 'लट् स्मे' इति भूते लट् ॥

भाषाऽर्थः—संग्राममें 'रामसे रावण मारा गया' ऐसा सुनकर अन्तःपुरकी स्त्रियां और लङ्काके नागरिक भी अतिशय दुःखित होते हुए उसके सम्मुख गये ॥३७॥

मूर्धजान् स्म विलुञ्चन्ति, क्रोशन्ति स्माऽतिविह्वलम्।
अधीयन्त्युपकाराणां मुहुर्भर्तुः प्रमन्यु च ॥ ३८ ॥

अन्वयः—(अन्तःपुराणि) मूर्धजान् विलुञ्चन्ति स्म, अतिविह्वलं क्रोशन्ति स्म, प्रमन्यु भर्तुः उपकाराणां मुहुः अधीयन्ति स्म ॥

व्याख्या—अन्तःपुरचेष्टितान्याह—मूर्धजानिति । मूर्धजान् = केशान्, विलुञ्चन्ति स्म=अपानयन्, अन्तःपुराणीति शेषः, एवं परत्राऽपि। अतिविह्वलम्=अतिविक्लवतापूर्वकं क्रोशन्ति स्म = रावणमाह्वयन्, अरुदन् वा। प्रमन्यु=प्रकृष्टशोकं यथा तथा भर्तुः=स्वामिनः, रावणस्येत्यर्थः। उपकाराणम्=उपकृतीनां, रावणलब्धसौख्यानीति भावः। मुहुः=वारं वारम्, अधीयन्ति स्म=अस्मरन्, इत्थङ्कारमन्तःपुररमण्यः शोकं प्राकाशयन्निति भावः ॥

व्युत्पत्तिः—मूर्धजान्=मूर्ध्नि जाता मूर्धजास्तान्, 'सप्तम्यां जनेर्ड' इति डप्रत्ययः। 'चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः।' इत्यमरः। विलुञ्चन्ति स्म=विपूर्वकात् 'लुञ्च अपनयने' इति धातोः 'लट् स्मे' इति भूताऽर्थे लट्। प्रमन्यु=प्रकृष्टो मन्युर्यस्मिस्तद् यथा तथेति क्रियाविशेषणम्। उपकाराणां=अधिपूर्वकेण इग्धातुना योगे 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी। अधीयन्ति स्म=अधिपूर्वकात् 'इक् स्मरणे' इति धातोः 'लट् स्मे' इति भूतार्थे लट्, शपो लुक् 'झोऽन्त' इति झस्याऽन्तादेशः, अध्युपसर्गे च सवर्णदीर्घः ॥

भाषाऽर्थः—रावणके अन्तःपुरकी स्त्रियां केशोंको नोचने लगीं, अति विह्वल होकर रोने और पुकारने लगीं और अतिशय शोकके साथ पतिसे किये उपकारोंका वारं वार स्मरण (याद) करने लगीं ॥ ३८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रावणस्य नमन्ति स्म पौराः सास्रा रुदन्ति च ।
भाषते स्म ततो रामो वचः पौलस्त्यमाकुलम् ॥ ३९ ॥

अन्वयः—पौराः साऽस्राः (सन्तः) रावणस्य नमन्ति स्म रुदन्ति स्म च । ततो रामः आकुलं पौलस्त्यं वचो भाषते स्म ॥

व्याख्या—पौराः = नागरिकाश्च, साऽस्राः = सबाष्पाः सन्तः, रावणस्य = दशाननस्य, पादाविति शेषः, यद्वा रावणम् । नमन्तिस्म = प्रणताः, रुदन्ति स्म च = अश्रूणि मुमुचुश्च, 'रुवन्ति' इति मल्लिनाथसम्मतः पाठस्तस्य चुक्रुशुरित्यर्थः । ततः, रामः = रामचन्द्रः, आकुलं = व्याकुलं, पौलस्त्यं = विभीषणं, वचः = वचनं, वक्ष्यमाणप्रकारमिति भावः । भाषते स्म = बभाषे ॥

व्युत्पत्तिः—साऽस्राः = अस्रैः सहिताः, तुल्ययोगबहुव्रीहिः । रावणस्य = 'कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येवे' ति षष्ठी वा । नमन्ति स्म = 'णम-प्रह्वत्वे शब्दे च' इति धातोः 'लट् स्मे' इति स्मयोगे लट्, एवं परत्राऽपि । रुदन्ति स्म = 'रुदिर् अश्रुविमोचने' इति धातोः पूर्ववल्लट् । 'इर इत्संज्ञा वाच्या' इतीर इत्त्वम् । भाषते स्म = 'भाष व्यक्तायां वाची'ति द्विकर्मकाद्धातोः पूर्ववल्लट् ॥

भाषाऽर्थः—नागरिक आंखोंमें आंसू भरते हुए रावणको नमस्कार करने लगे और रोने भी लगे । तब रामचन्द्रजीने आकुल विभीषणको निम्नस्थ वचन कहा ॥

दातुः स्थातुर्द्विषां मूर्ध्नि यष्टुस्तर्पयितुः पितॄन् ।
युद्धाऽभग्नाऽविपन्नस्य किं दशाऽऽस्यस्य शोचसि ॥ ४० ॥

अन्वयः—(हे विभीषण !) दातुः, द्विषां मूर्ध्नि स्थातुः, यष्टुः, पितॄन् तर्पयितुः युद्धाऽभग्नाऽविपन्नस्य किं शोचसि ?

व्याख्या—(हे विभीषण !) दातुः = दानशीलस्य, द्विषां = शत्रूणाम्, इन्द्रादीनामिति भावः । मूर्ध्नि = शिरसि, स्थातुः = स्थितिशीलस्य, यष्टुः = यज्ञशीलस्य, अथवा पूजकस्य, शिवस्येति भावः । पितॄन् = अग्निष्वात्तादीन्, तर्पयितुः = तर्पणशीलस्य, युद्धाऽभग्नाऽविपन्नस्य = युद्धे संग्रामे अभग्नाऽविपन्नस्य—अभग्नस्य = अपलायितस्य, अतएव अविपन्नस्य = अप्राप्तविपत्तेः, धर्मयुद्धे—अभिमुखहतत्वादिति भावः । 'युध्यभग्नविपन्नस्य' मल्लिनाथसम्मतः पाठस्तत्र युधीति व्यस्तं पदं, तस्य संग्राम इत्यर्थः । अभग्नविपन्नस्य = अभिमुखहतस्येति भावः । एतादृशस्य दशाऽऽस्यस्य = रावणस्य, किं = किमर्थं, शोचसि = शोकं करोषि, इत्थं नाम रावणस्य विषये शोच्यत्वमेव नाऽस्ति प्रत्युत सन्तोष्टव्यं वर्तत इति भावः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—दातुः = ददातीति तच्छीलो दाता, तस्य 'तृन्' इति तृन्प्रत्ययः, एवं परत्राऽपि। स्थातुः=तिष्ठतीति तच्छीलः स्थाता, तस्य पूर्ववत्तृन्। यष्टुः=यजत इति यष्टा, तस्य। पितॄन् = 'तर्पयितुः' इति कृदन्तपदेन योगे 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठ्यां प्राप्तायां तस्याः 'न लोकाऽव्ययनिष्ठाखलर्थतृनाम्' इति प्रतिषेधः। तर्पयितुः = तर्पयतीति तर्पयिता, तस्य 'तृप तृप्तौ' इति चौरादिकाद्धातोस्तृन्। युद्धाऽभग्नाऽविपन्नस्य = अभग्नश्चाऽसौ अविपन्नः अभग्नाविपन्नः, कर्मधारयसमासः। युद्धे अभग्नाऽविपन्नस्य। शोचसि='शुच शोके' इति धातोर्वर्तमाने लट्॥

भाषाऽर्थः—'हे विभीषण! दानशील, शत्रुओंके शिरमें रहनेवाले, यज्ञ करनेवाले, पितरोंको तर्पण करनेवाले और युद्धमें न भागकर प्राण परित्याग करनेवाले रावण के विषयमें क्यों शोक कर रहे हो?॥ ४०॥

बोभवीति न सम्मोहो व्यसने स्म भवादृशाम्।
किं न पश्यसि सर्वोऽयं जनस्त्वामवलम्बते॥ ४१॥

अन्वयः—भवादृशां व्यसने सम्मोहो न बोभवीति स्म। अयं सर्वो जनः त्वाम् अवलम्बते, किं न पश्यसि?

व्याख्या—भवादृशां = भवत्सदृशानां महात्मनामिति भावः। व्यसने = विपदि, सम्मोहः = अज्ञानं, न बोभवीति स्म = अत्यर्थं नाऽभवत्। अयं = निकटस्थः, सर्वः = समस्तः, जनः = लोकः, लङ्काऽऽलय इति भावः। त्वां = भवन्तम्, अवलम्बते = आश्रयते, किं न पश्यसि = किं न विलोकयसि, अतः परं लङ्कालया लोकास्त्वयैव पालनीया इति भावः॥

व्युत्पत्तिः—भवादृशां = भवन्त इव इमे पश्यन्ति = (ज्ञानविषया भवन्ति) इति भवादृशस्तेषां, 'त्यदादिषु दृशोऽनालोचने कञ्च' इति क्विन्, 'आ सर्वनाम्नः' इति सर्वनाम्न आकारोऽन्तादेशः। व्यसने = 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे।' इत्यमरः। बोभवीति = 'भू सत्तायाम्' इति धातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति यङि 'यङोऽचि च'ति तस्य लुक्, 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः, 'यङो वा' इतीट्, गुणावादेशौ च, इडभावपक्षे—'बोभोति' इति रूपम्, अवलम्बते = अवपूर्वकात् 'लबि अवस्रंसने' इति धातोर्लट्॥

भाषाऽर्थः—हे विभीषणजी! तुम्हारे ऐसे लोगोंको विपत्तिमें अज्ञान ज्यादा नहीं होता था। लङ्कामें रहनेवाले ये सब लोग तुम्हारा आश्रय ले रहे हैं, क्या नहीं देख रहे हो?॥ ४१॥

त्वमर्हसि भ्रातुरनन्तराणि कर्तुं जनस्याऽस्य च शोकभङ्गम्।
धुर्ये विपन्ने त्वयि राज्यभारो मज्जत्यनूढः क्षणदाचरेन्द्र!॥ ४२॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे क्षणदाचरेन्द्र ! त्वं भ्रातुः अनन्तराणि अस्य जनस्य शोकभङ्गं च कर्तुम् अर्हसि, धुर्ये त्वयि विपन्ने राज्यभारः अनूढः (सन्) मज्जति ॥

हे क्षणदाचरेन्द्र = हे राक्षसेश्वर !, त्वं = विभीषणः, भ्रातुः = रावणस्य, अनन्तराणि = अग्निसंस्कारादीनि कर्माणि, अस्य = रावणस्य, जनस्य = पौरकलत्रादिरूपस्य लोकस्य, शोकभङ्गं च = दुःखशान्तिं च कर्तुं = विधातुम्, अर्हसि = युज्यसे, अन्यथा—धुर्ये = कुलधुरन्धरे, त्वयि = भवति, विपन्ने = विनष्टे, सति, भ्रातृशोकभारादिति भावः । 'विषण्णे' इति मल्लिनाथसम्मतः पाठस्तस्य खिन्ने इत्यर्थः । राज्यभारः = राष्ट्रभरः, अनूढः = अधृतः सन्, मज्जति = नश्यतीत्यर्थः, तस्माद्धैर्यधारणपूर्वकं लङ्काराज्यं स्वीकुर्विति भावः ॥

व्युत्पत्तिः—क्षणदाचरेन्द्र = क्षणं ददातीति क्षणदा, 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । 'निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा ।' इत्यमरः । क्षणदायां चरन्तीति क्षणदाचराः, 'चरेष्टः' इति टप्रत्ययः । क्षणदाचराणामिन्द्रस्तत्सम्बुद्धौ । धुर्ये = धुरं वहतीति धुर्यस्तस्मिन्, 'धुरो यड्ढकौ' इति यत्प्रत्ययः । राज्यभारः = राज्ञो भावः कर्म वा राज्यं, 'राजाऽह्ने' इति यक् प्रत्ययः । राज्यस्य भारः, मज्जति = 'टुमस्जो शुद्धौ' इति धातोर्लट् । धातोरनेकार्थत्वादत्राऽस्य नाशरूपोऽर्थो बोध्यः । इन्द्रवज्रावृत्तम् ॥

भाषाऽर्थः—हे राक्षसेन्द्र ! तुम अपने भाई रावणके अग्निसंस्कार आदि कर्म और रावणके पौर और कलत्र आदियोंके शोकभङ्ग भी करनेके लिए योग्य हो । राज्यके धुरन्धर तुम्हारे शोकसे नष्ट होनेपर राज्यभार धारण नहीं किये जानेसे नष्ट हो जायगा ॥ ४२ ॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये चतुर्थे तिङन्तकाण्डे लक्षणरूपे पञ्चमः परिच्छेदः (वर्गः) तथा लक्ष्यरूपे कथानके विभीषणप्रलापो नाम अष्टादशः सर्गः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ एकोनविंशः सर्गः

अथ लिङ्विलासमाह। सर्वत्र 'विधिनिमन्त्रणाऽऽमन्त्रणाऽधीष्टसंप्रश्नप्रार्थनेषु लिङ्' इति लिङ्। विशेषश्च तत्र तत्र वक्ष्यते।

अपमन्युस्ततो वाक्यं पौलस्त्यो राममुक्तवान्।
अशोच्योऽपि व्रजन्नस्तं सनाभिर्दुनुयान्न किम् ॥ १ ॥

अन्वयः—ततः पौलस्त्यः अपमन्युः (सन्) रामं वाक्यम् उक्तवान्-"अशोच्योऽपि सनाभिः अस्तं व्रजन् किं न दुनुयात्?"

व्याख्या—ततः=रामवाक्याऽनन्तरं, पौलस्त्यः=विभीषणः, अपमन्युः=अपगतशोकः सन्, रामं=रामचन्द्रं, वाक्यं=पदसमूहं, वक्ष्यमाणप्रकारकमिति भावः। उक्तवान्=अब्रवीत्; अशोच्योऽपि=शोकाऽनर्होऽपि, भवदुक्तरीत्येति शेषः। सनाभिः=सपिण्डः, बन्धुरिति भावः। अस्तं=नाशं, व्रजन्=गच्छन् सन्, किं न दुनुयात्=किं न उपतापयेत्, वियोगेन विवेकिनमपि अवश्यमुपतापयेदेवेति भावः। 'किम्' इत्यत्र 'कम्' इति मल्लिनाथसम्मतः पाठस्तस्य जनमिति शेषोऽर्थः॥

व्युत्पत्तिः—अपमन्युः=अपगतो मन्युर्यस्य सः—अपगतमन्युः, पक्षे—अपमन्युः 'प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः' इति समास उत्तरपदलोपश्च। 'उपमन्यु'रिति मल्लिनाथसम्मतः पाठस्तस्य उपगतशोक इत्यर्थः। समासप्रक्रिया पूर्ववद् बोध्या। सनाभिः=समानो नाभिः (मूलपुरुषः) यस्य सः 'ज्योतिर्जनपद-रात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु' इति समानस्य सभावः, 'सपिण्डास्तु सनाभयः' इत्यमरः। व्रजन्=व्रजतीति 'व्रज गतौ' इति धातोर्लटः शत्रादेशः। दुनुयात्='टुदु उपतापे' इति धातोः सम्भावनायां लिङ् 'स्वादिभ्यः श्नुः' इति श्नु प्रत्ययः 'यासुट् परस्मैपदेषूदात्तो ङिच्चे'ति यासुडागमः॥

भावार्थः—तब विभीषणने शोकरहित होकर रामचन्द्रजीको ऐसा वाक्य कहा-'अशोच्य होते हुए भी बन्धु नष्ट होनेपर क्या पीडित नहीं करते?' ॥ १ ॥

तं नो देवा विधेयासुर्येन रावणवद्वयम्।
सपत्नांश्चाऽधिजीयास्म संग्रामे च मृषीमहि ॥ २ ॥

अन्वयः—देवा नः तं विधेयासुः, येन वयं रावणवत् सपत्नान् अधिजीयास्म, संग्रामे च मृषीमहि॥

व्याख्या—अथ किञ्चिद्दैर्यमवलम्ब्याऽऽह—तं न इति। देवाः=सुराः, हरिहरादय इति भावः। नः=अस्माकं, तम्=उपायं मल्लिनाथस्तु 'तद्' इति पाठ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आह तस्य भाग्यमिति भावः । विधेयासुः=क्रियासुः । येन=उपायेन, वयं, रावणवत्=दशाऽऽननवत्, सपत्नान्=शत्रून्, अधिजीयास्म=अधिजितान् क्रियास्म यद्वा अभिभूयास्म । मल्लिनाथमते तु 'अधिजीव्यास्मे'ति पाठस्तस्य अतिशय्य जीव्यास्मेत्यर्थः । संग्रामे च=युद्धे च मृषीमहि=प्राणांस्त्यज्यास्म ॥

व्युत्पत्तिः—विधेयासुः=विपूर्वात् 'डुधाञ् धारणपोषणयोः' इति जौहोत्यादिकाद्धातोः 'आशिषि लिङ्लोटौ' इत्याशिषि लिङ् । यासुडागमे, 'घुमास्थागापाजहातिसां हलि' इत्यनुवृत्तौ 'एर्लिङि' इत्याकारादेशः । रावणवत=रावणेन तुल्यं 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः । अधिजीयास्म=अधिपूर्वकात् 'जि-जये' इति धातोराशीलिङ् 'अकृत्सार्वधातुकयोर्दीर्घ' इति दीर्घत्वम् । अत्रोपसर्गवशादकर्मकधातोः 'उपसर्गेण धात्वर्थो वलादन्यः प्रतीयते ।' इति नयात्सकर्मकता । यद्वा 'जि (ज्रि) अभिभवे' इति धातोराशीर्लिङ । अभिभवो न्यूनीकरणं न्यूनीभवनं च । अत्र आद्योऽर्थः । मृषीमहि='मृङ् प्राणत्यागे' इति धातोराशीलिङ्, 'उश्चे'ति किश्वात् 'क्ङिति चे'ति गुणनिषेधः । आर्धधातुकत्वात् 'लिङः सलोपोऽनन्त्यस्ये'ति न लिङ्सलोपः ॥

भाषाऽर्थः—हरिहर आदि देवता हमारे ऐसे उपायको करदें, जिससे हम रावणके समान होकर शत्रुओं को जीतें और सम्मुख युद्धमें प्राणोंका त्याग करें ॥

क्रियेरंश्च दशाऽऽस्येन यथाऽन्येनाऽपि नः कुले ।
देवद्र्यञ्चो नराऽहारा न्यञ्चश्च द्विषतां गणाः ॥ ३ ॥

अन्वयः—दशाऽऽस्येन यथा नः कुले अन्येन अपि नराहारा देवद्र्यञ्चो द्विषतां गणा न्यञ्चश्च क्रियेरन् ॥

व्याख्या—दशाऽऽस्येन यथा=रावणेन इव, नः=अस्माकं, कुले=वंशे, अन्येन अपि=अपरेण अपि, मादृशेनेति भावः । नराऽऽहाराः=राक्षसाः, देवद्र्यञ्चः=देवसङ्घर्षिणः, द्विषतां=शत्रूणां, गणाः=समूहाः, न्यञ्चश्च=नीचाश्च, क्रियेरन्=कृता भूयासुः ॥

व्युत्पत्तिः—देवद्र्यञ्चः=देवान् अञ्चन्तीति, देवोपपदपूर्वकात् 'अञ्चु गतिपूजनयोः' इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां चे'ति क्विन्प्रत्ययः 'कृदतिङ्' इति तस्य कृत्संज्ञा, 'विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये' इति टेरद्र्यादेशः । न्यञ्चः=पूर्ववत्क्विन्प्रत्ययः 'न्यङ्नीचखर्वह्रस्वाः स्युः' इत्यमरः । क्रियेरन्=डुकृञ् करणे' इति धातोराशिषि कर्मणि लिङ् ॥

भाषाऽर्थः—हमारे कुलमें रावणके समान दूसरा (मेरा-ऐसा) भी राक्षसोंको देवताओंके साथ सङ्घर्ष करनेवाले और शत्रुओंको नीच बना दे ॥ ३ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स एव धारयेत् प्राणानीदृशे बन्धुविप्लवे ।
भवेदाश्वासको यस्य सुहृच्छक्तो भवादृशः ॥ ४ ॥

अन्वयः—ईदृशे बन्धुविप्लवे स एव प्राणान् धारयेत्, यस्य शक्तो भवादृशः सुहृत् आश्वासको भवेत् ॥

व्याख्या—ईदृशे = एतादृशे, बन्धुविप्लवे = बान्धवनाशे, स एव प्राणान् = असून्, धारयेत् = बिभृयात्, यस्य = बन्धुविमुक्तस्य, शक्तः = समर्थः, शोकनिवारण इति शेषः । भवादृशः = भवत्सदृशः, सुहृत् = मित्रम्, आश्वासकः = आश्वासयिता, सान्त्वयितेति भावः । भवेत् = संभवेत ॥

व्युत्पत्तिः—भवादृशः = भवानिवाऽयं पश्यति, 'त्यदादिषु दृशोऽनालोचने कञ्च' इति कञ्प्रत्ययः, 'आ सर्वनाम्नः' इति दीर्घत्वम् । सुहृत् = शोभनं हृदयं यस्य सः, 'सुहृद्दुर्हृदौ मित्राऽमित्रयोः' इति हृदयस्य हृद्भावो निपात्यते । धारयेत्, उभयत्राऽपि सम्भावनायां लिङ् ॥

भाषाऽर्थः—ऐसे बान्धवनाशके अवसरमें वही प्राणोंको धारण करेगा जिसके आपके ऐसे शोक हटानेमें समर्थ सुहृत् सान्त्वना देनेवाले होंगे ॥ ४ ॥

म्रियेयोर्ध्वं मुहूर्ताद्धि न स्यास्त्वं यदि मे गतिः ।
आशंसा न हि नः प्रेते जीवेम दशमूर्धनि ॥ ५ ॥

अन्वयः—त्वं मे गतिः न स्याः यदि, मुहूर्तात् ऊर्ध्वं म्रियेय । दशमूर्धनि प्रेते जीवेम (इति) न आशंसा न हि ॥

व्याख्या—त्वं = रामः, मे = मम, हतबन्धोः । गतिः = शरणं, न स्याः यदि = नो भवेश्चेत, मुहूर्तात् = रावणमरणमुहूर्तात्, ऊर्ध्वम् = अनन्तरं, म्रियेय = प्राणांस्त्यजेयम्, अहमिति शेषः । यतः—दशमूर्धनि = रावणे, प्रेते = मृते, जीवेम— प्राणान्धारयाम, (इति = एवम्) नः = अस्माकम्, आशंसा = आकाङ्क्षा, न हि = नो वर्तते हि ॥

व्युत्पत्तिः—म्रियेय = 'मृङ् प्राणत्यागे' इति धातोः प्राप्तकाले गम्यमाने लिङ् चोर्ध्वमौहूर्तिके' इति लिङ् । दशमूर्धनि = दश मूर्धानो यस्य स दशमूर्धा, तस्मिन् । जीवेम = 'जीव प्राणधारणे' इति धातोराशंसापद उपपदे 'आशंसावचने लिङ्' इति लिङ् ॥

भाषाऽर्थः—हे राम ! आप मेरे शरण नहीं होते तो मैं रावण-मरणके मुहूर्तके अनन्तर ही मर जाता । रावणके मरनेपर जीयेंगे ऐसी हमारी आकाङ्क्षा नहीं थी ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकुर्याम वयं देशे गर्ह्यां तत्र कथं रतिम् ।
यत्र विंशतिहस्तस्य न सोदर्यस्य सम्भवः ॥ ६ ॥

अन्वयः—यत्र देशे सोदर्यस्य विंशतिहस्तस्य सम्भवो न तत्र वयं गर्ह्यां रतिं कथं प्रकुर्याम ?

व्याख्या—यत्र = यस्मिन्, देशे = स्थाने, सोदर्यस्य = सहोदरस्य, विंशतिहस्तस्य = रावणस्य, सम्भवः = सत्ता, न = नाऽस्ति, तत्र = तस्मिन् देशे, वयं, गर्ह्यां = निन्द्यां, रतिं = प्रीतिं, कथं = केन प्रकारेण, प्रकुर्याम = विदधीमहि, न कुर्म इति भावः ॥

व्युत्पत्तिः—यत्र = यस्मिन्निति, 'सप्तम्यास्त्रल्' इति त्रल् । सोदर्यस्य = समानमुदरं सोदरं, यप्रत्यये विवक्षिते 'विभाषोदरे' इति समानस्य सभावस्ततः समान 'उदरे शयितः (स्थितः) सोदर्यस्तस्य, 'सोदराद्यः' इति यप्रत्ययः, 'समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ।' इत्यमरः । विंशतिहस्तस्य = विंशतिर्हस्ता यस्य तस्य । वयम् = 'अस्मदो द्वयोश्चे'ति अस्मदो बहुवचनम् । प्रकुर्याम = प्रपूर्वात् कृधातोः 'विभाषा कथमि लिङ् चे'ति कथंशब्द उपपदे गर्हायां लिङ् ॥

भाषाऽर्थः—जिस देशमें सहोदर भाई रावणकी सत्ता नहीं है उस देशमें हम गर्हणीय प्रीति कैसे करेंगे ? ॥ ६ ॥

आमन्त्रयेत तान् प्रह्वान् मन्त्रिणोऽथ विभीषणः ।
गच्छेत त्वरितं लङ्कां राजवेश्म विशेत च ॥ ७ ॥

अन्वयः—अथ विभीषणः प्रह्वान् तान् मन्त्रिणः आमन्त्रयेत—'त्वरितं लङ्कां गच्छेत राजवेश्म विशेत च ॥

व्याख्या—अथ = अनन्तरं, विभीषणः = रावणाऽनुजः, प्रह्वान् = प्रणतान्, तान् = स्वाऽनुचरान्, मन्त्रिणः = सचिवान्, आमन्त्रयेत = नियुक्तवानिति भावः, अत्र भूताऽर्थो लक्षणीयः । आमन्त्रणस्वरूपमाह—गच्छेतेति । त्वरितं = शीघ्रं, लङ्कां = तदाख्यां पुरीं, गच्छेत = यात, यूयमिति शेषः । एवं च—राजवेश्म = सौधं, विशेत च = प्रविशत च ॥

व्युत्पत्तिः—मन्त्रिणः = मन्त्रयन्त इति मन्त्रिणस्तान्, 'मन्त्रि गुप्तपरिभाषणे' इति धातोः 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति ग्रहादित्वाण्णिनिः । आमन्त्रयेत = निमन्त्रणे (नियोगकरणे) लिङ् । गच्छेत गम्लृधातोर्लिङि 'तस्थस्थमिपां तान्तन्तामः' इति थस्य तादेशः । यासुटि सलोपः 'अतो येय' इतीयादेशे गुणवलोपौ, पूर्ववत्सुडभावोऽपि । विशेत = 'विश प्रवेशने' इति धातोर्लिङ् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—तब विभीषणजीने अपने अनुचर मन्त्रियोंको आज्ञा दी-'तुमलोग शीघ्र लङ्कामें जाओ और राजभवनमें प्रवेश करो ॥ ७ ॥

आददीध्वं महाऽर्हाणि तत्र वासांसि सत्वराः ।
उद्धुनीयात सत्केतून् निर्हरेताऽग्र्यचन्दनम् ॥ ८ ॥

अन्वयः—(हे मन्त्रिणः !) तत्र सत्वराः (सन्तः) महाऽर्हाणि वासांसि आददीध्वं, सत्केतून् उद्धुनीयात अग्र्यचन्दनं निर्हरेत ॥

व्याख्या—(हे मन्त्रिणः !) तत्र = राजभवने, सत्वराः = त्वरासहिताः, यूयमिति शेषः । महार्हाणि = बहुमूल्यानि, वासांसि = वस्त्राणि, आददीध्वं गृह्णीत, सत्केतून् = महाध्वजान्, उद्धुनीयात = उच्छ्राययत, अग्र्यचन्दनं = श्रेष्ठचन्दनं, निर्हरेत = आहरेतेत्यर्थः ॥

व्युत्पत्तिः—सत्वराः = त्वरया सहिताः, तुल्ययोगे बहुव्रीहिः । 'संभ्रमस्त्वरा ।' इत्यमरः । महाऽर्हाणि = महान् अर्हो (मूल्यम्) येषां, तानि । आददीध्वम्=आङ्पूर्वात् 'डुदाञ् दाने' इति धातोर्लिङि तङि ध्वमि सीयुट् 'श्नाभ्यस्तयोरातः' इत्याकारलोपः 'लिङः सलोपोऽनन्त्यस्ये'ति सलोपश्च । सत्केतून् = सन्तश्च ते केतवः सत्केतवस्तान्, 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासः । उद्धुनीयात = उत्पूर्वकात् 'धूञ् कम्पन' इति क्र्यादिस्थधातोर्विधौ लिङ् 'प्वादीनां ह्रस्व' इति ह्रस्वत्वम् 'ई हल्यघोः' इतीत्वं च । मल्लिनाथस्तु 'उद्धूनुयाते'ति पाठान्तरं लिखित्वा उत्पूर्वकात् ''धूञ् कम्पन' इति स्वादिस्थधातोर्विधौ लिङ् । तत्र 'यासुटि थस्य तादेशः । क्र्यादिकस्यैव प्वादित्वाच्च ह्रस्वः' इत्याह ।

भाषाऽर्थः—(हे मन्त्रिगण !) राजभवनमें शीघ्रता करते हुए तुमलोग बहुमूल्य वस्त्रोंको ले लो, ऊँचे ध्वजोंको फहराओ और उत्तम चन्दनको ले आओ ॥ ८ ॥

मुञ्चेताऽऽकाशधूपांश्च ग्रथ्नीयात स्रजः शुभाः ।
आनयेताऽमितं दारु कर्पूराऽगुरुकुङ्कुमम् ॥ ९ ॥

अन्वयः—(हे मन्त्रिणः ! यूयम्) आकाशधूपान् मुञ्चेत, शुभाः स्रजो ग्रथ्नीयात; अमितं दारु कर्पूराऽगुरुकुङ्कुमं (च) आनयेत ॥

व्याख्या—(हे मन्त्रिणः ! यूयम्) आकाशधूपान् = नभोव्यापिनो धूपान्, मुञ्चेत = मुञ्चत, प्रसारयतेत्यर्थः । शुभाः=कल्याणरूपाः, स्रजः = पुष्पमालाः, ग्रथ्नीयात = गुम्फत, अमितम् = अपरिमितं, दारु = काष्ठं, कर्पूराऽगुरुकुङ्कुमं च = घनसाराऽगुरुकेसरं च, आनयेत = आहरत ॥

व्युत्पत्तिः—आकाशधूपान् = आकाशव्यापिनो धूपा आकाशधूपास्तान् 'शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्' इति मध्यमपदलोपी समासः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्रजः = सृज्यन्त इति, 'सृज विसर्गे' इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां चे'ति क्विन् , सर्वाऽपहारी लोपः; ऋकारात्परोऽमागमः, मकार इत् ऋकारस्य यण्रेफः। 'माल्यं मालास्रजौ मूर्ध्नि' इत्यमरः। ग्रथ्नीयात् = '(श्रन्थ) ग्रन्थ सन्दर्भे' इति क्र्यादिस्थधातोर्विधौ लिङ् 'ई हल्यघोः' इतीकारः ॥

भावाऽर्थः—हे मन्त्रिगण ! तुमलोग आकाशमें फैलनेवाले धूपोंको फैलाओ, शुभ पुष्पमालाओंका गुम्फन करो, अपरिमित काष्ठ और कपूर, अगुरु और केशरको ले आओ ॥ ९ ॥

उह्येरन् यज्ञपात्राणि ह्रियेत च विभावसुः ।
भ्रियेत चाऽऽज्यमृत्विग्भिः कल्प्येत च समित्कुशम् ॥ १० ॥

अन्वयः—(हे मन्त्रिणः !) यज्ञपात्राणि उह्येरन् , विभावसुः ह्रियेत; ऋत्विग्भिः आज्यं भ्रियेत समित्कुशं च कल्प्येत ॥

व्याख्या—(हे मन्त्रिणः !) यज्ञपात्राणि = अध्वरभाजनानि, जुह्वादीनीति भावः। उह्येरन् = उह्यन्तां, नीयन्तामित्यर्थः। युष्माभिरिति शेषः। विभावसुः = अग्निः, दक्षिणाऽग्न्यादिरिति भावः। ह्रियेत=ह्रियतां, नीयतामिति भावः। 'ह्रियेरन्नग्रतोऽग्नयः' इति मल्लिनाथसम्मतं पाठान्तरम्। ऋत्विग्भिः=यज्ञकृद्भिः, अध्वर्य्वादिभिरिति भावः। आज्यं = घृतादिकं हविः, भ्रियेत = संभ्रियतामित्यर्थः। समित्कुशं च = काष्ठदर्भं च, कल्प्येत = कल्प्यतां, संपाद्यतामिति भावः ॥

व्युत्पत्तिः—उह्येरन् = 'वह प्रापणे' इति धातोः विधौ कर्मणि लिङ्, यजादित्वात् 'वचिस्वपियजादीनां किति' इति सम्प्रसारणम्। ह्रियेत = पूर्ववत्कर्मणि लिङ्, एवं परत्राऽपि। ऋत्विग्भिः = 'आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते।' इत्यमरः। भ्रियेत = 'भृञ् भरणे' इति धातोः पूर्ववल्लिङ्। समित्कुशं = समिधश्च कुशाश्चेति समाहारद्वन्द्वः ॥

भावाऽर्थः—हे मन्त्रिगण ! तुमलोग यज्ञपात्रोंको और दक्षिणाग्नि आदि अग्निको ले जाओ। अध्वर्यु आदि यज्ञ करनेवाले घृत आदि हवि इकट्ठा करें और समिधा और कुशोंका सम्पादन करें ॥ १० ॥

स्नानीयैः स्नापयेताऽऽशु रम्यैर्लिम्पेत वर्णकैः ।
अलङ्कुर्यात रत्नैश्च रावणाऽर्हैर्दशाऽऽननम् ॥ ११ ॥

अन्वयः—(हे मन्त्रिणः यूयम्) दशाननं स्नानीयैः आशु स्नापयेत, रम्यैः वर्णकैः लिम्पेत; रावणाऽर्हैः रत्नैश्च अलङ्कुर्यात ॥

व्याख्या—(हे मन्त्रिणः ! यूयम्) दशाऽऽननं = रावणं. स्नानीयैः = स्नानसाधनैः, आशु = शीघ्रं, स्नापयेत = स्नापयत। रम्यैः=सुन्दरैः, वर्णकैः = विलेपन-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गन्धैः, चन्दनकुङ्कुमादिभिरिति भावः। लिम्पेत=लिम्पत। रावणाऽर्हैः=रावणयोग्यैः, रत्नैश्च=रत्नाभरणैश्च, अलङ्कुर्यात=अलङ्कुरुत ॥

व्युत्पत्तिः—स्नानीयः=स्नान्ति एभिरिति स्नानीयानि, तैः 'कृत्यल्युटो बहुलम्' इति बाहुलकात् करणे अनीयर्। स्नापयेत='ष्णा शौच' इति ण्यन्ताद्धातोर्विधौ लिङ् थस्य तादेशः। 'ग्लास्नावनुवमां चे'ति पक्षे मित्त्वाऽलाभान्न ह्रस्वः। लिम्पेत='लिप उपदेहे' इति धातोर्विधौ लिङ् 'शे मुचादीनाम्' इति नुम् ॥

भावाऽर्थः—हे मन्त्रिगण! तुमलोग रावणको स्नानके साधनोंसे शीघ्र स्नान कराओ, सुन्दर चन्दन-कुङ्कुम आदि विलेपनद्रव्योंसे लिप्त करो और रावणके योग्य रत्नोंसे अलङ्कृत करो ॥ ११ ॥

वासयेत सुवासोभ्यां मेध्याभ्यां राक्षसाऽधिपम्।
ऋत्विक् स्रग्विणमादध्यात् प्राङ्मूर्धानं मृगाऽजिने ॥ १२ ॥

अन्वयः—(हे मन्त्रिणः! यूयम्) राक्षसाऽधिपं मेध्याभ्यां सुवासोभ्यां वासयेत। ऋत्विक् स्रग्विणं प्राङ्मूर्धानं (तम्) मृगाऽजिने आदध्यात् ॥

व्याख्या—(हे मन्त्रिणः! यूयम्) राक्षसाऽधिपं=यातुधानपतिं, रावणमित्यर्थः, मेध्याभ्यां=पवित्राभ्यां, सुवासोभ्यां=बहुमूल्यवस्त्राभ्यां, वासयेत=परिधापयत। ऋत्विक्=अध्वर्युः, स्रग्विणं=मालाधारिणं, प्राङ्मूर्धानं=पूर्वशिरसं, राक्षसाऽधिपमिति शेषः। मृगाऽजिने=कृष्णसारमृगचर्मणि, आदध्यात्=स्थापयेत्।

व्युत्पत्तिः—सुवासोभ्यां=शोभने वाससी सुवाससी, ताभ्याम्। वासयेत='वस आच्छादने' इति ण्यन्ताद्धातोर्लिङि थस्य ताऽऽदेशः। स्रग्विणं=प्रशस्ता स्रगस्ति यस्य स स्रग्वी, तम् 'अस्मायामेधास्रजो विनिः' इति मत्वर्थीयो विनिः। प्राङ्मूर्धानं=प्राचि मूर्धा यस्य स प्राङ्मूर्धा, तम्।

भावाऽर्थः—हे मन्त्रिगण! तुमलोग राक्षसराज (रावण) को पवित्र (उत्तरीय और अधरीय) दो वस्त्रोंसे आच्छादित करो। ऋत्विक् उनको माला पहनाकर और पूर्वाऽभिमुख कर कृष्णसार मृगके चर्ममें रक्खें ॥ १२ ॥

यज्ञपात्राणि गात्रेषु चिनुयाच्च यथाविधि।
जुहुयाच्च हविर्वह्नौ गायेयः साम सामगाः ॥ १३ ॥

अन्वय—(हे मन्त्रिणः! ऋत्विक्) यज्ञपात्राणि गात्रेषु यथाविधि चिनुयात्, वह्नौ हविश्च जुहुयात सामगाः साम गायेयुः ॥

व्याख्या—(हे मन्त्रिणः!) यज्ञपात्राणि=अध्वरभाजनानि, स्रुवादीनीति भावः। गात्रेषु=अङ्गेषु, नासिकादिष्विति भावः। यथाविधि=विधिपूर्वकं, चिनुयात्=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपद्रव्यात्, ऋत्विगिति शेषः । वह्नौ = अग्नौ, हविश्च = आज्यादिकं च, जुहुयात् = हुतं कुर्यात्, सामगाः = उद्गातारः, साम = सामवेदमन्त्रं, गायेयुः = गानं कुर्युः ॥

व्युत्पत्तिः—चिनुयात् = 'चिञ् चयने' इति स्वादिस्थधातोर्विधौ लिङ् । जुहुयात् = 'हु दानाऽदनयोः' इति धातोर्विधौ लिङ् । सामगाः = साम गायन्तीति 'आतोऽनुपसर्गे कः' इति कः । गायेयुः = '(कै) गै शब्दे' इति धातोर्विधौ लिङ् ॥

भाषाऽर्थः—हे मन्त्रिगण ! ऋत्विक् यज्ञपात्रोंको नासिका आदि अङ्गोंमें विधिपूर्वक रक्खें, अग्निमें आज्य आदि हविका हवन करें । सामवेदी साममन्त्रका गान करें ॥ १३ ॥

गत्वाऽथ ते पुरीं लङ्कां कृत्वा सर्वं यथोदितम् ।
समीपेऽन्त्याऽऽहुतेः साऽस्राः प्रोक्तवन्तो विभीषणम् ॥ १४ ॥

अन्वयः—अथ ते लङ्कां पुरीं गत्वा यथोदितं सर्वं कृत्वा अन्त्याऽऽहुतेः समीपे साऽस्राः (सन्तः) विभीषणं प्रोक्तवन्तः ॥

व्याख्या—अथ = अनन्तरं, ते = विभीषणमन्त्रिणः, लङ्कां = तदाख्यां, पुरीं = नगरीं, गत्वा = यात्वा, यथोदितं = यथाज्ञप्तं, सर्वं = सकलं, कर्मेति शेषः । कृत्वा = विधाय, अन्त्याऽऽहुतेः = प्रेताऽऽहुतेः, समीपे = निकटकाले, साऽस्राः = साऽश्रुनयनाः सन्तः, विभीषण = स्वप्रभुं, प्रोक्तवन्तः = अब्रुवन्, वक्ष्यमाणप्रकारं वचनमिति भावः ॥

व्युत्पत्तिः—साऽस्राः = अस्रैः सहिताः, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः 'वोपसर्जनस्ये'ति सहस्य सभावः ॥

भाषाऽर्थः—तब वे विभीषणके मन्त्री लङ्कापुरीमें जाकर आज्ञाके अनुसार सब कर्म कर प्रेतके दाहकालके समीपमें आँखोंमें आँसू भरते हुए विभीषणको कहने लगे ॥ १४ ॥

कृतं सर्वं यथोद्दिष्टं कर्तुं वह्निजलक्रियाम् ।
प्रयतेथा महाराज ! सह सर्वैः स्वबन्धुभिः ॥ १५ ॥

अन्वयः—हे महाराज ! यथोद्दिष्टं सर्वं कृतं, सर्वैः स्वबन्धुभिः सह वह्निजलक्रियां कर्तुं प्रयतेथाः ॥

व्याख्या—हे महाराज = हे भूपाल ! यथोद्दिष्टं = यथाऽऽज्ञप्तं, सर्वं = सकलं, कर्मेति शेषः । कृतं = विहितम्, अस्माभिरिति शेषः सर्वैः = सम्पूर्णैः, स्वबन्धुभिः = आत्मबान्धवैः, सह = समं, वह्निजलक्रियां = दाहसंस्कारं जलदानक्रियां च, कर्तुं = विधातुं, प्रयतेथाः = प्रयत्नं कुरु ॥

व्युत्पत्तिः—महाराज = महांश्चाऽसौ राजा महाराजस्तत्सम्बुद्धौ, 'सन्महत्पर-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मोत्तमोत्कृष्टाः पूज्यमानैः' इति समासः, 'आन्महतः समानाऽधिकरणजातीययोः' इत्यात्वं 'राजाऽहःसखिभ्यष्टच्' इति समासान्तष्टच्। स्वबन्धुभिः=स्वे च ते बन्धवः, स्वस्य बन्धवो वा, तैः। सहपदेन योगे 'सहयुक्तेऽप्रधाने' इति तृतीया। वह्निजलक्रियां=वह्निश्च जलं च वह्निजलं 'जातिरप्राणिनाम्' इति समाहारद्वन्द्वः। वह्निजलस्य क्रिया, ताम्। प्रयतेथाः=प्रपूर्वकात् 'यती प्रयत्ने' इति धातोः प्रार्थनायां लिङ्॥

भाषाऽर्थः—हे महाराज ! आपकी आज्ञाके अनुसार सब कार्य किया गया। आप अपने सब बन्धुओंके साथ दाहसंस्कार और जलदान करनेके लिए प्रयत्न करें।

अज्ञवन्नोत्सहेथाः किं धेया धीरत्वमच्युतम्।
स्थेयाः कार्येषु बन्धूनां हेयाः शोकोद्भवं तमः॥ १६॥

अन्वयः—(हे महाराज !) अज्ञवत् किं न उत्सहेथाः ? अच्युतं धीरत्वं धेयाः। बन्धूनां कार्येषु स्थेयाः। शोकोद्भवं तमो हेयाः॥

व्याख्या—एवमुक्तेऽपि शोचन्तं विभीषणं मन्त्रिणो बोधयन्ति—अज्ञवदिति। (हे महाराज !) अज्ञवत्=मूढवत्, किं=किमर्थं, न उत्सहेथाः=उत्साहं न कुर्याः, त्वमिति शेषः। गर्हितमेतदिति भावः। अच्युतम्=अक्षतं, धीरत्वं=धैर्यं, धेयाः=धारय। बन्धूनां=बान्धवानां, कार्येषु=प्रयोजनेषु, स्थेयाः=तिष्ठ। शोकोद्भवं=मन्यूत्पन्नं, तमः=मोहं, हेयाः=जहीहि॥

व्युत्पत्तिः—अज्ञवत्=जानातीति ज्ञः, 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः। न ज्ञः अज्ञः, तेन तुल्यं, 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः। उत्सहेथाः=उत्पूर्वकात् 'षह मर्षणे' इति धातोः 'कि वृत्ते लिङ्लृटौ' इति किंशब्दयोगे गर्हायां लिङ्। धेयाः='डुधाञ् धारणपोषणयोः' इति धातोः 'आशिषि लिङ्लोटौ' इत्याशिषि लिङ्, 'एर्लिङि' इत्येत्वम्, एवं परत्राऽपि। शोकोद्भवं=शोकात् उद्भवो यस्य तत्। हेयाः='ओहाक् त्यागे' इति धातोराशिषि लिङ्॥

भाषाऽर्थः—हे महाराज ! आप अनजानके समान होकर क्यों उत्साह नहीं कर रहे हैं ? यह गर्हित है। आप अक्षत धैर्यका धारण करें, बान्धवोंके कार्योंमें स्थित हो और शोकसे उत्पन्न मोहका त्याग करें॥ १६॥

नाऽवकल्प्यमिदं ग्लायेद्यत् कृच्छ्रेषु भवानपि।
न पृथग्जनवज्जातु प्रमुह्येत्पण्डितो जनः॥ १७॥

अन्वयः—यत् भवान् अपि कृच्छ्रेषु ग्लायेत्, इदं न अवकल्प्यम्। पण्डितो जनः पृथग्जनवत् जातु न प्रमुह्येत्॥

व्याख्या—यत् भवान् अपि=विद्वान् अपि, कृच्छ्रेषु=दुःखेषु, ग्लायेत्=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सीदेव, इदं = विषादनं, न अवकल्प्यं = न सम्भाव्यम् । पण्डितो जनः = विद्वज्जनः, इतरजनवत् = साधारणजनवत्, जातु = कदाऽपि, न प्रमुह्येत् = मोहं न गच्छेत् ॥

व्युत्पत्तिः—कृच्छ्रेषु = 'स्यात्कष्टं कृच्छ्रमाभीलम्' इत्यमरः । ग्लायेत् = 'ग्लै (म्लै) हर्षक्षये' इति धातोः 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि' इति अनवक्लृप्तौ (असम्भावनायाम्) लिङ् । पण्डितः = सदसद्विवेकवती बुद्धिः पण्डा, सा सञ्जाताऽस्येति, 'तदस्य सञ्जातं तारकादिभ्य इतच्' इतीतच्प्रत्ययः । प्रमुह्येत् = प्रपूर्वकात् 'मुह वैचित्त्ये' इति धातोर्जातुशब्दयोगात् 'जातुयदोर्लिङ्' इति अनवक्लृप्तावेव लिङ् ॥

भाषाऽर्थः—हे महाराज ! जो आप (ऐसे विद्वान्) भी दुःखों में विषण्ण होंगे, यह बात सम्भावनीय नहीं है । पण्डित साधारण मनुष्यके समान कभी मोह को प्राप्त नहीं होगा ॥ १७ ॥

यच्च यत्र भवांस्तिष्ठेत् तत्राऽन्यो रावणस्य न ।
यच्च यत्र भवान् सीदेन्महद्भिस्तद्विगर्हितम् ॥ १८ ॥

अन्वयः—यत्र यच्च भवान् तिष्ठेत् तत्र रावणस्य अन्यो न (तिष्ठेत्) । (किञ्च) यत्र यच्च भवान् सीदेत् तत् महद्भिः विगर्हितम् ॥

व्याख्या—यत्र = यस्मिन्, देशे काले चेत्यर्थः यच्च, भवान् = विभीषणः, तिष्ठेत् = स्थितिं कुर्यात्, तत्र = तस्मिन्, देशे काले चेत्यर्थः । रावणस्य = दशाऽऽननस्य, अन्यः = अपरः न = नो तिष्ठेत्, त्वयि तिष्ठति रावणस्य मन्त्राऽर्थमन्यो नाऽवकल्पत इत्यर्थः । किञ्च—यत्र = यस्मिन्, देशे काले चेति भावः । यच्च भवान् = विभीषणः, सीदेत् = अवसादं कुर्यात्, तत् = अवसादनं, महद्भिः = पण्डितैः, विगर्हितं = विनिन्दितम् ॥

व्युत्पत्तिः—तिष्ठेत् = 'ष्ठा गतिनिवृत्तौ' इति धातोः 'यच्चयत्रयोः' इति अनवक्लृप्तौ (असम्भावनायाम्) लिङ् । 'पाघ्राध्मे' त्यादिना तिष्ठाऽऽदेशः । सीदेत् = 'षद्लृ विशरणगत्यवसादनेषु' इति धातोः पूर्ववल्लिङ्, पूर्वसूत्रेणैव सीदाऽऽदेशश्च ॥

भाषाऽर्थः—हे महाराज ! जिस देशमें और कालमें भी आप रहते वहां पर रावणका आपसे भिन्न मन्त्र देनेके लिए कोई भी नहीं रहता था । जिस देशमें और कालमें भी आप दुःखित होंगे वह विद्वानोंसे विनिन्दित होगा ॥ १८ ॥

आश्चर्यं यच्च यत्र त्वां प्रब्रूयाम वयं हितम् ।
अपि साक्षात् प्रशिष्यास्त्वं कृच्छ्रेष्विन्द्रपुरोहितम् ॥ १९ ॥

अन्वयः—यत्र यच्च वयं त्वां हितं प्रब्रूयाम (तत्) आश्चर्यम् । त्वं कृच्छ्रेषु साक्षात् इन्द्रपुरोहितम् अपि प्रशिष्याः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—(हे महाराज !) यत्र = यस्मिन्, विषय इत्यर्थः। यत्, वयं = मन्त्रिणः, त्वां = भवन्तं, हितं = पथ्यं, प्रब्रूयाम = उपदिशेम. (तत् = हितोपदेशनम्) आश्चर्यम्=अद्भुतम् । त्वं = विभीषणः, कृच्छ्रेषु = व्यसनेषु, साक्षात् = प्रत्यक्षम्, इन्द्र-पुरोहितम् अपि=बृहस्पतिम् अपि, प्रशिष्याः = उपदिशेः ॥

व्युत्पत्तिः—त्वाम् = 'अकथितं चे'ति कर्मत्वम् । प्रब्रूयाम = प्रपूर्वकात् 'ब्रूञ् व्यक्तायां वाची'ति धातोः 'चित्रीकरणे चे'ति लिङ् । प्रशिष्याः = प्रपूर्वकात् 'शासु अनुशिष्टौ' इति धातोः अपिशब्दस्योपपदत्वात् 'उताऽप्योः समर्थयोर्लिङ्' इति लिङ्, सिपि यासुट्, 'शास इदङ्हलोः' इतीत्वं 'शासिवसिघसीनां चे'ति षत्वं च ॥

भाषाऽर्थः—हे महाराज ! जिस विषयमें जो हमलोग आपको हितका उपदेश करेंगे वह आश्चर्य है। आप विपत्तियों में साक्षात् बृहस्पतिको भी उपदेश करेंगे ॥१९॥

कामो जनस्य जह्यास्त्वं प्रमादं नैर्ऋताऽधिप ! ।
उत द्विषोऽनुशोचेयुर्विप्लवे किमु बान्धवाः ॥ २० ॥

अन्वयः—हे नैर्ऋताऽधिप ! त्वं प्रमादं जह्याः (इति) जनस्य कामः। अस्मिन् विप्लवे द्विष उत अनुशोचेयुः बान्धवाः किम् ?

व्याख्या—हे नैर्ऋताऽधिप = हे राक्षसराज !, त्वं = प्रभुः, प्रमादं = शोकमूलां कार्यस्खलनरूपामनवधानतामित्यर्थः । जह्याः = जहीहीत्यर्थः, (इति = इत्थम्) जनस्य = पौरलोकस्य, कामः = इच्छा, अस्तीति शेषः। अस्मिन् = अत्र, विप्लवे = विनाशे, द्विष उत = शत्रवः अपि, अनुशोचेयुः=अनुशोकं कुर्युः, बान्धवाः = बन्धवः, किमु = किमुत, अनुशोचेयुरेवेति भावः ॥

व्युत्पत्तिः—प्रमादं = 'प्रमादोऽनवधानता' इत्यमरः । जह्याः = 'ओहाक् त्यागे' इति धातोः 'कामप्रवेदनेऽकच्चिति' इति अकच्चिति (कच्चिच्छब्दाप्रयोगे) लिङ् । कामप्रवेदनं नाम अभिप्रायाविष्करणम् । अनुशोचेयुः = अनुपूर्वकात् 'शुच शोके' इति धातोः उतपदेन योग 'उताऽप्योः समर्थयोर्लिङ्' इति लिङ् ॥

भाषाऽर्थः—हे महाराज ! आप शोकमूलक प्रमादको छोड़ें पौर लोगोंकी ऐसी इच्छा है। इस विनाशमें शत्रुलोग भी शोक करेंगे बान्धवोंका क्या कहना ? ॥२०॥

स भवान् भ्रातृवद्रक्षेद्यथावदखिलं जनम् ।
न भवान् संप्रमुह्येच्चेदाश्वस्युश्च निशाचराः ॥ २१ ॥

अन्वयः—भवान् न संप्रमुह्येत् चेत् स भवान् भ्रातृवत् अखिलं जनं यथावत् रक्षेत्, निशाचराश्च आश्वस्युः ॥

व्याख्या—भवान् = विभीषणः, न संप्रमुह्येत् = संप्रमोहं न गच्छेत्, चेत् =

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि, सः = अप्रमूढः, भवान् = विभीषणः, आत्मवत् = रावणवत्, अखिलं = समस्तं, जनं = लोकं, यथावत् = यथाऽर्हं, रक्षेत् = पालयेत्, निशाचराश्च = राक्षसाश्च, आश्वस्युः = आश्वासं गच्छेयुः ॥

व्युत्पत्तिः—संप्रमुह्येत् = संपूर्वकात् 'मुह वैचित्त्ये' इति धातोः 'हेतुहेतुमतोर्लिङ्' इति लिङ्, अप्रमोहस्य जनरक्षणे राक्षसाऽऽश्वासने च हेतुत्वात् यथावत् = 'तदर्हम्' इति वतिप्रत्ययः। निशाचराः = निशायां चरन्तीति, 'चरेष्ट' इति टप्रत्ययः। आश्वस्युः = आङ्पूर्वकात् 'श्वस प्राणने' इति धातोः जनरक्षणे निशाचराऽऽश्वासने च हेतुमति (कार्ये) लिङ्। श्वसधातोरदादित्वाच्छपो लुक्। 'आश्वसेयुः' इति पाठान्तरम् ॥

भाषाऽर्थः—हे महाराज ! आप मोहको प्राप्त नहीं होंगे तो रावणके समान होकर समस्तजनको विधिपूर्वक पालन करेंगे और राक्षसभी आश्वस्त होंगे ॥ २१ ॥

ततः स गतवान् कर्तुं भ्रातुरग्निजलक्रियाम् ।
प्रोक्तवान् कृतकर्तव्यं वचो रामोऽथ राक्षसम् ॥ २२ ॥

अन्वयः—ततः स भ्रातुः अग्निजलक्रियां कर्तुं गतवान्। अथ कृतकर्तव्यं राक्षसं रामो वचः प्रोक्तवान् ॥

व्याख्या—ततः = मन्त्रिवचनाऽनन्तरं, सः = विभीषणः, भ्रातुः = रावणस्य, अग्निजलक्रियाम् = दाहसस्कारमुदकदानं च, कर्तुं = विधातुं, गतवान् = यातः। अथ = अनन्तरं, कृतकर्तव्यं = विहितकृत्यं, राक्षसं = यातुधानं, विभीषणमिति भावः। रामः = रामचन्द्रः, वचः = वचनं, वक्ष्यमाणप्रकारमिति शेषः। प्रोक्तवान् = अब्रवीत् ॥

व्युत्पत्तिः—कृतकर्तव्यं = कृतं कर्तव्यं येन स कृतकर्तव्यस्तम् ॥

भाषाऽर्थः—मन्त्रियोंके वचनके अनन्तर विभीषण भाई रावणका दाहसंस्कार और उदकदान करनेके लिए चले गये। तब पूर्वोक्त कार्यका अनुष्ठान किये हुए विभीषणको रामचन्द्रजीने निम्नस्थ वचन कहा ॥ २२ ॥

अम्भांसि रुक्मकुम्भेन सिञ्चन् मूर्ध्नि समाधिमान् ।
त्वं राजा रक्षसां लङ्कामवेक्षेथा विभीषण ! ॥ २३ ॥

अन्वयः—रुक्मकुम्भेन मूर्ध्नि अम्भांसि सिञ्चन् (रामः प्रोक्तवान्) 'हे विभीषण ! समाधिमान् त्वं रक्षसां राजा (सन्) लङ्काम् अवेक्षेथाः ॥

व्याख्या—रुक्मकुम्भेन = कनककलशेन, मूर्ध्नि = शिरसि, विभीषणस्येति शेषः। अम्भांसि = जलानि, सिञ्चन् = अभिषिञ्चन्, 'रामः प्रोक्तवान्' इति पूर्व-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकस्थाभ्यां पदाभ्यां सम्बन्धः । अतः परमा सर्गसमाप्तेः रामवचनमेवाह—'हे विभीषण = हे रावणाऽनुज !, समाधिमान् = ध्यानवान् , त्वं रक्षसां = राक्षसानां, राजा = भूपालः सन् , लङ्कां = लङ्काख्यां नगरीम् , अवेक्षेथाः = पश्येः, परिपालयेति भावः ॥

व्युत्पत्तिः—सिञ्चन् = सिञ्चतीति, 'षिच क्षरणे' इति धातोर्लटः शत्रादेशः, 'शे मुचादीनाम्' इति नुम् । अवेक्षेथाः = अवपूर्वकात् 'ईक्ष दर्शने' इति धातोर्विधौ लिङ् ॥

भाषाऽर्थः = सुवर्णकलशसे शिरमें जलका सिञ्चन करते हुए रामचन्द्रजीने विभीषणको कहा—'हे विभीषण ! समाधिसे सम्पन्न तुम राक्षसोंके राजा होकर लङ्काका परिपालन करो ॥ २३ ॥

क्रुद्धाननुनयेः सम्यग् धनैर्लुब्धानुपार्जयेः ।
मानिनो मानयेः काले त्रस्तान् पौलस्त्य ! सान्त्वयेः ॥ २४ ॥

अन्वयः—हे पौलस्त्य ! क्रुद्धान् सम्यक् अनुनयेः, लुब्धान् धनैः उपार्जयेः, मानिनः काले मानयेः, त्रस्तान् सान्त्वयेः ॥

व्याख्या—हे पौलस्त्य = हे विभीषण !, क्रुद्धान्=कृतथिरकारणात् कुपितान् , सम्यक् = अकपटेन, अनुनयेः = प्रसादय, लुब्धान् = धनलोलुपान् , धनैः=द्रव्यैः, उपार्जयेः = दानेन वशीकुरु, 'लुब्धमर्थेन गृह्णीयात्' इति नयादिति भावः । मानिनः = अभिमानिनः, काले = सम्मानाऽवसरे, मानयेः = सत्कुरु, एवं त्रस्तान् = भीतान् , सान्त्वयेः = उपलालय ॥

व्युत्पत्तिः—पौलस्त्य=पुलस्त्यस्याऽपत्यं पुमान् पौलस्त्यस्तत्सम्बुद्धौ, 'तस्याऽपत्यम्' इत्यण् 'तद्धितेष्वचामादेः' इत्यादिवृद्धिश्च । अनुनयेः = अनुपूर्वात् 'णीञ् प्रापणे' इति धातोर्विधौ लिङ् । मानिनः = मानोऽस्ति एषां ते मानिनस्तान्, 'अत इनिठनौ' इतीनिः । त्रस्तान् = 'त्रसी उद्वेगे' इति धातोर्निष्ठायां क्तप्रत्ययः ॥

भाषार्थ—हे विभीषण ! तुम क्रुद्धोंको अच्छी रीतिसे मनाओ, लोभियोंको धन-दानसे वशमें करो, अभिमानियोंको सम्मान करनेके अवसरमें सत्कार करो और रावणके वधसे राक्षसोंको सान्त्वना दे दो ॥ २४ ॥

इच्छा मे परमानन्देः कथं त्वं वृत्रशत्रुवत् ।
इच्छेद्धि सुहृदं सर्वो वृद्धिसंस्थं यतः सुहृत् ॥ २५ ॥

अन्वयः—(हे सखे !) त्वं वृत्रशत्रुवत् कथम् आनन्देः (इति) मे परमा इच्छा । यतः सर्वः सुहृत् सुहृदं वृद्धिसंस्थम् इच्छेत् हि ॥

व्याख्या—(हे सखे !) त्वं = विभीषणः, वृत्तशत्रुवत् = इन्द्रवत् , कथं =

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

केन प्रकारेण, आनन्देः = समृद्धो भवेः, (इति एवम्) मे = मम, सुहृद इति भावः । परमा = महती, इच्छा = मनोरथः, अस्तीति शेषः । यतः = यस्मात्कारणात्, सर्वः = सकलः, सुहृत् = सखा, सुहृदं = सखायं, वृद्धिसंस्थं = समृद्धिस्थम्, इच्छेत् = इच्छति, हि = निश्चयेन ॥

व्युत्पत्तिः—वृत्रशत्रुवत् = वृत्रशत्रुणा तुल्यं, 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः । आनन्देः = आङ्पूर्वकात् 'टुनदि समृद्धौ' इति धातोरिच्छार्थोपपदात् 'इच्छाऽर्थेषु लिङ्लोटौ' इति लिङि सिपि रूपम् । सुहृत् = शोभनं हृदयं यस्य सः, 'सुहृद्दुर्हृदौ मित्राऽमित्रयोः' इति हृदयस्य हृद्भावो निपात्यते । वृद्धिसंस्थं = वृद्धौ संस्था यस्य स वृद्धिसंस्थस्तम् । इच्छेत् = 'इषु इच्छायाम्' इति धातोः 'इच्छाऽर्थेभ्यो विभाषा वर्तमाने' इति वर्तमाने लिङ् ॥

भाषाऽर्थः—हे मित्र ! तुम इन्द्रके समान कसे समृद्ध होगे ऐसी मेरी बड़ी इच्छा है । क्योंकि सब मित्र अपने मित्रको समृद्धिमें अवस्थित देखना चाहता है ।'

वर्धिषीष्ठाः स्वजातेषु वध्यास्त्वं रिपुसंहतीः ।
भूयास्त्वं गुणिनां मान्यस्तेषां स्थेया व्यवस्थितौ ॥ २६ ॥

अन्वयः—त्वं स्वजातेषु वर्धिषीष्ठाः, रिपुसंहतीः, वध्याः, त्वं गुणिनां मान्यो भूयाः, तेषां व्यवस्थितौ स्थेयाः ॥

व्याख्या—(हे सखे !) त्वं = विभीषणः, स्वजातेषु = सजातीयेषु, राक्षसेष्विति भावः । वर्धिषीष्ठाः = वर्द्धस्व, रिपुसंहतीः = शत्रुसङ्घान्, वध्याः = जहि, त्वं = विभीषणः, गुणिनां = गुणवतां, श्रुतशीलवतामिति भावः । मान्यः = माननीयः, भूयाः = भवतात्, एवं च तेषां = गुणिनां, व्यवस्थितौ = प्रतिष्ठायां, स्थेयाः = तिष्ठतात् ॥

व्युत्पत्तिः—वर्धिषीष्ठाः = 'वृधु वर्द्धने' इति धातोः 'आशिषि लिङ्लोटौ' इत्याशिषि लिङ् 'लिङः सीयुट्' इति सीयुट 'सुट् तिथोः' इति सुट् । रिपुसंहतीः = रिपूणां संहतयो रिपुसंहतयस्ताः, 'स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकम् ।' इत्यमरः । वध्याः = 'हन हिंसागत्योः' इति धातोः पूर्ववदाशिषि लिङ् 'हनो वध लिङि' इति वधादेशः, यासुडागमः । भूयाः = 'भू सत्तायाम्' इति धातोराशिषि लिङ् 'एर्लिङि' इत्येकारः ॥

भाषाऽर्थः—हे मित्र ! तुम सजातीयों (राक्षसों) मे बढ़ जाओ, शत्रुसमूहोंको मार डालो, तुम गुणियोंके माननीय हो जाओ और उनकी प्रतिष्ठामें स्थित हो जाओ ॥ २६ ॥

धेयास्त्वं सुहृदां प्रीतिं वन्दिषीष्ठा दिवौकसः ।
सोमं पेयाश्च हेयाश्च हिंसा हानिकरीः क्रियाः ॥ २७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—(हे सखे !) त्वं सुहृदां प्रीतिं धेयाः, दिवौकसो वन्दिषीष्ठाः, सोमं पेयाः, हानिकरीः हिंस्राः क्रियाः हेयाः ॥

व्याख्या—(हे सखे !) त्वं = विभीषणः, सुहृदां = मित्राणां, प्रीतिं = प्रणयं धेयाः = धत्तात्, 'देयाः' इति मल्लिनाथसम्मतः पाठस्तस्य दत्तादित्यर्थः, उभयत्राऽपि प्रीतिकरो भवतादिति भावः। दिवौकसः = देवान्, वन्दिषीष्ठाः = वन्दस्व। सोमं = सोमलतारसं, पेयाः = पिबतात्, सोमेन यजस्वेति भावः। हानिकरीः = अपचयहेतुकाः, प्रत्यवायकारणभूता इति भावः। हिंस्राः = हिंसनशीलाः, क्रियाः = कर्माणि, हेयाः = त्यजतात् ॥

व्युत्पत्तिः—धेयाः = 'डुधाञ् धारणपोषणयोः' इति धातोराशिषि लिङ्, 'एर्लिङि' इत्येकारश्च, एवं परत्राऽपि। वन्दिषीष्ठाः = 'वदि अभिवादनस्तुत्योः' इति धातोराशिषि लिङ्, सीयुट् सुडागमौ। पेयाः = 'पा पाने' इति धातोः पूर्ववल्लिङ् प्रक्रिया। हानिकरीः = हानिं कुर्वन्तीति तद्धेतवो हानिकर्यस्ताः, 'कृञो हेतुताच्छील्यानुलोम्येषु' इति हेत्वर्थे टप्रत्ययः, टित्वात् 'टिड्ढाणञ्' इत्यादिना ङीप्। हिंस्राः = 'हिसि हिंसायाम्' इति धातोः 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' इति रप्रत्ययः ॥

भावाऽर्थः—हे मित्र ! तुम मित्रोंकी प्रीति करने वाले हो जाओ, देवताओंको नमस्कार करो; सोमलताके रसका पान करो (सोम याग करो) और हानि करने वाले हिंस्र कर्मोंका परित्याग करो ॥ २७ ॥

अवसेयाश्च कार्याणि धर्मेण पुरवासिनाम्।
अनुरागं क्रिया राजन् ! सदा सर्वगतं जने ॥ २८ ॥

अन्वयः—हे राजन् ! पुरवासिनां कार्याणि धर्मेण अवसेयाः, जने सदा सर्वगतम् अनुरागं क्रियाः ॥

व्याख्या—हे राजन् = हे महाराज !, पुरवासिनां = पौराणां, कार्याणि = कर्माणि, व्यवहारानिति भावः। धर्मेण = धर्ममार्गेण, अवसेयाः = निश्चिनु, जने = प्रजाजने, सदा = सर्वदा, सर्वगतं = सर्वव्यापिनं, 'सर्वङ्कषम्' इति मल्लिनाथसम्मतः पाठस्तत्राऽपि नाऽर्थभेदः। अनुरागं = प्रणयं, क्रियाः = कुरुतात्, प्रजासु अवैषम्येण व्यवहरेति भावः ॥

व्युत्पत्तिः—पुरवासिनां = पुरे वसन्तीति तच्छीलाः पुरवासिनस्तेषां, 'सुप्यजातौ णिनिस्ताच्छील्ये' इति ताच्छील्ये णिनिः। अवसेयाः = अवपूर्वकात् 'षोऽन्तकर्मणि' इति धातोराशिषि लिङ् 'आदेच उपदेशेऽशिति' इत्यात्वम् 'एर्लिङि'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इत्येकारः । सर्वंगतं=सर्वं गत इति सर्वंगतस्तं, 'द्वितीया श्रिताऽतीतपतितगताऽत्यस्तप्राप्तापन्नैः' इति द्वितीयातत्पुरुषः । 'सर्वङ्कषम्' इति मल्लिनाथसम्मते पाठे 'सर्वकूलाऽभ्रकरीषेषु कष' इति खच्, खित्वान्मुम् च । क्रियाः='डुकृञ् करण' इति धातोराशिषि लिङ्, यासुडागमः 'रिङ् शयग्लिङ्क्षु' इति रिङादशः ॥

भाषाऽर्थः—हे राजन्! आप पौरोंके व्यवहारोंका धर्मसे निश्चय कीजिए, प्रजाजनमें सदा सर्वव्यापी अनुरागको प्रकाशित करें ॥ २८ ॥

घानिषीष्ट त्वया मन्युर्ग्राहिषीष्ट समुन्नतिः ।
रक्षोभिर्दर्शिषीष्ठास्त्वं द्रक्षीरन् भवता च ते ॥ २९ ॥

अन्वयः—(हे राजन्!) त्वया मन्युः घानिषीष्ट, समुन्नतिः ग्राहिषीष्ट, रक्षोभिः त्वं दर्शिषीष्ठाः । भवता च ते द्रक्षीरन् ॥

व्याख्या—(हे राजन्!) त्वया=भवता, मन्युः=क्रोधः, घानिषीष्ट=हन्यताम्, मुख्यशत्रुत्वादिति भावः । एवं च समुन्नतिः=अभ्युदयः, ग्राहिषीष्ट=गृह्यताम् । रक्षोभिः=राक्षसैः, त्वं=भवान्, दर्शिषीष्ठाः=दृश्यस्व । भवता च=त्वया च, ते=राक्षसाः, द्रक्षीरन्=दृश्यन्ताम् ॥

व्युत्पत्तिः—त्वया=कर्मवाच्यप्रयोगे क्रियापदेन कर्तुरनुक्तत्वात् 'कर्तृकरणयोस्तृतीया' इति तृतीया । मन्युः=कर्मत्वेऽपि क्रियापदेनोक्तत्वात् प्रथमा । घानिषीष्ट='हन हिंसागत्योः' इति धातोः कर्मणि आशीर्लिङि सीयुट् 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च'ेति चिण्वदिटि वृद्धिर्घत्वं च । ग्राहिषीष्ट='ग्रह उपादाने' इति धातोः कर्मणि आशीर्लिङ्, पूर्ववच्चिण्वदिट् कार्यम् । दर्शिषीष्ठाः='दृशिर् प्रेक्षण' इति धातोः पूर्ववत्कर्मणि आशीर्लिङ्, प्रक्रियादिकार्यं च । द्रक्षीरन्=पूर्वस्मादेव धातोः कर्मणि लिङि सीयुट् 'झस्य रन्' इति रन्, अचिण्वद्भावपक्षे रूपम् ॥

भाषाऽर्थः—हे राजन्! आप क्रोधको नष्ट करें और उन्नतिका ग्रहण करें । राक्षस आपको देखें और आप उनको देख लें ॥ २९ ॥

मन्युं वध्या भटवधकृतं बालवृद्धस्य राजन्!
शास्त्राऽर्थज्ञाः सदसि सुधियः सन्निधिं न क्रियासुः ।
संरंसीष्ठाः सुरमुनिगते वर्त्मनि प्राज्यधर्मे
संभुत्सीष्ठाः सुनयनयनैर्विद्विषामीहितानि ॥ ३० ॥

अन्वयः—हे राजन्! भटवधकृतं बालवृद्धस्य मन्युं वध्याः, शास्त्राऽर्थज्ञा सुधियः ते सदसि सन्निधिं क्रियासुः; सुरमुनिगते प्राज्यधर्मे वर्त्मनि संरंसीष्ठाः, सुनयनयनैः विद्विषाम् ईहितानि सम्भुत्सीष्ठाः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे राजन् = हे महाराज !, भटवधकृतं = वीरयोधव्यापादनजनितं, बालवृद्धस्य = माणवकस्थविरस्य, हतभटसम्बन्धसमाज इति शेषः। मन्युं = शोकं, वध्याः = नाशय, निवारयेति भावः। शास्त्राऽर्थज्ञाः = शास्त्राऽर्थकुशलाः, सुधियः = विद्वांसः, ते = तव, सदसि = सभायां, सन्निधिं = सामीप्यं, क्रियासुः = कुर्युः. विद्वांसो नित्यं त्वत्सभासन्निहितास्तिष्ठन्त्विति भावः 'न सा सभा यत्र न सन्ति वृद्धा' इति स्मरणादिति तात्पर्यम्। सुरमुनिमते = देवर्षिसेविते, प्राज्यधर्मे = प्रचुरपुण्ये, वर्त्मनि = मार्गे, संरंसीष्ठाः = सम्यग् रमस्व, सुनयनयनैः = शोभननीतिरूपनेत्रैः, विद्विषां = शत्रूणाम्, ईहितानि = चेष्टितानि, संभुत्सीष्ठाः = सम्यग् बुध्यस्व ॥

व्युत्पत्तिः—भटवधकृतं = भटानां वधेन कृतम्। बालवृद्धस्य = बालाश्च वृद्धाश्च बालवृद्धं, तस्य 'सर्वो द्वन्द्वो विभाषैकवद्भवति' इति नयेन समाहारद्वन्द्वः। वध्याः = हनधातोराशिषि लिङ्, 'हनो वध लिङि' इति वधादेशः। सुधियः = सुष्ठु ध्यायन्तीति शोभना धीर्येषामिति वेति विग्रहः। 'एरनेकाचोऽसंयोगपूर्वस्य'ति यणि प्राप्ते 'न भूसुधियोः' इति निषेधः, ततः 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इतीयङादेशः। सुरमुनिमते = सुराश्च मुनयश्च सुरमुनयः, तैर्मतं सुरमुनिमतं तस्मिन्। प्राज्यधर्मे = प्राज्या धर्मा यस्मिंस्तत् प्राज्यधर्मं, तस्मिन्। अत्र समासाऽन्तविधेरनित्यत्वादनिचोऽभावः। संरंसीष्ठाः = संपूर्वकात् 'रमु क्रीडायाम्' इति धातोराशिषि लिङ्, थासि सीयुट्सुटौ। सुनयनयनैः = शोभना नयाः सुनयाः, त एव नयनानि सुनयनानि, तैः 'मयूरव्यंसकादयश्चे'ति समासः। संभुत्सीष्ठाः = संपूर्वकात् 'बुध अवगमने' इति धातोराशिषि लिङ्, चर्त्वम् 'एकाचो बशो भष् झषन्तस्य स्ध्वोः' इति भष्भावः। मन्दाक्रान्ता वृत्तं, तल्लक्षणं यथा—'मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत् ॥' इति ॥

भाषाऽर्थः—हे महाराज ! वीर योद्धाओंके वधसे उत्पन्न बालक और वृद्धोंके शोकको हटाइये, शास्त्राऽर्थको जाननेवाले विद्वान् आपकी सभामें अवस्थित हों; देवता और मुनियोंसे आचरित प्रचुर धर्मोंसे युक्त मार्गमें आप रमण करें और सुन्दर नीति रूप नेत्रोंसे शत्रुओंकी चेष्टाओंको अच्छी तरहसे जान लें ॥ ३० ॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये चतुर्थे तिङन्तकाण्डे लक्षणरूपे षष्ठः परिच्छेदः (सर्गः), तथा लक्ष्यरूपे कथानके विभीषणाऽभिषेको नाम एकोनविंशतितमः सर्गः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ विंशः सर्गः

अतः प्रभृति लोटमधिकृत्य तद्विलसितमाह । 'लोट् च'ेति वचनात्क्रियादिष्वर्थेषु लोट्, क्वचित्ततोऽन्यत्राऽपि दर्शयिष्यति—

समुपेत्य ततः सीतामुक्तवान् पवनाऽऽत्मजः ।
दिष्ट्या वर्धस्व वैदेहि ! हतस्त्रैलोक्यकण्टकः ॥ १ ॥

अन्वयः—ततः पवनात्मजः सीतां समुपेत्य उक्तवान्—हे वैदेहि ! दिष्ट्या वर्द्धस्व, त्रैलोक्यकण्टको हतः ॥

व्याख्या—ततः = विभीषणाऽभिषेकाऽनन्तरं, पवनाऽऽत्मजः = वायुसूनुः, हनूमानित्यर्थः । सीतां = जानकीं, समुपेत्य = आसाद्य, उक्तवान् = अब्रवीत् । हे वैदेहि = हे सीते !, दिष्ट्या = सानन्दं, वर्द्धस्व, = एधस्व, वर्द्धनहेतुमाह—हत इति । त्रैलोक्यकण्टकः = भुवनत्रयशल्यभूतः, रावण इति भावः । हतः = व्यापादितः ॥

व्युत्पत्तिः—दिष्ट्या = 'दिष्ट्या समुपजोषं चेत्यानन्दे' इत्यमरः । वर्द्धस्व = 'वृधु वृद्धौ' इति धातोः 'लोट् च'ेति प्रार्थनायां लोट् । 'सवाभ्यां वामौ' इत्येतो वकारादेशः । त्रैलोक्यकण्टकः = त्रयो लोकास्त्रैलोक्यं, 'चतुर्वर्णादीनां स्वार्थे उपसंख्यानम्' इति ष्यञ् । त्रैलोक्यस्य कण्टकः ॥

भाषाऽर्थ—विभीषणके अभिषेकके अनन्तर हनूमान्‌जीने सीताजीके पास जाकर कहा—'हे सीताजी ! आनन्दपूर्वक बढ़िये, त्रैलोक्यका कण्टकस्वरूप रावण मारा गया ॥ १ ॥

अनुजानीहि हन्यन्तां मयैताः क्षुद्रमानसाः ।
रक्षिकास्तव राक्षस्यो गृहाणैतासु मत्सरम् ॥ २ ॥

अन्वयः—क्षुद्रमानसाः तव रक्षिका एता राक्षस्यो मया हन्यन्ताम् अनुजानीहि । एतासु मत्सरं गृहाण ॥

व्याख्या—(हे सीते !) क्षुद्रमानसाः = पापचित्ताः, तव = भवत्याः, रक्षिकाः = गोप्यः, एताः = इमाः, राक्षस्यः = रक्षःस्त्रियः, मया = हनूमता, हन्यन्ताम् = व्यापाद्यन्ताम् , अनुजानीहि = अनुमन्यस्व । एतासु = राक्षसीषु, मत्सरं = क्रोधं, गृहाण = आदत्स्व ॥

व्युत्पत्तिः—क्षुद्रमानसाः = क्षुद्रं मानसं यासां ताः । हन्यन्तां = 'हन हिंसागत्योः' इति धातोः कर्मणि विधौ लोट् । अनुजानीहि = अनुपूर्वकात् 'ज्ञा अवबोधने' इति धातोः प्रार्थनायां लोट् । गृहाण = 'ग्रह उपादाने' इति धातोः पूर्ववल्लोट् 'हलः श्नः शानज्झौ' इति शानजादेशे हिलुक् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—पापचित्तवाली आपकी रक्षा करनेवाली इन राक्षसियोंको मुझे मारना चाहिये, आज्ञा दीजिए। इन लोगोंमें क्रोध कीजिए ॥ २ ॥

तृणह्मानि दुराऽऽचारा घोररूपाऽऽशयक्रियाः।
हिंस्रा भवतु ते बुद्धिरेतासु कुरु निष्ठुरम् ॥ ३ ॥

अन्वयः—(हे सीते !) (अहम्) दुराचाराः घोररूपाशयक्रियाः (एताः) तृणह्मानि । एतासु ते बुद्धिः हिंस्रा भवतु । निष्ठुरं कुरु ॥

व्याख्या—(हे सीते !) दुराचाराः=पापसमाचाराः, घोररूपाशयक्रियाः= भयङ्कराऽऽकाराऽभिप्रायव्यापाराः, एताः राक्षसीरिति शेषः। तृणह्मानि=हनानि। एतासु=आसु, ते=तव, बुद्धिः=मतिः, हिंस्रा=हिंसनशीला, भवतु=अस्तु। निष्ठुरं=परुषभावं, कुरु=विधेहि ॥

व्युत्पत्तिः—दुराचाराः=दुष्ट आचारो यासां, ताः। घोररूपाऽऽशयक्रियाः=रूपं च आशयश्च क्रियाश्च रूपाऽऽशयक्रियाः। घोरा रूपाऽऽशयक्रिया यासां, ताः। तृणह्मानि='तृह (हिसि) हिंसायाम्' इति रौधादिकाद्धातोर्लोट् 'रुधादिभ्यः श्नम्' इति श्नम् 'आडुत्तमस्य पिच्चे' ति आट् 'मेर्निः' इति निः। हिंस्रा=हिंसनशीला, 'नमिकम्पिस्म्यजसकमहिंसदीपो र'इति रप्रत्ययः। निष्ठुरं=भावप्रधानो निर्देशः ॥

भाषाऽर्थः—हे सीताजी ! मैं पापपूर्ण आचारवाली भयङ्कर आकार, अभिप्राय और क्रियासे युक्त इन राक्षसियोंको मार डालूंगा। इन लोगोंमें आपकी हिंस्रबुद्धि हो। आप निष्ठुर भाव कीजिए ॥ ३ ॥

पश्चिमं करवामैतत्प्रियं देवि ! वयं तव।
ततः प्रोक्तवती सीता वानरं करुणाऽऽशया ॥ ४ ॥

अन्वयः—हे देवि ! वयं तव एतत् पश्चिमं प्रियं करवाम। ततः करुणाऽशया सीता वानरं प्रोक्तवती ॥

व्याख्या—हे देवि=हे राज्ञि !, तव=भवत्याः, एतत्=इदम्, उक्तरूपमिति भावः। पश्चिमम्=अन्तिमं, प्रियम्=अभीष्टं, करवाम=कुर्याम। ततः=अनन्तरं हनूमद्वाक्याऽनन्तरमित्यर्थः। करुणाऽऽशया = दयाऽऽर्द्रचित्ता, सीता=जानकी, वानरं=हनूमन्तं, प्रोक्तवती=प्रोवाच ॥

व्युत्पत्तिः—वयम्=एकत्वे विवक्षितेऽपि 'अस्मदो द्वयोश्चे'ति विभाषया बहुवचनम्। पश्चिमम् = 'अन्ते जघन्यं चरममन्त्यपाश्चात्यपश्चिमम्।' इत्यमरः। करवाम='डुकृञ् करणे' इति धातोर्लोट्। 'आडुत्तमस्य पिच्चे'ति आडागमः, 'लोटो लङ्वत्' इति लङ्वदतिदेशात् 'नित्यं ङितः' इति सलोपः। करुणाऽऽशया=करुणा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऽस्ति अस्मिन् स करुणः, 'अर्शआदिभ्योऽच' इत्यच्प्रत्ययः। करुण आशयो यस्याः सा, 'अभिप्रायश्छन्द आशय' इत्यमरः॥

भाषाऽर्थः—'हे देवि ! हम आपका यह पिछला अभीष्ट कार्य करते हैं'। तब दयासे आर्द्रचित्तवाली सीताने वानरको कहा॥ ४॥

उपशाम्यतु ते बुद्धिः पिण्डनिर्वेशकारिषु।
लघुसत्त्वेषु दोषोऽयं यत्कृतो निहतोऽसकौ॥ ५॥

अन्वयः—'(हे हनूमन्) पिण्डनिर्वेशकारिषु लघुसत्त्वेषु ते बुद्धिः उपशाम्यतु। अयं दोषो यत्कृतः, असकौ निहतः'॥

व्याख्या—(हे हनूमन्!) पिण्डनिर्वेशकारिषु—ग्रासोपजीवनकारिषु, भृत्यवृत्तिषु, लघुसत्त्वेषु=क्षुद्रजन्तुषु, राक्षसीरूपेष्विति भावः। ते=तव, बुद्धिः=मतिः, व्यापादनतत्परेति भावः। उपशाम्यतु=शान्ताऽस्तु। अयम्=एषः, दोषः=दूषणं, मत्तर्जनाऽऽदिरूपमिति भावः। यत्कृतः=यद्विहितः, असकौ=कुत्सितोऽसौ, रावण इति भावः। निहतः=व्यापादितः, कुत्सितकार्ये प्रयोजकस्य प्रभोरपराधो न तु प्रयोज्यस्य भृत्यस्येति भावः, अत आसु राक्षसीषु तव व्यापादनमतिः परिहर्त्तव्येति हार्दोऽभिप्रायः॥

व्युत्पत्तिः—पिण्डनिर्वेशकारिषु=पिण्डनिर्वेशं कुर्वन्तीति तच्छीलाः पिण्डनिर्वेशकारिणस्तेषु, ताच्छील्ये णिनिः। लघुसत्त्वेषु=लघवश्च ते सत्त्वा लघुसत्त्वास्तेषु, 'सत्त्वमस्त्री तु जन्तुषु' इत्यमरः। उपशाम्यतु=उपपूर्वकात् 'शमु उपशमे' इति धातोः प्रार्थनायां लोट्, 'शमामष्टानां दीर्घः श्यनि' इति दीर्घत्वम्। यत्कृतः=येन कृतः। असकौ=कुत्सितोऽसौ, अदःशब्दात्सर्वनाम्नः 'कुत्सिते' इत्यकच्प्रत्ययः॥

भाषाऽर्थः—हे हनूमन्! भृत्यवृत्ति (नौकरी) करनेवाले क्षुद्र जन्तुओं (राक्षसियों) में तुम्हारी बुद्धि शान्त हो जाय। यह दोष जिससे किया गया कुत्सित वह रावण मारा गया॥ ५॥

न हि प्रेष्यवधं घोरं करवाण्यस्तु ते मतिः।
एधि कार्यकरस्त्वं मे गत्वा प्रवद राघवम्॥ ६॥

अन्वयः—(हे हनूमन्!) 'घोरं प्रेष्यवधं करवाणि' (इति) मतिः ते न अस्तु। त्वं मे कार्यकर एधि, गत्वा राघवं प्रवद॥

व्याख्या—(हे हनूमन्!) घोरं=भयङ्करं, प्रेष्यवधं—परिचारकहिंसां, करवाणि=कुर्याम्, (एति=एवम्) मतिः=बुद्धिः, ते=तव, न अस्तु=न भवेत्,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वं = हनूमान् , मे = मम, कार्यकरः = क्रियाऽनुकूलः, एधि = भव, गत्वा = यात्वा, राघवं = रामं, प्रवद = ब्रूहि, वक्ष्यमाणवचनमिति शेषः ॥

व्युत्पत्तिः—प्रेष्यवधं = प्रेष्याणां वधस्तम् । करवाणि=आशंसायां लोट् । अस्तु= 'अस भुवि' इति धातोराशिषि लोट् कार्यकरः = कार्यं करोतीति अनुलोमः, 'कृञो हेतुताच्छील्याऽऽनुलोम्येषु' इत्यानुलोम्ये टप्रत्ययः । एधि = असधातोः प्रार्थनायां लोट् । 'सेर्ह्यपिच्च'ति सेर्ह्यादेशे 'श्नसोरल्लोपः' इत्यकारलोपः 'ध्वसोरेद्धावभ्यासलोपश्चे'ति सकारस्याऽन्त्यस्य एत्वे तस्याभीयशास्त्रत्वेनाऽसिद्धत्वे 'हुझल्भ्यो हेर्धिः' इति हेर्धिरादेशः ॥

भाषाऽर्थः—हे हनूमन् ! 'भृत्योंकी भयङ्कर हिंसा करता हूँ' ऐसी बुद्धि तुम्हारी नहीं हो । तुम मेरे कार्य करने के लिए अनुकूल हो जाओ । जाकर रामचन्द्रजीको कहो ॥ ६ ॥

> दिदृक्षुर्मैथिली राम ! पश्यतु त्वाऽविलम्बितम् ।
> तथेति स प्रतिज्ञाय गत्वा राघवमुक्तवान् ॥ ७ ॥

अन्वय—'हे राम ! मैथिली त्वा दिदृक्षुः अविलम्बितं पश्यतु' । स तथा इति प्रतिज्ञाय राघवं गत्वा उक्तवान् ॥

व्याख्या—हे राम = हे रामचन्द्र !, मैथिली = जानकी, सीतेति भावः । त्वा = भवन्तं, दिदृक्षुः, = द्रष्टुमिच्छुः, अविलम्बितं = शीघ्रं, पश्यतु = अवलोकयतु । इति प्रवदेति पूर्वश्लोकस्थाभ्यां सम्बन्धः । सः = हनूमान् , तथा = तेन प्रकारेण, कथयिष्यामीति शेषः, इति = एवं, प्रतिज्ञाय = प्रतिश्रुत्य, राघवं = रामं, गत्वा = प्राप्य, उक्तवान् = अभिहितवान् ॥

व्युत्पत्तिः—त्वा = 'त्वामौ द्वितीयाया' इति त्वाऽऽदेशः । 'दिदृक्षु'रिति पदेन योगे 'कर्तृकर्मणोः कृति' इति प्राप्तायाः कर्मणि षष्ठ्याः, 'न लोकाऽव्ययनिष्ठाखलर्थतृनाम्' इति निषेधाद् द्वितीया । पश्यतु = प्रार्थनायां लोट् ॥

भाषाऽर्थः—'हे राम ! सीता आपके दर्शनकी अभिलाषिणी है, अतः शीघ्र आपका दर्शन करे' ऐसा कहो । तब हनूमानूजीने 'ऐसा ही कहता हूँ' ऐसी प्रतिज्ञा कर रामचन्द्रजीके पास जाकर कहा ॥ ७ ॥

युग्मम्—

> उत्सुकाऽऽनीयतां देवी काकुत्स्थकुलनन्दन ! ।
> इमां लिखित्वा विनिश्वस्य स्वराऽऽलोक्य विभीषणम् ॥ ८ ॥
> उक्तवान् राघवः सीतामानयाऽलंकृतामिति ।
> गत्वा प्रणम्य तेनोक्ता मैथिली मधुरं वचः ॥ ९ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—'हे काकुत्स्थकुलनन्दन ! उत्सुका देवी आनीयताम्' । राघवः क्ष्मां लिखित्वा विनिःश्वस्य स्वः आलोक्य 'अलङ्कृतां सीताम् आनय' इति विभीषणम् उक्तवान् । तेन गत्वा प्रणम्य मैथिली मधुरं वच उक्ता ॥

व्याख्या—हे काकुत्स्थकुलनन्दन = हे पुरञ्जयवंशनन्दन !, उत्सुका = उत्कण्ठिता, भवद्दर्शन इति शेषः । देवी=राज्ञी, सीतेतिभावः । आनीयताम्=प्राप्यताम्, इति हनूमानब्रवीदिति शेषः । राघवः=रामः, क्ष्मां=पृथिवीं, लिखित्वा= विलिख्य पादाङ्गुष्ठेनेति शेषः । विनिःश्वस्य=दीर्घमुष्णं च निःश्वस्य, स्वः= आकाशम्, आलोक्य=दृष्ट्वा, अलङ्कृतां=भूषितां, सीतां=जानकीम्, आनय= प्रापय, इति=एवं, विभीषणं=राक्षसराजम्, उक्तवान्=अब्रवीत् , एते च क्ष्मालेखनादयश्चिन्ताऽनुभावाः, सीतास्वीकारे लोकाऽपवादशङ्का चिन्तोत्पादिकेति ध्येयम् । तेन=विभीषणेन, गत्वा=सीतासमीपं प्राप्य, प्रणम्य=नमस्कृत्य, सीतामिति शेषः, मैथिली=सीता, मधुरं=माधुर्यपूर्णं, वचः=वचनम्, वक्ष्यमाणप्रकारमिति शेषः । उक्ता=अभिहिता ॥

व्युत्पत्तिः—हे काकुत्स्थकुलनन्दन=ककुत्स्थस्याऽपत्यं पुमान् काकुत्स्थस्तत्कुलनन्दनस्तत्संबुद्धौ । आनीयतां=कर्मणि प्रार्थनायां लोट् । स्वः='स्वः स्वर्गे चाऽन्तरिक्षे चे'ति विश्वः । आनय=विधौ लोट् । मैथिली=उक्तेऽयस्य गौणकर्मत्वात् 'गौणे कर्मणि दुह्यादेः' इति नियमेन प्रथमा । वचः=प्रधानकर्म । उक्ता=दुह्यादित्वादप्रधाने कर्मणि क्तप्रत्ययः ॥

भाषाऽर्थः—'हे रामचन्द्रजी ! आपके दर्शनके लिए उत्कण्ठित महारानी सीताजीको मंगाइये' हनूमानजीने रामचन्द्रजीको ऐसा कहा । तब रामचन्द्रजीने पैरके अंगूठेसे पृथ्वीका विदारण कर दीर्घ और उष्ण निःश्वास लेकर आकाशको देखकर 'अलङ्कृत सीताजीको ले आओ' विभीषणको ऐसी आज्ञा दी । तब विभीषणजीने अशोक-वनिकामें जाकर-प्रणाम कर सीताजीको मधुर वचन कहा ॥८-९॥

जहीहि शोकं वैदेहि ! प्रीतये धेहि मानसम् ।
रावणे जहिहि द्वेषं जहाहि प्रमदावनम् ॥ १० ॥

अन्वयः—'हे वैदेहि ! शोकं जहीहि; प्रीतये मानसं धेहि; रावणे द्वेषं जहिहि; प्रमदावनं जहाहि ॥

व्याख्या—हे वैदेहि=हे मैथिलि !, शोकं=पतिवियोगदुःखं, जहीहि=त्यज । प्रीतये=सन्तोषाय, मानसं=चित्तं, धेहि=सन्धेहि । रावणे=दशानने, द्वेषं=वैरं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जहिहि=त्यज, तस्य मरणाऽन्तत्वादिति भावः। प्रमदावनम्=अशोकवनिकां, जहाहि=त्यज, इतो निर्गच्छेति भावः।

व्युत्पत्तिः—जहीहि='ओहाक् त्यागे' इति धातोर्लोट् 'जहातेश्चे'ति चादीत्वम्। तथैव ह्रस्वे—जहिहि। आत्वे च जहाहीति रूपम्। धेहि=डुधाञ् धातोः प्रार्थनायां लोट्, 'ध्वसोरेद्धावभ्यासलोपश्चे'ति एत्वाऽभ्यासलोपौ। रावणे=वैषयिकी सप्तमी॥

भाषाऽर्थः—'हे मैथिली! पतिवियोगके दुःखको छोड़िए, सन्तोषके लिए चित्त का स्थापन कीजिए; रावणमें द्वेष आप छोड़ दें और अशोकवनिकाको छोड़ दीजिए॥ १०॥

स्नाह्यनुलिम्प धूपाय निवस्स्वाऽऽविध्य च स्रजम्।
रत्नान्याऽऽमुञ्च संदीप्ते हविर्जुहुधि पावके॥ ११॥

अन्वयः—स्नाहि, अनुलिम्प, धूपाय, निवस्स्व, स्रजम् आविध्य, रत्नानि आमुञ्च, सन्दीप्ते पावके हविः जुहुधि॥

व्याख्या—अथ युग्मेन सीतायाः कर्तव्यमाह—स्नाहीति। (हे सीते!) स्नाहि=स्नानं कुरु, बाह्याभ्यन्तरशुद्ध्यर्थमिति भावः। अनुलिम्प=अनुलेपनं कुरु, चन्दनादिनेति भावः। धूपाय=श्रीवासादिधूपेनाऽङ्गं संस्कुर्वित्यर्थः। निवस्स्व= आच्छादय, वस्त्रमिति शेषः। स्रजं=माल्यम्, आविध्य=ग्रथान, रत्नानि= मण्याभरणानि, आमुञ्च=प्रतिमुञ्च, धारयेति भावः। सन्दीप्ते=प्रज्वलिते, पावके= अग्नौ, हविः=आज्यादिकं, जुहुधि=जुहुतात्॥

व्युत्पत्तिः—स्नाहि='ष्णा शौचे' इति धातोः प्रार्थनायां लोट्। शपो लुकि सेर्हिरादेशः। अनुलिम्प=अनुपूर्वकात् 'लिप उपदेहे' इति तौदादिकाद्धातोर्लोट् 'अतो हेः' इति हेर्लुक्। धूपाय='गुपूधूपविच्छिपणिपनिभ्य आय' इति आयप्रत्ययाऽन्तात् 'धूप सन्ताप' इति धातोर्लोटि लिपि हेर्लुक्। निवस्स्व=निपूर्वकात् 'वस आच्छादन' इत्यादादिकाद्धातोर्लोटि 'थासः से' इति सेभावः, 'सवाभ्यां वामौ' इति एतो वभावः। धातुप्रत्ययसकारयोः श्लिष्टता। आविध्य=आङ्पूर्वकात् 'व्यध ताडन' इति दैवादिकधातोर्लोट् 'ग्रहिज्यावयी'त्यादिना सम्प्रसारणं हेर्लुक् च। अत्रोपसर्गवशादर्थान्तरत्वम्। जुहुधि='हु दानाऽदनयोः' इति धातोर्लोट् 'हुझल्भ्यो हेर्धिः' इति हेर्धिः॥

भाषाऽर्थः—'हे मैथिली! आप स्नान कीजिए, शरीरमें चन्दन आदिसे लेप कीजिए, श्रीवास आदि धूपसे अङ्गका संस्कार कीजिए, वस्त्र पहनिए मालाका गुम्फन कीजिए, रत्नोंको पहनिये, प्रदीप्त अग्निमें आज्य आदि हविका हवन कीजिए॥११॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्धि त्वं पञ्चगव्यं च छिन्धि संरोधजं तमः ।
आरोह शिबिकां हैमीं द्विषां जहि मनोरथान् ॥ १२ ॥

अन्वयः—(हे जानकि) त्वं पञ्चगव्यम् अद्धि, संरोधजं तमः छिन्धि, हैमीं शिबिकाम् आरोह द्विषां मनोरथान् जहि ॥

व्याख्या—(हे जानकि !) त्वं, पञ्चगव्यं=गोमयादिकं पदार्थपञ्चकम्, अद्धि=भक्षय । आभ्यन्तरशुद्ध्यर्थमिति भावः । संरोधजं=निरोधजन्य, तमः=शोकं, छिन्धि=अपनय । हैमीं=सौवर्णी, शिबिकां=नरयानम्, आरोह=अधितिष्ठ । द्विषां=शत्रूणां, मनोरथान्=अभिलाषान् , जहि=उन्मूलय । अत्र प्रथमं स्नानं, ततः पञ्चगव्यप्राशनं, ततो होमस्ततोऽनुलेपनमित्यादिक्रमो द्रष्टव्यः, 'अर्थाच्चे'ति न्यायेन शब्दक्रमाऽपेक्षया अर्थक्रमस्य बलवत्तरत्वात् ॥

व्युत्पत्तिः—पञ्चगव्य=गोविकारा गव्यानि, 'गोपयसोर्यत्' इति यत् । पञ्चानां गव्यानां समाहारः पञ्चगव्यं, तत् 'तद्धितार्थोत्तरपदसमाहारे चे'ति समाहारे समासः तस्य 'संख्यापूर्वो द्विगुः' इति द्विगुसंज्ञा, ततः अकारान्तोत्तरपदो द्विगुः, स्त्रियामिष्ट' इति नियमेन 'द्विगोः' इति सूत्रेण ङीपि प्राप्ते 'पात्राद्यन्तस्य ने' ति तन्निषेधः 'द्विगुरेकवचनम्' इति एकवद्भावः 'स नपुंसकम्' इति नपुंसकत्वम् । अद्धि='अद भक्षणे' इति धातोर्लोट् हेर्धिरादेशः । तमः='तमः शोके गुणाऽन्तरे' इति विश्वः । छिन्धि= छिदिर् द्वैधीकरणे' इति धातोर्लोट्, सिपि हेर्धिः । हैमीं=हेम्नो विकारो हैमी, ताम् 'तस्य विकार' इत्यण् 'नस्तद्धिते' इति टिलोपः 'टिड्ढाणञि'त्यादिना ङीप् । जहि='हन हिंसागत्योः'' इति धातोर्लोट् सेर्हिरादेशः 'हन्तेर्जः' इति जादेशः सर्वत्र विधौ लोट् ॥

भाषाऽर्थः—हे मैथिलि ! आप पञ्चगव्यका उपयोग कीजिए, निरोधजन्य शोकको हटाइये, सुनहली पालकीपर आरोहण कीजिए और शत्रुओंके मनोरथों को निर्मूल कीजिए ॥ १२ ॥

तृणेदु त्वद्वियोगोत्थां राजन्यानां पतिः शुचम् ।
भवतादधियुक्ता त्वमत ऊर्ध्वं स्ववेश्मनि ॥ १३ ॥

अन्वयः—(हे मैथिलि !) राजन्यानां पतिः त्वद्वियोगोत्थां शुचं तृणेदु । त्वम् अत ऊर्ध्वं स्ववेश्मनि अधियुक्ता भवतात् ॥

व्याख्या—(हे मैथिलि !) राजन्यानां=क्षत्रियाणां, पतिः=स्वामी, रामचन्द्र इत्यर्थः । त्वद्वियोगोत्थां=त्वद्विरहजन्या, शुचं=शोकं, तृणेदु=हिनस्तु निवारयत्विति भावः । त्वं=मैथिली, अतः=अस्मात्कालात्, ऊर्ध्वम्=अनन्तरं स्ववेश्मनि=आत्मप्रासादे, अधियुक्ता=पतियुक्ता, भवतात्=भूयाः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

व्युत्पत्तिः—राजन्यानां = राज्ञामपत्यानि पुमांसो राजन्यास्तेषां, 'राजश्वशुराद्यत्' इति यत् 'ये चाऽभावकर्मणोः' इति अनः प्रकृतिभावः। 'मूर्द्धाऽभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट्।' इत्यमरः। त्वद्वियोगोत्थां=त्वद्वियोगादुत्तिष्ठतीति त्वद्वियोगोत्था, तान् 'सुपि स्थ' इति कप्रत्ययः 'उदः स्थास्तम्भोः पूर्वस्य' इति पूर्वसवर्णः। तृणेढु='तृह (हिंसि) हिंसायाम्' इति धातोर्लोट्, तिपि एत्त्वम्। 'हो ढ' इति हस्य ढः तकारस्य 'झषस्तथोर्धोऽधः' इति धत्वं ततः ष्टुत्वे ढलोपः। भवतात्=भूधातोः 'आशिषि लिङ्लोटौ' इति आशिषि लोट्, सेर्ह्यादेशे 'तुह्योस्तातङाशिष्यन्यतरस्याम्' इति तातङादेशः।

भाषाऽर्थः—हे मैथिलि! क्षत्रियोंके स्वामी रामचन्द्रजी आपके वियोगसे उत्पन्न शोकको हटावें। आप अबसे अपने प्रासादमें पतियुक्त हो जायँ॥ १३॥

दीक्षस्व सह रामेण त्वरितं तुरगाऽध्वरे।
दृश्यस्व पत्या प्रीतेन प्रीता प्रेक्षस्व राघवम्॥ १४॥

अन्वयः—(हे मैथिलि!) रामेण सह त्वरितं तुरगाऽध्वरे दीक्षस्व, प्रीतेन पत्या दृश्यस्व, प्रीता (सती) राघवं प्रेक्षस्व॥

व्याख्या—(हे मैथिलि!) रामेण = रामचन्द्रेण, सह = समं, त्वरितं=शीघ्रं, तुरगाऽध्वरे = अश्वमेधे, दीक्षस्व = दीक्षिता भूयाः। प्रीतेन = प्रसन्नेन, पत्या = भर्त्रा रामेणेति भावः। दृश्यस्व = प्रेक्ष्यस्व। प्रीता = प्रसन्ना (सती), राघवं = रामं, प्रेक्षस्व = पश्य॥

व्युत्पत्तिः—रामेण = 'सहयुक्तेऽप्रधाने' इति तृतीया। दीक्षस्व='दीक्ष मौण्ड्येज्योपनयननियमव्रताऽऽदेशेषु' इत्याशिषि लोट्। दृश्यस्व = दृशेः कर्मणि लोटि यकि 'थासः से' इति सेभावः, 'सवाभ्यां वामौ' इति एकारस्य वाऽऽदेशः। प्रेक्षस्व = निमन्त्रणे लोट्॥

भाषाऽर्थः—हे देवि! रामचन्द्र जीके साथ शीघ्र अश्वमेध यज्ञमें दीक्षित हो जाइए। प्रसन्न होकर पति रामचन्द्रजी आपको देखें। आप भी प्रसन्न होती हुई रामचन्द्रजी का दर्शन कर लें॥ १४॥

अयं नियोगः पत्युस्ते कार्या नाऽत्र विचारणा।
भूषयाऽङ्गं प्रमाणं चेद्रामं गन्तुं यतस्व च॥ १५॥

अन्वयः—(हे देवि!) अयं नियोगः ते पत्युः अत्र विचारणा न कार्या। प्रमाणं चेत् अङ्गं भूषय रामं गन्तुं यतस्व च॥

व्याख्या—(हे देवि!) अयं पूर्वोक्तः, स्नानादिरूपः, नियोगः = आज्ञा. ते= तव, पत्युः=भर्तुः, रामस्येत्यर्थः, अस्तीति शेषः। अत्र = अस्मिन्नियोगे, विचारणा =

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विमर्शः, न कार्या=नो कर्तव्या, नियोगोऽयं प्रयुक्तो न वेति विचारो न कर्तव्य इति भावः । प्रमाणं चेत्=इदं रामोक्तमेवेति प्रमितिकरणं यदि, तर्हि अङ्गं=शरीरं, भूषय=अलङ्कुरु, रामं=रामचन्द्रं, गन्तुं=यातुं, यतस्व च=प्रयत्नं कुरु च ॥

व्युत्पत्तिः—भूषय=निमन्त्रणे लोट् । यतस्व='यती प्रयत्ने' इति धातोर्निमन्त्रणे लोट् ॥

भाषाऽर्थः—हे देवि ! यह आज्ञा आपके पतिकी है, इसमें विचार नहीं करना चाहिए । आप इस उक्तिको प्रमाण मानती हों तो शरीरको अलंकृत करें और रामचन्द्रजी के पास जानेके लिए यत्न करें ॥ १५ ॥

मुदा संयुहि काकुत्स्थं स्वयं चाऽऽप्नुहि सम्मदम् ।
उपेह्यूर्ध्वं मुहूर्तात्त्वं देवि ! राघवसन्निधिम् ॥ १६ ॥

अन्वयः—(हे देवि !) काकुत्स्थं मुदा संयुहि । स्वयं च सम्मदम् आप्नुहि । त्वं मुहूर्तात् ऊर्ध्वं राघवसन्निधिम् उपेहि ॥

व्याख्या—(हे देवि !) काकुत्स्थं=रामं, मुदा=हर्षेण, संयुहि=मिश्रय, मोदयेति भावः । त्वमिति शेषः । स्वयं च सम्मदं=हर्षम्, आप्नुहि=प्राप्नुहि । त्वं, मुहूर्तात् ऊर्ध्वं=किञ्चित्कालात् अनन्तरं, राघवसन्निधिं=रामसमीपम्, उपेहि=गच्छ, अतः परं बहुकालव्यवधाने रामचिरक्केराशङ्का स्यादिति भावः ॥

व्युत्पत्तिः—संयुहि=सम्पूर्वकात् 'यु मिश्रणाऽमिश्रणयोः' इति आदादिकाद्धातोर्लोट्, शपो लुक् हेर्ङित्वान्न गुणः । सम्मदं=सम्पूर्वकात् 'मदी हर्षे' इति धातोः 'प्रमदसम्मदौ हर्षे' इति अप्प्रत्ययाऽन्तो निपातः 'मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः ।' इत्यमरः । राघवसन्निधिं=सन्निधानं सन्निधिः, 'उपसर्गे घोः किः' इति भावे किः । राघवस्य सन्निधिस्तम् । उपेहि=उपपूर्वकात् 'इण् गतौ' इति धातोः प्रार्थनायां लोट् ॥

भाषाऽर्थः—हे देवि ! रामचन्द्रजीको प्रसन्न कीजिए । आप स्वयम् भी हर्षको प्राप्त कीजिए । आप मुहूर्त्तके अनन्तर रामचन्द्रजीके पास प्राप्त हों ॥ १६ ॥

ऊर्ध्वं मुहूर्तादह्नोऽङ्ग ! स्वामिनी स्म भव क्षितेः ।
राजपत्नीनियोगस्थमनुशाधि पुरीजनम् ॥ १७ ॥

अन्वयः—अङ्ग ! अह्नो मुहूर्तात् ऊर्ध्वं क्षितेः स्वामिनी भव स्म; राजपत्नीनियोगस्थं पुरीजनम् अनुशाधि ॥

व्याख्या—अङ्ग=हे देवि !, अह्नः=दिनस्य, मुहूर्ताद्=किञ्चित्कालात्, ऊर्ध्वम्=अनन्तरमिति भावः । क्षितेः=पृथिव्याः, स्वामिनी=अधीश्वरी, भव स्म=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अर्थः; राजपत्नीनियोगस्थं राज्ञीनिदेशवर्तिनं, मल्लिनाथस्तु राजपत्नी त्वं नियोगस्थमिति व्यस्तपाठमाह । पुराजनम् = अयोध्यानगरीवासिजनम्, अनुशाधि = कर्मसु नियुङ्क्ष्व ॥

व्युत्पत्तिः—अङ्ग = अव्ययसंज्ञकं पदमेतत्, 'अथ सम्बोधनाऽर्थकाः । स्युः पाट् प्याडङ्ग हे हे भोः' इत्यमरः । अत्र स्म = 'स्मे लोट्' इति स्मशब्दोपपदात् ऊर्ध्वमौहूर्तिकाऽर्थात् प्राप्तकाले लोट्, भवत्या महिषीभावः प्राप्ताऽवसर इति भावः । नियोगे तिष्ठतीति नियोगस्थः । राजपत्न्या नियोगस्थस्तम् । अनुशाधि अनुपूर्वकात् 'शासु अनुशिष्टौ' इति धातोः प्रार्थनायां लोट् 'शा हौ' इति शादेशः । तस्याऽसिद्धवद्भावे 'हुझल्भ्यो हेर्धिः' इति धिः ।

भाषाऽर्थः—हे देवि ! दिन के कुछ मुहूर्तके अनन्तर पृथिवीकी स्वामिनी होने का आपका अवसर है । आप महारानीकी आज्ञाका पालन करनेवाले अयोध्याके प्रजाजनका अनुशासन करें ॥ १७ ॥

उत्तिष्ठस्व मते पत्युर्यतस्वाऽलङ्कृतौ तथा ।
प्रतिष्ठस्व च तं द्रष्टुं द्रष्टव्यं त्वं महीपतिम् ॥ १८ ॥

अन्वयः—(हे देवि !) पत्युः मते उत्तिष्ठस्व, तथा अलङ्कृतौ यतस्व; त्वं द्रष्टव्यं तं महीपतिं द्रष्टुं प्रतिष्ठस्व ॥

व्याख्या—(हे देवि !) पत्युः = भर्तुः, रामस्येत्यर्थः । मते = सम्मते विषये आगमनरूप इति भावः । उत्तिष्ठस्व = उत्सहस्वेत्यर्थः । उत्थानमुत्साहः । तथा = तेन प्रकारेण, अलङ्कृतौ = अलङ्करणे, यतस्व = यत्नं कुरु । त्वं, द्रष्टव्यं = दर्शनाऽर्हं, तं = पूर्वोक्तं, महीपतिं = राजानं, राममिति भावः । द्रष्टुं = विलोकयितुं, प्रतिष्ठस्व = प्रयाहि ॥

व्युत्पत्तिः—उत्तिष्ठस्व = उत्पूर्वकात्स्थाधातोः 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदम् । अलङ्कृतौ = अलङ्करणम् अलङ्कृतिस्तस्याम्, 'स्त्रियां क्तिन्' इति क्तिन् । यतस्व = 'यती प्रयत्ने' इति धातोर्लोट् । द्रष्टव्यं = द्रष्टुमर्हो द्रष्टव्यस्तं, 'दृशिर् प्रेक्षणे' इति धातोः 'तव्यत्तव्याऽनीयरः' इति तव्यप्रत्ययः 'सृजिदृशोर्झल्यमकिति' इत्यमागमः । प्रतिष्ठस्व = प्रपूर्वकात् स्थाधातोः 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम्; प्रार्थनायां लोट् ।

भाषाऽर्थः—हे देवि ! पतिके अभिप्रायके विषयमें आप उत्साह करें और भूषण धारण करनेके लिए प्रयत्न करें । आप दर्शनके योग्य महाराज रामचन्द्रजीके दर्शन के लिए प्रस्थान कीजिए ॥ १८ ॥

अनुष्ठाय यथोद्दिष्टं नियोगं जनकाऽऽत्मजा ।
समारूढवती यानं पट्टांऽशुकवृताऽऽनना ॥ १९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—जनकाऽऽत्मजा यथोद्दिष्टं नियोगम् अनुष्ठाय पट्टांऽशुकवृताऽऽनना (सती) यानं समारूढवती ॥

व्याख्या—जनकाऽऽत्मजा = सीता, यथोद्दिष्टं = यथोक्तं, नियोगं = स्नानादिकं भर्त्रादेशम्, अनुष्ठाय = कृत्वा, पट्टांशुकवृताऽऽनना = पट्टवस्त्रसंवृतमुखी सती यानं = शिबिकां, समारूढवती = समारूढा ॥

व्युत्पत्तिः—यथोद्दिष्टम् = उद्दिष्टमनतिक्रम्येति पदाऽर्थाऽनतिवृत्तिरूपे यथाऽर्थेऽव्ययीभावः, पट्टांशुकवृताऽऽनना = पट्टांशुकेन वृतम् आननं यस्याः सा ॥

भाषाऽर्थः—सीताजीने पतिके यथोक्त स्नान आदि कार्यका अनुष्ठान कर रेशमी वस्त्रसे मुखको आच्छादित कर पालकी पर आरोहण किया ॥ १९ ॥

लज्जाऽनता विसंयोगदुःखस्मरणविह्वला ।
साऽस्रा गत्वाऽन्तिकं पत्युर्दीना रुदितवत्यसौ ॥ २० ॥

अन्वयः—लज्जाऽऽनता विसंयोगदुःखस्मरणविह्वला साऽस्रा दीना असौ पत्युः अन्तिकं गत्वा रुदितवती ॥

व्याख्या—लज्जाऽऽनता = व्रीडाऽवनता, विसंयोगदुःखस्मरणविह्वला = वियोगपीडास्मृतिविक्लवा, साऽस्रा = सवाष्पा, दीना = शोचनीया, असौ = सीता, पत्युः = भर्तुः, रामस्येत्यर्थः । अन्तिकं = समीपं, गत्वा = प्राप्य, रुदितवती = परिदेवितवती ॥

व्युत्पत्तिः—लज्जाऽऽनता = लज्जया आनता । विसंयोगदुःखस्मरणविह्वला = विसंयोगस्य दुःखं, तस्य स्मरणं, तेन विह्वला । पत्युः = 'ख्यत्यात्परस्य' इत्युः । रुदितवती = रुद धातोः 'निष्ठे' तिक्तवतुप्रत्ययः, 'उगितश्चे'ति ङीप् ॥

भाषाऽर्थः—लज्जासे अवनत होकर वियोगके दुःखके स्मरणसे विह्वल, आँखोंमें आँसू भरती हुई सीताजी पति (राम) के समीप जाकर विलाप करने लगीं ॥२०॥

प्राप्तचारित्र्यसन्देहस्ततस्तामुक्तवान् नृपः ।
इच्छा मे नाऽऽददे सीते ! त्वामहं गम्यतामतः ॥ २१ ॥

अन्वयः—ततो नृपः प्राप्तचारित्र्यसन्देहः (सन्) ताम् उक्तवान्—'हे सीते ? मे इच्छा, त्वाम् न आदद अतः गम्यताम् ॥

व्याख्या—ततः = सीताऽऽगमनाऽनन्तरं, नृपः = राजा, राम इत्यर्थः । प्राप्तचारित्र्यसन्देहः = सीतापातिव्रत्यसन्दिग्धः सन् ; तां = सीताम्, उक्तवान् = अकथयत् । किमिति—हे सीते = हे जानकि ! मे = मम, इच्छा = काङ्क्षा, वक्ष्यमाणस्वरूपोऽभिलाषोऽस्तीति भावः । तत्स्वरूपमाह—त्वां = भवतीं, न आददे = नो गृह्णामि । मल्लिनाथस्तु 'इच्छाता नाऽऽददे' इति पाठमाह । अतः = अस्मा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कारणात्, मम स्वपरिग्रहेच्छाऽभावादिति भावः। गम्यतां=यथेच्छं गमनं क्रियताम्॥

व्युत्पत्तिः—प्राप्तचारित्र्यसन्देहः=चरित्रमेव चारित्र्यं, स्वार्थे ष्यञ्। प्राप्तः चारित्र्ये सन्देहो येन सः। आददै=आङ्पूर्वकात् 'डुदाञ् दाने' इति धातोः 'इच्छाऽर्थेषु लिङ्लोटौ' इति लोटि आत्मनेपदम्, 'एत ऐ' इत्येकारस्योत्तमस्यैकारः। गम्यतां=गम्धातोर्भावे लोट्॥

भाषाऽर्थः—तब राजा रामने सीताके चरित्रमें सन्दिग्ध होकर उन्हें कहा—'हे सीते! मेरी इच्छा है कि तुम्हें स्वीकार नहीं करूंगा; इस लिए जहां जाने की इच्छा हो चली जाओ॥ २१॥

रावणाऽङ्कपरिक्लिष्टा त्वं हृल्लेखकरी मम।
मतिं बधान सुग्रीवे राक्षसेन्द्रं गृहाण वा॥ २२॥

अन्वयः—रावणाऽङ्कपरिक्लिष्टा त्वं मम हृल्लेखकरी। सुग्रीवे मतिं बधान वा राक्षसेन्द्रं गृहाण॥

व्याख्या—स्वस्येच्छाऽभावे हेतुमाह—रावणाङ्केत्यादि। रावणाऽङ्कपरिक्लिष्टा=दशाऽऽननोत्सङ्गपरिमृदिता, त्वं=सीता, मम=पत्युः, रामस्येति भावः। हृल्लेखकरी=मनोव्यथाकारिणी, जातेति शेषः। अतो नेच्छामीति भावः। का तर्हि मे गतिरिति आह—मतिमित्यादि। सुग्रीवे=वानरराजे, मतिं=बुद्धिं, 'प्रीतम्' इति मल्लिनाथसम्मतः पाठस्तत्र प्रेमेत्यर्थः। बधान=कुर्विति भावः। वा=अथवा, राक्षसेन्द्रं=राक्षसराजं, विभीषणमिति भावः। गृहाण=स्वीकुरु॥

व्युत्पत्तिः—रावणाऽङ्कपरिक्लिष्टा=रावणस्याऽङ्के परिक्लिष्टा, 'उत्सङ्गचिह्नयोरङ्कः' इत्यमरः। हृल्लेखकरी=हृदयं लिखतीति हृल्लेखः, 'कर्मण्यण्'। 'हृदयस्य हृल्लेखयदण्लासेषु' इति अणि हृदयस्य हृद्भावः। हृल्लेखं करोतीति, 'कृञो हेतुताच्छील्याऽऽनुलोम्येषु' इति हेतावानुलोम्ये वा टप्रत्ययः। टित्वात् 'टिड्ढाणञि' त्यादिना ङीप्। बधान='बन्ध बन्धने' इति धातोर्लोट् 'हलः श्नः शानज्झौ' श्नः शानजादेशः। गृहाण='ग्रह उपादाने' इति धातोर्लोट् पूर्ववच्छानजादेशः॥

भाषाऽर्थः—रावणकी गोदमें परिमृदित तुम मेरे हृदयमें दुःख पैदा करने वाली हो गयी हो। हे सीते! इस लिए तुम सुग्रीवमें बुद्धि करो वा राक्षसराज विभीषण को स्वीकार करो॥ २२॥

अशान भरताद्भोगान् लक्ष्मणं प्रवृणीष्व वा।
कामाद्वा याहि मुच्यन्तामाशा रामनिबन्धनाः॥ २३॥

अन्वयः—(हे सीते!) भरतात् भोगान् अशान, वा लक्ष्मणं प्रवृणीष्व; वा कामात् याहि रामनिबन्धना आशा मुच्यन्ताम्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—(हे सीते !) भरतात् = कैकयीपुत्रात्, भोगान् = सुखानि, अशान = भुङ्क्ष्व, वा = अथवा, लक्ष्मणं = सौमित्रिं, प्रवृणीष्व = अङ्गीकुरु । वा = अथवा, कामात् = इच्छायाः, याहि = गच्छ, यथेच्छं गच्छेति भावः । रामनिबन्धनाः = मद्विषयाः, आशाः = कामाः, मुच्यन्ताम् = त्यज्यन्ताम् ॥

व्युत्पत्तिः—अशान = 'अश भोजने' इति धातोर्लोट्, 'हलः श्नः शानज्झौ' इति शानजादेशः, हेर्लुक् च । प्रवृणीष्व = प्रपूर्वकात् 'वृञ् वरणे' इति क्र्यादिक-धातोर्लोट् । रामनिबन्धनाः = रामो निबन्धनं यासां ताः । मुच्यन्तां = 'मुच्लृ मोक्षण' इति धातोः कर्मणि लोट् । सर्वत्र 'प्रैषाऽतिसर्गप्राप्तकालेषु कृत्याश्चे' ति अतिसर्गे (कामचाराऽनुज्ञायाम्) लोट् ॥

भाषाऽर्थः—हे सीते ! तुम भरतसे सुखोंका उपभोग करो अथवा लक्ष्मणको स्वीकार करो वा जहाँ इच्छा है वहाँ चली जाओ । अब तुम रामके विषयमें आशाओं को छोड़ो ॥ २३ ॥

क्व च ख्यातो रघोर्वंशः क्व त्वं परगृहोषिता ।
अन्यस्मै हृदयं देहि नाऽनभीष्टे घटामहे ॥ २४ ॥

अन्वयः—ख्यातो रघोः वंशः क्व ? परगृहोषिता त्वं च क्व ? (हे सीते !) अन्यस्मै हृदयं देहि, अनभीष्टे न घटामहे ॥

व्याख्या—ख्यातः = प्रसिद्धः, निष्कलङ्कत्वेनेति भावः । रघोः = तन्नाम्नो राज्ञः, वंशः = कुलं, क्व = कुत्र, परगृहोषिता = अन्यगेहस्थिता, कलङ्कितेति भावः । त्वं च = सीता च, क्व = कुत्र, उभयोर्महदन्तरमतो योगो न घटत इति भावः । अतो विषमाऽलङ्कारः । हे सीते, अतः अन्यस्मै = अपरपुरुषाय, हृदयं = चित्तं देहि = समर्पय, मत्तो जनान्तरं भजेति भावः । यतः—अनभीष्टे = अनभिमते विषये, न घटामहे = न युज्यामहे, वयमिति शेषः ॥

व्युत्पत्तिः—ख्यातः = 'प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ।' इत्यमरः । देहि, घटामहे = उभयत्राऽपि 'प्रैषाऽतिसर्गप्राप्तकालेषु कृत्याश्चे'ति अतिसर्गे (कामचाराऽनुज्ञायाम्) लोट् ॥

भाषाऽर्थः—हे सीते ! रघुका प्रसिद्ध वंश कहाँ और परगृहवाससे कलङ्कित तुम कहाँ ? इसलिए तुम दूसरे पुरुषको अपना हृदय सौंपो, हमलोग अनभीष्ट विषयमें प्रवृत्त नहीं होते हैं ॥ २४ ॥

यथेष्टं चर वैदेहि ! पन्थानः सन्तु ते शिवाः ।
कामास्तेऽन्यत्र तायन्तां विशङ्कां त्यज मद्गताम् ॥ २५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे वैदेहि ! यथेष्टं चर, ते पन्थानः शिवाः सन्तु, ते कामा अन्यत्र तायन्तां, मद्गतां विशङ्कां त्यज ॥

व्याख्या—हे वैदेहि = हे सीते !, यथेष्टं = यथाऽभिलषितं, चर = आचर, यथेष्टचारिणी भवेति भावः। ते = तव, पन्थानः = मार्गाः; शिवाः = निर्विघ्नाः, सन्तु = वर्तन्ताम् । ते = तव, कामाः = अभिलाषाः, अन्यत्र = अन्यस्मिन्, पुरुषान्तर इति भावः । तायन्तां = वर्द्धन्तां, मद्गतां = मया· करिष्यमाणां, विशङ्काम् = अनिष्टागमशङ्कां, त्यज = मुञ्च; समयोऽयं सन्देहत्यागस्येति भावः ॥

व्युत्पत्तिः—चर = अतिसर्गे (कामचाराऽनुज्ञायाम्) लोट् । शिवाः = शिवमस्ति एषां ते शिवाः, 'अर्शआदिभ्योऽच्' इत्यच्प्रत्ययः, 'श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ।' इत्यमरः। सन्तु = 'अस भुवि' इति धातोः 'आशिषि लिङ्लोटौ' इत्याशिषि लोट्। तायन्तां = 'तायृ सन्तानपालनयोः' अतिसर्गे लोट् । त्यज = प्राप्तकाले लोट् ॥

भाषाऽर्थः = हे सीते ! यथेष्ट आचरण करो, तुम्हारे मार्ग निर्विघ्न हों; तुम दूसरे पुरुषोंमें अभिलाष बढ़ाओ मेरे विषयमें भय छोड़ो ॥ २५ ॥

ततः प्रगदिता वाक्यं मैथिलाऽभिजना नृपम् ।
स्त्रीसामान्येन सम्भूता शङ्का मयि विमुच्यताम् ॥ २६ ॥

अन्वयः = ततो मैथिलाऽभिजना नृपं वाक्यं प्रगदिता—'(हे नाथ !) स्त्रीसामान्येन संभूता शङ्का मयि विमुच्यताम् ॥

व्याख्या—ततः = रामवचनाऽनन्तरं, मैथिलाऽभिजना = सीता, नृपं = राजानं, राममित्यर्थः । वाक्यं = वचनं वक्ष्यमाणरूपमिति भावः । प्रगदिता = प्रगदितुं प्रवृत्ता । किं तदित्याह—स्त्रीसामान्येनेति । (हे नाथ !) स्त्रीसामान्येन = योषित्साधारणेन, संभूता = सञ्जाता, 'स्त्रियश्चपला' इति प्रवादात्समुत्पन्नेति भावः । शङ्का = अविश्वासः, मयि = मद्विषय, विमुच्यतां = त्यज्यताम् ॥

व्युत्पत्तिः—मैथिलाऽभिजना = मैथिलोऽभिजनो यस्याः सा । प्रगदिता = प्रपूर्वकाद् 'गद व्यक्तायां वाचि' इति धातोः 'आदि कर्मणि क्तः कर्तरि च' इति आदिकर्मणि क्तप्रत्ययः । विमुच्यतां = विपूर्वकात् 'मुच्लृ मोक्षण' इति धातोः कर्मणि प्रार्थनायां लोट् ॥

भाषाऽर्थः—तब सीताजी राजारामको वाक्य कहने लगीं—हे नाथ ! 'स्त्रियां चञ्चल हैं' इस प्रवादसे उत्पन्न अविश्वास मेरे विषयमें छोड़ दीजिए ॥ २६ ॥

दैवाद् बिभीहि काकुत्स्थ ! जिह्रीहि त्वं तथा जनात् ।
मिथ्या मामभिसंक्रुध्यन्नवशां शत्रुणा हृताम् ॥ २७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे काकुत्स्थ ! शत्रुणा हताम् अवशां मां मिथ्या अभिसंक्रुध्यन् दैवात् बिभीहि, तथा जनात् जिह्रीहि ॥

व्याख्या—हे काकुत्स्थ = हे रावण !, शत्रुणा = वैरिणा, रावणेनेत्यर्थः । हताम् = बलादपहृताम्, अतएव अवशां = विवशां, पराधीनामिति भावः । मां = सीतां, मिथ्या = मृषा, अभिसंक्रुध्यन् = 'असती त्वम्' इति क्रुध्यन्निति भावः । दैवात् = भाग्यात्, बिभीहि = भयं कुरु, तथा = तेन प्रकारेण, जनात् = जनं वीक्ष्य, जिह्रीहि = लज्जस्व, पारतन्त्र्यमात्रदोषयुक्तां सतीं मा दूषयता त्वया दैवाद्भेतव्यं लोकतो ह्रेतव्यं चेति भावः ॥

व्युत्पत्तिः—माम् = अभिसमुपसर्गपूर्वकस्य क्रुधधातोर्योगे 'क्रुधद्रुहोरुपसृष्टयोः कर्मे'ति सम्प्रदानत्वाऽपवादेन कर्मत्वम् । बिभीहि = 'ञिभी भये' इति जौहोत्यादिकाद्धातोर्लोट् । 'सेर्ह्यपिच्चे'ति ह्रेर्ङित्त्वान्न गुणः । जनात् = 'ल्यब्लोपे कर्मण्युपसंख्यानम्' इति ल्यबलोपे पञ्चमी । जिह्रीहि = 'ह्री लज्जायाम्' इति धातोर्लोट्, पूर्ववद्ङित्वान्न गुणः ॥

भावार्थः—हे राम ! बलपूर्वक शत्रुसे अपहृत अतएव पराऽधीन मुझे 'तुम असती हो' ऐसा कहकर झूठमूट क्रोध करते हुए आप भाग्यसे डरें और लोकसे लज्जित भी हों ॥ २७ ॥

चेतसस्त्वयि वृत्तिर्मे शरीरं रक्षसा हृतम् ।
विदांकुर्वन्तु सम्यञ्चो देवाः सत्यमिदं वचः ॥ २८ ॥

अन्वयः—(हे राघव !) त्वयि मे चेतसो वृत्तिः । शरीरं रक्षसा हृतम् । सम्यञ्चो देवाः इदं वचः सत्यं विदाङ्कुर्वन्तु ॥

व्याख्या—सीताऽऽत्मनः सतीत्वं प्रतिपादयति—चेतस इति । (हे राघव !) त्वयि = भवति, विषये मे = मम, चेतसः = मनसः, वृत्तिः = व्यापारः, अस्तीति शेषः । शरीरं = देह एव, रक्षसा = राक्षसेन रावणेन, हृतम् = अपहृतम् । सम्यञ्चः = समवर्तिनः, देवाः = सुराः पृथिव्यादय इति भावः । इदम् = एतद्, वक्ष्यमाणरूपमिति भावः । वचः = वाक्यं, सत्यं = तथ्यं विदाङ्कुर्वन्तु = विदन्तु, देवा एव मच्चरित्रपवित्रतायां साक्षिण इति भावः ॥

व्युत्पत्तिः—सम्यञ्चः = सम्यगञ्चन्तीति, संपूर्वकात्, 'अञ्चु गतिपूजनयोः' इति धातोः 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च'ति क्विन् 'समः समि' इति सम्यादेशः । विदाङ्कुर्वन्तु = 'विद ज्ञाने' इति धातोः प्रार्थनायां लोट् 'विदाङ्कुर्वन्त्वित्यन्यतरस्याम्' इति विकरणाभावाम्प्रत्ययादिनिपातनात्साधुत्वम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषार्थः—हे राम ! आपमें मेरी मनोवृत्ति है, केवल मेरे शरीरका राक्षसने अपहरण किया है। समवर्ती देवतागण इस मेरे वाक्यको सत्य जान लें ॥ २८ ॥

त्वं पुनीहि पुनीहीति पुनन्वायो ! जगत्त्रयम् ।
चरन्देहेषु भूतानां विद्धि मे बुद्धिविप्लवम् ॥ २९ ॥

अन्वयः—हे वायो ! पुनीहि पुनीहि इति जगत्त्रयं पुनन् त्वं भूतानां देहेषु चरन् मे बुद्धिविप्लवं विद्धि ॥

व्याख्या—सीता साम्प्रतं तानेव देवानेकैकशः प्रार्थयते त्वमिति। हे वायो= हे वात ! पुनीहि पुनीहि इति=पुनः पुनः भृशं वा पुनामि इति, जगत्त्रयं=लोकत्रितयं, स्वर्गमर्त्यपातालरूपमिति भावः। पुनन्=शोधयन्, त्वं=वायुदेवः, भूतानां= प्राणिनां, 'जन्तूनाम्' इति मल्लिनाथसम्मतः पाठः। देहेषु=शरीरेषु, चरन्= वर्तमानः, मे=मम, बुद्धिविप्लवं=चित्तदोषं, विद्धि=जानीहि, ज्ञानोत्तरं तत्फलं प्रापयेति भावः ॥

व्युत्पत्तिः—पुनीहि पुनीहि इति='पूञ् पवने' इति क्रैयादिकधातोः 'क्रियासमभिहारे लोड् लोटो हिस्वौ वा च तध्वमोः' इति लोट्, तस्य च सर्वत्र वैकल्पिकौ सर्वलकाराऽपवादिनौ हिस्वावादेशौ, तत्र च परस्मैपदे हिरादेशः, 'क्रियासमभिहारे द्वे वाच्ये' इति वचनाद् द्वित्वं 'यथाविध्यनुप्रयोगः पूर्वस्मिन्' इति पुनन्' इत्यत्र पुनातेरनुप्रयोगः। विद्धि=विदधातोः प्रार्थनायां लोट् ॥

भाषाऽर्थः—हे वायुदेव ! बारं बार वा अतिशय पवित्र करता हूँ ऐसा विचार कर तीन लोकोंको पवित्र करते हुए आप प्राणियोंके शरीरमें विद्यमान होते हुए मेरे चित्तके दोषको जान लें ॥ २९ ॥

खमट द्यामटोर्वीमटेत्यटन्त्योऽतिपावनाः ।
यूयमापो ! विजानीत मनोवृत्तिं शुभां मम ॥ ३० ॥

अन्वयः—हे अतिपावना आपः ! खम् अट, द्याम् अट, उर्वीम् अट इति अटन्त्यो यूयं मम मनोवृत्तिं शुभां विजानीत ॥

व्याख्या—हे अतिपावनाः=हे अतिशयशुद्धिकारिकाः, आपः=जलानि, खम् अट=अन्तरीक्षलोकम् अट, द्याम् अट=स्वर्गम् अट, उर्वीम् अट=पृथिवीम् अट, इति=अन्तरीक्षादित्रयमटाम इत्येव, अटन्त्यः=अटनं कुर्वत्यः 'यूयम्= आपः, मम=सीतायाः, मनोवृत्तिं=चेतोव्यापारं, शुभां=शुद्धां, विजानीत=वित्त ॥

व्युत्पत्तिः—अतिपावनाः=अत्यन्तं पावयन्ति (शोधयन्ति) इति अतिपावनाः, णिजन्तात् 'पूञ् पवने' इति धातोः 'कृत्यल्युटो बहुलम्' इति बहुलग्रहण-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सामर्थ्यात् कर्तरि ल्युट् । अत्र टित्वात् 'टिड्ढाणञ्' इत्यादिना ङीबभावश्चिन्त्य इति मल्लिनाथः । अथवा—अत्यन्तं पावनं (शोधकं, शोधकत्वधर्मः यासु ताः । अत्र पक्षे 'अनुपसर्जनात्' इत्यस्याऽधिकाराद् पूर्वसूत्रेण ङीबभावः ।) खम् अट, द्याम् अट, उर्वीम् अटेति अटन्यः तत्र अन्तरीक्षस्वर्गपृथिवीरूपकर्मकारकभेदैरटनक्रियाभेदादनेकक्रियोपलक्षणसमुच्चयसंभवात् 'समुच्चयेऽन्यतरस्याम्' इति लोट् लोटो यथायोगं हिस्वौ च 'समुच्चये सामान्यवचनस्ये' त्यत्र पूर्वोक्ताऽटनक्रियाविशेषाऽनुगताऽटनक्रियासामान्यस्याऽनुप्रयोगः । विजानीत='ज्ञा अवबोधने' इति धातोः प्रार्थनायां लोट् , थस्य च ताऽऽदेशः ॥

भावार्थः—हे अतिशय शुद्धि करनेवाले जलदेव तुम 'अन्तरीक्ष लोकमें, स्वर्ग लोकमें और मर्त्यलोकमें हम भ्रमण करेंगे' ऐसा अभिप्राय रखकर भ्रमण करते हुए मेरी मनोवृत्तिको शुद्ध जान लो ॥ ३० ॥

जगन्ति धत्स्व धत्स्वेति दधती त्वं वसुन्धरे ! ।
अवेहि मम चारित्रं नक्तंदिवमविच्युतम् ॥ ३१ ॥

अन्वयः—हे वसुन्धरे ! धत्स्व धत्स्व इति जगन्ति दधती त्वं मम चारित्रं नक्तन्दिवम् अविच्युतम् अवेहि ॥

व्याख्या—हे वसुन्धरे=हे पृथिवि !, धत्स्व धत्स्व इति=अहं पुनः पुनर्धारयामि भृशं वा धारयामीत्येव, जगन्ति=लोकान् , दधती=धारयन्ती, त्वं=वसुन्धरा, मम = सीतायाः, चारित्रं=चरित्रं, नक्तन्दिवं=रात्रिन्दिवम् , अविच्युतम्= कदाऽपि अस्खलितम् , अवेहि = जानीहि ॥

व्युत्पत्तिः—वसुन्धरे = वसूनि धारयतीति वसुन्धरा, तस्सम्बुद्धौ । 'संज्ञायां भृतॄवृजिधारिसहितपिदमः' इति खच् , 'खचि ह्रस्व' इति ह्रस्वत्वम् । धत्स्व धत्स्व इति = अत्र 'क्रियासमभिहारे लोड् लोटो हिस्वौ वा च तध्वमोः' इति लोट् प्रक्रियान्तरं पूर्ववद्बोध्यम् । धातोरात्मनेपदित्वाल्लोटः स्वादेशः । चरित्रं=चरित्रमेव चारित्रं, तत् , स्वाऽर्थेऽण् । नक्तन्दिवं = नक्तं च दिवा चेति, 'अचतुरे' त्यादिनाऽच्प्रत्ययान्तो निपातः । अवेहि = प्रार्थनायां लोट् ॥

भावार्थ—हे पृथिवि ! फिर फिर मैं अतिशय धरती हूँ ऐसा अभिप्रायकर लोकोंको धारण करती हुई तुम मेरे चरित्र (पातिव्रत्य) को रात दिन अस्खलित जान लो ॥ ३१ ॥

रसान्संहर दीप्यस्व ध्वान्तं जहि नभो भ्रम ।
इतीहमानस्तिग्मांऽशो ! वृत्तं ज्ञातुं घटस्व मे ॥ ३२ ॥

अन्वयः—हे तिग्मांऽशो ! रसान् संहर, दीप्यस्व, ध्वान्तं जहि, नभो भ्रम, इति ईहमानः मे वृत्तं ज्ञातुं घटस्व ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—हे तिग्मांऽशो = हे सूर्य ! रसान् = उदकानि, संहर = संहरामि, दीप्यस्व = दीप्ये, ध्वान्तं = तिमिरं, जहि = हन्मि, नभः = आकाशं, भ्रम = भ्रमामि, इति = इत्थम्, ईहमानः = चेष्टमानः, लोकहिताऽर्थमिति शेषः। त्वमिति शेषः। मे = मम, वृत्तं = चरितं, पातिव्रत्यरूपमिति भावः। ज्ञातुं = वेत्तुं घटस्व = प्रवर्तस्वेत्यर्थः॥

व्युत्पत्तिः—तिग्मांऽशो = तिग्मा अंशवो यस्य स तिग्मांशुस्तत्सम्बुद्धौ। संहर· दीप्यस्व, जहि, भ्रम = प्रार्थनायां लोट्। अत्र 'समुच्चयेऽन्यतरस्याम्' इति संहरा· द्यनुगतसामान्यस्य ईहनस्य 'समुच्चये सामान्यवचनस्ये'ति अनुप्रयोगः। वृत्तं = 'वृत्तं पद्ये चरित्रे च'त्यमरः॥

भाषाऽर्थः—हे सूर्य जलोंका संहार करता हूँ, प्रकाशित होता हूँ, अन्धकारको नष्ट करता हूँ, आकाशमें भ्रमण करता हूं, ऐसी चेष्टा करते हुए मेरे चरित्रको जान· नेके लिए आप प्रवृत्त हों ॥ ३२॥

स्वर्गे विद्यस्व भुव्याऽऽस्स्व भुजङ्गनिलये भव।
एवं वसन्ममाऽऽकाश! संबुध्यस्व कृताऽकृतम् ॥ ३३ ॥

अन्वयः—हे आकाश! स्वर्गे विद्यस्व, भुवि आस्स्व, भुजङ्गनिलये भव, एवं वसन् मम कृताऽकृतं संबुध्यस्व ॥

व्याख्या—हे आकाश = हे पुष्कर!, स्वर्गे = सुरलोके, विद्यस्व = विद्ये, अह· मिति शेषः, एवं परत्राऽपि। भुवि = पृथिव्याम्; आस्स्व = आसे, भुजङ्गनिलये = पाताले, भव = भवामि, एवम् = इत्थं, वसन् = तिष्ठन्, त्वमिति शेषः। 'सत्त्वम्' इति मल्लिनाथसंमतः पाठस्तत्र सत् = वर्तमानं, त्वम् = आकाशमित्यर्थः। मम = सीतायाः, कृताऽकृतं = विहितमविहितं च कर्म, संबुध्यस्व = सम्यगवगच्छ॥

व्युत्पत्तिः—विद्यस्व, आस्स्व, भव=अत्र 'विद सत्तायाम्' 'आस उपवेशने' 'भू सत्तायाम्' इति धातोः 'समुच्चयेऽन्यतरस्याम्' इति लोट्, लोटो यथायोगं हिस्वौ च, 'वसन्' इति 'समुच्चये सामान्यवचनस्य' इत्यनुप्रयोगः। कृताऽकृतं = कृतं च अकृतं च, 'विप्रतिषिद्धं चाऽनधिकरणवाचि' इति वैभाषिको द्वन्द्वकव· द्भावः। संबुध्यस्व = प्रार्थनायां लोट्॥

भाषाऽर्थः—हे आकाश! 'मैं स्वर्गमें, पृथिवीमें और पातालमें रहता हूं, ऐसा अभिप्राय कर रहते हुए आप मेरे विहित और अविहित कर्मको जान लें। ३३॥

चितां कुरु च सौमित्रे! व्यसनस्याऽस्य भेषजम्।
रामस्तुष्यतु मे वाऽद्य पापां प्लुष्णातु वाऽनलः॥ ३४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्वयः—हे सौमित्रे ! अस्य व्यसनस्य भेषजं चितां कुरु । अद्य रामो मे तुष्यतु वा पापाम् अनलः प्लुष्णातु ॥

व्याख्या—हे सौमित्रे = हे लक्ष्मण !, अस्य = उपस्थितस्य, व्यसनस्य = दूषणस्य, लोकाऽपवादरूपस्येति भावः । भेषजम् = औषधं प्रतिकारमित्यर्थः । चितां = काष्ठसञ्चयं, कुरु = विधेहि । अद्य = अस्मिन्दिने, रामः = रामचन्द्रः, मे = मम, विषय इति भावः । तुष्यतु = तुष्टो भवतु, निष्पापाऽस्मि चेदिति शेषः । वा = अथवा, पापां = कलङ्किनीं, मामिति शेषः । 'पापात्' इति मल्लिनाथसंमतः पाठः । अनलः = अग्निः, प्लुष्णातु = दहतु, अहं निष्पापाऽस्मि चेदनलो मां न दहतु, सपापाऽस्मि चेत्तु मां दहत्विति तात्पर्यम् ॥

व्युत्पत्तिः—सौमित्रे = सुमित्राया अपत्यं पुमान् सौमित्रिस्तत्संबुद्धौ, 'बाह्वादिभ्यश्चे'ति इञ् । व्यसनस्य = 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे ।' इत्यमरः । कुरु = विधौ प्रार्थनायां वा लोट् । प्लुष्णातु = (प्रुष) प्लुष स्नेहनमोचनपूरणेषु' इति क्र्यादिकधातोर्लोट् ॥

भाषाऽर्थः—हे लक्ष्मणजी ! इस दूषणका प्रतीकाररूप चिताकी रचना कीजिए । आज मुझपर रामचन्द्रजी सन्तुष्ट हों वा पापिनी मुझे अग्निदेव जला दें ॥ ३४ ॥

राघवस्य मतेनाऽथ लक्ष्मणेनाऽऽचितां चिताम् ।
दृष्ट्वा प्रदक्षिणीकृत्य रामं प्रगादिता वचः ॥ ३५ ॥

अन्वयः—अथ राघवस्य मतेन लक्ष्मणेन आचितां चितां दृष्ट्वा (सीता) प्रदक्षिणीकृत्य रामं वचः प्रगादिता ॥

व्याख्या—अथ = सीताप्रार्थनाऽनन्तरं, राघवस्य = रामचन्द्रस्य, मतेन = अनुज्ञया, लक्ष्मणेन = सौमित्रिणा, आचितां = रचितां, चितां = काष्ठसञ्चयं, दृष्ट्वा = अवलोक्य, प्रदक्षिणीकृत्य = प्रदक्षिणं कृत्वा, रामं = रामचन्द्रं, वचः = वचनं प्रगादिता = प्रगदितुं प्रवृत्ता, सीतेति शेषः ॥

व्युत्पत्तिः—राघवस्य = 'मतेने'ति वर्तमानाऽर्थक्तप्रत्ययाऽन्तेन पदेन योगे 'क्तस्य च वर्तमाने' इति षष्ठी । मतेन = 'मतिबुद्धिपूजाऽर्थेभ्यश्चे'ति वर्तमाने क्तः । प्रगादिता = प्रपूर्वकात् गदधातोः 'आदि कर्मणि क्तः कर्तरि चे'ति क्तप्रत्ययः । दीर्घकालव्यापकायाः कथाद्युत्पादनक्रियाया आरम्भकालविशिष्टोऽश आदिकर्म ॥

भाषाऽर्थः—सीताजी की प्रार्थनाके अ॰ रामचन्द्रजी की आज्ञासे लक्ष्मणजी से रचित चिताको देखकर सीताने प्रदक्षिण कर रामचन्द्रजी को ऐसा वचन कहने को आरम्भ किया ॥ ३५ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रवपाणि वपुर्वह्नौ रामाऽहं शङ्किता त्वया ।
सर्वे विदन्तु शृण्वन्तु भवन्तः सप्लवङ्गमाः ॥ ३६ ॥

अन्वयः—हे राम ! त्वया शङ्किता अहं वह्नौ वपुः प्रवपाणि सप्लवङ्गमाः सर्वे भवन्तः शृण्वन्तु विदन्तु च ॥

व्याख्या—हे राम = हे रामचन्द्र !, त्वया = भवता, शङ्किता = दुष्टेति सन्दिग्धा, अहं = सीता, वह्नौ = अग्नौ, वपुः = शरीरं, प्रवपाणि = प्रक्षिपाणि, सप्लवङ्गमाः = वानरसहिताः, इदं पूर्वप्रार्थितदेवरलोगणानामभ्युपलक्षणम् । सर्वे = सकलाः, भवन्तः = श्रीमन्तः, रामलक्ष्मणयोरादरार्थे बहुवचनमिदम् । शृण्वन्तु = आकर्णयन्तु, विदन्तु च = जानन्तु च ॥

व्युत्पत्तिः—प्रवपाणि = प्रपूर्वकात् 'डुवप् बीजसन्ताने' इति धातोरामन्त्रणे लोट् 'आनि लोट्' इति णत्वम् । सप्लवङ्गमाः = प्लवङ्गमैः सहिताः, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः, 'वोपसर्जनस्य' इति सहस्य सभावः । शृण्वन्तु, विदन्तु = प्रार्थनायां लोट् ॥

भाषाऽर्थः—हे राम ! आपसे शङ्कित मैं अग्निमें शरीरको फेंकती हूँ । वानरों के साथ सब आप लोग सुनें और जानें भी ॥ ३६ ॥

मां दुष्टां ज्वलितवपुः प्लुषाण वह्ने ! संरक्ष क्षतमलिनां सुहृद्यथा वा ।
एषाऽहं क्रतुषु वसोर्यथाऽऽज्यधारा त्वां प्राप्तां विधिवदुदीर्णदीप्तिमालम् ॥

अन्वयः—हे वह्ने ! दुष्टा (चेत्) मां ज्वलितवपुः (सन्) प्लुषाण, वा क्षतमलिनां (चेत्) सुहृत् यथा संरक्ष । एषा अहं क्रतुषु वसोः आज्यधारा यथा उदीर्णदीप्तिमालं त्वां विधिवत् प्राप्ता ॥

व्याख्या—हे वह्ने = हे अग्ने !, दुष्टां = दूषितां, चेत् , मां = सीतां, ज्वलितवपुः = दीप्तशरीरः सन् , प्लुषाण = दह, वा = अथवा, क्षतमलिनां = विशुद्धां चेत् , 'च्युतमलिनाम्' इति मल्लिनाथसम्मतः पाठः । सुहृत् यथा = मित्रम् इव, संरक्ष = आरक्ष ! एषा = अतिसन्निहिता, अहं = सीता, क्रतुषु = यज्ञेषु, वसोः = अग्नेः विष्णोर्वा, 'अथ किंदेवता वसोर्धारेति ?' 'अग्निर्हि वसुस्तस्यैषा धारा विष्णुर्वसुस्तस्यैषा धारा' इति श्रुतेः । आज्यधारा यथा = घृतधारा इव, उदीर्णदीप्तिमालम् = उद्गतज्वालासमूहं, त्वां = भवन्तं, विधिवत् = यथाशास्त्रं, प्राप्ता = आसादिता, यथा यज्ञेषु घृतधाराऽग्निं विष्णुं वाऽऽसादयति तथैवाऽहमपि नूनं त्वामासादयिष्यासीति सतीत्वदीप्तिप्रकाशितायाः सीताया उक्तिः । अत्रोपमोत्प्रेक्षयोः संसृष्टिः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—ज्वलितवपुः = ज्वलितं वपुर्यस्य सः । प्लुषाण = प्लुषधातोर्लिट्, 'हलः श्नः शानज्झौ' इति श्नः शानजादेशे हेर्लुक् । क्षतमलिनां = क्षतं मलिनं (मलीमसं, पापमिति भावः) यस्याः सा, ताम् । उदीर्णदीप्तिमालम् = उदीर्णा दीप्तिमाला यस्य स उदीर्णदीप्तिमालस्तम् ॥

भाषाऽर्थः—हे अग्निदेव ! मैं दुष्ट हूँ तो मुझे प्रदीप्त शरीर वाले आप जलाइये अथवा मैं विशुद्ध हूँ तो मित्र के समान हो मेरी रक्षा कीजिए। यह मैं (सीता) यज्ञों में अग्नि अथवा विष्णु की घृतधाराके सदृशहो प्रदीप्त ज्वालामालाओंसे युक्त आपको विधिपूर्वक प्राप्त हो जाती हूँ ॥ ३७ ॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये चतुर्थे तिङन्तकाण्डे लक्षणरूपे सप्तमः परिच्छेदः (वर्गः) तथा लक्ष्यरूपे कथानके सीताप्रत्याख्यानं नाम विंशतितमः सर्गः ॥

अथ एकविंशः सर्गः

अतः प्रभृति लृङ्विलासमाह । तत्र हेतुहेतुमद्भावादौ लिङ्निमित्ते क्रियाया अनिष्पत्तौ गम्यमानायां भूते भविष्यति च लृङ् भवति । तथा चोक्तं—'लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ' इति । कुतश्चिद्वैगुण्यात् क्रियाया अनिष्पत्तिः क्रियाऽतिपत्तिः, वैगुण्यं च सामग्र्यभावो विरुद्धप्रत्ययोपनिपातो वा ।

समुत्क्षिप्य ततो वह्निर्मैथिलीं राममुक्तवान् ।
काकुत्स्थ ! दयितां साध्वीं त्वमाशङ्किष्यथाः कथम् ॥ १ ॥

अन्वयः—ततो वह्निः मैथिलीं समुत्क्षिप्य रामम् उक्तवान्—'हे काकुत्स्थ ! त्वं साध्वीं दयितां कथम् आशङ्किष्यथाः ?

व्याख्या—ततः = सीताया वह्निप्रवेशाऽनन्तरं, वह्निः = अग्निः, मैथिलीं = सीतां, समुत्क्षिप्य = हस्ताभ्यामूर्ध्वं धृत्वा, रामं=रामचन्द्रम् , उक्तवान्= अब्रवीत् , किमिति ?—काकुत्स्थेति । हे काकुत्स्थ = हे राम !, त्वं, साध्वीं=पतिव्रतां, दयितां= प्रियां, सीतामित्यर्थः । कथं = केन प्रकारेण, आशङ्किष्यथाः=असाध्वीति आशङ्कितवानित्यर्थः । गर्हितमेतत्कथं कृतमिति भावः । अत्र असाधुत्वशङ्काविरुद्धसाधुत्वप्रत्ययोपनिपातादसाधुत्वशङ्कनक्रियाऽतिपत्तिरिति मल्लिनाथः ॥

व्युत्पत्तिः—काकुत्स्थ=ककुत्स्थस्याऽपत्यं पुमान् काकुत्स्थस्तत्सम्बुद्धौ, 'तस्याऽपत्यम्' इत्यण् । आशङ्किष्यथाः = अत्र गर्हाकथंशब्दयोर्लिङ्निमित्तयोः संभवात्

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'गर्हायाम्' इत्यनुवृत्तौ 'विभाषा कथमि लिङ् चे'ति लिङः प्राप्तौ 'लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ' इति 'भूते चे'ति वचनाद् भूते लृङ् ॥

भाषाऽर्थः—सीताजीके अग्निमें प्रवेश करनेके अनन्तर अग्निदेवने सीताजीको दोनों हाथोंसे ऊपर उठाकर रामचन्द्रजीको कहा—'हे रामचन्द्र ! आपने पतिव्रता प्रिया सीताजीमें कैसे आशङ्काकी ? (यह आपने गर्हित कर्म किया) ॥ १ ॥

नाऽभविष्यदियं शुद्धा यद्यपास्यमहं ततः ।
न चैनां पक्षपातो मे धर्मादन्यत्र राघव ! ॥ २ ॥

अन्वयः—अहम् एनां यदि नैव अपास्यं, तत इयं शुद्धा न अभविष्यत्। हे राघव ! (अयम्) पक्षपातो धर्मात् अन्यत्र मे न अस्ति ॥

व्याख्या—वह्निः मैथिल्याः साधुतां दर्शयति—नाऽभविष्यदिति । अहं=वह्निः, एनां=सीतां, यदि=चेत्, नैव अपास्यं=नैव अरक्षिष्यं, ततः=तस्मात्; अरक्षणाद्धेतोरिति भावः । इयं=सीता, शुद्धा=पतिव्रतेति ज्ञातेत्यर्थः । न अभविष्यत्=नाऽभूत्; रक्षिता तु मया शुद्धेति ज्ञातेत्यर्थः । न च पक्षपातान्मया रक्षितेत्याह—पक्षपात इति । हे राघव=हे राम !, अयं पक्षपातः=ममता, धर्मात्=पुण्यात्, अन्यत्र=अन्यस्मिन्, अधर्मं इति भावः । मे=मम, न अस्ति=न वर्तते । सीतायाः सतीत्वादेवाऽस्या रक्षणाय मम पक्षपात इति भावः ॥

व्युत्पत्तिः—एनां='द्वितीयाटौस्स्वेन' इति एनादेशः । अपास्यम्, अभविष्यत्='पा रक्षणे' 'भू सत्तायाम्' इति धातुभ्यां 'हेतुहेतुमतोर्लिङ्' इति लिङः प्राप्तौ 'लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ' इति लृङ् अत्र अरक्षणाऽशुद्धिज्ञानयोर्हेतुहेतुमद्भावो लिङ्निमित्तम् । सामग्र्यभावेनाऽशुद्धिज्ञानाऽनिष्पत्तेः क्रियाऽतिपत्तिश्च ॥

भाषाऽर्थः—हे राम ! मैं सीताजीकी रक्षा नहीं करता तो वे पतिव्रताके रूपमें जानी गयी नहीं होतीं । अधर्ममें मेरी ममता नहीं होती है ॥ २ ॥

अपि तत्र रिपुः सीतां नाऽर्थयिष्यददुर्मतिः ।
क्रूरं जात्ववदिष्यच्च जात्वस्तोष्यच्छ्रियं स्वकाम् ॥ ३ ॥

अन्वयः—तत्र रिपुः अदुर्मतिः (यदि अभविष्यत्) अपि सीतां न आर्थयिष्यत्, जातु क्रूरं न अवदिष्यत् जातु स्वकां श्रियं न अस्तोष्यत् ॥

व्याख्या—सर्ववृत्तसाक्षी भगवान्वह्निदेवः सीताशुद्धिप्रदर्शनाऽर्थं सीतारावणयोः परस्परसमक्षं यद्वृत्तं तत् श्लोकद्वयेन प्रत्यपादयत्—अपीत्यादि । तत्र=तस्मिन्, समक्षभाषणसमय इति भावः । रिपुः=शत्रुः, रावण इत्यर्थः । जयमङ्गलस्तु तत्र रिपुः=स भवान् रिपुः (रावणः) भवच्छब्दोऽर्थाद् गम्यते, तेन 'इतराभ्योऽपि

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'दृश्यन्त' इति त्रल् इति क्लिष्टव्याख्यानमाह—अदुर्मतिः=अदुष्टबुद्धिः, यदि अभविष्यदिति शेषः । अपि=च्राढ, सीतां=जानकीं, न आर्थयिष्यत्=मां भजेति प्रार्थनां न अकरिष्यत् । एवं जातु=कदाऽपि, क्रूरं=कठोरं, न अवदिष्यत्=न अवदयत् , जातु=कदाचित् , स्वकाम्=आत्मीयां, श्रियं=सम्पत्तिं, न अस्तोष्यत्=न स्तुतवांश्च, अभविष्यत् अतः सीता सतीति ज्ञातव्येति भावः ॥

व्युत्पत्तिः—अदुर्मतिः=दुष्टा मतिर्यस्य स दुर्मतिः, न दुर्मतिः । आर्थयिष्यत्= 'अर्थं उपयाच्ञायाम्' इत्यात्मनेपदिनो धातोः अर्थनमर्थ इति भावे घञ् । अर्थं करोतीति 'तत्करोति तदाचष्टे' इति णयन्तात् बाढाऽर्थाऽपिशब्दे लिङ्निमित्ते 'उताऽप्योः समर्थयोर्लिङ्' इति लिङि प्राप्ते 'वोताप्योः' इति लृङ् । अजादित्वात् 'आडजादीनाम्' इत्याडागमः । दुर्मतित्वेन अदुर्मतित्वप्रयुक्ता प्रार्थना क्रियाऽतिपत्तिः । न अवदिष्यत् , न अस्तोष्यत् = अत्र 'जातुयदोर्लिङ्' इति उक्तजातुशब्दयोगोऽनवक्लृप्तिश्च लिङ्निमित्त पूर्ववत् । दुर्मतित्वात्तद्विरुद्धक्रूराऽभिवदनस्वसम्पत्तिस्तवनक्रियाऽतिपत्तौ भूते वा लृङ् ॥

भाषाऽर्थः—हे राम ! समस्त आपगके समयमें शत्रु रावण दुष्ट बुद्धिवाला नहीं होता तो निश्चयही सीताजीसे प्रार्थना नहीं करता, कभी परुष भाषण नहीं करता और न कभी अपनी सम्पत्तिकी स्तुति ही करता ॥ ३ ॥

सङ्कल्पं नाऽकरिष्यच्च तत्रेयं शुद्धमानसा ।
सत्याऽमर्षमवाप्स्यस्त्वं रामः सीतानिबन्धनम् ॥ ४ ॥

अन्वयः—हे राम ! इयं शुद्धमानसा न तत्र सङ्कल्पं अकरिष्यच्च; (इति मे) सीतानिबन्धनं सत्याऽमर्षं त्वम् अवाप्स्यः ॥

व्याख्या—हे राम=हे रामचन्द्र !, इयं=सीता, शुद्धमानसा=शुद्धचित्ता, न=न अभविष्यत् , अतः, तत्र=रावणे, सङ्कल्पम्=अभिप्राय, अकरिष्यच्च=कृतवती च इति=एवं, न=न अचकल्पयामि=न सभावयामीति भावः । एवं सति सीतानिबन्धनं=सीतागोचरं, सत्याऽमर्षं=यथार्थकोपं, त्वं=रामः, अवाप्स्यः= अवाप्तवानसि, एतन्न मर्षयामीत्यर्थः ॥

व्युत्पत्तिः—शुद्धमानसा=शुद्धं मानसं यस्याः सा । अकरिष्यत्=अनवक्लृप्तौ (लिङ्निमित्ते) 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि' इति लृङ् । अवाप्स्यः=अमर्षे (अक्षमायाम्) पूर्वसूत्रेणैव लृङ् । सीतायाः शुद्धमानसत्वात्संकल्पनसत्यामर्षणप्राप्तिक्रियाऽतिपत्तिः । 'वोताप्योः' इति वा शब्दाऽनुवृत्तेरुभयत्र भूते वा लृङ् ॥

भाषाऽर्थः—हे राम ! ये सीताजी शुद्ध चित्तवाली नहीं हैं और इन्होंने रावण

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

में अभिप्राय किया ऐसा मैं सम्भावना नहीं करता हूँ। इस स्थितिमें इनके विषय में जो आप यथार्थ कोपको प्राप्त हो गये हैं मैं इसका सहन नहीं करता ॥ ४ ॥

त्वयाऽद्रक्ष्यत किं नाऽस्याः शीलं संवसता चिरम् ।
अदर्शिष्यन्त वा चेष्टाः कालेन बहुना न किम् ॥ ५ ॥

अन्वयः—चिरं संवसता त्वया अस्याः शीलं किं न अद्रक्ष्यत वा बहुना कालेन चेष्टाः किं न अदर्शिष्यन्त ?

व्याख्या—(हे राम !) चिरं=बहुकालं, संवसता=संवासं कुर्वता, त्वया=भवता, अस्याः=सीतायाः, शीलं=सच्चरित्रं, किं न अद्रक्ष्यत=किं न दृष्टं, किं नो ज्ञातमिति भावः। एवं च-वा=अथवा, बहुना=अधिकेन, कालेन=समयेन, चेष्टाः=क्रियाः, किं न अदर्शिष्यन्त=नो दृष्टा किमिति भावः। 'शील संवसता ज्ञेयं तच्च कालेन भूयसा।' इत्याशयाच्छिङ्कतोऽपि त्वयाऽवगतमेवेति गर्हितमेतत्कृतमित्यर्थः॥

व्युत्पत्तिः—शीलं='शुचौ तु चरिते शीलम्' इत्यमरः। अद्रक्ष्यत=दृशेः कर्मणि 'किं वृत्ते लिङ्लृटौ' इत्युक्तयोर्गर्हानिमित्तयोर्लिङ्निमित्ते क्रियाऽतिपत्तौ भूते वा लृङ्, चिण्वदिडभावपक्षे रूपम्। अदर्शिष्यन्त=दृशेस्तत्रैव चिण्वदिटि रूपम्। अत्र चिरसंवासलक्षणशीलचेष्टोपलम्भकारणसम्भवात्तद्धिरुद्धतदनुपलम्भ-क्रियाऽतिपत्तिः॥

भाषाऽर्थः—हे राम! बहुत समय तक संवास करते हुए आपने सीताका सच्चरित्र क्या नहीं जाना? वा अधिक समय होनेसे भी इनकी चेष्टाएँ क्या नहीं देखीं? ॥ ५ ॥

यावज्जीवमशोचिष्यो नाऽहास्यश्चेदिदं तमः
भानुरप्यपतिष्यत्क्ष्मामक्षोभिष्यत चेदियम् ॥ ६ ॥

अन्वयः—इदं तमः न अहास्यः चेत् यावज्जीवम् अशोचिष्यः। इयम् अक्षोभिष्यत चेत् भानुः अपि क्ष्माम् अपतिष्यत् ॥

व्याख्या—इदम्=एतत्, तमः=मोहं, रावणभवनवासमात्रादियं दूषितेति विपरीतज्ञानमिति भावः। न अहास्यश्चेत्=नो हास्यसि (त्यक्ष्यसि) चेत्, यावज्जीवं=जीवनकालपर्यन्तम्, अशोचिष्यः=शोचिष्यसि, अत्र तमःशोकयोर्हेतुहेतुमद्भावे लिङ्निमित्ते स्वोपदेशेन तमःशोकोत्पत्तिवन्धात् क्रियाऽतिपत्तौ च भविष्यदर्थे नित्यम् लृङ्। किं, इयम्=एषा, सीतेति भावः। अक्षोभिष्यत चेत्=अचलिष्यद्यदि, भानुरपि=सूर्योऽपि क्ष्माम् अपतिष्यत्=भुवि निपतेदित्यर्थः, तद्वदुत्पातप्रायमस्याश्चापलमसम्भाव्यमिति भावः। अत्र भूते लृङ्॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—अहास्यः='ओहाक् त्यागे' इति धातोर्भूते 'लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ' इति लृङ् । अशोचिष्यः=शुचधातोः पूर्ववल्लृङ् , अक्षोभिष्यत='क्षुभ संचलन' इति धातोर्लृङ् अपतिष्यत्='पतॢ पतन' इति धातोर्लृङ् ॥

भाषाऽर्थः—रावणके गृहमें रहनेसे सीता दूषित हैं इस मोहको आप नहीं छोड़ेंगें तो यावज्जीवन शोक करेंगे । सीता चरित्रसे विचलित होगीं तो सूर्य भी भूमिपर गिर पड़ेंगे ॥ ६ ॥

समपत्स्यत राजेन्द्र ! स्त्रैणं यद्यत्र चापलम् ।
लोकपाला इहाऽऽयास्यंस्ततो नाऽमी कलिद्रुहः ॥ ७ ॥

अन्वयः—हे राजेन्द्र ! स्त्रैणं चापलं यदि अत्र समपत्स्यत, ततः कलिद्रुहः अमी लोकपाला इह न आयास्यन् ॥

व्याख्या—हे राजेन्द्र=हे भूपेन्द्र, हे रामचन्द्रेति भावः । स्त्रैणं=स्त्रीसम्बन्धि, स्त्रीषु संभावितमिति भावः । चापलं=चाञ्चल्यं, चारित्र्यस्खलनरूपमित्यर्थः । यदि=चेत्, अत्र = इह, सीतायामित्यर्थः । समपत्स्यत = सम्पन्नं, ततः = तर्हि, कलिद्रुहः = पापाऽसहिष्णवः, अमी = एते, लोकपालाः = दिक्पालाः, इह = अस्मिन् स्थाने, न आयास्यन् = न आगमिष्यन्, आगताश्च ततः इयं सीता सतीति विश्वसिहीति भावः । अत्र चापललोकपालाऽनागमयोर्हेतुहेतुमद्भावो लिङ्निमित्तम् । आगमग्राहिप्रत्यक्षेण अनागमनक्रियाऽतिपत्तिः । अत्र भूते लृङ् ॥

व्युत्पत्तिः—स्त्रैणं=स्त्रीणामिदं, 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति नञ्प्रत्ययः । चापलं=चपलस्य भावः, 'हायनाऽन्तयुवादिभ्योऽण्' इति युवादिगणपठितत्वादण्, ब्राह्मादिगणपठितत्वात् ष्यञ्च तत्र 'चापल्यम्' इति रूपम् । समपत्स्यत, आयास्यन् = 'लिङिनिमित्ते लृङ् क्रियाऽतिपत्तौ' इति लृङ् । कलिद्रुहः=कलये द्रुह्यन्तीति, 'सत्सूद्विषद्रुहे' त्यादिना क्विप्प्रत्ययः ॥

भाषाऽर्थः—हे राजेन्द्र राम ! स्त्रियोंमें होनेवाला चाञ्चल्य यदि सीता में होता तो पापको न सहनेवाले इन्द्र आदि दिक्पाल यहां न आते, परन्तु ये आये हैं, इस लिए सीताजी सती हैं ऐसा आप विश्वास कीजिये ॥ ७ ॥

आश्चर्यं यच्च यत्र स्त्री कृच्छ्रेऽवत्स्यन्मते तव ।
त्रासादस्यां विनष्टायां किं किमालप्स्यथाः फलम् ॥ ८ ॥

अन्वयः—यच्च यत्र (वा) स्त्री कृच्छ्रे तव मते अवत्स्यत् (तत्) आश्चर्यम् । त्रासात् अस्यां विनष्टायां किं किं फलम् अलप्स्यथाः ?

व्याख्या—अन्यच्च नाऽत्र स्त्रीसामान्यबुद्धिः कर्तव्येत्याह = आश्चर्यमिति यच्च, यत्र = यस्मिन् देशे काले वा, स्त्री = योषित् , कृच्छ्रे = कष्टे, प्राणाऽपगमश-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ष्टाहेतुत्वादतिदुष्कर इति भावः । तव = भवतः, मते = अभिप्राये, अग्निप्रवेशरूप इत्यर्थः । अवर्त्स्यत्=अवर्तिष्ट, तत् आश्चर्यं=चित्रमित्यर्थः । किं च त्रासात्=भयात्, त्वयि क्रुद्धे इति शेषः । अस्यां=सीतायां, विनष्टायां=प्रच्छन्नं मृतायां, किं किं फलं= किं किं परिणामम्, अलप्स्यथाः = लप्स्यसे, न किञ्चिदवकल्पयामीति भावः। 'किंकिलाऽलप्स्यथाः फलम्' इति पाठान्तरं प्रामादिकं 'किङ्किलाऽस्त्यर्थेषु लृट्' इत्यस्य लिङ्निमित्तत्वाऽभावात् ॥

व्युत्पत्तिः—अवर्त्स्यत् = 'वृतु वर्तने' इति धातोः यच्चयत्रयोरन्यतरोपपदा- श्चित्रीकरणे गम्यमाने क्रियाऽतिपत्तौ भूते लृङ् 'वृद्भ्यः स्यसनोः' इति परस्मैपद् 'न वृद्भ्यश्चतुर्भ्यः' इतीडागमनिषेधः । स्त्रीणां सामान्यतः कृच्छ्राऽभिप्रायाऽनुवृत्ति- सामग्र्यभावात्तदनुवृत्तिः क्रियाऽतिपत्तिः । इयं तु तत्राऽपि प्रवृत्तेति चित्रीकरणम् । आश्चर्यम् = कृच्छ्रत्वगम्यस्य चित्रीकरणस्य स्पष्टाऽर्थमाश्चर्यग्रहणम् । अलप्स्यथाः= 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि' इत्यत्र अपिशब्दात् 'किं वृत्तेऽपि' इत्यत्र अपिशब्दात् किंवृत्तमनवक्लृप्तिश्च लिङ्निमित्तमुक्तं, तस्मिन् क्रियाऽतिपत्तौ 'डुलभष् प्राप्तौ' इति धातोः भविष्यति नित्यम् लृङ् । मरणाऽतिरिक्तफलप्राप्तिसामग्र्य- भावात्तदतिपत्तिः ॥

भाषाऽर्थः—जो जिस देशमें वा जिसकालमें स्त्री आपके अग्निप्रवेशरूप अभिप्रायमें रही वह आश्चर्य है । आपके क्रुद्ध होनेपर भयसे सीताके प्रच्छन्नरूपसे विनष्ट होनेपर क्या क्या फल आप पायेंगे, मैं कुछ भी कल्पना नहीं कर रहा हूं ॥

यत्र यच्चाऽमरिष्यत्स्त्री साध्वसाद् दोषवर्जिता ।
तदसूयारते लोके तस्या वाच्याऽऽस्पदं मृषा ॥ ६ ॥

अन्वयः—यच्च यत्र वा दोषवर्जिता स्त्री साध्वसात् अमरिष्यत्, तत् असूया- रते लोके तस्या मृषा वाच्याऽऽस्पदम् (अभविष्यत्) ॥

व्याख्या—न केवलं फलाऽभावः प्रत्युताऽनिष्टफलमेव स्यादित्याह—यत्रेति । यच्च यत्र वा = यस्मिन् देशे काले वा, दोषवर्जिता=निर्दूषणा, शुद्धचरित्राऽपीति भावः । साध्वसात् = त्रासात् पत्यविश्वासमूलादिति भावः । अमरिष्यत् = प्राणत्या- गमकरिष्यत्, तत् = मरणम्, असूयारते = गुणेषु दोषाऽऽविष्करणपरे, लोके = जने, तस्याः = मृतायाः, मृषा = मिथ्या, वाच्याऽऽस्पदं = दोषस्थानं, दुष्टत्वादेव मृतेति मिथ्यापवादहेतुरभविष्यदिति शेषः । तच्च अतिगर्हितमित्यभिप्रायः ॥

व्युत्पत्तिः—अमरिष्यत् = 'मृङ् प्राणत्यागे' इति धातोः 'गर्हायां चे' त्यत्र यच्च यत्र शब्द उपपदं गर्हा च लिङ्निमित्तं तस्मिन् लिङ्निमित्ते क्रियाऽतिपत्तौ सत्यां भूते वा लृङ् । अदुष्टायाः साध्वसलक्षणसामग्र्यभावान्मरणक्रियाया अतिपत्तिः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(अनिष्पत्तिः), तदभावादपवादक्रियाऽतिपत्तिश्च । असूयारते = असूयायां (गुणेषु दोषाऽऽविष्करणे) रते । वाच्यास्पद = वाच्यस्याऽऽस्पदम्, आस्पदमित्यत्र 'आस्पदं प्रतिष्ठायाम्' इति ससुट्को निपातः ॥

भाषाऽर्थः—जो जिस देशमें वा कालमें निर्दोष स्त्री पतिके सन्देहरूप भयसे मर जाती तो गुणोंमें दोषबुद्धि करनेमें तत्पर लोकमें उस सती स्त्रीका मिथ्या दोष स्थान हो जाता ॥ ९ ॥

अमंस्यत भवान्यद्वत्तथैव च पिता तव ।
नाऽऽगमिष्यद्विमानस्थः साक्षाद्दशरथो नृपः ॥ १० ॥

अन्वयः—भवान् यद्वत् अमंस्यत तथा एव तव पिता नृपो दशरथो विमानस्थः साक्षात् न आगमिष्यत ॥

व्याख्या—(हे राम !) भवान् = रामः यद्वत्=यथा अमंस्यत=दुष्टेयं सीतेति ज्ञातवान्, तथा एव = तेन प्रकारेण एव, सीता दुष्टा स्याद्यदीति भावः । तदा तव= भवतः, पिता = जनकः, नृपः=महाराजः, दशरथः, विमानस्थः=व्योमयानाऽऽरूढः, साक्षात् =प्रत्यक्षेण, न आगमिष्यत् = न आगतः स्यात् ।

व्युत्पत्तिः—अमंस्यत, न आगमिष्यत = अत्र दोषभवनं हेतुः दशरथाऽनागमनं च हेतुमत्, तयोर्हेतुमत्त्वे लिङ्निमित्ते 'लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ' इति भूते लृङ् । अग्निपरिशुद्धिज्ञानाद्विरुद्धप्रत्ययात्क्रियाऽतिपत्तिः ॥

भाषाऽर्थः—हे राम ! आपने जैसे यह सीता दुष्टा है ऐसा जाना है, वैसे ही सीताजी दुष्टा होती तो आपके पिता महाराज दशरथ विमानारूढ होकर प्रत्यक्ष रूपसे नहीं आये होते ॥ १० ॥

नाऽकल्पस्यत्सन्निधिं स्थाणुः शूली वृषभवाहनः ।
अन्वभाविष्यताऽन्येन मैथिली चेत्पतिव्रता ॥ ११ ॥

अन्वयः—पतिव्रता मैथिली अन्येन अन्वभाविष्यत चेत् (तर्हि) शूली वृषभवाहनः स्थाणुः सन्निधिं न अकल्पस्यत ॥

व्याख्या—(हे राम !) पतिव्रता = सती, मैथिली = वैदेही, सीतेत्यर्थः । अन्येन = अपरेण, त्वत्त इति शेषः । अन्वभाविष्यत चेत् = उपभुक्ता चेत्, तर्हि— शूली = शूलहस्तः, वृषभवाहनः = वृषभाऽऽरूढः, स्थाणुः = ईश्वरः, सन्निधि=सन्निधानं, न अकल्पस्यत् = न कृतवान्स्यात् ॥

व्युत्पत्तिः—अन्वभाविष्यत = अनुपूर्वात् भूधातोः कर्मणि लृङ्, चिण्वदिट वृद्धिः । शूली=शूलमस्याऽस्तीति 'अत इनिठनौ' इति नित्ययोगे इनिः । वृषभवाहनः=वृषभो वाहनं यस्य सः । अकल्पस्यत् = अन्तर्भावितणिजर्थोऽयं प्रयोगः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'कृपू सामर्थ्ये' इति धातोः हेतुहेतुमद्भावे 'लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ' इति लृङ्। अन्याऽनुभवनं हेतुः स्थाण्वनागमनं हेतुमत्। 'लुटि च क्लृपः' इति चकारात्स्ये परस्मैपदं, 'तासि च क्लृपः' इति चकारादनिट् ॥

भाषाऽर्थः—हे राम ! पतिव्रता सीता अन्य पुरुषसे अनुभूत होती तो त्रिशूलधारी, साँड पर चढ़े हुए महादेवजी यहाँ पर आगमन न करते ॥ ११ ॥

आनन्दयिष्यदागम्य कथं त्वामरविन्दसत् ।
राजेन्द्र ! विश्वसूर्धाता चारित्र्ये सीतया क्षते ॥ १२ ॥

अन्वयः—हे राजेन्द्र ! अरविन्दसत् विश्वसूः धाता सीतया चारित्र्ये क्षते कथम् आगम्य त्वाम् आनन्दयिष्यत् ?

व्याख्या—हे राजेन्द्र = हे रामचन्द्र !, अरविन्दसत् = कमलाऽऽसनः, विश्वसूः = संसारस्रष्टा, धाता = ब्रह्मा, सीतया = जानक्या, चारित्र्ये = पातिव्रत्ये, क्षते = नाशिते सति, पातिव्रत्यभङ्गेनेति शेषः। कथं = केन प्रकारेण, आगम्य = आगमनं कृत्वा, त्वां = भवन्तं राममित्यर्थः। आनन्दयिष्यत् = आनन्दितवान्, गर्हितत्वादिति भावः ॥

व्युत्पत्तिः—अरविन्दसत्, विश्वसूः = अरविन्दे सीदतीति, विश्वं सूत इति, 'सत्सूद्विषे' त्यादिना क्विप्प्रत्ययः। आनन्दयिष्यत् = णिजन्तात् 'टुनदि समृद्धौ' इति धातोः 'विभाषा कथमि लिङ् चे'ति कथं शब्दो गर्हा च लिङ्निमित्तं तस्मिन्क्रियाऽतिपत्तौ भूते लृङ्। चारित्रक्षतेरभावादानन्दादिक्रियाऽतिपत्तिः ॥

भाषाऽर्थः—हे राजेन्द्र ! कमलाऽऽसन, संसारकी सृष्टि करने वाले ब्रह्माजी सीताजीके पातिव्रत्य नष्ट करनेपर कैसे आकरके आपको आनन्दित करते ? ॥१२॥

प्रणमन्ब्रह्मणा प्रोक्तो राजकाऽधिपतिस्ततः ।
नाऽशोत्स्यन्मैथिली लोके नाऽऽचरिष्यदिदं यदि ॥ १३ ॥

अन्वयः—ततो राजकाऽधिपतिः प्रणमन् ब्रह्मणा प्रोक्तः—'मैथिली इदं न आचरिष्यत् यदि लोके न अशोत्स्यत्' ॥

व्याख्या—ततः = अग्यिवाक्याऽनन्तरं, राजकाऽधिपतिः = राजसमूहस्वामी, राम इति भावः। प्रणमन् = प्रणामं कुर्वन्, ब्रह्माणमिति शेषः। ब्रह्मणा = धात्रा, प्रोक्तः = अभिहितः, राम इति शेषः। हे राम ! मैथिली = सीता, इदं = वह्निप्रवेशनं, न आचरिष्यत् यदि = न अकरिष्यच्चेत्, लोके = भुवने, न अशोत्स्यत् = न शुद्धा भवेत्। अत्राऽग्निप्रवेशशोधनयोर्हेतुहेतुमद्भावो लिङ्निमित्तम्। शुद्धिहेत्वग्निप्रवेशोपनिपातादशोधनक्रियाऽतिपत्तिः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—राजकाऽधिपतिः = राज्ञां समूहो राजकं, 'गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्सभनुष्याजाद् वुञ्' इति वुञ्प्रत्ययः, 'युवोरनाकौ' इति तस्य अकादेशः । आचरिष्यत् , अशोत्स्यत् = आङ्पूर्वकाच्चरधातोः 'शुध शौचे' इति दैवादिकाद्धातोः 'लिङ्निमित्ते लृङ् क्रियाऽतिपत्तौ' इति लृङ् ॥

भावाऽर्थः—अग्निदेवके वाक्यके अनन्तर प्रणाम करते हुए राजसमूहके अधिपति रामचन्द्रजीको ब्रह्माजीने कहा—'हे राम ! सीता अग्निप्रवेशरूप इस कर्मको नहीं करतीं तो लोकमें शुद्ध नहीं होतीं ॥ १३ ॥

नाऽमोदयाम वयं शङ्कामिहाधास्यन्न चेद्भवान् ।
किं वा चित्रमिदं युक्तं भवान्यदकरिष्यत ॥ १४ ॥

अन्वयः—(हे राजन् !) भवान् इह न अधास्यत् चेत् (तर्हि) वयं शङ्कां न अमोदयाम । भवान् युक्तम् अकरिष्यत यत् इदं वा किं चित्रम् ?

व्याख्या—हे राजन् ! भवान् = रामः, इह = अग्नौ, न अधास्यत् चेत् = सीतां नाहितवांश्चेत् , न प्रवेशितवांश्चेदिति भावः । तर्हि, वयं, शङ्कां = शुद्धेऽपि संशयं न अमोदयाम = नो मुञ्चेम, अतो युक्तं कृतमित्यर्थः । ब्रह्मा स्वयं सर्वज्ञोऽपि लोकाऽभेदेन वयमित्याह । परमाऽर्थतस्तु लौकिका नो विश्वस्युरिति भावः । अत्र अग्न्याधानं हेतुः, शङ्कामोचनं च हेतुमत्, अस्मिन् लिङ्निमित्ते क्रियाऽतिपत्तौ भूते लृङ् । अनाधानक्रियायास्तद्विरुद्धाधानादतिपत्तिः । किं च—भवान्=रामः, युक्तं न्याय्यम् , अकरिष्यत = कृतवान् = इति यत्, इदं वा=भवत्कर्तृकं युक्ताचरणं वा, किं चित्रं=चित्रमिति नाऽवकल्पयामीत्यर्थः । अत्र किंवृत्तमनवक्लृप्तिश्च लिङ्निमित्तम् । राज्ञो हितकरणरूपत्वात् चित्रक्रियाऽतिपत्तिः । तत्र भूते वा लृङ् ॥

व्युत्पत्तिः—अधास्यत्, अमोचयाम = 'डुधाञ् धारणपोषणयोः' 'मुच्लृ मोक्षणे' इति धातोश्च हेतुहेतुमद्भावे लृङ् ॥

भावाऽर्थः—हे राजेन्द्र राम ! आप अग्निमें सीताको प्रविष्ट नहीं कराते तो, शुद्धि होनेपर भी हमलोग शङ्का नहीं छोड़ते, इस कारणसे आपने ठीक किया । आपने जो ठीक किया इसमें क्या आश्चर्य है ? ॥ १४ ॥

प्रावर्तिष्यन्त चेष्टाश्चेदयाथातथ्यवत्तव ।
अनुशास्ये त्वया लोके रामाऽवर्त्स्यंस्तरां ततः ॥ १५ ॥

अन्वयः—हे राम ! तव चेष्टा अयाथातथ्यवत् प्रावर्तिष्यन्त चेत् ततः त्वया अनुशास्ये लोके आवर्त्स्यंस्तराम् ॥

व्याख्या—हे राम = हे रामचन्द्र !, तव = भवतः, चेष्टाः = व्यापाराः, अया-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यातथ्यवत् = अयथार्थम् । प्रावर्तिष्यन्त चेत् = प्रवृत्ता यदि, ततः = तर्हि, त्वया = भवता, अनुशास्ये = अनुशासनीये, लोके = जने, अवर्त्स्यंस्तराम् = अतिमात्रं प्रावर्तिष्यन्त, 'यथा राजा तथा प्रजे'ति न्यायात् 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः' इति न्यायाच्चेति शेषः । अत्र रामचेष्टाप्रवृत्तिलोकचेष्टाप्रवृत्त्योर्हेतुहेतुमद्भावो लिङ्निमित्तम् । असमोच्चयकरणोपनिपातात्समीचयकरणक्रियाऽतिपत्तौ भविष्यति लृङ् ॥

व्युत्पत्तिः—अयाथातथ्यवत् = तथा (सत्यम्) अनतिक्रम्य यथातथं, पदार्थाऽनतिवृत्तिरूपे यथार्थे अव्ययीभावः । 'ह्रस्वो नपुंसके प्रातिपदिकस्ये'ति ह्रस्वत्वम् । न यथातथम् अयथातथं, नञ्समासः । अयथातथं भावः अयाथातथ्यं, 'गुणवचनब्राह्मणादिभ्यः कर्मणि चे'ति ष्यञ्प्रत्ययः, 'यथातथायथापुरयोः पर्यायेण' इति विकल्पान्नञः पर्यायेण वृद्धिः, पक्षान्तरे अयाथातथ्यम् । अयाथातथ्यमस्ति यस्मिंस्तत्, तद्यथा तथेति क्रियाविशेषणम् । 'तदस्यास्त्यस्मिन्निति मतुप्' इति मतुप् । अवर्त्स्यंस्तराम्='वृतु वर्तने' इति धातोः पूर्ववल्लृङ् । 'वृद्भ्यः स्यसनोः' इति परस्मैपदम् 'न वृद्भ्यश्चतुर्भ्यः' इतीडागमनिषेधः । 'तिङश्चे'त्यातिशायनिकस्तरः 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' इत्यामुप्रत्ययः । 'नश्छव्यप्रशान्' इति रुत्वं, पूर्वस्याऽनुस्वारः ॥

भाषाऽर्थः—हे राम ! आपकी चेष्टाएं अयथार्थ रूपसे प्रवृत्त होंगी तो आपसे अनुशासनीय लोकमें वैसेही अतिशय प्रवृत्त होंगी ॥ १५ ॥

प्रणमन्तं ततो राममुक्तवानिति शङ्करः ।
किं नारायणमात्मानं नाऽभोत्स्यत भवानजम् ॥ १६ ॥

अन्वयः—ततः शङ्करः प्रणमन्तं रामं वच उक्तवान्—'भवान् आत्मानम् अजं नारायणं किं न अभोत्स्यत ?'

व्याख्या—ततः = ब्रह्मवचनाऽनन्तरं, शङ्करः = महादेवः, प्रणमन्तं = प्रणामं कुर्वन्तं, रामं = रामचन्द्रं, वचः=वचनं, वक्ष्यमाणरूपमिति भावः । उक्तवान्=अब्रवीत् । हे राम ! भवान्, आत्मानं = स्वयम्, जन्मरहितम्, उपलक्षणमेतत् अनादिनिधनमित्यर्थः । नारायण = विष्णुं, न अभोत्स्यत = किं न ज्ञातवान् ? अत्र नारायणत्वाऽनवबोधक्रियायास्तद्विरुद्धबोधोत्पादनादतिपत्तिः ॥

व्युत्पत्तिः—शङ्करः = शं करोतीति 'शमिधातोः संज्ञायाम्' इति टप्रत्ययाऽपवादोऽच् 'ईश्वरः शर्व ईशानः शङ्करश्चन्द्रशेखरः ।' इत्यमरः । अज = न जायत इत्यजस्तम्, 'अन्येष्वपि दृश्यते' इति डप्रत्ययः । नारायणं = नरस्याऽपत्यानि नाराः आपः, 'तस्याऽपत्यम्' इत्यण्, बाहुल्येन ङीबभावः, नाराः (जलानि) अयनं (स्थानम्) यस्य स नारायणस्तं, यथाऽऽह मनुः—"आपो नारा इति प्रोक्ता आपो

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

च नरसूनवः । ता यदस्याऽयनं प्रोक्तं तेन नारायणः स्मृतः ॥' इति । 'विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः ॥' इत्यमरः । अभोत्स्यत = 'बुध अवगमने' इति धातोः पूर्ववल्लृङ् ॥

भाषाऽर्थः—तब महादेवजीने प्रणाम करते हुए रामचन्द्रजीको ऐसा वचन कहा—हे राम ! आप अपनेको आदि और अन्तसे रहित नारायण क्या नहीं जानते हैं ? ॥ १६ ॥

> कोऽन्योऽकर्त्स्यदिह प्राणान्दृप्तानां च सुरद्विषाम् ।
> को वा विश्वजनीनेषु कर्मसु प्राघटिष्यत ॥ १७ ॥

अन्वयः—इह अन्यः को दृप्तानां सुरद्विषां प्राणान् अकर्त्स्यत् ? को वा विश्वजनीनेषु कर्मसु प्राघटिष्यत ?

व्याख्या—इह = अस्मिन् लोके, अन्यः = इतरः, नारायणादिति शेषः । कः = जनः, दृप्तानां = दर्पयुक्तानां; सुरद्विषां = राक्षसानां, प्राणान् = असून्, अकर्त्स्यत् = अच्छेत्स्यत्, को वा = जनः, विश्वजनीनेषु = सर्वलोकहितेषु । कर्मसु = क्रियासु, सेतुबन्धनादिकृत्येष्विति भावः । प्राघटिष्यत = चेष्टेत, 'प्रायतिष्यते—'ति मल्लिनाथसम्मतः पाठस्तस्य प्रयतेतेत्यर्थः, न कोऽपीति भावः ॥

व्युत्पत्तिः—सुरद्विषां = सुरान्द्विषन्तीति सुरद्विषस्तेषां, 'सत्सूद्विषे'त्यादिना क्विप्प्रत्ययः । अकर्त्स्यत् = 'कृती छेदने' इति धातोः लृङ् । विश्वजनीनेषु = विश्वस्मै जनाय हितानि विश्वजनीनानि, तेषु 'आत्मन्विश्वजनभोगोत्तरपदात्ख' इति खप्रत्ययः । प्राघटिष्यत = प्रपूर्वकात् 'घट चेष्टायाम्' इति धातोः पूर्वसूत्रेणैव पूर्ववत् लृङ् । नारायणत्वबोधनादकर्तनाऽघटनक्रियाऽतिपत्तिः ॥

भाषाऽर्थः—इस लोकमें नारायणसे भिन्न कौन पुरुष दर्पयुक्त राक्षसोंके प्राणों का छेदन करता और कौन सेतुबन्ध आदि सब लोकोंके हितकारक कर्मोंमें चेष्टा करता ? ॥ १७ ॥

> दैत्यक्षये महाराज ! यच्च यत्राऽघटिष्यथाः ।
> समाप्तिं जातु तत्रापि किं नाऽनेष्यस्त्वमीहितम् ॥ १८ ॥

अन्वयः—हे महाराज ! त्वं दैत्यक्षये यत्र यच्च ईहितम् अघटिष्यथाः, जातु तत्र तत् समाप्तिम् अपि किं न अनेष्यः ?

व्याख्या—हे महाराज = हे राजेन्द्र, त्वं = रामः, दैत्यक्षये = असुरवधे निमित्ते, यत्र = यस्मिन्, अवतारे इति शेषः । यच्च ईहितं = चेष्टितम्, अघटिष्यथाः = अनुष्ठितवानसि, जातु = कदाचित्, तत्र = अवतारे, तत् = चेष्टितम् । समाप्तिम् अपि = पूर्णताम् अपि, किं न अनेष्यः = किं न नेष्यसि ?

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः—महाराज = महांश्चाऽसौ राजा महाराजस्तत्सम्बुद्धौ, 'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' इति समासः, 'आन्महतः समानाऽधिकरणजातीययोः' इत्यात्वं, 'राजाऽहःसखिभ्यष्टच्' इति समासाऽन्तष्टच्। दैत्यक्षये = दितेरपत्यानि पुमांसो दैत्याः, 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' इति ण्यः, दैत्यपदं सुरविरोधिनामुपलक्षणं तेन राक्षसादीनामपि परामर्शः। दैत्यानां क्षये। अघटिष्यथाः अनेष्यः = 'जातुयदोर्लिङ्' इति जातुयच्छब्दौ अनवक्लृप्तिश्च लिङ्निमित्तं तस्मिन्क्रियाऽतिपत्तौ भविष्यति नित्यम् लृङ्। अत्र निजरूपबोधादघटनाया अतिपत्तिः॥

भाषाऽर्थः—हे महाराज! आपने दैत्योंके क्षयके निमित्त जिस अवतारमें जो चेष्टाकी उस अवतारमें उसे कभी पूर्णताको नहीं पहुँचायेंगे? ॥ १८ ॥

तातं प्रसाद्य कैकेय्या भरताय प्रपीडितम्।
सहस्रचक्षुषं रामो निनंसुः परिदृष्टवान् ॥ १९ ॥

अन्वयः—रामो भरताय कैकेय्या प्रपीडितं तातं प्रसाद्य सहस्रचक्षुषं निनंसुः परिदृष्टवान् ॥

व्याख्या—रामः = रामचन्द्रः, भरताय = भरतराज्यार्थं, कैकेय्या = भरतमात्रा, प्रपीडितं = सन्तापितं, तातं = पितरं, दशरथमित्यर्थः। प्रसाद्य = प्रसन्नं कृत्वा, कैकेयीविषयरोषत्याजनेनेति भावः। सहस्रचक्षुषं = देवेन्द्रं, निनंसुः = नन्तुमिच्छुः सन्, परिदृष्टवान्=अपश्यत् ॥

व्युत्पत्तिः—भरताय = 'तादर्थ्ये चतुर्थी वाच्या' इति चतुर्थी। सहस्रचक्षुषं= सहस्रं चक्षूंषि यस्य स सहस्रचक्षुः, तम्। निनंसुः='णम प्रह्वत्वे शब्दे' इति धातोः सन्नन्तात् 'सनाशंसभिक्ष उः' इत्युः।

भाषाऽर्थः—रामचन्द्रजीने भरतके राज्यके लिए कैकेयीसे पीडित पिताजी दशरथको प्रसन्नकर प्रणाम करनेकी इच्छा करते हुए देवराज इन्द्रका दर्शन किया॥

प्रेता वरेण शक्रस्य प्राणन्तः कपयस्ततः।
संजाताः फलिनाऽऽनम्ररोचिष्णुद्रुमसद्रवः ॥ २० ॥

अन्वयः—ततः प्रेताः कपयः शक्रस्य वरेण प्राणन्तः (सन्तः) फलिनाऽऽनम्ररोचिष्णुद्रुमसद्रवः सञ्जाताः ॥

व्याख्या—ततः = इन्द्रदर्शनाऽनन्तरं, प्रेताः = मृताः रणे इति शेषः। कपयः= वानराः, शक्रस्य=इन्द्रस्य, वरेण=प्रसादेन, प्राणन्तः=जीवन्तः, सन्तः, फलिनाऽऽनम्ररोचिष्णुद्रुमसद्रवः=फलभराऽऽनतशोभनवृक्षसदनशीलाः, सञ्जाताः=संवृत्ताः ॥

व्युत्पत्तिः—प्राणन्तः=प्राणन्तीति, प्रपूर्वकात् "अन प्राणने" इति धातोर्लटः

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शत्रादेशः 'अनितेः' इति नस्य णत्वम् । फलिनाऽऽनम्ररोचिष्णुद्रुमसद्वः=फलानि सन्ति एषु ते फलिनाः, 'फलबर्हाभ्यामिनच्' इतीनच्प्रत्ययः। फलिना अत एव आनम्राः अत एव रोचिष्णवो ये द्रुमाः, तेषु सद्वः। सदनशीलाः सद्वः' 'दाधेट्सिशदसदोरुः' इति सदो रुप्रत्ययः॥

भाषाऽर्थः—इन्द्रदर्शनके अनन्तर युद्धमें मरे हुए वानर इन्द्रके प्रसादसे जीवित होते हुए फलवाले अत एव झुके हुए सुन्दर वृक्षोंमें रहनेवाले हो गये ॥२०॥

भ्रमरकुलाऽऽकुलोल्बणसुगन्धिसपुष्पतरु-
स्तरुणमधूकसम्भवपिशङ्गिततुङ्गशिखः।
शिखरशिलाऽन्तरालपरिक्लृप्तजलाऽवसरः
सरसफलश्रियं स वितितान सुवेलगिरिः ॥ २१ ॥

अन्वयः—भ्रमरकुलाऽऽकुलोल्बणसुगन्धिसपुष्पतरुः तरुणमधूकसम्भवपिशङ्गिततुङ्गशिखः शिखरशिलाऽन्तरालपरिक्लृप्तजलाऽवसरः स सुवेलगिरिः सरसफलश्रियं वितताने॥

व्याख्या—भ्रमरकुलाऽऽकुलोल्बणसुगन्धिसपुष्पतरुः=अलिसमूहव्याप्ताऽत्यन्तसुरभिसंकुसुमवृक्षः, तरुणमधूकसम्भवपिशङ्गिततुङ्गशिखः=प्रत्यग्रमधूकपुष्पोद्भवपिशङ्गीकृतोन्नतशिखरः, शिखरशिलाऽन्तरालपरिक्लृप्तजलाऽवसरः=शृङ्गप्रस्तराऽभ्यन्तरनिष्पन्नजलप्रसरः, सः=प्रख्यातः, सुवेलगिरिः=सुवेलाऽद्रिः, सरसफलश्रियं=अभिनवफलशोभां, वितताने=विस्तृतवान् ॥

व्युत्पत्तिः—भ्रमरकुलाऽऽकुलोल्बणसुगन्धिसपुष्पतरुः = भ्रमरकुलैः आकुलाः उल्वणाः सुगन्धयः, सपुष्पाः तरवो यस्मिन् सः। तरुणमधूकसम्भवपिशङ्गिततुङ्गशिखः=मधूकस्य विकारा मधूकानि, 'तस्य विकार' इत्यण् 'पुष्पमूलेषु बहुलम्' इति लुक्। तरुणानि यानि मधूकानि, तेषां संभवेन पिशङ्गिताः तुङ्गशिखाः यस्य सः। शिखरशिलाऽन्तरालपरिक्लृप्तजलाऽवसरः=शिखरशिलानाम् अन्तरालेषु परिक्लृप्ता जलाऽवसरा यस्मिन् सः। सरसफलश्रियं=सरसफलानां श्रियम्। जलाऽवसरा इत्यत्र जलमवसरत्येभ्य इति 'ऋदोरप्' इत्यप्। अत्र पादाऽन्तादियमकम्। नर्दटकवृत्तं='यदि भवतो नजौ भजजला गुरु नर्दटकम्।' इति तल्लक्षणम्॥

भाषाऽर्थः—भ्रमरसमूहोंसे व्याप्त अत्यन्त सुगन्धिवाले पुष्पयुक्त वृक्षोंसे संपन्न नवीन मधूक पुष्पोंकी उत्पत्तिसे पीले वर्ण वाले ऊँचे शिखरोंसे युक्त, शिखरोंकी शिलाओंके बीचमें उत्पन्न जलप्रसरसे युक्त सुवेलपर्वतने नवीनफलोंकी शोभाका विस्तार किया ॥ २१ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संवाद्भिः सकुसुमरेणुभिः समीरैरानम्रैर्बहुफलधारिभिर्वनाऽन्तैः ।
श्च्योतद्भिर्मधुपटलैश्च वानराणाम् आप्यानो रिपुवधसम्भवः प्रमोदः ॥

अन्वयः—वानराणां रिपुवधसम्भवः प्रमोदः संवाद्भिः सकुसुमरेणुभिः समीरैः बहुफलशालिभिः आनम्रैः वनाऽन्तैः, श्च्योतद्भिः मधुपटलैश्च आप्यानः ॥

व्याख्या—वानराणां = कपीनां, रिपुवधसम्भवः=शत्रुनिषूदनोत्पन्नः, प्रमोदः = आनन्दः संवाद्भिः=संचरद्भिः, सकुसुमरेणुभिः = परागसहितैः, सुगन्धिभिरित्यर्थः। समीरैः = वायुभिः, बहुफलशालिभिः = अधिकफलशोभिभिः, आनम्रैः = अधिकाऽवनतैः, वनाऽन्तैः = वनभागैः. श्च्योतद्भिः = स्रवद्भिः, मधुपटलैश्च = क्षौद्रमण्डलैश्च, आप्यानः = वृद्धिंगतः ॥

व्युत्पत्तिः—रिपुवधसंभवः = सम्भवत्यस्मादिति सम्भवः, 'ऋदोरप्' इत्यप्। रिपुवधः संभवो यस्य सः। संवाद्भिः=संवान्तीति संवान्तस्तैः संपूर्वकात् 'वा गतिगन्धनयोः' इति धातोर्लटः शत्रादेशः। सकुसुमरेणुभिः=कुसुमरेणुभिः सहितास्तैः बहुफलशालिभिः = बहुफलैः शाडन्ते (डलयोरभेदात् शालन्ते शोभन्त इत्यर्थः) तच्छीलास्तैः, ताच्छील्ये णिनिप्रत्ययः। आप्यानः = आङ्पूर्वकात् '(स्फायी) ओप्यायी वृद्धौ' इति धातोः कर्तरि क्तः, 'ओदितश्चे'ति निष्ठानत्वं, यकारलोपः। व्यवस्थितविभाषावचनात् सोपसर्गस्य प्यायः पीभावो न भवति। प्रहर्षिणीवृत्तं, 'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।' इति तल्लक्षणम् ॥

भाषाऽर्थः—वानरोंका शत्रु-वधसे उत्पन्न हर्ष बहनेवाले, परागोंसे युक्त (अत एव सुगन्धि) वायुसे, बहुत फलोंसे शोभित अतएव अतिशय अवनत वनभागोंसे और चूनेवाले मधुपटलोंसे भी बढ़ गया ॥ २२ ॥

आयान्त्यः स्वफलभरेण भङ्गुरत्वं
भृङ्गाऽऽलीनिचयचिता लतास्तरूणाम् ।
साऽऽमोदाः क्षितितलसंस्थिताऽवलोप्या
भोक्तॄणां श्रममुदयं न नीतवत्यः ॥ २३ ॥

अन्वयः—स्वफलभरेण भङ्गुरत्वम् आयान्त्यः साऽऽमोदाः भृङ्गाऽऽलीनिचयचिताः क्षितितलसंस्थिताऽवलोप्याः तरूणां लताः भोक्तॄणां श्रमम् उदयं न नीतवत्यः ॥

व्याख्या—स्वफलभरेण = आत्मफलभारेण, भङ्गुरत्वं = भङ्गशीलत्वम् , आयान्त्यः=प्राप्नुवन्त्यः, तथा फलिता इति भावः। साऽऽमोदाः = मनोहरगन्धवत्यः, भृङ्गालीनिचयचिताः = भ्रमरपङ्क्तिसमूहव्याप्ताः, क्षितितलसंस्थिताऽवलोप्याः=भूतलविद्यमानाऽपचेयाः, करप्रचेया इत्यर्थः। तरूणां = वृक्षाणां, लताः = शाखाः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भोक्तृणाम्=अभ्यवहर्तॄणां वानराणां, श्रम=श्रान्तिम्, उद्यम=उद्गमं, न नीतवत्यः=न प्राप्तवत्यः; किन्तु प्रशमं निन्युरिति भावः। 'विनीतवत्य' इति पाठान्तरे उद्यम् =उदितम् : श्रममपनिन्युरित्यर्थः ॥

व्युत्पत्तिः—भङ्गुरत्व='भञ्जो आमर्दने' इति धातोः 'भञ्जभासमिदो घुरच्' इति घुरच्प्रत्ययः। भङ्गुराणां भावो भङ्गुरत्व, तत। भृङ्गालीनिचयचिताः=भृङ्गाणामाल्यस्तासां निचयस्तेन चिताः। क्षितितलसंस्थिताऽवलोप्याः=क्षितेस्तलं तस्मिन् संस्थितास्तैरवलोप्याः। अवलोप्तुं शक्या अवलोप्याः। लताः='समे शाखालते' इत्यमरः। उद्यम्=एतेरयतेर्वा पचाद्यच्। नीतवत्यः='णीञ् प्रापणे' इति द्विकर्मकाद्धातोः क्तवतुप्रत्ययः, स्त्रीत्वविवक्षायाम् 'उगितश्चे' ति ङीप्प्रत्ययः ॥

भाषाऽर्थः—अपने फलोंके भारसे भङ्गशीलताको प्राप्त होनेवाली, मनोहर गन्धयुक्त, भौरों की पङ्क्तियोंके समूहसे व्याप्त और भूतलमें बैठे हुए जनोंसे भी तोड़ी जा सकनेवाली वृक्षशाखाओंने खानेवाले वानरों के परिश्रमको शान्त कर दिया (हटाया)॥ २२ ॥

इति श्रीचन्द्रकलाव्याख्यया मण्डिते श्रीमद्भट्टिकाव्ये चतुर्थे तिङन्तकाण्डे
लक्षणरूपऽष्टमः परिच्छेदः (वर्गः) तथा लक्ष्यरूपे कथानके
सीतासंशोधनं नाम एकविंशतितमः सर्गः ॥

अथ द्वाविंशः सर्गः

ततो रामो हनूमन्तमुक्तवान्हृष्टमानसम् ।
अयोध्यां श्वः प्रयातासि कपे ! भरतपालिताम् ॥ १ ॥

अन्वयः—ततो रामो हृष्टमानसं हनूमन्तम् उक्तवान्—'हे कपे ! भरतपालिताम् अयोध्यां श्वः प्रयातासि ॥

व्याख्या—ततः=सीताशुद्ध्यनन्तरं, रामः=रामचन्द्रः, हृष्टमानसं=प्रसन्नचित्तं, स्वामिकार्यस्य निष्पादितत्वादिति भावः। हनूमन्त=वायुपुत्रम्, उक्तवान्=अब्रवीत्, हे कपे=हे हनूमन्, भरतपालितां=भरतरक्षिताम्; अयोध्यां=साकेतपुरीं, श्वः=परेद्युः, प्रयातासि=गन्तासि ॥

व्युत्पत्तिः—हृष्टमानसं=हृष्टं मानसं यस्य, तम्। प्रयातासि=प्रपूर्वात् 'या प्रापणे' इति धातोः 'अनद्यतने लुट्' इति लुट्, 'स्यतासी लृलुटोः' इति तासिप्रत्ययः, 'तासस्त्योर्लोपः' इति सलोपः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—सीताजी की शुद्धि के अनन्तर रामचन्द्रजीने प्रसन्नचित्त हनूमान् जीको कहा—'हे हनूमान् ! भरतसे रक्षित अयोध्याको तुम कल पहुँचोगे ॥ १ ॥

गाधितासे नभो भूयः स्फुटन्मेघघटाऽऽवलि ।
ईक्षितासेऽम्भसां पत्युः पयः शिशिरशीकरम् ॥ २ ॥

अन्वयः—(हे कपे !) भूयः स्फुटन्मेघघटाऽऽवलि नभो गाधितासे । शिशिरशीकरम् अम्भसां पत्युः पयः ईक्षितासे ॥

व्याख्या—(हे कपे !) भूयः = पुनरपि, स्फुटन्मेघघटाऽऽवलि = विशीर्यमाणवलाहकवृन्दपङ्क्ति, नभः = आकाशं, गाधितासे = प्रस्थातासे, 'गाहितासे' इति मल्लिनाथसम्मतः पाठस्तस्य प्रवेक्ष्यसीत्यर्थः । शिशिरशीकरं = शीतलाऽम्बुकणम्, अम्भसां पत्युः = समुद्रस्य, पयः = जलम्, ईक्षितासे = द्रष्टासि ॥

व्युत्पत्तिः—स्फुटन्मेघघनाऽऽवलि = स्फुटन्त्यो मेघघटावलयो यस्मिंस्तत् । गाधितासे = 'गाधृ प्रतिष्ठालिप्सयोः' इत्यनुदात्तेतो धातोर्लुट् । 'गाहितासे' इति पाठे 'गाहू विलोडने' इति धातोर्लुट् । शिशिरशीकरं = शिशिराः शीकरा यस्मिंस्तत् । 'शीकरोऽम्बुकणाः स्मृताः' इत्यमरः ॥

भाषाऽर्थः—हे हनूमन् ! फिर भी तुम अपने गतिवेगके वायुके आघातसे विशीर्यमाणमेघपङ्क्तियोंसे युक्त आकाशमें प्रस्थान करोगे और ठण्ढे जलकणोंसे युक्त समुद्रजलको देखोगे ॥ २ ॥

सेवितासे प्लवङ्ग ! त्वं महेन्द्राऽद्रेरधित्यकाः ।
व्युत्क्रान्तवर्त्मनो भानोः सहज्योत्स्नाकुमुद्वतीः ॥ ३ ॥

अन्वयः—हे प्लवङ्ग ! त्वं भानोः व्युत्क्रान्तवर्त्मना महेन्द्राऽद्रेः सहज्योत्स्नाकुमुद्वतीः अधित्यकाः सेवितासे ॥

व्याख्या—हे प्लवङ्ग = हे वानर !, त्वं, भानोः = सूर्यस्य, व्युत्क्रान्तवर्त्मनः = अतिक्रान्तमार्गस्य, औन्नत्येनेति शेषः । महेन्द्राऽद्रेः = महेन्द्रपर्वतस्य, सहज्योत्स्नाकुमुद्वतीः = चन्द्रिकायुक्तकुमुदप्रायाः, अधित्यकाः = पर्वतस्योर्ध्वभूमयः सेवितासे = सेविष्यसे, अनुभावितासीति भावः ॥

व्युत्पत्तिः—प्लवङ्ग = प्लवेन गच्छतीति प्लवङ्गस्तत्सम्बुद्धौ, 'गमेः सुपि वाच्य' इति खच्, 'खच्च डिद्वा वाच्य' इति डित्वाट्टिलापः । डित्वाऽभावे 'प्लवङ्गम्' इति रूपम् । 'कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः ।' इत्यमरः । व्युत्क्रान्तवर्त्मनः = व्युत्क्रान्तं वर्त्म येन स व्युत्क्रान्तवर्त्मा, तस्य । भानोः" इत्यनेन सापेक्षत्वेऽपि गमकत्वात्समासः । वृत्तिविग्रहयोः समानप्रकारोपस्थितिजनकत्वं गमकत्वम् । सहज्योत्स्नाकुमुद्वतीः = ज्योत्स्नया सहिताः सहज्योत्स्नाः, 'तेन सहेति तुल्ययोगे'

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति बहुव्रीहिः, 'वोपसर्जनस्ये'ति वैकल्पिकत्वात्सभावाऽभावः। कुमुदानि सन्ति आसु ता इति कुमुद्वत्यः, 'कुमुदनडवेतसेभ्यो ड्मतुप्' इति ड्मतुप्, टिलोपः 'मादुपधायाश्च मतोर्वोऽयवादिभ्य' इति मस्य वकारः। 'कुमुद्वान्कुमुदप्राये' इत्यमरः। सहज्योत्स्नाः कुमुद्वत्यो यासु ताः सहज्योत्स्नाकुमुद्वत्यस्ताः। अधित्यकाः-'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन्प्रत्ययः 'भूमेरूर्ध्वमधित्यका' इत्यमरः। सेवितासे=अनद्यतने लुट्॥

भाषाऽर्थः—हे हनुमान्! तुम सूर्यके मार्गका उल्लङ्घन करने वाले महेन्द्र पर्वत की चन्द्रिका (चाँदनी) से युक्त कुमुदपङ्क्तियोंसे सम्पन्न अधित्यकाओं (पर्वतकी ऊर्ध्वभूमियों) का अनुभव करोगे ॥ ३ ॥

चन्दनद्रुमसंछन्ना निराकृतहिमश्रथाः।
दर्शितारस्त्वया ताश्च मलयोपत्यकाः शुभाः ॥ ४ ॥

अन्वयः—(हे कपे!) चन्दनद्रुमसंछन्नाः निराकृतहिमश्रथाः शुभाः ताः मलयोपत्यकाश्च त्वया दर्शितारः॥

व्याख्या—(हे कपे!) चन्दनद्रुमसंछन्नाः = मलयजवृक्षाच्छादिताः, निराकृतहिमश्रथाः=तिरोहितचन्द्राः, शुभाः = शोभनाः, ताः = पूर्वदृष्टाः, मलयो श्च = मलयाऽऽसन्नभूमयश्च, त्वया=भवता, दर्शितारः = श्वो द्रक्ष्यन्ते ॥

व्युत्पत्तिः—चन्दनद्रुमसंछन्नाः = चन्दनद्रुमैः संछन्नाः। निराकृतहिमश्रथाः= हिमस्य श्रथो हिमश्रथः (हिमसारः) 'श्रन्थ विमोचनप्रतिहर्षयोः' इति धातोः 'अवोदैधौद्मप्रश्रथहिमश्रथाः' इति श्रन्थेर्घञ्नलोपौ वृद्ध्यभावश्च। निराकृतो हिमश्रथो याभिस्ताः। मलयोपत्यकाः=मलयस्योपत्यकाः, 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इति त्यकन्प्रत्ययः, 'उपत्यकाऽऽद्रेरासन्ना भूमिः' इत्यमरः। दर्शितारः=दृशधातोः कर्मणि लुट् 'स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् चे'ति चिण्वदिटि रूपम्॥

भाषाऽर्थः—हे हनूमन्! चन्दनवृक्षोंसे आच्छादित, चन्द्रको तिरोहित करने वाली, सुन्दर पूर्वदृष्ट मलये पर्वतकी उपत्यकाओं (आसन्न भूमियों) को तुम कल देखोगे ॥ ४ ॥

प्रतन्व्यः कोमला विन्ध्ये सहितारः स्यदं न ते।
लताः स्तबकशालिन्यो मधुलेहिकुलाऽऽकुलाः ॥ ५ ॥

अन्वयः—(हे कपे!) विन्ध्ये प्रतन्व्यः कोमलाः स्तबकशालिन्यो मधुलेहिकुलाऽऽकुलाः लताः ते स्यदं न सहितारः॥

व्याख्या—(हे कपे!) विन्ध्ये=विन्ध्यपर्वते, प्रतन्व्यः = अतिशयकृशाः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कोमलाः=मृदुलाः, स्तवकशालिन्यः=पुष्पगुच्छमनोहराः, मधुलेहिकुलाकुलाः=भ्रमरसमूहव्याप्ताः, लताः=वल्ल्यः, तं=तव, स्यदं=वेग, न सहितारः=न सहिष्यन्ते, तनुत्वात्कोमलत्वात्स्तवकशालित्वाच्चेति भावः ॥

व्युत्पत्तिः—मधुलेहिकुलाऽऽकुलाः=मधु लिहन्तीति तच्छीला मधुलेहिनः, ताच्छील्ये णिनिः। मधुलेहिनां कुलं, तेन आकुलाः। स्यदं=स्यन्दतेऽनेनेति स्यदः, तम्। 'स्यन्दू प्रस्रवणे' इति धातोः 'स्यदो जवे' इति घञ् नलोपो वृद्ध्यभावश्च निपात्यते, 'रंहस्तरसी तु रयः स्यदः जवः' इत्यमरः। सहितारः='षह मर्षणे' इति धातोर्लुट्। 'तीषसहलुभरुषरिषः' इति विकल्पादिडागमः ॥

भाषाऽर्थः—हे हनूमान्! विन्ध्य पर्वतमें अतिशय कृश, कोमल, फूलोंकी गुच्छोंसे मनोहर और भ्रमरसमूहसे व्याप्त लताएँ तुम्हारे वेगको नहीं सहेंगी ॥५॥

द्रष्टासि प्रीतिमानारात्सखिभिः सह सेविताम्।
सपक्षपातं किष्किन्धां पूर्वक्रीडां स्मरन्मुहुः ॥ ६ ॥

अन्वयः—(हे कपे!) सखिभिः सह सेवितां किष्किन्धां मुहुः पूर्वक्रीडां च सपक्षपातं स्मरन् प्रीतिमान् (सन्) आरात् द्रष्टासि ॥

व्याख्या—(हे कपे!) सखिभिः=सुहृद्भिः, सह=समं, सेविताम्=अनुभूतां, किष्किन्धां=किष्किन्धाऽऽख्यां गुहां, मुहुः=वारं वारं, पूर्वक्रीडाम्=अत्र अत्र एवं क्रीडितमिति सपक्षपातं=साऽनुरागं यथा, स्मरन्=स्मरणं कुर्वन्, प्रीतिमान्=प्रीतियुक्तः सन्, आरात्=दूरे समीपे वा, द्रष्टासि=द्रक्ष्यसि ॥

व्युत्पत्तिः—किष्किन्धां=किमपि धत्त इति किष्किन्धा, ताम्। 'आतोऽनुपसर्गे कः' इति कः टाप् निपातनात्किमो द्वित्वं मलोपः 'पारस्करप्रभृतीनि च संज्ञायाम्' इति नाम्नि ससुट्को निपातः, षत्वं च। सपक्षपातं=पक्षपातेन सहितं यथा तथेति क्रियाविशेषणम्। आरात्='आराद् दूरसमीपयोः' इत्यमरः। द्रष्टासि='दृशिर् प्रेक्षणे' इति धातोर्लुट्, 'सृजिदृशोर्झल्यमकिति' [illegible]यमागमः ॥

भाषाऽर्थः—हे हनूमन्! मित्रोंके साथ अनु[illegible] किष्किन्धाको और बारंबार पहले की क्रीडाको भी अनुरागके साथ स्मरण कर[illegible] हुए प्रीतिमान् होकर दूरमें वा समीपमें देखोगे ॥ ६ ॥

त्वया सन्दर्शितारौ ते माल्यवद्दण्डकावने।
उपद्रुतश्चिरं द्वन्द्वैर्ययोः क्लिशितवानहम् ॥ ७ ॥

अन्वयः—(हे कपि!) ते माल्यवद्दण्डकावने त्वया सन्द्रर्शितारौ, ययोः अहं चिरं द्वन्द्वैः उपद्रुतः (सन्) क्लिशितवान् ॥

व्याख्या—(हे कपे!) ते=पूर्वाऽनुभूते, माल्यवद्दण्डकावने=माल्यवत्पर्व-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्दण्डकाऽरण्ये, त्वया = भवता, सन्दर्शितारौ = संद्रक्ष्येते । ययोः = पर्वतवनयोः, अहं, चिरं = बहुकालं, द्वन्द्वैः = शीतोष्णादिदुःखैः, उपद्रुतः = अभिभूतः सन्, क्लिशितवान् = क्लेशमनुभूतवान् ॥

व्युत्पत्तिः—माल्यवद्दण्डकावने = माल्यवांश्च दण्डकावनं च । सन्दर्शितारौ = संपूर्वकात् दृशेः कर्मणि लुटि चिण्वदिटि च 'लुटः प्रथमस्य डारौरसः' इत्यातामो रावादेशः । द्वन्द्वैः = 'द्वन्द्वं युग्मं हिमोष्णादिमिथुनं कलहे रहः ।' इति यादवः । क्लिशितवान्='क्लिश उपतापे' इति धातोः क्तवतुप्रत्ययः, 'क्लिशः क्त्वानिष्ठयोः' इति विकल्पादिट्, कित्वान्न गुणः ॥

भाषाऽर्थः—हे हनूमन् ! पहले अनुभूत माल्यवान् पर्वत और दण्डकारण्यको तुम देखोगे, जिनमें मैं बहुत समय तक शीत, उष्ण आदि दुःखोंसे अभिभूत होकर पीडित हुआ ॥ ७ ॥

आप्तारौ भवता रम्यावाश्रमौ हरिणाऽऽकुलौ ।
पुण्योदकद्विजाऽऽकीर्णौ सुतीक्ष्णशरभङ्गयोः ॥ ८ ॥

अन्वयः—(हे कपे !) भवता रम्यौ हरिणाऽऽकुलौ पुण्योदकद्विजाकीर्णौ सुतीक्ष्णशरभङ्गयोः आश्रमौ आप्तारौ ॥

व्याख्या—(हे कपे !) भवता = त्वया, रम्यौ = सुन्दरौ, हरिणाऽऽकुलौ = मृगव्याप्तौ, पुण्योदकद्विजाऽऽकीर्णौ = पवित्रजलब्राह्मणव्याप्तौ, सुतीक्ष्णशरभङ्गयोः = तदाख्ययोर्मुन्योः, आश्रमौ = तपोवनवासस्थाने, आप्तारौ = प्राप्स्येते ॥

व्युत्पत्तिः—पुण्योदकद्विजाऽऽकीर्णौ = पुण्यमुदकं ययोस्तौ पुण्योदकौ । द्विजैः आकीर्णौ द्विजाकीर्णौ । पुण्योदकौ च तौ द्विजाकीर्णौ । आप्तारौ = आप्नोतेः कर्मणि लुट्, तास्यातामो रावादेशः ॥

भाषाऽर्थः—हे हनूमान्जी ! तुम सुन्दर, मृगोंसे व्याप्त, पुण्यजलवाले तथा ब्राह्मणोंसे व्याप्त सुतीक्ष्ण और शरभङ्ग मुनिके आश्रमोंको प्राप्त होंगे ॥ ८ ॥

अतिक्रान्ता त्वया रम्यं दुःखमत्रेस्तपोवनम् ।
पवित्रचित्रकूटेऽद्रौ त्वं स्थातासि कुतूहलात् ॥ ९ ॥

अन्वयः—(हे कपे !) त्वया रम्यम् अत्रेः तपोवनम् दुःखम् अतिक्रान्ता । त्वं पवित्रचित्रकूटे अद्रौ कुतूहलात् स्थातासि ॥

व्याख्या—(हे कपे !) त्वया = भवता, रम्यं = सुन्दरम् , अत्रेः = तदाख्यस्य मुनेः, तपोवनं = तपःस्थानं, दुःखं = कष्टं यथा तथा, अतिक्रान्ता = यास्यते, अतिरमणीयत्वादिति भावः । त्वं=हनूमान् , पवित्रचित्रकूटे=प्रयते चित्रकूटाऽऽख्ये, अद्रौ=पर्वते, कुतूहलात्=कौतुकात् , अद्भुतदर्शनस्येति शेषः । स्थातासि=स्थास्यति ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्युत्पत्तिः--अतिक्रान्ता=अतिपूर्वकात् 'क्रमु पादविक्षेपे' इति धातोः कर्मणि लुट् 'स्नुक्रमोरनात्मनेपदनिमित्ते' इत्यात्मनेपदे इट् प्रतिषेधः । स्थातासि=स्था-धातोर्लुट् ।

भाषाऽर्थ—हे हनुमान् जी ! तुम अत्रिके सुन्दर तपोवनको दुःखके साथ लङ्घन करोगे। तुम पवित्र चित्रकूट पर्वतमें कौतुकसे रहोगे ॥ ९ ॥

ततः परं भरद्वाजो भवता दर्शिता मुनिः ।
द्रष्टारश्च जनाः पुण्या यमुनाऽम्बुक्षतांऽहसः ॥ १० ॥

अन्वयः—ततः परं भवता भरद्वाजो मुनिः दर्शिता, यमुनाऽम्बुक्षतांऽहसः पुण्या जनाश्च द्रष्टारः ॥

व्याख्या—ततः चित्रकूटदर्शनात्, परम्=अनन्तरं, भवता=त्वया, भरद्वाजः=तन्नामकः, मुनिः=ऋषिः, दर्शिता=द्रक्ष्यते । यमुनाऽम्बुक्षतांऽहसः=कालिन्दीजलसेवालुप्तपापाः, अत एव पुण्याः=पवित्राः जनाश्च=लोकाश्च, द्रष्टारः=द्रक्ष्यन्ते ॥

व्युत्पत्तिः—दर्शिता=दृशेः कर्मणि लुटि तासि चिण्वदिट् । यमुनाऽम्बुक्षतांऽहसः=यमुनाया अम्बुना क्षतम् अंहो येषां ते । 'कालिन्दी सूर्यतनया यमुना शमनस्वसा ।' इत्यमरः । द्रष्टारः=दृशेः कर्मणि लुटि चिण्वदिडभावपक्षे रूपम् ॥

भाषाऽर्थः—हे हनूमन् ! चित्रकूट दर्शनके अनन्तर तुम भरद्वाज मुनिको देखोगे और यमुनाजलकी सेवासे निष्पाप पवित्र जनोंको भी देख लोगे ॥ १० ॥

स्यन्त्वा स्यन्त्वा दिवः शम्भोर्मूर्ध्नि स्कन्त्वा भुवं गताम् ।
गाहितासेऽथ पुण्यस्य गङ्गां मूर्तिमिव द्रुताम् ॥११॥

अन्वयः—अथ दिवः स्यन्त्वा स्यन्त्वा शम्भोः मूर्ध्नि स्कन्त्वा भुवं गतां द्रुतां पुण्यस्य मूर्तिम् इव गङ्गां गाहितासे ॥

व्याख्या—अथ=भरद्वाजदर्शनाऽनन्तरं, दिवः=स्वर्गात्, स्यन्त्वा स्यन्त्वा=पुनः पुनः स्यन्दित्वा, स्रुत्वा स्रुत्वेत्यर्थः । शम्भोः=महादेवस्य, मूर्ध्नि=शिरसि स्कन्त्वा=गत्वा, पतित्वेत्यर्थः । भुवं=क्षितिं, गतां=प्राप्तां, द्रुतां=द्रवरूपेण स्थितां, पुण्यस्य=धर्मस्य, मूर्तिम् इव=कायम् इव, स्थितामिति शेषः । एतादृशीं गङ्गां=भागीरथीं, गाहितासे=गाहिष्यसे ॥

व्युत्पत्तिः—स्यन्त्वा स्यन्त्वा = 'स्यन्दू प्रस्रवण' इति धातोः 'आभीक्ष्ण्ये णमुल् चे'ति चकाराद्आभीक्ष्ण्ये क्त्वाप्रत्ययः 'नित्यवीप्सयोः' इति द्वित्वम् । पौनः-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुन्यं भृशाऽर्थो वा आभीक्ष्ण्यम् । स्कन्त्वा='स्कन्दिर् गतिशोषणयोः' इति धातोः क्त्वा 'क्त्वि स्कन्दिस्यन्दोः' इत्युभयत्र नलोपप्रतिषेधः । मूर्तिं='मूर्तिः काठिन्य-काययोः' इत्यमरः । गाहितासे='गाहू विलोडने' इति धातोर्लुट् ॥

भाषाऽर्थः—हे हनूमन् ! भरद्वाज मुनिके दर्शनके अनन्तर स्वर्गसे बारंबार बहकर महादेवजीके शिरमें गिरकर पृथ्वीमें प्राप्त, द्रवरूपसे विद्यमान पुण्यकी मूर्तिकी सदृश गङ्गाजीमें प्रवेश करोगे ॥ ११ ॥

तमसायाः महानीलपाषाणसदृशत्विषः ।
वनाऽन्तान् बहु मन्तासे नागराऽऽक्रीडसाक्षिणः ॥ १२ ॥

अन्वयः—(हे कपे) महानीलपाषाणसदृशत्विषः तमसायाः नागराऽऽक्रीडसाक्षिणो वनाऽन्तान् बहु मन्तासे ॥

व्याख्या—(हे कपे !) महानीलपाषाणसदृशत्विषः = इन्द्रनीलशिलातुल्य-कान्तेः, तमसायाः=तमसानद्याः, नागराऽऽक्रीडसाक्षिणः = पौरविहारद्रष्टॄन् ; वनाऽन्तान् = अरण्यप्रदेशान् , बहु = अधिकं यथा तथा, मन्तासे = संस्यसे ॥

व्युत्पत्तिः—महानीलपाषाणसदृशत्विषः = महानीलपाषाणेन सदृशी त्विट् यस्याः सा महानीलपाषाणसदृशत्विट् , तस्याः । नागराक्रीडसाक्षिणः = नगरे भवा नागराः, 'तत्र भव' इत्यण् आक्रीडनमाक्रीडः, भावे घञ् तस्य साक्षिणस्तान् । मन्तासे = 'मन ज्ञाने' इति धातोर्लुट् । थासः 'थासः से' इति से भावः, 'तासस्त्योर्लोपः' इति सलोपः ॥

भाषाऽर्थ—हे हनूमन् ! इन्द्रनील शिलाकी सदृश कान्तिवाली तमसा नदी के पौरोंकी क्रीडाके साक्षी वनप्रदेशोंको तुम अधिकरूपसे जानोगे ॥ १२ ॥

नगरस्त्रीस्तनन्यस्तधौतकुङ्कुमपिञ्जराम् ।
विलोक्य सरयूं रम्यां गन्ताऽयोध्या त्वया पुरी ॥ १३ ॥

अन्वयः—(हे हनूमन् !) नगरस्त्रीस्तनन्यस्तधौतकुङ्कुमपिञ्जरां रम्यां सरयूं विलोक्य त्वया अयोध्या पुरी गन्ता ॥

व्याख्या—(हे हनूमन् !) नगरस्त्रीस्तनन्यस्तधौतकुङ्कुमपिञ्जरां=पुरनारीप-योधरप्रक्षिप्तप्रक्षालितकेशरपीतां, रम्यां = रमणीयां, सरयूं = सरयूनदीं, विलोक्य = दृष्ट्वा त्वया = भवता, अयोध्या = अयोध्याख्या, पुरी = नगरी, गन्ता = गंस्यते ॥

व्युत्पत्तिः—नगरस्त्रीस्तनन्यस्तधौतकुङ्कुमपिञ्जरां = नगरस्त्रीणां स्तनेषु प्राङ् न्यस्ताः पश्चाद्धौताः, न्यस्तधौताः, 'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधि-करणेन' इति समासः । एतादृशा ये कुङ्कुमास्तैः पिञ्जरा, ताम् । गन्ता = 'गम्लृ गतौ' इति धातोः कर्मणि लुट् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—हे हनूमान् जी ! अयोध्याकी स्त्रियोंके पयोधरोंमें पहले रक्खे गये पीछे धोये गये केशरोंसे पीली और रमणीय सरयूको देखकर तुम अयोध्या नगरीको जाओगे ॥ १३ ॥

आनन्दितारस्त्वां दृष्ट्वा प्रष्टारश्चावयोः शिवम् ।
मातरः सह मैथिल्या तोष्टा च भरतः परम् ॥ १४ ॥

अन्वयः—(हे हनूमन् !) मातरः त्वां दृष्ट्वा आनन्दितारः, मैथिल्या सह आवयोः शिवं प्रष्टारश्च भरतश्च परं तोष्टा ॥

व्याख्या—(हे हनूमन् !) मातरः = जनन्यः, कौशल्यादय इत्यर्थः । त्वां भवन्तं, दृष्ट्वा = विलोक्य, आनन्दितारः = आनन्दिष्यन्ति । मैथिल्या = जानक्या, सीतयेत्यर्थः । सह = समम् , आवयोः = रामलक्ष्मणयोः शिवं = कल्याणं, प्रष्टारश्च= प्रक्ष्यन्ति च, भरतश्च = कैकेयीसूनुश्च, परम् = अत्यर्थम् , तोष्टा = सन्तोक्ष्यति ।

व्युत्पत्तिः—आनन्दितारः = आङ्पूर्वकात् 'टुनदि समृद्धौ' इति धातोर्लुट् । मैथिल्या = सहपदेन योगे 'सहयुक्तेऽप्रधाने' इति तृतीया । प्रष्टारः = 'प्रच्छ ज्ञीप्सायाम्' इति धातोर्लुट् । तोष्टा = 'तुष प्रीतौ' धातोर्लुट् ॥

भाषाऽर्थः—हे हनूमानूजी ! कौशल्या आदि माताएँ तुम्हें देखकर आनन्दित होंगी और सीताके साथ हम दोनों भाइयोंका कुशल पूछेंगी एवम् भाई भरत भी अतिशय सन्तुष्ट होंगे ॥ १४ ॥

आख्यातासि हतं शत्रुमभिषिक्तं विभीषणम् ।
सुग्रीवं चाऽर्जितं मित्रं सर्वांश्चाऽऽगामुकान् द्रुतम् ॥ १५ ॥

अन्वयः—(हे हनूमन् !) शत्रुं हतं विभीषणम् अभिषिक्तं सुग्रीवं च अर्जितं मित्रं सर्वांश्च द्रुतम् आगामुकान् आख्यातासि ॥

व्याख्या—(हे हनूमन् !) शत्रुं = रिपुं, रावणमित्यर्थः । हतं = व्यापादितं, विभीषणं रावणाऽनुजम्, अभिषिक्तं=लङ्काराज्ये कृताऽभिषेकं, सुग्रीवं च=कपिराजं च, अर्जितम्=उपार्जितं, मित्रं=सखायं, सर्वांश्च=सकलानस्मांश्च, द्रुतं=शीघ्रम्, आगामुकान्=आगन्तॄन् , आख्यातासि=आख्यास्यसि, सर्वमेतत्त्वया आख्यातव्यमिति भावः ॥

व्युत्पत्तिः—आगामुकान्=आगमनशीला आगामुकास्तान् आङ्पूर्वकात् गम्लृधातोः 'लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्'इत्युकञ्प्रत्ययः । आख्यातासि= आङ् पूर्वकात् 'ख्या प्रकथने' इति धातोर्लुट् ॥

भाषाऽर्थः—हे हनूमानूजी ! तुम 'शत्रु रावण मारा गया है, विभीषण लङ्काके

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राज्यमें अभिषिक्त किये गये हैं, सुग्रीव हमारे उपार्जित मित्र हुए हैं और हम सब लोग शीघ्र आने वाले हैं' ऐसा कहोगे ॥ १५ ॥

गन्तारः परमां प्रीतिं पौराः श्रुत्वा वचस्तव ।
ज्ञात्वैतत्सम्मुखीनश्च समेता भरतो ध्रुवम् ॥ १६ ॥

अन्वयः—पौराः तव वचः श्रुत्वा परमां प्रीतिं गन्तारः । एतत् ज्ञात्वा भरतश्च द्रुतं सम्मुखीनः (सन्) ध्रुवं समेता ॥

व्याख्या—(हे हनूमन् !) पौराः=नागरिकजनाः, तव = भवतः, वचः= वचनं, श्रुत्वा = आकर्ण्य, परमाम् = उत्कृष्टां, प्रीतिं=प्रसन्नतां, गन्तारः = गमिष्यन्ति । एतत्=इदं, वृत्तमित्यर्थः । ज्ञात्वा=विदित्वा, भरतश्च=कैकेयीसूनुश्च, द्रुतं= शीघ्रं, सम्मुखीनः=अभिमुखः सन् , ध्रुवम्=असंशयं, समेता=समागमिष्यति ॥

व्युत्पत्तिः—सम्मुखीनः = सर्वस्य मुखस्य दर्शनः, 'यथामुखसम्मुखस्य दर्शनः खः' इति खप्रत्ययः । समेता = समाङ्पूर्वादिणः कर्तरि लुट् ।

भाषाऽर्थः—हे हनूमानूजी ! नागरिक लोग तुम्हारा वचन सुन कर अतिशय प्रीतिको प्राप्त करेंगे । यह सब जान कर भरत भी शीघ्र सम्मुखवर्ती होते हुए निश्चय आयेंगे ॥ १६ ॥

गते त्वयि पथाऽनेन वयमप्यंहितास्महे ।
लब्धाहेऽहं धृतिं प्राप्ते भूयो भवति सम्मुखे ॥ १७ ॥

अन्वयः—(हे हनूमन् !) अनेन पथा त्वयि गते वयम् अपि अंहितास्महे भूयो भवति संमुखे प्राप्ते अहं धृतं लब्धाहे ॥

व्याख्या—(हे हनूमन् !) अनेन=उक्तेन, पथा=मार्गेण त्वयि=भवति, गते=याते सति, वयम् अपि=रामादयः अपि, अंहितास्महे=गमिष्यामः, भूयः= पुनरपि, भवति=त्वयि, सम्मुखे = अभिमुख, प्राप्ते=आसादिते, अहं धृतिं=सन्तोषं, लब्धाहे=लप्स्ये ॥

व्युत्पत्तिः—अंहितास्महे='अहि गतौ' इति धातोर्लुट्, महिङि तासि टेरेत्वम्, इदित्वात् 'इदितो नुम् धातोः' इति नुम् च । लब्धाहे='डुलभष प्राप्तौ' इति धातोर्लुटि टेः 'टित आत्मनेपदानां टेरे' इति एत्वे 'ह एति' इति तासि सकारस्य हकारः 'झषस्तथोर्धोऽधः' इति तस्य धत्वम् ॥

भाषाऽर्थः—हे हनुमानूजी ! इस मार्गसे तुम्हारे जाने पर हमलोग भी जाएंगे फिर तुम्हारे सम्मुखवर्ती होने पर मैं सन्तोष को प्राप्त करूंगा ॥ १७ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गते तस्मिन्गृहीताऽर्थे रामः सुग्रीवराक्षसौ।
उक्तवान् श्वोऽभिगन्तास्थो युवां सह मया पुरम् ॥ १८ ॥

अन्वयः—तस्मिन् गृहीताऽर्थे गते (सति) रामः सुग्रीवराक्षसौ उक्तवान्—युवां मया सह श्वः पुरम् अधिगन्तास्थः।

व्याख्या—तस्मिन्=हनूमति, गृहीताऽर्थे=अवधृतकार्यार्थे, गते=प्रस्थिते, सति, रामः=रामचन्द्रः, सुग्रीवराक्षसौ=सुग्रीवविभीषणौ, उक्तवान्=अब्रवीत्, युवां=सुग्रीवविभीषणौ, मया=रामेण, सह=समं श्वः=परेऽह्नि, पुरं=नगरीम्, अयोध्यामिति भावः। अभिगन्तास्थः=अभिगमिष्यथः॥

व्युत्पत्तिः—मया=सहयोगे तृतीया। अभिगन्तास्थः=अभिपूर्वकाद् गमेर्लुटि थसि तासिप्रत्ययः।

भाषाऽर्थः—कार्याऽर्थको लेकर हनूमान् जी के जाने पर रामचन्द्रजीने सुग्रीव और विभीषणको कहा-तुम दोनों मेरे साथ कल अयोध्यापुरीको जाओगे॥ १८॥

द्रष्टास्थस्तत्र तिस्रो मे मातृस्तुष्टाऽन्तराऽऽत्मनः।
अत्यन्तीनं सखित्वं च प्राप्तास्थो भरताऽऽश्रयम् ॥ १९ ॥

अन्वयः—तत्र तुष्टाऽन्तराऽऽत्मनः तिस्रो मे मातः द्रष्टास्थः, भरताऽऽश्रयम् अत्यन्तीनं सखित्वं च प्राप्तास्थः॥

व्याख्या—तत्र=तस्याम्, अयोध्यानगर्यामिति भावः। तुष्टाऽन्तराऽऽत्मनः=प्रसन्नमानसाः, तिस्रः=त्रिसंख्यकाः, मे=मम, मातृः=जननीः, कौसल्याकेकयी-सुमित्रा इत्यर्थः। द्रष्टास्थः=द्रक्ष्यथः। भरताऽऽश्रयं=भरतविषयम्, अत्यन्तीनम्=आत्यन्तिकं, सखित्वं च=सख्यं च, प्राप्तास्थः=प्राप्स्यथः॥

व्युत्पत्तिः—तुष्टाऽन्तराऽऽत्मनः=तुष्टः अन्तरात्मा यासां ताः तुष्टाऽन्तराऽऽत्मानस्ताः। मातः=ऋदन्तत्वात्स्त्रीत्वविवक्षायाम् 'ऋन्नेभ्यो ङीप्' इति ङीपि प्राप्ते 'न षट्स्वस्रादिभ्यः' इति निषेधः। द्रष्टास्थः=दृशेः कर्तरि लुटि थसि तास् 'व्रश्चभ्रस्ज-सृजमृजयजराजभ्राजच्छशां षः' इति षत्वे ष 'सृजिदृशोर्झल्यमकिति' इत्यमागमश्च। भरताश्रयं=भरत आश्रयो यस्य तत् भरताऽऽश्रयं तत्। अत्यन्तीनम्=अत्यन्तगामि अत्यन्तीनं, तत् 'अवारपाराऽत्यन्ताऽनुकामं गामी' इति खप्रत्ययः। सखित्वं=सख्युर्भावः सखित्वं, तत्, त्वप्रत्ययः। प्राप्तास्थः=प्रपूर्वकादाप्नोतेर्लुटि थसि तास्॥

भाषाऽर्थः—वहां पर सन्तुष्टचित्त मेरी तीन माताओं (कौसल्या, केकयी और सुमित्रा) को देखोगे और भरतविषयक आत्यन्तिक मित्रताको भी प्राप्त करोगे॥ १९॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युग्मम्

नैवं विरहदुःखेन वयं व्याघानितास्महे।
श्रमोऽनुभाविता नैवं भवद्भ्यां च वियोगजः ॥ २० ॥
एवं युवां मम प्रीत्यै कल्प्तास्थः कपिराक्षसौ !।
गन्तुं प्रयतितासाथे प्रातः सह मया यदि ॥ २१ ॥

अन्वयः--हे कपिराक्षसौ ! प्रातः मया सह गन्तुं प्रयतितासाथे यदि, एवं वयं विरहदुःखेन न व्याघानितास्महे, एवं भवद्भ्यां च वियोगजः श्रमः न अनुभाविता, एवं युवां मम प्रीत्यै, कल्प्तास्थः ॥

व्याख्या—हे कपिराक्षसौ = हे वानरयातुधानौ, सुग्रीवविभीषणावित्यर्थः। प्रातः = प्रभाते, मया = रामेण, सह = समं, गन्तुं = यातुं, प्रयतितासाथे यदि = प्रयतिष्येथे चेत्, एवम् = इत्थं, वयं = सुहृदः, विरहदुःखेन=भवद्वियोगव्यथया, न व्याघानितास्महे = नो व्याहनिष्यामहे। एवम् = अनेन प्रकारेण, भवद्भ्यां च = युवाभ्यां च, सुग्रीवविभीषणाभ्याम् इत्यर्थः। वियोगजः =अस्मद्विरहजन्यः, श्रमः= क्लेशः, न अनुभाविता = न अनुभविष्यते। एवम्=इत्थं, युवां = सुग्रीवविभीषणौ, मम = रामस्य, प्रीत्यै = सन्तोषाय, कल्प्तास्थः = कल्पिष्येते, संपत्स्येथे इत्यर्थः ॥

व्युत्पत्तिः—प्रयतितासाथे = प्रपूर्वकात् 'यती प्रयत्ने' इति धातोर्लुट्, तासि-प्रत्ययः। व्याघानितास्महे = व्याङ् पूर्वकात् 'हन हिंसागत्योः' इति धातोः कर्मणि लुटि तासि चिण्वदिटि वृद्धिः 'हो हन्तेर्ञ्णिन्नेषु' इति हकारस्य घत्वं च। 'संयोजितास्महे' इति पाठान्तरं तत्र संयोजिता भवितास्म इत्यर्थः, युजेर्ण्यन्तस्य चिण्वदिट्, इटोऽसिद्धत्वात् 'णेरनिटि' इति णिलोपः। अनुभाविता=अनुपूर्वाद् भूधातोः कर्मणि लुटि पूर्ववत्तासिः, चिण्वदिटि वृद्धिश्च। प्रीत्यै=कृपूधातोर्योगे 'क्लृपि संपद्यमाने च' इति चतुर्थी। कल्प्तास्थः='कृपू सामर्थ्ये' इति धातोर्लुट् तत्र 'लुटि च क्लृपः' इति वैकल्पिकं परस्मैपदं 'तासि च क्लृपः' इतीट्प्रतिषेधः 'कृपो रो लः' इति रेफस्य लत्व, लपरो लघूपधगुणः॥

भाषार्थः—हे सुग्रीवविभीषण ! प्रातः कालमें आप लोग मेरे साथ जानेके लिए प्रयत्न करेंगे तो ऐसे हम लोग आप लोगोंके वियोगके दुःखसे पीडित नहीं होंगे, इस प्रकारसे आप दोनों मेरे सन्तोषके लिये संपन्न होंगे ॥ २०-२१ ॥

उक्तवन्तौ ततो रामं वचः पौलस्त्यवानरौ।
अनुग्रहोऽयं काकुत्स्थ ! गन्तास्वो यत्त्वया सह ॥ २२ ॥

अन्वयः—ततः पौलस्त्यवानरौ रामं वच उक्तवन्तौ—हे काकुत्स्थ त्वया सह यत् गन्तास्वः अयम् अनुग्रहः ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्या—ततः=रामवाक्याऽनन्तरं, पौलस्त्यवानरौ=विभीषणसुग्रीवौ, रामं=रामचन्द्रं, वचः=वचनम्, उक्तवन्तौ=अगदताम्, किमिति—हे काकुत्स्थ=हे राम !, त्वया=भवता, सह=समं, यत्, गन्तास्वः=गमिष्यावः, अयम्=एषः, अनुग्रहः=प्रसादः, भवत इति शेषः ॥

व्युत्पत्तिः—गन्तास्वः=गमेर्लुट् ॥

भाषाऽर्थः—रामचन्द्रजीके वाक्यके अनन्तर विभीषण और सुग्रीवने रामचन्द्रजीको ऐसा वचन कहा—हे राम ! आपके साथ जो हम दोनों जायेंगे यह आपका अनुग्रह है ॥ २२ ॥

अनुमन्तास्वहे नाऽऽवां भवन्तं विरहं त्वया ।
अपि प्राप्य सुरेन्द्रत्वं किं नु प्रत्तं त्वयाऽऽस्पदम् ॥ २३ ॥

अन्वयः—(हे राम !) सुरेन्द्रत्वं प्राप्य अपि आवां भवन्तं त्वया विरहं न अनुमन्तास्वहे, त्वया प्रत्तम् आस्पदं किमु ? ॥

व्याख्या—(हे राम !) सुरेन्द्रत्वं=देवेन्द्रत्वं, प्राप्य=आसाद्य अपि, आवां=विभीषणसुग्रीवौ, भवन्तम्=उत्पद्यमानं, त्वया=भवता सह, विरहं=वियोगं, न अनुमन्तास्वहे=न अनुमंस्यावहे, त्वया=भवता, प्रत्तं=दत्तम्, आस्पदं=प्रतिष्ठां, किमु=किं वक्तव्यम्, भवन्तं विना स्वाराज्यमपि नाऽस्माकमभिमतं किमुत पदार्थान्तरमिति भावः ॥

व्युत्पत्तिः—भवन्तं विरहमिति वर्तमानकालस्य न अनुमन्तास्वहे इति भविष्यत्कालेन सह सम्बन्धे 'धातुसम्बन्धे प्रत्ययाः' इति साधुत्वम् । अनुमन्तास्वहे=अनुपूर्वकान्मनधातोर्लुट् । प्रत्तं=प्रपूर्वकाद्दाधातोः क्तप्रत्ययः 'अच उपसर्गात्तः' इति दस्य तकारादेशः । आस्पदम्='आस्पदं प्रतिष्ठायाम्' इति निपातनात्सुडागमः । इति लुड्विलासः ॥

भाषाऽर्थः—हे राम ! इन्द्रपदको प्राप्त करके भी हम दोनों आपके साथ होनेवाले वियोगका अनुमोदन नहीं करते हैं, आपसे दिये गये राज्यकी क्या बात? ॥ २३ ॥

अथ सर्गाऽवसाने छन्दोन्तरेण प्रकीर्णकक्रियाविलसितं दर्शयति—

ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते ।
सम्प्रस्थिता वेगवशादगाधं प्रक्षोभयन्तः सलिलं पयोधेः ॥ २४ ॥

अन्वयः—ततः ते कथाभिः दोषां समतीत्य सैन्यैः सह पुष्पकम् आरुह्य वेगवशात् अगाधं पयोधेः सलिलं प्रक्षोभयन्तः (सन्तः) सम्प्रस्थिताः ॥

व्याख्या—ततः=संवादाऽनन्तरं, ते=श्रीरामसुग्रीवविभीषणादयः, कथाभिः=

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इष्टालापैः दोषां = रात्रिं, समतीत्य = नीत्वा, यापयित्वेति भावः। सैन्यैः=सैनिकैः सह = समं, पुष्पकं = पुष्पकविमानम् , आरुह्य = आरोहणं कृत्वा, वेगवशात्=जववशात् , पुष्पकवेगवाताहतिबलादित्यर्थः। अगाधम्=अतलस्पर्शं, पयोधेः=समुद्रस्य, सलिलं = जलं, प्रक्षोभयन्तः = प्रक्षुब्धं कुर्वन्तः सन्तः, संप्रस्थिताः = अयोध्यां प्रति प्रस्थानं कृतवन्त इत्यर्थः॥

व्युत्पत्तिः—अगाधम् = 'अगाधमतलस्पर्शे' इत्यमरः। पयोधेः=पयांसि धीयन्ते अत्र पयोधिस्तस्य, 'कर्मण्यधिकरणे चे'ति किप्रत्ययः। उपजातिवृत्तम् ॥

भाषाऽर्थः—संवादके अनन्तर श्रीरामचन्द्र, सुग्रीव और विभीषण आदिने अनेक आभाषणोंसे रात बिताकर सैनिकोंके साथ पुष्पक विमानपर चढ़कर वेगवश अत्यन्त गम्भीर समुद्र जलको प्रक्षुब्धकर प्रस्थान किया॥ २४॥

सेतुं महेन्द्रं मलयं सविन्ध्यं समाल्यवन्तं गिरिमृष्यमूकम्।
स दण्डकाऽरण्यवर्तीं च पम्पां रामः प्रियायाः कथयन् जगाम ॥२५॥

अन्वयः—रामः सेतुं महेन्द्रं सविन्ध्यं मलयं समाल्यवन्तम् ऋष्यमूकं गिरिम् दण्डकाऽरण्यवर्तीं पम्पां च प्रियायाः कथयन् जगाम॥

व्याख्या—सः = प्रसिद्धः, रामः = रामचन्द्रः, सेतुम् = आलिं, महेन्द्रं=तदाख्यं पर्वतं, सविन्ध्यं = विन्ध्यसहितं, मलयं=मलयपर्वतं, समाल्यवन्तं=माल्यवत्पर्वतसहितम् , ऋष्यमूकम् = ऋष्यमूकनामकं, गिरिं = पर्वतम्। दण्डकाऽरण्यवर्तीं=दण्डकारण्यसहितां, पम्पां च = तदाख्यं सरश्च, प्रियायाः = सीतायाः, कथयन्=वर्णयन्, जगाम = गतः॥

व्युत्पत्तिः—सविन्ध्यं = विन्ध्येन सहितः सविन्ध्यस्तम् , तुल्ययोगबहुव्रीहिः। उपजातिवृत्तम् ॥

भाषाऽर्थः—श्रीरामचन्द्रजीने सेतु, महेन्द्रपर्वत, विन्ध्यपर्वत, मलयपर्वत, माल्यवान् पर्वत, ऋष्यमूक पर्वत, दण्डकाऽरण्य और पम्पाका भी सीताजीसे वर्णन करते हुए गमन किया॥ २५॥

एते ते मुनिजनमण्डिता दिगन्ताः शैलोऽयं लुलितवनः स चित्रकूटः।
गङ्गेयं सुतनु ! विशालतीररम्या मैथिल्या रघुतनयो दिशन्ननन्द ॥२६॥

अन्वयः—हे सुतनु ! एते ते मुनिजनमण्डिता दिगन्ताः। अयं स लुलितवनः चित्रकूटः शैलः। विशालतीररम्या इयं गङ्गा (इति) मैथिल्याः दिशन् रघुनन्दनो ननन्द॥

व्याख्या—हे सुतनु = हे सुगात्रि !, सीते इत्यर्थः, एते = परिदृश्यमानाः, ते= पूर्वाऽनुभूताः, मुनिजनमण्डिताः = ऋषिजनाऽलङ्कृताः, दिगन्ताः = आशाभागाः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्य च ललितकुटस्थः, सः = पूर्वाऽनुभूतः, लुलितवनः = क्षुब्धाऽरण्यः, अस्मद्वेगवशा- दिति शेषः। 'स्थगितपथ' इति मल्लिनाथसम्मतः पाठस्तस्य आच्छादितमार्ग इत्यर्थः। क्वचिच्च 'ललितवन' इति पाठान्तरं तस्य सुन्दरारण्य इत्यर्थः। चित्र- कूटनामा, शैलः = पर्वतः। विशालतीररम्या = महातटरमणीया, 'विशालतीर्थ- रम्ये'ति मल्लिनाथसम्मतः पाठः। इयं = निकटस्था, गङ्गा = भागीरथी, विद्यत इति शेषः। इति मैथिल्याः = सीतायाः, दिशन् = कथयन्, रघुनन्दनः = श्रीरामचन्द्रः, ननन्द = आनन्दितोऽभूत् ॥

व्युत्पत्तिः—हे सुतनु = शोभना तनूर्यस्याः सा सुतनूस्तत्सम्बुद्धौ 'यूस्त्याख्यौ नदी'ति नदीसंज्ञकत्वात् 'अम्बाऽर्थनद्योर्ह्रस्वः' इति सम्बुद्धिह्रस्वत्वं, 'स्त्रियां मूर्ति- स्तनुस्तनूः' इत्यमरः। लुलितवनः = लुलितानि वनानि यस्मिन् सः। ननन्द = 'टुनदि समृद्धौ' इति धातोर्लिट्। प्रहर्षिणी वृत्तम् ॥

भाषाऽर्थः—'हे सुन्दरि ! ये वे (अनुभूत) मुनिजनोंसे अलंकृत दिशाके भाग हैं। यह वह (प्रसिद्ध) हमारे वेगसे क्षुब्धवनोंसे युक्त चित्रकूट पर्वत है। विशाल तटोंसे रमणीय ये गङ्गाजी हैं' सीताजी को ऐसा कहते हुए रामचन्द्रजी आनन्दित हुए ॥ २६ ॥

शिञ्जानभ्रमरकुलाऽऽकुलाऽग्रपुष्पाः
शीताऽम्भःप्रविलयसंप्लवाऽभिलीनाः।
एते ते सुतनु ! पुरीजनोपभोग्या
दृश्यन्ते नयनमनोरमा वनाऽन्ताः ॥ २७ ॥

अन्वयः—हे सुतनु ! शिञ्जानभ्रमरकुलाऽऽकुलाऽग्रपुष्पाः शीताऽम्भःप्रविल- यसंप्लवाऽभिलीनाः पुरीजनोपभोग्याः नयनमनोरमाः ते एते वनान्ताः दृश्यन्ते ॥

व्याख्या—हे सुतनु = हे सुगात्रि, शिञ्जानभ्रमरकुलाऽऽकुलाग्रपुष्पाः = कूजद- लिसमूहव्याप्ताऽग्रकुसुमाः, शीताऽम्भःप्रविलयसंप्लवाऽभिलीनाः = शीतलजलकुल्या- गत्यभिव्याप्ताः, पुरीजनोपभोग्याः = अयोध्यावासिजनोपभोगयोग्याः, नयनमनोरमाः = नेत्रमानसाकर्षकाः, ते = पूर्वाऽनुभूताः, एते = पुरः स्थिताः, वनाऽन्ताः = अरण्यप्र- देशाः, दृश्यन्ते = अवलोक्यन्ते, अयोध्यासमीपं प्राप्ताः स्म इत्यर्थः ॥

व्युत्पत्तिः—शिञ्जानभ्रमरकुलाऽऽकुलाऽग्रपुष्पाः = शिञ्जानानि यानि भ्रमर- कुलानि, तैराकुलानि अग्रपुष्पाणि येषां ते। शीताऽम्भःप्रविलयसंप्लवाऽभिलीनाः = शीताऽम्भसां प्रविलयस्तस्य संप्लवेन अभिलीनाः। प्रविलीयतेऽस्मिन्निति प्रविलयः 'एरच्' इत्यच्। नयनमनोरमाः = नयनानि च मनांसि च रमयन्तीति, 'कर्मण्यण्' इत्यण्। प्रहर्षिणी वृत्तम् ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाषाऽर्थः—हे सुन्दरि ! शब्द करनेवाले भ्रमरसमूहोंसे व्याप्त अग्रपुष्पोंसे युक्त, शीतलजलोंकी कुल्याकी गतिसे अभिव्याप्त, अयोध्यापुरीके जनोंके उपभोग्य, नेत्रों और मनके आकर्षक वे ये वनप्रदेश दिखाई दे रहे हैं ॥ २७ ॥

स्थानं नः पूर्वजानामियमधिकमसौ प्रेयसी पूरयोध्या
दूरादालोक्यते या हुतविविधहविःप्रीणिताऽशेषदेवा ।
सोऽयं देशो रुदन्तं पुरजनमखिलं यत्र हित्वा प्रयातौ
आवां सीते ! वनाऽन्तं सह धृतधृतिना लक्ष्मणेन क्षपाऽन्ते ॥ २८ ॥

अन्वयः—'हे सीते ! नः पूर्वजानां स्थानम् इयम् अधिकं प्रेयसी अयोध्या पूः दूरात् आलोक्यते, या हुतविविधहविःप्रीणिताऽशेषदेवा । सः अयं देशः यत्र रुदन्तम् अखिलं पुरजनं हित्वा आवां क्षपान्ते धृतधृतिना लक्ष्मणेन सह वनाऽन्तं प्रयातौ' ॥

व्याख्या—हे सीते=हे जानकि !, नः=अस्माकं, पूर्वजानां=पूर्वपुरुषाणां, मनुप्रभृतीनामिति भावः । स्थानं=वसतिः, इयम्=एषा, अधिकम्=अत्यन्तं, प्रेयसी=प्रियतमा, अयोध्या=अयोध्याऽऽख्या, पूः=पुरी, दूरात्=विप्रकृष्टकात् आलोक्यते=दृश्यते, उच्चप्रासादयोगादिति भावः । या=पूः, हुतविविधहविःप्रीणिताऽशेषदेवा=आहुतिकृतानेकहव्यतर्पितसमस्तसुरा अस्तीति शेषः । सः=पूर्वाऽनुभूतः, अयं=संनिकृष्टस्थः, देशः=जनपदः, यत्र=यस्मिन्देशे, रुदन्तं=रोदनं कुर्वन्तम् , अखिलं=समस्तं पुरजनं=नगरजनं, हित्वा=त्यक्त्वा, आवां, क्षपाऽन्ते=निशाऽवसाने, धृतधृतिना=धृतसन्तोषेण, लक्ष्मणेन=सौमित्रिणा, सह=समं, वनाऽन्तम्=अरण्यप्रदेशं, प्रयातौ=प्रगतौ ॥

व्युत्पत्तिः—प्रेयसी=अतिशयेन प्रिया, 'द्विवचनविभज्योपपदे तरबीयसुनौ' इति ईयसुन्प्रत्ययः । 'प्रियस्थिरे' त्यादिना प्रियस्य प्रादेशः । हुतविविधहविःप्रीणिताऽशेषदेवा=हुतानि यानि विविधानि हवींषि, तैः प्रीणिता अशेषा देवा यस्यां सा । धृतधृतिना=धृता धृतिर्येन स धृतधृतस्तेन । स्रग्धरा वृत्तं, 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।' इति तल्लक्षणम् ॥

भाषाऽर्थः—'हे सीते ! मनु आदि हमारे पूर्वजोंके स्थान यह अतिशय प्रेयसी अयोध्यापुरी दूरसे देखी जा रही है, जो हवन किये गये अनेक हवियोंसे संपूर्ण देवताओंको तृप्त करनेवाली है । वह यह देश है जहाँ पर रोते हुए सब नागरिकजन को छोड़कर हम दोनों रातके अन्तमें सन्तोष करनेवाले लक्ष्मणके साथ वनप्रदेशको चले गये थे' ॥ २८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तूर्याणामथ निःस्वनेन सकलं लोकं समापूरयन्
विक्रान्तैः करिणां गिरीन्द्रसदृशां क्ष्मां कम्पयन्सर्वतः।
साऽऽनन्दाऽश्रुविलोचनः प्रकृतिभिः सार्धं सहाऽन्तःपुरः
सम्प्राप्तो भरतः समारुतिरलं नम्रः समं मातृभिः ॥ २६ ॥

अन्वयः—अथ तूर्याणां निःस्वनेन सकलं लोकं समापूरयन् गिरीन्द्रसदृशां करिणां विक्रान्तैः क्ष्मां कम्पयन् साऽऽनन्दाऽश्रुविलोचनो भरतः प्रकृतिभिः सार्द्धं सहाऽन्तःपुरः समारुतिः मातृभिः समं संप्राप्तः (सन्) अलं नम्रः (अभूत्) ॥

व्याख्या—अथ=रामवचनाऽनन्तरं, तूर्याणां=वाद्यानां, निःस्वनेन=शब्देन, सकलं=समस्तं, लोकं=भुवनं, समापूरयन्=व्याप्नुवन्, गिरीन्द्रसदृशां=सुमेरुकल्पानां, करिणां=हस्तिनां, विक्रान्तैः=पादन्यासैः, सर्वतः=सर्वत्र, क्ष्मां=पृथिवीं, कम्पयन्=क्ष्मापयन्, साऽऽनन्दाऽश्रुविलोचनः=आनन्दबाष्पयुक्तनयनः, भरतः=कैकेयीतनयः, प्रकृतिभिः=प्रजाभिः अमात्यैश्च, सार्द्धं=सह, सहाऽन्तःपुरः=साऽवरोधः, अन्तःपुरस्त्रीजनसहित इत्यर्थः। समारुतिः=हनूमत्सहितः, मातृभिः=जननीभिः, कौशल्यादिभिरिति भावः। समं=सह, संप्राप्तः=समासादितः सन्, अलम्=अत्यर्थम्, अतिभक्त्येति शेषः। नम्रः=प्रणतः, अभूदिति शेषः।

व्युत्पत्तिः—गिरीन्द्रसदृशां=गिरीन्द्रैः सदृशो गिरीन्द्रसदृशस्तेषां, 'त्यदादिषु दृशोऽनालोचने कञ्चे'ति चकारात्क्विन्। कम्पयन्=कम्पयतीति, णिजन्तात्कपिधातोर्लटः शत्रादेशः 'क्ष्मापयन्' इति मल्लिनाथसम्मतः पाठस्तत्र 'क्ष्मायी विधूनने' इति धातोर्ण्यन्ताल्लटः शत्रादेशः 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ' इति पुगागमः, यकारलोपः। साऽऽनन्दाऽश्रुविलोचनः=आनन्दस्य अश्रूणि आनन्दाऽश्रूणि, तैः सहिते साऽऽनन्दाश्रुणी, तादृशी विलोचने यस्य सः। सहाऽन्तःपुरः=अन्तःपुरेण सहितः, 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। समारुतिः=मारुतिना सहितः, पूर्वसूत्रेण बहुव्रीहिः, 'वोपसर्जनस्ये'ति सहस्य वैकल्पिकः सभावः। मातृभिः=समंपदेन योगे 'सहयुक्तेऽप्रधाने' इति तृतीया। शार्दूलविक्रीडितं वृत्तं 'सूर्याऽश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।' इति तल्लक्षणम् ॥

भाषाऽर्थः—रामचन्द्रजीके वचनके अनन्तर वाद्योंके शब्दसे संपूर्ण लोकको व्याप्त करते हुए सुमेरुपर्वतके तुल्य हाथियोंके पादन्यासोंसे सर्वत्र पृथ्वीको कम्पित करते हुए और हर्षाऽश्रुसे पूर्ण नेत्रोंवाले भरतजी प्रजाओं और मन्त्रियोंके साथ प्राप्त होकर अतिशय भक्तिसे प्रणत हुए ॥ २९॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ ससम्भ्रमपौरजनाऽऽवृतो भरतपाणिधृतोज्ज्वलचामरः ।
गुरुजनद्विजवन्द्यभिनन्दितः प्रविशति स्म पुरं रघुनन्दनः ॥ ३० ॥

अन्वयः—अथ रघुनन्दनः ससम्भ्रमपौरजनाऽऽवृतः भरतपाणिधृतोज्ज्वलचामरः गुरुजनद्विजवन्द्यभिनन्दितः (सन्) पुरं प्रविशति स्म ॥

व्याख्या—अथ = भरतसम्प्राप्त्यनन्तरं, रघुनन्दनः = रामचन्द्रः, ससम्भ्रमपौरजनाऽऽवृतः = सत्वरनागरिकजनपरिवारितः, भरतपाणिधृतोज्ज्वलचामरः = भरतकरगृहीतनिर्मलप्रकीर्णकः, गुरुजनद्विजवन्द्यभिनन्दितः = मात्रादिपूज्यजनविप्रस्तुतिपाठकप्रशंसितः सन् , पुरं=नगरीम् , अयोध्यामित्यर्थः । प्रविशतिस्म=प्रविष्टः॥

व्युत्पत्तिः—ससम्भ्रमपौरजनाऽऽवृतः = सम्भ्रमेण सहिताः ससम्भ्रमाः, तादृशा ये पौरजनास्तैरावृतः । भरतपाणिधृतोज्ज्वलचामरः=भरतपाणिना धृतम् उज्ज्वलं चामरं यस्य सः । 'धृतम्' इत्यत्र 'धुतम्' इति मल्लिनाथसम्मतः पाठस्तस्य कम्पितमित्यर्थः । 'चामरं तु प्रकीर्णकम्' इत्यमरः । गुरुजनद्विजवन्द्यभिनन्दितः = गुरुजनाश्च द्विजाश्च वन्दिनश्च गुरुजनद्विजवन्दिनस्तैरभिनन्दितः । प्रविशतिस्म= स्मयोगे 'लट् स्मे' इति भूते लट् । द्रुतविलम्बितं वृत्तं, 'द्रुतविलम्बितमाह नभौ भरौ ।' इति तल्लक्षणम् ॥

भाषाऽर्थः—भरतजीके आनेके अनन्तर रामचन्द्रजीने शीघ्रता करनेवाले नागरिक जनोंसे परिवित होकर भरतके हाथसे गृहीत उज्ज्वल चामरसे सेवित होकर और माता आदि गुरुजन, ब्राह्मण और स्तुतिपाठकोंसे प्रशंसित होते हुए अयोध्यापुरीमें प्रवेश किया ॥ ३० ॥

प्रविधाय धृतिं परां जनानां युवराजं भरतं ततोऽभिषिच्य ।
जघटे तुरगाऽध्वरेण यष्टुं कृतसम्भारविधिः पतिः प्रजानाम् ॥ ३१ ॥

अन्वयः—ततः प्रजानां पतिः जनानां परां धृतिं प्रविधाय भरतं युवराजम् अभिषिच्य कृतसम्भारविधिः तुरगाऽध्वरेण यष्टुं जघटे ॥

व्याख्या—ततः=पुरप्रवेशाऽनन्तरं, प्रजानां=जनानां, पतिः=स्वामी, राजा राम इति भावः । जनानां=प्रजानां, पराम्=उत्कृष्टां, धृतिं=प्रीतिं, प्रविधाय=सम्पाद्य, भरतं=केकयीसूनुं, युवराजं=युवराजपदभाजम् , अभिषिच्य=अभिषिक्तं कृत्वा, भरतं युवराजं कृत्वेति भावः । कृतसम्भारविधिः=विहितसामग्रीविधानः सन् , सञ्चितयज्ञोचितोपकरणः सन् इति भावः, तुरगाऽध्वरेण=अश्वमेधयागेन, 'जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्' इति जातावेकवचनम् । अश्वमेधयज्ञैरित्यर्थः,

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'अश्वमेधशतैरिष्ट्वा ब्रह्मलोकं गमिष्यति।' इति वाल्मीकिमुनिवचनात्। यष्टुं=यागं कर्तुं, जघटे=चेष्टितवान्, प्रवृत्त इत्यर्थः।

व्युत्पत्तिः—कृतसम्भारविधिः=कृतः, सम्भारविधिर्येन सः। तुरगाऽध्वरेण= तुरगप्रयोज्योऽध्वरस्तुरगाऽध्वरस्तेन, 'शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम्' इति मध्यमपदलोपी समासः। जघटे='घट चेष्टायाम्' इति धातोर्लिट्॥

भाषाऽर्थः—तब प्रजाओंके पालक रामने प्रजाजनोंकी उत्कृष्ट प्रीतिका संपादन कर भरतको युवराज बनाकर यज्ञके उपकरणोंका सञ्चय कर अश्वमेध यज्ञ करनेके लिए चेष्टा की॥ २१॥

नायकाऽभ्युदयान्तं महाकाव्यमिति नयेन ग्रन्थं परिसमाप्य तत्राऽऽदरप्रयोजकं वाक्यं दर्शयति—

इदमधिगतमुक्तिमार्गचित्रं विवदिषतां वदतां च सन्निबन्धात्।
जनयति विजयं सदा जनानां युधि सुसमाहितमैश्वरं यथाऽस्त्रम्॥

अन्वयः—उक्तिमार्गचित्रं सुसमाहितम् इदम् अधिगतं (सत्) युधि अधिगतमुक्तिमार्गचित्रं सुसमाहितम् ऐश्वरम् अस्त्रं यथा सन्निबन्धात् विवदिषतां वदतां च जनानां सदा विजयं जनयति॥

व्याख्या—उक्तिमार्गचित्रं=भणितिभङ्ग्यद्भुतं, सुसमाहितं=गुणाऽलङ्कारपरिष्कृतम्, इदं=महाकाव्यम्, अधिगतं=परिशीलितं सत्, युधि=संग्रामे, अधिगतमुक्तिमार्गचित्रम्=अवगतमोचनप्रकाराऽद्भुतं सुसमाहितं=धनुषि सुसंहितम् ऐश्वरम्=ईश्वरस्येदम्, अस्त्रम्=आयुधं, पाशुपताऽस्त्रमिति भावः। यथा=इव, सन्निबन्धात्=काव्यपक्षे-सम्यग्गुम्फनात्, पाशुपताऽस्त्रपक्षे-सम्यङ्मात्रयोजनाद्धेतोः। विवदिषतां=काव्यपक्षे--वक्तुमिच्छतां, पाशुपताऽस्त्रपक्षे-युद्धे विचित्रं प्रयोक्तुमिच्छतां वदतां च=वक्तुं प्रवर्तमानानां जनानां=पुरुषाणां, सदा=सर्वदा, विजयं=काव्यपक्षे, वादजयं, पाशुपताऽस्त्रपक्षे-युद्धजयं जनयति=उत्पादयति॥

व्युत्पत्तिः—उक्तिमार्गचित्रम्=उक्तिमार्गैः चित्रम्। अधिगतमुक्तिमार्गचित्रम्= अधिगतो मुक्तिमार्गो येन तत् अधिगतमुक्तिमार्गं, तच्च तच्चित्रम्। ऐश्वरम्=ईश्वरस्येदम्, 'तस्येदम्' इत्यण्। सन्निबन्धात्=सम्यक् निबन्धः सन्निबन्धस्तस्मात्, 'कुगतिप्रादयः' इति समासः। जनयति='जनी प्रादुर्भावे' इति धातोर्णौ 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' इति परस्मैपदम्। श्लेषसङ्कीर्णोपमा। पुष्पिताग्रावृत्तम्-- 'अयुजि नयुगरेफतो यकारो युजि च जौ जरगाश्च पुष्पिताग्रा' इति।

भाषाऽर्थः—उक्तिके वैचित्र्यसे अद्भुत, गुणों और अलङ्कारोंसे परिष्कृत, भट्टिकाव्यनामक यह महाकाव्य परिशीलित होता हुआ संग्राममें जाने गये छोड़नेके

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकारोंसे अद्भुत, धनुषमें सन्धान किये गये पाशुपत अस्त्रके सदृश उत्तमरूपसे योजन करनेसे (काव्यपक्षमें) उत्तमगुम्फन करनेसे संग्रामकी इच्छा करने वाले और बोलने वाले जनों को सदा विजयको उत्पन्न करता है ॥ ३२ ॥

दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्ताऽमर्ष इवाऽन्धानां भवेद्व्याकरणादृते ॥ ३३ ॥

अन्वयः—अयं प्रबन्धः शब्दलक्षणचक्षुषां दीपतुल्यः, व्याकरणात् ऋते अन्धानां हस्ताऽमर्षं इव भवेत् ॥

व्याख्या—अस्य महाकाव्यस्याऽध्ययनाऽधिकारितां निरूपयति—दीपतुल्य इति । अयं = सन्निकृष्टस्थः, प्रबन्धः=काव्यरूपसन्दर्भः रावणवधाऽपरनामकं भट्टिकाव्यमिति भावः । शब्दलक्षणचक्षुषां = व्याकरणनेत्राणां वैयाकरणानामित्यर्थः । दीपतुल्यः = प्रदीपसदृशः, 'दीपकल्प' इति मल्लिनाथसम्मतः पाठः । प्रबन्धोऽयं वैयाकरणानां सचक्षुषां दीप इवोपकारक इति भावः । उक्तमर्थं व्यतिरेकेण प्रदर्शयति—हस्ताऽमर्ष इति । व्याकरणात् ऋते = शब्दशास्त्रं विना, अन्धानां = नेत्रविकलानां, हस्ताऽमर्ष इव = करपरामर्श इव, 'हस्ताऽऽदर्श' इति मल्लिनाथसम्मतः पाठस्तत्र करस्थदर्पण इवेत्यर्थः । भवेत् = स्यात् । यथाऽन्धानां परामृश्यमानानां घटपटादीनां अवयवसंस्थानमात्रपरिज्ञानं न स्वरूपपरिज्ञानमेवमस्य प्रबन्धस्याऽपि अवैयाकरणानां न स्वरूपपरिज्ञानं भवेदिति भावः ॥

व्युत्पत्तिः—शब्दलक्षणचक्षुषां = शब्दलक्षणम् (व्याकरणम्) एव चक्षुर्येषां ते शब्दलक्षणचक्षुषस्तेषाम् । व्याकरणात् = ऋतेपदेन योगे 'अन्यारादितरर्तेदिक्शब्दाऽञ्चूत्तरपदाजाहियुक्ते' इति पञ्चमी ॥

भाषाऽर्थः—यह प्रबन्ध वैयाकरणोंके लिए दीपके तुल्य है, वह व्याकरणके विना अन्धोंको हस्तपरामर्शके तुल्य होगा ॥ ३३ ॥

व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।
हता दुर्मेधसश्चाऽस्मिन् विद्वत्प्रियतया मया ॥ ३४ ॥

अन्वयः—इदं काव्यं व्याख्यागम्यं, सुधियाम् अलम् उत्सवः । मया विद्वत्प्रियतया अस्मिन् दुर्मेधसो हताः ॥

व्याख्या—अस्य महाकाव्यस्य सर्वसौलभ्याऽभावं प्रतिपादयति—व्याख्यागम्यमिति । इदं = सन्निकृष्टस्थं, काव्यं = भट्टिकाव्यं, व्याख्यागम्यं = व्याख्यानवेद्यं गुरुमुखादेव ज्ञेयमिति भावः । अतः सुधियां=विदुषां, वैयाकरणानामित्यर्थः, अलम्= अत्यन्तम्, उत्सवः = क्षणः, आनन्द इति भावः । मया = भट्टिनामकसूरिणा, वि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्विप्रियतया = विपश्चिल्लुब्धतयेत्यर्थः । अस्मिन् = महाकाव्ये, दुर्मेधसः = दुर्बुद्धयः, मूढाः व्याकरणाऽनभिज्ञा इति भावः । हताः = उपेक्षिताः, विदुषामेवात्र प्रवेशोऽस्तु मा भूदविदुषामिति मत्वेति तात्पर्यम् ॥

व्युत्पत्तिः—सुधियां = शोभना धीर्येषां ते सुधियस्तेषाम् । विद्वत्प्रियतया = विद्वांसः प्रिया यस्य स विद्वत्प्रियस्तस्य भावस्तत्ता, तया । दुर्मेधसः = दुष्टा मेधा येषां ते, 'नित्यमसिच्प्रजामेधयोः' इति 'नन्दुःसुभ्य इत्येव' इति समासाऽन्तोऽसिच्प्रत्ययः ॥

भाषाऽर्थः—यह काव्य (भट्टिकाव्य) केवल व्याख्यासे वेद्य है अतः विद्वानों में लुब्ध होनेसे इस काव्यमें दुर्बुद्धियों (अवैयाकरणों) को अनुगृहीत नहीं किया है ॥

काव्यमिदं विहितं मया वलभ्यां श्रीधरसूनुनरेन्द्रपालितायाम् ।
कीर्तिरतो भवतान्नृपस्य तस्य प्रेमकरः क्षितिपो यतः प्रजानाम् ॥

अन्वयः—मया श्रीधरसूनुनरेन्द्रपालितायां वलभ्याम् इदं काव्यं विहितम् । अतः तस्य नृपस्य कीर्तिः भवतात् ; यतः (सः) क्षितिपः प्रजानां प्रेमकरः ॥

व्याख्या—मया = भट्टिकविना, श्रीधरसूनुनरेन्द्रपालितायां = श्रीधरपुत्रनरेन्द्रभूपरक्षितायां, वलभ्यां = वलभीनामपुर्याम् , इदं = सन्निकृष्टस्थं, काव्यं = महाकाव्यं, रावणवधपर्यायं भट्टिकाव्यं, विहितं = रचितम् । अतः = अस्मात्कारणात् , तस्य पूर्वोक्तस्य, नृपस्य = राज्ञः, नरेन्द्रभूपालस्येति भावः । कीर्तिः = यशः, भवतात् = भूयात् , यतः = यस्मात्कारणात् , सः = पूर्वोक्तः, क्षितिपः = राजा, प्रजानां = जनानां प्रेमकरः = स्नेहाऽनुकूलः ॥

व्युत्पत्तिः—श्रीधरसूनुनरेन्द्रपालितायां = श्रीधरसूनुश्चाऽसौ नरेन्द्रः, तेन पालितायाम् । भवतात् = भूधातोः 'आशिषि लिङ्लोटौ' इति आशिषि लोट् 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति तातङ् । प्रेमकरः = प्रेम करोतीति तदनुलोमः, 'कृञो हेतुताच्छील्याऽऽनुलोम्येषु' इत्यानुलोम्ये टप्रत्ययः ॥

भाषाऽर्थः—मैंने श्रीधर महाराजके पुत्र नरेन्द्रमहाराजसे रक्षित वलभीमें इस काव्यको बनाया है; इस लिए पूर्वोक्त महाराजकी कीर्ति रहे क्योंकि वे महाराज प्रजाओंके प्रेमके अनुकूल हैं ॥ ३५ ॥

इति श्रीभट्टिकाव्ये द्वाविंशतितमः सर्गः ।

समाप्तमिदं भट्टिकृतं महाकाव्यम् ।

इति श्रीशेषराजशर्मप्रणीतया चन्द्रकलाव्याख्यया मण्डिते श्रीभट्टिकाव्ये द्वाविंशः सर्गः ।

ॐ तत्सत् श्रीरामाऽर्पणमस्तु ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकानुक्रमणिका

श्लोकः	सर्गः	श्लोकाङ्कः
अ		
अकम्पनस्त०	१४	८२
अकुप्यदिन्द्र०	१७	३२
अक्रूर्दिष्ट०	१५	४५
अकोकूयिष्ट०	१५	११४
अक्षुधच्चाम्य०	१५	१९
अखण्डयमा०	१२	१७
अगोपिष्टां०	१५	११३
अग्निः प्रमा०	१२	२४
अग्नीनवरिव०	१७	५१
अग्रसिष्ट०	१५	६२
अघुरंस्ते०	१७	६२
अङ्गदेन समं०	१५	७७
अङ्गदेनाऽहसा०	१५	११५
अचूर्णयच्च०	१७	७९
अच्छुत्तां च०	१५	९१
अजिघ्रपंस्त०	१५	१०९
अजिह्वदत्०	१५	११०
अञ्जवन्नोरस०	१९	१६
अतस्त्वरच्च०	१५	६०
अतस्तम्भद०	१५	८७
अतिकाया०	१६	३
अतिकाये हते	१६	२
अतिक्रान्ता०	२२	९
अतुषत्पीठम्०	१५	८
अतुष्यन्नमराः०	१७	४७
अतृणेट् शक्र०	१७	१५

श्लोकः	सर्गः	श्लोकाङ्कः
अतौत्सीद्०	१५	३७
अथ तमुप०	१२	८७
अथ ससंभ्रम०	२२	३०
अथाब्धितोर०	१२	२१
अदालिषुः०	१५	३८
अदिहश्चन्दनै	१७	५४
अदीदिपत्ततो	१५	८२
अदृश्यन्ताऽनि०	१७	१००
अद्धि त्वं पद्म०	२०	१२
अद्राष्टां तं रघु०	१५	३९
अधर्मान्नात्रसः	१७	३४
अध्यगीष्टार्थं०	१५	८८
अध्यायच्छक्र०	१७	३१
अध्युत्रास०	१४	७५
अनंसीद्भूर्भरेण	१५	२५
अनर्दिषुः कपि०	१५	३५
अनिमित्ता०	१७	९
अनिर्वृतं भूतिषु	१२	७८
अनुजानीहि	२०	२
अनुमन्तारवहे०	२२	२३
अनुष्ठाय यथा०	२०	१९
अन्तःपुराणि	१८	३७
अन्ये त्वलङ्घिषुः	१५	३२
अपक्वकुम्भाविव	१२	४२
अपप्यमायतो	१८	५
अपप्रथद्गुणान्	१५	७२
अपमन्युस्ततो०	१९	१

श्लोकः	सर्गः	श्लोकाङ्कः
अपि तत्र रिपुः	२१	२
अपिस्फवत्खसा०	१५	५९
अपूजयँश्च तु०	१७	५
अपूजयन् कुल०	१७	२
अपूरयन्नभः	१७	५६
अपृष्टो नु ब्रवीति	१८	१७
अपौहद्बाणवर्षम्	१७	८३
अबभाजत्ततः	१५	८३
अबिभ्रजत्ततः	१५	९३
अभिनच्छत्रु०	१७	६६
अभेदि च शरैः	१५	६५
अभैषुः कपयो०	१५	५७
अमंस्यत	२१	१०
अमन्थीच्च०	१५	४६
अमर्षो मे परः	१६	२१
अमलमणि०	१३	४०
अम्भांसि बध्नम०	१९	३३
अयुक्तमिदमि०	१७	४९
अयं नियोगः	२०	१५
अरविन्दरेणु०	१३	१९
अरोदीद्राक्ष०	१७	४८
अर्थेन संभृता	१६	२७
अलिगणवि०	१३	१८
अलोठिष्ट च भू०	१५	५६
अवगाढं	१३	१७
अवसेयाश्च	१९	२८
अवादीन्मास्म	१५	९

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकः	सर्गः	श्लोकाङ्कः
अविवेकन्नृपा०	१५	६१
अवोचत्कुम्भ०	१५	१३
अशान भरतात्	२०	२३
अश्रृण्वन्नन्यतः	१७	१७
अशोभिष्ट	१५	५४
अश्वान् वालि०	१५	७८
अश्वान् विभी०	१७	९०
अष्टघंटां महा०	१७	९२
असितोऽसर०	१३	४०
असुरमहरि०	१३	११
अस्ताविषुः	१५	७०
अस्तुवत् देव	१७	७०
अस्तुवन्	१८	८
अस्तृणादधि०	१८	१०२
अस्पन्दिष्टाऽपि	१५	२७
अस्त्रस्य चाऽऽ०	१५	८४
अहो जागर्ति	१८	११
अहौषीत्कृष्ण०	१५	९६
आंहिष्ट तान०	१५	२८
आक्रन्दामि	१६	[illegible]
आख्यातासि	२२	१५
आघूर्णितां ततो	१५	११८
आघ्नन् भेरीः	१७	७
आचचक्षे च	१४	५२
आचिक्याते च	१४	४७
आचिचाय स	१४	४६
आच्छादयन्	१७	३
आजघ्नुस्तूर्यं	१४	९६
आटाट्यताऽ०	१७	७५
आदद्ध्वं	१९	८
आविदेष्ट त्वं	१४	१४
आनन्दयिष्य	२१	१२

श्लोकः	सर्गः	श्लोकाङ्कः
आनन्दितार०	२२	१४
आसारो भवता	२२	८
आयन्नन् कपि०	१७	११२
आमन्त्रयेत् तान्	१९	७
आमुञ्चद्वर्म	१७	६
आयान्त्यः स्व०	२१	२३
आयासलभ०	१३	१०
आयिष्ट मारु	१५	१०४
आरूढं च	१३	२१
आरूढवाण०	१३	४६
आरोदयामि	१६	४२
आर्च्छन् वानर	१७	१०
आलोकय०	१६	८१
आशासत०	१७	१
आश्चर्यं यच्च०	१९	१९
आश्चर्यं यच्च०	२१	८
आश्च्योतत्	१७	७७
आश्वासयां०	१४	६१
आसस्वृ०	१४	१०४
आसीद्द्वारेषु	१७	५७
आस्कन्दन्द्र०	१७	८२
आस्फावता०	१७	५०
आस्रन्ल्लय०	१७	११
आह्वास्यते०	१६	११
इ		
इच्छन्त्यभी०	१२	७९
इच्छा मे	१९	२५
इति वचन०	१२	८६
इदमधिगतम्	२२	३२
इन्दोः०	१६	१७
इहाऽजीत्र०	१०	३३
ई		
ईर्षांचक्रेऽय	१४	१८

श्लोकः	सर्गः	श्लोकाङ्कः
उ		
उक्तवन्तौ०	२२	२२
उक्तवान्०	२०	९
उत्कनाते०	१४	३२
उच्चखनुः०	१३	२१
उज्जुगूरे ततः	१४	५१
उत्तिष्ठस्व	२०	१८
उत्तेरिथ०	१४	५७
उत्पातजं०	१२	७०
उत्पाताः०	१५	२६
उत्सुकानी०	२०	८
उदजीगमत्०	१७	९५
उदतारिषुः	१५	३३
उदतारीद्०	१५	१०
उदरे चाऽज०	१५	५०
उद्धंस्यति०	१६	५
उन्मीलि०	१६	८
उन्मुच्य०	१८	३४
उपशाम्यतु०	२०	५
उपेक्षणीयैव	१२	२७
उपेक्षितै०	१२	१५
उभावक्रन्त०	१७	१०४
उभौ मायां०	१७	१०५
उल्का दुग्ध०	१४	२१
उवाच चैनं०	१२	८२
उष्णीषं०	१४	९५
उत्सेरन् यत्र०	१९	१०
ऊ		
ऊर्णुनाव स	१४	१०६
ऊर्ध्वं स्रुचं	२०	१७
ऊर्ध्वं म्रियै०	१८	२१
ऊहिरे मूर्ध्नि	१४	९१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकः	सर्गः	श्लोकाङ्कः
ऋ		
ऋषभोऽद्रीन्	१५	४४
ए		
एकः पदातिः	१२	५६
एकेन वाली	१२	३७
एकेन सम्भ्रिः	१२	३५
एते ते मुनि०	२२	२६
एवं युवां०	२२	२१
एवं विजि०	१४	१०६
एष सेवया०	१६	३८
एष प्रावृषि	१५	८९
ऐ		
ऐन्द्रेण हृदये	१५	६९
ओ		
औ		
औच्चर्यं स्व०	१२	६४
क		
कथं न्वजी०	१५	७३
कपयोऽबि०	१७	५८
कम्बुनय०	१४	२
करोति वैरम्	१२	८३
कलहरिक०	१३	३५
कल्पिष्यसे०	१६	१२
कामो जनस्य	१९	२०
काव्यसिद्ध०	२२	३५
किं दुर्नये०	१२	६८
कुम्भकर्ण०	१५	२१
,, सुतौ	१५	११२
कुम्भकर्णे हते	१६	१९
कुम्भकर्णो०	१६	१८
कूर्पासत्रा०	१९	३

श्लोकः	सर्गः	श्लोकाङ्कः
कृतं सर्वं०	१०	१५
कृताभि०	१२	५०
कृतैरपि हत०	१४	४१
कृशानुवर्त्म०	१२	९
केचित्संचु०	१४	१०५
केन संभा०	१६	१५
केन संविद्ध०	१८	२९
केशानलुञ्चि०	१५	३
कोव्या०	१४	२९
कोऽन्योऽक०	२१	१७
क्रियासमा०	१२	६२
क्रियेरंश्च०	१९	३
क्रीडन् भुज०	१२	८४
क्रुद्धाननुनयेः	१९	२४
क्रूराः क्रिया०	१२	४६
क्लिष्टाऽऽरम०	१२	४४
क० च०	२०	२४
क स्त्रीविषयाः	१२	५९
ख		
खमट घामट	२०	३०
खलु युवसु०	१४	८४
ग		
गच्छन्तु०	१३	१४
गजानां प्रबुद्धः	१४	११
गते तस्मि०	२२	१८
गते त्वयि०	२२	१७
गत्वाथ ते०	१९	१४
गदा शक्र०	१४	३६
गन्तारः०	२१	१६
गन्तुं लङ्का०	१३	१२
गम्भीरवे०	१४	१३
गम्भीराः०	१७	६३

श्लोकः	सर्गः	श्लोकाङ्कः
गाढागुरुपुङ्ख०	१३	३
गाढसमी०	१३	४३
गाधितासे०	२२	२
गान्धर्वेण०	१७	८८
गिरिपक्षच्चा०	१२	२९
गुरुगिरिवर०	१३	१६
गुरुपणववेणु०	१३	४५
घ		
घानिषीष्ट०	१९	२९
घोरजलद०	१३	४
घोषेण तेन०	१२	६१
घ्नन्तं मोघे०	१५	४१
च		
चकासांचक्रुः	१४	१९
चक्राणाऽऽश०	१४	८९
चञ्चलतरुह०	१३	६
चञ्चर्यन्तेऽ०	१८	२५
चन्दन भ्रू.सं०	२२	४
चरस्यन्ति०	१६	२०
चलकिसल०	१३	३९
चापक्ष्यवुच्छ०	१२	२०
चारुकलहंस०	१३	२४
चारुमसीर०	१३	१
चिकीर्षित०	१२	६
चिचेत रामस	१४	६२
चितां कुरु च	२०	३४
चुक्षोपेन्द्र०	१४	४४
चुक्षुभे तत्र	१४	१०७
चेतसस्त्वयि	२०	२८
छ		
छिद्यादैवन्त	१७	४५
ज		
जगास्ति०	२०	३१

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकः	सर्गः	श्लोकाङ्कः
जगन्त्यमेया०	१२	२५
जगर्जुर्जहृषुः	१४	७
जगाहिरेऽम्बु	१४	६७
जग्लौ दध्यौ	१४	६०
जनानुरागेण	१२	२८
जलकामद०	१३	४२
जलतीरतु०	१३	४९
जहसे च०	१४	९३
जहीहि शो०	२८	१०
जिगमिषया०	१३	१५
जेतुं न०	१२	४६
ज्ञायिष्यन्ते०	१६	४१
ड		
डुढौकिरे०	१४	७१
त		
तं यान्तं०	१४	९७
तं रत्नदायम्	१२	११
ततः कथाभिः	२२	२४
,, पर०	२२	१
,, प्रगदि०	२०	२६
,, प्रजघटे०	१४	७७
,, प्रणीताः	१३	२६
,, प्ररुदितो	१६	१
,, प्रामु०	१७	२४
,, प्रोत्स०	१७	९६
,, शतस०	१७	९९
,, सको०	१२	८१
,, स गत०	१९	२२
,, समभ०	१७	५९
,, सोमि०	१५	९४
ततस्त्रिशिर०	१७	८९
तुतुषुर्वानरा	१४	११२

श्लोकः	सर्गः	श्लोकाङ्कः
ततोऽकृष्णा०	१७	८०
ततोऽक्रन्दी०	१५	९५
ततोऽचित्री०	१७	६४
ततो वृक्षास्यः	१२	१६
ततो वृक्षास्यः	१४	१
ततोऽद्विषु०	१७	६१
ततोऽधावन्	१७	७३
ततो नील०	१५	८०
ततो मात०	१७	१०९
ततो मायाम०	१७	१०७
ततो माया०	१७	२०
ततो रामेति	१४	४८
ततो रामो	२२	१
ततो रौद्रस०	१७	४६
ततो विजघटे	१४	६६
ततो विनिद्रम्	१२	१
तत्कर्म वाली०	१४	३७
तत्र जेतुं गमि०	१६	३४
तत्रेन्द्रजितम्	१७	३०
तत्रैषज्जाम्बवा	१५	१०२
तथापि वक्तुम्	१२	६५
तं नो देवा	१९	२
तमध्यासिष्ट	१५	९७
तमसाया	२२	१२
तमेवंवादिनम्	१६	३५
ततस्तनुर्जज्व०	१४	३०
तस्मात्कुरु	१२	७४
तस्माच्छिरपत०	१७	४५
तस्य चेमे	१५	१०३
तस्याप्यत्यक्र०	१५	१७
तस्याप्यवेभि०	१५	११६
तस्याहारिषत	१५	७९
तातं प्रसाद्य	२१	१९

श्लोकः	सर्गः	श्लोकाङ्कः
ताभ्यामन्यो०	१७	१०१
तामाणतन्तीम्	१७	९१
तां प्रत्यैच्छन्	१७	२८
तावभाषत	१७	२५
तावस्फावय०	१७	४३
तिरोबभूवे	१४	,,
तीव्रं स्यन्दि०	१६	७
तुङ्गतरुच्छाया०	१३	३४
तुङ्गमणिकिरण०	१३	३६
तुङ्गमहागिरि०	१३	२२
तुङ्गा गिरिवर०	१३	९
तुरङ्गाः पुस्फुटुः	१४	६
तूर्याणामथ	२२	२९
तृणहानि दुरा०	२०	३
तृणेढु०	२०	१३
तृणेढ्मि देवम्	१८	३३
ते तं न्याशिषत	१५	४३
तेनेऽद्रिबन्धो	१३	२७
ते परस्परमा०	१७	४४
तेऽभाषिषत	१५	६
तेऽभ्यगुर्भ	१५	२
ते रामेण सरभ०	१३	४८
तेऽध्यरासिषुः	१५	४२
तैरजेषत सैन्या	१५	७६
तौ हनूमन्तमा	१५	१०५
त्वं स्म वेत्थ	१८	१८
त्ववक्त्रैः	४	७४
त्वन्मित्रनाशो	१२	४७
त्वमजानन्निदम्	१८	१५
त्वमर्हसि भ्रातुः	१८	४२
त्वं पुनीहि	२०	२९
त्वया तु लोके	१२	३६
त्वयाद्य लङ्का०	१२	८०

श्लोकः	सर्गः	श्लोकाङ्कः
त्वयाद्य षयत	२१	५
त्वयापि नाम	१८	३२
त्वया संदर्शि०	२२	७
द		
दग्धशैल	१५	२३
दण्डेन कोशेन	१२	४३
दत्तः स्वदोषैर्	१२	८५
दत्तं न किं के	१२	६७
ददाल भूर्नभो०	१४	२०
दध्यावाऽद्भिः	१४	५०
दर्शयांचक्रिरे	१४	५४
दशग्रीवोऽहम्	१७	३८
दशदन्तिसह०	१७	६७
दातुः स्थातु०	१८	४०
दिक्पालैः	१७	२९
दिदृक्षुर्मैथिली	२०	७
दिद्विषुर्दुद्रुवुर्	१४	१०१
दिशो व्यश्नु०	१८	२६
दीव्यस्व रामेण	२०	१४
दीपतुल्यः	२२	२३
दुर्गाऽश्रिता०	१२	५२
दूरात्प्रतीहार०	१२	८
देवान्तकोऽपि	१५	७४
दैत्यक्षये महा०	२१	१८
दैवाद्बिभीहि	२०	२९
दोषैरस्मतै०	१७	४०
दौवारिका०	१२	७
द्रष्टाऽसि	२२	६
द्रष्टास्थस्तत्र	२२	१९
द्रुतमत्रास्त	१५	१२०
द्वेष्टि प्रायो	१८	९
ध		
धनानामाशास्ते	१७	२०
धनूंष्यारोप०	१४	८
धिक्त्मा	१६	९
धूम्राक्षोऽथ	१४	७३
धेमास्त्वं	१९	२७
ध्वजानुदधुवुः	१४	५३
न		
नखैरकर्तिषुः	१५	४
न गच्छामि	१८	३५
नगरस्त्रीस्तन०	२२	१३
न चोभाव०	१७	१०६
न जिजीवा०	१४	५८
न तान्गण०	१७	११
न त्वजायंत मे	१७	३७
न निश्चितार्थम्	१२	६३
न प्रावोचम०	१५	११
नभस्वान्यस्य	१७	११०
न योद्धुमशकन्	१५	४९
नहि प्रेष्यव०	२०	६
नाकल्पयत्सं०	२१	११
न/गात्तमिदम्	१४	६५
नाज्ञानन्सं०	१७	१६
नाजुगोप्स्ये	१७	२३
नाभविष्यदि०	२१	२
नाभिज्ञाते	१६	३१
नाभिज्ञाते स	१६	३७
नामोचयाम	२१	१४
नावकल्प्य०	१९	१७
निकुम्भो	१५	१२१
निमित्तशून्यै	१२	६९
निरचायि पक्षा	१५	१०७
निराकृत्य यथा	१७	३५
निरासू	१४	२३
निर्यत्स्फुलि०	१२	१८
निलिक्ये मूर्ध्नि	१४	७६
नेदानीं शक्र०	१८	३१
नवं पिरह०	२२	२०
न्यकृन्तंश्चक्र०	१७	१२
न्यवसिष्ट	१५	७
न्यश्यन् शस्त्रा०	१७	४
न्यषेधत्पा०	१७	८०
प		
पतिस्यति	१६	१६
पपात राक्षसो०	१४	८१
पयोघटोष्नी०	१२	७३
परिवेषावधि०	१५	८१
परितः पर्यवा०	१७	५२
पश्चिमं कर०	२०	४
पश्यामि	१२	५१
पस्पन्दे तस्य	१४	८३
पीडाकरम०	१७	२२
प्रकुर्याम वयं	१९	६
प्रणमन्त ततो	२१	१६
प्रणमन्	२१	१३
प्रणिपत्य ततो	१३	८
प्रतन्व्यः	२२	५
प्रतोदा जगलुः	१४	९९
प्रबाधमानस्य	१२	२
प्रमादवां०	१२	६०
प्रययाविन्द्र	१४	१६
प्रयाणमात्रेण	१२	३४
प्रवपाणि	२०	३६
प्रविधाय	२२	३१
प्रहस्तमर्थया०	१४	८८
प्रहस्तस्य	१४	१०२

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकः	सर्गः	श्लोकाङ्कः
प्राकारमात्रा०	१४	४८
प्राङ्मुहूर्तात्	१६	३३
प्राचुर्चूर्णञ्च	१५	३६
प्राच्यमस्त्रिहि	१४	१५
प्राज्ञवाक्यान्य०	१५	१४
प्राज्ञास्तेज	१८	६
प्राणा दुध्वंसिरे	१४	५५
प्राणिषुर्निहताः	१५	१०८
प्रादुन्वश्चानुभिः	१७	१४
प्राप्तचारिण्य०	२०	२१
प्रलोठन्तं	१७	१८
प्रावर्तिष्यन्त	२१	१५
प्रावर्धत रजो०	१७	६०
प्राशीश्च चातृपत्.	१५	२९
प्रीत्यानि नृत्तेषण	१२	१०
प्रेता वरेण शक०	२१	२०
प्रोक्षणादि नश०	१५	१०६
प्रोर्णोति शोक०	१८	२८
प्रौर्णावीच्छर०	१५	११९
प्रौर्णवीत्तेजसा	१५	१२३
फ		
फलभरमन्थर९	१६	४१
फलाशिनो	१२	४९
ब		
बद्धो वासर०	१३	२
बबाधे च बलम्	१४	४५
बहुधवक्रवारि	१३	२३
बिभ्रत्यस्त्राणि	१८	२४
बोभवीति न०	१८	४१
ब्रह्मर्षिभिर्नूनम्	१२	५७
ब्रह्मादधाद्दृधम्	१७	२७
भ		
भजन्ति विपद०	१८	४

श्लोकः	सर्गः	श्लोकाङ्कः
भत्सैश्च बिभिदुः	१४	२४
भुजांसवक्षःस्थल	१२	१६
भूमिष्ठस्यासमम्	१७	९७
भूमौ शेते दश०	१८	२
भेष्यते मुनिभिः	१६	४०
भ्रमरकुलाकुलो०	२१	२१
भ्रूभङ्गमाधाय	१२	७६
भ्रेजिरे स्वत०	१४	६८
भ्रेमुर्वधवधुः	१३	२८
म		
मण्डलाभ्याहता	१७	८४
मत्तेनामारि	१५	८५
मत्वा सहिष्णून्	१२	३२
मन्तुयिष्यति	१६	३१
मन्त्रे यातु	१८	१६
मन्युं यथ्या अद्व	१९	३०
मन्युं शोकजं ते	१४	४९
मरिष्यामि	१६	१३
मांसं हत्वाऽशमिव	१२	७२
मांसेनास्याश्रतां	१५	३०
माञ्जथो नाम	१६	२८
मां दुष्टां ज्व	२०	३०
मापराद्धोदितम्	१७	२१
मारयिष्यामि	१६	२२
मारं गतो गोत्र	१२	७१
माशोचिष्ट रघु	१५	१०८
मा स्म तिष्ठत	१७	२१
मित्रघ्नस्य प्रभु०	१४	३३
मिथ्या मारम	१७	३६
मिसेह रक्तम्	१४	१००
मुक्तेताकाश०	१९	९
मुदा संयुहि	२०	१६

श्लोकः	सर्गः	श्लोकाङ्कः
मूर्खास्त्वाम्रव	१५	१५
मूर्धजान् स्म	१८	३८
मूर्ध्ना विवमिवा०	१५	२२
मृगाः प्रवृषिणम्	१४	१४
मृदङ्गा धीरम्	१४	४
मेघाः सविद्युतो	१७	७४
मोक्षिप्रहः मुनी०	१५	२०
मोद्विष्ये कस्य	१६	२४
य		
म्रियेयोर्ध्वं मुहु०	१९	५
यत्नेन्द्रशक्तिम्	१५	४०
यत्र यत्र भवा०	१९	१८
यथापि यता०	१२	३३
यत्रपाञ्चाणिगात्रेषु	१९	१३
यस्कतेऽरीन्	१७	२५
यत्र यथामरि०	२१	९
यदेहं पर वैदेहि	२०	२५
यया न केतुः	१४	११३
यदा क्षितृत्व	१२	२९
यमलोकमिव	१७	६९
यमाघाकम्पनम्	१४	८६
याः सुहृत्सु	१६	२५
यावज्जीवम्	२१	६
यावत्र संत्रासित०	१२	४
युद्धाय राज्ञा	१२	२२
युद्धोन्मत्तं च	१५	७५
युयुत्सुःस्यन्दनात्	१४	९०
येन पूतकृतोऽ०	१८	१३
यैरघानि खरो०	१४	६६
योद्धारोऽविभरुः	१७	५३
योद्धुं सोऽप्यक्षयत्	१५	५९
र		
रक्तपङ्के राजाः	१४	२४

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकः	सर्गः	श्लोकाङ्कः
रक्तमयो०	१५	५१
रक्तं प्रच्चु०	१४	७९
रक्तेनाप्लि०	१५	४८
रणे चिक्रीड	१४	८०
रथेनाविध्य०	१५	८६
रविस्तप्स्यति	१६	६
रसान् संहर	२०	३२
राक्षसस्य न	१५	४८
राक्षसेन्द्र०	१५	१
राक्षसोऽतर्जं	१७	१०३
राक्षस्यः	१७	७१
राघवस्य	२०	३५
राघवस्याम्ट०	१७	९३
राघवस्या०	१५	१६
राघवो न	१४	४२
राजितं गारुडं	१७	१११
रामोऽपि	१२	४०
रावणः शुश्रु०	१४	२२
रावणबलम्	१३	५०
रावणस्य	१८	२९
रावणाङ्गपरि०	२०	२२
रुरुजुर्भेजिरे	१४	७८
रोदिम्यना०	१८	३०
लक्षे द्वे च	१७	६८
लङ्कालय	१३	३२
लज्जानता	२०	२०
ललुः खड्गान्	१४	९२
लवणजल०	१३	४४
लाङ्गूलैर्लो०	१४	२६
लेढि भेषज०	१८	७
लाभाद्भयाद्वा	१२	४८
लोलं कूला०	१३	३०
लोहबन्धैर्वं०	१४	५६
व		
वज्रमुष्टेर्नि०	१४	३४
वज्राभिघातैर्	१२	५८
वरवारणं	१३	७
वर्धिषीष्ठाः	१९	२६
वादयांचक्रिरे	१४	३
वानरा मुष्टि०	१४	२५
वायव्यास्त्रेण	१५	६७
वासयेत सु०	१९	१२
विनङ्क्ष्यति०	१६	२६
विपाकोऽयम्	१८	३
विभिन्ना	१४	४०
विभीषण०	१५	१००
विभीषणो०	१२	५५
विमलमहा०	१३	३७
वियत्यान०	१४	११०
विरुग्णसं	१२	७५
विरूपाक्ष०	१७	७८
विरूपाक्षो	१४	३५
विशिश्वासयि	१४	१२
वीर्यं मा न	१५	१२
वृद्धिक्षय०	१२	२६
व्यक्तुक्षद्वा०	१५	४७
व्यजिघृक्ष	१७	३९
व्यनाशयं०	१७	७६
व्यश्नुते स्म	१८	१
व्यख्यागम्य	२२	३४
व्योम प्राचि	१७	८५
श		
शक्तिं संस्व०	१८	२३
शक्तिरित्य०	१५	५५
शक्तैः सुहृद्भिः	१२	१४
शक्नोति यो न	१२	३३
शक्यान्य०	१२	४५
शत्रुभिर्निहते	१६	१०
शमं शमं	१८	२७
शरीरं लोहि०	१५	११७
शरैरताडय०	१७	४१
शस्त्रं तरुर्वी	१३	५३
शाम्यत्यृतुस०	१८	२१
शिक्षानभ्र०	२२	२७
शिला तरि०	१२	७७
शिवाः	१८	१२
शुश्राव रामः	१४	१७
शूलानि भ्रय०	१४	९
श्रीर्निष्कु०	१८	२२
श्लाघिष्ये केन	१६	४
ष		
षड्वर्गवश्यः	१२	३९
स		
संवर्गयां च०	१४	९४
संवाद्भिः सकु	२१	२२
स एव धार०	१९	४
स किङ्करैः	१२	१२
संकल्पं	२१	४
स चापि	१५	६३
स ताल्लाजी०	१५	५
सतामविभ्र	१७	५३
तत्त्वं समद्रु०	१५	३४
संदर्शितस्नेह०	१२	३१
संत्रस्ताना०	१५	६४
संदुधुवे तयोः	१४	१०
संधानकार०	१५	

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्लोकः	सर्गः	श्लोकाङ्कः
संधानमेवास्तु	११	५४
संधुक्षितं	१३	४१
संधौ स्थितो	१२	३०
सन्नत्स्या०	१६	२९
सपक्षोऽद्रि	१५	२४
सप्तर्षि	१५	९८
स विश्लेष	१४	८७
सभयं परिह०	१३	५
स भवान्	१९	२१
स भस्म०	१४	८५
समभुम्नन्तु	१७	१०८
समपणुवत	१७	'२५
समगत	१५	१२३
समनात्सी०	१५	१११
समपास्यत	२१	७
स महा०	१३	२८
समधत्ता०	१७	८६
समाश्वसिमि	१८	१०
समीरयोच०	१४	१११
समीहे मर्तुम्	१४	६३
समुत्क्षिप्य	२१	१
समुत्पेतुः	१४	१०

श्लोकः	सर्गः	श्लोकाङ्कः
समुपेत्य	२०	१
संपस्पर्शाथ	१४	६९
संपातिना	१४	३१
संबभूवुः	१४	२७
सरसबहुप०	१३	३३
सराघवैः किं	१२	१९
सर्वतश्चाभ०	१७	७२
सर्वस्य	१८	८
सवृत्तमच्छि०	१५	६८
सस्यन्दे	१४	९८
सस्फुरस्यो०	१७	९४
सस्रंसे शर०	१४	९२
सहभृत्यः	१६	३९
सहसा ते	१३	२५
जा जुगु	१४	५९
सामर्थ्यं	१५	३१
सारथि	१७	४२
सुखं स्वप्स्य	१६	३२
सुग्रीवो	१४	३८
सुग्रीवोऽ०	१५	५९
सेतुं महेन्द्रम्	२२	२५
सेवितासे	२२	३

श्लोकः	सर्गः	श्लोक
सेहे कपी	१४	
सोऽप्यष्ठीयत	१४	
सौमित्रिः	१५	
सौमित्रिरा०	१७	
सौर्याग्नेये	१५	
स्थानं नः	२२	
स्नानीयैः	१९	
स्नाह्यनुलि०	२०	
स्मेष्यन्ते	१६	
स्यन्त्वा	२२	
स्वर्गं विद्यत्व०	२०	
स्वर्भानुर्भा०	१८	१
स्वेनुस्ति	१४	
ह		
हतं रक्षांसि	१५	७
हता जन०	१२	
हया जिहे०	१४	
हरहासहृ०	१३	
हरिरवि०	१३	
हविर्जक्षिति	१८	
ही चित्रं	१४	

Bhawan's Sri S... racharya Sanskrit Mahavid... ...rathiya Vidya ...
567

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.